**Each directory should have a file called README bib.txt. with bibliographic entry with following details**:-

| | | |
|---|---|---|
| **i.** Discipline | : | Jain Darshan |
| Name of the text | : | **Tattvarth Vartika** |
| Author | : | Shrimad Bhatta Akalank |

**File named "README_type_log.txt" containing the following details**:-

| | | | |
|---|---|---|---|
| **i.** | Name of the institute | : | **R.S.K.S. Jaipur Campus** |
| **ii.** | (a) Principal Investigator | : | **Prof. Radhavallabh Tripathi** |
| | (b) Investigator | : | **Prof. K.B. Subbarayadu** |
| | (c) Co-investigator | : | **Dr. Shukla Mukherjee** |
| | (d) Editor | : | **Prof. Shriyansh kumar singhai** |
| **iii.** | Name of the typist | : | **Rajesh Kumar Sharma** |
| **iv.** | Completion date of data entry | : | 17-10-2012 |
| **v.** | Name of the proof reader | : | **Prof. Shriyansh kumar singhai** |
| **vi.** | Completion date of proof reading | : | 17.10.2012 |
| **vii.** | Name of the approval authority from Rashtriya Sanskrit Sansthan | : | **Dr. G. Ganganna** |
| | Date of approval | : | |

**Shrimad Bhatta Aklank's**

# Tattvarthvaritikam

**(The Descriptive Commentery of the Tattvarthsutra Written by Acharya Umaswami)**

**श्रीमद्भट्टाकलंकविरचितम्**

# तत्त्वार्थवार्तिकम्

**(श्रीमदुमास्वामिविरचितस्य तत्त्वार्थसूत्रस्य सभाष्यं वृत्तिः)**

**Prof. Radhavallabh Tripathi**
**Principal Investigator**

**Prof. Shriyansh Kumar Singhai**
**Editor**

**Prof. K.B. Subbarayadu**
Investigator

**Dr. Shukla Mukherjee**
Co-Investigator

**Dr. G.Gangana**
Approval Authority

**Rashtriya Sanskrit Sansthan (Deemed University)**
56-57, Janakpuri, New Delhi-58

## श्री तत्त्वार्थवार्तिकस्य विषयानुक्रमणिका।

### प्रथमोध्याय:

मङ्गलाचरणम् 38

मोक्षमार्गयोर्मागस्यैव कथं सूत्रकृतोल्लेख इत्यत्र युक्तिप्रदर्शनम् 38

मोक्षास्तित्वाख्याने प्रश्नः 38

बंधकारणनिर्देशपूर्वकमोक्षकारणोपदर्शनमयुक्तमित्यत्र विचार: 40

मोक्षमार्गस्वरूपाख्यानम् 41

सम्यग्दर्शनस्वरूपाख्यानम् 41

सम्यग्ज्ञानस्वरूपाख्यानम् 42

सम्यक्चारित्रस्वरूपाख्यानम् 42

सम्यग्ज्ञानादीनां कर्त्रादिव्युत्पत्तिप्रदर्शनम् 43

आत्मज्ञानादीनामेकान्तेन भेदाभेदपक्षं निरस्य युक्तिपुरस्सरं

कथंचिद्भेदाभेदपक्षस्थापनम् 43

समवायसम्बन्धविप्रतिषेध: 46

पर्यायपर्यायिणो: कथंचिद्भेदाभेदप्ररूपणम् 47

ज्ञानादीनां पौर्वापर्यप्रतिपादने युक्तिप्रतिपादनम् 50

ज्ञानादीनां प्रत्येकं सम्यग्विशेषणमिति कथनम्

मोक्षस्वरूपनिर्देश: 52

मार्गशब्दपरीक्षणम् 52

कपिलकणादगौतमतथागताभिमतमोक्षकारणान्युपन्यस्य तन्निराकरणपूर्वकमर्हत्प्रति-

पादितसम्यग्दर्शनादित्रितयस्य मोक्षकारणत्वनिरूपणम् 54

ज्ञानादेव मोक्षमभ्युपगच्छतां मतपरिहार: 58

युगपत्प्रवृत्तिपक्षमभ्युपगम्य ज्ञानदर्शनयोरेकत्वं व्यवस्थापयतोऽभिमतपरिहृति: 60

ज्ञानचारित्रयो: कालाभेदं प्ररूप्य तयोरेकत्वनिरूपयितु: सिद्धान्तपरिहार: 60

| | |
|---|---|
| सम्यग्दर्शनादीनां लक्षणभेदादेकमार्गानुपपत्तिं प्रदर्शयतो मतनिराकरणम् | 62 |
| सम्यग्दर्शनज्ञानयोर्ज्ञानचारित्रयोश्चाविनाभावप्रदर्शनम् | 63 |
| सूत्रकृन्निर्दिष्टसम्यग्दर्शनलक्षणम् | 64 |
| सम्यक्शब्दार्थविवेक: | 64 |
| दर्शनशब्दार्थनिरूपणम् | 64 |
| तत्त्वशब्दार्थनिरूपणं सम्यग्दर्शनस्यात्मपरिणामत्वप्रदर्शनं च | 65 |
| तत्त्वार्थशब्दयो: ग्रहणाग्रहणकृतो विवेक: | 67 |
| तत्त्वार्थश्रद्धानशब्दार्थनिरूपणम् | 68 |
| श्रद्धानस्य इच्छार्थत्वे दूषणम् | 68 |
| सम्यक्त्वप्रभेदपूर्वकं तल्लक्षणप्रदर्शनम् | 69 |
| निसर्गजाधिगमजभेदेन सूत्रकृन्निर्दिष्टसम्यग्दर्शनभेदप्रदर्शनम् | 69 |
| निसर्गजाधिगमजसम्यग्दर्शनस्वीकारे प्रतिवाद्युपन्यस्ताक्षेपाणां परिहार: | 70 |
| सूत्रस्थतच्छब्दग्रहणप्रयोजनोपदर्शनम् | 72 |
| सूत्रकृत्तत्त्वभेदप्ररूपणम् | 73 |
| तत्त्वभेदस्य मध्यमत्वेनाभिधानप्रयोजनम् | 73 |
| जीवाजीवान्तर्गतत्वेऽप्यास्रवादीनां पूर्वपक्षपुरस्सरं पृथगुल्लेखप्रयोजनम् | 73 |
| जीवादीनां निर्वचनप्ररूपणम् | 74 |
| जीवादीनां वार्तिकाभिमतलक्षणप्रदर्शनम् | 75 |
| जीवादीनां याथाक्रम्यनिदर्शनफलम् | 77 |
| तत्त्वशब्दस्य जीवादिभि: समानाधिकरणत्वप्रकारप्रदर्शनफलम् | 78 |
| सूत्रकृन्निर्दिष्टजीवादिव्यवहारस्य नामादिकारणप्रदर्शनम् | 79 |
| नामादीनां लक्षणाख्यानम् | 79 |
| नामस्थापनयोरेकत्वशङ्कायां परिहार: | 81 |
| द्रव्यभावयोरेकत्वशङ्कायां परीहार: | 81 |
| नामादीनां युक्तिपूर्वकं सप्रयोजनं पौर्वापर्याख्यानम् | 81 |

नामादिचतुष्टयाभिधाने विरोधमवकल्प्याऽऽक्षेपप्ररूपणे निराकरणम् 82
द्रव्यार्थिकपर्यायार्थिकान्तपातिनामादीनां पौनरुक्त्योल्लेखे परिहारः 85
सूत्रनिर्दिष्टतच्छब्दसाफल्यम् 85
सूत्रकृन्निर्दिष्टाधिगमकारणनिरूपणम् 86
सूत्रे प्रमाणशब्दस्य पूर्वनिपातत्वे युक्तिप्रदर्शनम् 86
अधिगमहेतुभेदप्रदर्शनम् 87
सप्तभङ्ग्या लक्षणपुरस्सरं तत्स्वरूपप्रदर्शनम् 87
अनेकान्ते सप्तभङ्ग्याः प्ररूपणम् 90
सप्तभङ्ग्यां प्रतिवाद्युपन्यस्तछलादिदोषपरिहारः 91
सूत्रकृन्निर्दिष्टनिर्देशाद्यधिगमहेतूपदर्शनम् 93
निर्देशाद्यभिधानप्रयोजनम् 94
जीवं पुरस्कृत्य नयद्वयं चावलम्ब्य निर्देशादिसंघटनम् 95
सूत्रकृन्निर्दिष्टसदादीनामधिगमहेतुत्वप्रदर्शनम् 99
सच्छब्दार्थप्ररूपणम् 99
युक्तिपूर्वकं सूत्रस्थसदादिपौर्वापर्यनिरूपणम् 99
सदादिषु प्रतिवाद्युपन्यस्तविप्रतिपत्तिपरिहारः 101
सूत्रकृन्निर्दिष्टज्ञानभेदप्ररूपणम् 103
मत्यादिशब्दानां सूत्रनिर्दिष्टानां निर्वचनाभिधानम् 103
आर्हतमतातिरिक्तमते ज्ञानस्य करणत्वानुपपत्तिरिति निरूपणम् 105
मत्यादीनां पौर्वापर्यक्रमनिरूपणम् 108
प्रतिवाद्याक्षिप्तमतिश्रुतयोरेकत्वस्य निराकरणम् 109
श्रुतशब्दार्थस्पष्टीकरणम् 110
सूत्रेण ज्ञानानां प्रमाणत्वव्यवस्थापनम् 111
प्रमाणशब्दस्य निर्वचनपूर्वकं स्वपरावभासकत्वसमर्थनं विज्ञानस्य फलनिदर्शनं च 111
सन्निकर्षस्य प्रामाण्यप्रत्याख्यानम् 111

मतिश्रुतज्ञानयोराद्ययोः परोक्षत्वव्यवस्थितिः 116
मतिश्रुतयोः कथमाद्यत्वमित्यत्र प्रतिवाद्युपन्यस्तदूषणपरिहारः परोक्षस्य प्रामाण्य-
व्यव्यवस्थापनं च 116
अवध्यादिज्ञानानां प्रत्यक्षत्वप्रतिपादनम् 117
प्रत्यक्षलक्षणकथनं तन्निर्वचनं च 117
प्रतिवाद्यभिमतप्रत्यक्षपरोक्षस्वरूपनिराकरणं, प्रतिवादियोगिनामतींद्रिय-
प्रत्यक्षासम्भवप्रदर्शनं च 118
मतिशब्दस्य नामांतरप्रदर्शनम् 121
मत्यादिनामान्तराणां मतिशब्दादनर्थान्तरत्वप्रदर्शनपूर्वकं तत्र प्रतिवाद्युपन्यस्त-
दूषणपरिहारः 124
मतिज्ञानस्य कारणत्वप्रदर्शनम् 127
इन्द्रियानिन्द्रियशब्दनामर्थप्रतिपादनम् 127
मतिज्ञानस्यावग्रहादिभेदचतुष्टयप्रदर्शनम् 128
अवग्रहादीनां लक्षणप्रतिपादनम् 125
अवग्रहेहयोरप्रमाण्यपरिहारः 128
मतिज्ञानस्यावग्रहादिभेदवहवादिप्रदर्शनम्
132
बहुबहुविधादीनां शब्दानां परस्परं भेदप्रदर्शनम् 135
वहवादयो भेदा द्रव्यस्य न तु गुणादीनामिति परिहारार्थं 'अर्थस्येति' सूत्रोपादानं 137
प्रतिवाद्युपन्यस्तसूत्रस्थविप्रतिपत्तिपरिहारश्च 138
केषां भवत्यवग्रहो न केषां चेति प्ररूपणाय व्यञ्जनस्यावग्रह इत्यादि सूत्रोपादानं
तत्रत्यविप्रतिपत्तिपरिहृतिश्च 139
मनसोऽनिन्द्रियाननिन्द्रियत्वे विवादस्तत्परिहृतिश्च 142
श्रुतज्ञानभेदप्रदर्शनम् 144
श्रुतस्य मतिपूर्वकत्वे प्रतिवाद्युपन्यस्ताक्षेपनिराकरणम् 146

अङ्गप्रविष्टाङ्गवाह्यानां स्वरूपनिदर्शनपुरस्सरं विशेषविवृति 147

देवनारकाणामवधेर्भव प्रत्ययत्वसमर्थनं 155

सूत्रस्थशब्दानामर्थप्रतिपादनं तत्रत्यविवादपरिहारश्च 155

देवनारकशेषाणामवधे: क्षयोपशमनिमित्तत्वप्रदर्शनं भेदाख्यानं च 158

अनुगाम्यादिषड्विधत्वप्रदर्शनमवधे: 159

अवधेर्देशावध्यादिभेदेन च त्रिविधत्वप्रदर्शनं देशावध्यादेर्जघन्यादिभेदेन
तारतम्यनिरूपणं च 159

मन:पर्ययभेदारख्यानम् 163

ऋज्वादीनां लक्षणस्य मन:पर्ययार्थस्य प्रदर्शनं निराकरणं च 163

मन:पर्ययज्ञानं मतिज्ञानमेवेति विप्रतिपत्ते: 163

ऋजुमतेर्विपुलमतेश्च भेदप्रदर्शनम् 166

अवधिमन:पर्यययोर्विशेषाख्यानविप्रतिपत्तिनिरसनपूर्वकं सूत्रशब्दानां तात्पर्यनिरूपणं च 167

मतिश्रुतयोर्विषयनिरूपणं सूत्रस्थशब्दानां च तात्पर्यप्ररूपणम् 168

अवधेर्विषयप्रदर्शनम् 169

मन:पर्ययविषयप्रदर्शनम् 170

केवलज्ञानविषयप्रदर्शनं सूत्रस्थशब्दानामर्थाभिधानं वैशद्येन 172

एकस्मिन्नात्मनि मत्यादिज्ञानानां स्थितिमर्यादाप्रदर्शनम् 173

मत्यादिज्ञानत्रयस्य सूत्रेण वैपरीत्याख्यानम् 175

निदर्शनपूर्वकं विपर्ययादिशब्दार्थाभिधानम् 176

मत्यादिज्ञानत्रयस्य वैपरीत्यहेतुप्रदर्शनं सूत्रेण 177

प्रतिवाद्यभिमतकारणादि वैपरीत्याख्यानम् 177

नैगमादिनयानां भेदप्रदर्शनम् 180

नयलक्षणप्रतिपादनम् 180

सप्तानामपि नयानां विस्तृतिपूर्वकं लक्षणकथनम् 181

इति प्रथमोऽध्याय:।

*****

## अथ द्वितीयोध्यायः।

| | |
|---|---|
| जीवस्यौशमिकादिभावानां प्रतिपादनम् | 189 |
| उपशमादिशब्दानां लक्षणप्रतिपादनम् | 189 |
| औपशमिकादीनां पौर्वापर्यक्रमप्रदर्शनं युक्त्या | 190 |
| औपशमिकादीनां द्वयादिशब्दैर्भेदप्रदर्शनम् | 194 |
| सूत्रस्थद्व्यादिशब्दानां भेदशब्देन वृत्तिनिरूपणम् | 194 |
| आद्यस्यौपशमिकस्य सम्यक्त्वचारित्रेति भेदाख्यानम् | 196 |
| औपशमिकसम्यक्त्वलक्षणम् | 196 |
| सप्तप्रकृत्युपशमकारणकथनौपशमिकचारित्रस्वरूपनिरूपणम् | 197 |
| क्षायिकभावस्य भेदाख्यानं प्रत्येकभेदस्य लक्षणोपादानं च | 198 |
| मिश्रभावस्य भेदप्ररूपणम् | 199 |
| सूत्रस्थशब्दानां परस्परं वृत्तिप्रदर्शनम् | 199 |
| क्षयोपशमस्वरूपोपादानम् | 200 |
| स्पर्धकस्य लक्षणम् | 200 |
| क्षायोपशमिकभेदानां ज्ञानादीनां भेदप्रदर्शनम् | 201 |
| औदयिकभावस्य भेदप्रदर्शनम् | 202 |
| औदयिकभेदानां गत्यादीनां स्वरूपनिदर्शनम् | 203 |
| पारिणामिकभावस्य भेदप्रतिपादनम् | 206 |
| जीवत्वादीनां पारिणामिकत्वसमर्थनम् | 206 |
| जीवत्वादिषु परवादिविप्रतिपत्तिनिर्हरणं जीवत्वादिस्वरूपप्रतिपादनं च | 206 |
| सूत्रस्थचशब्दस्य साफल्यप्रदर्शनम् | 208 |
| प्रतिवादिसमुपन्यस्तसान्निपातिकभावनिराकरणं सान्निपातिकभावस्य | |

मिश्रेऽन्तर्भावपूर्वकमाप्तोक्तभेदोपदर्शनम् 212
औपशमिकादीनामात्मतत्त्वव्यवस्थाने युक्तिप्रदर्शनम् 216
सूत्रेण जीवस्योपयोगलक्षणप्रतिपादनमुपयोगलक्षणयोश्च लक्षणप्रतिपादनम् 219
जीवस्योपयोगस्य लक्षणत्वालक्षणत्वे विप्रतिपत्तिपरिहार: 220
गुणगुणिनोस्तादात्म्ये चोपयोगलक्षणासंभवपरिहार: 220
आत्माभावे प्रदर्शितयुक्तीनां परिहार: 223
उपयोगभेदयो: प्रदर्शनम् 227
उपयोगभेदानामुल्लेख: सूत्रस्थपदानां पौर्वापर्यक्रमप्रदर्शनं च 228
संसारिमुक्तभेदेन जीवभेदप्रदर्शनम् 228
सूत्रस्थपदानामर्थप्रतिपादनं वृत्तिसमर्थनं च 228
समनस्कामनस्कभेदेन संसारिजीवभेदप्रदर्शनम् 230
समनस्कामनस्कयो: केन सम्बन्ध
इत्यत्र प्रतिवाद्युपन्यस्त विप्रतिपत्तिपरिहरणम् 230
त्रसस्थावरभेदेन संसारिणां भेदोपाख्यानम् 232
त्रसशब्दार्थप्रतिपादनं तत्रत्यविप्रतिपत्तिपरिहारश्च 232
स्थावरशब्दार्थप्रतिपादनं तत्रत्यविप्रतिपत्तिपरिहार: त्रसस्थावरयो: पौर्वापर्यक्रमे
युक्तिनिरूपणं च 233
स्थावरभेदोपाख्यानम् 233
पृथिव्यादिशब्दानां तात्पर्याख्यानं प्राच्यपौरस्त्यप्रतिपादने युक्तिप्रदर्शनं च 233
के त्रसा: इति प्रतिपादनम् 235
सूत्रस्थपदानां विप्रतिपत्तिपरिहारपूर्वकं तात्पर्यविवेचनम् 235
इन्द्रियसंख्याप्रतिपादनम् 236
इन्द्रियशब्दार्थप्रतिपादनं पराभिमतेन्द्रियनिराकरणम् 236
इन्द्रियाणां मूलभेदप्रतिपादनं सूत्रस्थपदानां प्रस्फुटतया तात्पर्यप्रदर्शनं च 237
इन्द्रियनामाख्यानम् 239

प्रतीन्द्रियनामव्युत्पत्तिं निरूप्य तेषां क्रमप्रतिपादने युक्तिप्रदर्शनम् 239
इन्द्रियाणां विषयनामाख्यानम् 242
प्रतिस्पर्शादिव्युत्पत्तिं निरूप्य सूत्रस्थशब्दानां व्युत्पत्तिप्रदर्शनपूर्वकं पौर्वापर्य
प्रतिपादने युक्त्याख्यानं तेषां कथञ्चिदेकत्वपृथक्त्वप्रदर्शनं च 242
मनसो विषयप्रतिपादनं सूत्रस्थ पदानां वैशद्येन तात्पर्यनिरूपणं च 245
वनस्पत्यन्तानां जीवानामेकेन्द्रियप्रतिपादनं सूत्रस्थपदानां च तात्पर्यनिरूपनम् 246
कृम्यादिजीवानामेकैकवृद्धिबलेनेन्द्रियप्ररूपणम् 247
समनस्कशब्दार्थप्रतिपादनम् 248
सूत्रस्थसंज्ञाशब्दार्थप्रतिपादनपूर्वकं तत्रत्यविप्रतिपत्तिपरिहार: 248
विग्रहगतौ जीवस्य कर्मयोगप्रतिपादनम् 249
सूत्रगतानां विग्रहादिपदानां प्रस्फुटतया तात्पर्यप्रतिपादनं च 249
जीवगतिस्थाननिरूपणं सूत्रस्थतात्पर्ये प्रतिवादयुपन्यस्त विप्रतिनिराकरणं च 250
मुक्तजीवस्य गतिनिरूपणम् 251
समयमवधीकृत्य संसारिजीवानां विग्रहवत्याः गत्या: प्रतिपादनम् 252
समयमवधीकृत्य विग्रहगतौ जीवस्थानाहारकप्ररूपणम् 254
आहारशब्दार्थप्ररूपणम् 254
जन्मभेदाख्यानम् 255
संमूर्छनादिशब्दार्थे निरूप्य तेषां पौर्वापर्यप्रतिपादने युक्तिप्रदर्शनम् 255
जन्मन: सचित्तादियोनिप्रदर्शनम् 257
सचित्तादिशब्दानां तात्पर्यप्रतिपादनम् 257
चशब्दतच्छब्दयो: साफल्यप्रदर्शनम् 257
योनिजन्मनोरभेदविप्रतिपत्तौ युक्तिप्ररूपणम् 258
सचित्तादीनां पौर्वापर्यनिरूपणे युक्तिप्रदर्शनम् 259
अचित्तयोनिकादय: के इति प्रतिपादनम् 259
जरायुजादिगर्भभेदनिरूपणम् 261

जरायुजादिशब्दानां तात्पर्यप्ररूपणम् 261
जरायुजादीनां पौर्वापर्यक्रमे युक्तिप्रदानम् 262
उपपादजन्मनिरूपणम् 263
संमूर्छनजन्मप्रतिपादनम् 263
शरीरभेदाख्यानम् 264
शरीरशब्दार्थनिरूपणम् 264
औदारिकादिशब्दानां व्युत्पत्तिनिदर्शनपूर्वकं सारार्थप्रतिपादनम् 265
सर्वेषामौदारिकादीनां कार्मणत्वप्रसङ्गविप्रतिपत्तिपरिहारश्च 265
औदारिकादीनां पौर्वापर्यक्रमे युक्तिप्रदर्शनम् 267
औदारिकादिशरीराणां परं परं सूक्ष्मत्वाख्यानम् 267
तैजसात्प्राच्यानां शरीराणामसंख्येयगुणत्वप्रतिपादनम् 268
उत्तरयोः शरीरयोरनन्तगुणत्वव्यवस्थापनम् 269
उत्तरयोः शरीरयोरप्रतिघातित्वसमर्थनम्
270
उत्तरयोः शरीरयोरनादिसम्बन्धत्वव्यवस्थापनम् 271
तत्र सर्वथाद्यनादित्वे दोषनिरूपणम् 271
उत्तरशरीरे केषां भवत इति निरूपणम् 272
एकस्मिन्नात्मनि यौगपद्येन कियन्ति शरीराणि भवितुमर्हन्तीति प्रतिपादनम् 272
अन्त्यशरीरस्य निरुपभोगत्वप्रतिपादनम् 273
औदारिकशरीरस्य गर्भसम्मूर्छनजत्वाख्यानम् 274
वैक्रियिकशरीरस्योपपादजत्वलब्धिजत्वप्रतिपादनम् 274
सर्वशरीरिणां वैक्रियिकत्वाक्षेपे युक्तिप्रदर्शनम् 275
तैजसशरीरस्य लब्धिजत्वप्रतिपादनम् 276
आहारकशरीरस्वरूपवर्णनम् 276
सकलानां शरीराणां परस्परतः संज्ञादिभिर्भेदाख्यानम् 277

जीवविशेषाणां नपुंसकत्वप्रतिपादनम् 282
देवानां नपुंसकत्वाभावप्रतिपादनम् 283
देवनारकारकाद्यतिरिक्तजीवानां त्रिवेदत्वप्रतिपादनम् 283
वेदत्रयसिद्धिः 283
अनपवर्त्यायुषः के? 284

इति द्वितीयोऽध्याय:

*****

**अथ तृतीयोध्याय:।**

आलम्बनस्थितिप्रकारपूर्वकं सप्तानां नरकभूमीनामुल्लेख: 287
सूत्रस्थपदानां संघटनपूर्वकं प्रतिपदसाफल्यप्रदर्शनम् 287
सप्तासु भूमिषु नरकसंख्याप्रतिपादनम् 291
रत्नप्रभादिषु नियतप्रदेशे नरकनिदर्शनम् 292
नारकाणां स्वभावप्ररूपणम् 294
नारकाणां परस्परोदीरितदु:खत्वप्रदर्शनम् 296
चतुर्थ्या: प्राच्यासु भूमिषु संक्लिष्टासुरोदीरितदु:खप्रदर्शनम् 297
तत्रोदीरितशब्दग्रहणाग्रहणकृतविप्रतिपत्तिपरिहारश्च 297
याथाक्रम्येण नरकेषु जीवानामुत्कृष्टस्थित्युपवर्णनम् 299
सूत्रस्थपदानां परस्परसम्बन्धाख्यानम् 299
रत्नप्रभादिषु प्रतिप्रस्तारं जघन्या स्थिति: 300
द्वीपसमुद्राणां नामारख्यानम् 303
जंबूद्वीपशब्दार्थ: 303
लवणोदशब्दार्थः 303
द्वीपसमुद्राणां विष्कंभे स्थितिप्रकाराख्यानम् 304

सूत्रस्थद्विर्द्विर्विष्कभादीनां पदानां साफल्यप्रदर्शनम् 304

जंबूद्वीपस्वरूपवर्णनम् 305

क्षेत्राणां नामाख्यानं भरतशब्दार्थप्रतिपादनं तत्स्थाननिरूपणं च 306

विजयार्धरजताद्रिवर्णनम् 307

हैमवतादिशब्दानामर्थप्रतिपादनं तत्स्थाननिरूपणं च 308

विदेहक्षेत्रभेदाख्यानं तेषां स्वरूपनिरूपणं च 309

क्षेत्रविभाजिनां हिमवदादिपर्वतानां नामाख्यानं हिमवदादिशब्दानामर्थप्रतिपादनं

स्थितिक्षेत्र निरूपणं च 324

हिमवदादिगिरीणां हेमादिवर्णमयत्वप्रतिपादनम् 327

हिमवदादिमहीधराणां मणिविचित्रपार्श्वत्वतुल्यविस्तारत्वयोर्वर्णनम् 328

पर्वतानामुपरि याथाक्रम्येण षण्णां सरसां नामाख्यानम् 328

प्रथमसरसोविष्कंभावगाहयोर्वर्णनम् 328

तन्मध्यस्थपुष्करस्य परिमाणाख्यानम् 329

प्रथमह्रदातिरिक्तह्रदानां विष्कंभादिनिरूपणं तन्मध्यस्थानां पुष्कराणां

च परिमाणनिरूपणम् 329

ह्रदस्थानां देवीनां नामाख्यानम् 331

आर्हतमताभिमतनदीनां नामाख्यानम् 332

प्रतियमलादिनदीनां पूर्वसमुद्रगमनप्रतिपादनम् 332

प्रतियुगलान्त्यनदीनामपरसमुद्रगमनत्वप्रतिपादनम् 333

गंगासिन्ध्वादिनदीनां पद्मादिह्रदोत्पत्त्यादिनिरूपणम् 333

गंगासिन्ध्वादिनदीनां परिवाराख्यानम् 337

भरतक्षेत्रस्य परिमाणनिरूपणम् 338

विदेहान्तवर्षधरवर्षाणां परिमाणनिरूपणम् 338

उत्तरैरावतादीनां दक्षिणैस्तौल्यप्रदर्शनम्

339

| | |
|---|---|
| उत्सर्पिण्यवसर्पिणीभ्यां षट्समयाभ्यां भरतैरावतयोर्वृद्धिह्रासोपवर्णनम् | 340 |
| वृद्धिह्रासनिमित्तप्रदर्शनम् | 340 |
| अवसर्पिण्यादीनां लक्षणप्रतिपादनम् | 340 |
| भरतैरावतापरभूमीनामवस्थितत्वप्रतिपादनम् | 341 |
| हैमवतकहारिवर्षकदेवकुरुवकाणां स्थितिप्ररूपणम् | 341 |
| दक्षिणहैमवतकादिभिरुत्तरहैमवतकादीनां स्थितिसाम्यप्रदर्शनम् | 342 |
| वैदेहिकानां जनानां स्थितिप्ररूपणम् | 342 |
| प्रकारान्तरेण भरतक्षेत्रस्य विष्कंभोपवर्णनम् | 342 |
| लवणसमुद्रोपवर्णनम् | 342 |
| धातकीखण्डस्थवर्षादीनां परिमाणादिप्रदर्शनम् | 345 |
| धातकीखण्डस्थभरतस्याभ्यन्तरविष्कंभादिप्रतिपादनम् | 346 |
| भरतातिरिक्तक्षेत्राणां विष्कम्भवर्णनम् | 346 |
| वर्षादीनामवगाहप्रदर्शनम् | 346 |
| पुष्करार्धस्थक्षेत्रादीनां विष्कंभादिवर्णनम् | 347 |
| पुष्करार्धसंज्ञाया अभिधेयनिरूपणम् | 349 |
| मानुषोत्तरपर्वताद्बहिर्मनुष्यासत्त्वप्रतिपादनम् | 350 |
| नन्दीश्वरद्वीपवर्णनम् | 350 |
| मानुषोत्तरात्प्राग्वर्तिनां मनुष्याणामार्यम्लेच्छेति भेदप्रतिपादनम् | 354 |
| आर्याणां भेदाख्यानम् | 354 |
| अनृद्धिप्राप्तार्याः पञ्चविधाः | 355 |
| ऋद्धिप्राप्तार्याणां भेदप्रभेदाख्यानम् | 357 |
| म्लेच्छानां भेदप्रतिपादनम् | 360 |
| कर्मभूमित्वं केषां क्षेत्राणामिति प्रतिपादनम् | 361 |
| कर्मभूमित्वव्यपदेशसमर्थनम् | 361 |
| मनुष्याणामुत्कृष्टानुत्कृष्टस्थित्युपवर्णनम् | 362 |

| | |
|---|---|
| प्रमाणविधिस्तत्र | 362 |
| लौकिकप्रमाणस्य भेदाख्यानम् | 362 |
| लोकोत्तरप्रमाणस्य भेदाख्यानम् | 363 |
| तत्र द्रव्यसंख्यासंख्येयोपमानपल्यक्षेत्रकालभावप्रमाणभेदाख्यानम् | 363 |
| तिर्यग्योनिजानां स्थितिप्ररूपणम् | 368 |
| तिरश्चां भेदास्तेषां प्रत्येकस्योत्कृष्टस्थित्युपवर्णनं च | 369 |
| तिरश्चां भवस्थितिकायस्थितिप्ररूपणम् | 370 |


इति तृतीयोध्यायः।

*****

**अथ चतुर्थोध्यायः।**


| | |
|---|---|
| देवानां निकायप्रतिपादनं | 371 |
| भवनवासिव्यन्तरज्योतिष्कनिकायेषु पीतान्तलेश्याचतुष्कतिपादनम् | 371 |
| भवनवास्यादिनिकायानामन्तर्विकल्पप्रतिपादनम् | 372 |
| इन्द्रादिभेदेन देवानां विशेषप्रतिपादनम् | 373 |
| व्यन्तरज्योतिष्काणां त्रायस्त्रिंशल्लोकपालौ वर्जयित्वा, इतराष्टविकल्पप्रतिपादनम् | 374 |
| भवनवासिव्यन्तरयोर्द्वीन्द्रत्वप्रतिपादनम् | 375 |
| ईशानान्तस्वर्गस्थदेवानां प्रवीचारोपदेशः | 376 |
| ईशानान्तस्वर्गातिरिक्तस्वर्गिणां प्रवीचारप्रतिपादनम् | 376 |
| कल्पातीतदेवानामप्रवीचारत्वप्रतिपादनम् | 378 |
| भवनवासिदेवानां भेदाख्यानम् | 379 |
| असुरकुमारशब्दयोर्विप्रतिपत्तिपुरस्सरं तात्पर्यप्रतिपादनम् | 379 |
| असुरादिकुमाराणां संख्यापूर्वकं भवननिर्देशः | 380 |
| व्यन्तरदेवभेदाख्यानं व्यन्तरशब्दार्थप्रतिपादनपूर्वकं किन्नरादीनां | |

| | |
|---|---|
| किन्नरत्वादि संज्ञासु हेतुप्रदर्शनम् | 381 |
| ज्योतिष्कदेवानां भेदप्रतिपादनम् | 382 |
| ज्योतिष्कादिशब्दानामर्थप्रतिपादनं, सूर्यादीनां पूर्वापरत्वोपनिपाते युक्तिप्रदर्शनम् | 382 |
| ज्योतिष्काणां गतिविशेषप्रतिपत्तिनिरूपणम् | 385 |
| सूत्रस्थपदानां युक्तिपूर्वकं तात्पर्यप्रस्फुटीकरणम् | 385 |
| गतिमज्ज्योतिःसम्बन्धेन व्यवहारकालप्रतिपादनम् | 388 |
| कलासमूह एव काल इति सिद्धान्तस्य प्रत्याख्यानम् | 389 |
| ज्योतिष्कदेवानां वहिरवस्थितत्वप्रतिपादनम् | 389 |
| चतुर्थनिकायस्य नामाख्यानम् | 390 |
| वैमानिकदेवभेदप्रतिपादनम् | 390 |
| वैमानिकानामवस्थितिविशेषप्ररूपणम् | 391 |
| वैमानिकदेवानां सौधर्मादिस्थाननामाख्यानम् | 392 |
| सौधर्मादिशब्दानां तात्पर्यप्रतिपादनम् | 392 |
| सर्वार्थसिद्ध्यादिसूत्रस्थपदानां पृथग्ग्रहणे तात्पर्यप्रदर्शनम् | 393 |
| सौधर्मादिस्वर्गाणां स्थानानां विमानप्रस्ताराणां तत्रस्थदेवपरिषदां देवानामायुषां चेत्यादीनां विस्तरेण वर्णनम् | 394 |
| स्थितिप्रभावादिभिरुत्तरोत्तरदेवानां विशेषप्रतिपादनम् | 409 |
| स्थित्यादिशब्दानां तात्पर्यनिरूपणम् | 409 |
| गत्यादिभिर्देवानां हीनत्वप्रतिपादनं गत्यादिशब्दार्थनिरूपणं च | 411 |
| गत्यादिशब्दानां पौर्वापर्यक्रमे युक्तिप्रतिपादनम् | 411 |
| देवानामुत्तरोत्तरमभिमानहानित्वे युक्तिनिरूपणम् | 412 |
| सौधर्मादिषु कल्पेषु लेश्याप्रतिपादनम् | 413 |
| लेश्यायां निर्देशवर्णपरिणामादिकारणनिरूपणम् | 415 |
| ग्रैवेयकेभ्यः प्राच्यानां विमानानां कल्पत्वप्रतिपादनम् | 420 |

लौकान्तिकदेवानां स्थानविनिर्णय: 421
लौकान्तिकदेवानां भेदप्ररूपणम् 422
सारस्वतादित्याद्यन्तरालवर्तिनां देवानां नामाख्यानम् 423
विजयाद्यनुदिशविमानस्थदेवानां द्विचरमत्वप्रतिपादनम् 424
द्विचरमशब्दस्य विप्रतिपत्तिनिरसनपूर्वकं तात्पर्याख्यानम् 424
औपपादिकमनुष्येभ्य: शेषाणां तिर्यग्योनित्वप्रतिपादनम् 426
सूत्रस्थपदानां तात्पर्यनिदर्शनम् 426
भवनवासिनामुत्कृष्टस्थित्युपवर्णनम् 427
सौधर्मैशानदेवानामुत्कृष्टस्थित्युपर्वणनम् 428
सानत्कुमारमाहेन्द्रयोरुत्कृष्टस्थितिनिर्देश: 428
ब्रह्मलोकाद्यच्युतान्तेषूत्कृष्टस्थित्याख्यानम् 428
आरणाच्युतादूर्ध्वविमानानामुत्कृष्टस्थित्युपवर्णनम् 429
सौधर्मैशानदेवानामनुत्कृष्टस्थित्युपर्वणनम् 430
सौधर्मैशानातिरिक्तविमानानां जघन्यस्थितिप्रतिपादनम् 430
प्रथमनरकस्योत्कृष्टस्थितेर्द्वितीयादिनरकाणां जघन्योत्कृष्टस्थित्योश्च प्रतिपादनम् 431
प्रथमनरकस्य जघन्यस्थित्युपर्वणनम् 432
भवनवासिनां जघन्यस्थित्युपवर्णनम् 432
व्यन्तराणां जघन्यस्थित्युपदेश: 432
व्यन्तराणामुत्कृष्टस्थितिनिर्देश: 433
ज्योतिष्काणामुत्कृष्टस्थित्युपदेश: 433
ज्योतिष्काणां जघन्यस्थित्युपपादनम् 433
लौकान्तिकानां स्थित्युपदर्शनम् 434
जीवस्यैकानेकात्मकत्वोपवर्णनम् 434
आत्मनोऽनेकात्मत्वप्रतिपादने युक्तिप्रदर्शनम् 434
अनेकात्मकात्मकस्यैकस्य जीवस्याभिधानप्रकारोपवर्णनम् 438

| | |
|---|---|
| क्रमयौगपद्याभिधाने युक्तिप्रदर्शनम् | 438 |
| सकलविकलादेशयो: स्वरूपप्रतिपादनम् | 438 |
| संप्तभंग्या नामाख्यानं पदार्थसंघटनपूर्वकं स्वरूपोपवर्णनं च | 439 |
| कालादीनां निरूपणम् | 445 |
| विकलादेशे सप्तभंग्युपाख्यानम् | 450 |
| सप्तभंग्यां प्रतिवाद्युपन्यस्तविरोधपरिहार: | 452 |


इति चतुर्थोऽध्याय:।

*****

**अथ पंचमोऽध्याय:।**


| | |
|---|---|
| अजीवपदार्थभेदाख्यानम् | 454 |
| प्रतिवाद्युपन्यस्ताजीवशब्दे विप्रतिपत्तिपरिहार: | 456 |
| कायशब्दार्थनिरूपणपूर्वकं तत्साफल्यप्रदर्शनम् | 456 |
| धर्मादिसंज्ञानां हेतुप्रदर्शनम् | 458 |
| धर्मादीनां संक्षेपेण विप्रतिपत्तिनिवृत्तिपूर्वकं स्वरूपवर्णनम् | 458 |
| पुद्गलस्य लक्षणं परमाणुषु च तद्भावविषयकम् | 459 |
| धर्मादीनां पौर्वापर्यक्रमप्रतिपादने हेत्वभिधानम् | 460 |
| अजीवादीनि द्रव्याणीति प्रतिपादनम् | 462 |
| द्रव्यशब्दार्थनिरूपणम् | 462 |
| द्रव्यत्वयोगाद् द्रव्यमित्यभिवादिनां सिद्धान्तनिराकरणम् | 463 |
| गुणसद्भावो द्रव्यमिति सिद्धान्तनिराकरणम् | 467 |
| अजीवाभिधानानन्तरं जीवाभिधानम् | 471 |
| सूत्रस्थवहुवचनप्रतिपादनप्रयोजनम् | 473 |
| धर्माधर्मादिद्रव्याणां विशेषप्रतिपादनम् | 474 |

विप्रतिपत्तिनिराकरणपूर्वकं सूत्रस्थनित्यादिपदानां तात्पर्यप्रतिपादनम् 475

पुद्गलानां स्वरूपपरिचयः 476

आकाशावधिद्रव्याणां प्रत्येकमेकत्वप्रतिपादनम् 477

आकाशान्तद्रव्याणां निष्क्रियत्वप्रतिपादनम् 479

क्रियालक्षणं तद्वृत्तिप्रदर्शनं च निष्क्रियत्वादुत्पादाद्यभाव इति विप्रतिपत्तिनिरसनम् 479

क्रियाहेतुगुणसद्भावात्परत्र क्रियाहेतुरितिसिद्धान्तनिराकरणम् 480

पुद्गलानां क्रियाभेदप्रतिपादनम् 483

क्रियायोगादात्मनः क्रियावत्त्वं न तु स्वरूपत इति सिद्धान्तपरिहरणम् 483

धर्माधर्मैकजीवानामसंख्येयप्रदेशत्वप्रतिपादनं विप्रतिपत्तिनिरसनपूर्वकमसंख्येय-प्रदेशशब्दयोः सूत्रस्थयोस्तात्पयप्रदर्शनम् 485

उपचारतः प्रदेशवत्त्वपरिहारनिरूपणम् 486

घटवदात्मादीनां प्रदेशवत्त्वनिराकरणम् 488

आकाशस्यानन्तप्रदेशवत्त्वप्रतिपादनम् 490

असंख्येयानन्तशब्दयोर्भेदप्रदर्शनम् 491

पुद्गलानां प्रदेशसंख्याप्रतिपादनम् 492

असंख्येयप्रदेशे लोके कथमनन्तदेशानामवस्थानमित्यत्र युक्तिप्रतिपादनम् 492

परमाणोः प्रदेशानामभावप्रतिपादनं युक्तिपूर्वकम् 493

अप्रदेशत्वादभावः परमाणोः स्यादिति विप्रतिपत्तिपरिहाराय युक्तिप्ररूपणम् 494

लोकाकाशे धर्मादीनामवगाहप्रदर्शनम् 494

आकाशास्यास्वप्रतिष्ठत्वप्रतिपादनम् 494

परमार्थतयाधाराधेयाभावप्रतिपादनमाकाशादीनाम् 495

आकाशधर्मादीनामाधाराधेयत्वे युतसिद्धिप्रसंग इति प्रतिवाद्युपन्यस्तविप्रतिपत्ति-परिहारः 496

लोकशब्दार्थप्ररूपणम् 498

| | |
|---|---|
| धर्माधर्मयोः कृत्स्नलोकाकाशेऽवगाहप्रदर्शनम् | 498 |
| एकप्रदेशादिषु पुद्गलानामवगाहप्रदर्शनम् | 498 |
| पुद्गलादीनामेकप्रदेशे युक्तिपूर्वकमवस्थानप्रतिपादनम् | 498 |
| जीवानामसंख्येयभागादिष्ववगाहप्रतिपादनम् | 500 |
| जीवात्मनां स्वशरीरप्रमाणत्वव्यवस्थापनम् | 562 |
| आत्मनः शरीरपरिमाणत्वे समुपन्यस्ते प्रदीपदृष्टान्ते प्रदीपवदात्मनोऽनित्यत्वविशरणत्वप्रसंग इतिविप्रतिपत्तिनिरासः | 502 |
| विप्रत्तिपात्तिनिरसनपूर्वकमात्मनः प्रतिप्रदेशं गुणविशेषाभावप्रतिपादनम् | 502 |
| धर्माधर्मद्रव्ययोरुपकारप्रदर्शनम् | 505 |
| गतिस्थित्युपग्रहाविति सूत्रस्थ स्फुटतया वृत्तिनिरूपणम् | 506 |
| उपग्रहवचनसाफल्यप्रदर्शनम् | 506 |
| आकाशस्यैव गतिस्थित्युपग्रहत्वमभिमन्यानां नार्थोधर्माधर्माभ्यमिति विप्रतिपत्तिपरिहारः | 509 |
| धर्माधर्मद्रव्ययोः स्वोपकारे परस्पराविरोधोपवर्णनम् | 511 |
| धर्माधर्मयोरस्तित्वप्रतिपादनं तत्रत्यविप्रतिपत्तिनिरासश्च | 512 |
| आकाशस्योपकारप्रदर्शनम् | 515 |
| अयुतसिद्धत्वेऽप्याकाशादीनामा धाराधेयत्वसमर्थनम् | 516 |
| आकाशस्यावगाहन सामर्थ्यप्रदर्शनं प्रतिवाद्यभिमताकाशस्वरूपनिराकरणं च | 517 |
| पुद्गलानां शरीराद्युपकारोपवर्णनम् | 519 |
| शरीरादीनां याथाक्रम्ये हेतूपदर्शनम् | 519 |
| शरीरादीनां पुद्गलस्योपकारकत्वप्रदर्शनपूर्वकं तदुपदेशसाकल्यप्रदर्शनम् | 521 |
| वाचः स्वरूपनिदर्शनपूर्वकं भेदाख्यानम् | 522 |
| मनसो भेदनिर्देशपूर्वकं स्वरूपवर्णनं प्रतिवाद्यभिमतमनःस्वरूपस्य विस्तरेण निराकरणम् | 523 |
| प्राणापानस्वरूपवर्णनम् | 528 |

| | |
|---|---|
| पुद्गलानां सुखाद्युपकारान्तरवर्णनम् | 529 |
| सुखादीनां स्वरूपाख्यानम् | 530 |
| पुद्गलकृतमरणस्वरूपोपग्रहत्वस्य चात्मन: समर्थनम् | 531 |
| जीवानामुपग्रहत्वप्रदर्शनं सूत्रस्थ पदानां साफल्यकथनं | 532 |
| कालकृतवर्तनाद्युपकारवर्णनम् | 533 |
| वर्तनादीनां विप्रतिपत्तिनिराकरणपूर्वकं स्वरूपाभिधानम् | 534 |
| परत्वापरत्वयो: साफल्यस्य वर्तनादीनां च याथाक्रम्य प्रतिपादनम् | 546 |
| पुद्गलस्वरूपाभिधानम् | 546 |
| स्पर्शादीनां पौर्वापर्याभिधाने युक्तिप्रदर्शनं तत्रत्यविप्रतिपत्तिपरिहारश्च | 546 |
| स्पर्शादीनां भेदाख्यानम् | 547 |
| शब्दादिभेदेन पुद्गलानां पर्यायप्रतिपादनम् | 548 |
| शब्दस्य भेदप्रभेदनिर्देशपूर्वकं स्वरूपाख्यानम् | 548 |
| बन्धस्य भेदनिर्देशपूर्वकं स्वरूपाभिधानम् | 551 |
| सौम्यादीनां भेदनिर्देशपुरस्सरं स्वरूपाभिधानम् | 554 |
| शब्दादीनां पुद्गलैरन्यत्वानन्यत्वाद्यनेकान्तत्वप्रदर्शनम् | 556 |
| पुद्गलानां मूलभेदाख्याननमुस्कन्धनामर्थस्य वचननिर्देशतात्पर्यस्य च निरूपणं | |
| अण्वादीनां स्वरूपे प्रतिवाद्युपन्यस्तविवादपरीहार: | 558 |
| स्कंधानामुत्पत्तिप्रकारोपवर्णनम् | 562 |
| अणूत्पत्तिवर्णनम् | 563 |
| भेदसंघातेभ्य स्कन्धपुद्गलस्य चाक्षुषत्वाचाक्षुत्वम् | 564 |
| सदिति द्रव्यलक्षणप्रतिपादनम् | 564 |
| सत्पदार्थनिरूपणम् | 564 |
| सूत्रस्थोत्पादादिपदानां तात्पर्यप्रतिपादनम् | 565 |
| द्रव्याणामुत्पादाद्यात्मकत्वानेकान्तसमर्थनम् | 565 |
| सच्छब्दार्थप्ररूपणमेकत्रोत्पादादित्रयाणामविरोधप्रतिपादनम् | 566 |

नित्यशब्दार्थनिरूपणम् 568

व्ययोत्पादयो:द्रव्ये स्थितिः कथम् 569

बन्धकारणोपदर्शनम् 569

जघन्यगुणानां बन्धाभावनिरूपणम् 570

गुणसाम्ये सदृशानां बन्धाभावनिरूपणम् 571

द्व्यधिकादिगुणानां बंधप्रतिपादनम् 572

बन्धेऽधिकयोर्गुणयो: पारिणामिकत्वप्रतिपादनम् 573

द्रव्यस्य गुणपर्ययवत्त्वसमर्थनम् 575

कालस्य द्रव्यत्वसमर्थनम् 576

कालस्यानन्तसमयत्वप्रतिपादनम् 577

गुणलक्षणप्रतिपादनम् 577

परिणामशब्दार्थप्ररूपणम् 578


इति पञ्चमोध्याय:।

*****

**षष्ठोध्याय:।**


योगशब्दार्थनिरूपणम् 580

कर्मशब्दार्थनिरूपणम् 580

कर्मयोगशब्दयो: कर्त्रादिव्युत्पत्तिनिरूपणम् 581

आत्मपरिणामत्वाद्योगशब्दस्य त्रैविध्यानुपपत्तिरिति विप्रतिपत्तिपरिहार: 581

योगशब्दार्थस्य विप्रतिपत्तिपरिहारपूर्वकं प्रतिपादनम् 582

आस्रवशब्दार्थनिरूपणम् 583

पूर्वोत्तरसूत्रयोरैक्यसम्बन्धिविप्रतिपत्तिनिरास: 583

आस्रवसंज्ञायां युक्तिप्रदर्शनम् 584

पुण्यपापभेदेन कर्मद्वैविध्यप्ररूपणम् 584

पुण्यपापयोरैक्यपरिहार: 585

सकषायाकषायप्राणिनोरास्रवविशेषाख्यानम् 587

सांपरायिकास्रवस्य भेदाख्यानम् 588

इन्द्रियादीनामात्मनो भेदाभेदयोरनेकान्तसमर्थनम् 589

पञ्चविंशतिक्रियाणां विस्तरेण लक्षणनिर्देशपूर्वकं विवरणम् 589

इन्द्रियकषायाव्रतानां क्रियास्वभावत्वान्नार्थ उल्लेखेनेति विप्रतिपत्तिनिराकरणम् 591

इन्द्रियग्रहणमेव सूत्रेऽस्त्वित्यादिविप्रतिपत्तिपरिहरणम् 592

तीव्रादिभेदेनास्रवविशेषाभिधानम् 593

सूत्रस्थभावशब्दस्य तीव्रादिविशेषणत्वे विप्रतिपत्तिपरिहार: 593

वीर्यादे: पृथग्ग्रहणसमर्थनम् 595

आस्रवाधिकरणनिरूपणम् 596

जीवाधिकरणस्य भेदाख्यानम् 597

सूत्रस्थसंरम्भादिपदानां तात्पर्याख्यानम् 597

सरम्भानादीनां पौर्वापर्यक्रमे युक्तिनिदर्शनम् 599

सरम्भादीनामास्रवत्वसमर्थनं भेदोल्लेखश्च 599

अजीवाधिकरणभेदनिरूपणम् 601

निवर्तनादीनां भेदप्रतिपादनम् 601

ज्ञानदर्शनावरणयोरास्रवकारणप्रतिपादनम् 603

प्रदोषादिशब्दानां तात्पर्यप्रतिपादनम् 603

प्रतिवाद्युपन्यस्तज्ञानदर्शनावरणयोरेकत्वशंकापरीहार: 604

केवलिनि ज्ञानदर्शनयोर्यौगपद्यस्य तदितरेषु क्रमिकत्वस्य च प्रतिपादनम् 605

अतीतपदार्थेष्वपि केवलिनामवधिज्ञानिनां च दर्शनशक्तिप्रतिपादनम् 606

मन:पर्ययदर्शननिषेधोपवर्णनम् 606

असद्वेद्यस्य शोकाद्यास्रवकारणनिरूपणम् 607

| | |
|---|---|
| शोकादिपदानां विप्रतिपत्तिपरिहारपूर्वकं स्फुटतया तात्पर्योपवर्णनम् | 608 |
| असद्वेद्यशब्दार्थनिरूपणम् | 610 |
| दु:खशब्दस्य प्राथम्याभिधाने युक्तिप्रदर्शनं शोकादिशब्दोपलक्षणत्वप्रतिपादनं च | 611 |
| दु:खादिषु प्रतिवाद्युपन्यस्तकटाक्षपरिहार: | 611 |
| सद्वेद्यस्यास्रवकारणप्रतिपादनम् | 612 |
| सूत्रस्थभूतवृत्यनुकम्पादीनां पदानां तात्पर्यनिरूपणम् | 613 |
| वृत्तौ इतिव्रतिशब्दयोश्च ग्रहणे प्रतिवाद्युपन्यस्तदोषसमाहिति: | 614 |
| दर्शनमोहस्य आस्रवकारणप्रतिपादनम् | 615 |
| सूत्रस्थकेवल्यादिपदानां तात्पर्यनिरूपणम् | 615 |
| केवल्यादिषु विभिन्नस्पष्टतयावर्णवादस्वरूपकथनम् | 616 |
| चारित्रमोहस्यास्रवकारणनिरूपणम् | 617 |
| सूत्रस्थशब्दानां तात्पर्यनिरूपणम् | 617 |
| कषायोदयनिमित्तस्तीव्रपरिणामश्चारित्रमोहस्यास्रव: किंस्वरूप: | 617 |
| नारकायुष आस्रवकारणनिरूपणं सूत्रस्थपदानां तात्पर्यप्रतिपादनं च | 618 |
| तिर्यगायुष आस्रवकारणनिरूपणम् | 619 |
| मानुषायुष आस्रवकारणनिरूपणम् | 620 |
| सकलायुष आस्रवकारणनिरूपणम् | 620 |
| देवायुष आस्रवकारणप्रतिपादनम् | 621 |
| अशुभनाम्न आस्रवकारणनिरूपणम् | 623 |
| शुभनाम्न आस्रवकारणनिरूपणम् | 624 |
| तीर्थकरनाम्न आस्रवकारणनिरूपणम् | 624 |
| सूत्रस्थदर्शनविशुद्ध्यादिशब्दानां विस्तरेण तात्पर्यप्रतिपादनम् | 624 |
| नीचैर्गोत्रनाम्न आस्रवकारणप्रतिपादनम् | 627 |
| सूत्रस्थपदानां विस्तरेण तात्पर्यनिरूपणम् | 627 |
| उच्चगोत्रस्यास्रवकारणप्रतिपादनम् | 628 |

| | |
|---|---|
| अन्तरायकर्मण आस्रवकारणाभिधानम् | 629 |
| प्रतिवाद्युपन्यस्तास्रवानियमशंकापरीहार: | 630 |


इति षष्ठोध्याय:।

*****

**अथ सप्तमोध्याय:।**


| | |
|---|---|
| व्रतशब्दार्थनिरूपणम् | 632 |
| सूत्रस्थपदानां तात्पर्यनिदर्शनपुरस्सरम् | 632 |
| अहिंसादीनां पौर्वापर्ये युक्तिं प्रदर्श्य विरतिशब्दसमन्वयाभिधानं व्रतानां संवरान्तर्भावाभावप्रतिपादनम् | 633 |
| व्रतनिदर्शकसूत्रे रात्रिभोजनविरतेर्हेतुप्रदर्शनम् | 635 |
| व्रतानां द्वैविध्यप्रतिपादनम् | 636 |
| प्रतिव्रतस्थैयार्थं भावनासंख्यानम् | 636 |
| अहिंसाव्रतस्य पञ्चभावनोपदेश: | 637 |
| सत्यव्रतस्य पञ्च भावना: | 637 |
| अचौर्यव्रतस्य भावना: | 638 |
| व्रह्मचर्यव्रतस्य भावना: | 638 |
| परिग्रहपरिमाणव्रतस्य पञ्चभावनोपदर्श: | 638 |
| व्रतविरोधिभावेषु किं चिन्तनीयमित्युपदेशः | 639 |
| व्रतसम्पादनाय विशेषभावनोपदेश: | 641 |
| सूत्रस्थमैत्र्यादिपदानां तात्पर्यनिरूपणम् | 641 |
| जगत्स्वभावकायस्वभावभावनयो: कार्यनिरूपणम् | 643 |
| हिंसालक्षणप्रतिपादनम् | 644 |

सवर्था प्राणादिभ्य आत्मनो भिन्नत्वं स्वीकुर्वता प्रतिवादिना
प्रदत्तविप्रतिपत्तिपरीहार:645

प्रमत्तयोगात्प्राणव्यपरोपणमिति विशेषणद्वयस्य तात्पर्यनिरूपणम् 646

असत्यस्वरूपप्रतिपादनम् 648

स्तेयस्वरूपनिरूपणम् 649

प्रतिवाद्युपन्यस्तस्तेयप्रसङ्गपरिहार: 650

अब्रह्मस्वरूपप्रतिपादनम् 651

विप्रतिपत्तिपरिहारपूर्वकं मैथुनशब्दर्थवर्णनम् 651

ब्रह्मशब्दार्थनिरूपणम् 653

परिग्रहस्वरूपप्रतिपादनम् 653

विप्रतिपत्तिनिरासपूर्वकं मूच्छाशब्दार्थकथनम् 654

व्रतिलक्षणम् 655

भेदप्रदर्शनपुरस्सरं शल्यशब्दार्थनिरूपणम् 655

प्रतिवाद्युपन्यस्त सूत्रसंगतिपरिहार: 656

अगार्यनगारभेदेन व्रतिद्वैविध्यनिरूपणम् 657

अगारिणो लक्षणम् 658

गुणव्रतशिक्षाव्रतयोर्भेदनिरूपणम् 659

सूत्रस्थपदानां तात्पर्यनिरूपणम् 659

दिग्विरतस्वरूपप्रतिपादनं तत: परं महाव्रतसिद्धिनिरूपणं च 659

देशव्रतप्ररूपणम् 661

अनर्थदण्डभेदाख्यानं प्रत्येकं च तेषां लक्षणप्रतिपादनं तत्रत्यविशेषवर्णनं च 662

भोगपरिसंख्यानभेदाख्यानम् 663

अतिथिसंविभागभेदाख्यानम् 664

संल्लेखनां प्रत्यादरभावनिरूपणम् 664

सूत्रस्थशब्दानां विस्पष्टतयार्थप्रतिपादनम् 664

| | |
|---|---|
| कृतायां सल्लेखनायामात्मवधकत्वप्रसंग: तत्परिहारश्च | 665 |
| सल्लेखनासमयनिरूपणम् | 667 |
| सम्य ष्टीनामतीचारोपवर्णनम् | 668 |
| प्रशंसासंस्तवयोर्भेदप्रतिपादनम् | 668 |
| व्रतशीलयोरतीचारसंख्यानम् | 669 |
| अहिंसाव्रतस्यातिचारोपदेश: | 670 |
| वधादिशब्दानां तात्पर्यनिरूपणम् | 670 |
| सत्यव्रतस्यातिचाराणां निरूपणम् | 670 |
| अचौर्यव्रतस्यातिचारोपाख्यानम् | 671 |
| ब्रह्मचर्यव्रतस्यातिचारा: | 672 |
| पञ्चमव्रतस्यातिचारा: | 673 |
| दिग्व्रतस्यातिचारा: | 674 |
| दिग्व्रतातिचाराणां पौनरुक्त्यपरीहार: | 674 |
| देशव्रतस्यातिचाराख्यानम् | 675 |
| अनर्थदंडव्रतस्यातिचारा: | 676 |
| सामायिकव्रतस्यातिचारा: | 677 |
| प्रोषधोपवासव्रतस्यातिचारा: | 678 |
| उपभोगपरिभोगव्रतस्यातिचारा- | 678 |
| अतिथिसंविभागव्रतातिचारा: | 680 |
| सल्लेखनाव्रतस्यातिचारा: | 680 |
| सूत्रस्थपदानां सामस्त्येनार्थप्रतिपानम् | 680 |
| दानस्वरूपाख्यानम् | 681 |
| विध्यादिविशेषेण दानविशेषप्रतिपादनम् | 682 |


इति सप्तमोऽध्याय:।

*****

**अथाष्टमोध्याय:**


| | |
|---|---|
| बन्धकारणप्रतिपादनम् | 685 |
| मिथ्यादर्शनभेदप्रभेदाख्यानम् | 686 |
| आगमप्रामाण्यात्प्राणिवधोधर्महेतुरितिसिद्धान्तनिराकरणम् | 687 |
| अविरत्यादीनां भेदप्रतिपादनम् | 691 |
| मिथ्यादर्शनस्य समुदायत्वेनावयवत्वेन बन्धहेतुत्वप्रतिपादनम् | 692 |
| अविरतिप्रमादयो: कषायाविरत्योश्च भेदप्रतिपादने हेतु: | 692 |
| बन्धस्वरूपाख्यानम् | 693 |
| सूत्रस्थपदानां प्रत्येकस्य विप्रतिपत्तिनिराकरणपूर्वकं साफल्यप्रदर्शनम् | 693 |
| बन्धस्य भेदाख्यानम् | 695 |
| सूत्रस्थप्रकृत्यादिशब्दानां विप्रतिपत्तिनिराकरणपूर्वकं स्वरूपवर्णनम् | 695 |
| मूलोत्तरभेदात्प्रकृतिबन्धस्य भेदप्रतिपादनम् | 697 |
| मूलप्रकृतीनां भेदाख्यानम् | 697 |
| सूत्रस्थपदानां व्युत्पत्तिनिदर्शनम् | 697 |
| ज्ञानावरणमोहयोर्विशेषाख्यानम् | 698 |
| ज्ञानदर्शनावरणयोरन्यत्वं प्रतिपाद्य ज्ञानावरणस्य विशेषेपि प्रत्यास्रवं मत्यादीनां भेदप्रतिपादनम् | 678 |
| एकस्य पुद्गलद्रव्यस्यावरणसुखादिनिमित्तत्वासिद्धिरिति विप्रतिपत्तिनिराकरणम् | 699 |
| कर्मणां संख्याविशेषप्रतिपादनम् | 700 |
| ज्ञानावरणादीनां क्रमप्रतिपादने युक्तिप्रदर्शनम् | 700 |
| उत्तरप्रकृतिबन्धभेदनिरूपणम् | 701 |
| ज्ञानावरणभेदाख्यानम् | 702 |
| मत्यादीनामावरणत्वसिद्धि: | 703 |

| | |
|---|---|
| अवधिमन:पर्ययावरणयोरभव्ये सत्ताप्रतिपादनम् | 704 |
| भव्यत्वाभव्यत्वयोर्युक्तिप्रदर्शनम् | 704 |
| दर्शनावरणस्य भेदाख्यानम् | 704 |
| सूत्रस्थनिद्रादिपदानां विस्तृतार्थप्रतिपादनम् | 705 |
| निद्रादिपरिणामसिद्धिर्निद्रादीनां दर्शनावरणेना भेदप्रतिपादनं च | 706 |
| चक्षुरादिदर्शनावरणोदयादात्मनोऽवस्थाप्रतिपादनम् | 706 |
| वेदनीयकर्मभेदाख्यानम् | 707 |
| चारित्रमोहनीयकर्मप्रकारप्रतिपादनम् | 708 |
| सूत्रस्थपदानां स्फुटतया तात्पर्यप्रतिपादनम् | 708 |
| आयु:कर्मभेदनिरूपणम् | 710 |
| आयु:शब्दस्य विप्रतिपत्तिनिराकरणपूर्वकं तात्पर्यनिरूपणम् | 710 |
| नारकाद्यायुषां स्वरूपप्रतिपादनम् | 711 |
| नामकर्मण उत्तरप्रकृतिभेदनिरूपणम् | 712 |
| गत्यादीनां सर्वासां नामप्रकृतीनां विस्तरेण स्वरूपप्रतिपादनम् | 712 |
| गणधरत्वचक्रधरत्वादिपदकारणनिरूपणम् | 719 |
| तीर्थकरत्वस्य भेदेनोल्लेखस्य प्रयोजनप्रतिपादनम् | 719 |
| गोत्रकर्मभेदनिरूपणम् | 720 |
| अंतरायकर्मप्रकारप्रतिपादनम् | 720 |
| भोगोपभोगयो: पार्थक्यप्रतिपादनम् | 721 |
| ज्ञानावरणदर्शनावणवेदनीयान्तरायाणामुत्कृष्टस्थित्युपदर्शनम् | 721 |
| सूत्रस्थपदानां साफल्यप्रदर्शनम् | 722 |
| मोहनीयकर्मण उत्कृष्टस्थितिप्रतिपादनम् | 723 |
| नामगोत्रयोरुत्कृष्टस्थितिप्रतिपादनम् | 723 |
| आयु:कर्मण उत्कृष्टस्थितिप्रदर्शनम् | 724 |
| वेदनीयकर्मणो जघन्यस्थितिप्ररूपणम् | 724 |

नामगोत्रयोर्जघन्यस्थितिकथनम्

| | |
|---|---|
| ज्ञानावरणदर्शनावरणान्तरायाद्यवशिष्टपञ्चकर्मणां जघन्यस्थिति: | 725 |
| विपाकशब्दार्थनिरूपणम् | 725 |
| अनुभवभेदनिरूपणम् | 725 |
| कर्मणां तदनुसार्यनुभवप्ररूपणम् | |
| अनुभूतकर्मानन्तरदशाप्रतिपादनम् | 726 |
| निर्जरालक्षणनिरूपणपूर्वकं तद्भेदनिरूपणम् | 726 |
| निर्जरापदोल्लेखप्रयोजनम् | 727 |
| प्रदेशबन्धस्य हेतुस्वभावनिर्देशपूर्वकं विवरणम् | 728 |
| पुण्यप्रकृतिपरिगणनम् | 730 |
| पापप्रकृतिपरिगणनम् | 731 |


इत्यष्टमोऽध्याय:

*****

**अथ नवमोऽध्याय:।**


| | |
|---|---|
| संवरस्वरूपप्रतिपादनम् | 732 |
| सूत्रस्थपदानां तात्पर्यप्रतिपादनम् | 732 |
| संवरभेदनिरूपणम् | 733 |
| गुणस्थाननामानि | 734 |
| स्फुटतया स्वरूपनिर्देशश्च | 734 |
| संवरव्यवस्थाप्रतिपादनम् | 738 |
| संवरकारणनिरूपणम् | 740 |
| सूत्रस्थगुप्त्यादिपदानां तात्पर्यनिरूपणम् | 740 |
| संवरगुप्त्यादीनां कथंचिद्भेदप्रतिपादनम् | 741 |

संवरस्य तपोऽपि कारणं निर्जरायाश्चेति निर्देश: 742
गुप्तिशब्दार्थनिरूपणम् 743
समितीनां संख्यानम् 744
समितिशब्दार्थनिरूपणम् 744
ईर्यादीनां पार्थक्येन लक्षणप्रतिपादनम् 744
जीवस्थाननामानि 745
गुप्तिसमित्योर्भेदनिरूपणम् 746
मुनीनां युक्तिपूर्वकं पात्र ग्रहणनिषेध 746
उत्तमक्षमादिधर्मनामाख्यानम् 747
क्षमानिरूपणम् 747
मार्दवार्जवयो: स्वरूपनिरूपणम् 748
शौचलक्षणकथनम् 748
शौचस्य गुप्तेराकिंचन्याद्भेदप्रतिपादनम् 748
शौचभेदनिरूपणम् 748
सत्यशब्दार्थनिरूपणं तस्य च भाषासमितितो भेदः 748
विप्रतिपत्तिनिवृत्तिपूर्वकं संयमशब्दार्थप्ररूपणम् 749
संयमभेदप्रतिपादनम् 749
अपहृतसंमप्रतिपादनार्थ: शुद्ध्यष्टकोपदेश: 750
तपस्त्यागयो: स्वरूपनिर्देश: 752
उत्सर्गतपस्त्यागधर्माम्यांत्यागस्य पार्थक्यसमर्थनम् 752
आकिंचन्यब्रह्मचर्ययो: स्वरूपाख्यानम् 753
सूत्रस्थोत्तमशब्दतात्पर्यनिरूपणम् 753
उत्तमक्षमादीनां सर्वेषां संयमहेतुत्वप्रतिपादनम् 753
अनित्यत्वादिभावनानां नामाख्यानम् 756
अनित्यत्वभावनावर्णनम् 756

| | |
|---|---|
| अशरणभावना | 756 |
| संसारभावना | 757 |
| एकत्वभावना | 758 |
| अन्यत्वभावना | 759 |
| अशुचित्वभावना | 759 |
| तत्त्वेभ्य आस्रवादीनां भावनानां पार्थक्यप्रतिपादनतात्पर्यनिरूपणम् | 760 |
| आस्रवभावनास्वरूपनिरूपणम् | 760 |
| संवरानुप्रेक्षा | 761 |
| निजरानुप्रेक्षा | 761 |
| लोकानुप्रेक्षा | 761 |
| बोधिदुर्लभानुप्रेक्षा | 761 |
| गत्यादिषु जीवगुणस्थानानां मार्गणालक्षणो धर्मः | 762 |
| गत्यादीनां भेदोपवर्णनम् | 762 |
| परीषहाणां सहने हेतुप्रदर्शनम् | 770 |
| परीषहाणां नामाख्यानम् | 771 |
| क्षुधापरीषहोपवर्णनम् | 771 |
| पिपासापरीषहोपर्वणनम् | 771 |
| क्षुत्पिपासयोर्भेदसमर्थनम् | 772 |
| शीतपरीषहजयोपाख्यानम् | 772 |
| उष्णपरीषह: | 772 |
| दंशमशकपरीषहवर्णनम् | 773 |
| दंशमशकेतिशब्ददद्वयस्य पार्थक्यप्रयोजनम् | 773 |
| नाग्न्यपरीषहः | 773 |
| अरतिपरीषहस्य पृथगुपादानप्रयोजनम् | 774 |
| स्त्रीपरीषहजयनिरूपणम् | 774 |

| | |
|---|---|
| चर्यापरीषहजय: | 775 |
| निषद्यातितिक्षा | 775 |
| शय्यापरीषह: | 775 |
| आक्रोशपरीषह: | 776 |
| वधपरीषह: | 776 |
| याचनापरीषह: | 776 |
| अलाभपरीषह: | 777 |
| रोगपरीषह: | 777 |
| तृणस्पर्शपरीषह: | 777 |
| मलपरीषह: | 778 |
| सत्कारपुरस्कारपरीषह: | 778 |
| प्रज्ञाविजय: | 778 |
| अज्ञानपरीषयजय: | 778 |
| अदर्शनपरीषह: | 778 |
| अधिकपरीषहोपसंख्यानप्रतिषेध: | 779 |
| सूक्ष्मसाम्परायछद्मस्थवीतरागयो: परीषहेयत्ताप्रतिपादनं | 780 |
| जिनेऽर्हत्येकादशपरीषहोपपादनम् | 781 |
| वादरसाम्पराये सर्वपरीषहग्रहणप्रतिपादनम् | 781 |
| वादरसाम्परायशब्दार्थनिरूपणम् | 782 |
| ज्ञानावरणप्रकृतिकार्यनिरूपणम् | 782 |
| दर्शनमोहान्तराययो: कार्यनिरूपणम् | 783 |
| चारित्रमोहस्य कार्यनिरूपणम् | 783 |
| वेदनीयकार्यनिरूपणम् | 783 |
| एकस्मिन्नात्मनि यौगपद्येन परीषहसत्ताप्रतिपादनम् | 784 |
| परीषहाणां न्यूनाधिकविवादपरीहार: | 784 |

चारित्राणां नामाख्यानम् 786

गुप्त्यादिभ्यः सामायिकस्य व्यवच्छित्तिप्रतिपादनम् 786

सूत्रस्थछेदोपस्थापनादिपदानां तात्पर्यनिरूपणम् 787

गुप्तिसमितिभ्यां सूक्ष्मसाम्परायचारित्रस्य भेदसमर्थनम् 787

यथाख्यात् चरित्रलक्षणम् 788

सूत्रस्थैतिशब्दसाफल्यप्रदर्शनम् 788

सामायिकादीनां पौर्वापर्ये युक्तिप्रदर्शनम् 788

वाह्यतपसां नामोल्लेखः 789

भेदनिर्देशपूर्वकमनशनतपःस्वरूपवर्णनम् 789

अवमौदर्यवृत्तिपरिसंख्यानरसपरित्यागतपसां स्वरूपकथनम् 789

प्रतिवाद्युपन्यस्तावरुद्धरसपरित्यागशब्दार्थपरिहारः 790

वृत्तिपरिसंख्यानादनशनावमौदर्यरसपरित्यागानां भेदप्रतिपादनम् 790

विविक्तशय्यासनस्य ग्रहणम् 791

भेदनिर्देशपुरस्सरं कायक्लेशप्रयोजनम् 791

परीषहजयकायक्लेशस्य भेदप्रतिपादनम् 791

अनशनादितपसां बाह्यतपस्त्वसमर्थनम् 791

अन्तरङ्गतपसां नामाख्यानम् 792

प्रायश्चित्ताद्यन्तरङ्गतपसां प्रत्येकस्य भेदसंख्यानम् 793

प्रायश्चित्ततपसः प्रकारप्रतिपादनम् 793

आलोचनातपसः स्वरूपप्रतिपादनम् 794

आलोचनदोषाणां निरूपणम् 794

प्रतिक्रमणादीनां स्वरूपप्रतिपादनम् 795

विनयतपसः प्रकारनिरूपणम् 796

ज्ञानविनयादीनां स्वरूपप्रतिपादनम् 797

वैयावृत्त्यतपसः प्रकारप्रकाशनम् 798

सूत्रस्थाचार्यादिशब्दानां तात्पर्यप्रतिपादनम् 798
वैयावृत्त्यफलनिदर्शनम् 799
स्वाध्यायतपस: प्रकारनिर्देश: 800
वाचनादिस्वाध्यायतपसां स्वरूपनिदर्शनम् 800
व्युत्सर्गतपसो भेदप्रतिपादनम् 801
व्युसर्गतपसो वाह्याभ्यन्तरभेदयोर्विस्तरेण स्वरूपोपादानम् 801
धर्मादिभ्यो व्युत्सर्गस्य भेदनिरूपणम् 802
पात्रकालनिर्देशपूर्वकं ध्यानस्वरूपकथनम् 802
सूत्रस्थोत्तमसंहननादिशब्दानां तात्पर्यनिरूपणम् 802
अभावस्य वस्तुत्वसमर्थनम् 805
प्रतिवादिप्रकल्पितध्यानस्वरूपनिराकरणम् 806
गुप्त्यादिप्रकरणस्य विप्रतिपत्तिनिराकरणपूर्वकं ध्यानोपायत्वनिरूपणम् 806
ध्यानभेदनिरूपणं प्रत्येकभेदस्य स्वरूपनिरूपणम् 807
धर्म्यशुक्लयोर्मोक्षहेतुत्वप्रतिपादनम् 807
आर्तध्यानस्य लक्षणं भेदानां निर्देशश्च 808
आर्तध्यानस्य स्वामिनिरूपणम् 810
स्वभावस्वाम्यादिनिर्देशपूर्वकं रौद्रध्यानस्वरूपनिर्देश: 810
संयतस्य रौद्रध्यानप्रतिषेध: 810
धर्मध्यानस्य प्रकारप्ररूपणम् 811
विचयशब्दार्थनिरूपणपूर्वकं तत्सम्मन्वयनिरूपणम् 811
आज्ञाविचयस्वरूपनिर्देश: 811
अपायविचयलक्षणम् 812
विस्तरेण विपाकविचयस्वरूपनिदर्शनम् 812
संस्थानविचयस्वरूपाख्यानम् 815
अनुप्रेक्षातो धर्म्यस्य पार्थक्यसमर्थनम् 815

| | |
|---|---|
| अप्रमत्तस्य धर्म्यप्रतिषेधप्रतिपादनम् | 815 |
| उपशान्तक्षीणकषाययोर्धर्म्यप्रतिषेधनिरूपणम् | 816 |
| पृथक्त्ववितर्कैकत्ववितर्केति शुक्लध्यानप्रकारद्वयस्य स्वाम्याख्यानम् | 816 |
| सूक्ष्मक्रियाप्रतिपातिव्युपरतक्रियानिवर्तीतिशुक्लप्रकारद्वयस्य स्वामिनिरूपणम् | 817 |
| शुक्लध्यानस्य प्रकारनिरूपणम् | 817 |
| शुक्लध्यानस्यालम्बननिरूपणम् | 817 |
| पृथक्त्ववितर्काख्यशुक्लध्यानस्य विशेषस्वरूपनिरूपणम् | 817 |
| एकत्ववितर्काख्यशुक्लध्यानस्य विशेषस्वरूपनिरूपणम् | 818 |
| वितर्कशब्दार्थनिरूपणम् | 818 |
| वीचारशब्दार्थनिरूपणम् | 818 |
| ध्यानप्रकारनिरूपणम् | 819 |
| सम्य ष्टीनां निर्जरातारतम्यप्रतिपादनम् | 821 |
| निर्जराया उत्तरोत्तरक्रमस्य किञ्चित्स्वरूपप्रतिपादनम् | 821 |
| क्षपकस्य साधुत्वनिरूपणम् | 821 |
| पुलाकादीनां प्रत्येकस्य विप्रतिपत्तिनिरासपूर्वकं स्वरूपोपादनम् | 822 |
| पुलाकादीनां निर्ग्रन्थत्वसाधनं भग्नव्रतत्वेऽपि निर्ग्रन्थत्वसाधनम् | 823 |
| पुलाकादीनां सयमादितो विशेषनिरूपणम् | 823 |
| संयमादिषु पुलाकानां साध्यत्वप्रदर्शनम् | 824 |


इति नवमोध्याय:।

*****

**अथ दशमोऽध्याय:।**


| | |
|---|---|
| केवलज्ञानोत्पत्तिकारणनिरूपणम् | 827 |
| मोहादीनां क्षयप्रकारप्रतिपादनम् | 828 |
| कारणनिर्देशपूर्वकं मोक्षस्वरूपाख्यानम् | 829 |
| कर्मणामन्तत्वनिरूपणम् | 830 |

कर्माभावस्य द्वैविध्यनिरूपणम् 831
औपशमिकादिभावकर्मणां क्षयादपि मोक्ष इति निरूपणम् 832
भव्यत्वग्रहणस्य प्रयोजनप्रतिपादनम् 832
केवलसम्यक्त्वादीनां मोक्षे सद्भावनिरूपणम् 832
अनन्तवीर्यादीनामपि मोक्षे सत्त्वप्रतिपादनम् 833
सकलकर्मणि विनष्टे पुनस्तद्बन्धाभावनिरूपणम् 833
स्थानवत्त्वेऽपि मुक्तात्मनां पातप्रतिषेधनिरूपणम् 833
सिद्धानां परस्परोपरोधप्रतिषेधः 834
सिद्धानां सुखस्य निरतिशयत्वप्रतिपादनम् 834
सिद्धात्मनां निराकारत्वप्रतिषेध: 834
सिद्धात्मनां विसर्पणाभावनिरूपणम् 834
प्रदीपवत् सर्वथाभावो मोक्ष, यत्रैव कर्मविप्रमोक्षस्तत्रैव अवस्थानमिति
विप्रतिपत्तिद्वयस्य निरास: 835
निरस्तकर्मभारपुरुषस्य स्वरूपप्रतिपादनम् 836
मुक्तस्योर्ध्वगमने दृष्टान्तप्रदर्शनम् 837
दृष्टांतानां दार्ष्टन्ते मुक्तात्मनि विप्रतिपत्तिनिरासपूर्वकं समन्वयप्रदर्शनम् 837
मुक्तात्मनामलोकाकाशे कथं न गतिरित्यत्र हेतूपदर्शनम् 839
व्यवहारनयेन क्षेत्रादिभि: सिद्धानां भेदप्रतिपादनम् 839
क्षेत्रभेदात्सिद्धभेदप्रदर्शनम् 840
कालभेदात्सिद्धभेदप्रदर्शनम् 840
गतिभेदात्सिद्धभेदवर्णनम् 840
लिङ्गभेदाद्भेदनिरूपणं सिद्धात्मनाम् 840
भेदनिर्देशपूर्वकं तीर्थात्सिद्धानां भेदाख्यानम् 841
भेदनिर्देशपूर्वकमवगाहनभेदात्सिद्धभेदप्रतिपादनम् 841
अन्तरभेदात्सिद्धभेदः 843
अल्पबहुत्वात्सिद्धभेदप्ररूपणम् 843
प्रत्येकबुद्धबोधितबोधात्सिद्धभेदाख्यानम् 843
कतिचित्पद्यैः चित्ततत्त्वार्थसारनिरूपणम् 845

इति दशमोऽध्याय:।

## श्रीमद्भट्टाकलंकदेवविरचितं

# तत्त्वार्थराजवार्तिकम्

**प्रणम्य सर्वविज्ञानमहास्पदमुरुश्रियम्।**

**निर्धौतकल्मषं वीरं वक्ष्ये तत्त्वार्थवार्तिकम्॥१॥**

**श्रेयोमार्गप्रतिपित्सात्मद्रव्यप्रसिद्धेः ॥१॥** उपयोगस्वभावस्यात्मनः श्रेयसा योक्ष्यमाणस्य प्रसिद्धौ सत्यां तन्मार्गप्रतिपित्सोत्पद्यते। कथम्?

**चिकित्साविशेषप्रतिपत्तिवत् ॥२॥** यथा व्याधिनिवृत्तिजफलश्रेयसा योक्ष्यमाणस्य चिकित्स्यस्य प्रसिद्धौ चिकित्सामार्गविशेषप्रतिपित्सोत्पद्यते तथात्मद्रव्यप्रसिद्धौ श्रेयोमार्गप्रतिपित्सेति। तस्मात्साधीयसी मोक्षमार्गव्याख्या स्वायंभवीति। किञ्च,

**सर्वार्थप्रधानत्वात् ॥३॥** संसारिणः पुरुषस्य सर्वेष्वर्थेषु मोक्षः प्रधानं, प्रधाने च कृतो यत्नः फलवान् भवति तस्मात्तन्मार्गोपदेशः कार्य; तदर्थत्वात्।

**मोक्षोपदेशः पुरुषार्थप्रधानत्वादितिचेन्न जिज्ञासमानार्थिप्रश्नापेक्षिप्रतिवचनसद्भावात् ॥४॥** आह मोक्षोपदेश एव कार्यो न मार्गोपदेशः कस्मात्पुरुषार्थप्रधानत्वात् सर्वश्रेयोभ्यः पुंसो मोक्ष एव परं श्रेय आत्यन्तिकानुपमश्रेयस्त्वादिति; तन्न जिज्ञासमानार्थिप्रश्नापेक्षिप्रतिवचनसद्भावात्, योसौ मोक्षेणार्थी जिज्ञासमानः स मार्गमेव पृष्टवान् न मोक्षमतस्तन्मार्गोपदेश एव न्याय्यः।

**मोक्षमेव कस्मान्नाप्राक्षीदिति चेन्न कार्यविशेषसम्प्रतिपत्तेः ॥५॥** स्यादेतदयं पृष्टा मोक्षमेव कस्मान्न पृष्टवान् कैमर्थक्यान्मार्गं पृष्टवानिति? तन्न कार्यविशेषसंप्रतिपत्तेः। मोक्षकार्यं प्रति सर्वेषां सद्वादिनां संप्रतिपत्तिर्न कारणं प्रति।

**कारणं तु प्रति विप्रतिपत्तिः पाटलिपुत्रमार्गविप्रतिपत्तिवत्** **[illegible]॥** यथा केचित्पुरुषा नानादिग्भागापेक्षिषु मार्गेषु विप्रतिपद्यन्ते न पाटलिपुत्रे प्राप्तव्ये। तथा मोक्षकार्यं प्रतिपद्य तदर्थमादृताः सर्वे सद्वादिनस्तत्कारणेषु विप्रतिपद्यन्ते। तद्यथा केचित्तावदाहुः - ज्ञानादेव मोक्ष इति। अपर आहुः - ज्ञानवैराग्याभ्यामिति। पदार्थावबोधो ज्ञानम्। विषयसुखानभिष्वङ्गलक्षणं वैराग्यमिति। अपर आहुः - क्रियात एव मोक्ष इति "नित्यकर्म-हेतुकं निर्वाणमिति वचनात्"। किञ्च,

**पराभिप्रायनिवृत्त्यशक्यत्वात्** **[illegible]॥** न च परस्य पृष्टुः प्रश्नाभिप्रायोऽस्मदादिभिः शक्यो निवर्तयितुं मा प्राक्षीर्मार्गं मोक्षं पृच्छेति चेन्न भिन्नरुचित्वाल्लोकस्य।

**कल्पनाभेदात्तद्विप्रतिपत्तिरिति चेन्न कर्मविप्रमोक्षसामान्यात्** **[illegible]॥** आह न मोक्षं प्रति संप्रतिपत्तिरस्ति किंतु विप्रतिपत्तिरेव कस्मात्। कल्पनाभेदादन्येऽन्यथालक्षणं परिकल्पयन्ति रूपवेदनासंज्ञासंस्कारविज्ञानपञ्चकस्कन्धनिरोधादभावो मोक्ष इति। गुण-पुरुषान्तरोपलब्धौ प्रतिस्वप्नलुप्तविवेकज्ञानवदनभिव्यक्तचैतन्यस्वरूपावस्था मोक्ष इत्यपरे। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारनवात्मगुणात्यन्तोच्छेदो मोक्ष इत्यन्ये। तस्मात्कल्पनाभेदान्मोक्षं प्रति विप्रतिपत्तिरिति तन्न कर्मविप्रमोक्ष-सामान्यात्सर्वेषां हि प्रवादिनां यां तामवस्थां प्राप्य कृत्स्नकर्मविप्रमोक्ष एव मोक्षोऽभिप्रेत इत्यास्माकीनसमयाविरोधान्मोक्षकार्यं प्रति संप्रतिपत्तिः।

**कार्यविशेषोपलम्भात्कारणान्वेषणप्रवृत्तिरिति चेन्न; अनुमानतस्तत्सिद्धेर्घटीयंत्र-भ्रान्तिनिवृत्तिवत्** **[illegible]॥** आह कार्यविशेषमुपलभ्य लौकिकाः कारणान्वेषणं प्रति आद्रियन्ते यथा ज्वरादिरोगदर्शनात्तत्कारणान्वेषणे भिषक् प्रवर्तते चिकित्साप्रसिद्ध्यर्थं तथा मोक्ष-दर्शनात्तत्कारणान्वेषणं न्याय्यम्, न चासौ दृश्यते तस्मान्मोक्षकारणान्वेषणाभाव इति तन्न, अनुमानतस्तत्सिद्धेः

प्रत्यक्षतोऽनुपलभ्यमानस्यापि मोक्षकार्यस्यानुमानत उपलब्धौ मोक्षकारणान्वेषणं युक्तं घटीयन्त्रभ्रान्तिनिवृत्तिवत्। प्रत्यक्षतोऽनुपलभ्यमानस्यापि मोक्षकार्यस्यानुमानत उपलब्धौ मोक्षकारणान्वेषणं युक्तं घटीयन्त्रभ्रान्तिनिवृत्तिवत्। यथा बलीवर्दपरिभ्रमणापादितारगर्तभ्रान्तिं घटीयन्त्रभ्रान्तिजनिकां बलीवर्दपरिभ्रमणाभावे चारगर्तभ्रान्त्यभावाद्घटीयंत्रभ्रान्तिनिवृत्तिं च प्रत्यक्षत उपलभ्य सामान्यतोदृष्टादनुमानाद्वलीवर्दतुल्यकर्मोदयापादितां चतुर्गत्यरगर्तभ्रान्तिं शारीरमानसविविधवेदनाघटीयंत्रभ्रान्तिजनिकां प्रत्यक्षत उपलभ्य ज्ञानदर्शनचारित्रान्निर्दग्धस्य कर्मण उदयाभावे चतुर्गत्यरगर्तभ्रान्त्यभावात्संसारघटीयंत्रभ्रान्तिनिवृत्या भवितव्यमित्यनुमीयते। यासौ संसारघटीयंत्रभ्रान्तिनिवृत्तिः स एव मोक्ष इति तस्मादनुमानतो मोक्षकार्यसिद्धेरध्यवस्यामो मोक्षकारणान्वेषणं न्याय्यमिति। किञ्च,

**सर्वशिष्टसंप्रतिपत्तेः॥१०॥** सर्वे शिष्टाः प्रत्यक्षतोऽनुपलभ्यमानस्यापि मोक्षकार्यस्यानुमानादस्तित्वमभ्युपेत्य प्रतिनियतमोक्षकारणेषु प्रयतन्ते। किञ्च,

**आगमात्तत्प्रतिपत्तेः॥११॥** प्रत्यक्षतोऽनुपलभ्यमानोऽपि मोक्षः आगमादस्तीति निश्चीयते। कथं ?

**सूर्याचंद्रमसोर्ग्रहणवत्॥१२॥** यथा सूर्याचंद्रमसोर्ग्रहणममुष्यां वेलायाममुना वर्णेनामुनादिग्भागेन सर्वग्रासि नवेत्येवमादि सांवत्सरैरप्रत्यक्षमप्यागमाज्ज्ञायते तथा मोक्षोपीति। किञ्च,

**स्वसमयविरोधात्॥१३॥** अप्रत्यक्षत्वान्मोक्षो नास्तीति यस्य मतं तस्य स्वसमयविरोधो भवति। सर्वे हि समयवादिनो मोक्षादीनर्थानप्रत्यक्षानभिवाञ्छन्ति।

**बंधकारणनिर्देशादयुक्तमिति चेन्न मिथ्यादर्शनादिवचनात्॥१४॥** स्यादेतदन्यत्र बंधकारणनिर्देशः कृतः विपर्ययाद्बन्ध इत्यादि इह तु न कृतस्ततो मोक्षकारण-

निर्देशस्यायुक्तिरिति तन्न मिथ्यादर्शनादिवचनात्। वक्ष्यते एत् ''मिथ्यादर्शनाविरति-प्रमादकषाययोगा बंधहेतव'' इति।

**बंधपूर्वकत्वान्मोक्षस्य प्राक् तत्कारणनिर्देश इति चेन्न आश्वासनार्थत्वात्॥१५॥** स्यादारेका प्राङ्मोक्षकारणनिर्देशाद्बंधकारणनिर्देशो न्याय्यः। यतो बंधपूर्वको मोक्ष इति तन्न, आश्वासनार्थत्वात् कथं?

**बन्धनबद्धवत्॥१६॥** यथा काराबन्धनबद्धः प्राणी बन्धकारणश्रवणाद्बिभेति। मोक्षकारणश्रवणादाश्वसिति तथाऽनादिसंसारकारावरुद्ध आत्मा प्रथममेव बंधकारण-श्रवणान्माभैषीन्मोक्षकारणश्रवणाच्च कथमाश्वासं यायादिति प्रथमं बंधकारणमनुक्त्वा, मोक्षकारणोपदेशः कृतः। किञ्च,

**मिथ्यावादिप्रणीतमोक्षकारणनिराकरणार्थं वा ॥१७॥** मिथ्यावादिप्रणीतैकद्विमोक्ष-कारणनिराकरणार्थोऽयमार्हतो मोक्षकारणनिर्देश आदौ कृतः, त्रयमेतत् संगतं मोक्षमार्गो नैकशो द्विशो वेति।

अतो विपर्ययमात्रप्रभवां संसारप्रक्रियां परिकल्प्य ज्ञानविशेषा-त्तद्विनिवृत्तिरिति। एवमाद्यनेकमिथ्यावादिप्रणीतमतनिवृत्तये त्रैविध्यविजृम्भितमोक्षकारणप्रदर्शनार्थमाह -

## सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः ॥१॥

अपरे आरातीयपुरुषशक्त्यपेक्षत्वात्सिद्धान्तप्रक्रियाऽऽविष्करणार्थं मोक्षकारण-निर्देशसम्बन्धेन शास्त्रानुपूर्वी रचयितुमन्विच्छन्निदमवोचदित्याचक्षते। नात्र शिष्याचार्य्य-संबंधो विवक्षितः। किन्तु संसारसागरनिमग्नानेकप्राणिगणाभ्युज्जिहीर्षां प्रत्यागूर्णोऽ-न्तरेण मोक्षमार्गोपदेशं, हितोपदेशो दुष्प्राप इति निश्चित्य मोक्षमार्गं व्याचिख्यासुरिदमाह।

**प्रणिधानविशेषाहितद्वैविध्यजनितव्यापारं तत्त्वार्थश्रद्धानं सम्यग्दर्शनम्॥१॥** प्रणिधानमुपयोगः परिणाम इत्यनर्थान्तरं। येनार्थोऽर्थान्तरादविशेष्यते योवाऽर्थान्तरगततात्पर्यायादविशिष्यते स विशेषः। विशिष्टिर्वा विशेषः। प्रणिधानमेव विशेषः प्रणिधानविशेषः प्रणिधानस्य वा विशेषः प्रणिधानविशेषः। आहितमात्मसात्कृतं परिगृहीतमित्यनर्थान्तरम्। विधयुक्तगतप्रकाराः समानार्थाः। निसर्गाधिगमभेदाद् द्वौ विधावस्येति द्विविधं द्विविधस्य भावः कर्म वा द्वैविध्यं। प्रणिधानविशेषेणाहितं प्रणिधानविशेषाहितं द्वैविध्यमस्य प्रणिधानविशेषाहितद्वैविध्यम्। जनितः प्रादुर्भावितः व्यापृतिर्व्यापारोऽर्थप्रापणसमर्थः क्रियाप्रयोगो जनितो व्यापारोऽस्य जनितव्यापारम् कश्चास्य व्यापारः? इहान्तर्दर्शनमोहोपशमक्षयक्षयोपशमपर्यायपरिणामाद्बाह्यपरिणामकारणापादितादात्मनो जीवादिपदार्थविचारविषयोऽधिगमो निसर्गश्च व्यापारः। प्रणिधानविशेषाहितद्वैविध्यमेव जनितव्यापारं प्रणिधानविशेषाहितद्वैविध्यजनितव्यापारं तत्त्वार्थश्रद्धानं सम्यग्दर्शनम्। अस्यार्थ उत्तरत्र वक्ष्यते।

**नयप्रमाणविकल्पपूर्वको जीवाद्यर्थयाथात्म्यावगमः सम्यग्ज्ञानम्॥२॥** नयौ च प्रमाणे च नयप्रमाणानि तेषां विकल्पाः नयप्रमाणविकल्पाः। द्वौ नयौ द्रव्यार्थिकः पर्यायार्थिकश्च। द्वे प्रमाणे प्रत्यक्षं परोक्षं च। तेषां विकल्पा नैगमादयो मत्यादयश्च वक्ष्यन्ते। पूर्वशब्दस्तत्कारणवाची। नयप्रमाणविकल्पपूर्वको नयप्रमाणविकल्पहेतुक इत्यर्थः। येन येन प्रकारेण जीवादयः पदार्था अवस्थिताः तेन तेनावगमः जीवाद्यर्थयाथात्म्यावगमः सम्यग्ज्ञानम्। मोहसंशयविपर्ययनिवृत्यर्थं सम्यग्विशेषणम्।

**संसारकारणविनिवृत्तिं प्र्त्यागूर्णस्य ज्ञानवतो बाह्याभ्यन्तरक्रियाविशेषोपरमः सम्यक् चारित्रम्॥३॥** संसारः पंचविधः द्रव्यक्षेत्रकालभवभावपरिवर्तनभेदात्। तस्य कारणं कर्माष्टविधं तस्य विशेषेणात्यंतिकी निवृत्तिः संसारकारणविनिवृत्तिः। तां प्रत्यागूर्णस्योद्य-तस्य ज्ञानवत इति प्रशंसायां मतुः। यथा रूपवानिति प्रशंसायुक्तस्य

सत्ता कथ्यते। न हि कस्यचिद्रूपं नास्ति प्रशस्तं तु नास्ति। तथा ज्ञानमस्यास्तीति ज्ञानवानिति प्रशंसायुक्तस्य सत्ता कथ्यते। न कस्यचिज्ज्ञानं नास्ति सर्व एवात्मा ज्ञानवांश्चैतन्यान्मिथ्यादर्शनोदये विपरीतार्थग्राहित्वान्मिथ्यादृष्टिरज्ञस्तदभावे याथात्म्येनार्थविभावनात्सम्यग्दृष्टिः प्रशस्त-ज्ञानः, तस्य ज्ञानवतः। क्रिया क्रियान्तराद्विशिष्यते येन स विशेषः। विशिष्टिर्वा विशेषः। स द्विविधो बाह्य आभ्यन्तरश्चेति। बाह्यो वाचिकः कायिकश्च बाह्येन्द्रियप्रत्यक्षत्वात्। आभ्यन्तरो मानसः छद्मस्थाप्रत्यक्षत्वात्। तस्योपरमः सम्यक्चारित्रमुच्यते। स पुनः परमोत्कृष्टो भवति वीतरागेषु यथाख्यातचारित्रसंज्ञकः। आरातीयेषु संयतासंयतादिषु सूक्ष्मसाम्परायिकान्तेषु प्रकर्षाप्रकर्षयोगी भवति।

**ज्ञानदर्शनयोः करणसाधनत्वं कर्मसाधनश्चारित्रशब्दः॥४॥** ज्ञानं दर्शनमिति करण-साधनावेतौ शब्दौ। ''करणाधिकरणयोः'' इति युटो विधानात्। कर्मसाधनश्चारित्रशब्दः ''भूवदिगृभ्यो णित्रश्चरेर्वृत्ते'' इति कर्मणि विधानात्। ज्ञानदर्शनशक्तिविशेषशुद्धिसन्निधाने जीवादीनर्थानात्मा जानाति पश्यति वा येन तज्ज्ञानं दर्शनं च। चारित्रमोहो-पशमक्षयक्षयोपशमसद्भावे चर्यते तदिति चारित्रम्।

**कर्तृकरणयोरन्यत्वादन्यत्वमात्मज्ञानादीनां परश्वादिवदिति चेन्न तत् परिणामादग्निवत्॥५॥** स्यादारेका ज्ञानदर्शनयोरात्मद्रव्यादन्यत्वम्, कस्मात् ? दृष्टत्वाद्देव-दत्तपरशुवदिति तन्न किं कारणं। तत्परिणामादग्निवत्। यथा बाह्यद्रव्यदिपञ्चतय-हेतुसन्निधाने सत्याभ्यन्तरपरिणामवशात्तैजस्कायिकनामकर्मोदयाविर्भावितौष्ण्यपर्याय आत्मा तत्परिणामादग्निव्यपदेशभाग्भवति। स एवंभूतनयवक्तव्यतयोष्णपर्यायादनन्यः। तथैवम्भूतनयवक्तव्यतावशाज्ज्ञानदर्शनपर्यायपरिणत आत्मैव ज्ञानं दर्शनं च तत्स्वा-भाव्यात्।

**अतत्स्वाभाव्येऽनवधारणप्रसंगोऽग्निवत् ॥६॥** यथाग्निरुष्णपर्यायेणान्यद्रव्यासाधारणेनावधार्यतेऽयमग्निरिति। स चेत्तत्स्वभावो न भवेत्प्रतिविशिष्टासाधारणपर्यायाभावादग्नेरनवधारणप्रसंगः। तथात्मनोपि ज्ञानादन्यत्वेऽनवधारणं यतोयमन्यद्रव्यासाधारणज्ञानपर्यायस्तत्स्वभावात्ततोऽनन्यो द्रव्यार्थादेशात्। स चेन्न ज्ञानस्वभावः सत्येवमज्ञः स्यात्ततश्चास्यानवधारणप्रसङ्गः।

**अर्थान्तरात्संप्रत्यय इति चेन्नोभयासत्त्वात् ॥७॥** स्यादेतदन्यत्वे सत्यपि नानवधारणं कुतः। यस्मादर्थान्तरात्संप्रत्ययः।

**नीलीद्रव्यसंबंधाच्छाटीपटकम्बलादिषु नीलसंप्रत्ययवत् ॥८॥** यथार्थान्तरभूतेन नीलीद्रव्येण सम्बन्धत्वाच्छाटीपटकम्बलादिषु नीलसंप्रत्ययः तथार्थान्तरभूतोष्णगुणसमवायादुष्णोऽग्निः। आत्मा वार्थान्तरभूतज्ञानगुणसमवायाज्ज्ञ इति। तन्न किं कारणम्। उभयासत्त्वात्। दण्डदण्डिवत् यथा दण्डसंबंधात्प्राग्दण्डी जात्यादिभिर्लक्षणैः स्वतः सिद्धत्वात्। स दण्डोपि प्राग्दण्डिसंबंधाद्वृत्तद्राघिमादिना लक्षणेन स्वतः सिद्धत्वात्। सतो दण्डयोगाद्दण्डीत्येतन्न्याय्यम्। तथा नीलद्रव्ययोगाच्छाट्यादि नीलमित्येतन्न्या-य्यम्। तथोष्णगुणयोगान्न प्रागग्नेरन्यद्विशेषलक्षणं सद्भावस्य प्रख्यापकमस्तीत्य-सन्नग्निः। उष्णस्यापि प्रागग्नियोगादसत्त्वं निराश्रयगुणाभावात्। न चासतोः संबंधो दृष्टो इष्टो वा आत्मनोपि ज्ञानगुणयोगात्प्रागसत्त्वं विशेषलक्षणाभावात्। ज्ञानस्याप्यात्मद्रव्य-सम्बन्धात्प्रागसत्त्वं निराश्रयगुणाभावात्। न चासतोः संबंधो दृष्ट इष्टो वा। तस्मादुभयासत्त्वान्नार्थान्तरात्संप्रत्यय। किं च;

**उभयथाप्यसद्भावात् ॥९॥** कथं ?

**सर्वासद्वादिवत् ॥१०॥** इदमसि त्वं प्रष्टव्य उष्णगुणयोगात्प्रागग्ना उष्ण इति ज्ञानं स्याद्वा न वेति। यदि प्रागुष्णगुणयोगादग्नावुष्ण इति ज्ञानं

कैमर्थक्याद्‌ुष्णगुणयोगः प्रार्थ्यते। अथ नास्त्यतोप्युष्णज्ञानाभावादनुष्णस्वभावस्याग्नेरूष्णगुणयोगादुष्ण इति व्यपदेशाभावः। किञ्च,

**अनवस्थाप्रतिज्ञाहानिदोषप्रसंगात् ॥१॥** कथं ?

**सर्वसत्प्रतिपक्षवादिवत् ॥२॥** यथा यद्युष्णगुणयोगादग्निरुष्णः अथोष्णगुणः केन योगादुष्णः स्वभावादिति चेदग्नौ कोऽपरितोषः। उष्णत्वादुष्णस्योष्णत्वं, कुतः स्वत एवेति चेदग्नौ कोऽपरितोषः। अथाग्नेरुष्णत्वं स्वत एव मासिधदित्युष्णत्वस्याप्यन्य-दुष्णत्वमस्ति तस्याप्यन्यदित्यनवस्था। अथानवस्था माभूदिति स्वत एवोष्णत्वस्यो-ष्णत्वम्। ननु प्रतिज्ञाहानिरर्थान्तरात्सम्प्रत्यय इति। तथा यदि ज्ञानगुणयोगादात्मा ज्ञः, अथ ज्ञानगुणः केन योगात्, स्वभावादिति चेदात्मनि कोऽपरितोषः। ज्ञानत्वाज्ज्ञानगुणस्य ज्ञानव्यपदेश इति चेत् ज्ञानत्वस्य ज्ञानत्वं कुतः? स्वत एवेति चेदात्मनि कोऽपरितोषः? अथात्मनो ज्ञत्वं स्वत एव मासिधदिति ज्ञानत्वस्याप्य-न्यज्ज्ञानत्वमस्ति तस्याप्यन्यदित्यनवस्था। अथानवस्था माभूदिति स्वत एव ज्ञानत्वस्य ज्ञानत्वमिष्टं ननु प्रतिज्ञाहानिरर्थान्तरात्सम्प्रत्यय इति। किञ्च,

**तत्परिणामाभावात् ॥३॥** यथा दण्डसंबन्धेऽपि दण्डिनो न दण्डपरिणामः दण्डीव्यपदेशमात्रप्रतिलम्भात्, तथोष्णगुणस्योष्णत्वसामान्यविशेषसंबन्धेनोष्णत्वम्। गुणसामान्यविशेषपदार्थभेदादत उष्णत्ववानुष्णगुण इत्यासक्तं न तूष्ण इति। तथोष्णगुणसम्बन्धेऽप्यग्नेर्नोष्णत्वं द्रव्यगुणपदार्थभेदादत उष्णवानग्निरित्यासक्तं न तु स्वयमुष्ण इति।

**समवायादिति चेन्न प्रतिनियमाभावात् ॥४॥** स्यान्मतं समवायो नामायुत-सिद्धलक्षणः संबन्ध इहेदं बुद्ध्यभिधानप्रवृत्तिहेतुस्तेनैकत्वमिव नीतानां व्यपदेशो

भवति- उष्णत्वसमवायादुष्णो गुण उष्णगुणसमवायाच्चाग्निरुष्ण इति। तन्न कुतः प्रतिनियमाभावादुष्णत्वोष्णगुणयोरग्न्युष्णयोश्चान्यत्वे कोयं प्रतिविशिष्टो नियमो यदुष्णगुणस्याग्नावेव समवायो नाप्सु। शीतगुणस्य चाप्स्वेव समवायो नाग्नौ। उष्णत्वस्य चोष्णगुणेनैव समवायो न शीतादिगुणान्तरेणेति। तस्माद्येन विशेषेणायं प्रतिनियम इष्यते न तं पश्यामः अत एव द्रव्यपरिणाम एवौष्ण्यमिति सिद्धं नान्यस्तत्प्रतिनियमहेतुरस्ति स्वभावो हेतुरिति चेत्तत एव तत्परिणामसिद्धिः। किञ्च,

**समवायाभावो वृत्त्यन्तराभावात् ॥१५॥** नास्ति तत्परिकल्पितः समवायः कुतः वृत्त्यन्तराभावाद्यथा गुणानां पदार्थानां द्रव्येण समवायसंबन्धाद्वृत्तिरिष्टा तथा समवायः पदार्थान्तरं भूत्वा केन संबन्धेन द्रव्यादिषु वर्त्स्यति समवायान्तराभावादेक एव हि समवायः "तत्त्वं भावेन व्याख्यातम्" इति वचनात्। न च संयोगेन वृत्तिर्युतसिद्ध्यभावात् युतसिद्धानामप्राप्तिपूर्विका प्राप्तिः संयोगः। न चान्यसम्बन्धः संयोगसमवायविलक्षणोस्ति येन समवायस्य द्रव्यादिषु वृत्तिः स्यादतः समवायिभिरनभिसम्बन्धान्नास्ति खरविषाणवत्समवायः।

**प्राप्तित्वात्प्राप्त्यन्तराभाव इति चेन्न व्यभिचारात् ॥१६॥** स्यान्मतं द्रव्यादीनि प्राप्तिमन्ति; अतस्तेषां यया कयाचित्प्राप्त्या भवितव्यम्, समवायस्तु प्राप्तिर्न प्राप्तिमान्, अतः प्राप्त्यन्तराभावेऽपि स्वतः एव प्राप्नोतीति, तच्च न, कस्मात्? व्यभिचाराद्यथा संयोगः प्राप्तिरपि सन् प्राप्त्यन्तरेण समवायेन वर्तते तथा समवायस्यापि स्यादिति।

**प्रदीपवदिति चेन्न तत्परिणामादनन्यत्वसिद्धेः॥१७॥** स्यादेतद्यथा प्रदीपः प्रदीपान्तरमनपेक्षमाण आत्मानं प्रकाशयति घटादींश्च, तथा समवायसंबधान्तरा-पेक्षामन्तरेणात्मनश्च द्रव्यादिषु वृत्तिहेतुर्द्रव्यादीनां च परस्पर इत्ति तन्न कुतस्तत्परिणा-मादनन्यत्वसिद्धेः यथा प्रदीपः स्वयं प्रकाशपरिणामात्प्रकाशात्मनोऽनन्यः

प्रकाशान्तरं नापेक्षते अन्यथा प्रकाशात्मनोऽन्यत्वे प्रदीपस्याप्रदीपत्वप्रसङ्गो यतो न प्रकाशात्मानं प्रोज्झ्यान्यः प्रदीपोस्ति तथा न द्रव्यादन्ये गुणकर्मसामान्यविशेषसमवायाः सन्ति द्रव्यस्यैवोभयपरिणामकारणापेक्षस्य गुणः कर्म सामान्यं विशेषः समवाय इत्येवमादिपर्यायान्तरेण परिणामः। यथा प्रदीपः स्वलक्षणप्रसिद्धो घटादिभ्योऽन्यो नैवं समवायः स्वलक्षणप्रसिद्धः द्रव्यादन्योस्ति द्रव्यस्यैव गुणादिपर्यायपरिणामात्तस्मान्न प्रदीपवत्समवायसिद्धिः। अन्यथा च द्रव्या-दन्यत्वे गुणादीनां द्रव्यस्याद्रव्यत्वप्रसङ्गो यतो न गुणादिपर्यायान् प्रोज्झ्यान्य व्यमस्ति। यदि वा गुणादीन् प्रोज्झ्य द्रव्यं केनचिदन्येन स्वविशेषेण प्रसिद्धं यद्गुणादिभिः संबध्यते स विशेष उच्यतां यतो न गुणादिपरित्यागेनान्यो द्रव्यस्य विशेषः स्वतः प्रसिद्धोऽस्ति। अतो द्रव्यपरिणामा एव गुणादय इति प्रसिद्धम्। किञ्च;

**विशेषविज्ञानाभावात् ॥१८॥** यस्य युतायुतसिद्धार्थग्राहकं विज्ञानमेकमस्ति तस्या-युतसिद्धानां समवायः युतसिद्धानां संयोग इति स्याद्विशेषविज्ञानम्। भवतस्तु क्षणिकैकार्थविषयत्वाज्ज्ञानानां तद्विशेषविज्ञानाभावस्तदभावात्तद्विवेकाभावः।

**संस्कारादिति चेन्न तस्यापि तादात्म्यात् ॥१९॥** स्यादेतत् ज्ञानजो ज्ञानहेतुश्च संस्कारोऽस्ति तस्यादः सामर्थ्यमिति तन्न कुतस्तस्यापि तादात्म्यात्। एकार्थग्राहि ज्ञानस्य संस्कारस्य चैकार्थग्राहिज्ञानहेतुत्वादनेकार्थग्राहिज्ञानाभावाच्चानेकार्थग्राहिज्ञान-संस्काराभावस्तस्मात्पूर्वोक्तो दोषस्तदवस्थ एव। अथवायमर्थः कर्तृकरणयोरन्यत्वा-दन्यत्वमात्मज्ञानादीनां परश्वादिवदिति चेन्न तत्परिणामादग्निवदिति यथाग्निरग्निस्व-भावादन्यो दहन् दाहक्रियायाः कर्ता। किं करणो दहति तत्परिणामादग्न्यात्मैव करणं तथात्मा ज्ञस्वभावत्वाज्ज्ञानादन्यस्तत्परिणामादर्थान् जानन् ज्ञानक्रियायाः कर्ता किंकरणो जानाति तत्परिणामात्तदेव ज्ञानं करणत्वेन विवक्ष्यते। अन्यथा

चाऽतत्स्वाभाव्येऽनवधारणप्रसङ्गोग्निवदित्येवमादिवाक्यार्थविवरणं दहनस्वभावापेक्षया योज्यम् । किञ्च,

**अनेकान्तात्पर्यायपर्यायिणोरर्थान्तरभावस्य घटादिवत् ॥२०॥** यथा घटकपालकलश-शर्करादीनां नयद्वयार्पणाभेदात्स्यादेकत्वं स्यादन्यत्वं कथम् ? इह पर्यायार्थिकगुणभावे द्रव्यार्थिकप्राधान्यात्पर्यायार्थानर्पणात् मृद्रूपद्रव्याजीवानुपयोगादिद्रव्यार्थार्पणात्स्यादेकत्वम्, यतो घटकपालादयो मृद्रूपद्रव्यार्थं न जहति। तेषामेव द्रव्यार्थिकगुणभावे पर्यायार्थिकप्रधान्याद्द्रव्यार्थानर्पणात्कारणविशेषापादितभेदपर्यायार्थार्पणात्स्यादन्यत्वम्, यतोन्यो घटपर्यायोन्यश्च कपालादिपर्यायस्तथा मृदो घटादिपर्यायाणां च स्यादेकत्वं स्यादन्यत्वं कथम्? तत्परिणामात्स्यादेकत्वं यतो मृद्रूपमेवोभयपरिणामकारणवशाद् घटकपालादिपर्यायपरिणतं तद्व्यपदेशभाग्भवति नान्या मृन्नान्ये घटादयो मृद्रूपव्यतिरिक्तघटादिपर्यायाभावात् । पर्यायिपर्यायभेदाच्च स्यादन्यत्वम्, यतः पर्यायि मृद्द्रव्यं पर्यायाः घटादयः। तथात्मनोपि ज्ञानादिपर्यायाणां च स्यादेकत्वं स्यान्नानात्वं कथं? पर्यायार्थिकगुणभावे द्रव्यार्थिकप्राधान्यात्पर्यायार्थानर्पणादनादिपारिणामिकचैतन्य-जीवद्रव्यादिद्रव्यार्थार्पणात्स्यादेकत्वं यतो ज्ञानादयोऽनादिपारिणामिकचैतन्यजीवद्रव्यादि-द्रव्यार्थं न जहति। तेषामेव द्रव्यार्थिकगुणभावे पर्यायार्थिकप्राधान्या व्यार्थानर्पणा-त्कारणविशेषापादितभेदपर्यायार्थार्पणात्स्यादन्यत्वं यतोन्यो ज्ञानपर्यायोन्ये च दर्शनादिपर्यायाः तथात्मनो ज्ञानादिपर्यायाणां च स्यादेकत्वं स्यादन्यत्वं कथम्? तत्परिणामादेशात्स्यादेकत्वं यत आत्मैवोभयपरिणामकारणवशाज्ज्ञानादिपर्यायपरिणतो ज्ञानादिव्यपदेशभाग्भवति नान्य आत्मा नान्ये ज्ञानादयः आत्मद्रव्यव्यतिरिक्तज्ञानादि-पर्यायाभावात् । पर्यायिपर्यायभेदाच्च स्यादन्यत्वं यतः पर्यायी आत्मा पर्याया ज्ञानादयस्तस्मादेकत्वान्यत्वं प्रत्यनेकान्तोपपत्तेः तत्परिणामत्वेपि करणभावो युक्तः।

**इतरथा ह्येकार्थपर्यायादन्यत्वप्राप्तिर्वृक्षवत् ॥२१॥** यस्यैकान्तिकं कर्तृकरण-योरन्यत्वं तस्यैकार्थपर्यायादन्यत्वं प्राप्तम्। कथम्? वृक्षवत्। यथा 'प्रासादं करोति परश्वादिभिः' इत्यत्र कर्तृकरणयोरन्यत्वं तथा 'भज्यते वृक्षः शाखाभारेण' इत्येकस्य वृक्षस्य शाखाभारार्थपर्यायादन्यत्वं प्राप्तम् न चादोऽस्ति, यतो न शाखाभारादृतेऽन्यो वृक्षः। न च शाखाभारादन्यो वृक्षो न भवतीति 'भज्यते वृक्षः शाखाभारेण' इत्येकार्थपर्यायात्मकः करणनिर्देशो न भवति? तथा नात्मद्रव्यादृतेऽन्यज्ज्ञानं। न चात्मद्रव्यादृते नान्यज्ज्ञानमिति 'जानात्यनेनार्थानात्मा' इत्येकार्थपर्यायात्मकं करणं न भवति ? किञ्च,

**करणस्योभयथोपपत्तेर्द्रव्यस्य मूर्तिमदमूर्तिभेदवत्॥२२॥** यथा द्रव्यस्य मूर्तिमदमूर्तिभेदादेकान्तपरिग्रहो नास्ति। पुद्गलद्रव्यं मूर्तिमत् धर्माधर्माकाशकाला अमूर्तय आत्मा चामूर्तः। द्रव्यार्थादेशान्न पर्यायार्थादेशात्तस्यानादिकार्मणशरीरसंबन्धात्। तथा करणं द्वेधा विभक्ताविभक्तकर्तृकभेदात्, कर्तुरन्यद्विभक्तकर्तृकं यथा परशुना छिनत्ति देवदत्त इति। कर्तुरनन्यदविभक्तकर्तृकं यथाग्निरिन्धनं दहत्यौष्ण्येनेति। तथात्मा ज्ञानेनार्थान् जानातीत्यविभक्तकर्तृकं करणम्। किञ्च,

**दृष्टान्ताच्च कुशूलस्वातंत्र्यवत् ॥२३॥** यथा भिनत्ति कुशूलं देवदत्त इत्य कुशूलो यदा भिदिक्रियायाः सुकरतया स्वातंत्र्येण विवक्षितः "स्वयमेवात्मानं भिनत्तीति" तदा किंकरणोऽसावात्मानं भिनत्तीति विवक्षायां कुशूलात्मैव करणत्वेनोपादीयते। तथात्मैव ज्ञाता करणं च भवति। किञ्च,

**एकार्थपर्यायविशेषोपपत्तेरिन्द्रियादिव्यपदेशवत् ॥२४॥** इहैकस्यार्थस्यानेकपर्याय-विशेषोपपत्तिर्दृष्टा न चास्य तेभ्यः पर्यायेभ्योऽन्यत्वं कथम्? इन्द्रादिव्यपदेशवत्। यथैकस्य देवराजार्थस्येन्द्रशक्रपुरन्दराद्यनेकव्यञ्जनपर्यायविशेषोपपत्तिः। न च देवराजस्येन्द्रशक्रपुरन्दरादिपर्यायेभ्योऽन्यत्वं न चानन्यत्वाद्येनायमिन्द्रस्तेनैव शक्रः

पुरन्दरो वा, येन वा शक्रस्तेनैवेन्द्रः पुरन्दरो वा, येन वा पुरन्दरस्तेनैवेन्द्रः शक्रो वा। कथम्? इह यत इन्द्रादीनां प्रतिनियतव्यञ्जनपर्यायोपपत्तिःइन्दनादिन्द्रः शकनाच्छक्रः पूर्दारणात् पुरन्दर इति। न चेन्दनशकनपूर्दारणव्यंजनपर्यायभेदान्न देवराज इन्द्रः शक्रः पुरन्दरो वा भवति। भवत्येव। तथैकस्य आत्मनो ज्ञानादिपर्यायविशेषोपपत्तिस्तस्मादेकार्थपर्यायविशेषोपपत्तेर्नान्यत्वमात्मद्रव्यादेकान्तेन ज्ञानादीनां।

**कर्तृसाधनत्वाद्वा दोषाभावः॥२५॥** अथवा नेमौ ज्ञानदर्शनशब्दौ करणसाधनौ। किं तर्हि कर्तृसाधनौ। तथा चारित्रशब्दोऽपि न कर्मसाधनः। किं तर्हि कर्तृसाधनः। कथम्? एवंम्भूतनयवशात्। ज्ञानदर्शनचारित्राण्यात्मैवेष्टः; अतस्तत्परिणामाज्ज्ञानादिपरिणत आत्मैव जानातीति ज्ञानं पश्यतीति दर्शनं चरतीति चारित्रमतो य उक्तः कर्तृकरणयोरन्यत्वादन्यत्वमात्मज्ञानादीनामिति दोषः ; स न भवति।

**लक्षणाभाव इति चेन्न बाहुलकात्॥२६॥** स्यादेतन्न लक्षणमस्ति कर्तरि युटोविधायकमिति तन्न कुतो बाहुलकात् "युड् व्याबहुलमिति" कर्तरि युट् णित्रश्च यत्र विहितास्ततोन्यत्रापि दृश्यन्ते- त्या भावकर्मणोर्विहिताः करणादिष्वपि भवन्ति। स्नात्यनेन स्नानीयश्चूर्णो ददात्यस्मै इति दानीयोऽतिथिः समावर्तते तस्मादिति समावर्तनीयो गुरुः। करणाधिकरणयोर्युडुक्तः कर्मादिष्वपि दृश्यते निरदति तदिति निरदनं प्रस्कन्दति तस्मादिति प्रस्कन्दनम्। अथवा

**भावसाधना ज्ञानादिशब्दास्तत्त्वकथनाद् दात्रस्य करणव्यपदेशवत्॥२७॥** यथौदासीन्येनावस्थितमच्छिन्दत्तृणादिदात्रं करणमिति व्यपदिश्यते। तथौदासीन्येनावस्थितानि ज्ञानदर्शनचारित्राणि प्रतिनियतज्ञानदर्शनचरणक्रियाव्यापारं प्रतिनिवृत्तौत्सुक्यानि कथ्यन्ते कोऽसौ मोक्षमार्गः ज्ञानदर्शनचारित्राणि। ज्ञातिर्ज्ञानं दृष्टिर्दर्शनं चरणं चारित्रमिति क्रियाव्यापृतानां तु ज्ञानीदानां कर्त्रादिकारकव्यवहारः।

**व्यक्तिभेदादयुक्तमिति चेन्नैकार्थे शब्दान्यत्वाद् व्यक्तिभेदगतेः॥२८॥** स्यादेतज्ज्ञानमात्मेत्ययुक्तं कस्माद् व्यक्तिभेदादभिधेयवल्लिङ्गसंख्ये भवतोऽभिधानस्येति ज्ञान आत्मेति प्राप्नोतीति; तन्न, किं कारणम्? एकार्थे शब्दान्यत्वाद् व्यक्तिभेदगतेरेकस्मिन्नप्यर्थे शब्दभेदाद् व्यक्तिभेदा दृश्यन्ते। यथा गेहं कुटी मठः, पुष्यः तारका नक्षत्रमित्येवं ज्ञानमात्मेत्यपि स्यात्।

**ज्ञानग्रहणमादौ न्याय्यं तत्पूर्वकत्वाद्दर्शनस्य॥२९॥** आहेह ज्ञानग्रहणमादौ न्याय्यम्। कुतस्तत्पूर्वकत्वाद्दर्शनस्य यतः पदार्थतत्त्वोपलब्धिपूर्वकं श्रद्धानम्।

**अल्पाच्तरत्वाच्च ॥३०॥** दर्शनात् ज्ञानमल्पाच्तरमतश्च पूर्वं वाच्यम्।

**नोभयोर्युगपत्प्रवृत्तेः प्रतापप्रकाशवत्॥३१॥** नैष दोषः कुत उभयोर्युगपत्प्रवृत्तेः कथं प्रकाशप्रतापवद्यथा सवितुर्घनपटलावरणविगमे प्रतापप्रकाशप्रवृत्तिर्युगपद्भवति। तथा ज्ञान-दर्शनयोर्युगपदात्मलाभः। तद्यथा- यदा दर्शनमोहस्योपशमात्क्षयोपशमात्क्षयाद्वात्मा सम्य-ग्दर्शनपर्यायेणाविर्भवति तदैव तस्य मत्यज्ञानश्रुताऽज्ञाननिवृत्तिपूर्वकं मतिज्ञानं श्रुतज्ञानं चाविर्भवति।

**दर्शनस्यैवाभ्यर्हितत्वात्॥३२॥** यदप्युक्तमल्पाच्तरत्वाज्ज्ञानस्य पूर्वनिपात इति तदसत् कस्मात्? दर्शनस्यैव अभ्यर्हितत्वाज्ज्ञानाद्दर्शनमेवाभ्यर्हितं दर्शनसन्निधाने सत्यज्ञानस्यापि ज्ञानभावात्। ज्ञात्वाप्यश्रद्दधतस्तदभावात्।

**मध्ये ज्ञानवचनं ज्ञानपूर्वकत्वाच्चारित्रस्य॥३३॥** यतो जीवादिपदार्थतत्त्वज्ञान-सन्निधाने सति चारित्रमोहोपशमात्क्षयोपशमात्क्षयाद्वा कर्मादानहेतुक्रियाविशेषोपरमश्चारित्रपरिणामो भवति। ततश्चारित्रस्य ज्ञानपूर्वकत्वात् ज्ञानं पूर्वं प्रयुक्तम्।

**इतरेतरयोगे द्वन्द्वो मार्गं प्रति परस्परापेक्षाणां प्राधान्यात् ॥३४॥** अयमितरेतरयोगे द्वन्द्वो दर्शनं च ज्ञानं च चारित्रं च दर्शनज्ञानचारित्राणीति। कुतो? मार्गं प्रति परस्परापेक्षाणां प्राधान्यात् ।

**सर्वपदार्थप्रधानत्वाद्बहुवचनान्तः॥३५॥** यथा प्लक्षन्यग्रोधपलाशा इत्यस्त्यादि-समानकालक्रियाणां प्लक्षादीनां परस्परापेक्षाणामितरेतरयोगे द्वन्द्वः सर्वपदार्थप्रधानत्वात् बहुवचनान्तस्तथा दर्शनज्ञानचारित्राणामस्त्यादिसमानकालक्रियाणां परस्परापेक्षाणामित-रेतरयोगे द्वन्द्वः सर्वपदार्थप्रधानत्वाद्बहुवचनान्तः। यतस्त्रयाणामपि दर्शनादीनां संहतानां परस्परापेक्षाणां मोक्षमार्गत्वं प्रति प्राधान्यं नैकस्य न द्वयोः।

**प्रत्येकं सम्यग्विशेषणपरिसमाप्तिर्भुजिवत् ॥३६॥** यथा देवदत्तजिनदत्तगुरुदत्ता भोज्यन्तामिति भुजिः प्रत्येकं परिसमाप्यते। तथा प्रशंसावचनस्य सम्यक्शब्दस्य प्रत्येकमभिसंबंधो दर्शनादिभिः, सम्यग्दर्शनं सम्यग्ज्ञानं सम्यक्चारित्रमिति।

**पूर्वपदसामानाधिकरण्यात्तद्व्यक्तिवचनप्रसंग इति चेन्न मोक्षोपायस्यात्मप्रधा-नत्वात् ॥३७॥** स्यादेतद्दर्शनादिभिः सामानाधिकरण्यात्तद्व्यक्तिवचने मोक्षमार्गस्य प्राप्नुत इति, तन्न किं कारणं मोक्षोपायस्यात्मप्रधानत्वात् यो मोक्षमार्गो मोक्षापायस्तस्यात्मा स्वभावः येनात्मीयेन स्वभावेन स मोक्षमार्ग उच्यते। स दर्शनज्ञानचारित्राणां सर्वेषामविशिष्ट एकः पुल्लिंगश्च तस्य प्राधान्यात्सत्यपि सामानाधिकरण्ये न तद्व्यक्तिवचनप्राप्तिः। यथा साधवः प्रमाणमिति।

**आत्यन्तिकः सर्वकर्मनिक्षेपो मोक्षः॥३८॥** मोक्ष असने इत्येतस्य घञ् भावसाधनो मोक्षणं मोक्षः असनं क्षेपणमित्यर्थः स आत्यन्तिकः सर्वकर्मनिक्षेपो मोक्ष इत्युच्यते।

**मृजेःशुद्धिकर्मणो मार्ग इवार्थाभ्यन्तरीकरणात् ॥३९॥** मृष्टः शुद्धोऽसाविति मार्गः मार्ग इव मार्गः क उपमार्थः? यथा स्थाणुकण्टकोपलशर्करादिदोषरहितेन मार्गेण मार्गगाः सुखमभिप्रेतस्थानं गच्छन्ति। तथा मिथ्यादर्शनाऽसंयमादिदोषरहितेन त्र्यंशेन श्रेयोमार्गेण सुखं मोक्षं गच्छन्ति।

**अन्वेषणक्रियस्य वा करणत्वोपपत्तेः॥४०॥** अथवा मार्ग अन्वेषणे इत्यस्य मार्गः सिध्यति। कुतः? सम्यग्दर्शनादीनां करणत्वोपपत्तेः, मोक्षो येन मार्ग्यते स मोक्षमार्ग इति।

**युक्त्यनभिधानादमार्ग इति चेन्न मिथ्यादर्शनाज्ञानासंयमानां प्रत्यनीकत्वा-दौषधवत् ॥४१॥** स्यादेतन्नात्र युक्तिरुक्ता सम्यग्दर्शनादित्रयमित्थं मोक्षमार्ग इत्यतोऽस्य मार्गत्वं नोपपद्यते इति। तन्न किं कारणं मिथ्यादर्शनाज्ञानासंयमानां प्रत्यनी-कत्वात्कथम्? औषधवत्। यथा वातादिविकारोद्भूतरोगाणां निदानप्रत्यनीकं स्निग्धरूक्षाद्यौषधमुच्छेदकारणम्। तथा मिथ्यादर्शनाज्ञानासंयमादीनां निदानप्रत्यनीकं सम्यग्दर्शनाद्यौषधमुच्छेदकारणम्।

इति तत्त्वार्थवार्तिके व्याख्यानालंकारे प्रथमेऽध्याये प्रथममाह्निकम्॥१॥

**विपर्ययाद्बन्धस्यात्मलाभे सति ज्ञानादेव तद्विनिवृत्तेस्त्रित्वानुपपत्तिः॥४२॥** अत्र कश्चिदाह – विपर्ययाद्बन्धस्यात्मलाभो भवति तदभावात्तत्त्वज्ञाने सति बंधनिवृत्तिर्भवति। कारणाभावाद्धि कार्याभाव इति। बन्धनिवृत्तिरेव च मोक्षः। अतो मोक्षमार्गस्य त्रित्वं नोपपद्यते।

**प्रतिज्ञामात्रमिति चेन्न सर्वेषामविसंवादात् ॥४३॥** स्यादेतत्प्रतिज्ञामात्रमेतद्विपर्य-याद्बन्धो भवतीति; तन्न, किं कारणम् सर्वेषामविसंवादान्नात्र प्रतिवादिनो विसंवदन्ते। तद्यथा-

**धर्मेण गमनमूर्ध्वमित्यादिवचनमेकेषाम्॥४४॥** धर्मेण गमनमूर्ध्वं भवत्यष्टसु ब्राह्म्यसौम्यप्राजापत्यैन्द्रगान्धर्वयक्षराक्षसपिशाचेषु । ''गमनमधस्ताद्भवत्यधर्मेण'' अधर्मेण खलु षट्सु स्थानेषु मानुषपशुमृगमत्स्यसरीसृपस्थावरेषु गमनम् 'ज्ञानेन चापवर्गो' यदास्य रजस्तमसोर्गुणभावात्सत्त्वस्य प्राधान्यात्प्रकृतिपुरुषान्तरपरिज्ञान-माविर्भवति तेनापवर्गः। विपर्ययादिष्यते बंधो योऽस्यावक्तव्यमहदहंकारतन्मात्रसंज्ञास्वष्टासु प्रकृतिष्वनात्मीयास्वाहंकारिकेषु वैकारिकेषु चेन्द्रियेष्वात्मत्वाभिमानः स विपर्य-यस्तस्माद्बन्ध इत्येकेषां वचनम्।

तथाऽनात्मीयेष्वात्माभिमानविपर्ययात्तस्य शब्दाद्युपलब्धिरादिः गुणपुरुषान्तरोपलब्धिरन्तः। यावदस्याविभक्तप्रत्ययः श्रोत्रादीन्द्रियवृत्तिषु श्रवणादिष्वहं श्रोतेत्येवमादिः पाञ्चभौतिके च शिरःपाण्यादिसमूहे शरीरेऽहं पुरुष इति प्रत्ययो भवति, तावदप्रतिबुद्धत्वात्संसारः। गुणपुरुषान्तरोपलब्धिरन्तः। यदा पुरुषवर्जं सर्वं प्रकृतिकृतं त्रिगुणमचेतनं भोग्यमिति जानाति। भोक्तारमकर्तारं चेतनं च पुरुषमन्यं प्रधानादवैति अचेतनांश्च गुणांस्तदा तस्य गुणपुरुषान्तरोपलब्धिरन्तः संसारस्येति ज्ञानान्मोक्षो विपर्ययाद्बन्ध इत्येकेषाम्।

**इच्छाद्वेषाभ्यामपरेषाम्॥४५॥** इच्छाद्वेषपूर्विका धर्माधर्मप्रवृत्तिस्ताभ्यां सुखं दुःखं, तत इच्छाद्वेषौ । न च विमोहस्य तौ मिथ्यादर्शनाभावात्। मोहश्चाज्ञानम् विमोहस्य यतः षट्पदार्थतत्त्वज्ञस्य वैराग्यवतः सुखदुःखेच्छाद्वेषाभाव इच्छाद्वेषाभावाद्धर्माधर्माभाव-स्तदभावे संयोगाभावोऽप्रादुर्भावश्च स मोक्षस्तयोर्धर्माधर्मयोरभावे भवत्यपवर्गः। कथम् प्रदीपोपरमे प्रकाशाभाववत्। यद्धि यद्भावं प्रतीत्यात्मानं प्रतिलभते तत्तस्योपरमात्तिरोभावं याति। तद्यथा-प्रदीपोपरमात्प्रकाशाभावः। बन्धश्चादृष्टाद्भवति, कथम्? अधर्मसंज्ञाददृष्टाद-ज्ञानं भवत्यज्ञानाच्च मोहो मोहवत इच्छाद्वेषौ जायेते इच्छाद्वेषाभ्यां धर्माधर्मौ स एव

बन्धः अतः संसारस्य प्रसूतिः। तस्माद्भवत्यदृष्टाभावे संयोगाभावः कतरस्य संयोगस्याभावः? जीवनसंज्ञकस्य। धर्माधर्मापेक्षः सदेहस्यात्मनो मनसा संयोगो जीवनम्, तस्य धमाधर्मयोः भावादभावोऽप्रादुर्भावश्च प्रत्यग्रशरीरस्यात्यन्ताभावः स मोक्षः। कथमभावो धर्माधर्मयोः अनागतानुत्पत्तिसंचितनिरोधाभ्यामनागतानुत्पत्तिः संचितनिरोधश्च द्विविधोऽभावः। तत्रानागतानुत्पत्तिस्तावद्धर्माधर्मयोः। शरीरेन्द्रियमनोव्यति-रिक्तात्मदर्शनादकुशलस्याधर्मस्यानुत्पत्तिः। तत्साधनानां परिवर्जनात् धर्मस्यापि तत्साधनानामनभिसम्बन्धात्। नाभिसंहितं कर्म बध्नातीति। संचितनिरोधोपि- तदुद्वेगपरिखेदफलादधर्मनाशस्तस्मात्संसारादुद्वेगः। शरीरतत्त्वावलोकनाच्छीतोष्णशोकादि-निमित्तं शरीरपरिखेदं प्रदायाधर्मोतिरिच्यते। भोगदोषदर्शनात् षण्णां च पदार्थानां तत्त्वविनिर्णयात्प्रीतिमारभ्य धर्मस्य विनाशोऽतो मोक्ष इत्यपरेषां दर्शनम्।

**दुःखादिनिवृत्तिरित्यन्येषाम्॥४६॥**

दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावान्निश्रेयसाधिगम इत्यन्येषां दर्शनम्। पाठं प्रत्युत्तरं मिथ्याज्ञानम्। सर्वेषामुत्तरस्य तत्त्वज्ञानान्निवृत्तौ यस्तदनन्तरोऽर्थस्तस्य निवृत्तिः। कश्चासौ? दोषः, स हि मिथ्याज्ञानादनन्तरस्तत्कार्यत्वात् स चोत्तरः प्रवृत्तेः; प्रवत्तिश्चानन्तरा तत्कार्यत्त्वात्, ततो दोषाभावे प्रवृत्यभावो प्रवृत्तिरप्युत्तरा जन्मनः; प्रवृत्तेरभावाज्जन्माभावस्तत्कार्यत्वात् तथा जन्मोत्तरं दुःखादतो जन्माभावाद्दुःखनिवृत्तिस्तन्निवृत्तौ य आत्यन्तिकः सुखदुःखानुपभोगो निश्रेयसमिति।

**अविद्याप्रत्ययाः संस्कारा इत्यादिवचनं केषाञ्चित् ॥४५॥** अविद्या विपर्ययात्मिका सर्वभावेष्वनित्यानात्मकाशुचिदुःखेषु नित्यसात्मकशुचिसुखाभिमानरूपा तत्प्रत्ययाः संस्कारा इत्यादिवचनं केषाञ्चित्। के पुनस्ते संस्काराः? रागादयस्ते च

त्रिधा पुण्यापुण्यानेज्यसंस्कारा यत इदमुच्यतेऽविद्याप्रत्ययाः संस्काराः। वस्तु प्रति विज्ञप्तिर्विज्ञानमिति। तत्र पुण्योपगानां संस्काराणां पुण्योपगमे च विज्ञानं भवति अपुण्योपगानां संस्काराणामपुण्योपगमे च विज्ञानं भवति आनेज्योपगानां संस्काराणामानेज्योपगमे च विज्ञानं भवति यत इदमुच्यते संस्कारप्रत्ययं विज्ञानम्। विज्ञानसंभूताश्चत्वारः स्कंधाः नाम, चत्वारि महाभूतानि रूपं नाम च रूपनाम च नामरूपमिति। यत इदमुच्यते विज्ञानप्रत्ययं नामरूपम् नामरूपसन्निहितानीन्द्रियाणि षडायतनमिति। नामरूपवृद्ध्या षड्भिरायतनद्वारैः कृत्यं क्रिया च प्रजायते इति नामरूपप्रत्ययं षडायतनमुच्यते। त्रयाणां धर्माणां सन्निपातः स्पर्शः। केषां त्रयाणाम्? विषयेन्द्रियविज्ञानानां, संगतिः स्पर्शः। षड्भ्य आयतनेभ्यः षट् स्पर्शकायाः प्रवर्तन्त इति षडायतनप्रत्ययः स्पर्शः। स्पर्शानुभवनं वेदना यज्जातीयः स्पर्शो भवति तज्जातीया वेदना प्रवर्तत इतीदमुच्यते स्पर्शप्रत्यया वेदनेति। वेदनाध्यवसाना तृष्णा यतस्तान् वेदनाविशेषानास्वादयत्यभिनन्दयत्यध्यवस्यति तृष्यतीति सा वेदनाप्रत्यया तृष्णोच्यते। तृष्णावैपुल्यमुपादानं, सा मे प्रिया सानुरागेति भवेन्नित्यमपरित्यागो भूयोभूयश्च प्रार्थना तदुच्यते तृष्णाप्रत्ययमुपादानमिति। उपादाननिमित्तं पुनर्भवजनकं कर्म भव, एवं प्रार्थयमानः पुनर्भवजनकं कर्म समुत्थापयति कायेन मनसा वाचा। तद्धेतुकः स्कंध प्रादुर्भावो जातिर्जातिस्कंधपरिपाको जरा। जात्यभिनिवृत्तानां स्कंधानामपचयः परिपाकः, परिपाकाद्विनाशो भवति तन्मरणं तदेवं जातिप्रत्ययं जरामरणमुच्यते। एवमयं द्वादशांगः प्रतीत्यसमुत्पादोऽन्योन्यहेतुकस्तत्र सर्वभावेष्वविपरीतदर्शनं विद्या। यत्सर्वभावेष्वनित्या-नात्मकाशुचिदुःखेष्वनित्यानात्मकाशुचिदुःखदर्शनं सा विद्या। ततो मोक्षः कथम्? अविद्याया विद्यातो निवृत्तिरविद्यानिवृत्तेः संस्कारनिरोधः संस्कारनिरोधाद्विज्ञाननिरोधः। एवमुत्तरेष्वपीति। तदेवमविद्यातो बन्धो भवति विद्यातश्च मोक्ष इति।

**मिथ्यादर्शनादेरिति मतं भवताम्॥४८॥** ''मिथ्यादर्शनाविरतिप्रमादकषाययोगा बंधहेतव'' इति भवतामार्हतानामपि मतम्। पदार्थविपरीताभिनिवेशश्रद्धानं मिथ्यादर्शनं विपरीताभिनिवेशश्च मोहात्, मोहश्चाज्ञानमित्यज्ञानाद्बंधः। अतो मिथ्यादर्शनमादिर्बन्धस्य सामायिकमात्रप्रतिपत्तेश्च ''अनंताः सामायिकमात्रसिद्धा'' इति वचनात् सामायिकं च ज्ञानमतः आर्हतानामपि ज्ञानान्मोक्ष इत्यविसंवादात् त्रितयमोक्षमार्गकल्पना न युक्ता। किञ्च,

**दृष्टान्तसामर्थ्याद्वणिक् स्वप्रियैकपुत्रवत् ॥४८॥** यथा वणिक् स्वप्रियैक-पुत्रसदृशविग्रहं गजेनावमृद्यमानं बालमुपलभ्यातिदुःखाभिभवमूर्च्छया गतप्राण इवाभवद्विनिवृत्तकायादिक्रियस्य चास्य कुशलसुहृद्भिरुपायपूर्वकं प्रत्याहितप्राणवृत्तेः स्वपुत्र एव दर्शनविषयमुपनीतेऽयं मम पुत्र इत्याविर्भूततत्त्वज्ञानस्य स्वपुत्रसादृश्योद्भूतमिथ्याज्ञानजनितं दुःखं तदभूतपूर्वमिवाभवदेवमज्ञानाद्बंधः केवलाच्च ज्ञानान्मोक्ष इति।

**न वा नान्तरीयकत्वाद्रसायनवत् ॥50॥** न वैष दोषः किं कारणं नान्तरीयकत्वान्न हि त्रितयन्मतरेण मोक्ष प्राप्तिरस्ति। कथम्? रसायनवत्। यथा न रसायनज्ञानादेव रसायनफलेनाभिसंबन्धः रसायनश्रद्धानक्रियाभावात्, यदि वा रसायनज्ञानमात्रादेव रसायनफलसंबन्धः कस्यचिद्दृष्टः सोभिधीयतां न चासावस्ति। न च रसायनक्रियामात्रादेव, ज्ञानश्रद्धानाभावात्। न च रसायनश्रद्धानमात्रादेव रसायनज्ञानपूर्वक्रियासेवनाभावात्। अतो रसायनज्ञानश्रद्धाक्रियासेवनोपेतस्य तत्फलेनाभिसंबन्ध इति निःप्रतिद्वन्द्वमेतत्। तथा न मोक्षमार्गज्ञानादेव मोक्षेणाभिसंबन्धो दर्शनचारित्राभावात् न च श्रद्धानादेव मोक्षमार्गो ज्ञानपूर्वक्रियानुष्ठानाभावात्। न च क्रियामात्रादेव ज्ञानश्रद्धानाभावात्, यतः क्रियाज्ञानश्रद्धानरहिता निःफलेति। यदि च ज्ञानमात्रादेव क्वचिदर्थसिद्धिर्दृष्टा साभिधीयतां

न चासावस्त्यतो मोक्षमार्गत्रितयकल्पना ज्यायसीति। अनन्ताः सामायिकसिद्धा इत्येतदपि त्रितयमेव साधयति। कथम् ? ज्ञस्वभावस्यात्मनस्तत्त्वं श्रद्दधानस्य सामायिकचारित्रोपपत्तेः। समय एकत्वमभेद इत्यनर्थान्तरम्। समय एव सामायिकं चारित्रं सर्वसावद्यनिवृत्तिरित्यभेदेन संग्रहादिति। उक्तं च -

हतं ज्ञानं क्रियाहीनं हता चाज्ञानिनां क्रिया।
धावन् किलान्धको दग्धः पश्यन्नपि च पङ्गुलः॥
संयोगमेवेह वदन्ति तज्ज्ञा न ह्येकचक्रेण रथः प्रयाति।
अंधश्च पंगुश्च वने प्रविष्टौ तौ संप्रयुक्तौ नगरं प्रविष्टौ॥ इति

**ज्ञानादेव मोक्ष इति चेदनवस्थानादुपदेशाभावः॥५१॥** यस्य ज्ञानादेव मोक्षस्तस्यानवस्थानादुपदेशाभावः। यथा प्रदीपस्य तमोनिवृत्तिहेतुत्वात्प्रदीपे सति न मुहूर्तमपि तमोऽवतिष्ठते। न ह्येतदस्ति प्रदीपश्च नाम ज्वलति तमश्चावतिष्ठत इति। तथात्मस्वरूपावबोधाविर्भावानन्तरमेवाप्तस्य मोक्षः स्यात्, न ह्येतद्युक्तिमत्, ज्ञानं च नाम मोक्षस्य कारणमस्ति न च मोक्ष इति। ततो ज्ञानान्तरमेवाप्तस्य शरीरेन्द्रियवृत्त्यादिनिवृत्तेः प्रवचनोपदेशाभावः॥

**संस्काराक्षयादवस्थानादुपदेश इति चेन्न प्रतिज्ञातविरोधात्॥५२॥** स्यादेतद्यावदस्य संस्काराः न क्षीयन्ते तावदवस्थानमित्युपदेश उपपन्न इति, तन्न किं कारणं प्रतिज्ञाताविरोधात्। यद्युत्पन्नज्ञानोपि संस्कारक्षयापेक्षत्वादवतिष्ठते न मुच्यते न तर्हि ज्ञानादेव मोक्षः कुतः संस्कारक्षयादिति, यत्प्रतिज्ञातं ज्ञानेन चापवर्ग इति तद्विरोधः। किञ्च,

**उभयथा दोषोपपत्तेः॥५३॥** इदमिह संप्रधार्यं संस्कारक्षयस्य ज्ञानं वा हेतुः स्यादन्यो वेति। यदि ज्ञानं ननु ज्ञानादेव संस्कारनिरोध इति प्रवचनोपदेशाभावः।

अथान्यः स कोऽन्यो भवितुमर्हत्यन्यतश्चारित्रादिति पुनरपि प्रतिज्ञातविरोध इति। किञ्च,

**प्रव्रज्याद्यनुष्ठानाभावप्रसंगश्च॥५४॥** यदि ज्ञानादेव मोक्षः, ननु ज्ञान एव यत्नः कार्य्यः, शिरस्तुंडमुंडनकाषायाम्बरधारणादिलक्षणप्रव्रज्यायमनियमभावनाद्यभावप्रसंगः स्यात् ।

**ज्ञानवैराग्यकल्पनायामपि॥55॥** किमवस्थानाभावादुपदेशाभाव इत्यादिपदार्थपरि-ज्ञाने सति विषयानभिष्वङ्गलक्षणे च वैराग्य आप्तस्य तत्क्षण एव मोक्षोपपत्तेः। किञ्च,

**नित्यानित्यैकान्तावधारणे तत्कारणासंभवः॥५६॥** नित्या एवार्था अनित्या एव वेत्येकान्तावधारणे तत्कारणासंभवः, तत्कारणस्य ज्ञानवैराग्यस्यासंभवः। तद्यथा –

**नित्यत्वैकान्तेऽपि विक्रियाभावाद् ज्ञानवैराग्याभावः॥५७॥** विक्रिया द्विविधा ज्ञानादिविपरिणामलक्षणा देशान्तरसंक्रमरूपा च। येषां नित्य एवात्मा सर्वगतश्चेति दर्शनं तेषामुभय्यपि सा नास्ति। ततश्चतुष्टयत्रयद्वयसन्निकर्षजविज्ञानाभावाद्वैराग्यपरिणामा-भावाच्च पूर्वापरकालतुल्यवृत्तेरात्मन आकाशस्येव मोक्षाभावः। समवायादिति चेन्न तस्य प्रत्याख्यातत्वात् ।

**क्षणिकैकान्तेप्यवस्थानाभावाज्ज्ञानवैराग्यभावनाभावः॥५८॥** येषां मतं "क्षणिकाः सर्वसंस्कारा" इति तेषामप्युत्पत्त्यन्तरं विनाशे सति ज्ञानादीनामवस्थानं नास्ति। न च तेभ्योऽन्यदवस्थास्नु वस्तु विद्यते। अतस्तदभावाज्ज्ञानवैराग्यभावनाभावः। तत एवोत्पत्त्यनन्तरं निरन्वयविनाशाभ्युपगमात्परस्परं संश्लेषाभावे निमित्तनैमित्तिक-व्यवहारापह्नवाद् "अविद्याप्रत्ययाः संस्कारा" इत्येवमादि विरुध्यते संतानादिकल्पनायां वान्यत्वानन्यत्वयोरनेकदोषानुषङ्गः।

**विपर्ययाभावः प्रागनुपलब्धेरुपलब्धौ वा बन्धाभावः॥५९॥** इह लोके प्रागनुभूतस्थाणुपुरुषविशेषस्य प्रकाशाभावादभिभवात्करणक्लमाद्वा विशेषानुपलब्धौ विपर्य्ययो दृष्टः न चावनितलभवनसंभूतस्य प्रागप्रतीततदन्तरस्य विपर्ययप्रत्ययो भवति। न च तथानादौ संसारेऽनभिव्यक्तशक्तेः पुरुषस्य गुणपुरुषान्तरोपलब्धिरस्ति। अतः प्रागनुपलब्धेर्नास्ति विपर्ययः। तथा सर्वभावेष्वनित्यानात्मकाशुचिदुःखेषु नित्यसात्म-कशुचिसुखरूपेण विपर्ययो नास्ति। प्रागननुभूतविशेषत्वात्। यदि वा क्वचिदप्रसिद्धसामान्यविशेषस्य कस्यचिद्विपर्य्ययो दृष्टः सोऽभिधीयतां न चोच्यतेऽतो विपर्ययाभावाद्बन्धाभावस्तत्र यदुक्तं विपर्ययाद्बन्ध इति तद् व्याहन्यते। अथ प्राक्तद्विशेषोपलब्धिरभ्युपगम्यते ननु तदैव तद्धेतुकेन मोक्षेण भवितव्यमिति बन्धाभावः स्यात्। किञ्च

**प्रत्यर्थवशवर्त्तित्वाच्च॥६०॥** विपर्ययाभाव इत्यनुवर्तते येषां दर्शनं प्रत्यर्थवशवर्ति विज्ञानमिति तेषां पुरुषविषयं विज्ञानं न स्थाणुमवगृह्णाति। स्थाणुविषयं च यद्विज्ञानं न तत्पुरुषमवबुध्यते। अतः परस्परविषयसंक्रमाभावान्न संशयो न विपर्ययस्तथा सर्वेषु पदार्थेष्वनेकार्थग्रहणैकविज्ञानाभावादसति विपर्यये बंधाभावस्तत एव पदार्थविशेषानुप-लब्धेर्मोक्षाभावः। न ह्येकार्थग्राहि विज्ञानं तदन्तरमवच्छिनत्ति।

**ज्ञानदर्शनयोर्युगपत्प्रवृत्तेरेकत्वमिति चेन्न तत्त्वावायश्रद्धानभेदात्तापप्रकाशवत्॥६१॥** स्यादेतद् ज्ञानदर्शनयोरेकत्वं कुतः ? युगपत्प्रवृत्तेरिति तन्न, किं कारणं तत्त्वावाय-श्रद्धानभेदात् कथं तापप्रकाशवत्। यथा तापप्रकाशयोर्युगपदात्मलाभेऽपि दाहद्योतन-सामर्थ्यभेदान्नैकत्वं। तथा ज्ञानदर्शनयोस्ततत्त्वावायश्रद्धानभेदान्नैकत्वं। तत्त्वस्य ह्यवगमो ज्ञानं, श्रद्धानं दर्शनमिति।

**दृष्टविरोधाच्च॥६२॥** यस्य मतं युगपदात्मलाभ एकत्वहेतुरिति तस्य दृष्टविरोध आपद्यते। दृष्टं हि गोविषाणादीनां युगपदुत्पद्यमानानामपि नानात्वम्।

**उभयनयसद्भावेऽन्यतरस्याश्रितत्वाद्वा रूपादिपरिणामवत् ॥६३॥** उभयनयसद्भावेऽन्य तरस्याश्रितत्वाद्वा न दोषः कथं रूपादिपरिणामवत्। यथा परमाण्वादिपुद्गलद्रव्याणां बाह्याभ्यन्तरपरिणामकारणापादिते युगपद्रूपादिपरिणामेन रूपादीनामेकत्वं तथा ज्ञानदर्शनयोरपि। अथवोभयनयसद्भावेऽन्यतरस्याश्रितत्वात्। यथा रूपादिपरिणामानां द्रव्यार्थिकपर्यायार्थिकयोरन्यतरगुणप्रधानभावार्पणात्स्यादेकत्वं स्यान्नानात्वम्। कथम्? इह पर्यायार्थिकगुणभावे द्रव्यार्थिकप्रधान्यात्पर्यायार्थानर्पणादनादिपरिणामिकपुद्गलद्रव्यार्था-देशात्स्यादेकत्वम्, यथा रूपपर्यायः पुद्गलद्रव्यम्। तथा रसादयोपि द्रव्यार्थादेशा-त्पुद्गलद्रव्यम्। तेषामेव द्रव्यार्थिकगुणभावे पर्यायार्थिकप्राधान्याद्द्रव्यार्थानर्पणात्प्रति-नियतरूपादिपर्यायार्थेनार्पितानां स्यादन्यत्वम्, यतोन्यो रूपपर्यायोऽन्ये च रसादयः। तथा ज्ञानदर्शनयोरनेन विधिनाऽनादिपारिणामिकचैतन्यजीवद्रव्यार्थादेशात्स्यादेकत्वं यतो द्रव्यार्थादेशाद्यथा ज्ञानपर्याय आत्मद्रव्यं तथा दर्शनमपि। तयोरेव प्रतिनियतज्ञानदर्शनपर्यायार्थार्पणात्स्यादन्यत्वं यस्मादन्यो ज्ञानपर्यायोऽन्यश्च दर्शन-पर्यायः।

**ज्ञानचारित्रयोरकालभेदादेकत्वमगम्यावबोधवदिति चेन्नाशूत्पत्तौ सूक्ष्मकालप्रति-पत्तेरुत्पलपत्रशतव्यधनवत् ॥६४॥** स्यादेतज्ज्ञानचारित्रयोरेकत्वम्, कस्मात्? अकालभेदात्। कथम्? अगम्यावबोधवत्। यथा केनचिन्मोहोदयापादिताऽन्याङ्गनाभिसरणोत्सुकमतिना पुंसा मेघोदयोद्भूतबहलान्धकारायां रात्रौ वीथ्यन्तराले मातृपुंश्चली स्वाभिलषितेति स्पृष्दा तदैव विद्युता च विद्योतितं तेन द्योतेन मातेयमिति तस्य ज्ञानं यदोत्पन्नं तदैवाऽगम्याव-

बोधादगम्यागमननिवृत्तिः नागम्यावबोधागम्यागमननिवृत्योः कालभेदोस्ति। तथा यदैव ज्ञानावरणक्षयोपशमाज्जीवेषु ज्ञानं जीवा इत्याविर्भवति, तदैव 'ते न हिंस्या' इति जीवे हिंसाप्रत्ययस्य निवृत्तिः; निवृत्तिश्च चारित्रं, न च जीवज्ञानहिंसानिवृत्त्योः कालभेदोस्तीति। तन्न किं कारणमाशूत्त्पत्तौ सूक्ष्मकालप्रतिपत्तेः; तत्राप्यस्त्येव कालभेदः सौक्ष्म्यात्तु न प्रतीयते, कथमुत्पलपत्रशतव्यधनवत्। यथोत्पलपत्रशतव्यधनक्रमोऽसंख्येयसमयिकः सर्वज्ञप्रत्यक्षोऽतिसूक्ष्मोस्ति न तु विभाव्यते छद्मस्थैर्यतो यावदेकमुत्पलपत्रमसिश्छित्त्वा द्वितीयं छिनत्ति तावदसंख्येयाः समया अतीता इति कालसूक्ष्मोपदेशस्तथाऽन्योऽगम्याव-बोधकालः, अन्यश्च निवृत्तिकालः।

**अर्थभेदाच्च॥६५॥** किं ? नैकत्वमिति वर्तते ज्ञानस्य तत्त्वावबोधोऽर्थः चारित्रस्य कर्मादानहेतुक्रियाविशेषोपरमोऽर्थ इत्यतो नानात्वम्।

**कालभेदाभावो नार्थाभेदहेतुर्गतिजात्यादिवत्॥६६॥** न कालभेदाभावोऽर्थाभेदहेतुर्न्याय्यः कथं गतिजात्यादिवत् यथा यदैव देवदत्तजन्म तदैव मनुष्यगति-पचेन्द्रियजातिशरीरवर्णगन्धादीनां जन्म। नान्यो देवदत्तजन्मकालः, अन्यश्च मनुष्य गत्यादिपर्यायजन्मकालः। न चैककालत्वान्मनुष्यगत्यादीनामेकत्वम्। यस्य पुनः कालभेदाभाव एकत्वहेतुरिष्टस्तस्य मनुष्यगत्यादिपर्यायाणामेकत्वप्रसङ्गो न चेष्यतेऽतो न कालभेदाभावाज्ज्ञानचारित्रयोरेकत्वम्।

**उक्तं च॥६७॥** किमुक्तम् उभयनयसद्भावात्स्यादेकत्वं स्यान्नानात्वमिति।

**लक्षणभेदात्तेषामेकमार्गानुपपत्तिरितिचेन्न पस्परसंसर्गे सत्येकत्वं प्रदीपवत्॥६८॥** स्यादेतत्तेषां सम्यग्दर्शनादीनामेकमार्गत्वं नोपपद्यते, कुतो लक्षणभेदात्, नहि भिन्नलक्षणानामेकत्वं युज्यते ततस्त्रयोऽमी मोक्षमार्गाः प्रसक्ता इति। तन्न किं कारणं परस्परसंसर्गे सत्येकत्वम्, कथम्? प्रदीपवत्, यथा परस्परविलक्षणवर्तिस्नेहानलार्थानां

बाह्याभ्यन्तरपरिणामकारणापादितसंयोगपर्यायाणां समुदये भवत्येकः प्रदीपो न त्रयः। तथा परस्परविलक्षणसम्यग्दर्शनादित्रयसमुदये भवत्येको मोक्षमार्गो न त्रयः। किञ्च,

**सर्वेषामविसंवादात् ॥६९॥** विलक्षणानामेकत्वावाप्तौ प्रतिवादिनो विसंवदन्ते केचित्तावदाहुः - प्रसादलाघवशोषतापावरणसादनादिभिन्नलक्षणानां सत्त्वरजस्तमसां साम्ये प्रधानमेकम्, न तेषां त्रित्वात्प्रधानस्य त्रैविध्यमिति। अपर आहुः क्क्खडतादीनां चतुर्णां भूतानां भौतिकानां च वर्णादीनां विलक्षणानां समुदय एको रूपपरमाणुः न तेषां भेदात्परमाणोरनेकत्वम्। तथा रागादीनां धर्माणां प्रमाणप्रमेयाधिगमरूपाणां च विलक्षणानां समुदय एकं विज्ञानं न तेषां भेदाद्विज्ञानभेद इति। इतर आहुश्चित्राणां तन्तूनां समुदयश्चित्रपट एको न तेषां भेदात्पटस्य भेद इति तद्वदिहापि सम्यग्दर्शनादीनां भिन्नलक्षणानां समुदय एको मोक्षमार्ग इति को विरोधः।

**एषां पूर्वस्य लाभे भजनीयमुत्तरम्॥७०॥** एषां सम्यग्दर्शनादीनां पूर्वस्य लाभे भजनीयमुत्तरं वेदितव्यम्।

**उत्तरलाभे तु नियतः पूर्वलाभः॥७१॥** उत्तरस्य तु लाभे नियतः पूर्वलाभो दृष्टव्यः सम्यग्दर्शनज्ञानचारित्राणां पाठं प्रति पूर्वत्वमुत्तरत्वं च। पूर्वस्य सम्यग्दर्शनस्य लाभे ज्ञानमुत्तरं भजनीयं उत्तरज्ञानलाभे तु नियतः पूर्वसम्यग्दर्शनलाभः। तथा पूर्वज्ञानलाभे उत्तरं चारित्रं भजनीयं, उत्तरचारित्रलाभे तु नियतः सम्यग्दर्शनज्ञानलाभः।

**तदनुपपत्तिरज्ञानपूर्वकश्रद्धानप्रसंगात् ॥७२॥** पूर्वस्य लाभे भजनीयमुत्तरमित्येतस्याऽनुपपत्तिः कुतोऽज्ञानपूर्वकश्रद्धानप्रसङ्गात्। यदि पूर्वसम्यग्दर्शनलाभे उत्तरज्ञानलाभो भजनीयः, ननु ज्ञानाभावादज्ञानपूर्वकश्रद्धानप्रसङ्गः। किञ्च,

**अनुपलब्धस्वतत्त्वेऽर्थे श्रद्धानानुपपत्तिरविज्ञातफलरसोपयोगवत् ॥७३॥** यथा नाविज्ञाते फले तद्रसोपयोगोऽमुष्य फलस्य च सन्निष्पादयतेति श्रद्धानमस्ति तथा नाविज्ञातेषु जीवादिषु श्रद्धानमस्तीति श्रद्धानाभावः स्यात्। किञ्च

**आत्मस्वरूपाभावप्रसंगात् ॥७४॥** यदि सम्यग्दर्शनलाभे ज्ञानं भजनीयत्वादसद्वि-रोधान्मिथ्याज्ञाननिवृत्तौ सम्यग्ज्ञानस्य चाभावाज्ज्ञानोपयोगाभाव आत्मनः प्रसक्तः। ततश्च लक्षणाभावाल्लक्ष्यस्यात्मनोऽप्यभावः स्यात्तदभावाच्च मोक्षमार्गपरीक्षा व्यर्थेति।

**न वा; यावति ज्ञानमित्येतत्परिसमाप्यते तावतोऽसंभवान्नयापेक्षं वचनम्॥७५॥** न वैष दोषः, किं कारणं ? यावति ज्ञानमित्येतत्परिसमाप्यते तावतोऽसंभवान्नया-पेक्षमिदं वचनं भजनीयमुत्तरमिति। क्वचन ज्ञानमित्येतत्परिसमाप्यते श्रुतकेवलयोर्यतः श्रुतकेवलज्ञानग्राही शब्दनयः श्रुतकेवले एवेच्छति नान्यज्ज्ञानमपरिपूर्णत्वादिति तदपेक्ष्य संपूर्णद्वादशाङ्गचतुर्दशपूर्वलक्षणं श्रुतं केवलं च भजनीयमुक्तम्। तथा पूर्वसम्यग्दर्शनलाभे देशचारित्रं संयतासंयतस्य, सर्वचारित्रं, प्रमत्तादारभ्य सूक्ष्मसाम्परायान्तानां यच्च यावच्च नियमादस्ति संपूर्णं यथाख्यातचारित्रं तु भजनीयम्॥

**पूर्वसम्यग्दर्शनज्ञानलाभे भजनीयमुत्तरमिति चेन्न निर्देशस्याऽगमकत्वात् ॥७६॥** स्यादेतन्नाज्ञानपूर्वकश्रद्धानप्रसंगोस्ति कुतः पूर्वसम्यग्दर्शनज्ञानलाभे चारित्रमुत्तरं भजनी-यमित्यभिसम्बन्धादिति। तन्न, किं कारणं निर्देशस्यागमकत्वाद्युक्तोयमर्थो न तु तस्य निर्देशो गमकः "पूर्वस्य लाभे" इति पूर्वयोरिति हि वक्तव्यं स्यात्। अथ सामान्यनिर्देशादुभयगतिः कल्प्यते नैवं शक्यं व्यवस्थाविशेषस्य विवक्षितत्वादितरथा ह्युत्तरेपि तथा प्रक्लृप्तौ तद्दोषानतिवृत्तिः स्यात्तस्मात्पूर्वोक्त एवार्थो नयापेक्षवचनमिति। अथवा क्षायिकसम्यग्दर्शनस्य लाभे क्षायिकं सम्यग्ज्ञानं भजनीयम्। अथवा युगपदात्मलाभे साहचर्यादुभयोरपि पूर्वत्वम्। यथा साहचर्यात्पर्वतनारदयोः।

पर्वतग्रहणेन नारदस्य ग्रहणं नारदग्रहणेन पर्वतस्य ग्रहणम्। तथा सम्यग्दर्शनस्य सम्यग्ज्ञानस्यान्यतरस्यात्मलाभे चारित्रमुत्तरं भजनीयम्॥

इति तत्त्वार्थवार्तिके व्याख्यानालंकारे प्रथमेध्याये द्वितीयमाह्निकम्॥२॥

अमीषां मोक्षकारणसामान्ये सत्यविशिष्टानां विशेषप्रतिपत्यर्थमिदमाह -

## तत्त्वार्थश्रद्धानं सम्यग्दर्शनम्॥२॥

सम्यगिति कोऽयं शब्दः

**सम्यगिति प्रंशसार्थो निपातः क्व्यन्तो वा॥१॥** सम्यगित्ययं निपातः प्रशंसार्थो वेदितव्यः सर्वेषां प्रशस्तरूपगतिजातिकुलायुर्विज्ञानादीनामभ्युदयिकानां मोक्षस्य च प्रधानकारणात्वात् प्रशस्तं। दर्शनं सम्यग्दर्शनम्। ननु च "सम्यगिष्टार्थतत्त्वयोरिति" वचनात् प्रशंसार्थाभाव इति तन्नाऽनेकार्थत्वान्निपातानाम्। अथवा सम्यगिति तत्त्वार्थो निपातस्तत्त्वं दर्शनं सम्यग्दर्शनमविपरीतार्थविषयं तत्त्वमित्युच्यते। अथवा क्व्यन्तोयं शब्दः समञ्चतीति सम्यक्, यथार्थो व्यवस्थितस्तथैवावगच्छतीत्यर्थः। अथ किमिदं दर्शनमिति ?

**करणादिसाधनो दर्शनशब्दः उक्तः॥२॥** दृशेः करणादिसाधने युटि दर्शनशब्दो व्याख्यातः।

**दृशेरालोकार्थत्वादभिप्रेतार्थासंप्रत्यय इति चेन्नानेकार्थत्वात्॥३॥** स्यादेतद्दृशिरयमालोकार्थे वर्त्तते आलोकश्चेन्द्रियानिन्द्रयार्थप्राप्तिः, न चासाविहाभिप्रेतः, श्रद्धानमिष्टं, न तस्यार्थस्य संप्रत्ययोऽस्तीति। तन्न किंकारणमनेकार्थत्वादिह श्रद्धानमिष्टमभिसंबध्यते। कथं पुनर्ज्ञायते आलोक इह नेष्टः श्रद्धानमिष्टमित्यत उत्तरं पठति।

**मोक्षकारणप्रकरणाच्छ्रद्धानगतिः॥४॥** मोक्षकारणं प्रकृतं तत्त्वार्थविषयं श्रद्धानं मोक्षस्य कारणं नालोक इत्यतः प्रकरणाच्छ्रद्धानगतिर्भवति। अथ तत्त्वमित्यनेन किं प्रत्यायते।

**प्रकृत्यपेक्षत्वात्प्रत्ययस्य भावसामान्यसंप्रत्ययस्तत्त्ववचनात् ॥५॥** तदित्येषा प्रकृतिः सामान्याभिधायिनी सर्वनामत्वात् प्रत्ययश्च भावे उत्पद्यते। कस्य भावे तदित्यनेन योऽर्थ उच्यते। कश्चासौ, सर्वोऽर्थः, अतस्तदपेक्षत्वाद्भावस्य भावसामान्यमुच्यते। तत्त्वशब्देन योऽर्थो यथावस्थितस्तथा तस्य भवनमित्यर्थः।

**तत्त्वेनार्यत इति तत्त्वार्थः॥६॥** अर्यते गम्यते ज्ञायते इत्यर्थस्तत्त्वेनार्थस्तत्त्वार्थः। येन भावेनार्थो व्यवस्थितस्तेन भावेनार्थस्य ग्रहणं यत्सन्निधानाद्भवति तत्सम्यग्दर्शनम्।

**श्रद्धानशब्दस्य करणादिसाधनत्वं पूर्ववत् ॥७॥** यथा दर्शनशब्दस्य करणादिसाधनत्वं व्याख्यातं तथा श्रद्धानशब्दस्यापि वेदितव्यम्।

**स त्वात्मपरिणामः॥८॥** स तु श्रद्धानशब्दवाच्योऽर्थः करणादिव्यपदेशभागात्मपरिणामो वेदितव्यः।

**वक्ष्यमाणनिर्देशादिसूत्रविवरणात्पुद्नलद्रव्यसंप्रत्यय इति चेन्नात्मपरिणामेऽपि तदुपपत्तेः॥९॥** स्यादेतद्वक्ष्यमाणनिर्देशादिसूत्रविवरणात्पुद्गलद्रव्यस्य संप्रत्ययः प्राप्नोति। तन्न किं कारणमात्मपरिणामेऽपि तदुपपत्तेः. किं तत्त्वार्थश्रद्धानम्? आत्मपरिणामः कस्य आत्मन इत्येवमादि।

**कर्माभिधायित्वेप्यदोष इति चेन्न मोक्षकारणत्वेन स्वपरिणामस्य विवक्षितत्वात् ॥१०॥** स्यादेतत्सम्यक्त्वकर्मपुद्गलाभिधायित्वेऽप्यदोष इति तन्न किं कारणम्? मोक्षकारणत्वेन स्वपरिणामस्य विवक्षितत्वात्। औपशमिकादिसम्यग्दर्शन

मात्मपरिणामत्वान्मोक्षकारणत्वेन विवक्ष्यते। न च सम्यक्त्वकर्मपर्यायः, पौद्गलिकत्वेऽस्य परपर्यायत्वात्।

**स्वपरनिमित्तत्वादुत्पादस्येति चेन्नोपकरणमात्रत्वात्॥११॥** स्यादेतत्स्वपरिनिमित्त उत्पादो दृष्टो यथा घटस्योत्पादो मृन्निमित्तो दण्डादिनिमित्तश्च। तथा सम्यग्दर्शनोत्पाद आत्मनिमित्तः सम्यक्त्वपुद्गलनिमित्तश्च तस्मात्तस्यापि मोक्षकारणत्वमुपपद्यत इति। किं कारणमुपकरणमात्रत्वात्। उपकरणमात्रं हि बाह्यसाधनम्? किञ्च,

**आत्मपरिणामादेव तद्रसघातात्॥१२॥** यदिदं दर्शनमोहाख्यं कर्म तदात्मगुणघाति कुतश्चिदात्मपरिणामादेवाऽपक्षीणशक्तिकं सम्यक्त्वाख्यां लभते। अतो न तदात्मपरिणामस्य प्रधानं कारणमात्मैव स्वशक्त्या दर्शनपर्यायेणोत्पद्यत इति तस्यैव मोक्षकारणत्वं युक्तम् किञ्च,

**अहेयत्वात्स्वधर्मस्य॥१३॥** न हीयते न परित्यज्यत इत्यहेयोऽयमाभ्यन्तर आत्मनः सम्यक्त्वपरिणामः। यतः सत्याभ्यन्तरे आत्मनः सम्यक्त्वपरिणामे नियमेनात्मा सम्यग्दर्शनपर्यायेणाविर्भवति। बाह्यस्तु हेयः कर्मपुद्गलः। तमन्तरेणापि क्षायिकसम्यक्त्वपरिणामात्। किञ्च

**प्रधानत्वात्॥१४॥** आभ्यन्तर आत्मीयः सम्यग्दर्शनपरिणामः प्रधानम्। सति तस्मिन्बाह्यस्योपग्राहकत्वात्। अतो बाह्य आभ्यन्तरस्योपग्राहकः परेऽर्थे न वर्तत इत्यप्रधानम्। किञ्च

**प्रत्यासत्तेः॥१५॥** प्रत्यासन्नं हि कारणमात्मपरिणामो मोक्षस्य, तादात्म्येनाविर्भावात्, न तु सम्यक्त्वं कर्म। विप्रकृष्टान्तरत्वात्तादात्म्येनैवाऽपरिणामाच्च। तस्मादहेयत्वात्प्रधानत्वात्प्रत्यासत्तेश्च मोक्षस्य कारणमात्मपरिणामो युक्तो न कर्मेति॥

**अल्पबहुत्वकल्पनाविरोध इति चेन्नोपशमाद्यपेक्षस्य सम्यग्दर्शनत्रयस्यैव तदुपपत्तेः ॥१६॥** स्यादेतत्सम्यग्दर्शनस्यात्मपरिणामत्वेऽल्पबहुत्वकल्पनाविरोध इति। तन्न किं कारणम् ? उपशमाद्यपेक्षस्य सम्यग्दर्शनत्रयस्यैव तदुपपत्तेः। सर्वेषु स्तोका उपशमसम्यग्दृष्टयः संसारिणः। क्षयिकसम्यग्दृष्टयोऽसंख्येयगुणाः क्षायोपशमिकसम्यग्दृष्ट-योऽसंख्येयगुणाः। सिद्धाः क्षायिकसम्यग्दृष्टयोऽनतंगुणा इति। तस्मात्सम्यग्दर्शनमात्म-परिणामं श्रेयोऽभिमुखमध्यवस्यामः।

**तत्त्वाग्रहणमर्थश्रद्धानमित्यस्तु लघुत्वात् ॥१७॥** कश्चिदाह - तत्त्वग्रहणमनर्थकम्। अर्थश्रद्धानमित्येवास्तु, कुतो लघुत्वादिति।

**न सर्वार्थप्रसंगात् ॥१८॥** नैतद्युक्तं कुतः सर्वार्थप्रसंगात्तत्त्वग्रहणादृते मिथ्यावादि-प्रणीतेषु सर्वार्थेषु श्रद्धानं सम्यग्दर्शनं प्राप्नोति।

**संदेहाच्चार्थशब्दस्याऽनेकार्थत्वात् ॥१९॥** अर्थ शब्दोऽयमनेकार्थः क्वचिद् द्रव्यगुण-कर्मसु वर्तते, "अर्थ इति द्रव्यगुणकर्मस्विति" वचनात्। क्वचित्प्रयोजने वर्तते "किमर्थमिहागमनं भवतः किं प्रयोजनमिति"। क्वचिद्धने वर्तते "अर्थवानयं देवदत्तो धनवानिति"। क्वचिदभिधेये "शब्दार्थसंबंध" इति। एवमर्थशब्दस्यानेकार्थाभिधायित्वे सन्देहः कस्यार्थस्य श्रद्धानं सम्यग्दर्शनमिति।

**सर्वानुग्रहाददोष इति चेन्न, असदर्थविषयत्वात् ॥२०॥** स्यादेतन्नायं दोषः सर्वार्थप्रसंग इति। अस्तु सर्वार्थविषयं श्रद्धानं सम्यग्दर्शनं तथा सति सर्वानुग्रहः कुतो भवति। कश्चेदानीं भवतो मत्सरः सर्वो लोकोऽभ्युदये न युज्यतामिति, तन्न किं कारणम्? असदर्थविषयत्वात्, न खलु कश्चिन्नो मत्सरः। असदर्थविषयं हि तच्छ्रद्धानं संसारकारणमिति। अतः सर्वानुग्रहार्थमेव तत्त्वेन विशिष्यते।

**अर्थग्रहणादेव तत्सिद्धिरिति चेन्न विपरीतग्रहणदर्शनात् ॥२१॥** स्यादेतदर्यत इत्यर्थो निश्चीयत इत्यर्थः। न च मिथ्यावादिप्रणीता अर्थाः, असत्त्वात्। तस्मादर्थग्रहणादेव तत्त्वसंप्रत्ययान्नार्थस्तत्त्वग्रहणेनेति, तन्न किं कारणं विपरीत-ग्रहणदर्शनात्। यथा पित्तोदयाकुलितकरणः पुमान् मधुररसं कटुकं मन्यते। तथाऽत्मा मिथ्याकर्मोदयदोषादस्तित्वनास्तित्वनित्यत्वाऽनित्यत्वाऽन्यत्वाऽनन्यत्वाद्येकान्तरूपेण मिथ्याऽध्यवस्यति। अतस्तन्निराकाणार्थं तत्त्वग्रहणमिति। अर्थग्रहणं किमर्थम् ? ननु त्तत्त्वान्येवार्थ इत्यर्थानां तत्त्वसामानाधिकरण्यात्ततत्त्ववचनेनैव संप्रत्ययः सिद्धः। उच्यते-

**अर्थग्रहणमव्यभिचारार्थम्॥२२॥** अर्थग्रहणं क्रियते अव्यभिचारार्थम्।

**तत्त्वमिति श्रद्धानमिति चेदेकान्तनिश्चतेऽपि प्रसंगः॥२३॥** यदि तत्त्वमिति श्रद्धानं तत्त्वश्रद्धानमित्युच्यत एकान्तनिश्चितेऽपि प्राप्नोति। एकान्तवादिनोऽपि हि नास्त्यात्मेत्येवमादितत्वमिति श्रद्दधति।

**तत्त्वस्य श्रद्धानमिति चेद्भावमात्रप्रसङ्गः॥२४॥** यदि तत्त्वस्य श्रद्धानं तत्त्वश्रद्धानमित्युच्यते भावमात्रप्रसङ्गः स्यात्। तत्त्वं भावसामान्यमिति केचित् कथयन्ति, द्रव्यत्वगुणत्वकर्मत्वादिसामान्यं द्रव्यादिभ्योऽर्थान्तरं तस्य श्रद्धानं सम्यग्दर्शनं प्राप्नोति। न हि द्रव्यादिभ्योऽन्यत्सामान्यं युक्तिमदिति परीक्षितमेतत्। अथवा तत्त्वमेकत्वमित्यर्थः पुरुष एवेदं सर्वमित्यादि। तस्य श्रद्धानं सम्यग्दर्शनं प्राप्नोति, न चादो युक्तं क्रियाकारकभेदलोपप्रसंगादिति।

**तत्त्वेन श्रद्धानमिति चेत्कस्य कस्मिन्वेति प्रश्नानिवृत्तिः॥२५॥** यदि तत्त्वेन श्रद्धानमित्युच्यते कस्य कस्मिन्वेति प्रश्नो न विनिवर्तते। तस्मात्सूक्तमर्थ-ग्रहणमव्यभिचारार्थमिति।

**इच्छाश्रद्धानमित्यपरे॥२६॥** इच्छाश्रद्धानमित्यपरे वर्णयन्ति।

**तदयुक्तं मिथ्यादृष्टेरपि प्रसङ्गात् ॥२७॥** यतो मिथ्यादृष्टयो बाहुश्रुत्यप्रचिख्यापयिषयाऽर्हन्मतविजिगीषया वार्हन्मतमधीयन्ते। न चेच्छामन्तरेणाध्ययनमस्त्य-तस्तेषामपि सम्यग्दर्शनं प्राप्नोतीत्ययुक्तमुक्तमिच्छाश्रद्धानमिति।

**केवलिनि सम्यक्त्वाभावप्रसंगाच्च॥२८॥** यदि चेच्छा सम्यक्त्वम्, इच्छा च लोभपर्यायः। न च क्षीणमोहकेवलिनि लोभोऽस्ति तदभावादिच्छाभाव इति सम्यक्त्वाभावः स्यात्। तस्माद्यद्भावाद्यथाभूतमर्थं गृह्णात्यात्मा तत्सम्यग्दर्शनमिति प्रत्येतव्यम्।

**तद् द्विविधं सरागवीतरागविकल्पात् ॥२९॥** एतत्सम्यग्दर्शनं द्विविधं कुतः सरागवीतरागविकल्पात्।

**प्रशमसंवेगानुकम्पास्तिक्याभिव्यक्तलक्षणं प्रथमम्॥३०॥** रागादीनामनुद्रेकः प्रशमः संसाराद्भीरुता संवेगः। सर्वप्राणिषु मैत्री अनुकम्पा। जीवादयोऽर्था यथास्वभावैः सन्तीति मतिरास्तिक्यम्। एतैरभिव्यक्तलक्षणं प्रथमं सरागसम्यक्त्वमित्युच्यते।

**आत्मविशुद्धिमात्रमितरत् ॥३१॥** सप्तानां कर्मप्रकृतीनामत्यन्तिकेऽपगमे सत्यात्म-विशुद्धिमात्रमितरद्वीतरागसम्यक्त्वमित्युच्यते। पूर्वं साधनं भवत्युत्तरं साध्यं च। अथैतत्सम्यग्दर्शनं जीवादिपदार्थविषयं कथमुत्पद्यत इत्यत आह -

## तन्निसर्गादधिगमाद्वा॥३॥

निसर्ग इति कोयं शब्दः? निपूर्वात्सृजेर्भावसाधनो घञ्। निसर्जनं निसर्गः स्वभाव इत्यर्थः। अथाधिगम इति कः? अधिपूर्वाद्गमेर्भावसाधनोऽच्। अधिगमनमधिगमस्तयोर्हेतुत्वेन निर्देशो निसर्गादधिगमादिति कस्याः ? क्रियायाः। का च क्रिया? उत्पद्यत

इत्यध्याह्रियते, सोपस्कारत्वात्सूत्राणां तदेतत्सम्यग्दर्शनं निसर्गादधिगमाद्वा उत्पद्यत इति। कश्चिदाह -

**सम्यग्दर्शनद्वैविध्यकल्पनानुपपत्तिरनुपलब्धतत्त्वस्य श्रद्धानाभावात् रसायनवत् ॥१॥**

द्विविधं सम्यग्दर्शनमितिकल्पना नोपपद्यते। कुतः अनुपलब्धतत्त्वस्य श्रद्धानाभावात्, कथम्? रसायनवत्। यथाऽत्यंतपरोक्षरसायनतत्त्वफलस्य न रसायने श्रद्धानं दृष्टम्। तथाऽनधिगत-जीवादितत्त्वस्य न तत्र श्रद्धानमिति नैसर्गिकसम्यग्दर्शनाभावः।

**शूद्रवेदभक्तिवदिति चेन्न वैषम्यात् ॥२॥** स्यादेतद्यथा शूद्रस्याऽनधिगतवेदार्थस्य वेदार्थ आत्यन्तिकभक्तिस्तथानुपलब्धजीवादितत्त्वस्य श्रद्धानमिति। तन्न किं कारणं वैषम्यात्, युज्यते शूद्रस्य भारतादिश्रवणात्तज्ज्ञवचनानुवृत्यादिभिश्च वेदार्थभक्तिः। नासौ नैसर्गिकी। इह तु नैसर्गिकी रुचिरिष्टेति वैषम्यम्। अथवा सम्यक्त्वाधिकाराज्जीवादि-पदार्थतत्त्वोपलब्धिपूर्वकेण सम्यग्दर्शनेन मोक्षकारणेनेह भवितव्यं न च शूद्रस्य तादृशं श्रद्धानमिति वैषम्यम्।

**मणिग्रहणवदितिचेन्न प्रत्यक्षेणोपलब्धिसद्भावात् ॥३॥** स्यादेतद्यथाऽनधिगतमणि-विशेषस्यापि पुंसो मणिग्रहणं भवति तस्य च फलं दृष्टं तथाऽनधिगतजीवादितत्त्वस्यापि तत्त्वग्रहणं भवति तस्य च फलं भवतीति तन्नैसर्गिकं दर्शनमिति। तन्न किं कारणं प्रत्यक्षोपलब्धिसद्भावात्। नात्यन्तपरोक्षं मणिं गृह्णाति किन्तु प्रत्यक्षत उपलभ्य गृह्णाति विपर्ययविशेषं तु न प्रतिपद्यते। अतोऽस्याऽनुपलब्धमणिविशेस्यापि प्रत्यक्षदर्शनाद् ग्रहणं न्याय्यम्। अत्यन्तपरोक्षे तु जीवादितत्त्वे कथमस्य निसर्गजसम्यग्दर्शनसिद्धिः। सामान्याधिगमे त्वधिगमसम्यग्दर्शनमेवेति।

**तापप्रकाशवद्युगपदुत्पत्तेरभ्युपगमाच्च॥४॥** किं निसर्गजसम्यग्दर्शनाभाव इत्यनुवर्तते यदाऽस्य सम्यग्दर्शनमुत्पद्यते तदैव प्राक्तनं मत्यज्ञानं श्रुताज्ञानं च सम्यक्त्वेन परणमतीत्यधिगमजमेव तद्भवति। यस्य ज्ञानात्प्राग्दर्शनं स्यात्तस्य नैसर्गिकं स्यात्तच्चाऽनिष्टमिति। उच्यते -

**उभयत्र तुल्येऽन्तरङ्गहेतौ बाह्योपदेशापेक्षानपेक्षभेदाद्भेदः॥५॥** उभयत्र दर्शनेऽन्तरङ्गो हेतुस्तुल्यः. दर्शनमोहस्योपशमः क्षयः क्षयोपशमो वा। तस्मिन् सति यद्बाह्योपदेशादृते प्रादुर्भवति तन्नैसर्गिकम्। यत्परोपदेशपूर्वकं जीवाद्यधिगमनिमित्तं तदुत्तरमित्यनयोरयं भेदः।

**अपरोपदेशपूर्वके निसर्गाभिप्रायो लोकवत्॥६॥** यथा लोके हरिशार्दूलवृकभुजगादयो निसर्गतः क्रौर्यशौर्याशौर्याहारादिसंप्रतिपत्तौ वर्तन्त इत्युच्यन्ते नाचासावाकस्मिकी कर्मनिमित्तत्वात्। अनाकस्मिक्यपि सती नैसर्गिकी भवति परोपदेशाभावात्। तथेहाप्यपरोप देशपूर्वके निसर्गाभिप्रायः। अपर आह -

**भव्यस्य कालेन निःश्रेयसोपपत्तेरधिगमसम्यक्त्वाभावः॥७॥** यद्यवधृतमोक्षकालात्प्रागधिगमसम्यक्त्वबलान्मोक्षः स्यात्, स्यादधिगमसम्यग्दर्शनस्य साफल्यं न चादोऽस्ति। अतः कालेन योऽस्य मोक्षोऽसौ, स निसर्गजसम्यक्त्वादेव सिद्ध इति॥

**न विवक्षितापरिज्ञानात्॥८॥** नैतद्युक्तं कुतः? विवक्षिताऽपरिज्ञानात्। सम्यग्दर्शना-दित्रयान्मोक्ष उक्तः, तत्र यत्प्रथमं तत्कुत उत्पद्यत, इत्युक्ते निसर्गादधिगमा-द्वेत्ययमर्थोऽत्र विवक्षितः. यदि सम्यग्दर्शनादिव केवलान्निसर्गजादधिगमजाद्वा ज्ञानचारित्ररहितान्मोक्ष इष्टः स्यात्, तत इदं युक्तं स्यात् "भव्यस्य कालेन निःश्रेयसोपपत्तेरिति"। न चायमर्थोऽत्र विवक्षितः। अथवा यथा कुरुक्षेत्रे क्वचित्कनकं बाह्यपौरुषेयप्रयत्नाभावाज्जायते। तथा

बाह्यपुरुषोपदेशपूर्वकजीवाद्यधिगम्मन्तरेण यज्जायते तन्निसर्गजम्। यथा कनकाश्मविध्युपायज्ञपुरुषप्रयोगापेक्षं कनकभावमापद्यते तथा यत्सम्यग्दर्शनं विध्युपायज्ञमनुष्यसंपर्काज्जीवादिपदार्थतत्त्वाधिगमापेक्षमुत्पद्यते तदधिग मजसम्यग्र्दशनमित्ययमर्थो विवक्षितः। न चान्यतरस्याभाव इति। अतो विवक्षिता-परिज्ञानान्न सम्यगुक्तमधिगमाभाव इति।

**कालानियमाच्च निर्जरायाः॥९॥** यतो न भव्यानां कृत्स्नकर्मनिर्जरापूर्वक-मोक्षकालस्य नियमोऽस्ति। केचिद्भव्याः संख्येयेन कालेन सेत्स्यन्ति, केचिदसंख्येन, केचिदनन्तेन। अपरेऽनन्तानन्तेनापि न सेत्स्यन्तीति। ततश्च न युक्तं "भव्यस्य कालेन निःश्रेयसोपपत्तेरिति"।

**चोदनानुपपत्तेश्च॥१०॥** सर्वस्येयं चोदना नोपपद्यते। ज्ञानात् कियाया द्वयात् त्रितयाच्च मोक्षमाचक्षाणस्य सर्वस्य नेदं युक्तम् "भव्यस्य कालेन मोक्ष" इति। यदि हि सर्वस्य कालो हेतुरिष्टः स्यात्, बाह्याभ्यन्तरकारणनियमस्य दृष्टस्येष्टस्य वा विरोधः स्यात् ।

**तदित्यनन्तरनिर्देशार्थम्॥११॥** तदित्येतदनन्तरस्य सम्यग्दर्शनस्य निर्देशार्थं क्रियते। ननु तत्प्रकृतमन्तरेणापि तद्वचनं सिद्धम्।

**इतरथा हि मार्गसम्बन्धप्रसंगः॥१२॥** अक्रियमाणे हि तद्वचने मोक्षमार्गोऽपि प्रकृतः तेनाभिसम्बन्धः प्रसज्येत। ततो निसर्गमात्रेणापि मोक्षमार्गलाभ उक्तः स्यात् । वाहुश्रुत्यप्रचिख्यापयिषया च मोक्षमार्गाधिगममात्रादेव मिथ्यादृष्टीनामपि मोक्षः स्यात् । ननु च "अनन्तरस्य वा विधिर्वा भवति प्रतिषेधो वा," इत्यनन्तरत्वात्सम्यग्दर्शनेनैव सम्बन्धो न्याय्यः। "प्रत्यासत्तेः प्रधानं बलीयः" इति मार्ग एव सम्बध्येत। तस्मात्तद्वचनं क्रियते विस्पष्टार्थम्।

इति तत्त्वार्थवार्तिके व्याख्यानालङ्कारे प्रथमेऽध्याये तृतीयमाह्निकम्॥३॥

*****

तत्त्वार्थश्रद्धानं सम्यग्दर्शनमित्युक्तम्। अथ किं तत्त्वमिति? अत इदमाह -

## जीवाजीवास्रवबन्धसंवरनिर्जरामोक्षास्तत्त्वम्॥४॥

किमर्थमेषामुपादानम्? ननु द्रव्यमित्येव वक्तव्यं तद्भेदा हि पदार्था भवन्तीति? अत उत्तरं पठति -

**एकाद्यनन्तविकल्पोपपत्तौ विनेयाशयवशान्मध्यमाभिधानम्॥१॥** एको द्वौ त्रयः संख्येया असंख्येया अनन्ता इति पदार्था भिद्यन्ते। तत्रैकः पदार्थो भवति "एकं द्रव्यमनन्तपर्यायमिति वचनात्"। द्वौ पदार्थौ, जीवाजीवभेदात्। त्रयः पदार्था अर्थाभिधान-प्रत्ययभेदात्। एवमुत्तरे च वचनविकल्पापेक्षयाऽसंख्येया ज्ञानज्ञेयाविकल्पापेक्षया असंख्येया अनन्ताश्च भवन्ति। तत्र विनेयाशयवशात्पदार्थनिरूपणाभेद इति मध्यमेन क्रमेणाभिधानं कृतम्। अतिसंक्षेपे सुमेधसामेव प्रतिपत्तिः स्यादतिप्रपञ्चे चाचिरेण सम्प्रतिपत्तिर्न स्यादिति। कश्चिदाह -

**जीवाजीवयोरन्यतरत्रैवान्तर्भावास्रवादीनामनुपदेशः॥२॥** आस्रवो हि जीवो वा स्यादजीवो वा ? यदि जीवः जीवेऽन्तर्भवति। अथवाऽजीवः अजीवे। एवं संवरादयोपि। तस्मादेषामनुपदेशः। अनर्थक उपदेशोऽनुपदेशः।

**न वा परस्परोपश्लेषे संसारप्रवृत्तितदुपरमप्रधानकारणप्रतिपादनार्थत्वात् ३॥** न वाऽनर्थक उपदेशः, कुतः? जीवाजीवयोः परस्परोपश्लेषे सति संसारप्रवृत्तितदुपरम प्रधानकारणप्रतिपादनार्थत्वात्।इह मोक्षमार्गः प्रकृतः, तस्य फलमवश्यं मोक्षो निर्देष्टव्यः स कस्येति? जीव उपात्तः। स च संसारपूर्वकः। स च सत्यजीवे जीवस्य भवति,

इत्यजीव उपात्त। तयोश्च परस्परोपश्लेषः संसारः। तत्प्रधानहेतू आस्रवो बंधश्चेत्युपात्तौ। तदुपरमस्य मोक्षस्य प्रधानहेतू संवरनिर्जरे इत्युपादानं तयोः। एवमेषां निर्ज्ञाने सति प्राप्यस्य मोक्षस्य निर्ज्ञानं भवतीति। दृश्यते सामान्येऽन्तर्भूतस्यापि विशेषस्य पृथगुपादानं प्रयोजनार्थम् क्षत्रिया आयाताः सूरवर्मापीति।

**उभयथापि चोदनानुपत्तिः॥४॥** यो जीवाजीवयोरन्तर्भावादास्रवादीनामनुपदेशं चोदयति, तस्योभयथापि चोदना नोपपद्यते। कथं? आस्रवादीनि जीवाजीवाभ्यां पृथुगुपलभ्य वा चोदयेदनुपलभ्य वा? यदि पृथगुपलभ्य, अत एव ततोऽर्थान्तरत्वं सिद्धम्। अथानुपलभ्य, अनुपलम्भादेव चोदनाभावः. किञ्च, जीवाजीवाभ्यां पृथक् सिद्धान्वा चोदयेदसिद्धान्वा? यदि सिद्धांश्चोदयेदत एवाऽर्थान्तरभावः। अथाऽसिद्धांश्चोदयति, कथमत्रान्तर्भावश्चोद्यते? न हि खरविषाणादीनामन्तर्भावश्चोदनार्हः।

**अनेकान्ताच्च॥५॥** चोदनानुपपत्तिरिति वर्तते। कथं? द्रव्यार्थिकपर्यायार्थिकयो-र्गुणप्रधानभावेनाऽर्पणानर्पणाभेदाज्जीवाजीवयोरास्रवादीनां स्यादन्तर्भावः स्यादनन्तर्भावः। पर्यायार्थिकगुणभावे, द्रव्यार्थिकप्राधान्यात्, आस्रवादिप्रतिनियतपर्यायार्थानर्पणादनादि-पारिणामिकचैतन्याचैतन्यादिद्रव्यार्थार्पणादास्रवादीनां स्याज्जीवेऽजीवे वान्तर्भावः। तथा द्रव्यार्थिकगुणभावे पर्यायार्थिकप्रधान्यादास्रवादिप्रतिनियतपर्यायार्थार्पणादनादिपारिणामिक-चैतन्याचैतन्यादिद्रव्यार्थाऽनर्पणादास्रवादीनां जीवाजीवयोः स्यादनन्तर्भावः। तदपेक्षया स्यादुपदेशोऽर्थवान्।

**तेषां निर्वचनलक्षणक्रमहेत्वभिधानम्॥६॥** तेषां जीवादीनां पृथगुपदेशे प्रयोजनमुक्तम्। इदानीं निर्वचनलक्षणक्रमहेत्वभिधानं कर्तव्यम्। तदुच्यते -

**त्रिकालविषयजीवनानुभवनाज्जीवः॥७॥** दशसु प्राणेषु यथोपात्तप्राणपर्यायेण त्रिषु कालेषु जीवनानुभवनाज्जीवत्यजीवीज्जीविष्यतीति वा जीवः। तथा सति, सिद्धानामपि जीवत्वं सिद्धं जीवितपूर्वत्वात्। सम्प्रति न जीवन्ति सिद्धाः भूतपूर्वगत्या जीवत्वमेषाम् इत्यौपचारिकत्वं स्यात्, मुख्यं चेष्यते। नैष दोषः। भावप्राणज्ञानदर्शनानुभवनात्साम्प्रतिकमपि जीवत्वमस्ति। अथवा रूढिशब्दोयम्। रूढौ च क्रिया व्युत्पत्त्यर्थैवेति कादाचित्कं जीवनमपेक्ष्य सर्वदा वर्तते गोशब्दवत्॥

**तद्विपर्ययोऽजीवः॥८॥** यस्य जीवनमुक्तलक्षणं नास्त्यसौ तद्विपर्ययादजीव इत्युच्यते॥

**आस्रवत्यनेनाऽऽस्रवणमात्रं वाऽऽस्रवः॥९॥** येन कर्मास्रवति यद्वास्रवणमात्रमास्रवः॥

**बध्यतेऽनेन बन्धनमात्रं वा बन्धः॥१०॥** बध्यते येनऽस्वतंत्रीक्रियते येन अस्वतंत्रीकरणमात्रं वा बन्धः॥

**संव्रियतेऽनेन संवरणमात्रं वा संवरः॥११॥** येन संव्रियते येन संरुध्यते संरोधनमात्रं वा संवरः॥

**निर्जीर्यते यया निर्जरणमात्रं वा निर्जरा॥१२॥** निर्जीर्यते निरस्यते यया निरसनमात्रं वा निर्जरा॥

**मोक्ष्यते येन मोक्षणमात्रं वा मोक्षः॥१३॥** मोक्ष्यतेऽस्यते येनाऽसनमात्रं वा मोक्षः। एतेषामितरेतरयोगे द्वन्द्वः। उक्तं निर्वचनमिदानीं लक्षणमुच्यते -

**चेतनास्वभावत्वात्तद्विकल्पलक्षणो जीवः॥१४॥** जीवस्वभावश्चेतना, यत इतरेभ्यो द्रव्येभ्यो भिद्यते। तद्विकल्पा ज्ञानादयः यत्सान्निधानादात्मा ज्ञाता दृष्टा कर्ता भोक्ता च भवति तल्लक्षणो जीवः।

**तद्विपरीतत्वादजीवस्तदभावलक्षणः॥१५॥** तद्विपरीतत्वादचेतनस्वभावत्वाज्ज्ञानादीनामभावो यस्य लक्षणं सोऽजीवः। कथमभावो निरुपाख्यो वस्तुनो लक्षणं भवति। अभावोऽपि वस्तुधर्मो हेत्वङ्गत्वादेर्भाववत्। अतोऽसौ लक्षणं युज्यते। स हि यदि वस्तुनो लक्षणं न स्यात्सर्वसङ्करः स्यात्, यद्येवं वनस्पत्यादीनामजीवत्वं प्राप्नोति तदभावात्, ज्ञानादीनां हि प्रवृत्तित उपलब्धिर्न च तेषां तत्पूर्विका प्रवृत्तिरस्ति हिताहितप्राप्तिपरिवर्जनाभावात्। उक्तं च-

बुद्धिपूर्वां क्रियां दृष्ट्वा स्वदेहेऽन्यत्र तद्ग्रहात्।
मन्यते बुद्धिसद्भावः सा न येषु न तेषु धीः॥ इति।

नैष दोषः; तेषामपि ज्ञानादयः सन्ति सर्वज्ञप्रत्यक्षाः, इतरेषामागमगम्याः। आहारलाभालाभयोः पुष्टिम्लानादिदर्शनेन युक्तिगम्याश्च। अण्डगर्भस्थमूर्छितादिषु सत्यपि जीवत्वे तत्पूर्वकप्रवृत्त्यभावाद्धेतुव्यभिचारः।

**पुण्यपापागमद्वारलक्षण आस्रवः॥१६॥** पुण्यपापलक्षणस्य कर्मण आगमद्वारमास्रव इत्युच्यते। आस्रव इवास्रवः क उपमार्थः,? यथा महोदधेः सलिलमापगामुखैरहरहरापूर्यते तथा मिथ्यादर्शनादिद्वारानुप्रविष्टैः कर्मभिरनिशमात्मा समापूर्यत इति मिथ्यादर्शनादि-द्वारमास्रवः।

**आत्मकर्मणोरन्योन्यप्रदेशानुप्रवेशलक्षणो बंधः॥१७॥** मिथ्यादर्शनादिप्रत्ययोपनीतानां कर्मप्रदेशानामात्मप्रदेशानां च परस्परानुप्रवेशलक्षणो बन्धः। बन्ध इव बन्धः क उपमार्थः?, यथा निगडादिद्रव्यबन्धनबद्धो देवदत्तोऽस्वतंत्रत्वादभिप्रेतदेशगमनाद्यभावादतिदुःखी भवति। तथात्मा कर्मबन्धनबद्धः, पारतंत्र्याच्छरीरमानसदुःखाभ्यर्दितो भवति॥

**आस्रवनिरोधलक्षणः संवरः॥१८॥** पूर्वोक्तानामास्रवद्वाराणां शुभपरिणामवशान्निरोधः संवरः. संवर इव संवरः, क उपमार्थः?, यथा

सुगुप्तसुसंवृतद्वारकपाटं पुरं सुरक्षितं दुरासदमरातिभिर्भवति। तथा सुगुप्तिसमितिधर्मानुप्रेक्षापरीषहजयचारित्रात्मनः सुसंवृतेन्द्रियकषाययोगस्याभिनवकर्मागमद्वारसंवरणात्संवरः।

**एकदेशकर्मसंक्षयलक्षणा निर्जरा॥१९॥** उपात्तस्य कर्मणस्तपोविशेषसन्निधाने सत्येकदेशसंक्षयलक्षणा निर्जरा। निर्जरेव निर्जरा। क उपमार्थः?, यथा मन्त्रौषधबलान्निर्जीर्णवीर्यविपाकं विषं न दोषप्रदम्। तथा सविपाकाऽविपाकनिर्जराप्रत्ययतपोविशेषेण निर्जीर्णरसं कर्म न संसारफलप्रदम्॥

**कृत्स्नकर्मवियोगलक्षणो मोक्षः॥२०॥** सम्यग्दर्शनादिहेतुप्रयोगप्रकर्षे सति कृत्स्नस्य कर्मणश्चतुर्विधबन्धवियोगो मोक्षः। मोक्ष इव मोक्षः क उपमार्थः?, यथा निगडादिद्रव्यमोक्षात्सति स्वातंत्र्येऽभिप्रेतप्रदेशगमनादेः पुमान् सुखी भवति तथा कृत्स्नकर्मवियोगे सति स्वाधीनात्यन्तिकज्ञानदर्शनानुपमसुखमात्माऽनुभवति। लक्षणमुक्तमिदानीं क्रमहेतुरुच्यते -

**तादर्थ्यात्परिस्पन्दस्यादौ जीवग्रहणम्॥२१॥** योऽयं मोक्षमार्गतत्त्वाविष्करणपरिस्पन्दः स आत्मार्थः, तस्य मोक्षपर्यायपरिणामात् यो वा जीवाद्युपदेशपरिस्पन्दः स आत्मार्थः, तस्योपयोगस्वाभाव्ये सति ग्राहकत्वात्। अत आदौ जीवग्रहणम्।

**तदनुग्रहार्थत्वात्तदनन्तरमजीवाभिधानम्॥२२॥** यतः शरीरवाङ्मनःप्राणापानादिनोप-कारेणाऽजीव आत्मानमनुगृह्णाति। अतस्तदनन्तरमजीवाभिधानम्।

**तदुभयाधीनत्वात्तत्समीपे आस्रवग्रहणम्॥२३॥** यत आत्मकर्मणोः परस्पराश्लेषे सत्यास्रवप्रसिद्धिर्भवति। अतस्तत्समीपे आस्रवग्रहणम्।

**तत्पूर्वकत्वाद्बन्धस्य ततः परं बन्धवचनम्॥२४॥** यत आस्रवपूर्वको बन्धस्ततः परं वचनं तस्य क्रियते।

**संवृतस्य बंधाभावात्तत्प्रत्यनीकप्रतिपत्त्यर्थं संवरवचनम्॥२५॥** यतः संवृतस्यात्मनो बंधो नास्ति ततस्तत्प्रत्यनीकप्रतिपत्त्यर्थं तदनन्तरं संवरवचनम्।

**संवरे सति निर्जरोपपत्तेस्तदनन्तरे निर्जरावचनम्॥२६॥** यतः संवरपूर्विका निर्जरा ततस्तदन्तिके निर्जरावचनम्।

**अन्ते प्राप्तत्वान्मोक्षस्यान्ते वचनम्॥२७॥** निर्जीर्णेषु कर्मस्वन्ते मोक्षः प्राप्यत इत्यन्ते वचनम्॥

**पुण्यपापदार्थोपसंख्यानमिति चेन्नाऽऽस्रवे बंधे वाऽन्तर्भावात् ॥२८॥** स्यादेतत्पुण्यपापपदार्थयोरुपसंख्यानं कर्तव्यन्यैरप्युक्तत्वादिति। तन्न किं कारणम्? आस्रवे बंधे वान्तर्भावात्, यत आस्रवो बंधश्च पुण्यपापात्मकः।

**तत्त्वशब्दस्य भाववाचित्वाज्जीवादिभिः सामानाधिकरण्याऽनुपपत्तिः॥२९॥** तत्त्व- शब्दो भाववाचीति व्याख्यातमेतत्। अतस्तस्य जीवादिभिर्द्रव्यवचनैः सामानाधिकरण्यं नोपपद्यते।

**न वाऽव्यतिरेकात्तद्भावसिद्धेः॥३०॥** न वैष दोषः, किं कारणम्? अव्यतिरेकात्तद्भावसिद्धेः। न हि द्रव्याद्वयतिरिक्तो भावोस्ति अतस्तद्भावेनाऽध्यारोप्यते। यथा ज्ञानमेवात्मेति। यदि तद्भावोऽध्यारोप्यते तल्लिङ्गसंख्यानुवृत्तिः प्राप्नोति।

**तल्लिङ्गसंख्यानुवृत्तौ चोक्तं॥३१॥** किमुक्तं नोपात्तव्यक्तिवचनत्वादिति।

इति तत्त्वार्थवार्तिके व्याख्यानालङ्कारे प्रथमेऽध्याये चतुर्थमाह्निकम्॥४॥

*****

एवं संज्ञास्वालक्षण्यादिभिरुद्दिष्टानां जीवादीनां संव्यवहारविशेषव्यभिचारनिवृत्त्यर्थमाह

## नामस्थापनाद्रव्यभावतस्तन्न्यासः॥५॥

नीयते गम्यतेऽनेनार्थः, नमति वाऽर्थमभिमुखीकरोतीति नाम। स्थाप्यते प्रतिनिधीयतेऽसाविति स्थापना। द्रोष्यते गम्यते गुणैर्द्रोष्यति गमिष्यति गुणानिति वा द्रव्यम्। भवनं भवतीति वा भावः। नामादीनामितरेतरयोगलक्षणो द्वंद्वः। नामस्थापना-द्रव्यभावैर्नामस्थापनाद्रव्यभावतः आद्यादित्वात्, दृश्यतेऽन्यतोपीति वा तसिः। न्यसनं इति वा न्यासो निक्षेप इत्यर्थस्तेषां न्यासस्तन्न्यासः। एतेषां नामादीनां किं लक्षणमित्यत्रोच्यते -

**निमित्तान्तरानपेक्षं संज्ञाकर्म नाम॥१॥** निमित्तादन्यन्निमित्तं निमित्तान्तरम् तदनपेक्ष्य क्रियमाणा संज्ञा नामेत्युच्यते। यथा परमैश्वर्यलक्षणेन्दनक्रियानिमित्तान्तरानपेक्षं कस्यचिदिन्द्र इति नाम। तथा जीवनक्रियानपेक्षं श्रद्धानक्रियानपेक्षं वा कस्यचिज्जीवः सम्यग्दर्शनमिति वा नाम।

**सोऽयमित्यभिसंबंधत्वेनाऽन्यस्य व्यवस्थापनामात्रं स्थापना॥२॥** यथा परमैश्वर्य-लक्षणो यः शचीपतिरिन्द्रः, सोयमित्यन्यवस्तुप्रतिनिधीयमानं स्थापना भवति। एवं जीव इति वा सम्यग्दर्शनमित्यक्षनिक्षेपादिषु सोऽयमिति व्यवस्थापनामात्रं स्थापना।

**अनागतपरिणामविशेषं प्रति गृहीताभिमुख्यं द्रव्यम्॥३॥** यद्भाविपरिणामप्राप्तिं प्रति योग्यतामादधानं तद्द्रव्यमित्युच्यते।

**अतद्भावं वा॥४॥** अथवाऽतद्भावं वा द्रव्यमित्युच्यते। यथेन्द्रार्थमानीतं काष्ठमिन्द्रप्रतिमापर्यायप्राप्तिं प्रत्यभिमुखमिन्द्र इत्युच्यते। तथा जीवसम्य-ग्दर्शनपर्यायप्राप्तिं प्रति गृहीताभिमुख्यं द्रव्यजीवो द्रव्यसम्यग्दर्शनमिति चोच्यते। युक्तं

तावत् सम्यग्दर्शनप्राप्तिं प्रति गृहीताभिमुख्यमिति। अतत्परिणामस्यजीवस्य संभवात्, इदं त्वयुक्तं जीवनपर्यायप्राप्तिं प्रति गृहीताभिमुख्यमिति, कुतः? सदा तत्परिणामो यदि न स्यात्प्रागजीवः प्राप्नोति। नैष दोषः मनुष्यजीवादिविशेषापेक्षया स व्यपदेशो वेदितव्यः।

**तद्द्विविधमागमनोआगमभेदात् ॥५॥** तदेत व्यं द्विविधं, कुतः? आगमनो-आगमभेदात्। आगमद्रव्यजीवः नोआगमद्रव्यजीवः। आगमद्रव्यसम्यग्दर्शनं नोआगम-द्रव्यसम्यग्दर्शनमिति च।

**अनुपयुक्तः प्राभृतज्ञाय्यात्मागमः ॥६॥** अनुपयुक्तः प्राभृतज्ञाय्यात्माऽऽगमद्रव्य-मित्युच्यते।

**इतरत् त्रिविधं ज्ञायकशरीरभावितद्वयतिरिक्तभेदात् ॥७॥** इतरन्नोआगमद्रव्यं त्रैविध्यमास्कंदति, कुतः? ज्ञायकशरीरभावितद्व्यतिरिक्तभेदात्। ज्ञातुर्यच्छरीरं त्रिकालगो-चरं तज्ज्ञायकशरीरं। जीवनसम्यग्दर्शनपरिणामप्राप्तिं प्रत्यभिमुखं द्रव्यं भावीत्युच्यते। तद्व्यतिरिक्तं कर्मनोकर्मविकल्पम्।

**वर्तमानतत्पर्यायोपलक्षितं द्रव्यं भावः ॥८॥** वर्तमानेन तेन जीवनसम्यग्दर्शन-पर्यायेणोपलक्षितं द्रव्यं भावजीवो भावसम्यग्दर्शनमिति चोच्यते। यथेन्द्रनामकर्मोदया-पादितेन्दनक्रियापर्यायपरिणत आत्मा भावेन्द्रः।

**स द्विविधः पूर्ववत् ॥९॥** स एष भावो द्विविधो वेदितव्यः पूर्ववदागमनो-आगमभेदात् ॥

**तत्प्राभृतविषयोपयोगाविष्ट आत्मागमः ॥१०॥** जीवादिप्राभृतविषयेणोपयोगेनाविष्ट आत्माऽऽगमतो भावजीवो भावसम्यग्दर्शनमिति चोच्यते।

**जीवनादिपर्यायाविष्टोऽन्यः॥११॥** जीवनादिपर्यायेणाऽऽविष्ट आत्माऽन्यो नोआगमतो भाव इत्युच्यते।

**नामस्थापनयोरेकत्वं संज्ञाकर्माऽविशेषादिति चेन्नादरानुग्रहाकांक्षित्वात्स्थापनायाम्॥१२॥** स्यान्मतं, नामस्थापनयोरेकत्वम्, कुतः संज्ञाकर्माविशेषात्। यतो नाम्नि स्थापनायां च संज्ञाकरणं समानम्, नह्यकृते नाम्नि, स्थाप्यत इति?। तच्च न कुतः? आदरानुग्रहाकांक्षित्वात् स्थापनायाम्। यथाऽर्हदिन्द्रस्कन्देश्वरादिप्रतिमास्वादरानुग्रहाकांक्षित्वं जनस्य, न तथा परिभाषिते वर्तते ततोऽन्यत्वमनयोः।

**द्रव्यभावयोरेकत्वमव्यतिरेकादिति चेन्न कथंचित्संज्ञास्वालक्षण्यादिभेदात्तद्भेदसिद्धिः॥१३॥** स्यादारेका द्रव्यभावयोस्तर्ह्येकत्वं प्रसज्यते कुतस्तदव्यतिरेकात्, नहि द्रव्यव्यतिरेकेण भाव उपलभ्यते भावव्यतिरेकेण वा द्रव्यम्, अतोऽनयोरेकत्वमिति। तच्च न कुतः? संज्ञास्वालक्षण्यादिभेदात्तद्भेदसिद्धेः। इह ययोः संज्ञास्वालक्षण्यादिकृतो भेदस्तयोर्नानात्वमुपलभ्यते तथा द्रव्यभावयोरपीति। कश्चिदाह –

**द्रव्यस्यादौ वचनं न्याय्यं तत्पूर्वकत्वान्नामादीनाम्॥१४॥** द्रव्यस्यादौ वचनं न्याय्यं कुतस्तत्पूर्वकत्वान्नामादीनाम्। सतो हि संज्ञिनो नामादिभिर्भवितव्यमिति, नैष दोषः।

**संव्यवहारहेतुत्वात्संज्ञायाः पूर्ववचनम्॥१५॥** संव्यवहारहेतुत्वात्संज्ञायाः पूर्ववचनं क्रियते। सर्वो हि लोकसंव्यवहारः संज्ञापूर्वकस्तदात्मकत्वात्, तदनात्मकत्वे वस्तुव्यवहारविच्छेदः। तदात्मकत्वाच्च स्तुतिनिंदयोः रागद्वेषप्रवृत्तिः सिद्धा।

**ततः स्थापनावचनमाहितनामकस्य स्थापनोपपत्तेः॥१६॥** ततः परं स्थापना विधीयते कुतः?, आहितनामकस्य स्थापनोपपत्तेः। प्राहितनामकस्य सोऽयमिति किञ्चित्प्रतिनिधीयते।

**द्रव्यभावयोः पूर्वापरन्यासः पूर्वोत्तरकालवृत्तित्वात् ॥१७॥** द्रव्यभावयोः पूर्वापरन्यासः क्रियते, किं कारणम्? पूर्वोत्तरकालवृत्तित्त्वात्। पूर्वकालविषयं हि द्रव्यम् उत्तरकालभावी भाव इति।

**तत्त्वप्रत्यासत्तिप्रकर्षाऽप्रकर्षभेदाद्वा तत्क्रमः॥१८॥** अथवा तत्त्वप्रत्यासत्तेः प्रकर्षा-प्रकर्षभेदात्तेषां नामादीनामुद्दिष्टः क्रमो वेदितव्यः। तत्त्वं भावः प्रधानं तदर्थानीतराणि, तत्र प्रत्यासत्तेस्तत्समीपं द्रव्यं प्रयुक्तं तद्भावापत्तेः। ततः भावः प्रधानं तदर्थानीतराणि, तत्र प्रत्यासत्तेस्तत्समीपं द्रव्यं प्रयुक्तं तद्भावापत्तेः। ततः पूर्वं स्थापनोपादानमतद्भावेपि तद्भावं प्रति प्रधानहेतुत्वात्ततः पूर्वं नामोपादानं भावं प्रति विप्रकृष्टत्वात्।

**नामादिचतुष्टयाभावो विरोधात् ॥१९॥** अत्राह नामादिचतुष्टयस्याभावः, कुतः? विरोधात्। एकस्य शब्दार्थस्य नामादिचतुष्टयं विरुध्यते। यथा नामैकं नामैव न स्थापना। अथ नाम स्थापना इष्यते न नामेदं नाम। स्थापना, तर्हि न चेयं स्थापना नामेदम्। अतो नामार्थ एको विरोधान्न स्थापना। तथैकस्य जीवादेरर्थस्य सम्य-ग्दर्शनादेर्वा विरोधान्नामाद्यभाव इति।

**न वा सर्वेषां संव्यवहारं प्रत्यविरोधात् ॥२०॥** न वैष दोषः, किं कारणम्? सर्वेषां संव्यवहारं प्रत्यविरोधात्। लोके हि सर्वैर्नामादिभिर्दृष्टः संव्यवहारः। इन्द्रो देवदत्त इति नाम। प्रतिमादिषु चेन्द्र इति स्थापना। इन्द्रार्थे च काष्ठे द्रव्ये इन्द्रसंव्यवहारः "इन् आनीत" इति वचनात्। अनागतपरिणामे वार्थे द्रव्यसंव्यवहारो लोके दृष्ट; द्रव्यमयं माणवकः, आचार्यः श्रेष्ठी वैयाकरणो राजा वा भविष्यतीति व्यवहारदर्शनात्। शचीपतौ च भावे इन्द्र इति। न च विरोधः। किञ्च,

**अभिहितानवबोधात् ॥२१॥** यथा नामैकं नामैवेष्यते न स्थापनेत्याचक्षाणेन त्वयाऽभिहितानबोधः प्रकटीक्रियते। यतो नैवमाचक्ष्महे नामैकं स्थापनेति, किन्त्वेकस्यार्थस्य नामस्थापनाद्रव्यभावैर्न्यासः इत्याचक्ष्महे।

**अनेकान्ताच्च॥२२॥** नैतदेकान्तेन प्रतिजानीमहे नामैव स्थापना भवतीति। न वा स्थापना वा नाम भवति नेति च। कथं?

**मनुष्यब्राह्मणवत् ॥२३॥** यथा ब्राह्मणः स्यान्मनुष्यो ब्राह्मणस्य मनुष्यजात्यात्मक-त्वात्। मनुष्यस्तु ब्राह्मणः स्यान्न वा, मनुष्यस्य ब्राह्मणजात्यादिपर्यायात्मकत्व-दर्शनाच्च। तथा स्थापना स्यान्नामाऽकृतनाम्नः स्थापनानुपपत्तेः। नाम तु स्थापना स्यान्न वा, उभयथा दर्शनात्। तथा द्रव्यं स्याद्भावः भावद्रव्यार्थादेशात्। न भावपर्यायार्थादेशादद्रव्यम्। भावस्तु द्रव्यं स्यान्न वा, उभयथा दर्शनात्। किञ्च

**अतस्तत्सिद्धेः॥२४॥** यत एव नामादिचतुष्टयस्य विरोधं भवानाचष्टे अत एव नाभावः। कथम्? इह योऽयं सहानवस्थानलक्षणो विरोधो वध्यघातकवत् स सतामर्थानां भवति नाऽसतां कालोलूकछायातपवत्, न काकदन्तखरविषाणयोर्विरोधोऽसत्त्वात्। किञ्च

**नामाद्यात्मकत्वाऽनात्मकत्वे विरोधस्याऽविरोधकत्वात् ॥२५॥** यो नामादिचतुष्टयस्य विरोधः स नामाद्यात्मको वा स्यान्न वा, उभयथा च विरोधाभावः। यदि नामाद्यात्मको नासौ विरोधको नामाद्यात्मवत्। अथ तदात्मकोऽपि विरोधो नामादीनां विरोधकः, नामाद्यात्मापि विरोधकः स्यात्। ततो नामादीनामभावाद्विरोध एव न स्यात्। अथ न नामाद्यात्मकः; एवमपि नामादीनां नासौ विरोधकोऽर्थान्तरत्वात्। अर्थान्तरभावेपि विरोधकत्वमिष्यते? सर्वेषां पदार्थानां परस्परतो नित्यं विरोधः स्यात्। न चासावस्तीति। अतो विरोधाभावः।

**तादगुण्याद्भावस्य प्रामाण्यमिति चेन्नेतरव्यवहारनिवृत्तेः ॥२६॥** स्यादेतत्तादगुण्याद्भाव एव प्रमाणं न नामादिः। स जीवनादिर्गुणो यस्य स तदगुणः, तस्य भावस्तादगुण्यम्। अतो भाव एव प्रमाणं न नामादिस्तादगुण्याभावादिति। तन्न किं कारणम्? इतरव्यवहारनिवृत्तेः। एवं हि सति नामाद्याश्रयो व्यवहारो निवर्तेत। स चास्ति। इत्यतो न भावस्यैव प्रमाण्यम्।

**उपचारादिति चेन्न तदगुणाभावात् ॥२७॥** स्यादेतत्, यद्यपि भावस्यैव प्रामाण्यं तथापि नामादिव्यवहारो न निवर्तते कुतः? उपचारात्, माणवके सिंहशब्दव्यवहारवदिति। तन्न किं कारणम्? तदगुणाभावात्। युज्यते माणवके सिंहशब्दव्यवहारः क्रौर्यशौर्यादि गुणैकदेशयोगात्। इह तु नामादिषु जीवनादिगुणैकदेशो न कश्चिदप्यस्तीत्युपचाराभावाद् व्यवहारनिवृत्तिः स्यादेव।

**मुख्यसंप्रत्ययप्रसंगाच्च॥२८॥** यद्युपचारान्नामादिव्यवहारः स्यात्, ''गौणमुख्ययोर्मुख्ये संप्रत्यय'' इति मुख्यस्यैव संप्रत्ययः स्यान्न नामादीनाम्। यतस्त्वर्थप्रकरणादिविशेषलिंगाभावे सर्वत्र संप्रत्ययोऽविशिष्टः कृतसंगतेर्भवत्यतो न नामादिषूपचाराद्व्यवहारः।

**कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्ययो भवतीति चेन्नोभयगतिदर्शनात् ॥२९॥** स्यादेत् कृत्रिमाकृत्रिमयोः संप्रत्ययो भवतीति लोके। तद्यथा गोपालकमानय कटेजकमानयेति, यस्यैषा संज्ञा भवति स आनीयते। न यो गाः पालयति यो वा कटे जातः। एवमिहापि यस्यैषा जीवादिरिति संज्ञा कृता तस्यैव संप्रत्ययः स्यान्नेतरेषामिति। तन्न किं कारणम्? उभयगतिदर्शनात्। लोके ह्यर्थात्प्रकरणाद्वा कृत्रिमे संप्रत्ययः स्यादर्थो वाऽस्यैवं संज्ञके न भवति, प्रकृतं वा तत्र भवतीदमेवं संज्ञकेन कर्तव्यमिति। अतश्चार्थात्प्रकरणाद्वा लोके संप्रत्ययो भवति। अङ्ग हि भवान् ग्राम्यं

पांशुलखुरपादकमप्रकरणज्ञमागतं ब्रवीतु गोपालकमानय कटेजकमानयेत्युभयगतिस्तस्य भविष्यति। किञ्च,

**अनेकान्तात् ॥३०॥** नायमेकान्तः कृत्रिममेवेदं, न कृत्रिममेवेति किं तर्हि? अनेकान्तो नाम सामान्यापेक्षया स्यादकृत्रिमं विशेषापेक्षया कृत्रिमम्। एवं स्थापनादयश्चेति। ततः किं "कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्ययः" इत्यस्याभावः। किं च –

**नयद्वयविषयत्वात् ॥३१॥** द्वौ नयौ द्रव्यार्थिकः पर्यायार्थिकश्च। तयोर्विषयो नामादिन्यासस्तत्र नामस्थापनाद्रव्याणि, प्राच्यस्य, सामान्यात्मकत्वात्। पाश्चात्यस्य भावः, परिणतिप्रधानत्वात्। ततः किं "गौणमुख्ययोर्मुख्ये संप्रत्ययः" "कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्ययः" इति च न भवति, प्रतिविषयं नयभेदात्।

**द्रव्यार्थिकपर्यायार्थिकान्तर्भावान्नामादीनां तयोश्च नयशब्दाभिधेयत्वात्पौनरुक्त-प्रसङ्गः॥३२॥** यतो नामस्थापनाद्रव्याणि द्रव्यार्थिकस्य भावः पर्यायार्थिकस्येत्युक्तम्। ततो नामादीनां नयान्तर्भावान्नयविकल्पानां च वक्ष्यमाणत्वात्पौनरुक्त्यं प्राप्नोति।

**न वा विनेयमतिभेदाधीनत्वाद् द्व्यादिनयविकल्पनिरूपणस्य॥३३॥** न वैष दोषः, किं कारणम्? विनेयमतिभेदाधीनत्वाद् द्व्यादिनयविकल्पनिरूपणस्य। ये सुमेधसो विनेयास्तेषां द्वाभ्यामेव द्रव्यार्थिकपर्यायार्थिकाभ्यां सर्वनयवक्तव्यार्थप्रतिपत्तिस्तदन्तर्भावात्। ये त्वतो मन्दमेधसस्तेषां त्र्यादिनयविकल्पनिरूपणमतो विशेषोपपत्तेर्नामादीनाम-पुनरुक्तत्वम्।

**तच्छव्दाऽग्रहणं प्रकृतत्वात् ॥३४॥** सम्यग्दर्शनादित्रयस्य प्रकृतत्वादेव नामादिन्यासाभिसंबन्धः। ततस्तच्छब्दस्य ग्रहणमनर्थकम्?

**प्रत्यासन्नत्वाज्जीवादिषु प्रसङ्ग इति चेन्न सम्यग्दर्शनविषयत्वात् ॥३५॥** स्यादेतत्तच्छब्दाद्विना प्रत्यासन्ना जीवादयस्तेषामेव न्यासाभिसन्बन्धो भवेन्न

सम्यग्द-र्शनादीनाम् । कुतः? "अनन्तरस्य विधिर्वाभवति प्रतिषेधो वेति" तन्न किं कारणम्? सम्यग्दर्शनविषयत्वात् सम्यग्दर्शनादित्रयस्य प्राधान्येनोपदेशस्तदर्थत्वाच्छा-स्त्रारम्भस्य। सम्यग्दर्शनादिविषयत्वेन तु जीवादीनां गुणभूतत्वेनोपदेशः। अतस्तच्छब्दाद्दतेपि सम्य-ग्दर्शनादित्रयस्य प्राधान्यान्नामादिन्यासेनाभिसंबन्धो युक्तः।

**विशेषातिदिष्टत्वाच्च॥३६॥** जीवादयः सम्यग्दर्शनविषयत्वेन विशेषेणातिदिष्टाः, प्रकृतं सम्यग्दर्शनादित्रयं न वाधिष्यन्ते "विशेषातिदिष्टाः प्रकृतं न बाधन्त" इति।

**सर्वभावाधिगमार्थं तु॥३७॥** सर्वेषां भावानां जीवाजीवादीनामप्रधानानां प्रधानानां च सम्यग्दर्शनादीनामधिगमार्थं तर्हि तच्छब्दग्रहणम्। इतरथा हि प्रधानाभिसंबंध एव स्यात् । एवमजीवादिषु ज्ञानचारित्रयोश्च नामादिन्यासविकल्पो योजयितव्यः।

अधिकृतानामेव सम्यग्दर्शनादिजीवादीनां पदार्थानामभिधानाभिधेयसंव्यवहारा-व्यभिचाराय नामादिभिर्निक्षिप्तानां तत्त्वाधिगमहेतुर्वक्तव्य इत्यत आह –

## प्रमाणनयैरधिगमः॥६॥

प्रमाणे च नयाश्च प्रमाणनयास्तैरधिगमो भवति सम्यग्दर्शनादीनां जीवादीनाम्। प्रमाणनया वक्ष्यमाणलक्षणाः। ननु च नयशब्दस्याल्पाक्षरत्वात् पूर्वनिपातेन भवितव्यम्?

**अभ्यर्हितत्वात्प्रमाणशब्दस्य पूर्वनिपातः॥१॥** "अभ्यर्हितं पूर्वं निपततीति" प्रमाणशब्दस्य पूर्वनिपातो वेदितव्यः। कथमभ्यर्हितत्वम्?

**प्रमाणप्रकाशितेष्वर्थेषु नयप्रवृतेर्व्यवहारहेतुत्वादभ्यर्हः॥२॥** यतः प्रमाणप्रकाशि-तेष्वर्थेषु नयप्रवृत्तिर्व्यवहारहेतुर्भवति नान्येष्वतोऽस्याभ्यर्हितत्वम्।

**समुदायाऽवयवविषयत्वाद्बा॥३॥** अथवा समुदायविषयं प्रमाणमवयवविषया नया इति प्रमाणस्याभ्यर्हितत्वम्॥ तथाचोक्तं - ''सकलादेशः प्रमाणाधीनो विकलादेशो नया-धीन'' इति।

**अधिगमहेतुर्द्विविधः॥४॥** स्वाधिगमहेतुः पराधिगमहेतुश्च, स्वाधिगमहेतुर्ज्ञानात्मकः प्रमाणनयविकल्पः, पराधिगमहेतुर्वचनात्मकस्तेन श्रुताख्येन प्रमाणेन स्याद्वादनय-संस्कृतेन प्रति पर्यायं सप्तभङ्गीमन्तो जीवादयः पदार्था अधिगमयितव्याः।

अत्राह केयं सप्तभङ्गीत्यत्रोच्यते।

**प्रश्नवशादेकस्मिन्वस्तुन्यविरोधेन विधिप्रतिषेधविकल्पना सप्तभङ्गी॥५॥** एक-स्मिन्वस्तुन्यविरोधेन प्रश्नवशाद् दृष्टेनेष्टेन च प्रमाणेनाऽविरुद्धा विधिप्रतिषेधकल्पना सप्तभङ्गी विज्ञेया। तद्यथा स्याद् घटः (१) स्यादघटः (२) स्याद्घटश्चाघटश्च (३) स्यादवक्तव्यः (४) स्याद्घटश्चावक्तव्यश्च (५) स्यादघटश्चावक्तव्यश्च (६) स्याद्घटश्चाघटश्चा-वक्तव्यश्च (७) इत्यर्पितानर्पितनयसिद्धेर्निरूपयितव्या।

तत्र स्वात्मना स्याद्घटः। परात्मना स्यादघटः। को वा घटस्य स्वात्मा? को वा परात्मा?। घटबुद्ध्यभिधानप्रवृत्तिलिङ्गः स्वात्मा। यत्र तयोरप्रवृत्तिः स परात्मा पटादिः। स्वपरात्मोपादानापोहनव्यवस्थापाद्यं हि वस्तुनो वस्तुत्वम्। यदि स्वस्मिन् पटाद्यात्म-व्यावृत्तिविपरणतिर्न स्यात्सर्वात्मना घट इति व्यपदिश्येत। अथ परात्मना व्यावृत्तावपि स्वात्मोपादानविपरिणितिर्न स्यात् खरविषाणवदवस्त्वेव स्यात्।

अथवा नाम स्थापनाद्रव्यभावेषु यो विवक्षितः स स्वात्मा। इतरः परात्मा। तत्र विवक्षितात्मना घटः, नेतरात्मना। यदीतरात्मनापि घटः स्यात्, विवक्षितात्मना वाऽघटः। नामादिव्यवहारोच्छेदः स्यात्। अथवा तत्र विवक्षितघटशब्द्वाच्यसादृश्य-सामान्यसंबन्धिषु

कस्मिंश्चिद् घटविशेषे परिगृहीते प्रतिनियतो यः संस्थानादि; स स्वात्मा। इतरः परात्मा। तत्र प्रतिनियतेन रूपेण घटः, नेतरेण। यदीतरात्मकः स्यात्, एकघटमात्रप्रसङ्गः। सामान्याश्रयो व्यवहारो विनश्येत्।

अथवा तस्मिन्नेव घटाविशेषे कालान्तरावस्थायिनि पूर्वोत्तरकुशूलान्तकपाला-द्यवस्थाकलापः परात्मा। तदन्तरालवर्ती स्वात्मा। स तेनैव घटः, तत्कर्मगुणव्य-पदेशदर्शनात् । नेतरात्मना। यदि हि कुशूलान्तकपालाद्यात्मनापि घटः स्यात्। घटावस्थायामपि तदुपलब्धिर्भवेत्। तदुत्पत्तिविनाशार्थं पुरुषप्रयत्नफलाभावश्चानुषज्येत। अथान्तरालवर्तिपर्यायात्मनाप्यघटः स्याद्, घटकृत्यं फलं नोपलभ्येत।

अथवा प्रतिक्षणं द्रव्यपरिणामोपचयापचयभेदादर्थान्तरोपपत्तेः ऋजुसूत्रनयापेक्षया प्रत्युत्पन्नघटस्वभावः स्वात्मा। घटपर्याय एवातीतोऽनागतश्च परात्मा। तेन प्रत्युत्पन्न-स्वभावेन सता स घटः, नेतरेणासता तथोपलब्ध्यनुपलब्धिसद्भावात्। इतरथा हि प्रत्युत्पन्नवदतीतानागतात्मनापि घटत्वे एकसमयमात्रमेव सर्वं स्यात्। अतीतानागतवद्वा प्रत्युत्पन्नाभावे घटाश्रयव्यवहाराभाव आपद्यते, विनष्टानुत्पन्न-घटव्यवहाराभाववत्।

अथवा तस्मिन् प्रत्युत्पन्नविषये रूपादिसमुदये परस्परोपकारवर्तिनि पृथुबुध्नाद्याकारः स्वात्मा। इतरः परात्मा। तेन पृथुबुध्नाद्याकारेण स घटोस्ति। नेतरेण। घटव्यवहारस्य तद्भावे भावात्तदभावेऽभावात्। यदि हि पृथुबुध्नाद्यात्मनापि घटो न स्यात्स एव न स्यात्। अथेतरात्मनापि घटः स्यात्तदाकारशून्येपि घटव्यवहारः प्राप्नुयात्।

अथवा रूपादिसन्निवेशः संस्थानं तत्र चक्षुषा घटो गृह्यते, इत्यस्मिन् व्यवहारे रूपमुखेन घटो गृह्यत इति रूपं स्वात्मा। रसादिः परात्मा। स घटो रूपेणास्ति, नेतरेण

रसादिना, प्रतिनियतकरणग्राह्यत्वात्। अथ हि चक्षुषा घटो गृह्यत इत्यत्र, रसादिरपि घट इति गृह्येत। सर्वेषां रूपत्वप्रसङ्गः? ततश्च करणान्तरकल्पनाऽनर्थिका। यदि वा रसादिवद्रूपमपि घट इति न गृह्येत, चक्षुर्विषयताऽस्य न स्यात् ।

अथवा शब्दभेदे ध्रुवोऽर्थभेद इति घटकुटादिशब्दानामप्यर्थभेदः। घटनाद् घटः कौटिल्यात्कुट इति तत्क्रियापरिणतिक्षण एव तस्य शब्दस्य वृत्तिर्युक्ता। तत्र घटनक्रिया-विषयककर्तृभावः स्वात्मा। इतरः परात्मा। तत्राद्येन घटः। नेतरेण, तथार्थसमभिरोहणात्। यदि च घटनक्रियापरिणतिमुखेनाप्यघटः स्यात्। तद्वयवहारनिवृत्तिः स्यात्। यदि चेतरव्यपेक्षयापि घटः स्यात् पटादिष्वपि तत्क्रियाविरहितेषु तच्छब्दवृत्तिः स्यात् एकशब्दवाच्यत्वं वा वस्तुनः।

अथवा घटशब्दप्रयोगानन्तरमुत्पद्यमान उपयोगाकारः स्वात्मा, अहेयत्वा-दन्तरङ्गत्वाच्च। बाह्यो घटाकारः परात्मा, तदभावेपि घटव्यवहारदर्शनात्। स घट उपयोगाकारेणास्ति नान्येन। यदि उपयोगाकारात्मनाप्यघटः स्यात् वक्तृश्रोतृहेतुफल भूतोपयोगघटाकाराभावात्तदधीनो व्यवहारो विनाशममाप्नुयात्। इतरोऽसन्निहितोपि यदि घटः स्यात्पटादीनामपि स्याद् घटत्वप्रसङ्गः।

अथवा चैतन्यशक्तेर्द्वावाकारौ ज्ञानाकारो ज्ञेयाकारश्च, अनुपयुक्तप्रतिविम्बाकारा-दर्शतलवत् ज्ञानाकारः। प्रतिविम्बाकारपरिणतादर्शतलवत् ज्ञेयाकारः। तत्र ज्ञेयाकारः स्वात्मा, तन्मूलत्वाद् घटव्यवहारस्य। ज्ञानाकारः परात्मा सर्वसाधारणत्वात्। स घटो ज्ञेयाकारेणास्ति नान्यथा। यदि ज्ञेयाकारेणाप्यघटः स्यात्तदाश्रयेऽपि कतर्व्यतानिरासः स्यात्। अथ हि ज्ञानाकारेणापि घटः स्यात्पटादिज्ञानकालेऽपि तत्सन्निधानाद् घटव्यवहारवृत्तिः प्रसज्यते।

उक्तैः प्रकारैरर्पितघटत्वमघटत्वं च परस्परतो न भिन्नम्। यदि भिद्येत सामानाधिकरण्येन तद्बुद्ध्यभिधानवृत्तिर्न स्याद् घटपटवत्। ततश्चेतरेतराविनाभावे उभयोरप्यभावात्तदाश्रयव्यवहारापह्नवः कृतः स्यात्। अतस्तदुभयात्मकोऽसौ क्रमेण तच्छब्दवाच्यतामास्कन्दन् स्यात् घटश्चाघटश्चेत्युच्यते। यदि तदुभयात्मकं वस्तु घट इत्येवोच्येत, इतरात्मासंग्रहादतत्त्वमेव स्यात्। अथाघट एवेत्युच्यते घटात्मानुपादानादनृतमेव स्यान्न वस्तु तावदेवेति। न चान्यः शब्दस्तदुभयात्मावस्थतत्त्वाभिधायी विद्यतेऽतोऽसौ घटो वचनगोचरातीतत्वात्स्यादवक्तव्य इत्युच्यते। घटात्मार्पणामुखेनो-क्तावक्तव्यस्वरूपनिरूपणेन चादिश्यमानः स एवार्थ इति स्याद् घटश्चावक्तव्यश्च। निरूपिताऽघटभङ्गसङ्गेन प्रदर्शितावक्तव्यवर्त्मना चादिश्यमानः स एवार्थ इति स्यादघट-श्चावक्तव्यश्च। तदुभयाभिधानक्रमाक्रमार्पणावशादाविर्भूततद्व्यपदेशः स एवार्थः स्याद् घटश्चाघटश्चावक्तव्यश्च भवति।

एवमियं सप्तभङ्गी जीवादिषु सम्यग्दर्शनादिषु च द्रव्यार्थिकपर्यायार्थिकनयार्पणाभेदाद्योजयिव्या। तत्र द्रव्यार्थिकैकान्तोऽनिश्चिततत्त्वः 'अतत्तदेव' इत्यवधारणा-दुन्मत्तवत्। पर्यायार्थिकैकान्तोऽपि तथैव 'अतद्वस्तु तदेव' इत्यवधारणादुन्मत्तवत्, स्याद्वादो निश्चितार्थोऽपेक्षितयाथातथ्यवस्तुवादित्वादनुन्मत्तवचनवत्। अवक्तव्यैकान्तोऽप्यसद्वादः स्व-वचनविरोधात् सदा मौनवृत्तिकवत्। अमृषार्थः स्यादवक्तव्यवादो वक्तव्यावक्तव्यवा-दित्वात्सत्येतरवचनविशेषज्ञवादवत्।

**अनेकान्ते तदभावादव्याप्तिरिति चेन्न तत्रापि तदुपपत्तेः॥६॥** स्यादेतदनेकान्ते सा विधिप्रतिषेधविकल्पना नास्ति। यदि स्याद्यदाऽनेकान्तो न भवति तदैकान्तदोषानुसङ्गो भवेत्। अनवस्थाप्रसङ्गश्च। ततस्तत्रानेकान्तत्वमेव, इति सा सप्तभङ्गी व्याप्तिमती न भवतीति। तन्न किं कारणम्? तत्रापि तदुपपत्तेः

स्यादेकान्तः स्यादनेकान्तः स्यादुभयः स्यादवक्तव्यः स्यादेकान्तश्चावक्तव्यश्च स्यादनेकान्तश्चावक्तव्यश्च स्यादेकान्तश्चानेकान्तश्चा-वक्तव्यश्चेति। तत्कथमिति चेदुच्यते –

**प्रमाणनयार्पणाभेदात् ॥७॥** एकान्तो द्विविधः सम्यगेकान्तो मिथ्यैकान्त इति। अनेकान्तोऽपि द्विविधः सम्यगनेकान्तो मिथ्यानेकान्त इति। तत्र सम्यगेकान्तो हेतुविशेषसामर्थ्यापेक्षः प्रमाणप्ररूपितार्थैकदेशादेशः। एकात्मावधारणेनान्याशेषनिराकरण-प्रवणप्रणिधिर्मिथ्यैकान्तः। एकत्र सप्रतिपक्षानेकधर्मस्वरूपनिरूपणो युक्तागमाभ्यामविरुद्धः सम्यगनेकान्तः। तदतत्स्वभाववस्तुशून्यं परिकल्पितानेकात्मकं केवलं वाग्विज्ञानं मिथ्याऽनेकान्तः। तत्र सम्यगेकान्तो नय इत्युच्यते। सम्यगनेकान्तः प्रमाणम्। नयार्पणादेकान्तो भवत्येकनिश्चयप्रवणत्वात्। प्रमाणार्पणादनेकान्तो भवत्यनेकनिश्चया-धिकरणत्वात्। यद्यनेकान्तोऽनेकान्त एव स्यान्नैकान्तो भवेत्, एकान्ताभावात्तत्समूहा-त्मकस्य तस्याप्यभावः स्यात्, शाखाद्यभावे वृक्षाद्यभाववत्। यदि चैकान्त एव स्यात्, तदविनाभाविविशेषनिराकरणादात्मलोपे सर्वलोपः स्यात्। एवमुत्तरे च भङ्गाः योजयितव्याः।

**छलमात्रमनेकांत इति चेन्न छललक्षणाभावात् ॥८॥** स्यान्मतं तदेवास्ति तदेव नास्ति, तदेव नित्यं, तदेवानित्यमिति चानेकान्तप्ररूपणं छलमात्रमिति। तन्न कुतः? छललक्षणाभावात्। छलस्य हि लक्षणमुक्तं ''वचनविघातोऽर्थविकल्पोपपत्त्या छलमिति'' यथा नवकम्बलोऽयमित्यविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पनम्, नवास्य कम्बला न चत्वार इति नवो वास्य कम्बलो न पुराण इति नवकम्बलः। न तथानेकान्तवादः। यत उभयनयगुणप्रधानभावापादितार्पितानर्पितव्यवहारसिद्धिविशेषबल-लाभप्रापितयुक्तिपुष्कलार्थोऽनेकान्तवादः।

**संशयहेतुरितिचेन्न विशेषलक्षणोपलब्धेः॥९॥** स्यान्मतं संशयहेतुरनेकान्तवादः। कथम्? एकत्राधारे विरोधिनोऽनेकस्यासंभवात्। आगमश्चैवं प्रवृत्तः– "एकं द्रव्यमनन्त-पर्यायमिति"। किमागमप्रामाण्यादस्ति वा नास्ति वा नित्यं वाऽनित्यं चेति। तच्च न कस्माद्विशेषलक्षणोपलब्धेः। इह सामान्यप्रत्यक्षाद्विशेषाप्रत्यक्षाद्विशेषस्मृतेश्च संशयः। तद्यथा स्थाणुपुरुषोचिते देशे नातिप्रकाशान्धकारकलुषायां वेलायामूर्ध्वत्वमात्रं सारूप्यं पश्यतो वक्रकोटरवयोनिलयनादीन् स्थाणुगतान् विशेषान् वस्त्रसंयमनशिरः कण्डूयन-शिखाबंधनादीन् पुरुषगतांश्चाऽनुपलभमानस्य तेषां च स्मरतः संशय उत्पद्यते, न च तद्वदनेकान्तवादे विशेषानुपलब्धिः यतः स्वरूपाद्यादेशवशीकृता विशेषा उक्ता व्यक्ताः प्रत्यर्थमुपलभ्यन्ते। ततो विशेषोपलब्धेर्न संशयहेतुरिति यदगदिष्म तत्सम्यग्निरजैष्म।

एवमपि संशयः। कथमिदं तावदसि प्रष्टव्यः। एषामस्तित्वादीनां धर्माणां साधकाः प्रतिनियता हेतवः सन्ति न वा । यदि न सन्ति विप्रतिपन्नप्रतिपादनासंभवः। अथ सन्त्येकत्र विरुद्धसाधनहेतुसन्निधाने सति भवितव्यं संशयेनेत्युच्यते –

**विरोधाभावात्संशयाभावः॥१०॥** यदि विरोधोऽभविष्यत्संशयोऽजनिष्यत्। न च विरोधो नयोपनीतानां धर्माणामस्ति। कुतः –

**अर्पणाभेदादविरोधः पितृपुत्रादिसंबन्धवत् ॥११॥** उक्तादर्पणाभेदादेकत्राऽविरोधेना-वरोधो धर्माणां पितृपुत्रादिसंबन्धवत्। तद्यथा - एकस्य देवदत्तस्य जातिकुलरूपसंज्ञाव्य-पदेशविशिष्टस्य पिता पुत्रो भ्राता भागिनेय इत्येवं प्रकाराः संबन्धा जन्यजनकत्वादि-शक्त्यर्पणाभेदान्न विरुध्यन्ते। न ह्येकापेक्षया पितेति, शेषापेक्षयापि पिता भवति। शेषापेक्षया वा पुत्रादिव्यपदेशार्ह इत्युक्तापेक्षयापि पुत्रादिव्यपदेशभाक् न च पिता। पुत्रादिकृतं संबन्धबहुत्वं देवदत्तस्यैकत्वे न क्रुध्यते। तद्वदस्तित्वादयो न यान्ति विरोधमेकत्र।

**सपक्षासपक्षापेक्षोपलक्षितसत्त्वासत्त्वादिभेदोपचितैकधर्मवद्वा॥१२॥** अथवा सपक्षाऽ-सपक्षापेक्षयोपलक्षितानां सत्त्वासत्त्वादीनां भेदानामाधारेण पक्षधर्मेणैकेन तुल्यं सर्वद्रव्यं निरपेक्षो ह्येकत्र वादिप्रतिवादिप्रयोगापेक्षया संशय उक्तः, इतरथा हि पक्षधर्मेऽपि संशयः कल्प्येत।

**एकस्य हेतोः साधकदूषकताऽविसंवादवद्वा॥१३॥** अथैवमुपपत्त्या विरोधे प्रतिपादितेऽपि मिथ्यादर्शनाभिनिवेशात्तत्त्वं न प्रतिपद्यते यस्तं प्रति सार्वलौकिक-हेतुवादमाश्रित्योच्यते - इह स्वपक्षमर्यादानतिक्रमेण न्यायधर्ममनुपालयता वादिनाऽभि-प्रेतप्रतिज्ञार्थसिद्धिमाशंसता हेत्वनुपदेशे सर्वाभिलषितार्थसिद्धिः प्रतिज्ञामात्रादेव मा प्रापदिति। अतिप्रसङ्गदोषनिवृत्तये यो हेतुरुपदिश्यते स साधको दूषकश्च। स्वपक्षं साधयति परपक्षं दूषयति न तौ साधनदूषणार्थौ हेतोरन्यौ भवतः। न चानन्यत्वमस्तीति कृत्वा येन साधकस्तेन दूषको येन वा दूषकस्तेन साधकः। न तयोः संकरो विरोधो वा। एवं सर्वार्थेषु विरोधदोषमपनुदन्ति विसर्पत्यनेकान्तप्रक्रियेति।

**सर्वप्रवाद्यविप्रतिपत्तेश्च॥१४॥** नात्र प्रतिवादिनो विसंवदन्ते, एकमनेकात्मकमिति। केचित्तावदाहुः - सत्त्वरजस्तमसां साम्यावस्था प्रधानमिति तेषां प्रसादलाघवशोषतापावर-णसादनादिभिन्नस्वभावानां प्रधानात्मना मिथश्च न विरोधः। अथ मन्येथाः न प्रधानं नामैकं गुणेभ्योऽर्थान्तरभूतमस्ति, किन्तु त एव गुणाः साम्यमापन्नाः प्रधानाख्यां लभन्ते इति। यद्येवं भूमा प्रधानस्य स्यात्, स्यादेतत्तेषां समुदायः प्रधानमेकमिति। अत एवाविरोधः सिद्धः गुणानामवयवानां समुदायस्य च।

अपरे मन्यन्ते- "अनुवृत्तिविनिवृत्तिबुद्ध्यभिधानलक्षणः सामान्यविशेष इति। तेषां च सामान्यमेव विशेषः सामान्यविशेष इत्येकस्यात्मन उभयात्मकं न विरुध्यते।

अपर आहुः - वर्णादिपरमाणुसमुदयो रूपपरमाणुरिति। तेषां कक्खडत्वादिभिन्न-लक्षणानां रूपात्मना मिथश्च न विरोधः। अथ मतम् न परमाणुर्नामैकोऽस्ति बाह्यः, किन्तु विज्ञानमेव तदाकारपरिणतं परमाणुव्यपदेशार्हमित्युच्यते। अत्रापि ग्राहकविषयाभाससंवित्तिशक्तित्रयाकाराधिकरणस्यैकस्याभ्युपगमान्न विरोधः। किञ्च सर्वेषामेव तेषां पूर्वोत्तरकालभाव्यवस्थाविशेषार्पणाभेदादेकस्य कार्यकारणशक्तिसमन्वयो न विरोधस्यास्पद-मित्यविरोधः सिद्धः॥ एवं प्रमाणनयैरधिगतानां जीवादीनां पुनरप्यधिगमोपायान्तर-प्रदर्शनार्थमाह –

## निर्देशस्वामित्वसाधनाधिकरणस्थितिविधानतः॥७॥

के पुनरिमे निर्देशादयः। निर्देशोऽर्थात्मावधारणम्। स्वामित्वमाधिपत्यम्। साधनं कारणम्। अधिकरणं प्रतिष्ठा। स्थितिः कालकृता व्यवस्था। विधानं प्रकारः। अधिगम इत्यनुवर्तत एतैरेतेभ्यो वाऽधिगमः पूर्ववत्तसिः। केषामधिगमः। जीवादीनां, सम्यग्दर्शनादीनां च। स तर्हि तथा निर्देशः कर्तव्यः। न कर्तव्योऽर्थवशाद्विभक्तिपरिणामो भवति। तद्यथा - उच्चानि देवदत्तस्य गृहाण्यामन्त्रयस्वैनम्, देवदत्तमिति गम्यते। अथ किमर्थमादौ निर्देश उच्यते –

**अवधृतार्थस्य धर्मविकल्पप्रतिपत्तेरादौ निर्देशवचनम्॥१॥** स्वरूपेणावधृतस्यार्थस्य स्वामित्वादिका धर्मविकल्पप्रतिपत्तिर्भवति। अतोऽस्य निर्देशस्यादौ वचनं क्रियते।

**इतरेषां प्रश्नवशात्क्रमः॥२॥** इतरेषां स्वामित्वादीनां प्रश्नवशात्क्रमो वेदितव्यः। यद्येवं स एव तावदुच्यते को जीव इति।

**औपशमिकादिभावपर्यायो जीवः पर्यायादेशात्॥३॥** वक्ष्यमाण औपशमिकादिभाव-पर्यायो जीव इत्युच्यते पर्यायादेशात्।

**द्रव्यार्थादेशान्नामादिः॥४॥** द्रव्यार्थादेशान्नामादिः "जीव" इत्युच्यते।

**तदुभयसंग्रहः प्रमाणम्॥५॥** तस्योभयस्य संग्रहः प्रमाणनिर्देश इत्युच्यते। कस्य, जीवः स्वामी ?

**तत्परिणामस्य भेदादग्नेरौष्ण्यवत् ॥६॥** स परिणामो यस्य सोऽयं तत्परिणामस्तस्यासौ व्यपदिश्यते, कुतः? कथञ्चिद्भेदात्परिणामपरिणामिनोर्भेदकल्पनासद्भावादग्नेरौष्ण्यवत् । तद्यथा - औष्ण्यात्मकस्याग्नेर्दहनपचनस्वेदनादिक्रियासामर्थ्यमौष्ण्यं भेदेनोच्यते।

**व्यवहारनयवशात्सर्वेषाम्॥७॥** जीवादीनां सर्वेषां पदार्थानां व्यवहारनयवशाज्जीवः स्वामी। किंसाधनो जीवः?

**पारिणामिकभावसाधनो निश्चयतः॥८॥** योऽसौ जीवात्मपारिणामिकस्तत्साधनो जीवो निश्चयनयेन, तेन ह्यसावात्मानं सर्वकालं लभत इति।

**औपशमिकादिभावसाधनश्च व्यवहारतः॥९॥** व्यवहारनयवशादौपशमिकादिभावसाधनश्चेति व्यपदिश्यते। च शब्देन शुक्रशोणिताहारादिसाधनश्च। किमधिकरणो जीवः ?

**स्वप्रदेशाधिकरणो निश्चयतः॥१०॥** योऽसौ स्वप्रदेशोऽसंख्यातस्वरूपः कर्मकृतशरीर-परिमाणानुविधायित्वेऽप्यपरिप्राप्तहीनाधिकभावस्तदधिकरणो जीवः स्वात्मप्रतिष्ठाकाशवत् ।

**व्यवहारतः शरीराद्यधिष्ठानः॥११॥** कर्मोपात्तं शरीरमेतच्चाधिकरणमात्मा व्यवहार-नयवशादधितिष्ठतीत्युच्यते। किं स्थितिको जीवः?

**स्थितिस्तस्य द्रव्यपर्यायापेक्षाऽनाद्यवसाना समयादिका च॥१२॥** तस्य जीवस्य स्थितिर्द्रव्यपर्यायापेक्षा द्विधा कल्प्यते। द्रव्यापेक्षाऽनाद्यवसाना, जीवद्रव्यं हि चैतन्य-जीवद्रव्योपयोगाऽसंख्येयप्रदेशादिसामान्यादेशान्न प्रच्यवते सर्वकालमिति। पर्यायस्त्वन्य-श्चान्यश्च भवति तदपेक्षा समयादिका कल्प्यते। किमस्य विधानम्?

**नारकादिसंख्येयासंख्येयानन्तप्रकारो जीवः॥१३॥** नारकादयः संख्येयाः असंख्येया अनंतप्रकारा भिद्यन्ते जीवस्य।

**तथेतरेषामागमाविरोधान्निर्देशादिवचनम्॥१४॥** तेनैव प्रकारेणागमाविरोधेनेतरेषाम-जीवादीनां निर्देशादयो वक्तव्याः। तद्यथा - अजीवस्तावद्दशप्राणपर्यायरहितः, नामादिश्चा-जीवात्मैव, अजीवस्य स्वामी जीवो वा भोक्तृत्वात्। पुद्गलानामणुत्वादिसाधनं भेदादि, तन्निमित्तं वा कालादि। धर्माधर्मकालाकाशानां गतिस्थितिवर्तनावगाहहेतुता पारिणामिकी, अगुरुलघुगुणानुगृहीता स्वात्मभूतसत्तासम्बद्धा जीवपुद्गला वा। तदपेक्षत्वाद् गत्यादि-हेतुताऽभिव्यक्तेः। स्वात्मैवाधिकरणं सर्वद्रव्याणां स्वात्मव्यवस्थितत्वात्। आकाशं साधारणमसाधारणं च घटादिर्जलादीनाम्। स्थितिर्द्रव्यापेक्षानाद्यवसाना, पर्यायापेक्षा समयादिका। विधानं धर्मादित्रिकं प्रतिनियतानादिपारिणामिकद्रव्यार्थादेशादेकैकं पर्याया-र्थिकनयादेशादनेकम्। संख्येयासंख्येयानन्तानां द्रव्याणां गतिस्थित्यवगाहनाद्युपकार-पर्यायादेशात्स्यादेकं स्यादनेकं स्यात्संख्येयं स्यादसंख्येयं स्यादसंख्येयं स्यादनन्तम्। कालः संख्येयोऽसंख्येयोऽनन्तश्च भवति परप्रत्ययात्। पुद्गलद्रव्यं रूपस्पर्शादिपारिणा-मिकद्रव्यार्थादेशात्स्यादेकं प्रतिनियतैकानेकसंख्येयासंख्येयानंतप्रदेशपर्यायादेशात्स्यादनेकं स्यात्संख्येयं स्यादसंख्येयं स्यादनन्तम्।

आस्रवनिर्देशः – कायवाङ्मनःक्रियापरिणामो नामादिर्वा। जीवोऽस्य स्वामी, कर्म वा तन्निमित्तत्वात्। स्वात्मैव साधनम् शुद्धस्य तदभावात्। कर्म वा सति तस्मिन्प्रवृत्तेः। अधिकरणमात्मैव तत्र तत्फलदर्शनात्। कर्मणि कर्मकृते च कायादावुपचारतः। स्थितिर्वाङ्मनसास्रवयोर्जघन्येनैकसमयः, उत्कर्षेणान्तर्मुहूर्तः। कायास्रवस्य जघन्येनान्त-र्मुहूर्त; उत्कर्षेणानन्तकालः। असंख्येयाः पुद्गलपरिवर्ताः। विधानं वाङ्मनसास्रवयोश्चतु-र्विकल्पसंख्यं सत्यमृषोभयानुभयभेदात्। कायास्रवः

सप्तविधः औदारिकवैक्रियिकाहारक-मिश्रकार्माणभेदात्। औदरिकौदारिकमिश्रकौ मनुष्यतिरश्चाम्। वैक्रियिकवैक्रियिकमिश्रकौ देवनारकाणाम्। आहारकाहारकमिश्रकौ संयतानामृद्धिप्राप्तानाम्। कार्मणकायास्रवो विग्रहा-पन्नानां केवलिनां वा समुद्घातगतानाम्। अथवा आस्रवस्य प्रकारः शुभाशुभः। तत्र कायिको हिंसानृतस्तेयाब्रह्मादिषु प्रवृत्तिनिवृत्तिसंज्ञः। वाचिकः परुषाक्रोशपिशुनपरोप-घातादिषु वचस्सु प्रवृत्तिनिवृत्तिसंज्ञः। मानसो मिथ्याश्रुत्यभिघातेर्ष्यासूयादिषु मनसः प्रवृत्तिनिवृत्तिसंज्ञः।

बंधनिर्देशः जीवकर्मप्रदेशान्योन्यसश्लेषो बन्धः, नामादिर्वा। स जीवस्य त तत्फलदर्शनात्, कर्मणश्च तस्य द्विष्ठत्वात्। मिथ्यादर्शनाविरतिप्रमादकषाययोगाः बन्धस्य साधनं, तत्परिणतो वाऽऽत्मा। स्वामिसंबन्धार्हमेव वस्त्वधिकरणं भवति, विवक्षातः कारकप्रवृत्तेः। स्थितिर्जघन्योत्कृष्टा च। तत्र जघन्या वेदनीयस्य द्वादशमुहूर्ता। नामगोत्रयोरष्टौ। शेषाणामन्तर्मुहूर्ताः। उत्कृष्टा ज्ञानदर्शनावरणवेदनीयान्तरायाणां त्रिंशत्सागरोपमकोटीकोट्यः। मोहनीयस्य सप्ततिः। नामगोत्रयोर्विंशतिः। त्रयस्त्रिंशत्सागरो-पमाण्यायुषः। अथवा बन्धसन्तानपर्यायादेशात्स्यादनादिरनिधनश्चाभव्यानाम्। भव्यानां च केषाञ्चिद्येऽनन्तेनापि कालेन न सेत्स्यन्ति। ज्ञानावरणादिकर्मोत्पादविनाशात्स्यात्सादि; सनिधनश्च। विधानम् – बन्धः सामान्यादेशात्स्यादेकः। द्विविधः शुभाशुभभेदात्। त्रिधा द्रव्यभावोभयविकल्पात्। चतुर्धा प्रकृतिस्थित्यनुभागप्रदेशभेदात्। पञ्चधा मिथ्यादर्शनादि-हेतुभेदात्। षोढा नामस्थापनाद्रव्यक्षेत्रकालभावैः। सप्तधा तेरेव भवाधिकैः। अष्टधा ज्ञानावरणादिमूलप्रकृतिभेदात्। एवं संख्येया असंख्येया अनंतविकल्पाश्च भवन्ति हेतुफलभेदात्।

संवरनिर्देश आस्रवनिरोधः, नामादिर्वा जीवोऽस्य स्वामी, कर्म वा निरुध्य-मानविषयत्वात्। निरोधस्य साधनं गुप्तिसमितिधर्मादयः। स्वामिसंबन्धार्हमेवाधि-करणमित्युक्तं। स्थितिर्जघन्येनान्तर्मुहूर्ता। उत्कृष्टा पूर्वकोटीदेशोना। विधानमेका दिरष्टोत्तरशतविधस्ततत उत्तरश्च संख्येयादिविकल्पो निरोध्यनिरोधकभेदाद्वेदितव्यः। तत्राष्टोत्तरशतविध उच्यते – तिस्रो गुप्तयः। पंच समितयः। धर्मो दशविधः। अनुप्रेक्षा द्वादश। परीषहाः द्वाविंशतिः। तपो द्वादशविधम्। प्रायश्चितं नवविधम् विनयश्चतुर्विधः। वैयावृत्यं दशविधम् स्वाध्यायः पंचविधः। व्युत्सर्गो द्विविधः। धर्मध्यानं दशविधम्। शुक्लध्यानं चतुर्विधमिति।

निर्जरानिर्देशो-यथाविपाकात्तपसो वा, उपभुक्तवीर्यं कर्म निर्जरा, नामादिर्वा, सा आत्मनः कर्मणो वा द्रव्यभावभेदात्। साधनं तपो यथाकर्मविपाकश्च। अधिकरणमात्मा निर्जरात्मैव वा। स्थितिर्जघन्येनैक समय उत्कर्षेणान्तर्मुहूर्तः सादिः सपर्यवसाना वा। विधानं सामान्यादेका निर्जरा। द्विविधा यथाकालौपक्रमिकभेदात्। अष्टधा मूलकर्मप्रकृति-भेदात्। एवं संख्योसंख्येयानंतविकल्पा भवन्ति कर्मरसनिर्हरणभेदात्।

मोक्षनिर्देशः- कृत्स्नकर्मसंक्षयो मोक्षः, नामादिर्वा तस्य स्वामी परमात्मा मोक्षात्मैव वा। साधनं सम्यग्दर्शनज्ञानचारित्राणि। स्वामिसंबन्धार्हमेवाधिकरणं तद्विषयत्वात्। स्थितिस्तस्य सादिरनिधना। विधानम्, सामान्यादेको मोक्षः। द्रव्यभाव-मोक्तव्यभेदादनेकोऽपि।

सम्यग्दर्शननिर्देशः – तत्त्वार्थश्रद्धानं सम्यग्दर्शनं नामादिर्वा। तत्पुनरात्मनः स्वस्यैव वा। दर्शनमोहोपशमादि साधनम्, बाह्यं चोपदेशादि, स्वात्मा वा। स्वामिसंबन्धभागेवाधिकरणम्। स्थितिर्जघन्येनान्तर्मुहूर्ता उत्कर्षेण षट्षष्ठिसागरोपमाणि सातिरेकाणि। अथवा सादिसनिधनमौपशमिकक्षायोपशमिकं साद्यनिधनं क्षायिकम्।

विघानं सामान्यादेकं द्विधा निसर्गजाधिगमजभेदात्। त्रिधौपशमिकक्षयिक-क्षायोपशमिकविकल्पात्। एवं संख्येयाऽसंख्येयाऽनन्तविकल्पं च भवत्यध्यवसानभेदात्।

ज्ञाननिर्देश:– जीवादितत्त्वप्रकाशनं ज्ञानं नामादिर्वा। तदात्मनः स्वाकारस्य वा। ज्ञानावरणादिकर्मक्षयोपशमादि साधनं। स्वाविर्भावशक्तिर्वा। अधिकरणमात्मा स्वाकारो वा तत्र प्रतिष्ठानात्। स्थितिः– सादिसनिधनं क्षायोपशमिकं ज्ञानं चतुर्विकल्पम्। साद्यनिधनं क्षायिकम्। विधानं सामान्यादेकं ज्ञानम्। प्रत्यक्षपरोक्षभेदाद् द्विघा। द्रव्यगुण-पर्यायविषयभेदात् त्रिधा। नामादिविकल्पाच्चतुर्धा। मत्यादिभेदात्पञ्चधा। इत्येवं संख्येयासंख्येयानन्तविकल्पं च भवति ज्ञेयाकारपरिणतिभेदात्।

चारित्रनिर्देशः - कर्मादानकारणनिवृत्तिश्चारित्रं। नामादिर्वा। तत्पुनरात्मनः स्वरूप-स्य वा। चारित्रमोहोपशमादि साधनं स्वशक्तिर्वा। स्वामिसंबंधभागेवाधिकरणम्। स्थितिर्जघन्येनान्तर्मुहूर्ता उत्कर्षेण पूर्वकोटीदेशोना। अथवा सादि सपर्यवसानमौपशमि-कक्षायोपशमिकम् साद्यपर्यवसानं क्षायिकम् शुद्धिव्यक्त्यपेक्षया। विधानम् सामान्या-देकम्। द्विविधा बाह्याभ्यंतरनिवृत्तिभेदात्। त्रिधौपशमिकक्षायिकक्षायोपशमिकविकल्पात्। चतुर्धा चतुर्यमभेदात्। पञ्चधा सामायिकादिविकल्पात्। इत्येवं संख्येयासंख्येयानंत-विकल्पं च भवति परिणामभेदात्।

किमेतैरेव जीवादीनामधिगमो भवत्युतान्योप्यधिगमोपायोस्तीति परिपृष्टोऽ-स्तीत्याह –

## सत्संख्याक्षेत्रस्पर्शनकालान्तरभावाल्पबहुत्वैश्च॥८॥

अधिगम इत्यनुवर्तते।

**प्रशंसादिषु सच्छब्दवृत्तेरिच्छातः सद्भावग्रहणम्॥१॥** सच्छब्दः प्रशंसादिषु वर्तते तद्यथा – प्रशंसायां तावत् ''सत्पुरुषः सदश्वश्चेति''। क्वचिदस्तित्वे सन् घटः सन् पटः इति। क्वचित्प्रतिज्ञायमाने ''प्रव्रजितः सन् कथमनृतंब्रूयात्, प्रव्रजित इति प्रतिज्ञायमान इत्यर्थः''। क्वचिदादरे ''सत्कृत्यातिथीन् भोजयतीति' आदृत्येत्यर्थः। तत्रेहेच्छातः सद्भावो गृह्यते।

**अव्यभिचारात्सर्वमूलत्वाच्च तस्यादौ वचनम्॥२॥** सत्त्वं ह्यव्यभिचारि सर्वपदार्थ-विषयत्वात्, नहि कश्चित्पदार्थः सत्तां व्यभिचरति, यदि व्यभिचरेद्वाग्विज्ञानगोचरातीतः स्यात्। गुणास्तु रूपादयो ज्ञानादयश्च केषुचित्सन्ति केषुचिन्न सन्ति। क्रिया च परिस्पन्दात्मिका जीवपुद्गलेष्वस्ति नेतरेष्विति न व्याप्तिमती। सर्वेषां च विचारार्हाणा-मस्तित्वं मूलम्। तेन हि निश्चितस्य वस्तुन उत्तरा चिन्ता युज्यते अतस्तस्यादौ वचनं क्रियते।

**सतः परिणामोपलब्धेः संख्योपदेशः॥३॥** सतो हि वस्तुनः संख्यातासंख्याता-ऽनन्तपरिणामोपलब्धेः संख्यातादन्यतमपरिणामावधारणार्थं संख्या भेदलक्षणोपदिश्यते।

**निर्ज्ञातसंख्यस्य निवासविप्रतिपत्तेः क्षेत्राभिधानम्॥४॥** निश्चयेन ज्ञातसंख्यस्यार्थ-स्योर्ध्वाधस्तिर्यग्निवासविप्रतिपत्तेरूर्ध्वाद्यन्यतमनिवासनिश्चयार्थं क्षेत्राभिधानम्।

**अवस्थाविशेषस्य वैचित्र्यात्त्रिकालविषयोपश्लेषनिश्चयार्थं स्पर्शनम्॥५॥** अवस्थावि-शेषो विचित्रः त्र्यस्रचतुरस्रादिस्तस्य त्रिकालविषयमुपश्लेषणं स्पर्शनम्। कस्य–चित्तत्क्षेत्रमेव स्पर्शनं कस्यचिद्द्रव्यमेव कस्यचिद्रज्जवः षडष्टौ वेति। एकसर्वजीवसन्निधौ तन्निश्चयार्थं तदुच्यते।

**स्थितिमतोऽवधिपरिच्छेदार्थं कालोपादानम्॥६॥** स्थितिमतोऽर्थस्यावधिःपरिच्छेत्तव्य इति कालोपादानं क्रियते।

**अन्तरशब्दस्यानेकार्थवृत्तेश्छिद्रमध्यविरहेष्वन्यतमग्रहणम्॥७॥** वहुष्वर्थेषु दृष्टः प्रयोगः। क्वचिच्छिद्रे वर्तते 'सान्तरं काष्ठं सच्छिद्रमिति'। क्वचिदन्यत्वे 'द्रव्याणि द्रव्यान्तरमारभन्त' इति क्वचिन्मध्ये हिमवत्सागरान्तर इति। क्वचित्सामीप्ये ''स्फटिकस्य शुक्लरक्ताद्यन्तरस्थस्य तद्वर्णतेति शुक्लरक्तसमीपस्थस्येति गम्यते। क्वचिद्विशेषे''–

**''वाजिवारणलोहानां काष्ठपाषाणवाससां।**
**नारीपुरुषतोयानामन्तरं महदन्तरम्''॥**

इति महान् विशेष इत्यर्थः। क्वच्द्बिहिर्योगे ''ग्रामस्यान्तरे कूपा' इति क्वचिदुपसंख्याने ''अन्तरे शाटका' इति। क्वचिद्विरहेऽनभिप्रेतश्रोतृजनान्तरे मन्त्रं मन्त्रयते। तद्विरहे मन्त्रयत इत्यर्थः। तत्रेह छिद्रमध्यविरहेष्वन्यतमो वेदितव्यः।

**अनुपहतवीर्यस्य न्यग्भावे पुनरुद्भूतिदर्शनात्तद्वचनम्॥८॥** अनुपहतवीर्यस्य द्रव्यस्य निमित्तवशात्कस्य चित्पर्यायस्य न्यग्भावे सति पुनर्निमित्तान्तरात्तस्यैवाऽऽविर्भावदर्शना-त्तदन्तरमित्युच्यते॥

**परिणामप्रकारनिर्णयार्थं भाववचनम्॥९॥** औपशमिकादिः परिणामप्रकारो निर्णेतव्य इति भाववचनं क्रियते।

**संख्यातादयन्यतमनिश्चयेऽप्यन्योन्यविशेषप्रतिपत्त्यर्थमल्पबहुत्ववचनम्॥१०॥** संख्यातादिष्वन्यतमेन परिणामेन निश्चितानामन्योन्यविशेषप्रतिपत्त्यर्थमल्पबहुत्ववचनं क्रियते। इमे एभ्योऽल्पा इमे बहव इति। आह –

**निर्देशवचनात्सत्त्वप्रसिद्धेरसद्ग्रहणम्॥११॥** निर्देशवचनादेव सत्त्वं सिद्धं न ह्यसतो निर्देश इति तस्मादसद्ग्रहणम्। अनर्थकं सद्ग्रहणमसद्ग्रहणम्।

**न वा क्वास्ति क्व नास्तीति चतुर्दशमार्गणास्थानविशेषणार्थत्वात् ॥१२॥** न वैष दोषः, किं कारणं नानेन सम्यग्दर्शनादेः सामान्येन सत्त्वमुच्यते किन्तु गतीन्द्रिय-कायादिषु चतुर्दशसु मार्गणास्थानेषु क्वास्ति सम्यग्दर्शनादि क्व नास्तीत्येवं विशेषणार्थं सद्वचनम्।

**सर्वभावाधिगमहेतुत्वाच्च॥१३॥** अधिकृतानां सम्यग्दर्शनादीनां जीवादीनां च निर्देशवचने नास्तित्वमधिगतं स्यात्, ये त्वनधिकृता जीवपर्यायाः क्रोधादयो ये वाऽजीवपर्याया वर्णादयो घटादयश्च तेषामस्तित्वाधिगमार्थं पुनर्वचनम्।

**अनधिकृतत्वादिति चेन्न सामर्थ्यात् ॥१४॥** स्यादेतदनधिकृतास्ते ततो न पुनर्युक्तमेषां ग्रहणमिति। तन्न किं कारणं सामर्थ्यात् तेषामपि ग्रहणं भवति।

**विधानग्रहणात् संख्यासिद्धिरिति चेन्न भेदगणनार्थत्वात्॥१५॥** स्यादेतत् विधानग्रहणादेव संख्यासिद्धिरिति। तन्न किं कारणम् भेदगणनार्थत्वात्। प्रकारगणनं हि तत्। भेदगणनार्थमिदमुच्यते। उपशमसम्यग्दृष्टय इयन्तः. क्षायिकसम्यग्दृष्टय एतावन्तः इति।

**क्षेत्रादिकरणयोरभेद इति चेन्नोक्तत्वात् ॥१६॥** स्यादेतद्यदेवाधिकरणं तदेव क्षेत्रम्, अतस्तयोरभेदात्पृथग्ग्रहणमनर्थकमिति। तन्न किं कारणं उक्तार्थत्वादुक्तमेतत् सर्वभावा-धिगमार्थत्वादिति।

**क्षेत्रे सति स्पर्शनोपलब्धेरम्बुघटवत्पृथग्ग्रहणम्॥१७॥** यथेह सति घटे क्षेत्रेऽम्बुनो-ऽवस्थानात्तन्नियमाद्घटस्पर्शनं, न ह्येतदस्ति - घटेऽम्बु अवतिष्ठते, न च घटं

स्पृशतीति। तथाकाशक्षेत्रे जीवानवस्थानां नियमादाकाशे स्पर्शनमिति क्षेत्राभिधानेनैव स्पर्शनस्यार्थ-गृहीतत्वात्पृथग्गृहणमनर्थकम्।

**न वा, विषयवाचित्वात्॥१८॥** न वैष दोषः किं कारणम्? विषयवाचित्वात्। विषयवाची क्षेत्रशब्दः। यथा राजा जनपदक्षेत्रेऽवतिष्ठते, न च कृत्स्नं जनपदं स्पृशति। स्पर्शनं तु कृत्स्नविषयमिति।

**त्रैकाल्यगोचरत्वाच्च॥१९॥** यथा साम्प्रतिकेनाम्बुना साम्प्रतिकं घटक्षेत्रे स्पृष्टं नातीतानागतम्। नैवमात्मनः सांप्रतिकक्षेत्रस्पर्शने स्पर्शनाभिप्रायः। स्पर्शनस्य त्रिकाल-गोचरत्वात्।

**स्थितिकालयोरर्थान्तरत्वाभाव इति चेन्न मुख्यकालास्तित्वसंप्रत्ययार्थम्॥२०॥** स्यादेतत् – स्थितिरेव कालः काल एव च स्थितिरित्यतो नास्त्यनयोरर्थान्तरभाव इति। तन्न किं कारणम्? मुख्यकालास्तित्वसंप्रत्ययार्थं पुनः कालग्रहणम्। द्विविधो हि कालो मुख्यो व्यावहारिकश्चेति। तत्र मुख्यो निश्चयकालः। पर्यायिपर्यायावधिपरिच्छेदो व्यावहारिकस्तयोरुत्तरत्र निर्णयो वक्ष्यते।

**उक्तञ्च॥२१॥** किमुक्तम्? सर्वभावाधिगमहेतुत्वादिति।

**नामादिषु भावग्रहणात्पुनर्भावाग्रहणमिति चेन्नौपशमिकाद्यपेक्षत्वात्॥२२॥** स्यादेतन्नामादिषु भावग्रहणं कृतं तेनैव सिद्धत्वात्पुनर्भावग्रहणमनर्थकमिति तन्न किं कारणम्? औपशमिकाद्यपेक्षत्वात्। पूर्वं भावग्रहणं द्रव्यं न भवतीत्येवं परम्। इदं त्वौपशमिकादिवक्ष्यमाणभावापेक्षम्। किं सम्यग्दर्शनमौपशमिकं क्षायिकमित्यादि।

**विनेयाशयवशो वा तत्त्वाधिगमहेतुविकल्पः॥२३॥** अथवा सर्वेषामेव परिहारः विनेयाशयवशो हि तत्त्वाधिगमहेतुविकल्पो वेदितव्यः। केचित्संक्षेपेण प्रतिपाद्याः

केचिद्विस्तरेण केचिदनतिसंक्षेपेण केचिदनतिविस्तरेण। इतरथा हि प्रमाणग्रहणादेव सिद्धेरितरेषामधिगमोपायानां ग्रहणमनर्थकं स्यादिति।

इति तत्त्वार्थवार्तिके व्याख्यानाङ्कारे प्रथमेऽध्याये पंचममाह्निकं समाप्तम्॥५॥

एवं सम्यग्दर्शनस्यादावुद्दिष्टस्य लक्षणोत्पत्तिस्वामिविषयन्यासाधिगमोपायाः निर्दिष्टास्तत्संबन्धेन च जीवादीनां संज्ञापरिणामादि निर्दिष्टं तदनन्तरमिदानीं सम्यग्ज्ञानं विचारार्हमित्याह –

## मतिश्रुतावधिमनःपर्ययकेवलानि ज्ञानम्॥९॥

मत्यादय इति क एते शब्दाः?

**मतिशब्दो भावकर्तृकरणसाधनः॥१॥** अयं मतिशब्दो भावकर्तृकरणेष्वन्यतमसाधनो वेदितव्यः। मनेर्भावसाधने क्तिः। तदावरणकर्मक्षयोपशमे सतीन्द्रियानिन्द्रियापेक्षमर्थस्य मननं मतिः। औदासीन्येन तत्त्वकथनाद्बहुलापेक्षया कर्तृसाधनः करणसाधनो वा, मनुतेऽर्थान् मन्यतेऽनेनेति वा मतिः भेदाभेदविवक्षोपपत्तेः।

**श्रुतशब्दः कर्मसाधनश्च॥२॥** किञ्च पूर्वोक्तविषयसाधनश्चेति वर्तते। श्रुतावरणक्षयोपशमाद्यन्तरङ्गबहिरङ्गहेतुसन्निधाने सति श्रूयते स्मेति श्रुतम्। कर्तरि श्रुतपरिणत आत्मैव शृणोतीति श्रुतम्। भेदविवक्षायां श्रूयतेऽनेनेति श्रुतं श्रवणमात्रं वा।

**अवपूर्वस्य दधातेः कर्मादिसाधनः किः॥३॥** कर्मादिषु साधनेष्वन्यतमे किरयं वेदितव्यः। अवधिज्ञानावरणक्षयोपशमाद्युभयहेतुसन्निधाने सत्यवाग् धीयतेऽवाग्दधात्यवाग्धानमात्रं वाऽवधिः। अवशब्दोऽधःपर्यायवचनः, यथाऽधःक्षेपणमवक्षेपणं, इत्यधोगतभूयोद्रव्यविषयो ह्यवधिः। अथवावधिर्मर्यादा, अवधिना प्रतिबद्धं ज्ञानमवधिज्ञानम् तथाहि

- वक्ष्यते रूपिष्ववधेरिति। सर्वेषां प्रसङ्ग इति चेन्न रूढिवशाद् व्यवस्थोपपत्तेर्गो-शब्दप्रवृत्तिवत्।

**मनः प्रतीत्य प्रतिसन्धाय वा ज्ञानं मनःपर्ययः॥४॥** तदावरणकर्मक्षयोपशमा-दिद्वितयनिमित्तवशात्परकीयमनोगतार्थज्ञानं मनःपर्ययः। भावादिसाधनत्वं पूर्ववद्वेदि-तव्यम्। कथं मनः प्रतीत्य प्रतिसन्धाय वा ज्ञानमित्यत्रोच्यते - परकीयमनसि गतोऽर्थो मन इत्युच्यते तात्स्थ्यात्ताच्छब्द्यमिति। स च कः मनोगतोऽर्थो भावघटादिस्तमर्थं समन्तादेत्यावलम्ब्य वा स्वप्रसादादात्मनो ज्ञानं मनःपर्ययः।

**मतिज्ञानप्रसङ्ग इति चेन्नापेक्षामात्रत्वात्॥५॥** स्यादेतन्मनःपर्ययज्ञानं मतिज्ञानं प्राप्तं कुतो मनोनिमित्तत्वादेवं ह्यार्षी प्रक्रिया मनसा मनः सम्परिचिन्त्येति। तन्न किं कारणमपेक्षामात्रत्वात् स्वपरमनोऽपेक्षामात्रं तत्र क्रियते यथाऽभ्रे चन्द्रमसं पश्येति। न तत्कार्यं मतिज्ञानवत्। आत्मशुद्धिनिमित्तत्वादेतस्येति।

**बाह्याभ्यन्तरक्रियाविशेषान् यदर्थं केवन्ते तत्केवलम्॥६॥** तपःक्रियाविशेषान् वाङ्मनसकायाश्रयान् बाह्यानभ्यन्तरांश्च यदर्थमर्थिनः केवन्ते सेवन्ते तत्केवलम्

**अव्युत्पन्नो वाऽसहायार्थः केवलशब्दः॥७॥** यथा केवलमन्नं भुङ्क्ते देवदत्त इति। असहायं व्यंजनरहितं भुङ्क्ते इति गम्यते। तथा क्षायोपशमिकज्ञानासंपृक्तमसहायं केवलमित्यव्युत्पन्नोयं शब्दो दृष्टव्यः।

**करणादिसाधनो ज्ञानशब्दो व्याख्यातः॥८॥** अयं ज्ञानशब्दः करणादिसाधन इति व्याख्यातः पुरस्तात्।

**इतरेषां तदभावः॥९॥** इतरेषामेकान्तवादिनां तस्य ज्ञानस्य करणादिसाधनत्वं नोपपद्यते। तत्कथमिति चेदुच्यते –

**आत्माभावे ज्ञानस्य करणादित्वानुपपत्तिः कर्तुरभावात्॥१०॥** येषामात्मा न विद्यते तेषां ज्ञानस्य करणादित्वं नोपपद्यते, कुतः? कर्तुरभावात्। सति हि देवदत्ते छेत्तरि परशोः करणत्वं दृष्टम्। तथा चात्मन्यसति नास्य करणत्वम्। तत एव भावसाधनत्वमपि नोपपद्यते, ज्ञातिर्ज्ञानमिति। न ह्यसति भाववति भाव इति।

स्यादेतज्जानातीति ज्ञानमिति कर्तृसाधनत्वमिति तन्न निरीहकत्वात्। न हि निरीहको भावः कर्तृत्वमास्कन्दति निरीहकाश्च सर्वे भावाः।

किञ्च, पूर्वोत्तरापेक्षस्य लोके कर्तृत्वं दृष्टम्। न च तस्य ज्ञानस्य पूर्वोत्तरापेक्षास्ति क्षणिकत्वादतो निरपेक्षस्य कर्तृत्वाभावः।

किञ्च, करणव्यापारापेक्षस्य लोके कर्तृत्वं दृष्टम्। न च ज्ञानस्यान्यत्करणमस्ति। अतोऽस्य कर्तृत्वमपि नोपपद्यते। स्वशक्तिरेव करणमिति चेन्न। शक्तिशक्तिमद्भेदाभ्युपगमे आत्मास्तित्वसिद्धेः। अभेदे च स दोषस्तदवस्थ एवेति। सन्तानापेक्षया कर्तृकरणभेदोपचार इति चेन्न परमार्थविपरीतत्वे मृषावादोपपत्तेः; भेदाभेदविकल्पनयोरुक्त-दोषप्रसंगाच्च। मनश्चेद्रियं चास्य करणमिति चेन्न तस्य तच्छक्त्यभावात्। मनस्तावन्न करणं विनष्टत्वात् षण्णामनन्तरातीतं विज्ञानं यद्धि तन्मन इति वचनान्नेन्द्रियमप्यतीतं तत एव। नाप्युपजायमानस्य करणत्वम्। नहि सव्यविषाणं युगपदुपजायमानमितरस्य विषाणस्य करणं भवति।

किञ्च, प्रकृत्यर्थादन्यस्याभावात् 'ज्ञा' इत्यस्याः प्रकृतेरवबोधनमर्थो न तस्मादन्यः कश्चिदर्थोऽस्ति यः कर्तृत्वमनुभवेदतोऽस्य कर्तृत्वाभावः।

किञ्च, एकक्षणविषयं यत्कर्तृत्वं, तदनेकक्षणगोचरोच्चारणलब्धजन्मना कर्तृ-शब्देन कथमुच्यते? कथं वाऽयमेकक्षणेऽसन्वाचकः स्यात्। सन्तानावस्थाना-द्वाच्यवाचकभावसंबन्ध इति चेन्न तस्य प्रतिविहितत्वात्। अथ मतेमतत्- खात्पतिता

नो रत्नवृष्टिः; अवाच्यमेव हि तत्त्वमिष्यते। अव्यापारेषु हि सर्वधर्मेषु वाग्व्यवहारो नास्त्येवेति, तदपि नोपपद्यते। स्ववचनविरोधात्, तत्त्वप्रतिपत्त्युपायापह्नवप्रसंगाच्च।

किञ्च, जानातीति ज्ञानमिति कर्तृसाधनत्वं नोपपद्यते। कुतः? विशेषानुपलब्धेः। येन हि कर्तृसाधनत्वमवगतम्। करणादिसाधनत्वंच तेनेदं युज्यते वक्तुं कर्तृसाधनमिदं न करणादिसाधनमिति। न च क्षणिकवादिनः प्रत्यर्थवशवर्तिज्ञानविकल्पनाया-मनवधारितोभयस्वभावस्य तद्विशेषोपलब्धिरस्ति। न हि शुक्लेतरविशेषानभिज्ञस्य शुक्लमिदं न नीलादीति विशेषणमुपपद्यते।

**अस्तित्वेऽप्यविक्रियस्य तदभावोऽनभिसंबन्धात् ॥११॥** आत्मनः अस्तित्वेपि ज्ञानस्य करणाद्यभावः। कुतः? अनभिसंबन्धात्। यस्य मतमात्मनो ज्ञानाख्यो गुणस्तस्माच्चार्थान्तरभूतः, 'आत्मेन्द्रियमनोऽर्थसन्निकर्षात् यन्निष्पद्यते तदन्यदिति वचनादिति' तस्य ज्ञानं कारणं न भवितुमर्हति। कुतः?

**पृथगात्मलाभाभावात् ॥१२॥** दृष्टो हि लोके, छेत्तुर्देवदत्तादर्थान्तरभूतस्य परशो-स्तैक्ष्ण्यगौरवकाठिन्यादिविशेषलक्षणोपेतस्य सतः करणभावः। न च तथा ज्ञानस्य स्वरूपं पृथगुपलभामहे। किञ्च

**अपेक्षाभावात् ॥१३॥** दृष्टो हि परशोर्देवदत्ताधिष्ठितोद्यमननिपतनापेक्षस्य करणभावः। न च तथा ज्ञानेन किञ्चित्कर्तृसाध्यं क्रियान्तरं समपेक्ष्यमस्ति। किञ्च,

**तत्परिणामाभावात् ॥१४॥** छेदनक्रियापरिणतेन हि देवदत्तेन तत्क्रियायाः साचिव्ये, नियुज्यमानः परशुः करणमित्येतद्युक्तम्। न च तथाऽऽत्मा ज्ञानक्रियापरिणतः।

**अर्थान्तरत्वे तस्याज्ञत्वात् ॥१५॥** इह यज्ज्ञानादन्यद्भवति तदज्ञं दृष्टम्। यथा घटादिद्रव्यम्। तथा च ज्ञानादन्य आत्मा, इत्यज्ञत्वप्रसंगः। ज्ञानयोगाज्ज्ञत्वं, दृष्टत्वात् दण्डिवदिति चेन्न तत्स्वभावाभावे संबन्धनियमानुपपत्तिरिन्द्रियमनोवत्। ज्ञस्वभावाभावे

सत्यात्मन्येव योगो, न मनसेन्द्रियेण वेति नियमाभावः। युतसिद्धयोश्च दण्डदण्डिनोः संबन्धः, दण्डस्य च प्रसिद्धस्य सतो विशेषणमात्रत्वेनोपादानादात्मनश्च तदुत्पत्तौ हिताहितविचारणाविक्रियोपपत्तेरसाम्यम्। उभयोश्चाज्ञयोः संबन्धेऽप्यज्ञत्वप्रसङ्गो दृष्टत्वात्। जात्यन्धयोः संबन्धे दर्शनशक्त्यभाववत्।

किञ्च, इद्रियमनःप्रसंगाद्यदि ज्ञायतेऽनेन ज्ञानमिति करणमभ्युपगम्यते, तेनेन्द्रियाणां मनसश्च ज्ञानत्वप्रसङ्गः, विशेषाभावात्तैरपि ज्ञायत इति।

किञ्च, उभयोर्निष्क्रियत्वात्, सर्वगतस्य तावदात्मनः क्रिया नास्ति। नापि ज्ञानस्य। 'क्रियावत्वं द्रव्यस्यैव लक्षणमिति' वचनात्। ततः क्रियाविरहितस्य कथं कर्तृत्वं करणत्वं वा स्यात्।

यस्यापि मतम् – अनित्यगुणव्यतिरेकाच्छुद्धः पुरुषो नित्यश्च निर्विकारत्वादिति। तस्य ज्ञानं करणं न भवितुमर्हति। कुतः? अनभिसंबन्धात्। या बुद्धिरिन्द्रियमनोऽहंकार-महद्वृत्त्युपनीता लोचनसंकल्पाभिमानाध्यवसायरूपा सा प्रकृतिः। पुरुषः पुनरविक्रियः शुद्धश्च। तस्य सा करणं कथं स्यात्? क्रियापरिणतस्य हि देवदत्तस्य लोके करणसंप्रयोगो दृष्टः। इत्येवमादि योज्यम्। नापि कर्तृसाधनत्वं युज्यते। लोके हि करणत्वेन प्रसिद्धस्यासेः तत्प्रशंसापरायामभिधानप्रवृत्तौ समीक्षितायां तैक्ष्ण्यगौरवकाठिन्याहित-विशेषोऽयमेव, छिनत्तीति कर्तृधर्माध्यारोपः क्रियते। न च तथा ज्ञानं करणत्वेन प्रसिद्धमस्ति, पूर्वदोषोपपत्तेः। अतोस्य कर्तृत्वमयुक्तम्।

न च भावसाधनत्वमुपपत्तिमत्, अविक्रियस्य तत्परिणामाभावात्। विक्रियास्वभावस्य हि वस्तुनस्तंडुलादेः विक्लेदादिदर्शनात्, पचनं पाक इत्येवमादि भावनिर्देशो युक्तः नाकाशस्येति।

किञ्च, फलाभावात्। ज्ञानं हि प्रमाणमिष्टम्।प्रमाणेन च फलवता भवितव्यं, न चावबोधनमन्तरेण फलमन्यदुपलभ्यते। तस्मादन्येन ज्ञानेन भवितव्यं यस्मिन् सति सा ज्ञातिरवबोधः फलात्मनो भवति, तच्च नास्त्यतो न भावसाधनत्वम्। अधिगमश्चात्र न भावान्तरमिति, फले प्रामाण्योपचार इति चाऽयुक्तं मुख्याभावात्। आकारभेदात् फलप्रमाणपरिकल्पना चाऽयुक्ता। आकाराकारवतोर्भेदयोरनेकदोषोपपत्तेः। निर्विकल्पकत्वाच्च तत्त्वस्याऽऽकारकल्पनाभावः। बाह्यवस्त्वाकारापोहेऽन्तरङ्गाकारा-नुपपत्तिश्चेति। जैनेन्द्राणां तु परमर्षिसर्वज्ञप्रणीतनयभङ्गगहनप्रपञ्चविपश्चितां स्याद्वादप्रकाशोन्मीलित-ज्ञानचक्षुषामेकस्मिन्नप्यर्थेऽनेकपर्यायसंभवादुपपद्यते इति विमृष्टार्थमेव तत्।

**मत्यादीनां ज्ञानशब्देन प्रत्येकमभिसंबंधो भुजिवत्॥१६॥** यथा देवदत्तजिनदत्त-गुरुदत्ता भोज्यन्तामिति देवदत्तादीनां भुजिना प्रत्येकमभिसंबन्धो भवति। एवमिहापि प्रत्येकमभिसंबन्धः, मतिज्ञानं श्रुतज्ञानमवधिज्ञानं मनःपर्ययज्ञानं केवलज्ञानमिति। सत्यपि तत्सामानाधिकरण्ये उपात्तलिङ्गसंख्यात्वात्तल्लिङ्गसंख्योपादानं नास्तीत्युक्तं पुरस्तात्।

**स्वन्तत्वादल्पाच्तरत्वादल्पविषयत्वाच्च मतिग्रहणमादौ॥१७॥** मतिरित्येतत् पदं स्वन्तमल्पाक्षरं च, अवध्यादिभ्यो विषयश्चास्याल्पः, चक्षुरादीनां प्रतिनियतविषयत्वात्। तस्मादस्यादौ ग्रहणं क्रियते।

**तदनन्तरं श्रुतं तत्पूर्वकत्वात्॥१८॥** तत्पूर्वं हि श्रुतमिति वक्ष्यते। ततस्तदनन्तरं श्रुतं क्रियते। इतश्च –

**विषयनिबन्धनतुल्यत्वाच्च॥१९॥** 'मतिश्रुतयोर्निबन्धो द्रव्येष्वसर्वपर्यायेष्विति' वक्ष्यते। अतस्तत्तुल्यत्वाच्च तदनन्तरं श्रुतम्।

**तत्सहायत्वाच्च॥२०॥** यथा नारदपर्वतयोः सहायत्वात् यत्र नारदस्तत्र पर्वत; यत्र पर्वतस्तत्र नारदः परस्परापरित्यागात्, तथा मतिश्रुतयोः परस्परापरित्यागः – 'यत्र मतिस्तत्र श्रुतं यत्र श्रुतं तत्र मतिः' इति।

**प्रत्यक्षत्रयस्यादाववधिवचनं विशुद्ध्यभावात् ॥२१॥** सत्यपि मतिश्रुताभ्यां प्रत्यक्ष-त्वाद्विशुद्धत्वेऽवधेरौपदिष्टं प्रत्यक्षज्ञानमपेक्ष्यावधिर्न विशुद्धस्ततोऽस्य प्रागुपन्यासः।

**ततो विशुद्धतरत्वान्मनःपर्ययग्रहणम्॥२२॥** ततोऽवधेर्मनःपर्ययज्ञानं विशुद्धतरम्। किं कृतोस्य विशुद्धिप्रकर्षः? संयमगुणसन्निधानकृतः। अतोऽस्य तदनन्तरं ग्रहणम्।

**अन्ते केवलग्रहणं ततः परं ज्ञानप्रकर्षाभावात् ॥२३॥** सर्वेषां ज्ञानानां परिच्छेदने केवलसामर्थ्यादस्य चान्येन ज्ञानेनाऽपरिच्छेद्यत्वान्नातोऽन्यत्प्रकृष्टं ज्ञानमस्तीति, ततः परं ज्ञानप्रकर्षाभावात्।

**तेनैव सह निर्वाणाच्च॥२४॥** यतश्च केवलेनैव सह निर्वाणं न क्षायोपशमज्ञानैः सह, अतोऽन्ते केवलग्रहणम्। कश्चिदाह –

**मतिश्रुतयोरेकत्वं साहचर्यादेकत्रावस्थानाच्चाऽविशेषात् ॥२५॥** मतिश्रुतयोरेकत्वं प्राप्नोति कुतः साहचर्यादेकत्रावस्थानाच्चाऽविशेषात् ।

**नातस्तत्सिद्धेः॥२६॥** नाविशेषः। कुतः, अतस्तत्सिद्धिः। यत एव मतिश्रुतयोः साहचर्यमेकत्रावस्थानं चोच्यते। अत एव विशेषः सिद्धः। प्रतिनियतविशेषसिद्धयोर्हि साहचर्यमेकत्रावस्थानं च युज्यते। नान्यथेति।

**तत्पूर्वकत्वाच्च॥२७॥** 'मतिपूर्वं श्रुतमिति वक्ष्यते। ततश्चानयोर्विशेषः। यत्पूर्वं यच्च पश्चात्तयोः कथमविशेषः?

**तत एवाविशेषः, कारणसदृशत्वाद्युगपद्वृत्तेश्चेति चेन्नात एव नानात्वात् ॥२८॥** स्यादेतद्यतो मतिपूर्वकत्वमत एवाविशेषः। कुतः कारणसदृशत्वात् कार्यस्य। कथं? तन्तुपटवत्। यथा शुक्लादितन्तुकार्यं पटद्रव्यं, शुक्लादिगुणमेव। तथा मति-कार्यत्वाच्छ्रुतस्यापि मत्यात्मकत्वम्। युगपद्वृत्तेश्च। यथाग्नावौष्ण्यप्रकाशनयोर्युगपद्वृत्तेरग्न्यात्मकत्वम्। तथा सम्यग्दर्शनाविर्भावादनन्तरं युगपन्मतिश्रुतयोर्ज्ञानव्यपदेश इति। तन्न किं कारणम्? अत एव नानात्वात्। यत एव कारणसदृशत्वं युगपद्वृत्तिश्च चोद्यते। अत एव नानात्वं सिद्धम्। द्वयोः हि सादृश्यं युगपद्वृत्तिश्चेति।

**विषयाविशेषादिति चेन्न ग्रहणभेदात् ॥२९॥** स्यादेतद्विषयाविशेषात् मतिश्रुतयो-र्निबन्धो द्रव्येष्वसर्वपर्यायेष्विति। तन्न किं कारणं ग्रहणभेदात्। अन्यथा हि मत्या गृह्यतेऽन्यथा श्रुतेन। यो हि मन्यते विषयाभेदादविशेष इति तस्यैकघटविषयदर्शन-स्पर्शनाविशेषः स्यात्।

**उभयोरिन्द्रियानिन्द्रियनिमित्तत्वादिति चेन्न, असिद्धत्वात् ॥३०॥** स्यादेतदुभयोरि-न्द्रियानिन्द्रियनिमित्तत्वादेकत्वम्। मतिज्ञानं तावदिन्द्रियानिन्द्रियनिमित्तमिति प्रतीतम्। श्रुतमपि वक्तृश्रोतृजिह्वाश्रवणनिमित्तत्वाच्च तदुभयनिमित्तमिति। तन्न किं कारणमसिद्ध-त्वात्। जिह्वा हि शब्दोच्चारक्रियाया निमित्तं न ज्ञानस्य। श्रवणमपि स्वविषयमति-ज्ञाननिमित्तं न श्रुतस्येत्युभयनिमित्तत्वमसिद्धम्। सिद्धो हेतुः साध्यमर्थं साधयेन्नासिद्धः। किं निमित्तं तर्हि श्रुतम्?

**अनिन्द्रियनिमित्तोऽर्थावगमः श्रुतम् ॥३१॥** इन्द्रियानिन्द्रियबलाधानात्पूर्वमुपलब्धेऽर्थे नोइन्द्रियप्राधान्याद्यदुत्पद्यते ज्ञानं तत् श्रुतम्।

**ईहादिप्रसङ्ग इति चेन्नावग्रहीतमात्रविषयत्वात् ॥३२॥** स्यादेतदीहादीनामपि श्रुत-व्यपदेशः प्राप्तः, तेप्यनिन्द्रियनिमित्ता इति। तन्न किं कारणमवग्रहीतमात्रविषयत्वात्, इन्द्रियेणावग्रहीतोऽर्थस्तन्मात्रविषया ईहादयः। श्रुतं पुनर्न तद्विषयम् । किं विषयं तर्हि श्रुतम्? अपूर्वविषयम्, एकं घटमिन्द्रियानिन्द्रियाभ्यां निश्चित्याऽयं घट इति तज्जातीय-मन्यमनेकदेशकालरूपादिविलक्षणमर्पूवमधिगच्छति यत्तच्छ्रुतम्।

**नानाप्रकारार्थप्ररूपणपरं यत्तद्वा श्रुतम् ॥३3॥** अथवा इन्द्रियानिन्द्रियाभ्यामेकं जीवमजीवं चोपलभ्य तत्र सत्संख्याक्षेत्रस्पर्शनकालान्तरभावाल्पबहुत्वादिभिः प्रकारैरर्थ-प्ररूपणे कर्तव्ये यत्समर्थं तच्छ्रुतम्।

**श्रुत्वाऽवधारणाच्छ्रुतमिति चेन्न मतिज्ञानप्रसङ्गात् ॥३४॥** श्रुत्वा यदवधारयति तच्छ्रुतमिति केचिन्मन्यन्ते। तन्न युक्तम्। कुतः? मतिज्ञानप्रसङ्गात् । तदपि शब्दं श्रुत्वा गोशब्दोऽयमिति प्रतिपद्यतेऽसाधारणेन नाम लक्षणेन भवितव्यम् । श्रुतं पुनस्त स्मिन्निन्द्रियानिन्द्रियगृहीतपर्यायसमूहात्मनि शब्दे तदभिधेये च श्रोत्रेन्द्रियव्या-पारमन्तरेण जीवादौ नयादिभिरधिगमोपायैर्याथात्म्येनाऽवबोधः।

प्रमाणनयैरधिगम इत्युक्तम्। प्रमाणं च केषांचिज्ज्ञानमभिमतं केषांचित्सन्निकर्ष इत्यतोऽधिकृतानामेव मत्यादीनां प्रमाणत्वख्यापनार्थमाह –

## तत्प्रमाणे ॥१०॥

**प्रमाणशब्दस्य कोर्थः?**

**भावकर्तृकरणत्वोपपत्तेः प्रमाणशब्दस्येच्छातोऽर्थाध्यवसायः ॥१॥** अयं प्रमाणशब्दः, भावे कर्तरि करणे च वर्तते। तत्र भावे तावत्प्रमेयार्थं प्रति निवृत्तव्यापारस्य तत्त्वकथनात् प्रमा प्रमाणमिति। कर्तरि प्रमेयार्थं प्रति

प्रमातृत्वशक्तिपरिणतस्याश्रितत्वात् प्रमिणोति प्रमेयमिति प्रमाणम्। करणे प्रमातृप्रमेययोः प्रमाणप्रमेययोश्च स्यादन्यत्वात् प्रमिणोत्यनेनेति प्रमाणम्॥

**अनवस्थेति चेन्न दृष्टत्वात्प्रदीपवत् ॥२॥** स्यान्मतमिदमिह संप्रधार्यम्। प्रमाणसिद्धिः परतो वा स्यात्स्वत एव वेति? यदि यथा प्रमेयसिद्धिः प्रमाणाधीना एवं प्रमाणसिद्धिरपि प्रमाणान्तराधीनेति; तस्याप्यन्यत् तस्याप्यन्यदित्यनवस्था। अथ स्वत एव सिद्धिः। एवमपि यथा प्रमाणस्य स्वत एव सिद्धिस्तथा प्रमेयस्यापि प्रमेयात्मन एव सिद्धिरिति प्रमाणव्यस्थाकल्पना न घटते। इच्छामात्रविशेषहेतुवचनं चेति। तन्न किं कारणं दृष्टत्वात्प्रदीपवत्। दृष्टो हि प्रदीपो घटादीनां प्रकाशकः स्वस्य च। तथा प्रमाणमपीति। अथवाऽयमपरोऽर्थः - यदि भावकर्तृकरणानामन्यतमसाधनः प्रमाणशब्दः; अनवस्था प्राप्नोति न ह्येकस्मिन्नर्थात्मनि विरुद्धशक्त्यवस्थानमिति। तन्न किं कारणम्? दृष्टत्वात्, प्रदीपवत्। यथैकस्य प्रदीपस्य, प्रदीपनं, प्रदीपयति, प्रदीप्यतेऽनेनेति वा, भावादिशक्त्यविरोधः। तथा प्रमाणस्यापीति।

**इतरथा हि प्रमाणव्यपदेशाभावः॥३॥** यदि प्रमाणं स्वस्याप्रकाशकं स्यात्, परसंवेद्यत्वादस्य प्रमाणव्यपदेशो न स्यात्।

**विषयज्ञानतद्विज्ञानयोरविशेषः॥४॥** विषयाकारपरिच्छेदात्मनि ज्ञाने, यदि स्वाकारपरिच्छेदो न स्यात्, तद्विषये विज्ञाने विषयाकाररूपतैवेति तयोरविशेषः स्यात्।

**स्मृत्यभावप्रसङ्गश्च॥५॥** न ह्यनुपलब्धपूर्वेऽर्थे स एवायमिति स्मृतिर्भवति। यदि च विज्ञानं स्वात्मानं न विजानीयादुत्तरकालमनधिगतस्वात्मविज्ञानः कथं ब्रूयात् 'ज्ञोऽहमिति'? ततः स्मृतेरभावः स्यात्।

**फलाभाव इति चेन्नाऽर्थावबोधे प्रीतिदर्शनात् ॥६॥** स्यादेतद्भावसाधने प्रमाणे प्रमैव प्रमाणमिति; न फलमन्यदुपलभ्यत इति फलाभाव इति। तन्न किं कारणम्?,

अर्थाऽवबोधे प्रीतिदर्शनात्। ज्ञस्वभावस्यात्मनः कर्ममलीमसस्य करणालम्बनादर्थनिश्चये प्रीतिरुपजायते सा फलमित्युच्यते।

**उपेक्षाऽज्ञाननाशो वा॥७॥** रागद्वेषयोरप्रणिधानमुपेक्षा, अज्ञाननाशो वा फल-मित्युच्यते।

**ज्ञातृप्रमाणयोरन्यत्वमिति चेन्नाऽज्ञत्वप्रसंगात्॥८॥** स्यान्मतं प्रमिणोत्यात्मानं परं वा प्रमाणमिति कर्तृसाधनत्वमयुक्तम्, यस्मादन्यत्प्रमाणं ज्ञानं, स च गुणः। अन्यश्च प्रमाताऽऽत्मा, स च गुणी। गुणिगुणयोश्चाऽन्यत्वं द्रव्यरूपवत्। यथाचात्मेन्द्रियमनोऽर्थ-सन्निकर्षाद्यन्निष्पद्यते, तदन्यदिति वचनादन्यत्प्रमाणमन्यः प्रमाता। ततः करणसाधनत्वमेव युक्तमिति। तन्न किं कारणमज्ञत्वप्रसंगात्। यदि ज्ञानादन्य आत्मा तस्याऽज्ञत्वं प्राप्नोति। घटवत्।

**ज्ञानयोगादिति चेन्नाऽतत्स्वभावत्वे ज्ञातृत्वाभावोऽन्धप्रदीपसंयोगवत्॥९॥** स्यादेतज्ज्ञानयोगाज्ज्ञातृत्वं भवतीति। तन्न किं कारणमतत्स्वभावत्वे ज्ञातृत्वाभावः। कथम्? अन्धप्रदीपसंयोगवत्। यथा जात्यन्धस्य प्रदीपसंयोगेपि न दृष्टृत्वम् तथा ज्ञानयोगेप्यज्ञस्वभावस्यात्मनो न ज्ञातृत्वम्।

**प्रमाणप्रमेययोरन्यत्वमिति चेन्नाऽनवस्थानात्॥१०॥** स्यान्मतम् – अन्यत् प्रमाणमन्यत्प्रमेयम्। कुतः? लक्षणभेदात्, दीपघटवदिति; तन्न किं कारणमनवस्थानात्। यदि यथा बाह्यात्प्रमेयाकारात्प्रमाणमन्यत्तथाभ्यन्तरप्रमेयाकारादन्यत्स्यात्।

**अनवस्थाऽस्य स्यात्प्रकाशवदिति चेन्न प्रतिज्ञाहानेः॥११॥** तत्रैतत्स्यात् नानवस्थादोषः। कथं प्रकाशवत्। यथा प्रकाशस्य घटादीनामात्मनश्च प्रकाशकस्य नानवस्थादोषः, एवमिहादीति; तन्न किं कारणम्? प्रतिज्ञाहानेः प्रकाशो हि

स्वात्मनोऽनन्यः स्वपरप्रकाशने समर्थः प्रदर्श्यमानः प्रमाणप्रमेययोरन्यत्वप्रतिज्ञां द्वापयति।

**अनन्यत्वमेवेति चेन्न, उभयाभावप्रसङ्गात्॥१२॥** यद्यन्यत्वे दोषोऽनन्यत्वं तर्हि ज्ञातृप्रमाणयोः- प्रमाणप्रमेययोश्चेति। तन्न किं कारणमुभयाभावप्रसङ्गात्। यदि ज्ञातुरन्यत्प्रमाणम्, प्रमाणाच्च प्रमेयमन्यतराभावे तदविनाभाविनोऽवशिष्टस्याप्यभाव इत्युभयाभावप्रसङ्गः। कथं तर्हि सिद्धिः?

**अनेकान्तात्सिद्धिः॥१३॥** स्यादन्यत्वं स्यादनन्यत्वमित्यादि। संज्ञालक्षणादिभेदात् स्यादन्यत्वम्, व्यतिरेकेणानुपलब्धेः स्यादनन्यत्वमित्यादि। ततः सिद्धमेतत् –'प्रमेयं नियमात् प्रमेयम् प्रमाणं तु स्यात्प्रमाणं स्यात्प्रमेयम्' इति।

**वक्ष्यमाणभेदापेक्षया द्वित्वनिर्देशः॥१४॥** आद्ये परोक्षं प्रत्यक्षमन्यदिति, वक्ष्यते। तदपेक्षया प्रमाणे इति, द्वित्वनिर्देशः क्रियते।

**तद्वचनं सन्निकर्षादिनिवृत्त्यर्थम्॥१५॥** तन्मत्यादिज्ञानं वर्णितं, प्रमाणव्यपदेशं लभते न सन्निकर्षादीनि। अथ सन्निकर्षादेः प्रमाणत्वे को दोषः?-

**सन्निकर्षे प्रमाणे सकलपदार्थपरिच्छेदाभावस्तदभावात्॥१६॥** यस्य मतं सन्निकर्षः प्रमाणं, अर्थाधिगमः फलमिति, तस्य सकलपदार्थपरिच्छेदो नास्ति। कुतः,? तदभावात्तस्य सन्निकर्षस्याभावात्। कथमिति चेदुच्यते- येन केनचित्सर्वज्ञेन भवितव्यम्। तस्यार्थपरिच्छेदहेतुर्यदि सन्निकर्षः? स चतुष्टयत्रयद्वयविषयः स्यात्। तत्र चतुष्टयविषयस्त्रयविषयश्च न संभवति। मनस इन्द्रियाणां चाऽयुगपत्प्रवृत्तित्वात् प्रतिनियतविषयत्वाच्च। अनन्तो हि ज्ञेयस्त्रिकालविषयः, सूक्ष्मान्तरितविप्रकृष्टरूपः, स कथमिह तैः सन्निकृष्यते? असन्निकृष्टे, न तत्फलमवबोधः प्रवर्तते। अतः सर्वज्ञाभावः स्यात्। तत एव द्वयसन्निकर्षोऽपि न भवति।

**सर्वगतत्वादात्मनः सकलेनार्थेन सन्निकर्ष इति चेन्न तस्य परीक्षाया-मनुपपत्तेः॥१७॥** यदि हि सर्वगत आत्मा स्यात्, तस्य क्रियाभावात्पुण्यपापयोः कर्तृत्वाभावे तत्पूर्वकसंसारस्तदुपरतिरूपश्च मोक्षो न योक्ष्यते इति। करणग्रामस्य संसार इति चेन्न तस्याचेतनत्वात्, तस्यैव मोक्षप्रसक्तेश्च।

**सर्वेन्द्रियसन्निकर्षाभावश्च चक्षुर्मनसोः प्राप्यकारित्वाभावात् ॥१८॥** सर्वेन्द्रियविषयः सन्निकर्षो न संभवति। प्राप्यकारित्वाभावश्चोपरिष्टाद्वक्ष्यते।

**सर्वथा ग्रहणप्रसङ्गश्च सर्वात्मना सन्निकृष्टत्वात् ॥१९॥** यानीन्द्रियाणि प्राप्यकारीणि, तैरपि सर्वथार्थस्य ग्रहणं प्राप्नोति कुतः सर्वात्मना सन्निकृष्टत्वात् ।

**तत्फलस्य साधारणत्वप्रसङ्गः स्त्रीपुरुषसंयोगवत् ॥२०॥** तस्य सन्निकर्षस्य प्रमाणस्य, यत्फलमर्थावबोधनं तेन च साधारणेन भवितव्यम्। कथं? स्त्रीपुरुषसंयोगवत् । यथा स्त्रीपुरुषसंयोगजं सुखमुभयोरपि साधारणम् । तथेन्द्रियाणां मनसोऽर्थस्य चावबोधनं प्राप्नोति।

**शय्यावदिति चेन्नाचेतनत्वात् ॥२१॥** स्यान्मतं यथा शय्यादीनां पुरुषस्य च संयोगे साधारणेऽपि तत्फलं सुखं न शय्यादीनां भवति। किं तर्हि पुरुषस्यैवेति। तथेहापीति। तन्न किं कारणमचेतनत्वात्; अचेतनानां शय्यादीनां सत्यपि संयोगे सुखं न भवति।

**इहापि तत एवेति चेन्नाविशेषात् ॥२२॥** स्यादेतन्मनःप्रभृतीनां सत्यपि संनिकर्षे न तत्फलमवबोधनं भवति कुतः? अचेतनत्वादेवेति। तन्न किं कारणमविशेषादज्ञ-स्वभावत्वं तावत्सर्वेषामात्मादीनामविशिष्टं, तत्र किं कृतोयं विशेषः। सन्निकर्षजं फलमवबोधनमर्थान्तरभूतमपि सदात्मनैव संबध्यते न मनःप्रभृतिभिरिति। ज्ञस्वभावत्वे चात्मनः प्रतिज्ञाहानिः।

**समवायादिति चेन्नाविशेषात् ॥२३॥** स्यादेतत्समवायो नामायुतसिद्धिलक्षणः संबन्धोस्ति। तत्कृतोयं विशेष इति तन्न। किं कारणम्? अविशेषात्। समवायो हि सर्वगतः, ज्ञभावशून्यत्वे समानेऽपि आत्मनैव ज्ञानं योजयति, न मनःप्रभृतिभिरिति वचनं न विपश्चिन्मनःप्रीतिकरम्। एवमिन्द्रयेऽपि योज्यम्।

अनुमानौपम्ययोरनुमानागमयोरनुमानप्रत्यक्षयोरौपम्यप्रत्यक्षयोरौपम्यागमयोरागम प्रत्यक्षयोः प्रत्यक्षपरोक्षयोश्च विपर्ययप्रसङ्गे मत्यादीनामविशेषेण प्रमाणद्वयासक्तेरव-धारणार्थमाह –

## आद्ये परोक्षम्॥११॥

**आदिशब्दस्यानेकार्थवृत्तित्वे विवक्षातः प्राथम्यार्थसंग्रहः॥१॥** अयमादिशब्दोऽने-कार्थवृत्तिः; क्वचित्प्राथम्ये वर्तते। अकारादयो वर्णा, ऋषभादयस्तीर्थकरा, इति। क्वचित्प्रकारे 'भुजङ्गादयः परिहर्तव्या, इति। क्वचिद्व्यवस्थायां सर्वादि सर्वनामेति। क्वचित्सामीप्ये 'नद्यादीनि क्षेत्राणीति। क्वचिदवयवे, 'टिदादिरिति'। तत्रेहादिशब्दस्य विवक्षातः प्राथम्यार्थो वेदितव्यः। आदौ भवमाद्यं किं पुनस्तत्? मतिः श्रुतं च।

**श्रुताग्रहणमप्रथमत्वात् ॥२॥** श्रुतस्य ग्रहणं न प्राप्नोति। कुतः? अप्रथमत्वात्, नहि सूत्रे श्रुतं प्रथमम्।

**उत्तरापेक्षयाऽऽदित्वमिति चेन्नातिप्रसङ्गात् ॥३॥** स्यान्मतम् – अवध्याद्युत्तरम-पेक्ष्य, श्रुतस्यादित्वमिति। तन्न किं कारणम्? अतिप्रसंगात्। उत्तरमपेक्ष्य यद्यादित्वं कल्प्यते केवलं व्युदस्य, सर्वस्यादित्वं प्राप्नोति।

**द्वित्वनिर्देशादितिचेन्न तदवस्थत्वात् ॥४॥** स्यादेतद् द्वित्वनिर्देशेन, सर्वस्य ग्रहणं न भवति। अतो नातिप्रसङ्ग इति। तन्न किं कारणम्? तदवस्थत्वात्। एवमप्यतिप्रसङ्ग एव भवति- कयोर्द्वयोर्ग्रहणमिति।

**न वा; प्रत्यासत्तेः श्रुतग्रहणम्॥५॥** न वैष दोषः किं कारणम्? प्रत्यासत्तेः श्रुतग्रहणं भवति। द्वित्वनिर्देशाद्गृह्यमाणं यदाद्यस्य प्रत्यासन्नं तदेव गृह्यते। तस्य हि सामीप्यादौपचारिकं प्राथम्यमस्तीति तथा सामीप्यं श्रुतेरर्थाच्च।

**उपात्तानुपात्तपरप्राधान्यादवगमः परोक्षम्॥६॥** उपात्तानीन्द्रियाणि मनश्च। अनुपात्तं प्रकाशोपदेशादि, तत्प्राधान्यादवगमः परोक्षम्। यथा गतिशक्त्युपेतस्यापि स्वयमेव गन्तुमसमर्थस्य यष्ट्याद्यवलम्बनप्राधान्यं गमनम्। तथा मतिश्रुतावरणक्षयोपशमे सति ज्ञस्वभावस्यात्मनः स्वयमेवार्थानुपलब्धुमसमर्थस्य पूर्वोक्तप्रत्ययप्रधानं ज्ञानं, परायत्त-त्वात्तदुभयं परोक्षमित्युच्यते।

**अत एव प्रमाणत्वाभाव इत्यनुपालम्भः॥७॥** अत्राऽन्ये उपालभन्ते। परोक्षं प्रमाणं न भवति, प्रमीयतेऽनेनेति हि प्रमाणं, न च परोक्षेण किञ्चित्प्रमीयते परोक्षत्वादेवेति सोऽनुपालम्भः। कुतः? अत एव यस्मात्, परायत्तं परोक्षं इत्युच्यते नाऽनवबोध इति।

अभिहितलक्षणात्परोक्षादितरस्य सर्वस्य प्रत्यक्षत्वप्रतिपादनार्थमाह –

## प्रत्यक्षमन्यत् ॥१२॥

अन्यत्त्रिविधं प्रत्यक्षमित्युच्यते। किमिदं प्रत्यक्षं नाम ?

**इन्द्रियानिन्द्रियानपेक्षमतीतव्यभिचारं साकारग्रहणं प्रत्यक्षम्॥१॥** इन्द्रियाणि चक्षुरादीनि पञ्च, अनिन्द्रियं मनः, तेष्वपेक्षा यस्य न विद्यते। 'अतस्मिंस्तदिति ज्ञानं व्यभिचारः' सोऽतीतोस्य। आकारो विकल्पः यत्सहाऽऽकारेण वर्तते तत्प्रत्यक्षमित्युच्यते।

इन्द्रियानिन्द्रियानपेक्षमिति विशेषणं मतिश्रुतनिवृत्त्यर्थम् अतीतव्यभिचारमित्येतद्वि-भङ्गज्ञाननिवृत्त्यर्थम्। तद्धि मिथ्यादर्शनोदयाद् व्यभिचरतीति। साकारग्रहणमित्येतदव-धिकेवलदर्शनव्युदासार्थम्। अनाकारं हि तदिति। किं गतमेतदियता सूत्रेण? आहोस्विदेवं वक्तव्यमिति गतं प्रतिपन्नं कथमिति चेदुच्यते –

**अक्षं प्रतिनियतमिति परापेक्षानिवृत्तिः॥२॥** अक्ष्णोति व्याप्नोति जानातीति, अक्ष आत्मा प्राप्तक्षयोपशमः प्रक्षीणावरणे वा तमेव प्रतिनियतं प्रत्यक्षमिति, विग्रहात्परा-पेक्षानिवृत्तिः कृता भवति।

**अधिकारादनाकारव्यभिचारव्युदासः॥३॥** अधिकृतमेतज्ज्ञानं सम्यक्, इति च, ततोऽनाकारस्य दर्शनस्य, व्यभिचारिणो ज्ञानस्य च व्युदासः कृतो भवति।

**करणात्यये ग्रहणाभाव इतिचेन्न दृष्टत्वादीशवत्॥४॥** स्यादेतत्करणात्ययेऽर्थस्य ग्रहणं न प्राप्नोति। न ह्यकरणस्य कस्यापि ज्ञानं दृष्टमिति। तन्न किं कारणम्? दृष्टत्वात्। कथम्?, ईशवत्। यथा रथस्य कर्ता अनीशः, उपकरणापेक्षो रथं करोति। स तदभावे न शक्यः। यः पुनरीशस्तपोविशेषात्परिप्राप्तर्द्धिविशेषः। स बाह्योपकरण-गुणानपेक्षः स्वशक्त्यैव रथं निर्वर्तयन् प्रतीतः। तथा कर्ममलीमस आत्मा, क्षायोपशमिकेन्द्रियानिन्द्रियप्रकाशाद्युपकरणापेक्षोऽर्थान् संवेत्ति। स एव पुनः क्षयोपशम विशेषे क्षये च सति करणानपेक्षः स्वशक्त्यैवार्थान्वेत्तीति को विरोधः?

**ज्ञानदर्शनस्वभावत्वाच्च भास्करादिवत्॥५॥** यथा भास्करादयः प्रकाशस्वभावत्वा-त्प्रकाशान्तरानपेक्षाः प्रकाश्यानर्थान्प्रकाशयन्ति। तथा ज्ञानदर्शनस्वभाव आत्मा, तदा-वरणक्षयक्षयोपशमविशेषे सति स्वशक्त्यैवार्थानाविष्करोतीति सिद्धम्।

**इन्द्रियनिमित्तं ज्ञानं प्रत्यक्षं तद्विपरीतं परोक्षमित्यविसंवादिलक्षणमिति चेन्नाप्तस्य प्रत्यक्षाभावप्रसङ्गात् ॥६॥** स्यान्मतमिन्द्रियव्यापारजनितं ज्ञानं प्रत्यक्षं व्यतीतेन्द्रियविषयव्यापारं परोक्षमित्येतदविसंवादिलक्षणम्। तथाचोक्तम् –

"प्रत्यक्षं कल्पनापोढं नामजात्यादियोजना।

असाधारणहेतुत्वादक्षैस्त द्व्यपदिश्यते"॥

इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्"; आत्मेन्द्रियमनोऽर्थसन्निकर्षाद्यन्निष्पद्यते तदन्यत्"; श्रोत्रादिवृत्तिः प्रत्यक्षम्"; "सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमिति" च सर्वैरभ्युपगम्यते। अतएव तल्लक्षणमविसंवादि निश्चेतव्यमिति। तन्न किं कारणमाप्तस्य प्रत्यक्षाभावप्रसङ्गात्। यदीन्द्रियनिमित्तमेव ज्ञानं प्रत्यक्षमिष्यते। एवं सत्याप्तस्य प्रत्यक्षज्ञानं न स्यात्। न हि तस्येन्द्रियपूर्वोऽर्थाधिगमः। अथ तस्यापि करणपूर्वकमेव ज्ञानं कल्प्यते? तस्यासर्वज्ञत्वं पुरस्तादुक्तम्।

**आगमादिति चेन्न तस्य प्रत्यक्षज्ञानपूर्वकत्वात् ॥७॥** स्यादेतदागमादतीन्द्रियार्थाधिगमे व्याहतशक्तेः सर्वार्थावबोध इति। तन्न किं कारणम्? तस्य प्रत्यक्षज्ञानपूर्वकत्वात्। आप्तेन हि क्षीणदोषेण प्रत्यक्षज्ञानेन प्रणीत आगमो भवति न सर्वः। यदि सर्वः स्यात्? अविशेषः स्यात्। स च नास्तीत्यागमस्य प्रमाणाभावः।

**अपौरुषेयादिति चेन्न तदसिद्धेः॥८॥** स्यादेतदपौरुषेय आगमोऽस्ति, अनादिनिधनोऽत्यन्तपरोक्षेष्वप्यर्थेष्वप्रतिहतगतिस्ततः सर्वार्थाधिगमः इति। तन्न किं कारणम्? तदसिद्धेः। न च कश्चिदागमोऽपौरुषेयः सिद्धोऽस्ति, हिंसादिविधायिनः प्रामाण्यासिद्धेः।

**अतीन्द्रियं योगिप्रत्यक्षमिति चेन्नार्थाभावात् ॥९॥** स्यान्मतं योगिनोऽतीन्द्रियं प्रत्यक्षं ज्ञानमस्ति आगमविकल्पातीतम्। तेनासौ सर्वार्थान् प्रत्यक्षं वेत्ति। उक्तं च -

योगिनां गुरुनिर्देशाद् व्यतिभिन्नार्थमात्रदृक् इति। तन्न किं कारणम्? अर्थाभावात्। अक्षमक्षं प्रति वर्तते इति प्रत्यक्षम्। न चायमर्थो योगिनि विद्यतेऽक्षाभावात्।

अथवा न सन्ति सर्वे भावाः, स्वपरोभयहेत्वहेतुभ्य उत्पत्त्याद्यभावात्। सामान्यविशेषाश्चैकानेकयोर्वृत्त्यसंभवादिदोषोपपत्तेः। अतोऽर्थाभावान्निरालम्बनं योगिनो ज्ञानं कथं स्यात्? ''परिकल्पितात्मना न सन्ति भावा निर्विकल्पात्मना सन्ति इति'' चायुक्तम्। तदधिगमोपायाभावात्। न हि निर्विकल्पोऽर्थोऽस्ति। तद्विषयं ज्ञानं चेति प्रतिपादयितुं शक्यम् लक्षणाभावात्।

**तदभावाच्च॥१०॥** तस्य योगिनोऽभावाच्च। न हि कश्चित्तत्परिकल्पितो योगी विद्यते विशेषलक्षणविरहात्, सर्वविरहाच्च निर्वाणप्राप्तौ। तन्नैतत्स्यात्, निर्वाणं द्विविधम् सोपधिविशेषं निरुपधिविशेषं चेति। तत्र सोपधिविशेषे निर्वाणे बोद्धास्तीति। तत्रापि यथा बाह्यस्याभावः कल्प्यते, तथाभ्यन्तरस्यापीति बोद्धुरभाव एव। योगजधर्मानुग्रहादात्मा करणविरहितोऽप्यवैतीति चेन्न तस्य निष्क्रियस्य नित्यस्य सतस्तत्क्रियावदनुग्रह-विकाराभावात्।

**तल्लक्षणानुपपत्तिश्च स्ववचनव्याघातात्॥११॥** तस्य प्रत्यक्षस्योक्तं लक्षणमपि नोपपद्यते। कुतः? स्ववचनव्याघातात्। अन्यापोहिकप्रतिविहितान्येव शेषप्रमाणलक्षणानि। ततस्तत्र नो नातितरां प्रतिविधानादरः किन्तु तत्प्रमाणलक्षणगुणसंभावनातिरस्कारार्थं किञ्चिद् व्याप्रियामहे। यदुक्तं- कल्पनापोढं प्रत्यक्षमिति। कल्पना हि जातिद्रव्यगुण-क्रियापरिभाषाकृतो वाग्बुद्धिविकल्पस्ततोऽन्यापोढं किं तत्? सर्वथाकल्पनापोढम्, उताहो कथञ्चिदिति? यदि सर्वथास्ति प्रमाणं ज्ञानं कल्पनापोढमित्येवमादि कल्पनाभ्योऽप्य-पोढमित्यस्त्यादिवचनव्याघातः। अथास्त्यादिकल्पनाभ्योऽनपोढमिष्यते सर्वथाकल्पना-पोढमिति वचनव्याघातः। अथ कथञ्चित्कल्पनापोढम्, एकान्तवादत्यागात् पुनरपि स्ववचनव्याघात एव।

अथ मतं नास्माकमेकान्तः कल्पनापोढमेवेति। किमर्थं तर्हि विशेषणम्? परमतापेक्षं विशेषणम्। परमते हि नामजात्यादिभेदोपचारकल्पना प्रोक्ता। ततोऽपोढं न स्वविकल्पादिति। उक्तञ्च –

सवितर्कविचारा हि पञ्च विज्ञानधातवः।

निरूपणानुस्मरणविकल्पेनाविकल्पकाः॥ इति

अत्रोच्यते – आलम्बनेऽर्पणा वितर्कस्तत्रैवानुमर्शनं विचारस्तस्य नामादिभिः प्रकल्पना निरूपणम्। पूर्वानुभूतानुसारेण विकल्पनमनुस्मरणमित्येते धर्माः क्षणमात्रावस्थानेष्वक्षविषयविज्ञानेषु निरन्वयेषु नोपपद्यन्ते। युगपदुत्पत्तेरनवस्थानाच्च, अतो ग्राह्यग्रहणभावाभावश्च स्यात् सव्येतरगोविषाणवत्। क्रमवृत्तित्वे च तेषां स्वार्थाभाव-प्रसङ्गश्चेति। सन्तानाद्यपेक्षया तदुपपत्तिरिति चेन्न; तत्परीक्षाऽक्षमत्वात्। अतः सर्वस्मिन्नसति विकल्पे "अयं विकल्पोऽस्त्ययं नास्तीति" विज्ञानस्य विवेको नोपपद्यते। सर्वविकल्पविरहाच्च नास्तित्वमेवास्य स्यात्। अनुस्मरणाद्यभ्युपगमे चैकस्यानेकक्षणवर्तिनो वस्तुनोऽस्तित्वं सिद्धम्। अनुस्मरणादि हि स्वयमनुभूतस्यार्थस्य दृष्टं नाननुभूतस्य नान्यानुभूतस्येति।

तथा मानसमपि प्रत्यक्षं नोपपद्यते। अपि च "षण्णामनन्तरातीतं विज्ञानं यद्धि तन्मनः" इत्यतीतमसत्कथं विज्ञानस्य कारणं स्यात्? अथ पूर्वोत्तरनाशोत्पत्त्योर्युगपद्वृत्तेः कार्यकारणभावः कल्प्यते। भिन्नसन्तानयोरपि विनश्यदुत्पद्यमानयोः कार्यकारणभावः स्यात्। एकसन्ताने शक्त्यनुगमाभ्युपगमे प्रतिज्ञाहानिश्च स्यात्।

**अपूर्वाधिगमलक्षणानुपपत्तिश्च सर्वस्य ज्ञानस्य प्रमाणत्वोपपत्तेः॥१२॥** अपूर्वाधि-गमलक्षणं प्रमाणमित्येतच्च नोपपद्यते। कुतः? सर्वस्य ज्ञानस्य प्रमाणत्वोपपत्तेः।

प्रमीयतेऽनेनेति प्रमाणम्। सर्वेण च ज्ञानेन प्रमीयते। यथान्धकारेऽवस्थिताना-मुत्पत्त्यनन्तरं प्रकाशकः प्रदीप उत्तरकालमपि न तं व्यपदेशं जहाति, तदवस्थानकारणत्वात्। एवं ज्ञानमप्युत्पत्त्यनन्तरं घटादीनामवभासकं भूत्वा प्रमाण-त्वमनुभूयोत्तरकालमपि न तं व्यपदेशं त्यजति, तदर्थत्वात्। अथ मतम् क्षणे क्षणेऽन्य एव प्रदीपोऽपूर्वमेव प्रकाशकत्वमवलम्बत इति। एवं सति ज्ञानमपि तादृगेवेति, क्षणे क्षणेऽन्यत्वोपपत्तेरपूर्वाधिगमलक्षणमविशिष्टमिति। तत्र यदुक्तं "स्मृतीच्छाद्वेषादिवत् पूर्वाधिगतविषयत्वात् पुनः पुनरभिधानं ज्ञानं न प्रमाणम् इति तद् व्याहन्यते।

**स्वसंवित्तिफलानुपपत्तिश्चाऽर्थान्तरत्वाभावात् ॥१३॥** प्रमाणं लोके फलवदुपलब्धम्। अस्य च प्रमाणस्य केनचित्फलेन भवितव्यमिति। कश्चिदाह - द्व्याभासं हि ज्ञानमुत्पद्यते, स्वाभासं विषयाभासं च। तस्योभयाभासस्य यत्संवेदनं तत्फलमिति। तन्नोपपद्यते। कुतः? अर्थान्तरत्वाभावात्। लोके प्रमाणात् फलमर्थान्तरभूतमुपलभ्यते। तद्यथा- छेतृछेत्तव्यछेदनसन्निधाने द्वैधीभावः फलम्। न च तथा स्वसंवेदनमर्थान्तरभूतमस्ति। तस्मादस्य फलत्वं नोपपद्यते सत्यमेवमेतत्। अत एव तस्मिन्नधिगमरूपे फले सव्यापारप्रतीततामुपादाय प्रमाणोपचार इति।

**प्रमाणोपचारानुपपत्तिर्मुख्याभावात् ॥१४॥** सति मुख्ये लोके उपचारो दृश्यते। यथा सति सिंहे विशिष्टतिर्यग्गतिपञ्चेन्द्रियजातिनखदंष्ट्रासटाटोपभासुरकपिलनयनतारकाद्यवयव-विशिष्टेऽन्यत्र क्रौर्यशौर्यादिगुणसाधर्म्यात्सिंहोपचारः क्रियते। न च तथेह मुख्यं प्रमाणमस्ति तदभावात्फले प्रमाणोपचारो न युज्यते।

**आकारभेदाद्भेद इति चेन्नैकान्तवादत्यागात् ॥१५॥** स्यादेतत्- ग्राहकविषयाभास-संवित्तिशक्तित्रयाकारभेदात्प्रमाणप्रमेयफलकल्पनाभेद इति; तन्न किं कारणमे-कान्तवादत्यागात्। एकमनेकाकारमित्येतज्जैनेन्द्रं दर्शनम्, तत्कथमेकान्तवादे युज्यते?

यदि ह्येवमभ्युपगम्येत, द्रव्ये कोऽपरितोषः?, रूपाद्यनेकात्मकमेकं परमाणुद्रव्यम्, ज्ञानाद्यनेकात्मकमात्मद्रव्यमिति। अथ द्रव्यसिद्धिर्माभूदित्याकारा एव न ज्ञानमिति कल्प्यते। एवं सति कस्य ते आकारा? इति तेषामप्यभावः स्यात्। किञ्च तेषामाकाराणां यौगपद्येन वा उत्पत्तिः स्यात्? क्रमेण वा? यदि यौगपद्येन, हेतुहेतुमद्भावो विरुध्यते। अथ क्रमेण, क्षणिकस्य विज्ञानस्याऽऽकाराणां कथं क्रमः?, यदि स्यात्? "अधिगमश्चात्र न भावान्तरमिति" व्याहन्यते। अपि च बाह्यस्य विज्ञेयस्याभावे, अन्तरङ्गाकारत्रयकल्पनायां प्रमाणप्रमाणाभासौ नोपपद्येतेऽन्तरङ्गाकाराभेदादसद्वस्तु यत्सदिति कल्पयति, तत्प्रमाणाभासम्। असदेवेति यत्प्रतिपद्यते तत्प्रमाणमित्यस्ति विशेष इति चेत्प्रमेयद्वयव्यवस्थापितप्रमाणद्वयकल्पनाव्याघातः। स्वलक्षणविषयं हि प्रत्यक्षम् सामान्यलक्षणविषयमनुमानम्। स्वलक्षणमसाधारणो धर्मः विकल्पातीतत्वात् 'इदं तत्' इत्यव्यपदेश्यः। तद्विपरीतं सामान्यलक्षणमिति। सर्वस्यासत्वे किं कृतोयं विशेषः? असत्वं हि न स्वतो भिद्यते संबन्धिभेदात्स्याद्भेदः- घटस्यासत्वं पटस्यासत्वमिति, तेषां घटादीनां संबन्धिनामभावे तद्विशेषाभाव इति।

स्यान्मतम् खात्पतिता नो रत्नवृष्टिरिष्टमेवाप्रतर्कितमुपस्थितं अत एव सर्वं विज्ञानाभिधानमयथार्थं परिकल्पितार्थत्वान्निर्विकल्पार्थगोचरमात्मीयमेव विज्ञानप्रमाण-मिति। उक्तञ्च –

**शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते।**

**अनागमविकल्पा हि स्वयं विद्या प्रर्वतत॥ इति॥**

एतच्चानुपपन्नम्; तदधिगमोपायाभावात्। उक्तञ्च –

**प्रत्यक्षबुद्धिः क्रमते न यत्र तल्लिङ्गगम्यं न तदर्थलिङ्गम्।**

**वाचो न वा तद्विषयेण योगः का तद्गतिः कष्टमश्रृण्वतां ते॥ इति**

आहितोभयप्रकारस्य प्रमाणस्य आदिप्रकारविशेषप्रतिपत्त्यर्थमाह –

## मतिः स्मृतिः संज्ञा चिन्ताभिनिबोध इत्यनर्थान्तरम्॥१३॥

**इति शब्दस्यानेकार्थसंभवे विवक्षावशादाद्यर्थसंप्रत्ययः॥१॥** इति शब्दोऽनेऽकार्थः संभवति। क्वचिद्धेतौ वर्तते - 'हन्तीति पलायते' वर्षतीति धावति'। क्वचिदेवमित्यस्यार्थे वर्तते - इति स्म उपाध्यायः कथयत्येवं स्म इति गम्यते। क्वचित्प्रकारे वर्तते - यथा 'गौरश्वः शुक्लो नीलः, चरति प्लवते जिनदत्तो देवदत्त इति'। "एवं प्रकारा" इत्यर्थः। क्वचिद्व्यवस्थायां वर्तते, यथा "ज्वलितिकसंताण्णः" इति। क्वचिदर्थविपर्यासे वर्तते यथा 'गौरित्ययमाह, गौरिति जानीते इति। क्वचित्समाप्तौ वर्तते – इति प्रथममाह्निकम्, इति द्वितीयमाह्निकम्। इति क्वचित्शब्दप्रादुर्भावे वर्तते – श्रीदत्तमिति सिद्धसेनमिति। तत्रेह विवक्षावशादादिशब्दार्थो वेदितव्यः। मतिः स्मृतिः संज्ञा चिन्ताभिनिबोधादयः इत्यर्थः। के पुनस्ते प्रतिभाबुद्ध्युपलब्ध्यादयः। प्रकारे वा एवं प्रकारा इति। कथमेषां शब्दानामनर्थान्तरत्वम्।

**मतिज्ञानावरणक्षयोपशमनिमित्तार्थोपलब्धिविषयत्वादनर्थान्तरत्वं रूढिवशात्॥२॥** एतेषां मत्यादीनां शब्दानां मतिज्ञानावरणक्षयोपशमनिमित्तायामर्थोपलब्धौ वृत्तेरनर्थान्तरत्वं वेदितव्यम्। कथं पुनर्मननं मन्यत इति वा मति इत्येवमाद्यर्थविषयाणामेषामनर्थान्तरत्वम् ?, इत्यत आह, रूढिवशादिति। यथा गच्छतीति गौरित्यङ्गीकृतमपि गमनं न शब्दवृत्तिनियमकारणं रूढिवशात्क्वचिदेव वर्तते। तथा मत्यादयः शब्दा व्युत्पत्तिकर्मणि सत्यप्यर्थाश्रयेण भेदे क्वचिदेव वर्तन्त इत्यनर्थान्तरत्वमवसीयते।

**शब्दभेदादर्थभेदो गवाश्वादिवदिति चेन्नातः संशयात्॥३॥** स्यादेतन्मत्यादीनां शब्दानां परस्परतोऽर्थान्तरत्वमस्ति। कुतः? शब्दभेदात्, गवाश्वादिवदिति। तन्न किं

कारणम्? अतः संशयात्। यत एव मत्यादीनां शब्दभेदादन्यत्वमाह भवान्, अत एव संशयः। कथं?

**इन्द्रादिवत् ॥४॥** यथेन्द्रशक्रपुरन्दरादिशब्दभेदेपि नार्थभेदः तथा मत्यादिशब्द-भेदेप्यर्थाभेद इति। न हि यत एव संशयस्तत एव निश्चयः किञ्च,

**शब्दाभेदेप्यर्थैकत्वप्रसङ्गात् ॥५॥** यस्य शब्दभेदोऽर्थभेदे हेतुरिति मतम्, तस्य वागादिनवार्थेषु गोशब्दाभेददर्शनाद्वागाद्यर्थानामेकत्वमस्तु। अथ नैतदिष्टम्, न तर्हि शब्दभेदोऽन्यत्वस्य हेतुः। किञ्च;

**आदेशवचनात् ॥६॥** यथेन्द्रादीनामेकद्रव्यपर्यायादेशात्स्यादेकत्वं प्रतिनियतपर्याया-र्थादेशाच्च स्यादन्यत्वम्- इन्दनादिन्द्रः, शकनाच्छक्रः, पूर्दारणात्पुरन्दर इति। तथा मत्यादीनामेकद्रव्यपर्यायादेशात्स्यादेकत्वम्। प्रतिनियतार्थपर्यायादेशाच्च स्यान्नानात्वम्। मननं मतिः। स्मरणं स्मृतिः। संज्ञानं संज्ञा। चिन्तनं चिन्ता। आभिमुख्येन नियतं बोधनमभिनिबोध इति।

**पर्यायशब्दो लक्षणं नेति चेन्न ततोऽनन्यत्वात् ॥७॥** स्यान्मतं मत्यादय अभिनिबोधपर्यायशब्दा नाभिनिबोधस्य लक्षणं मनुष्यादिवत्। यथा मनुष्यमर्त्यमनुज मानवादयः पर्यायशब्दाः मनुष्यस्य लक्षणं न भवन्ति। तन्न किं कारणं ततोऽनन्यत्वात्। इह पर्यायिणोऽनन्यःपर्यायशब्दः, स लक्षणम्। कथम्?

**औष्ण्याग्निवत् ॥८॥** यथा पर्यायशब्दः, औष्ण्यमग्नेः पर्यायिणोऽनन्यत्वादग्ने-र्लक्षणं भवति। तथा पर्यायशब्दा मत्यादय आभिनिबोधिकज्ञानपर्यायिणोऽनन्य-त्वेनाभिनिबोधस्य लक्षणम्। अथवा ततोऽनन्यत्वात्। यथा मनुष्यमर्त्यमनुजमानवादयो ऽसाधारणत्वादन्यघटादिद्रव्यासंभविनो मनुष्यादनन्यत्वात्तस्य लक्षणम्। अन्यथा हि मनुष्यादिपर्यायालक्षणत्वान्मनुष्याभावो भवेत्, यतो न मनुष्यादिलक्षणव्यतिरेकेणास्या-

न्यल्लक्षणमस्तीति। न चाभाव इष्टः अतः पर्यायशब्दो लक्षणम्। तथा मतिस्मृत्यादयोऽसाधारणत्वादन्यज्ञानासंभविनोऽभिनिबोधादनन्यत्वात्तल्लक्षणम्। इतश्च पर्यायशब्दो लक्षणम् । कस्मात्?

**गत्वा प्रत्यागतलक्षणग्रहणात् ॥९॥** कथम्? अग्न्युष्णवत् । यथाग्निरिति गत्वा ज्ञात्वा बुद्धिरुष्णपर्यायशब्दं गच्छति। कथं गच्छति? कोऽयमग्निः? य उष्ण इति। उष्ण इति च गत्वा बुद्धिः प्रत्यागच्छति। कोऽयमुष्णः,? योऽग्निरिति। तथा मतिरिति गत्वा बुद्धिः स्मृतिं गच्छति। का मतिः? या स्मृतिरिति। ततः स्मृतिरिति गत्वा बुद्धिः प्रत्यागच्छति। का स्मृतिः? या मतिरिति। एवमुत्तरेष्वपि। तस्माद्गत्वा प्रत्यागतलक्षण-ग्रहणात्पश्यामः पर्यायशब्दो लक्षणमिति। किञ्च;

**पर्यायद्वैविध्यादग्निवत् ॥१०॥** यथाग्नेरात्मभूत उष्णपर्यायो लक्षणं न धूमः, तस्य बाह्येन्दननिमित्तत्वे कादाचित्कत्वात्, तथा आभ्यन्तरो मत्यादिपर्याय आत्मभूत-त्वाल्लक्षणं नाऽनात्मभूतो बाह्यो मत्यादिशब्दः पुद्गलः तत्प्रत्यायनसमर्थः तस्य बाह्यकरणप्रयोगनिमित्तत्वादिति।

**इतिकरणस्य वाऽभिधेयार्थत्वात्॥११॥ अथवा,** इति करणोयमभिधेयार्थः प्रयुज्यते। मतिः स्मृतिः संज्ञा चिन्ताभिनिबोध इति योऽर्थोऽभिधीयते तन्मतिज्ञानमिति। ततो लक्षणत्वमुपपद्यते।

**श्रुतादीनामेतैरनभिधानात् ॥१२॥** न ह्येतैर्मत्यादिभिः श्रुतादीन्यभिधीयन्ते।

**वक्ष्यमाणलक्षणसद्भावाच्च॥१३॥** श्रुतादीनां हि लक्षणं वक्ष्यते। ततः तेषां मत्यप्रसङ्गः।

यद्येवं लक्षणं मतिज्ञानमवध्रियते अथास्यात्मलाभे किं निमित्तमित्यत आह -

## तदिन्द्रियानिन्द्रियनिमित्तम्॥१४॥

अथवाऽऽत्मप्रसादाविशेषात्सर्वज्ञानानामेकत्वप्रसङ्गे निमित्तभेदान्नानात्वं प्रतिपिपादयिषन् ब्रवीति। सत्यपि अमुष्मिन्नविशेषे पृथक्त्वमेषामवेमः। कुतः? यस्मात्तदिन्द्रियनिमित्तमिति। किमिदमिन्द्रियं नाम ?

**इन्द्रस्यात्मनोऽर्थोपलब्धिलिङ्गमिन्द्रियम्॥१॥** इन्द्र आत्मा तस्य कर्ममलीमसस्य स्वयमर्थान्ग्रहीतुमसमर्थस्याऽर्थोपलम्भने यल्लिङ्गं तदिन्द्रियमित्युच्यते। अथ किमिदमनिन्द्रियम्?

**अनिन्द्रियं मनोऽनुदरावत् ॥२॥** मनोऽन्तःकरणमनिन्द्रियमित्युच्यते। कथमिन्द्रियप्रतिषेधेन मन उच्यते? यथायमब्राह्मण इत्युक्ते ब्राह्मणत्वरहिते कस्मिंश्चित्संप्रत्ययो भवति। तथेन्द्रलिङ्गविरहितेऽन्यस्मिन्ननिन्द्रियमिति संप्रत्ययः स्यात्। न तु इन्द्रलिङ्ग एव मनसि; नैष दोषः ईषत्प्रतिषेधात्। कथम्? अनुदरावत्। यथा "अनुदरा कन्या" इति नास्या उदरं न विद्यते, किन्तु गर्भभारोद्वहनसमर्थोदराभावादनुदरा। तथाऽनिन्द्रियमिति नास्येन्द्रियत्वाभावः। किन्तु चक्षुरादिवत्प्रतिनियतदेशविषयावस्थानाभावादनिन्द्रियं मन इत्युच्यते।

**अन्तरङ्गं तत्करणमिन्द्रियानपेक्षत्वात् ॥३॥** नास्येन्द्रियेष्वपेक्षास्तीतीन्द्रियानपेक्षम्। न ह्यस्य गुणदोषविचारस्वविषयप्रवृत्ताविन्द्रियापेक्षास्ति ततोऽन्तरङ्गं तत्करणमिति वेदितव्यम्। तदुभयमवष्टभ्य यदुत्पद्यते तन्मतिज्ञानमिति।

**तदित्यग्रहणमनन्तरत्वादिति चेन्नोत्तरार्थत्वात् ॥४॥** स्यादेतन्मतिज्ञानस्यानन्तरत्वादनेनाभिसंबन्धो भवतीति तदित्येतद्ग्रहणमनर्थकमिति। तन्न, किं कारणम्?

उत्तरार्थत्वात्। उत्तरार्थं हि तत्। इतरथा ह्यवग्रहेहावायधारणा मतिज्ञानभेदा इति विज्ञातुमशक्याः। तद्ग्रहणे पुनः क्रियमाणे तन्मतिज्ञानमवग्रहादय इति संबन्धः सुगमो भवति।

यदेतस्मिन्निमित्तद्वयसन्निधाने सत्यात्मलाभं प्रत्यागूर्णमनिर्वर्णितभेदमिति तद्भेदप्रतिपत्त्यर्थमाह –

## अवग्रहेहावायधारणाः॥१५॥

**विषयविषयिसन्निपातसमनन्तरमाद्यग्रहणमवग्रहः॥१॥** विषयविषयिसन्निपाते दर्शनं भवति। तदनन्तरमर्थस्य ग्रहणमवग्रहः।

**अवगृहीतेऽर्थे तद्विशेषाकांक्षणमीहा॥२॥** यथा पुरुष इत्यवगृहीते तस्य भाषावयोरू-पादिविशेषैराकांक्षणमीहा।

**विशेषनिर्ज्ञानाद्याथात्म्यावगमनमवायः॥३॥** भाषादिविशेषनिर्ज्ञानात्तस्य याथात्म्ये-नावगमनमवायः दाक्षिणात्योऽयं युवा, गौरः इति वा।

**निर्णीतार्थाऽविस्मृतिर्धारणा॥४॥** भाषावयोरूपादिविशेषैर्याथात्म्येन निर्णीतस्य पुरुषस्योत्तरकालं स एवायमित्यविस्मरणं यतो भवति सा, धारणा। त एते मतिज्ञान-भेदाः। अत्राहेदमानुपूर्व्यं किं कृतमेषाम्? उच्यते –

**अवग्रहादीनामानुपूर्व्यमुत्पत्तिक्रियापेक्षं॥५॥** अवग्रहपूर्वकत्वादितरेषामादाववग्रहः क्रियते। तथेतरेष्वपि योज्यम्। अत्राह –

**अवग्रहेहयोरप्रामाण्यं तत्सद्भावेपि संशयदर्शनाच्चक्षुर्वत्॥६॥** यथा चक्षुषि न निर्णयः। सत्येव तस्मिन् किमयं स्थाणुराहोस्वित्पुरुष इति संशयदर्शनात्। तथावग्रहेऽपि

सति न निर्णय ईहादर्शनात्, ईहायां च न निर्णयः, यतो निर्णयार्थमीहा नत्वीहैव निर्णयः। यश्च निर्णयो न भवति, स संशयजातीय इत्यप्रामाण्यमनयोरिति।

**अवग्रहवचनादिति चेन्न संशयानतिवृत्तेरालोचनवत् ॥७॥** स्यादेतन्नावग्रहः संशयः। कुतोऽवग्रहवचनात्। यत उक्तः पुरुषोऽयमिति अवग्रहस्तस्य भाषावयोरूपादिविशेषा-कांक्षणमीहेति। संशयस्त्वप्रतिपत्तिरेवेति; तन्न किं कारणम्? संशयानतिवृत्तिः। कथम्? आलोचनवत्। यथोर्ध्वोऽर्थालोचने किमयमूर्ध्वोऽर्थः स्थाणुरुत पुरुष इति संशयानतिवृत्तिः। तथोर्ध्वोऽयमर्थ इत्यवग्रहे ईहाद्यपेक्षत्वात्संशयानतिवृत्तिः। उच्यते –

**लक्षणभेदादन्यत्वमग्निजलवत् ॥८॥** यथाग्निजलयोर्दहनप्रकाशनादिद्रवतास्नेह-नादिप्रतिनियतलक्षणभेदादन्यत्वम्। तथावग्रहसंशययोर्लक्षणभेदादन्यत्वम्। कोऽसौ लक्षणभेद? उच्यते –

**अनेकार्थाऽनिश्चिताऽपर्युदासात्मकः संशयस्तद्विपरीतोऽवग्रहः॥९॥** स्थाणुपुरुषाद्यने- कार्यालम्बनसन्निधानादनेकार्थात्मकः संशयः। एकपुरुषाद्यन्यतमात्मकोऽवग्रहः। स्थाणु-पुरुषानेकधर्मानिश्चितात्मकः संशयः। यतो न स्थाणुधर्मान् पुरुषधर्मांश्च निश्चिनोति। अवग्रहस्तु पुरुषाद्यन्यतमैकधर्मनिश्चयात्मकः। स्थाणुपुरुषानेकधर्माऽपर्युदासात्मकः संशयः। यतो न प्रतिनियतान् स्थाणुपुरुषधर्मान् पर्युदस्यति संशयः। अवग्रहः पुनः पर्युदासात्मकः। स ह्यन्यान् भावादीन् पर्यायान् पर्युदस्य "पुरुष" इत्येकपर्यायालम्बनः।

**संशयतुल्यत्वमपर्युदासादिति चेन्न निर्णयविरोधात् संशयस्य॥१०॥** स्यादेत-त्संशयतुल्योऽवग्रहः, कुतः? अपर्युदासात्। यथा संशयः स्थाणुपुरुषविशेषापर्युदासात्मकः। तथावग्रहोऽपि पुरुष इति भाषावयोरूपाद्यपर्युदासात्मकः। अतश्चैतदेवं यदुत्तरकालं

तद्विशेषार्थमीहामारभ्त इति; तन्न किं कारणम्? निर्णयविरोधात् संशयस्य। संशयो हि निर्णयविरोधी, नत्ववग्रहः निर्णयदर्शनात्।

**ईहायां तत्प्रसङ्ग इति चेन्नार्थादानात्॥११॥** स्यादेतद्यदि निर्णयाविरोध्यवग्रह इति न संशयः। नन्वीहाया निर्णयविरोधित्वात्संशयत्वप्रसङ्ग इति; तन्न किं कारणम्? अर्थादानात्। अवगृह्यार्थं तद्विशेषोपलब्ध्यर्थमर्थादानमीहा। संशयः पुनर्नार्थविशेषालम्बनः।

**संशयपूर्वकत्वाच्च॥१२॥** संशयो हि पूर्वमुपजायते ईहायाः। कथम्? इह पुरुषमवगृह्य किमयं दाक्षिणात्य उत औदीच्य इत्येवमाद्यप्रतिपत्तौ संशयः, एवं संशयितस्योत्तरकालं विशेषोपलिप्सां प्रति यतनमीहेति संशयादर्थान्तरत्वम्।

**अत एव संशयावचनमर्थगृहीतेः॥१३॥** अत एव सूत्रे संशयो नोक्तः। कुतः अर्थगृहीतेः। सति संशये ईहायाः प्रवृत्तिर्नास्तीति। आह - किमयमपाय उतावाय इत्युभयथा न दोषोऽन्यतरवचनेऽन्यतरस्यार्थगृहीतत्वात्। यदा न दाक्षिणात्योऽय-मित्यपायं त्यागं करोति तदौदीच्य इत्यवायोऽधिगमोऽर्थगृहीतः। यदा चौदीच्य इत्यवायं करोति तदा न दाक्षिणात्योऽयमित्यपायोऽर्थगृहीतः।

कश्चिदाह - यदुक्तं भवता विषयविषयिसन्निपाते दर्शनं भवति, तदनन्तरमवग्रह इति। तदयुक्तमवैलक्षण्यात्। नह्यवग्रहाद्विलक्षणं दर्शनमस्तीति। अत्रोच्यते - न, वैल-क्षण्यात्। कथम्हि चक्षुषा चक्षुर्दर्शनावरणवीर्यान्तरायक्षयोपशमाङ्गोपाङ्गनामावष्टंभाद-विभावितविशेषसामर्थ्येन किञ्चिदेतद्वस्त्वित्यालोकनमनाकारं दर्शनमित्युच्यते बालवत्। यथा जातमात्रस्य बालस्य प्राथमिक उन्मेषोऽसावविभावितरूपद्रव्यविशेषालोचनाद्दर्शनं विवक्षितं तथा सर्वेषाम्। ततो द्वित्रादिसमयभाविषून्मेषेषु चक्षुरवग्रहमतिज्ञानावरणवीर्या-न्तरायक्षयोपशमाङ्गोपाङ्गनामावष्टम्भाद्रूपमिदमिति विभावितविशेषोऽवग्रहः। यत्प्रथम

समयोन्मेषितस्य बालस्य दर्शनं तद्यद्यवग्रहजातीयत्वाज्ज्ञानमिष्टम्, तन्मिथ्याज्ञानं वा स्यात् सम्यग्ज्ञानं वा ? मिथ्याज्ञानत्वेपि संशयविपर्ययानध्यवसायात्मकम् स्यात्। तत्र न तावत्संशयविपर्ययात्मकं वा चेष्टितस्य सम्यग्ज्ञानपूर्वकत्वात्। प्राथमिकत्वाच्च तन्नास्तीति। न वाऽनध्यवसायरूपं जात्यन्धबधिररूपशब्दवत् वस्तुमात्रप्रतिपत्तेः। न सम्यग्ज्ञानमर्थाकारावलम्बनाभावात्। किञ्च

**कारणनानात्वात्कार्यनानात्वसिद्धेः॥१४॥** यथा मृत्तन्तुकारणभेदात् घटपटकार्यभेदस्तथा दर्शनज्ञानावरणक्षयोपशमकारणभेदात् तत्कार्यदर्शनज्ञानभेद इति। अस्ति प्रागवग्रहाद्दर्शनम्। ततः शुक्लकृष्णादिरूपविज्ञानसामर्थ्योपेतस्यात्मनः किं शुक्लमुत कृष्णम्? इत्यादिविशेषाप्रतिपत्तेः संशयः। ततः शुक्लविशेषाकाङ्क्षणं प्रतीहनमीहा। ततः शुक्लमेवेदं न कृष्णमित्यवायनमवायः। अवेतस्यार्थस्याविस्मरणं धारणा। एवं श्रोत्रादिषु मनस्यपि योज्यम्। तदावरणकर्मक्षयोपशमविकल्पात्प्रत्येकमवग्रहादिज्ञानावरणभेद इष्यते। कथम्? ज्ञानावरणमूलप्रकृतेः पञ्चोत्तरप्रकृतयस्तासामप्युत्तरोत्तराः प्रकृतिविशेषाः सन्ति। 'ज्ञानावरणस्योत्तरप्रकृतयोऽसंख्येयलोका'' इति वचनात्।

आह - ईहादीनाममतिज्ञानप्रसङ्गः। कुतः? परस्परकार्यत्वात्। अवग्रहः कारणं ईहा कार्यमीहा कारणमवायः कार्यमवायः कारणं धारणा कार्यम्। न चेहीदानामिन्द्रियानिन्द्रियनिमित्तत्वमस्तीति। नैष दोषः ईहादीनामनिन्द्रियनिमित्तत्वान्मतिज्ञानव्यपदेशः। यद्येवं श्रुतस्यापि प्राप्नोतीन्द्रियगृहीतविषयत्वात्। ईहादीनामन्द्रियनिमित्तत्वमप्युपचर्यते। न तु श्रुतस्यायं विधिरस्ति तस्यानिन्द्रियविषयत्वादिति श्रुतस्याप्रसङ्गः। यद्येवं चक्षुरिन्द्रियेहादिव्यपदेशाभाव इति चेन्नेन्द्रियशक्तिपरिणतस्य जीवस्य भावेन्द्रियत्वे तद्व्यापारकार्यत्वात्। इन्द्रियभावपरिणतो हि जीवो भावेन्द्रियमिष्यते तस्य विषयाकार-परिणामा ईहादय इति

चक्षुरिन्द्रियेहादिव्यपदेश इति। इमेऽवग्रहादयो मतिज्ञानप्रभेदा उक्तास्ते ज्ञानावरणक्षयोपशमनिमित्ताः केषां भवन्ति। इत्युच्यते –

## बहु बहु विधक्षिप्रानिःसृ तानुक्तध्रुवाणां सेतराणाम्॥१६॥

**संख्यावैपुल्यवाचिनो बहुशब्दस्य ग्रहणमविशेषात्॥१॥** बहुशब्दो हि वैपुल्यवाची संख्यावाची च। तस्योभयस्यापि ग्रहणं कस्मात्? अविशेषात्। संख्यायामेको द्वौ बहव इति। वैपुल्ये बहुरोदनो बहुःसूप इति।

**बह्ववग्रहाद्यभावः प्रत्यर्थवशवर्तित्वादिति चेन्न सर्वदैकप्रत्ययप्रसङ्गात्॥२॥** स्यादेतत्प्रत्यर्थवशवर्ति विज्ञानं नानेकमर्थं गृहीतुमलमतो बह्ववग्रहादीनामभाव इति। तन्न किं कारणम्? सर्वदैकप्रत्ययप्रसङ्गात्। यथाऽरण्याटव्यां कश्चिदेकमेव पुरुषमव लोकयन्नानेक इत्यवैति। मिथ्याज्ञानमन्यथा स्यादेकत्रानेकबुद्धिर्यदि भवेत्। तथा नगरवनस्कन्धावारावगाहिनोऽपि तस्यैकप्रत्ययः स्यात्सार्वकालिकः। अतश्चानेकार्थग्राहि-विज्ञानस्यात्यन्तासंभवान्नगरवनस्कन्धावारप्रत्ययनिवृत्तिः। नैताः संज्ञा ह्येकार्थनिवेशिन्य-स्तस्माल्लोकसंव्यवहारनिवृत्तिः। किञ्च,

**नानात्वप्रत्ययाभावात्॥३॥** यस्यैकार्थमेव नियमाज्ज्ञानं, तस्य पूर्वज्ञान-निवृत्तावुत्तरज्ञानोत्पत्तिः स्यादनिवृत्तौ वोभयथा च दोषः यदि पूर्वमुत्तरज्ञानो-त्पत्तिकालेऽस्ति। यदुक्तं 'एकार्थमेकमनस्त्वात्, इत्यदो विरुध्यते। यथैकं मनोऽनेक-प्रत्ययारम्भकं तथैकप्रत्ययोऽनेकार्थो भविष्यति। अनेकस्य प्रत्ययस्यैककालसंभवात् नत्वनेकार्थोपलब्धिरुपपत्स्यते। तत्र यदभिमतमेव, एकमेवैकस्य ज्ञानमेकं चार्थमुपलभते इत्यमुष्य व्याघातः। अथ पुनर्निवृत्तेः पूर्वस्मिन्नुत्तरज्ञानोत्पत्तिः प्रतिज्ञायते ननु

सर्वथैकार्थमेकमेव ज्ञानमित्यत इदमस्मादन्यदित्येष व्यवहारो न स्यात्। अस्ति च सः, तस्मान्न किञ्चिदेतत्। किञ्च

**आपेक्षिकसंव्यवहारनिवृत्तेः॥४॥** यस्यैकज्ञानमनेकार्थविषयं न विद्यते, तस्य मध्यमाप्रदेशिन्योर्युगपदनुपलम्भात्तद्विषयदीर्घह्रस्वव्यवहारो विनिवर्तेत। आपेक्षिको ह्यसौ न वाऽपेक्षास्ति। किञ्च,

**संशयाभावप्रसङ्गात् ॥५॥** एकार्थविषयवर्तिनि विज्ञाने स्थाणौ पुरुषे वा प्राक्प्रत्ययजन्म स्यात् नोभयो; प्रतिज्ञातविरोधात्। यदि स्थाणौ पुरुषाभावात्स्थाणुबन्ध्यापुत्रवत् संशयाभावः स्यात्। अथ पुरुषे तथा स्थाणुद्रव्यानपेक्षत्वात्संशयो न स्यात्, तत्पूर्ववत्। नत्वभाव इष्टः; अतो नैकार्थग्राहिविज्ञानकल्पना श्रेयसीति। किञ्च,

**ईप्सितनिष्पत्त्यनियमात् ॥६॥** विज्ञानस्यैकार्थावलम्बित्वे चित्रकर्मणि निष्णातस्य चैत्रस्य पूर्णकलशमालिखतः तत्क्रियाकलशतत्प्रकारग्रहणविज्ञानभेदादितरेतरविषय-संक्रमाभावाऽनेकविज्ञानोत्पादनिरोधक्रमे सत्यनियमेन निष्पत्तिः स्यात्। दृष्टा तु सा नियमेन। सा चैकार्थग्राहिणि विज्ञाने विरुध्यते। तस्मान्नानार्थोपि प्रत्ययोऽभ्युपेयः।

**द्वित्रादिप्रत्ययाभावाच्च॥७॥** एकार्थविषयवर्तिनि विज्ञाने द्वाविमौ इमे त्रय इत्यादि प्रत्ययस्याभावः। यतो नैकं विज्ञानं द्वित्र्याद्यर्थानां ग्राहकमस्ति।

**सन्तानसंस्कारकल्पनायां च विकल्पानुपपत्तिः॥८॥** सन्ताने संस्कारे च कल्प्य-माने विकल्पयोरनुपपत्तिः। स सन्तानः संस्कारश्च ज्ञानजातीयो वा स्यादज्ञानजातीयो वा? यद्यज्ञानजातीयो न ततः किञ्चित्प्रयोजनमस्ति। ज्ञानजातीयत्वेप्येकार्थग्राहित्वं वास्यादनेकार्थग्राहित्वं वा? यद्येकार्थग्राहित्वं दोषविधिस्तदवस्थः। अथानेकार्थग्राहित्वम्? प्रतिज्ञाहानिः प्रसज्यते।

**विधग्रहणं प्रकारार्थम् ॥९॥** विधयुक्तगतप्रकाराः समानार्था इति प्रकारार्थो विधशब्दः। बहु विधं बहु प्रकारमित्यर्थः।

**क्षिप्रग्रहणमचिरप्रतिपत्त्यर्थम्॥१०॥** अचिरप्रतिपत्तिः कथं स्यादिति? क्षिप्रग्रहणं क्रियते।

**अनिःसृतग्रहणमसकलपुद्गलोद्गमार्थम्॥११॥** अनिःसृतग्रहणं क्रियतेऽसकलपुद्गलोद्ग-मार्थम्।

**अनुक्तमभिप्रायेण प्रतिपत्तेः॥१२॥** 'अभिप्रायेण प्रतिपत्तिरस्ति' इत्यनुक्तग्रहणं क्रियते।

**ध्रुवं यथार्थग्रहणात् ॥१३॥** ध्रुवग्रहणं क्रियते, यथार्थग्रहणमस्तीति।

**सेतरग्रहणाद्विपर्ययावरोधः॥१४॥** अल्पमल्पविधं चिरं निःसृतमुक्तमध्रुवमित्येतेषामवरोधो भवति, सेतरग्रहणात्।

**अवग्रहादिसंबन्धात्कर्मनिर्देशः॥१५॥** बह्वादीनामिति कर्मनिर्देशोऽवग्रहाद्यपेक्षो वेदितव्यः।

**बह्वादीनामादौ वचनं विशुद्धिप्रकर्षयोगात् ॥१६॥** ज्ञानावरणक्षयोपशमविशुद्धि-प्रकर्षयोगे सति बह्वादीनामवग्रहादयो भवन्तीति तेषां ग्रहणमादौ क्रियते।

ते च प्रत्येकमिन्द्रियानिन्द्रियेषु द्वादशविकल्पा नेयाः तद्यथा प्रकृष्टश्रोत्रेन्द्रिया-वरणवीर्यान्तरायक्षयोपशमाङ्गोपाङ्गनामोपष्टम्भात्संभिन्नश्रोताऽन्यो वा युगपत्ततवितत-घनसुषिरादिशब्दश्रवणाद्बहुशब्दमवगृह्णाति। अल्पश्रोत्रेन्द्रियावरणक्षयोपशमपरिणाम आत्मा, ततशब्दादीनामन्यतममल्पं शब्दमवगृह्णाति। प्रकृष्टश्रोत्रेन्द्रियावरणक्षयोपशमादिसन्निधाने सति

ततादिशब्दविकल्पस्य प्रत्येकमेकद्वित्रिचतुःसंख्येयासंख्येयानन्तगुणस्यावग्राहकत्वात् बहुविधमवगृहणाति। अल्पविशुद्धिश्रोत्रेन्द्रियादिपरिणामकारण आत्मा ततादिशब्दानामेकविधावग्रहणादेकविधमवगृहणाति। प्रकृष्टश्रोत्रेन्द्रियावरणक्षयोपशमादिपरिणामित्वात् क्षिप्रं शब्दमवगृहणाति। अल्पश्रोत्रेन्द्रियावरणक्षयोपशमादिपारिणामिकत्वाच्चिरेण शब्दमव-गृहणाति। सुविशुद्धश्रोत्रादिपरिणामात्साकल्येनानुच्चारितस्य ग्रहणादनिःसृतमवगृहणाति। निःसृतं प्रतीतम्। प्रकृष्टविशुद्धिश्रोत्रेन्द्रियादिपरिणामकारणात्वादेकवर्णनिर्गमेपि अभिप्राये-णैवानुच्चारितं शब्दमवगृहणाति। इमं भवान् शब्दं वक्ष्यतीति। अथवा स्वरसंचारणात्प्राक् तन्त्रीद्रव्यातोद्याद्यामर्शनेनैवाऽवादितमनुक्तमेव शब्दमभिप्रायेणाव-गृहयाऽऽचष्टे 'भवानिमं शब्दं वादयिष्यति' इति। उक्तं प्रतीतम्। संक्लेशपरिणामनिरुत्सुकस्य यथानुरूपश्रोत्रेन्द्रियावरणक्षयोपशमादिपरिणामकारणावस्थितत्वात् यथा प्राथमिकं शब्दग्रहणं तथावस्थितमेव शब्दमवगृहणाति नोनं नाभ्यधिकम्। पौनःपुन्येन संक्लेशविशुद्धिपरिणामकारणापेक्षस्यात्मनो यथानुरूपपरिणामोपात्तश्रोत्रेन्द्रियसान्निध्येऽपि तदावरणस्येषदीषदाविर्भावात्पौनःपुनिकं प्रकृष्टावकृष्टश्रोत्रेन्द्रियावरणादिक्षयोपशमपरिणामत्वाच्चाऽध्रुवमवगृहणाति। शब्दं क्वचिद्वहुं क्वचिदल्पं क्वचिद्बहुविधं क्वचिदेकविधं क्वचित् क्षिप्रं क्वचिच्चिरं क्वचिदनिःसृतं क्वचिन्निसृतं क्वचिदुक्तं क्वचिदनुक्तम्

अत्राह - बहुबहुविधयोः कः प्रतिविशेषो यावतोभयत्रापि ततादिशब्दग्रहणमविशिष्टमस्ति? उच्यते – न, विशेषदर्शनात्। यथा कश्चित् वहूनि शास्त्राणि मौलेन सामान्यार्थेनाविशेषितेन व्याचष्टे न तु बहुभिर्विशेषितार्थैः। कश्चिच्च तेषामेव बहूनां शास्त्राणां बहुभिरर्थैः परस्परातिशययुक्तैर्बहुविकल्पैर्व्याख्यानं करोति। तथा ततादिशब्दग्रहणाविशेषेऽपि यत्प्रत्येकं ततादिशब्दानामेकद्वित्रिचतुःसंख्येयाऽसंख्येयाऽनंतगुणपरिणतानां ग्रहणं तद्बहुविधग्रहणम्। यत्ततादीनां सामान्यग्रहणं तद्बहुग्रहणम्।

आह - उक्तनिःसृतयोः कः प्रतिविशेषः? यतः सकलशब्दनिःसरणान्निःसृतमुक्त-मप्येवंविधमेव ? उच्यते – अन्योपदेशपूर्वकं शब्दग्रहणमुक्तं गोशब्दोऽयमिति। स्वत एव ग्रहणं निःसृतम् ।

चक्षुषा तु विशुद्धचक्षुरिन्द्रियावरणक्षयोपशमपरिणामकारणत्वाच्छुक्लकृष्णरक्त-नीलपीतरूपपर्यायं बहुमवगृहणाति। अल्पं पूर्ववत् । प्रकृष्टविशुद्धिचक्षुरिन्द्रियादिक्षयो-पशमपरिणामकारणत्वाच्छुक्लादिपञ्चतयरूपगुणस्य प्रत्येकमेकद्वित्रिचतुःसंख्येयासंख्येया-नन्तगुणपरिणामिनोऽवग्राहकत्वसामर्थ्याद्बहुविधरूपमवगृहणाति, एकविधं पूर्ववत् । क्षिप्रचिर-योरप्युक्त एव क्रमः। पञ्चवर्णवस्त्रकम्बलचित्रपटादीनां सकृदेकदेशविषयपञ्चवर्णग्रहणा-त्कृत्स्नपञ्चवर्णेष्वदृष्टेष्वनिःसृतेष्वपि तद्वर्णाविष्करणसामर्थ्यादनिःसृतमवगृहणाति। अथवा देशान्तरस्थपञ्चवर्णपरिणतैकवस्त्रादिकथनात्साकल्येनाऽकथितस्याप्येकदेशकथनेनैव तत्कृत्स्नपञ्चवर्णग्रहणादनिःसृतम् । निःसृतं प्रतीतम् सुविशुद्धिचक्षुरिन्द्रियादिक्षयोपशम आत्मा शुक्लकृष्णादिवर्णमिश्रीकरणदर्शनात्परेणाकथितमपि वर्णमभिप्रायेणैव प्रतिपद्यते– भवानिमं वर्णमेतद्वर्णद्वयमिश्रणात्करिष्यतीत्येवं ग्रहणादनुक्तं रूपमवगृहणाति। अथवा देशान्तरस्थपञ्चवर्णैकद्रव्यकथने ताल्वादिकरणसंश्लेषात्प्राक् सकृदप्यकथितमेव द्रव्यमाचष्टे भवानेवंविधमस्माकं पञ्चवर्णं व्यतिकरिष्यतीत्यनुक्तं रूपमवगृहणाति। परकीयाभिप्रायानपेक्षमात्मीयचक्षुरिन्द्रियपरिणामसामर्थ्यादेवोक्तं रूपमवगृहणाति। संक्लेश-परिणामनिरुत्सुकस्य यथानुरूपं चक्षुरिन्द्रियावरणक्षयोपशमपरिणामकारणावस्थित-त्वाद्यथा प्राथमिकं रूपग्रहणं तथावस्थितमेव रूपमवगृहणाति नोनं नाभ्यधिकम्। पौनः पुन्येन संक्लेशविशुद्धिपरिणामापेक्षस्याऽऽत्मनो यथानुरूपपरिणामोपात्तचक्षुरिन्द्रिय-सान्निध्येऽपि तदावरणस्येषदीषदाविर्भावात् पौनःपुनिकं प्रकृष्टावकृष्टचक्षुरिन्द्रियावरण-

क्षयोपशमपरिणामकारणत्वाच्चाध्रुवमवगृह्णाति रूपं क्वचिद् बहु क्वचिदल्पं क्वचिद्बहुविधं क्वचिदेकविधं क्वचित् क्षिप्रं क्वचिच्चिरेण क्वचिदनिसृतं क्वन्निःसृतं, क्वचिदनुक्तं क्वचिदुक्तम्। एवं घ्राणाद्यवग्रहेष्वपि योज्यं। तथेहावायधारणा अपि बह्वादिभिः सेतरैरवसेया। कश्चिदाह – श्रोत्रघ्राणस्पर्शनरसनचतुष्टयस्य प्राप्यकारित्वादनिःसृतानुक्तशब्दाद्यवग्रहेहावायधारणा न युक्तेति। उच्यते –

**अप्राप्तत्वात् ॥१७॥** कथम् ?

**पिपीलिकादिवत् ॥१८॥** यथा पिपीलिकादीनां घ्राणरसनदेशाप्राप्तेऽपि गुडादिद्रव्ये गंधरसज्ञानं, तच्च यैश्च यावद्भिश्चास्मदाद्यप्रत्यक्षसूक्ष्मगुडावयवैः पिपीलिकादि-घ्राणरसनेन्द्रिययोः परस्परानपेक्षावृत्तिस्ततो न दोषः।

**अस्मदादीनां तदभाव इति चेन्न श्रुतापेक्षत्वात् ॥१९॥** यथा भूगृहसंबन्धिमो-त्थितस्य पुंसश्चक्षुरादिभिरवभासितेष्वपि घटादिषु घटोयं रूपमिदमित्यादि यद्विशेष-परिज्ञानं तच्छ्रुतापेक्षं परोपदेशापेक्षत्वात्, तथाऽस्मदादीनामप्यनिःसृतानुक्तमपि ज्ञानविकल्पशब्दात् यदवग्रहादिज्ञानं तच्छ्रुतोपेक्षम्। किञ्च-

**लब्ध्यक्षरत्वात् ॥१७॥** श्रुतज्ञानप्रभेदप्ररूपणायां लब्ध्यक्षरश्रुतकथनं षोढा प्रविभक्तम्। तद्यथा - चक्षुःश्रोत्रघ्राणरसनस्पर्शनमनोलब्ध्यक्षरमित्यार्ष उपदेशः। अत-श्चक्षुःश्रोत्रघ्राणरसनस्पर्शनेन्द्रियमनोलब्ध्यक्षरसान्निध्यादेतत्सिध्यति, अनिःसृतानुक्ताना-मपि शब्दादीनामवग्रहादिज्ञानम्।

यद्यवग्रहादयो वह्वादीनां कर्मणामाक्षेप्तारो वह्वादीनि पुनर्विशेषणानि कस्य?, इत्यत आह –

## अर्थस्य॥१७॥

चक्षुरादिविषयोऽर्थस्तस्य बह्वादिविशेषणविशिष्टस्याऽवग्रहादयो भवन्ति।

**इयर्ति पर्यायानर्यते वा तैरित्यर्थो द्रव्यम्॥१॥** प्रत्यात्मसंबन्धिनः पर्यायानुभय-निमित्तवशादुत्पत्तिप्रत्यागूर्णानियर्ति गच्छत्यर्यते गम्यते वा तैरित्यर्थः। कः पुनरसौ? द्रव्यम्। किमर्थमिदमुच्यते –

**अर्थवचनं गुणग्रहणनिवृत्त्यर्थम्॥२॥** केचिद्रूपादयो गुणा एवेन्द्रियैः सन्निकृष्यन्ते। ततस्तद्ग्रहणमिति मन्यन्ते। तन्मतनिवृत्त्यर्थमर्थस्येत्युच्यते। न हि ते रूपादयो गुणा अमूर्ता इन्द्रियसन्निकर्षमापद्यन्ते इति। तत्प्रचयविशेषे सति सन्निकर्षसंभवः इति चेन्न, गुणादीनां प्रचयानुपपत्तेः। सत्यपि वा प्रचयेऽर्थान्तरप्रादुर्भावाभावात् सूक्ष्मावस्थानतिक्रमादग्रहणमेवैषां स्यात्। न तर्हीदानीमिदं भवति – 'रूपं मया दृष्टं गन्धो वा घ्रात' इति। भवति चार्थग्रहणात् तदव्यतिरेकात्तेषामपि ग्रहणोपपत्तेः।

**तेषु सत्सु मतिज्ञानात्मलाभात्सप्तमीप्रसङ्गः॥३॥** यतो विषयेषु सत्सु मतिज्ञानमाविर्भवत्यतोऽर्थ इति वाच्यम्।

**न, अनेकान्तात्॥४॥** नायमेकान्तोस्ति - सत्यर्थे मतिज्ञानं भवतीति। यतः सत्यप्यर्थेऽवनितलभवनसंभूतस्य कुमारस्योत्तीर्णमात्रस्य घटरूपादिमतिज्ञानाभावः। अथवा नायमेकान्तोऽस्त्यधिकरणस्य सत्वात्सप्तमीप्रसङ्ग इति। कस्मात्तस्याविवक्षितत्वात्। विवक्षावशाद्धि कारकाणि भवन्ति।

**क्रियाकारकसंबंधस्य विवक्षितत्वात्॥५॥** अवग्रहादयः क्रियाविशेषा उक्तास्तेषामवश्यं केनचित् कर्मणा भवितव्यमिति बह्वादिविकल्पस्यार्थस्येत्युच्यते।

**बह्वादिसामानाधिकरण्याद्बहुत्वप्रसङ्गः॥६॥** यतो बह्वादिरेवार्थः नातोऽन्यस्ततो बह्वादिसामानाधिकरण्यादर्थानामिति बहुत्वं प्राप्नोति?

**न वाऽनभिसंबन्धात् ॥७॥** न वैष दोषः. किं कारणम्?, अनभिसंबन्धात्। न ह्यस्य बहुत्वादिभिरभिसंबन्धः क्रियते। केन तर्हि?

**अवग्रहादिभिः॥८॥** कस्येत्युक्तेऽर्थस्येतीह संबध्यते। तद्विशेषणं बह्वादिग्रहणम्।

**सर्वस्य वाऽर्यमाणत्वात् ॥९॥** अथवा सर्वस्यार्यमाणस्यार्थत्वमतो जातिप्रधानत्वान्निर्देशस्यार्थस्येत्येकत्वनिर्देशो युक्तः।

**प्रत्येकमभिसंबन्धाद्वा॥१०॥** अथवा प्रत्येकमभिसंबन्धः क्रियते। बह्वोरर्थस्य बहुविधस्यार्थस्येति।

किममी अवग्रहादयः सर्वस्येन्द्रियानिन्द्रियार्थस्य भवन्त्युत कश्चिद्विषयविशेषोऽस्ति? अत आह –

## व्यञ्जनस्यावग्रहः॥१८॥

व्यञ्जनमव्यक्तं शब्दादिजातं। तस्यावग्रहो भवति किमर्थमिदम्? नियमार्थम्। अवग्रह एव नेहादय इति। स तर्ह्येवकारः कर्तव्यः?

**न वा सामर्थ्यादवधारणप्रतीतेरब्भक्षवत् ॥१॥** न वा कर्तव्यः। किं कारणम्?, सामर्थ्यादवधारणप्रतीतेः। कथम्? अब्भक्षवत्। यथा न कश्चिदपो न भक्षयतीति सामर्थ्यादवधारणं प्रतीयते, अप एव भक्षयतीति। तथा सर्वेषामवग्रहादीनां प्रसिद्धौ अवग्रहवचनमवधारणार्थं विज्ञायते।

**तयोरभेदो ग्रहणाविशेषादिति चेन्न व्यक्ताव्यक्तभेदादभिनवशरावव‌त् ॥२॥** स्यादेत-त्तयोरर्थावग्रहव्यंजनावग्रहयोर्नास्तिभेदः ग्रहणाविशेषात्। न हि शब्दादिग्रहणं प्रति विशेषोस्तीति; तन्न किं कारणम्? व्यक्ताव्यक्तभेदात्। व्यक्तग्रहणमर्थावग्रहः। अव्यक्तग्रहणं व्यञ्जनावग्रहः। कथम्? अभिनवशराववत्। यथा सूक्ष्मजलकणद्वित्रिसिक्तः शरावोऽभिनवो नार्द्री भवति। स एव पुनः पुनः सिच्यमानः शनैस्तिम्यति। तथात्मनः शब्दादीनां व्यक्तग्रहणात्प्राक् व्यञ्जनावग्रहः। व्यक्तग्रहणमर्थावग्रहः।

सर्वेन्द्रियाणामविशेषेण व्यञ्जनावग्रहप्रसङ्गे यत्रासंभवस्तदर्थं प्रतिषेधमाह –

## न चक्षुरनिन्द्रियाभ्याम्॥१९॥

चक्षुषाऽनिन्द्रियेण च व्यञ्जनावग्रहो न भवति। कुतः?

**व्यञ्जनावग्रहाभावश्चक्षुर्मनसोरप्राप्यकारित्वात् ॥१॥** यतोऽप्राप्तमर्थमविदिक्कं युक्तं सन्निकर्षविषयेऽवस्थितं बाह्यप्रकाशाभिव्यक्तमुपलभते। चक्षुर्मनश्चाऽप्राप्तं, ततो नानयोर्व्यञ्जनावग्रहोऽस्ति।

**इच्छामात्रमिति चेन्न सामर्थ्यात् ॥२॥** स्यादेतदिच्छामात्रमिदमाप्तार्थावग्राहि चक्षुरिति, तन्न किं कारणम्? सामर्थ्यात्। कथं सामर्थ्यम्? आगमतो युक्तितश्च आगमस्तावत् –

**"पुट्ठं सुणेदि सद्दं अपुट्ठं पुण पस्सदे रूवं।**

**गंधं रसं च फासं बद्धं पुट्ठं विजाणादि॥" इति।**

युक्तितोऽप्यप्राप्यकारि चक्षुः स्पृष्टानवग्रहात्। यदि प्राप्यकारि स्यात्, त्वगिन्द्रिय-वत्स्पृष्टमञ्जनं गृह्णीयात्। न च गृह्णात्यतो मनोवदप्राप्यकारीत्यवसेयम्।

अत्र केचिदाहुः प्राप्यकारि चक्षुरावृतानवग्रहात् त्वगिन्द्रियवदिति। अत्रोच्यते - काचाभ्रस्फटिकावृतार्थावग्रहे सत्यव्यापकत्वादसिद्धो हेतु; वनस्पतिचैतन्ये स्वापवत्। तथा संशयहेतुः, अप्राप्यकारिण्ययस्कान्तोपले साध्यविपक्षेऽपि दर्शनादिति। भौतिकत्वा-त्प्राप्यकारि चक्षुरग्निवदिति चेन्न; अयस्कान्तेनैव प्रत्युक्तत्वात्। बाह्येन्द्रियत्वा-त्प्राप्यकारि चक्षुरिति चेन्न; द्रव्येन्द्रियोपकरणस्य भावेन्द्रियस्य प्राधान्यात्। अप्राप्यकारित्वे व्यवहितातिविप्रकृष्टग्रहणप्रसङ्गः, इति चेन्नायस्कान्तेनैव प्रत्युक्तत्वात्। अयस्कान्तोपलमप्राप्य लोहमाकर्षदपि न व्यवहितमाकर्षति नातिविप्रकृष्टमिति। संशयावस्थमेतदित्यप्राप्यकारित्वे संशयविपर्ययाभाव इति चेन्न तत्प्राप्यकारित्वेऽपि तदविशेषात्।

कश्चिदाह – रश्मिवच्चक्षुः, तैजसत्वात्तस्मात्प्राप्यकारीत्यग्निवदित्येतच्चायुक्त-मनभ्युपगमात्। न हि वयमभ्युपगच्छामस्तैजसं चक्षुरिति। तेजोलक्षणमौष्ण्यमिति कृत्वा चक्षुरिन्द्रियस्थानमुष्णं स्यात् । न च तद्देशं स्पर्शनेन्द्रियमुष्णस्पर्शोपलम्भि दृष्टमिति। इतश्चातैजसं चक्षुर्भासुरत्वानुपलब्धेः। अदृष्टवशादनुष्णाभासुरत्वमिति चेन्ना-दृष्टस्य गुणत्वादक्रियस्य भावस्वभावनिग्रहासामर्थ्यात्। नक्तञ्चररश्मिदर्शनाद्रश्मिवच्चक्षु-रिति चेन्नाऽतैजसोपि पुद्गलद्रव्यस्य भासुरत्वपरिणामोपपत्तेरिति।

किञ्च; गतिमद्वैधर्म्यादिह यद्गतिमद्भवति न तत्सन्निकृष्टविप्रकृष्टावर्थाव-भिन्नकालं प्राप्नोति। न च तथा चक्षुः। चक्षुर्हि शाखाचन्द्रमसावभिन्नकालमुपलभते, यावता कालेन शाखां प्राप्नोति तावता चन्द्रमसमिति स्पष्टं गतिमद्वैधर्म्यं तस्मान्न गतिमच्चक्षुरिति। यदि च प्राप्यकारि चक्षुः स्यात्तमिस्रायां रात्रौ दूरेऽग्नौ प्रज्वलति तत्समीपगत द्रव्योपलम्भनं भवति कुतो नान्तरालगतद्रव्यालोचनम्? प्रकाशाभावादिति चेन्न तैजसत्वादग्न्यादिवत् सहायान्तरापेक्षत्वप्रसङ्गात्।

किं च यदि प्राप्यकारि चक्षुः स्यात्सान्तराधिकग्रहणं न प्राप्नोति। न हीन्द्रियाणां निरन्तरे विषये गन्धादौ सान्तरग्रहणं दृष्टं नाऽप्यधिकग्रहणम्। अथ मतम् – बहिरधिष्ठानाद्वृत्तिरिन्द्रियस्यात उपपन्नं तद्विषयस्य सान्तराधिकग्रहणमिति; तदयुक्तम् - यस्मान्न बहिरधिष्टानादिन्द्रियं तत्र चिकित्सादिदर्शनादन्यथाऽधिष्ठानपिधानेपि ग्रहण-प्रसङ्गो मनसश्चाबहिर्भावात्। मनसाऽधिष्ठितं हीन्द्रियं स्वविषये व्याप्रियते न च मनो बहिरधिष्ठानमस्ति तदभावादग्रहणप्रसङ्गोऽनुवृत्तौ च संभवाभावाद्विप्रकीर्णः चक्षूरश्मिसमूहः, कथमणुमनोऽधिष्ठास्यति?

कश्चिदाह - श्रोत्रमप्राप्यकारि विप्रकृष्टविषयग्रहणादिति; एतच्चायुक्तमसिद्धत्वात्। साध्यं तावदेतद्विप्रकृष्टं शब्दं गृह्णाति श्रोत्रमुतघ्राणेन्द्रियवदवगाढं स्वविषयभावपरिणतं पुद्गलद्रव्यं गृह्णातीति? विप्रकृष्टशब्दग्रहणे च स्वकर्णतान्तर्विलगतमशकशब्दो नोपलभ्येत न हीन्द्रियं किञ्चिदेकं दूरस्पष्टविषयग्राहि दृष्टमिति। आकाशगुणत्वाच्छब्दस्य स्पर्शवद्गुणत्वाभाव इति चेन्नाऽमूर्तगुणस्यात्मगुणवदिन्द्रियविषयत्वादर्शनादिति। प्राप्ताव-ग्रहे श्रोत्रस्य दिग्देशभेदविशिष्टविषयग्रहणाभाव इति चेन्न शब्दपरिणतविसर्पत्पुद्गल-वेगशक्तिविशेषस्य तथाभावोपत्तेः। सूक्ष्मत्वादप्रतिघातात्समन्ततः प्रवेशाच्च। सिद्धमेतच्च-क्षुर्मनसी वर्जयित्वा शेषाणामिन्द्रियाणां व्यञ्जनावग्रहः सर्वेषामिन्द्रियाणामर्थावग्रह इति।

**मनसोऽनिन्द्रियव्यपदेशाभावः स्वविषयग्रहणे करणान्तरानपेक्षत्वाच्चक्षुर्वत् ॥3॥**

यथा चक्षू रूपग्रहणे करणान्तरं नापेक्षत इतीन्द्रियव्यपदेशं लभते तथा मनोपि गुणदोषविचारादिस्वव्यापारे करणान्तरं नापेक्षत इतीन्द्रियं प्राप्नोति नानिन्द्रियमिति।

**न वाप्रत्यक्षत्वात् ॥४॥** न वैष दोषः किं कारणम्? अप्रत्यक्षत्वात्। यथा चक्षुरादिपरस्परस्यैन्द्रियकत्वात्प्रत्यक्षं न तथा मन ऐन्द्रियकम्। कुतः? सूक्ष्मद्रव्य-परिणामात्तस्मादनिन्द्रियमित्युच्यते। अत्राह – कथमवगम्यतेऽप्रत्यक्षं तदस्तीति?

**अनुमानात्तस्याधिगमः॥५॥** अप्रत्यक्षाणामप्यर्थानां लोकेऽनुमानादधिगतिर्दृष्टा, यथाऽऽदित्यस्य गतिः। वनस्पतीनां च वृद्धिह्रासौ। तथा मनसोप्यस्तित्वमनुमाना-दवगम्यते। कोऽसावनुमानः?

**युगपज्ज्ञानक्रियानुत्पत्तिर्मनसो हेतुः॥६॥** सत्सु चक्षुरादिकरणेषु शक्तिमत्सु च बाह्येषु रूपादिषु, सति चानेकस्मिन् प्रयोजने, यतो ज्ञानानां क्रियाणां च युगपदनुत्पत्तिः, तदस्ति मन इत्यनुमीयते।

**अनुस्मरणदर्शनाच्च॥७॥** यतः सकृ दृष्टं श्रुतं वाऽनुस्मर्यते। अतस्तद्दर्शनात्त-दस्तित्वमवसेयम्। अत्राह - एकस्यात्मनः कुतः करणभेदः?

**ज्ञस्वभावस्यापि करणभेदोऽनेककलाकुशलदेवदत्तवत् ॥८॥** यथा अनेकज्ञानक्रिया-शक्तियुक्तस्यापि देवदत्तस्य करणभेदो दृश्यते। चित्रकर्मणि वर्तमानस्य वर्तिकालेखनी-कूर्चिकाद्युपकरणापेक्षा। काष्ठकर्मणि वर्तमानस्य वासीघटमुखवृक्षादानादिकरणापेक्षा, तथात्मनोऽपि क्षयोपशमभेदात् ज्ञानक्रियापरिणामशक्तियुक्तस्य चक्षुराद्यनेककरणापेक्षा न विरुध्यते।

**स नामकर्मसामर्थ्यात् ॥९॥** स एष करणभेदः नामकर्मसामर्थ्याद्वेदितव्यः। कथमिह यदेतच्छरीरनामकर्मोदयाद्यापादितं यवनालिकासस्थानं श्रोत्रेन्द्रियम्। एतदेव शब्दोपल-ब्धिसहिष्णु नेतराणि। तथा यदेतद् घ्राणेन्द्रियमतिमुक्तकचन्द्रकसंस्थानमेतदेव गन्धावगमसमर्थं नेतराणि। तथा यदेतज्जिह्वेन्द्रियं क्षुरप्राकृति, एतदेव रसावगमेऽलं

नान्यानि। तथा यदेतत्स्पर्शनेन्द्रियमनेकाकृति तदेव स्पर्शोपलम्भनेऽलं नेतराणि। तथा यदेतच्चक्षुरिन्द्रियं मसूरिकाकारं कृष्णताराधिष्ठानं तदेव रूपाविष्करणेऽलं नेतराणीति।

एवमाभिनिबोधिकं द्रव्यक्षेत्रकालभावैरवसेयम्। द्रव्यतो मतिज्ञानी सर्वद्रव्याण्य-सर्वपर्यायाण्युपदेशेन जानाति। क्षेत्रत उपदेशेन सर्वक्षेत्राणि जानाति। अथवा क्षेत्रं विषयः। चक्षुषः क्षेत्रं सप्तचत्वारिंशद्योजनसहस्त्राणि त्रिषष्ठ्यधिके च द्वे योजनशते योजनस्य चैकविंशतिषष्टिभागाः। श्रोत्रस्य क्षेत्रं द्वादशयोजनानि। घ्राणरसनस्पर्शनानां नवयोजनानि। कालत उपदेशेन सर्वकालं जानाति। भावत उपदेशेन जीवादीनामौदयिकादीन् भावान् जानाति। तत्सामान्यादेकमिन्द्रियानिन्द्रियभेदाद्द्विधा, अवग्रहादिभेदाच्चतुर्धा, तैरिन्द्रिय-गुणतैश्चतुर्विंशतिविधं, तैरेव व्यंजनावग्रहाधिकैरष्टाविंशतिविधम्। तैरेव मूलभङ्गा-धिकैर्द्रव्यादिसहितैर्वा द्वात्रिंशद्विधम्। त एते त्रयो विकल्पा वह्वादिभिः षड्भिरितरान-पेक्षैर्गुणिताश्चतुश्चत्वारिंशच्छतमष्टषष्ट्युत्तरशतं, द्वानवत्यधिकं शतमिति च भवन्ति। त एव बह्वादिभिर्द्वादशगुणिता द्वे शते अष्टाशीत्युत्तरे, त्रीणि शतानि षट्त्रिंशानि, चतुरशीत्यधिकानि त्रीणि शतानि च भवन्ति। आह – व्यंजनावग्रहे बह्वाद्यभावः। कस्मात्? अव्यक्तत्वात्। उच्यते – अवग्रहवत् तत्सिद्धिः। यथाऽव्यक्तग्रहणमवग्रहस्तथा बह्वादिविकल्पोऽव्यक्तरूपेणैव वेदितव्यः। अथानिःसृते कथम्? तत्रापि ये च यावन्तश्च पुद्गलाः सूक्ष्मानिःसृताः सन्ति, सूक्ष्मास्तु साधारणैर्न गृह्यन्ते? तेषामिन्द्रियस्थाना-वगाहनमनिःसृतं व्यंजनावग्रहः।

परोक्षे द्वैविध्ये सत्युपक्लृप्तलक्षणविकल्पमतिज्ञानविधर्मि यद् द्वितीयमुपदिष्टं तत्किन्निमित्तं कतिविधं चेत्युच्यते –

### श्रुतं मतिपूर्वं द्व्यनेकद्वादशभेदम्॥२०॥

**श्रुतशब्दो जहत्स्वार्थवृत्ती रूढिवशात् कुशलशब्दवत्॥१॥** यथा कुशलशब्दः कुशलवनक्रियां प्रतीत्य व्युत्पादितः तद्धित्वा सर्वत्र पर्यवदाते वर्तते। तथा श्रुतशब्दोपि श्रवणमुपादाय व्युत्पादितो रूढिवशात् कस्मिंश्चिज्ज्ञानविशेषे वर्तते।

**कार्यप्रतिपालनात् पूरणाद्वा पूर्वं कारणम्॥२॥** कार्यं पालयति पूरयतीति वा पूर्वं कारणं लिङ्गं निमित्तमित्यनर्थान्तरम्। मतिज्ञानं व्याख्यातं तत्पूर्वमस्येति। पूर्वं मतिकारणकमित्यर्थः।

**मतिपूर्वकत्वे श्रुतस्य तदात्मकत्वप्रसङ्गो घटवत्, अतदात्मकत्वे वा तत्पूर्वकत्वाभावः॥३॥** कश्चिदाह मतिपूर्वं श्रुतं तदपि मत्यात्मकं प्राप्नोति। कारणगुणानुविधानं हि कार्यं दृष्टम्। यथा मृन्निमित्तो घटो मृदात्मकः। अथाऽतदात्मकत्वमिष्यते तत्पूर्वत्वं तर्हि तस्य हीयते इति।

**न वा, निमित्तमात्रत्वाद्दण्डादिवत्॥४॥** न वैष दोषः। किं कारणम्? निमित्तमात्रत्वाद् दण्डादिवत्। यथा मृदः स्वयमन्तर्घटभवनपरिणामाभिमुख्ये दण्डचक्र-पौरुषेयप्रयत्नादि निमित्तमात्रं भवति, यतः सत्स्वपि दण्डादिनिमित्तेषु शर्करादिप्रचितो मृत्पिण्डः स्वयमन्तर्घटभवनपरिणामनिरुत्सुकत्वान्न घटीभवति। अतो मृत्पिण्ड एव बाह्यदण्डादिनिमित्तापेक्ष आभ्यन्तरपरिणामसान्निध्याद् घटो भवति न दण्डादयः, इति दण्डादीनां निमित्तमात्रत्वम्। तथा पर्यायिपर्याययोः स्यादन्यत्वदात्मनः स्वयमन्तः-श्रुतभवनपरिणामाभिमुख्ये मतिज्ञानं निमित्तमात्रं भवति यतः सत्यपि सम्यग्दृष्टेः श्रोत्रेन्द्रियबलाधाने बाह्याचार्यपदार्थोपदेशसन्निधाने च श्रुतज्ञानावरणोदयवशीकृतस्य स्वयमन्तःश्रुतभवननिरुत्सुकत्वादात्मनो न श्रुतं भवति अतो बाह्यमतिज्ञाना-दिनिमित्तापेक्ष आत्मैव आभ्यन्तरश्रुतज्ञानावरणक्षयोपशमापादितश्रुतभवनपरिणामाभि-मुख्यात् श्रुतीभवति न मतिज्ञानस्य श्रुतीभवनमस्ति, तस्य निमित्तमात्रत्वात्।

**अनेकान्ताच्च॥५॥** नाऽयमेकान्तोऽस्ति-'कारणसदृशमेव कार्यम्' इति। कुतः? तत्रापि सप्तभङ्गीसंभवात्। कथम्? घटवत्। यथा घटः कारणेन मृत्पिण्डेन स्यात्सदृशः स्यान्न सदृश इत्यादि। मृद्द्रव्याजीवानुपयोगाद्यादेशात् स्यात्सदृशः पिण्डघटसंस्थानादि-पर्यायादेशात् स्यान्न सदृशः। पूर्ववदुत्तरे च भङ्गा नेतव्याः। यस्यैकान्तेन कारणानुरूपं कार्यम्, तस्य घटपिण्डशिविकादिपर्याया उपालभ्यन्ते। किञ्च, घटेन जलधारणादिव्या-पारो न क्रियते मृत्पिण्डे तददर्शनात्। अपि च मृत्पिण्डस्य घटत्वेन परिणामवद् घटस्यापि घटत्वेन परिणामः स्यादेकान्तसदृशत्वात्। न चैवं भवति। अतो नैकान्तेन कारणसदृशत्वम्। तथा श्रुतं सामान्यादेशात् स्यात्कारणसदृशं यतो मतिरपि ज्ञानं श्रुतमपि। अव्यवहिताभिमुखग्रहणनानाप्रकारार्थप्ररूपणसामर्थ्यादिपर्यायादेशात् स्यान्न कारणसदृशम्। पूर्ववदुत्तरे च भङ्गा नेतव्याः।

**श्रोत्रमतिपूर्वस्यैव श्रुतत्वप्रसङ्गस्तदर्थत्वादिति चेन्न; उक्तत्वात्॥६॥** स्यादे-तत्श्रोत्रमतिपूर्वस्यैव श्रुतत्वं प्राप्नोति। कुतः? तदर्थत्वात्। श्रुत्वा अवधारणाद्धि श्रुतमित्युच्यते, तेन चक्षुरादिमतिपूर्वस्य श्रुतत्वं न प्राप्नोति तन्नः; किं कारणम्? उक्तमेतत् -'श्रुतशब्दोऽयं रूढिशब्दः' इति। रूढिशब्दाश्च स्वोत्पत्तिनिमित्तक्रियानपेक्षाः प्रवर्तन्त इति सर्वमतिपूर्वस्य श्रुतत्वसिद्धिर्भवति।

**आदिमतोऽन्तवत्त्वात् श्रुतस्याऽनादिनिधनत्वानुपपत्तिरिति चेन्न; द्रव्यादि-सामान्यापेक्षया तत्सिद्धेः॥७॥** स्यादेतत् - श्रुतस्य आदिमत्त्वमभ्युपगतम्- 'मतिपूर्वम्' इति वचनात्, आदिमतश्च लोके अन्तवत्त्वं दृष्टम्, तत आद्यन्तसंभवाद् 'अनादिनिधनं श्रुतम्' इति व्याहन्यते, ततश्च पुरुषकृतित्वादप्रामाण्यं स्यादिति; नैष दोषः; द्रव्यादि-सामान्यापेक्षया तत्सिद्धेः। द्रव्यक्षेत्रकालभावानां विशेषस्याविवक्षायां श्रुतम् 'अनादिनिधनम्' इत्युच्यते, न हि केनचित्पुरुषेण क्वचित् कदाचित् कथञ्चिदुत्प्रेक्षित्त

मिति। तेषामेव विशेषापेक्षया आदिरन्तश्च संभवतीति मतिपूर्वमित्युच्यते। यथा अङ्कुरो बीजपूर्वः, स सन्तानापेक्षया अनादिनिधन इति। न चाऽपुरुषकृतित्वं प्रामाण्यकारणम्; चौर्याद्युपदेशस्यास्मर्यमाणकर्तृकस्य प्रामाण्यप्रसङ्गात्। अनित्यस्य च प्रत्यक्षादेः प्रामाण्ये को विरोधः?

**सम्यक्त्वोत्पतौ युगपन्मतिश्रुतोत्पत्तेर्मतिपूर्वकत्वाभाव इति चेन्न; सम्यक्त्वस्य तदपेक्षत्वात्॥८॥** स्यान्मतम् - मत्यज्ञानश्रुताज्ञानयोः प्रथमसम्यक्त्वोत्पत्तौ युगपज्ज्ञानपरिणामात् मतिपूर्वकत्वं श्रुतस्य नोपपद्यत इति; तन्न; किं कारणम्? सम्यक्त्वस्य तदपेक्षत्वात्। तयोर्हि सम्यक्त्वं सम्यग्दर्शनोत्पत्तौ युगपद्भवति आत्म लाभस्तु क्रमवान्, इति मतिपूर्वकत्वं युक्तं पितापुत्रवत्।

**मतिपूर्वकत्वाविशेषात् श्रुताविशेष इति चेन्न; कारणभेदात्तद्भेदसिद्धेः॥९॥** स्यादेतत् - सर्वेषां प्राणिनां श्रुतमविशिष्टं प्राप्नोति। कुतः? कारणाविशेषात्। मतिपूर्वत्वं हि कारणमिष्टम्, तच्च सर्वेषामविशिष्टमिति। तन्न; किं कारणम्? कारणभेदात्तद्भेदसिद्धेः। प्रतिपुरुषं हि मतिश्रुतावरणक्षयोपशमो बहुधा भिन्नः तद्भेदाद् बाह्यनिमित्तभेदाच्च श्रुतस्य प्रकर्षाप्रकर्षयोगो भवति मतिपूर्वकत्वाविशेषेऽपि।

**श्रुतात् श्रुतप्रतिपत्तेर्लक्षणाव्याप्तिरिति चेन्न; तस्योपचारतो मतित्वसिद्धेः॥१०॥** स्यान्मतम् – यदा शब्दपरिणतपुद्गलस्कन्धादाहितवर्णपदवाक्यादिभावात् चक्षुरादि विषयाच्चाऽऽद्यश्रुतविषयभावमापन्नादविनाभाविनः कृतसङ्गीतिर्जनो घटाज्जलधारणादिकार्यसंबन्ध्यन्तरं प्रतिपद्यते धूमादेर्वाऽग्न्यादिद्रव्यम्, तदा श्रुतात् श्रुतप्रतिपत्तिरिति कृत्वा मतिपूर्वलक्षणमव्यापीति; तन्न; किं कारणम्? तस्योपचारतो मतित्वसिद्धेः। मतिपूर्वं हि श्रुतं क्वचित् 'मतिः' इत्युपचर्यते। अथवा, व्यवहिते पूर्वशब्दो वर्तते, तद्यथा 'पूर्वं मथुरायाः पाटलिपुत्रम्' इति। ततः साक्षान्मतिपूर्वं परम्परया वा मतिपूर्वमपि मतिपूर्वग्रहणेन गृह्यते।

**भेदशब्दस्य प्रत्येकं परिसमाप्तिर्भुजिवत् ॥११॥** यथा 'देवदत्तजिनदत्तगुरुदत्ता भोज्यन्ताम्' इति भुजिः प्रत्येकं परिसमाप्यते तथेहापि भेदशब्दः प्रत्येकमभिसंबध्यते - द्विभेदमनेकभेदं द्वादशभेदं चेति। तत्राङ्गप्रविष्टमङ्गबाह्यं चेति द्विविधम् ।

**अङ्गप्रविष्टमाचारादिद्वादशभेदं बुद्ध्यतिशयर्द्धियुक्तगणधरानुस्मृतग्रन्थरचनम् ॥१२॥** भगवदर्हत्सर्वज्ञहिमवन्निर्गतवाग्गङ्गाऽर्थविमलसलिलप्रक्षालितान्तःकरणैः बुद्ध्यतिशयर्द्धियुक्तैर्गणधरैरनुस्मृतग्रन्थरचनमाचारादिद्वादशविधमङ्गप्रविष्टमित्युच्यते। तद्यथा- आचारः, सूत्रकृतम्, स्थानम्, समवायः व्याख्याप्रज्ञप्तिः, ज्ञातृधर्मकथा, उपासकाध्ययनम्, अन्तकृद्दशा, अनुत्तरौपपादिकदशा, प्रश्नव्याकरणम्, विपाकसूत्रम्, दृष्टिवाद इति। आचारे चर्याविधानं शुद्ध्यष्टकपञ्चसमितित्रिगुप्तिविकल्पं कथ्यते। सूत्रकृते ज्ञानविनयप्रज्ञापना कल्प्याकल्प्यच्छेदोपस्थापना व्यवहारधर्मक्रियाः प्ररूप्यन्ते। स्थाने अनेकाश्रयाणामर्थानां निर्णयः क्रियते।

समवाये सर्वपदार्थानां समवायश्चिन्त्यते। स चतुर्विधः द्रव्यक्षेत्रकालभावविकल्पैः। तत्र धर्माऽधर्मास्तिकायलोकाकाशैकजीवानां तुल्याऽसंख्येयप्रदेशत्वादेकेन प्रमाणेन द्रव्याणां समवायनाद् द्रव्यसमवायः। जम्बूद्वीपसर्वार्थसिद्ध्यप्रतिष्ठाननरकनन्दीश्वरैक-वापीनां तुल्ययोजनशतसहस्रविष्कम्भप्रमाणेन क्षेत्रसमवायनात् क्षेत्रसमवायः। उत्सर्पिण्यवसर्पिण्योस्तुल्यदशसागरोपमकोटिकोटिप्रमाणात् कालसमवायनात् कालसमवायः। क्षायिकसम्यक्त्वकेवलज्ञानकेवलदर्शनयथाख्यातचारित्राणां यो भावः तदनुभवस्य तुल्यानन्तप्रमाणत्वात् भावसमवायनाद् भावसमवायः।

व्याख्याप्रज्ञप्तौ षष्टिव्याकरणसहस्राणि 'किमस्ति जीवः, नास्ति' इत्येवमादीनि निरूप्यन्ते। ज्ञातृधर्मकथायाम् आख्यानोपाख्यानानां बहुप्रकाराणां कथनम् उपासकाध्ययने श्रावकधर्मलक्षणम्. संसारस्यान्तःकृतो यैस्तेऽन्तकृतः। नमिमतङ्ग-

सोमिलरामपुत्रसुदर्शनयमवाल्मीकवलीकनिष्कम्बलपालाम्बष्टपुत्रा इत्येते दश वर्धमान-तीर्थङ्करतीर्थे। एवमृषभादीनां त्रयोविंशतेस्तीर्थेष्वन्येऽन्ये च दश दशानगारा दश दश दारुणानुपसर्गान्निर्जित्य कृत्स्नकर्मक्षयादन्तकृतः दश अस्यां वर्ण्यन्ते इति अन्तकृद्दशा। अथवा, अन्तकृतां दशा अन्तकृद्दशा, तस्याम् अर्हदाचार्यविधिः सिध्यतां च। उपपादो जन्म प्रयोजनं येषां त इमे औपपादिकाः, विजयवैजयन्तापराजितसर्वार्थसिद्धाख्यानि पञ्चानुत्तराणि, अनुत्तरेष्वौपपादिका अनुत्तरौपपादिकाः - ऋषिदासधन्यसुनक्षत्रकार्तिक-नन्दनन्दनशालिभद्राऽभयवारिषेणचिलातपुत्रा इत्येते दश वर्धमानतीर्थकरतीर्थे। एवमृषभादीनां त्रयोविंशतेस्तीर्थेष्वन्येऽन्ये च दश दशानगारा दश दश दारुणानुपसर्गान्निर्जित्य विजयाद्यनुत्तरेषूत्पन्ना इत्येवमनुत्तरौपपादिकाः दशास्यां वर्ण्यन्त इत्यनुत्तरौपपादिकदशा। अथवा, अनुत्तरौपपादिकानां दशाऽनुत्तरौपपादिकदशा तस्यामायुर्वैक्रियिकानुबन्धविशेषः। आक्षेपविक्षेपैर्हेतुनयाश्रितानां प्रश्नानां व्याकरणं प्रश्नव्याकरणम्, तस्मिँल्लौकिकवैदिका-नामर्थानां निर्णयः। विपाकसूत्रे सुकृतदुष्कृतानां विपाकश्चिन्त्यते।

द्वादशमङ्गं दृष्टिवाद इति। कौत्कलकाण्डे विद्धि। कौशिकहरिस्मश्रुमांछपिकरोमश-हारीतमुण्डाश्वलायनादीनां क्रियावाददृष्टीनामशीतिशतम्, मरीचिकुमारकपिलोलूकगार्ग्य-व्याघ्रभूतिवाद्घलिमाठरमौद्गल्यायनादीनामक्रियावाददृष्टीनां चतुरशीतिः, शाकल्यवात्कल-कुथुमिसात्यमुद्गिनारायणकठमाध्यन्दिनमौदपैप्पलादबादरायणाम्बष्ठिकृदौविकायनवसु-जैमिन्यादीनामज्ञानिकुदृष्टीनां सप्तषष्टिः। वशिष्ठपाराशरजनुकर्णिवाल्मीकिरौमहर्षिणिसत्य-दत्तव्यासैलापुत्रौपमन्यवैन्द्रदत्तायस्थूणादीनां वैनयिकदृष्टीनां द्वात्रिंशदेषां दृष्टिशतानां त्रयाणां त्रिषष्ट्युत्तराणां प्ररूपणं निग्रहश्च दृष्टिवादे क्रियते।

स पञ्चविधः परिकर्म सूत्रं प्रथमानुयोगः पूर्वगतं चूलिका चेति।

तत्र पूर्वगतं चतुर्दशप्रकारम् – उत्पादपूर्वमग्रायणं वीर्यप्रवादमस्तिनास्तिप्रवादं ज्ञानप्रवादं सत्यप्रवादमात्मप्रवादं कर्मप्रवादं प्रत्याख्याननामधेयं विद्यानुवादं कल्याण-नामधेयं प्राणावायं क्रियाविशालं लोकबिन्दुसारमिति। कालपुद्गलजीवादीनां यदा यत्र यथा च पर्यायेणोत्पादो वर्ण्यते तदुत्पादपूर्वम्। क्रियावादादीनां प्रक्रियाग्रायणी चाङ्गादीनां स्वसमयविषयश्च यत्र ख्यापितस्तदग्रायणम्। छद्मस्थकेवलिनां वीर्यं सुरेन्द्रदैत्याधि-पानामृद्धयो नरेन्द्रचक्रधरबलदेवानां च वीर्यलाभो द्रव्याणां सम्यक्त्वलक्षणं च यत्राभिहितं तद्वीर्यप्रवादम्। पञ्चानामस्तिकायानामर्थो नयानां चानेकपर्यायैः 'इदमस्तीदं नास्ति' इति च कात्स्न्र्येन यत्रावभासितं तदस्तिनास्तिप्रवादम्। अथवा षण्णामपि द्रव्याणां भावाभावपर्यायविधिना स्वपरपर्यायाभ्यामुभयनयवशीकृताभ्यामर्पितानर्पितसिद्धाभ्यां यत्र निरूपणं तदस्तिनास्तिप्रवादम्। पञ्चानामपि ज्ञानानां प्रादुर्भावविषयायतनानां ज्ञानिनाम-ज्ञानिनामिन्द्रियाणां च प्राधान्येन यत्र विभागो विभावितः तज्ज्ञानप्रवादम्।

वाग्गुप्तिसंस्कारकारणप्रयोगो द्वादशधा भाषा वक्तारश्चानेकप्रकारमृषाभिधानं दशप्रकारश्च सत्यसद्भावो यत्र प्ररूपितः तत् सत्यप्रवादम्। वाग्गुप्तिर्वक्ष्यमाणा। वाक्संस्कारकारणानि शिरःकण्ठादीन्यष्टौ स्थानानि। वाक्प्रयोगः शुभेतरलक्षणो वक्ष्यते।

अभ्याख्यानकलहपैशुन्यासंबद्धप्रलापरत्यरत्युपधिनिकृत्यप्रणतिमोषसम्यङ्मिथ्याद-र्शनात्मिका भाषा द्वादशधा। हिंसादेः कर्मणः कर्तुर्विरतस्य विरताविरतस्य वाऽयमस्य कर्तेत्यभिधानमभ्याख्यानम्। कलहः प्रतीतः। पृष्ठतो दोषाविष्करणं पैशुन्यम्। धर्मार्थकाममोक्षा सम्बद्धा वागसम्बद्धप्रलापः। शब्दादिविषयदेशादिषु रत्युत्पादिका रतिवाक्। तेष्वेवारत्युत्पादिकाऽरतिवाक् यां वाचं श्रुत्वा परिग्रहार्जनरक्षणादिष्वासज्यते सोपधिवाक्। वणिग्व्यवहारे यामवधार्य निकृतिप्रवण आत्मा भवति सा निकृतिवाक्। यां

श्रुत्वा तपोविज्ञानाधिकेष्वपि न प्रणमति साऽप्रणतिवाक्। यां श्रुत्वा स्तेये वर्तते सा मोषवाक्। सम्यङ्मार्गस्योपदष्ट्री सा सम्यग्दर्शनवाक्। तद्विपरीता मिथ्यादर्शनवाक्। वक्तारश्चाऽऽविष्कृतवक्तृत्वपर्याया द्वीन्द्रियादयः। द्रव्यक्षेत्रकालभावाश्रयमनेकप्रकारमनृतम्।

दशविधः सत्यसद्भावः नामरूपस्थापनाप्रतीत्यसंवृतिसंयोजनाजनपददेशभाव-समयसत्यभेदेन। तत्र सचेतनेतरद्रव्यस्यासत्यप्यर्थे यद्व्यवहारार्थं संज्ञाकरणं तन्नामसत्यमिन्द्र इत्यादि। यदर्थासन्निधानेऽपि रूपमात्रेणोच्यते तद्रूपसत्यम् यथा चित्रपुरुषादिष्वसत्यपि चैतन्योपयागादावर्थे पुरुष इत्यादि। असत्यप्यर्थे यत्कार्यार्थं स्थापितं द्यूताक्षनिक्षेपादिषु तत् स्थापनासत्यम्।आदिमदनादिमदौपशमिकादीन् भावान् प्रतीत्य यद्वचनं तत् प्रतीत्यसत्यम्। यल्लोके संवृत्या नीतं वचस्तत् संवृतिसत्यं यथा पृथिव्याद्यनेककारणत्वेऽपि सति 'पङ्के जातं पङकजम्' इत्यादि। धूपचूर्णवासानुले-पनप्रघर्षादिषु पद्ममकरहंससर्वतोभद्रक्रौञ्चव्यूहादिषु वा सचेतनेतरद्रव्याणां यथा भागविधिसन्निवेशाविर्भावकं यद्वचस्तत् संयोजनासत्यम्। द्वात्रिंशत्सहस्रजन-पदेष्वार्यानार्यभेदेषु धर्मार्थकाममोक्षाणां प्रापकं यद्वचः तत् जनपदसत्यम्। ग्रामनगरराजगणपाखण्डजातिकुलादिधर्माणामुपदेष्टृ यद्वचः तद् देशसत्यम्। छद्मस्थ-ज्ञानस्य द्रव्ययाथात्म्यादर्शनेऽपि संयतस्य संयतासंयतस्य वा स्वगुणपरिपालनार्थं प्रासुकमिदमप्रासुकमित्यादि यद्वचः तत् भावसत्यम्। प्रतिनियतषट्तयद्रव्यपर्यायाणा-मागमगम्यानां याथात्म्याविष्करणं यद्वचः तत् समयसत्यम्।

यत्रात्मनोऽस्तित्वनास्तित्वनित्यत्वानित्यत्वकर्तृत्वभोक्तृत्वादयो धर्माः षड्जीव-निकायभेदाश्च युक्तितो निर्दिष्टाः तदात्मप्रवादम्। बन्धोदयोपशमनिर्जरापर्याया अनुभव-प्रदेशाधिकरणानि स्थितिश्च जघन्यमध्यमोत्कृष्टा यत्र निर्दिश्यते तत्कर्मप्रवादम्। व्रत-नियमप्रतिक्रमणप्रतिलेखनतपःकल्पोपसर्गाचारप्रतिमाविराधनाराधनाविशुद्ध्युपक्रमाः

श्रामण्यकारणं च परिमितापरिमितद्रव्यभावप्रत्याख्यानं च यत्राख्यातं तत्प्रत्याख्यान-नामधेयम् ।

समस्ता विद्या अष्टौ महानिमित्तानि तद्विषयो रज्जुराशिविधिः क्षेत्रं श्रेणी लोकप्रतिष्ठासंस्थानसमुद्घातश्च यत्र कथ्यते तद्विद्यानुवादम् । तत्राङ्गुष्ठप्रसेनादीनाम मल्पविद्यानां सप्तशतानि महारोहिण्यादीनां महाविद्यानां पञ्चशतानि। अन्तरिक्षभौमाङ्ग-स्वरस्वप्नलक्षणव्यञ्जनछिन्नान्यष्टौ महानिमित्तानि। तेषां विषयो लोकः। क्षेत्रमाकाशं पटसूत्रवच्चर्मावयववद्वाऽऽनुपूर्व्येणोर्ध्वाधस्तिर्यग्व्यवस्थिता असंख्याता आकाशप्रदेश-पङ्क्तयः श्रेणय उक्ताः।

अलोकाकाशस्यानन्तस्य बहुमध्ये सुप्रतिष्ठकसंस्थानो लोक; ऊर्ध्वमधस्ति-र्यङ्मृदङ्गवेत्रासनझल्लर्याकृतिः; तनुवातवलयपरिक्षिप्तमूर्ध्वाधस्तिर्यक्षु प्रतरवृत्तश्चतुर्दश-रज्ज्वायामः। मेरुप्रतिष्ठवज्रवैडूर्यपटलान्तररुचकसंस्थिता अष्टावाकाशप्रदेशा लोकमध्यम्। लोकमध्याद् यावदैशानान्तः तावदेका रज्जुरर्धं च। माहेन्द्रान्ते तिस्रः। ब्रह्मलोकान्तेऽर्धचतुर्थाः। कापिष्ठान्ते चतस्रः। महाशुक्रान्तेऽर्धपञ्चमाः। सहस्रारान्ते पञ्च। प्राणतान्तेऽर्धषष्ठाः। अच्युतान्ते षट्। आलोकान्तात् सप्त। तथा लोकमध्यादधो यावच्छर्करापृथिव्यन्तस्तावदेका रज्जुः। ततोऽधः पृथिवीनां पञ्चानां प्रत्येकमन्तेऽन्ते रज्जुरेकैका वृद्धा। ततोऽधस्तमस्तमःप्रभाया आलोकान्तादेका रज्जुः। एवं सप्ताधो रज्जवः।

घनोदधिघनानिलतनुवातवलयानि त्रीणि, यैरयं परिक्षिप्तः सर्वः समन्ताल्लोकः। त्रयाणामप्यधोलोकदिग्विदिक्पार्श्वभाविनां प्रत्येकं विस्तारो विंशतियोजनसहस्राणि। तत उपरि क्रमतो हानिवशात्तिर्यग्लोकभाविदिग्विदिक्पार्श्वेष्वष्टासु प्रत्येकं त्रीण्यपि वलयानि पञ्च चत्वारि त्रीणि योजनविस्तीर्णानि। पुनरुपरि वृद्धिवशाद् ब्रह्मलोके दिग्विदिक्पा-र्श्वेष्वष्टासु प्रत्येकं त्रीण्यपि वलयानि सप्तपञ्चचतुर्योजनविस्तीर्णानि। पुनर्हानिवशाल्लो-

काग्रेऽष्टास्वपि दिग्विदिक्पार्श्वेषु प्रत्येकं त्रीण्यपि वलयानि पञ्चचतुस्त्रियोजनविस्तीर्णानि। दण्डवलयानि पुनरुपर्यधश्च त्रीण्यपि। उपरि लोकाग्रे घनोदधेर्द्विगव्यूती घनानिलस्य क्रोशः तनुवातस्य देशोनःक्रोशो विस्तारः। अधः कलङ्कलपृथिवीपर्यन्ते घनोदधेः सप्त घनानिलस्य पञ्च तनुवातस्य चत्वारि योजनानि विस्तारः।

अधो लोकमूले दिग्विदिक्षु विष्कम्भः सप्त रज्जवः। तिर्यग्लोके रज्जुरेका। ब्रह्मलोके पञ्च। पुनर्लोकाग्रे रज्जुरेका। लोकमध्यादधो रज्जुमवगाह्य शर्करान्तेऽष्टास्वपि दिग्विदिक्षु विष्कम्भः रज्जुरेका रज्ज्वाश्च षट्सप्तभागाः। ततो रज्जुमवगाह्य बालुकान्ते द्वे रज्जू रज्ज्वाश्च पञ्चसप्तभागाः। ततो रज्जुमवगाह्य पङ्कान्ते तिस्त्रो रज्जवः रज्ज्वाश्च चत्वारः सप्तभागाः। ततो रज्जुमवगाह्य धूमान्ते चतस्त्रो रज्जवः रज्ज्वाश्च त्रयः सप्तभागाः। ततो रज्जुमवगाह्य तमःप्रभान्ते पञ्च रज्जवः रज्ज्वाश्च द्वौ सप्तभागौ। ततो रज्जुमवगाह्य तमस्तमःप्रभान्ते षड् रज्जवः रज्ज्वाः सप्तभागश्चैकः। ततो रज्जुमवगाह्य कलङ्कलान्ते विष्कम्भः सप्त रज्जवः। वज्रतलादुपरि रज्जुमुत्क्रम्य विष्कम्भो द्वे रज्जू रज्ज्वाश्चैकः सप्तभागः। ततो रज्जुमुत्क्रम्य तिस्रो रज्जवः रज्ज्वाश्च द्वौ सप्तभागौ। ततो रज्जुमुत्क्रम्य चतस्रो रज्जवः रज्ज्वाश्च त्रयः सप्तभागाः। ततोऽर्धरज्जुमुत्क्रम्य रज्जवः पञ्च। ततोऽर्धरज्जुमुत्क्रम्य चतस्रो रज्जवः रज्ज्वाश्च त्रयः सप्तभागाः। ततो रज्जुमुत्क्रम्य तिस्रो रज्जवः, रज्ज्वाश्च द्वौ सप्तभागौ। ततो रज्जुमुत्क्रम्य द्वे रज्जू रज्ज्वाश्चैकः सप्तभागः। ततो रज्जुमुत्क्रम्य लोकान्ते रज्जुरेका विष्कम्भः। एष रज्जुविधिः।

हन्तेर्गमिक्रियात्वात् संभूयात्मप्रदेशानां च बहिरुद्हननं समुद्घात। स सप्तविधः - वेदनाकषायमारणान्तिकतेजोविक्रियाऽऽहारककेवलिविषयभेदात्। तत्र वातिकादिरोगविषादिद्रव्यसंबन्धसन्तापापादितवेदनाकृतो वेदनासमुद्घातः। द्वितयप्रत्ययप्रकर्षोत्पादितक्रोधा-

दिकृतः कषायसमुद्घातः। औपक्रमिकानुपक्रमायुःक्षयाविर्भूतमरणान्तप्रयोजनो मारणान्तिकसमुद्घातः। जीवानुग्रहोपघातप्रवणतेजःशरीरनिर्वर्तनार्थस्तेजस्समुद्घातः। एकत्वपृथक्त्वनानाविधविक्रियशरीरवाक्प्रचारप्रहरणादिविक्रियाप्रयोजनो वैक्रियकसमुद्घातः। अथोक्त-विधिनाऽल्पसावद्यसूक्ष्मार्थग्रहणप्रयोजनाहारकशरीरनिर्वृत्त्यर्थमाहारकसमुद्घातः। वेदनीयस्य बहुत्वादल्पत्वाच्चायुषोऽनाभोगपूर्वकमायुःसमकरणार्थं द्रव्यस्वभावत्वात् सुराद्रव्यस्य फेनवेगबुद्बुदाविर्भावोपशमनवद् देहस्थात्मप्रदेशानां बहिःसमुद्घातनं केवलिसमुद्घातः।

आहारकमारणान्तिकसमुद्घातावेकदिक्कौ। यत आहारकशरीरमात्मा निर्वर्तयन् श्रेणिगतित्वात् एकदिक्कानात्मदेशानसंख्यातान्निर्गमय्य आहारकशरीरमरत्निमात्रं निर्वर्तयति। अन्यक्षेत्रसमुद्घातकारणाभावात् यत्रानेन नरकादावुत्पत्तव्यं तत्रैव मारणान्तिकसमुद्घातेनाऽऽत्मप्रदेशा एकदिक्काः समुद्धन्यन्ते नान्यक्षेत्रे, अतस्तावेकदिक्कौ। शेषाः पञ्च समुद्घाताः षड्दिक्काः। यतो वेदनादिसमुद्घातवशाद् बहिर्निःसृतानामात्मप्रदेशानां पूर्वापरदक्षिणोत्तरोर्ध्वाधोदिक्षु गमनमिष्टं श्रेणिगतित्वादात्मप्रदेशानाम्। वेदनाकषायमारणान्तिकतेजोवैक्रियिकाऽऽहारकसमुद्घाताः षडसंख्येयसमयिकाः। केवलिसमुद्घातः अष्टसमयिकः दण्डकपाटप्रतरलोकपूरणानि चतुर्षु समयेषु पुनः प्रतरकपाटदण्डस्व-शरीरानुप्रवेशाश्चतुर्ष्विति।

रविशशिग्रहनक्षत्रतारागणानां चारोपपादगतिविपर्ययफलानि शकुनव्याहृतम्। अर्हद्-बलदेववासुदेवचक्रधरादीनां गर्भावतरणादिमहाकल्याणानि च यत्रोक्तानि तत् कल्याणनामधेयम्। कायचिकित्साद्यष्टाङ्गमायुर्वेदः भूतिकर्मजाङ्गुलिप्रक्रमः प्राणापानविभागोऽपि यत्र विस्तारेण वर्णितस्तत् प्राणावायम्। लेखादिका कलाः द्वासप्ततिः, गुणाश्च चतुःषष्टिस्त्रैण्याः, शिल्पानि काव्यगुणदोषक्रियाछन्दोविचितिक्रियाक्रियाफलोपभोक्तारश्च यत्र व्याख्याताः

तत्क्रियाविशालम्। यत्राऽष्टौ व्यवहाराश्चत्वारि बीजानि परिकर्म राशिक्रियाविभागश्च सर्वश्रुतसंपदुपदिष्टा तत्खलु लोकबिन्दुसारम्।

**आरातीयाचार्यकृताङ्गार्थप्रत्यासन्नरूपमङ्गबाह्यम् ॥३॥** यद् गणधरशिष्यप्रशिष्यै-रारातीयैरधिगतश्रुतार्थतत्त्वैः कालदोषादल्पमेधायुर्बलानां प्राणिनामनुग्रहार्थमुपनिबद्धं संक्षिप्ताङ्गार्थवचनविन्यासं तदङ्गबाह्यम्।

**तदनेकविधं कालिकोत्कालिकादिविकल्पात् ॥४॥** तदङ्गबाह्यमनेकविधम् - कालिकमुत्कालिकमित्येवमादिविकल्पात्। स्वाध्यायकाले नियतकालं कालिकम्। अनियतकालमुत्कालिकम्। तद्भेदा उत्तराध्ययनादयोऽनेकविधाः।

अत्राह - अनुमानादीनां पृथगनुपदेशः किमर्थः?

**अनुमानादीनां पृथगनुपदेशः श्रुतावरोधात् ॥५॥** यस्मादेतान्यनुमानादीनि श्रुतेऽन्तर्भवन्ति तस्मात्तेषां पृथगुपदेशो न क्रियते। तद्यथा "प्रत्यक्षपूर्वकं त्रिविधमनुमानं पूर्ववत् शेषवत् सामान्यतोदृष्टं च" इति। तत्र येनाग्नेर्निःसरन् पूर्वं धूमो दृष्टः स प्रसिद्धाग्निधूमसंबन्धाहितसंस्कारः पश्चाद्धूमदर्शनाद् 'अस्त्यत्राग्निः' इति पूर्ववदग्निं गृह्णातीति पूर्ववदनुमानम्। तथा येन पूर्वं विषाणविषाणिनोः संबन्ध उपलब्धः तस्य विषाणरूपदर्शनाद्विषाणिन्यनुमानं शेषवत्। तथा देवदत्तस्य देशान्तरप्राप्तिं गतिपूर्विकां दृष्ट्वा संबन्ध्यतरे सवितरि देशान्तरप्राप्तिदर्शनाद् गतेरत्यन्तपरोक्षाया अनुमानं सामान्यतोदृष्टम्। तदेतत्त्रितयमपि स्वप्रतिपत्तिकालेऽनक्षरश्रुतं परप्रतिपादनकालेऽक्षरश्रुतम्। 'यथा गौस्तथा गवयः केवलं सास्नारहितः' इत्युपमानमपि स्वपरप्रतिविषयत्वादक्षरानक्षरश्रुतेऽन्तर्भवति। तथा शाब्दमपि प्रमाणं श्रुतमेव। एतिह्यस्य च 'इत्याह स भगवान् ऋषभः' इति परंपरीणपुरुषागमाद् गृह्यते इति श्रुतेऽन्तर्भावः। प्रकृतिपुष्टो दिवा न भुङ्क्ते अथ च जीवतीत्यर्थादापन्नं रात्रौ भुङ्क्ते इत्यर्थापत्तिः। 'चत्वारः प्रस्था

आढकम्' इति सति ज्ञाने आढकं दृष्ट्वा संभवत्यर्धाढकं कुद्रवो वेति प्रतिपत्तिसंभवः। तृणगुल्मादीनां स्नेहपर्णफलाद्यभावं दृष्ट्वाऽनुमीयते नूनमत्र न वृष्टः पर्जन्य इत्यभावः। एतेषामप्यर्थापत्त्यादीनामनुक्तानामनुमानसमानमिति पूर्ववत् श्रुतान्तर्भावः।

व्याख्यातं परोक्षम्, प्रत्यक्षमिदानीं वक्तव्यम्। तद् द्वेधा - देशप्रत्यक्षं सर्वप्रत्यक्षं च। देशप्रत्यक्षम् - अवधिमनःपर्ययज्ञाने। सर्वप्रत्यक्षं केवलम्। यद्येवमिदमेव तावदव-धिज्ञानं त्रिप्रकारप्रत्यक्षस्याऽऽद्यं व्याक्रियतामिति। अत्रोच्यते - व्याख्यातमस्य लक्षणम् - आत्मप्रसादविशेषे सत्यन्वर्थसंज्ञाकरणादवधीयते तदित्यवधिज्ञानमिति। यद्येवं तस्येदानीं भेदो वक्तव्यः? उच्यते - द्विविधोऽवधिः, भवगुणप्रत्ययभेदात्, देशसर्वावधिभेदाद्वा। यद्येवं त्रैविध्यं नोपपद्यते - देशावधिः परमावधिः सर्वावधिश्चेति; नैष दोषः; सर्वशब्दस्य निरवशेषवाचित्वात्, सर्वावधिमपेक्ष्य परमावधेर्देशावधित्वमेवेति वक्ष्यामः।

तत्र योऽसौ भवप्रत्ययस्तत्प्रतिपादनार्थमाह –

## भवप्रत्ययोऽवधिर्देवनारकाणाम् ॥२१॥

भव इत्युच्यते। को भवो नाम ?

**आयुर्नामकर्मोदयविशेषापादितपर्यायो भवः॥१॥** आत्मनो यः पर्याय आयुषो नाम्नश्चोदयविशेषाच्छेषकारणापेक्षादाविर्भवति साधारणलक्षणो भवः इत्युच्यते।

**प्रत्ययशब्दस्यानेकार्थसंभवे विवक्षातो निमित्तार्थगतिः॥२॥** अयं प्रत्ययशब्दो-ऽनेकार्थः। क्वचिज्ज्ञाने वर्तते, यथा 'अर्थाभिधानप्रत्ययाः' इति। क्वचिच्छपथे वर्तते, यथा परद्रव्यहरणादिषु सत्युपालम्भे 'प्रत्ययोऽनेन कृतः' इति। क्वचिद्धेतौ वर्तते, यथा अविद्याप्रत्ययाः संस्कारा इति। तत्रेह विवक्षातो निमितार्थो वेदितव्यः। भवप्रत्ययो भवनिमित्त इति।

**क्षयोपशमाभाव इति चेन्न; तस्मिन् सति सद्भावात् खे पतत्त्रिगतिवत्॥३॥** स्यादेतत् – यदि तत्र भवनिमित्तोऽवधिः कर्मणः क्षयोपशमोऽनर्थकः इति; तन्न; किं कारणम्? तस्मिन् सति सद्भावात् खे पतत्त्रिगतिवत्। यथा आकाशे सति पक्षिणो गतिर्भवति तथाऽवधिज्ञानावरणक्षयोपशमेऽन्तरङ्गे हेतौ सत्यवधेर्भावः, भवस्तु बाह्यो हेतुः।

**इतरथा ह्यविशेषप्रसङ्गः॥४॥** यदि भव एव हेतुः स्यात् सर्वेषां देवनारकाणां तुल्य इत्यवधेरविशेषप्रसङ्गः स्यात् ? इष्यते च प्रकर्षाप्रकर्षभावेन वृत्तिः। कथं पुनर्भवो हेतुः इति चेत् ?

**व्रतनियमाद्यभावात् ॥५॥** यथा तिरश्चां मनुष्याणां चाऽहिंसादिव्रतनियमहेतुकोऽवधिः न तथा देवानां नारकाणां चाऽहिंसादिव्रतनियमाभिसन्धिरस्ति। कुतः? भवं प्रतीत्य कर्मोदयस्य तथाभावात्, तस्मात्तत्र भव एव बाह्यसाधनप्रधानमित्युच्यते।

**अविशेषात् सर्वप्रसङ्ग इति चेन्न; सम्यगधिकारात् ॥६॥** स्यादेतत् - देवनारकाणामित्यविशेषवचनात् मिथ्यादृष्टीनामप्यवधिप्रसङ्ग इति तन्न; किं कारणम्? सम्यगधिकारात् । 'सम्यग्दर्शनं सम्यग्ज्ञानम्' इत्यनुवर्तते, तत्संबन्धात् सम्यग्दृष्टीनामवधिः मिथ्यादृष्टीनां विभङ्गो वेदितव्यः। अथवा, वक्ष्यमाणाभिसंबन्धान्न सर्वप्रसङ्गः। वक्ष्यते हि एतत् -''**मतिश्रुतावधयो विपर्ययश्च।"** इति। अथवा, व्याख्यानाद्विशेषप्रतिपत्तिः।

**आगमे प्रसिद्धेर्नारकशब्दस्य पूर्वनिपात इति चेन्न; उभयलक्षणप्राप्तत्वात् देवशब्दस्य॥७॥** स्यादेतत् - नारकशब्दस्य पूर्वनिपातेन भवितव्यम् । कुतः? आगमे प्रसिद्धेः। आगमे हि जीवस्थानादौ सदादिष्वनुयोगद्वारेणाऽऽदेशवचने नारकाणामेवादौ

सदादिप्ररूपणा कृता, ततो नारकशब्दस्य पूर्वनिपातेन भवितव्यमिति; तन्न; किं कारणम्? उभयलक्षणप्राप्तत्वाद् देवशब्दस्य। देवशब्दो ह्यल्पाजभ्यर्हितश्चेति वृत्तौ पूर्वप्रयोगार्हः। आगमे वाक्यविषयो निर्देश इति नास्ति नियमः।

आह - उक्तं भवता 'इष्यते प्रकर्षाप्रकर्षाभावेन वृत्तिः' इति; तत्कथमिति चेत्? उच्यते – देवेषु तावत् भवनवासिनां दशप्रकाराणामपि जघन्योऽवधिः पञ्चविंशतियोजनानि। उत्कृष्टः - असुराणां तिर्यगसंख्याता योजनकोटिकोट्योऽधः, ऊर्ध्वमृजुविमानस्योपरिपर्यन्तः। नागादिकुमाराणां नवविधानामप्युत्कृष्टोऽवधिः अधोऽसंख्यातानि योजनसहस्राणि। ऊर्ध्वं मन्दिरचूलिकाया उपरिपर्यन्तः, तिर्यगसंख्यातानि योजनसहस्राणि। व्यन्तराणामष्टविधानां जघन्योऽवधिः पञ्चविंशतियोजनानि। उत्कृष्टोऽप्यसंख्यातानि योजनसहस्राण्यधः, ऊर्ध्वं स्वविमानस्योपरिपर्यन्तः, तिर्यगसंख्याता योजनकोटिकोट्यः। ज्योतिषां जघन्योऽवधिरधः संख्येयानि योजनान्युत्कृष्टश्चाऽसंख्येयानि योजनसहस्राणि। ऊर्ध्वमात्मीयविमानस्योपरिपर्यन्तस्तिर्यगसंख्याता योजनकोटिकोट्यः।

वैमानिकेषु सौधर्मैशानीयानां जघन्योऽवधिर्ज्योतिषामुत्कृष्टः, रत्नप्रभाया अधश्चरम उत्कृष्टः। सानत्कुमारमाहेन्द्राणां जघन्योऽवधिः रत्नप्रभाया अधश्चरमः, उत्कृष्टः शर्करा-प्रभाया अधश्चरमः। ब्रह्मब्रह्मोत्तरलान्तवकापिष्ठानां जघन्योऽवधिः शर्कराप्रभाया अधश्चरमः, उत्कृष्टो वालुकाप्रभाया अधश्चरमः। शुक्रमहाशुक्रसतारसहस्राराणां जघन्योऽवधिः वालुकाप्रभाया अधश्चरमः, उत्कृष्टः पङ्कप्रभाया अधश्चरमः। आनतप्राणताऽऽरणाऽच्युतानां जघन्योऽवधिः पङ्कप्रभाया अधश्चरमः, उत्कृष्टो धूमप्रभाया अधश्चरमः। नवानां ग्रैवेयिकानां जघन्योऽवधिः धूमप्रभाया अधश्चरमः, उत्कृष्टः तमःप्रभाया अधश्चरमः। नवानामनुदिशानां

पञ्चानुत्तरविमानवासिनाञ्च लोकनालिपर्यन्तोऽवधिः. सौधर्मादीनामनु-त्तरान्तानामूर्ध्वं स्वविमानस्योपरिपर्यन्तः, तिर्यगसंख्याता योजनकोटिकोट्यः।

अथैषां कालद्रव्यभावेषु कोऽवधिरिति? अत्रोच्यते - योऽस्य यावत्क्षेत्रावधिस्तस्य तावदाकाशप्रदेशपरिच्छिन्ने कालद्रव्ये भवतः। तावत्सु समयेष्वतीतेष्वनागतेषु च ज्ञानं वर्तते, तावदसंख्यातभेदेष्वनन्तप्रदेशेषु पुद्गलस्कन्धेषु जीवेषु च सकर्मकेषु। भावतः स्वविषयपुद्गलस्कन्धानां रूपादिविकल्पेषु जीवपरिणामेषु चौदयिकौपशमिकक्षायोपशमिकेषु वर्तते। कुतः? पौद्गलिकत्वादेषाम्।

नारकेषु च योजनमर्धगव्यूतहीनमागव्यूतात्। तद्यथा – रत्नप्रभायां योजनमवधिः अधः। द्वितीयायामधः अर्धचतुर्थानि गव्यूतानि। तृतीयायामधः त्रीणि गव्यूतानि। चतुर्थ्यामधोऽर्धतृतीयानि गव्यूतानि। पञ्चम्यां द्वे गव्यूते। षष्ठ्यामधोऽर्धाधिकं गव्यूतम्। सप्तम्यामधो गव्यूतम्। सर्वासु पृथिवीसु नारकाणामवधिरुपर्यत्मीयनरकावासान्तः, तिर्यगसंख्याता योजनकोटीकोट्यः। कालद्रव्यभावपरिमाणं पूर्ववद्वेदितव्यम्।

यदि भवप्रत्ययोऽवधिर्देवनारकाणामथ क्षयोपशमहेतुकः केषामिति? अत आह-

## क्षयोपशमनिमित्तः षड्विकल्पः शेषाणाम् ॥२२॥

अवधिज्ञानावरणस्य देशघातिस्पर्धकानामुदये सति सर्वघातिस्पर्धकानामुदयाभावः क्षयः तेषामेवाऽनुदयप्राप्तानां सदवस्थोपशमः, तौ निमित्तमस्येति क्षयोपशमनिमित्तः। स शेषाणां वेदितव्यः। के पुनः शेषाः? मनुष्यास्तिर्यञ्चश्च।

**शेषग्रहणादविशेषप्रसङ्ग इति चेन्न; तत्सामर्थ्यविरहात् ॥१॥** स्यादेतत् - देवनारकेभ्योऽन्ये शेषाः, ततस्तेषामविशेषात् सर्वेषां तिरश्चां मनुष्याणां वाऽवधिप्रसङ्ग

इति; तन्न; किं कारणम्? तत्सामर्थ्यविरहात्। न ह्यसंज्ञिनामपर्याप्तकानां च तत्सामर्थ्यमस्ति, संज्ञिनां पर्याप्तकानां च न सर्वेषाम्। केषां तर्हि?

**यथोक्तनिमित्तसन्निधाने सति शान्तक्षीणकर्मणां तदुपलब्धेः॥२॥** यथोक्तसम्यग्दर्शनादिनिमित्तसन्निधाने सति शान्तक्षीणकर्मणां तस्योपलब्धिर्भवति। ननु सर्वस्य क्षयोपशमनिमित्तः तत्र किमुच्यते - 'क्षयोपशमनिमित्तः शेषाणाम्' इति?

**सर्वस्य क्षयोपशमनिमित्तत्वे तद्वचनं नियमार्थमब्भक्षवत्॥३॥** यथा न कश्चिदपो न भक्षयति इत्यब्ग्रहणं नियमार्थं क्रियते अप एव भक्षयतीति, तथा सर्वस्य क्षयोपशमनिमित्तत्वे क्षयोपशमग्रहणं नियमार्थम् 'क्षयोपशमनिमित्त एव न भवनिमित्तः' इति। स एषोऽवधिः षड्विकल्पः। कुतः?

**अनुगाम्यननुगामिवर्धमानहीयमानाऽवस्थिताऽनवस्थिभेदात् षड्विधः॥४॥** कश्चिदवधिः भास्करप्रकाशवद् गच्छन्तमनुगच्छति। कश्चिन्नानुगच्छति तत्रैवातिपतत्युन्मुखप्रश्नादेशिकपुरुषवचनवत्। अपरोऽवधिररणिनिर्मथनोत्पन्नशुष्कपत्रोपचीयमानेन्धननिचयसमिद्धपावकवत् सम्यग्दर्शनादिगुणविशुद्धिपरिणामसन्निधानाद् यत्परिमाण उत्पन्नस्ततो वर्धते आ असंख्येयलोकेभ्यः। अपरोऽवधिः परिच्छिन्नोपादनसन्तत्यग्निशिखावत् सम्यग्दर्शनादिगुणहानिसंक्लेशपरिणामविवृद्धियोगात् यत्परिमाण उत्पन्नस्ततो हीयते आ अङ्गुलस्याऽसंख्येयभागादिति। अपरोऽवधिः सम्यग्दर्शनादिगुणावस्थानात् यत्परिमाण उत्पन्नस्तत्परिमाण एवावतिष्ठते न हीयते नापि वर्धते लिङ्गवत्, आ भवक्षयादाकेवलज्ञानोत्पत्तेर्वा। अन्योऽवधिः सम्यग्दर्शनादिगुणवृद्धिहानियोगात् यत्परिमाण उत्पन्नस्ततो वर्धते यावदनेन वर्धितव्यं हीयते च यावदनेन हातव्यं वायुवेगप्रेरितजलोर्मिवत्। एवं षड्विकल्पोऽवधिः भवति।

पुनरपरेऽवधेस्त्रयो भेदाः - देशावधिः परमावधिः सर्वावधिश्चेति। तत्र देशावधिस्त्रेधा जघन्य उत्कृष्टोऽजघन्योत्कृष्टश्चेति। तथा परमावधिरपि त्रिधा। सर्वावधिरविकल्पत्वादेक एव। उत्सेधाङ्गुलासंख्येयभागक्षेत्रो देशावधिर्जघन्यः। उत्कृष्टः कृत्स्नलोकः। तयोरन्तराले असंख्येयविकल्पः अजघन्योत्कृष्टः। परमावधिर्जघन्यः एकप्रदेशाधिकलोकक्षेत्रः। उत्कृष्टोऽ-संख्येयलोकक्षेत्रः। अजघन्योत्कृष्टो मध्यमक्षेत्रः। उत्कृष्टपरमावधिक्षेत्राद् बहिरसंख्यातक्षेत्रः सर्वावधिः।

'वर्धमानो हीयमानोऽवस्थितोऽनवस्थितोऽनुगाम्यननुगाम्यप्रतिपाती प्रतिपाती' इत्येतेऽष्टौ भेदा देशावधेर्भवन्ति। हीयमानप्रतिपातिभेदवर्जा इतरे षड् भेदा भवन्ति परमावधेः। 'अवस्थितोऽनुगाम्यननुगाम्यप्रतिपाती' इत्येते चत्वारो भेदाः सर्वावधेः। तत्र षडाद्या उक्तलक्षणाः। प्रतिपातीति विनाशी विद्युत्प्रकाशवत्। तद्विपरीतोऽप्रतिपाती।

तत्र देशावधेः सर्वजघन्यस्य क्षेत्रमुत्सेधाङ्गुलस्याऽसंख्येयभागः, आवलिकाया असंख्येयभागः कालः, अङ्गुलस्याऽसंख्येयभागक्षेत्रप्रदेशप्रमाणं द्रव्यम्, तत्प्रमाणपरिच्छिन्नेष्वसंख्येयेषु स्कन्धेष्वनन्तप्रदेशेषु ज्ञानं वर्तते स्वविषयस्कन्धगतानन्तवर्णादिविकल्पो भावः।

तस्य वृद्धिरुच्यते - प्रदेशोत्तरा क्षेत्रवृद्धिर्नास्त्येकजीवस्य, नानाजीवानां तु प्रदेशोत्तरक्षेत्रवृद्धिर्भवति आ सर्वलोकात्। एकजीवस्य त्वङ्गुलासंख्येयभागादूर्ध्वं विशुद्धिवशात् मण्डूकप्लुत्याऽङ्गुलासंख्येयभागक्षेत्रवृद्धिर्भवति आसर्वलोकात्। नानाजीवा अपि प्रदेशोत्तरवृद्ध्या तावद्वर्धयन्ते यावदङ्गुलस्यासंख्येयभागः। कालवृद्धिरेकजीवस्य नानाजीवानां वा मौलादावलिकासंख्येयभागात् क्वचिदेकसमयोत्तरा क्वचिद् द्विसमयोत्तरा क्वचित् संख्येयसमयोत्तरा क्वचिदसंख्येयसमयोत्तरा यावदावलिकाया असंख्येयभागः। सेयं क्षेत्रकालवृद्धिः। कया वृद्ध्या ? चतुर्विधया संख्येयभागवृद्ध्याऽसंख्येयभागवृद्ध्या संख्येयगुणवृद्ध्याऽसंख्येयगुणवृद्ध्या वा। एवं द्रव्यमपि वर्धमानं चतुर्विधया वृद्ध्या

वर्धते। भाववृद्धिः षोढा – अनन्तभागवृद्धिरसंख्येयभागवृद्धिः संख्येयभागवृद्धिः संख्येय गुणवृद्धिरसंख्येयगुणवृद्धिरनन्तगुणवृद्धिरिति। अनया क्षेत्रकालद्रव्यभाववृद्ध्योक्तया आ सर्वलोकात् वृद्धिरवसेया। हानिरपि तथैव। योऽङ्गुलासख्येयभागक्षेत्रोऽवधिः तस्या वलिकाया संख्येयभागः कालः, अङ्गुलासंख्येयभागक्षेत्राकाशप्रदेशप्रमाणं द्रव्यम्, भावः पूर्ववदनन्तो वा स्यादसंख्येयो वा स्यात्संख्येयो वा स्यात्। योऽङ्गुलासंख्येय-भागक्षेत्रोऽवधिः तस्येषदूनाऽऽवलिका कालः, द्रव्यभावौ पूर्ववत्। योऽङ्गुलपृथक्त्व क्षेत्रोऽवधिः तस्याऽऽवलिका कालः द्रव्यभावौ पूर्ववत्। यो हस्तप्रमाणक्षेत्रोऽवधिः तस्याऽऽवलिकापृथक्त्वं कालः, द्रव्यभावौ पूर्ववत्। यो गव्यूतिमात्रक्षेत्रोऽवधिः तस्य साधिकोच्छ्वासः कालः, द्रव्यभावौ पूर्ववत्। यो योजनमात्रक्षेत्रोऽवधिः तस्य भिन्नमुहूर्तः कालः, द्रव्यभावौ पूर्ववत्। यः पञ्चविंशतियोजनप्रमाणक्षेत्रोऽवधिः तस्येषदूनो दिवसः कालः, द्रव्यभावौ पूर्ववत्। यो भरतक्षेत्रमात्रोऽवधिः तस्यार्धमासः कालः, द्रव्यभावौ पूर्ववत्। यो जम्बूद्वीपमात्रक्षेत्रोऽवधिः तस्य संवत्सरः कालः, द्रव्यभावौ पूर्ववत्। यो मनुष्यलोकमात्रक्षेत्रोऽवधिस्तस्य संवत्सरः कालः द्रव्यभावौ पूर्ववत्। यो रुचकान्त-प्रमाणक्षेत्रोऽवधिः तस्य संवत्सरपृथकत्वं कालः, द्रव्यभावौ पूर्ववत्। यः संख्येयद्वीपसमुद्रक्षेत्रोऽवधिः तस्य संख्येयाः संवत्सराः कालः, द्रव्यभावौ पूर्ववत्। योऽसंख्येयद्वीपसमुद्रक्षेत्रोऽवधिः तस्याऽसंख्येयाः संवत्सराः कालः, द्रव्यभावौ पूर्ववत्। एवं जघन्योत्कृष्टस्तिर्यङ्नराणां देशावधिरुक्तः।

अथ तिरश्चामुत्कृष्टदेशावधिरुच्यते - क्षेत्रमसंख्येया द्वीपसमुद्राः। कालोऽप्य-संख्येयाः संवत्सराः। तेजःशरीरप्रमाणं द्रव्यम्। कियच्च तत् ? असंख्येयद्वीपसमुद्राकाश-प्रदेश-परिच्छिन्नाभिरसंख्येयाभिस्तेजःशरीरद्रव्यवर्गणाभिर्निर्वर्तितं तावदसंख्येयस्कन्धाननन्तप्रदेशान् जानातीत्यर्थः। भावः पूर्ववत्। तिरश्चां मनुष्याणां च जघन्यो देशावधिर्भवति। तिरश्चां तु देशावधिरेव न परमावधिर्नापि सर्वावधिः।

अथ मनुष्याणामुत्कृष्टो देशावधिरुच्यते - क्षेत्रमसंख्येया द्वीपसमुद्राः। कालोऽप्य-संख्येयाः संवत्सराः। द्रव्यं कार्मणद्रव्यम्। कियच्च तत्? असंख्येयद्वीपसमुद्राकाश-प्रदेशपरिच्छिन्ना असंख्येया ज्ञानावरणादिकार्मणद्रव्यवर्गणाः। भावः पूर्ववत्। एष देशावधिरुत्कृष्टो मनुष्याणां संयतानां भवति।

परमावधिरुच्यते - जघन्यस्य परमावधेः क्षेत्रं प्रदेशाधिको लोकः। कालः प्रदेशाधिकलोकाकाशप्रदेशावधृतप्रमाणा अविभागिनः समयाः, ते चाऽसंख्याताः संवत्सराः। द्रव्यं प्रदेशाधिकलोकाकाशप्रदेशावधृतप्रमाणम्। भावः पूर्ववत्। अतः परं क्षेत्रवृद्धिः नानाजीवैकजीवानामविशेषेण विशुद्धिवशादसंख्येया लोकाः, एवं तावदसंख्येया लोका वृद्धिर्यावदुत्कृष्टपरमावधिक्षेत्रम्। कियन्तश्च तेऽसंख्येयाः? आवलिकाया असंख्येय-भागप्रमाणाः। कालद्रव्यभावाः पूर्ववत्। उत्कृष्टपरमावधेः क्षेत्रं सलोकालोकप्रमाणा असंख्येया लोकाः। कियन्तस्ते? अग्निजीवतुल्याः। कालद्रव्यभावाः पूर्ववत्। स एषः त्रिविधोऽपि परमावधिरूत्कृष्टचारित्रयुक्तस्यैव भवति नान्यस्य। वर्धमानो भवति न हीयमानः। अप्रतिपाती न प्रतिपाती। यस्य यावति च लोके लोकप्रमाणासंख्येयलोकक्षेत्रे जातस्तस्य तावत्यवस्थानादवस्थितो भवति, अनवस्थितश्च वृद्धिं प्रति न हानिम्। ऐहलौकिकदेशान्तरगमनादनुगामी पारलौकिकदेशान्तरानुगमनाभावादननुगामी।

सर्वावधिरुच्यते – असंख्येयानामसंख्येयभेदत्वादुत्कृष्टपरमावधिक्षेत्रमसंख्येय-लोकगुणितमस्य क्षेत्रम्, कालद्रव्यभावाः पूर्ववत्। स एष न वर्धमानो न हीयमानो नानवस्थितो न प्रतिपाती, प्राक्संयतभवक्षयादवस्थितोऽप्रतिपाती, भवान्तरं प्रत्यननुगामी देशान्तरं प्रत्यनुगामी। सर्वशब्दस्य साकल्यवाचित्वात् द्रव्यक्षेत्रकालभावैः सर्वावधेरन्तःपाती परमावधिः, अतः परमावधिरपि देशावधिरेवेति द्विविध एवावधिः सर्वावधिर्देशावधिश्च।

उक्तायां वृद्धौ यदा कालवृद्धिस्तदा चतुर्णामपि वृद्धिर्नियता। क्षेत्रवृद्धौ कालवृद्धिर्भाज्या स्यात्कालवृद्धिः स्यान्नेति, द्रव्यभावयोस्तु वृद्धिर्नियता। द्रव्यवृद्धौ भाववृद्धिर्नियता, क्षेत्रकालवृद्धिः पुनर्भाज्या स्याद्वा न वेति। भाववृद्धावपि द्रव्यवृद्धिर्नियता, क्षेत्रकालवृद्धिर्भाज्या स्याद्वा न वेति।

स एषोऽवधिज्ञानोपयोगो द्विधा भवति एकक्षेत्रोऽनेकक्षेत्रश्च। श्रीवृक्षस्वस्तिकनन्द्या-वर्ताद्यन्यतमोपयोगोपकरण एकक्षेत्रः। तदनेकोपकरणोपयोगोऽनेकक्षेत्रः। यद्येवं परायत्त-त्वात् परोक्षत्वप्रसङ्गः? न; इन्द्रियेषु परत्वरूढेः।

"इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः।
मनसस्तु परा बुद्धिर्बुद्धेः परतरो हि सः॥' इति।

एवं बहुधा व्याख्यातमवधिज्ञानम्, मनःपर्ययस्येदानीमवसरः प्राप्तः, तस्य भेदपुरस्सरं लक्षणं व्याचिख्यासुरिदमाह –

## ऋजुविपुलमती मनःपर्ययः॥२३॥

ऋज्वी निर्वर्तिता प्रगुणा च। कस्मात्? निर्वर्तितवाक्कायमनस्कृतार्थस्य परकीयमनोगतस्य विज्ञानात्। ऋज्वी मतिर्यस्य सोऽयमृजुमतिः। अनिर्वर्तिता कुटिला च विपुला। कस्मात्? अनिर्वर्तितवाक्कायमनस्कृतार्थस्य परकीयमनोगतस्य विज्ञानात्। विपुला मतिरस्य स विपुलमतिः। ऋजमतिश्च विपुलमतिश्च ऋजुविपुलमती। एकस्य मतिशब्दस्य गतार्थत्वादप्रयोगः। अथवा, ऋजुश्च विपुला च ऋजुविपुले, ऋजुविपुले मती ययोस्तौ ऋजुविपुलमतीति। स एष मनःपर्ययो द्विधा ऋजुमतिर्विपुलमतिरिति। अत्रोक्तो भेदः।

लक्षणमस्येदानीं वक्तव्यमिति? अत्रोच्यते –

**मनःसंबन्धेन लब्धवृत्तिर्मनःपर्ययः ॥१॥** वीर्यान्तरायमनःपर्ययज्ञानावरणक्षयोपशमाङ्गोपाङ्गनामलाभोपष्टम्भादात्मीयपरकीयमनःसंबन्धेन लब्धवृत्तिरुपयोगो मनःपर्ययः।

**मतिज्ञानप्रसङ्ग इति चेन्न; अन्यदीयमनोऽपेक्षामात्रत्वादभ्रे चन्द्रव्यपदेशवत् ॥२॥** स्यान्मतम् - यथा मनश्चक्षुरादिसंबन्धाच्चक्षुरादिज्ञानमाविर्भवति तन्मतिज्ञानं तथा मनःपर्ययोऽपि मनःसंबन्धाल्लब्धवृत्तिरिति मतिज्ञानं प्राप्नोतीति; तन्न; किं कारणम्? अन्यदीयमनोऽपेक्षामात्रत्वात्। कथम्? अभ्रे चन्द्रव्यपदेशवत्। यथा 'अभ्रे चन्द्रमसं पश्य' इति अभ्रमपेक्षाकारणमात्रं भवति, न च चक्षुरादिवन्निर्वर्तकं चन्द्रज्ञानस्य, तथा अन्यदीयमनोऽप्यपेक्षाकारणमात्रं भवति 'परकीयमनसि व्यवस्थितमर्थं जानाति मनःपर्ययः' इति। ततो नास्य तदायत्तः प्रभव इति न मतिज्ञानप्रसङ्गः।

**स्वमनोदेशे वा तदावरणकर्मक्षयोपशमव्यपदेशात् चक्षुष्यवधिज्ञाननिर्देशवत् ॥३॥** अथवा, चक्षुर्देशस्थानामात्मप्रदेशानामवध्यावरणक्षयोपशमात् यथा चक्षुष्यवधिज्ञानव्यदेश इष्टः, न चाऽवधिः मतिर्भवति, तथा मनःपर्ययज्ञानावरणक्षयोपशमात् स्वमनोदेशस्थानामात्मप्रदेशानां मनःपर्ययव्यपदेशः, न चास्य मतित्वम्।

**मनःप्रतिबन्धज्ञानादनुमानप्रसङ्ग इति चेन्न ; प्रत्यक्षलक्षणाऽविरोधात् ॥४॥** स्यान्मतम् - यथा धूमप्रतिबन्धाद्धूमसंपृक्तेऽग्नावनुमानं तथाऽन्यदीयमनःप्रतिबन्धात् तन्मनःसंपृक्तानर्थान् जानन् मनःपर्ययोऽनुमानमिति तन्न; किं कारणम्? प्रत्यक्षलक्षणाऽविरोधात्। यत्प्रत्यक्षलक्षणमुक्तम् 'इन्द्रियानिन्द्रियनिरपेक्षमतीतव्यभिचारं साकार-ग्रहणं प्रत्यक्षम्' इति, तेनाऽविरोधान्न मनःपर्ययोऽनुमानम्। अनुमानं हि तेन विरुध्यते।

**उपदेशपूर्वकत्वाच्चक्षुरादिकरणनिमित्तत्वाद्वाऽनुमानस्य॥५॥** उपदेशाद्धि 'अयमग्नि-रयं धूमः' इत्युपलभ्य पश्चाद्धूमदर्शनादग्नावनुमानं करोति, चक्षुरादिकरणसंबन्धाच्च, ततोऽस्योक्तं प्रत्यक्षलक्षणं विरुध्यते। न च तथा मनःपर्यय उपदेशं चक्षुरादिकरणसंबन्धं चाऽपेक्षते।

**स द्वेधा सूत्रोक्तविकल्पात् ॥६॥** स मनःपर्ययो द्वेधा। कुतः? सूत्रोक्तविकल्पात्। ऋजुमतिर्विपुलमतिरिति।

**आद्यस्त्रेधा ऋजुमनोवाक्कायविषयभेदात् ॥७॥** आद्य ऋजुमतिमनःपर्ययस्त्रेधा। कुतः? ऋजुमनोवाक्कायविषयभेदात् - ऋजुमनस्कृतार्थज्ञः ऋजुवाक्कृतार्थज्ञः ऋजुकाय कृतार्थज्ञश्चेति। तद्यथा, मनसाऽर्थं व्यक्तं सञ्चित्य वाचं वा धर्मादियुक्तामसंकीर्णामुच्चार्य कायप्रयोगं चोभयलोकफलनिष्पादनार्थमङ्गोपाङ्गप्रत्यङ्गनिपातनाकुञ्चनप्रसारणादि-लक्षणं कृत्वा पुनरनन्तरे समये कालान्तरे वा तमेवार्थं चिन्तितमुक्तं कृतं वा विस्मृतत्वान्न शक्नोति चिन्तयितुम्, तमेवंविधमर्थ- मृजुमतिमनःपर्ययः पृष्टोऽपृष्टो वा जानाति 'अयमसावर्थोऽनेन विधिना त्वया चिन्तित उक्तः कृतो वेति। कथमयमर्थो लभ्यते? आगमाविरोधात्। आगमे ह्युक्तम्**"मनसा मनः परिच्छिद्य परेषां संज्ञादीन् जानाति'** इति। मनसा आत्मनेत्यर्थः। परमनः समन्ताद्विदित्वा परिच्छिद्य मनसा चिन्तितस्य सचेतनेतरस्याऽर्थस्य मनस्यवस्थात् मनोव्यपदेशः मञ्चस्थानां पुरुषाणां मञ्चव्यपदेशवत्। तमात्मनाऽऽत्माऽवबुध्याऽऽत्मनः परेषां च चिन्ताजीवितमरण-सुखदुःखलाभालाभादीन् विजानाति। **"व्यक्तमनसां जीवानामर्थं जानाति नाऽव्यक्तमन-साम्।'** व्यक्तः स्फुटीकृतोऽर्थश्चिन्तया सुनिर्वर्तितो यैस्ते जीवा व्यक्तमनसस्तैरर्थं चिन्तितं ऋजुमतिर्जानाति नेतरैः। कालतो जघन्येन जीवानामात्मनश्च द्वित्राणि,

उत्कर्षेण सप्ताष्टानि भवग्रहणानि गत्यागत्यादिभिः प्ररूपयति। क्षेत्रतो जघन्येन गव्यूति-पृथक्त्वस्याभ्यन्तरं न बहिः।

**द्वितीयः षोढा ऋजुवक्रमनोवाक्कायविषयभेदात् ॥८॥** द्वितीयो विपुलमतिः षोढा भिद्यते। कुतः? ऋजुवक्रमनोवाक्कायविषयभेदात्। ऋजुविकल्पाः पूर्वोक्ताः वक्रविकल्पाश्च तद्विपरीता योज्याः। तथा परेषां च चिन्ताजीवितमरणसुखदुःखलाभालाभादीन् अव्यक्तमनोभिर्व्यक्तमनोभिश्च चिन्तितानचिन्तितान् जानाति विपुलमतिः; कालतो जघन्येन सप्ताष्टानि भवग्रहणानि, उत्कर्षेणाऽसंख्येयानि गत्यागतिभिः प्ररूपयति। क्षेत्रतो जघन्येन योजनपृथक्त्वम्, उत्कर्षेण मानुषोत्तरशैलाभ्यन्तरं न बहिः।

एवं द्विभेदो मनःपर्ययो वर्णितः। तस्य किं परस्परतो विशेषोऽस्त्युत नास्ति? अत आह –

## विशुद्ध्यप्रतिपाताभ्यां तद्विशेषः॥२४॥

तदावरणकर्मक्षयोपशमे सत्यात्मनः प्रसादो विशुद्धिः। प्रतिपतनं प्रतिपातः। उपशान्तकषायस्य चारित्रमोहोद्रेकात् प्रच्युतसंयमशिखरस्य प्रतिपातो भवति। क्षीण-कषायस्य प्रतिपातकारणाभावादप्रतिपातः। विशुद्धिश्चाऽप्रतिपातश्च विशुद्ध्यप्रतिपातौ ताभ्यां विशुद्ध्यप्रतिपाताभ्यां तयोर्विशेषस्तद्विशेषः।

पूर्वसूत्र एव तयोर्विशेषो निर्ज्ञातः किमर्थं पुनरिदमुच्यते?

**विशेषान्तरप्रतिपत्त्यर्थं पुनर्वचनम् ॥१॥** यः पूर्वसूत्रे विशेष उक्तः तावतास्य न परितोषस्ततो विशेषान्तरप्रतिपत्त्यर्थं पुनरिदमुच्यते।

**चशब्दप्रसङ्ग इति चेन्न; प्राथमकल्पिकभेदाभावात् ॥२॥** यथा मनःपर्ययस्य ऋजुविपुलमती भेदौ तथा विशुद्ध्यप्रतिपातावपि तस्यैव यदि भेदौ स्यातां युक्तश्चशब्दः स्यात्। यतस्तु विशुद्ध्यप्रतिपातौऋजुविपुलमत्योर्विशेषौ न भेदौ, अतश्चशब्दाऽप्रसङ्गः। तत्र विशुद्ध्या तावदृजुमतेर्विपुलमतिर्द्रव्यक्षेत्रकालभावैर्विशुद्धतरः। कथम्? इह यः कार्मणद्रव्यानन्तभागोऽन्त्यः सर्वावधिना ज्ञातस्तस्य पुनरनन्तभागीकृतस्य मनःपर्यय ज्ञेयोऽनन्तभागः, अनन्तस्याऽनन्तभेदत्वात्। ऋजुमतिकार्मणद्रव्याऽनन्तभागाद् दूरविप्र कृष्टोऽल्पीयाननन्तभागः विपुलमतेर्द्रव्यम्। क्षेत्रकालविशुद्धिरुक्ता। भावतो विशुद्धिः सूक्ष्मतरद्रव्यविषयत्वादेव वेदितव्या। प्रकृष्टक्षयोपशमविशुद्धिभावयोगादप्रतिपादेनापि विपुलमतिर्विशिष्टा, स्वामिनां प्रवर्धमानचारित्रोदयत्वात्। ऋजुमतिः पुनः प्रतिपाती स्वामिनां कषायोद्रेकाद्धीयमानचारित्रोदयत्वात्।

यद्यस्य मनःपर्ययस्य प्रत्यात्ममयं विशेषः। अथाऽनयोरवधिमनःपर्यययोः कुतो विशेष इति? अत आह –

## विशुद्धिक्षेत्रस्वामिविषयेभ्योऽवधिमनःपर्यययोः ॥२५॥

विशुद्धिः प्रसादः। क्षेत्रं यत्रस्थान् भावान् प्रतिपद्यते। स्वामी प्रयोक्ता। विषयो ज्ञेयः।

**अवधिज्ञानान्मनःपर्ययस्य विशुद्ध्यभावोऽल्पद्रव्यविषयत्वादिति चेन्न; भूयःपर्यायज्ञानात् ॥१॥** स्यान्मतम् - अवधिज्ञानान्मनःपर्ययोऽविशुद्धतरः। कुतः? अल्प-द्रव्यविषयत्वात्। यतः सर्वावधिरूपिद्रव्यानन्तभागो मनःपर्ययद्रव्यमिति; तन्न; किं कारणम्? भूयःपर्यायज्ञानात्। यथा कश्चिद् बहूनि शास्त्राणि व्याचष्टे एकदेशेन न साकल्येन तद्गतमर्थं शक्नोति वक्तुम्, अपरस्त्वेकं शास्त्रं साकल्येन व्याचष्टे यावन्तस्तस्यार्थास्तान् सर्वान् शक्नोति वक्तुम् अयं पूर्वस्माद्विशुद्धतरविज्ञानो भवति।

तथावधिज्ञानविषयानन्तभागज्ञोऽपि मनःपर्ययो विशुद्धतरः, यतस्तमनन्तभागं रूपादिभि-र्बहुभिः पर्यायैः प्ररूपयति। क्षेत्रमुक्तम्। विषयो वक्ष्यते। स्वामित्वं प्रत्युच्यते-

**विशिष्टसंयमगुणैकार्थसमवायी मनःपर्ययः॥२॥** विशिष्टः संयमगुणो यत्र विद्यते तत्रैव वर्तते मनःपर्ययः। तथा चोक्तम् -

''मनुष्येषु मनःपर्यय आविर्भवति न देवनारकतैर्यग्योनेषु। मनुष्येषु चोत्पद्यमानः गर्भजेषूत्पद्यते न सम्मूर्च्छनजेषु। गर्भजेषु चोत्पद्यमानः कर्मभूमिजेषूत्पद्यते नाकर्मभूमिजेषु। कर्मभूमिजेषूत्पद्यमानः पर्याप्तकेषूत्पद्यते नापर्याप्तकेषु। पर्याप्तकेषूप-जायमानः सम्यग्दृष्टिषूपजायते न मिथ्यादृष्टिसासादनसम्यदृष्टिसम्यङ्मिथ्यादृष्टिषु। सम्यग्दृष्टिषूप-जायमानः संयतेषूपजायते नाऽसंयतसम्यग्दृष्टिसंयतासंयतेषु। संयतेषूपजायमानः प्रमत्तादिषु क्षीणकषायान्तेषूपजायते नोत्तरेषु। तत्र चोपजायमानः प्रवर्धमानचारित्रेषु जायते न हीयमानचारित्रेषु। प्रवर्धमानचारित्रेषूपजायमानः सप्तविधान्यतमर्द्धिप्राप्तेषूपजायते नेतरेषु। ऋद्धिप्राप्तेषु च केषुचिन्न सर्वेषु' इति।

विशिष्टसंयमग्रहणं वाक्ये कृतम्। अवधिः पुनः चातुर्गतिकेष्विति स्वामिभेदा दप्यनयोर्विशेषः।

इदानीं केवलज्ञानलक्षणाभिधानं प्राप्तकालं तदुल्लङ्घ्य ज्ञानानां विषयनिबन्धः परीक्ष्यते। कुतः? तस्य ''मोहक्षयाज्ज्ञानदर्शनावरणान्तरायक्षयाच्च केवलम्'' इत्यत्र वक्ष्यमाणत्वात्। यद्येवमाद्ययोरेव तावन्मतिश्रुतयोर्विषयनिबन्ध उच्यतामिति? आह –

**मतिश्रुतयोर्निबन्धो द्रव्येष्वसर्वपर्यायेषु॥२६॥**

निबन्धनं निबन्धः। कस्य? मतिश्रुतविषयस्य। तत्तर्हि विषयग्रहणं कर्तव्यम्? न कर्तव्यम् ।

**प्रत्यासत्तेः प्रकृतविषयग्रहणाभिसंबन्धः॥१॥** प्रकृतं विषयग्रहणमस्ति। क्व प्रकृतम्? 'विशुद्धिक्षेत्रस्वामिविषयेभ्यः' इति। तत्र प्रत्यासत्तेर्विषयग्रहणमिहाभिसंबध्यते। ननु च स विभक्त्यन्तरनिर्दिष्टो न शक्यते इह संबद्धुम्?

**अर्थवशाद्विभक्तिपरिणामः॥२॥** यथा 'उच्चानि देवदत्तस्य गृहाणि आमन्त्रयस्वैनम्' 'देवदत्तम्' इति गम्यते, 'देवदत्तस्य गावोऽश्वा हिरण्यम्, आढ्यो वैधवेयः' 'देवदत्तः' इति गम्यते, एवमिहापि। निबन्धः कस्य? 'विषयस्य' इत्यभिसंबध्यते। अथ द्रव्येष्विति बहुत्वनिर्देशः किमर्थः?

**द्रव्येष्विति बहुत्वनिर्देशः सर्वद्रव्यसंग्रहार्थः॥३॥** जीवधर्माऽधर्माकाशकालपुद्गलाभि-धानानि षडत्र द्रव्याणि, तेषां सर्वेषां संग्रहार्थः द्रव्येष्विति बहुत्वनिर्देशः क्रियते।

**तद्विशेषणार्थमसर्वपर्यायग्रहणम्॥४॥** तेषां द्रव्याणामविशेषेण मतिश्रुतयोर्विषयभाव-प्रसङ्गे तद्विशेषणार्थमसर्वपर्यायग्रहणं क्रियते। तानि द्रव्याणि मतिश्रुतयोर्विषयभावमा-पद्यमानानि कतिपयैरेव पर्यायैर्विषयभावमास्कन्दन्ति न सर्वपर्यायैरनन्तैरपीति। तत्कथम्? इह मतिः चक्षुरादिकरणनिमित्ता रूपाद्यालम्बना, सा यस्मिन् द्रव्ये रूपादयो वर्तन्ते न तत्र सर्वान् पर्यायानवगृह्णाति, चक्षुरादिविषयानेवाऽऽलम्बते। श्रुतमपि शब्दलिङ्गम्, शब्दाश्च सर्वे संख्येया एव, द्रव्यपर्यायाः पुनः संख्येयाऽसंख्येयानन्तभेदाः, न ते सर्वे विशेषाकारेण तैर्विषयीक्रियन्ते। उक्तञ्च –

**"पण्णवणिज्जा भाव अणंतभागो दु अणभिलप्पाणं।**

**पण्णवणिज्जाणं पुण अणंतभागो सुदणिबद्धो॥'** इति।

**अतीन्द्रियेषु मतेरभावात् सर्वद्रव्यासंप्रत्यय इति चेन्न नोइन्द्रियविषयत्वात् ॥५॥** स्यान्मतम् - धर्मास्तिकायादिषु मतेरभावोऽतीन्द्रियत्वात्, ततो 'मतिः सर्वद्रव्यविषय-निबन्धा' इति लक्षणमयुक्तमिति; तन्न; किं कारणम्? नोइन्द्रियविषयत्वात्। नोइन्द्रियावरणक्षयोपशमलब्ध्यपेक्षं नोइन्द्रियं तेषु व्याप्रियते। अथ हि तत्र न वर्तेत, अवधिना सह निर्दिश्येत रूपिष्वेव वृत्तेः।

अथ मतिश्रुतयोरनन्तरनिर्देशार्हस्यावधेः को विषयनिबन्ध इति? अत आह –

## रूपिष्ववधेः॥२७॥

रूपशब्दस्याऽनेकार्थत्वे सामर्थ्याच्छुक्लादिग्रहणम् ॥१॥ अयं रूपशब्दोऽनेकार्थः क्वचिच्चाक्षुषे वर्तते यथा - 'रूपरसगन्धस्पर्शाः' इति। क्वचित्स्वभावे वर्तते यथा 'अनन्तरूपमनन्तस्वभावम्' इति। तत्रेह सामर्थ्याच्चक्षुर्विषये शुक्लादौ वर्तमानो गृह्यते। यदि स्वभाववाचिनो ग्रहणं स्यादनर्थकं स्यात्। न हि कस्यचित् स्वभावो नास्तीति।

**भूमाद्यनेकार्थसंभवे नित्ययोगोऽभिधानवशात् ॥२॥** यद्यपि मत्वर्थीयस्य भूमाद-योऽर्थाः बहवः संभवन्ति, इहाभिधानवशात् नित्ययोगो वेदितव्यः। नित्यं हि पुद्गला युक्ता रूपेणेति, यथा क्षीरिणो वृक्षा इति।

यद्येवमवधिज्ञानस्य पुद्गला रूपमुखेनैव विषयभावं प्रतिपद्येरन् न रसादिमुखेन? नैष दोषः;

**तदुपलक्षणार्थत्वात् तदविनाभाविरसादिग्रहणम् ॥३॥** तद्रूपं द्रव्यस्योपलक्षणत्वेनो-पादीयतेऽतस्तदविनाभाविनो रसादयोऽपि गृह्यन्ते।

यद्येवं तद्गतेषु सर्वेष्वनन्तेषु पर्यायेष्ववधेर्विषयनिबन्धः प्राप्नोतीति? अत आह –

**असर्वपर्यायग्रहणानुवृत्तेर्न सर्वगतिः॥४॥** 'असर्वपर्यायेषु' इत्येतद्ग्रहणमनुवर्तते। यथा 'देवदत्ताय गौर्दीयतां जिनदत्ताय कम्बलः' इति 'दीयताम्' इत्यभिसबध्यते, एवमिहापि 'असर्वपर्यायेषु' इत्यभिसंबन्धान्न सर्वगतिर्भवति। ततो रूपिषु पुद्गलेषु प्रागुक्तद्रव्यादिपरिमाणेषु जीवपर्यायेष्वौदयिकौपशमिकक्षायोपशमिकेषूत्पद्यतेऽवधिज्ञानम् रूपिद्रव्यसंबन्धात्, न क्षायिकपारिणामिकेषु नापि धर्मास्तिकायादिषु तत्संबन्धाभावात्।

अथ मनःपर्ययस्य को विषयनिबन्ध इति? अत आह –

## तदनन्तभागो मनःपर्ययस्य॥२८॥

यद्रूपिद्रव्यं सर्वावधिज्ञानस्य विषयत्वेन समर्थितं तस्यानन्तभागीकृतस्यैकस्मिन् भागे मनःपर्ययः प्रवर्तते।

'अथान्ते यन्निर्दिष्टं केवलज्ञानं तस्य को विषयनिबन्ध इति? अत आह-

## सर्वद्रव्यपर्यायेषु केवलस्य॥२९॥

अत्राह- किं द्रव्यम्?

**स्वपर्यायान् द्रवति द्रूयते वा तैरिति द्रव्यम्॥१॥** आत्मनः पर्यायान् द्रवति गच्छतीति द्रव्यम्। बहुलापेक्षया कर्तरि साधुत्वम्। द्रूयते वा तैरिति द्रव्यम्।

कथञ्चिद्भेदसिद्धौ तत्कर्तृकर्मव्यपदेशसिद्धिः॥२॥ द्रव्यस्य पर्यायाणां च कथञ्चिद्भेदे सत्युक्तः कर्तृकर्मव्यपदेशः सिद्ध्यति।

**इतरथा हि तदप्रसिद्धिरत्यन्ताव्यतिरेकात् ॥३॥** यद्येकान्तेनैकत्वमवधार्येत तस्य कर्तृकर्मव्यपदेशाप्रसिद्धिः स्यात्। कुतः? अत्यन्ताव्यतिरेकात्। न हि तदेव निर्विशेषमेकं शक्त्यन्तरापेक्षया विना कर्म च भवितुमर्हति। अथ कः पर्यायः?

**तस्य मिथोभवनं प्रति विरोध्यविरोधिनां धर्माणामुपात्तानुपात्तहेतुकानां शब्दान्तरात्मलाभनिमित्तत्वादर्पितव्यवहारविषयोऽवस्थाविशेषः पर्यायः॥४॥** मिथोभवनं प्रति केचिद्धर्मा विरोधिनः, केचिदविरोधिनः। तत्र जीवस्य तावदनादिपारिणामिकचैतन्य-जीवद्रव्यभव्याभव्योर्ध्वगतिस्वभावास्तित्वादिभिरौदयिकादयो भावा यथासंभवं युगपद्भावा-विरोधिनः। विरोधिनश्च नारकतैर्यग्योनदेवमनुष्यस्त्रीपुंनपुंसकैकद्वित्रिचतुःपञ्चेन्द्रियबाल्यकौमारकोपप्रसादादयः सहानवस्थानात्। तथा पौद्गलिका अनादिपारिणामिकाः रूपरसगन्धस्पर्शशब्दसामान्यास्तित्वादयः शुक्लादिपञ्चकतिक्तादिपञ्चकगन्धद्वयस्पर्शाष्ट-कशब्दषट्कपर्यायैः प्रत्येकमेकद्वित्रिचतुःपञ्चादिसंख्येयासंख्येयानन्तगुणपरिणामिभिर्यथा-संभवं युगपद्भावादविरोधिनः। विरोधिनश्च शुक्लकृष्णनीलतिक्तकटुकसुरभीतरगन्धादयः प्रायोगिका वैश्रसिकाश्च परमाणुषु स्कन्धेषु च, सहानवस्थानात्। एवं धर्मास्तिकाया-दिष्वप्यमूर्तत्वाऽचेतनत्वाऽसंख्येयप्रदेशत्वगतिकारणस्वभावाऽस्तित्वादयोऽनन्तभेदागुरु-लघुगुणहानिवृद्धिविकारैः स्वप्रत्ययैः परप्रत्ययैश्च गतिकारणत्वविशेषादिभिरविरोधिनः परस्परविरोधिनश्च विज्ञेयाः। तेषु केचिदुपात्तहेतुका द्रव्यक्षेत्रकालभावनिमित्ता औदयिकादयः। अनुपात्तहेतुकाश्च त्रिषु कालेष्वविकारिणः पारिणामिकाश्चैतन्यादयः। तेषां विरोध्यविरोधिनां धर्माणामुपात्तानुपात्तहेतुकानां शब्दान्तरात्मलाभस्य निमित्तत्वात् 'चेतनो नारको बालः' इति अर्पितव्यवहारविषयः इति व्यवहारर्जुसूत्रत्रिविधशब्दनयात्मकः, द्रव्यार्थिकानर्पणात् पर्यायार्थिकेनार्पितः तस्य विषयः, तस्य द्रव्यस्य अवस्थाविशेषः पर्याय इत्युच्यते।

**तयोरितरेतरयोगलक्षणो द्वन्द्वः॥५॥** तयोरितरेतरयोगलक्षणो द्वन्द्वो वेदितव्यः। द्रव्याणि च पर्यायाश्च द्रव्यपर्याया इति।

**द्वन्द्वेऽन्यत्वं प्लक्षन्यग्रोधवदिति चेन्न; तस्य कथञ्चिद्भेदेऽपि दर्शनाद् गोत्वगोपिण्डवत्॥६॥** स्यान्मतम् - यदि द्वन्द्वः प्लक्षन्यग्रोधवदन्यत्वं द्रव्यपर्यायाणां प्राप्नोतीति; तन्न; कारणम् ? तस्य कथञ्चिद्भेदेऽपि दर्शनात् गोत्वगोपिण्डवत्। यथा 'गोत्वं च गोपिण्डश्च गोत्वगोपिण्डौ' इत्यनन्यत्वेऽपि द्वन्द्वो भवति तथा द्रव्यपर्यायेष्विति। ननु सामान्यविशेषयोरन्यत्वात् साध्यसममेतदिति; नैष दोषः; उक्तमेतत् - अनन्यत्वं सामान्यविशेषयोः।

**द्रव्यग्रहणं पर्यायविशेषणं चेन्न; आनर्थक्यात्॥७॥** स्यादेतत् - 'द्रव्याणां पर्याया द्रव्यपर्यायाः' इति द्रव्यग्रहणं पर्यायविशेषणमिति; तन्न; किं कारणम्? आनर्थक्यात्। एवं सति द्रव्यग्रहणमनर्थकं स्यात्। न ह्यद्रव्यस्य पर्यायाः सन्तीति।

**द्रव्याज्ञानप्रसङ्गाच्च॥८॥** केवलेन पर्याया एव ज्ञायन्ते न द्रव्याणीति द्रव्याज्ञानं प्राप्नोति, उत्तरपदार्थप्रधानत्वात्। अथ मतमेतत् - सर्वेषु पर्यायेषु ज्ञातेषु न किञ्चद ज्ञातमस्ति ततो व्यतिरिक्तस्य द्रव्यस्याभावात्; यद्येवं 'द्रव्यग्रहणमनर्थकम्' इत्युक्तं पुरस्तात्। तस्मात् साधूक्तम्-'द्वन्द्वोऽयम्' इति। ननु द्वन्द्वेऽपि द्रव्यग्रहणमनर्थकं पर्यायव्यतिरेकेणाऽनुपलब्धेरिति; नैष दोषः; संज्ञास्वालक्षण्यादिभेदाद्भेदोपपत्तेः।

अथ सर्वग्रहणं किमर्थं ननु बहुवचननिर्देशादेव बहुत्वसंप्रत्ययसिद्धेः?

**सर्वग्रहणं निरवशेषप्रतिपत्त्यर्थम्॥९॥** ये लोकालोकभेदभिन्नास्त्रिकालविषया द्रव्य-पर्याया अनन्ताः, तेषु निरवशेषेषु केवलज्ञानस्य विषयनिबन्ध इति प्रतिपत्त्यर्थं सर्वग्रहण्। यावाँल्लोकालोकस्वभावोऽनन्तः तावन्तोऽनन्तानन्ता यद्यपि स्युः, तानपि ज्ञातुमस्य सामर्थ्यमस्तीत्यपरिमितमाहात्म्यं तत् केवलज्ञानं वेदितव्यम्।

आह - विषयनिबन्धोऽवधृतो मत्यादीनाम्दिं तु न निर्ज्ञातमेकस्मिन्नात्मनि स्वनिमित्तसन्निधानोपजनितवृत्तीनि ज्ञानानि यौगपद्येन कति भवन्तीति? अत उच्यते –

## एकादीनि भाज्यानि युगपदेकस्मिन्नाचतुर्भ्यः॥३०॥

एक इति कोऽयं शब्दः?

**अनेकार्थसंभवे विवक्षातः प्राथम्यवचन एकशब्दः॥१॥** अयमेकशब्दोऽनेकस्मिन्नर्थे दृष्टप्रयोगः। क्वचित्संख्यायां वर्तते, 'एको द्वौ बहवः' इति। क्वचिदन्यत्वे, 'एके आचार्याः, अन्ये आचार्याः' इति। क्वचिदसहाये, 'एकाकिनस्ते विचरन्ति वीराः' इति। क्वचित्प्राथम्ये, 'एकमागमनम्, प्रथममागमनम्' इति। क्वचित्प्राधान्ये, 'एकहतां सेनां करोमि, प्रधानहतां सेनां करोमि' इत्यर्थः। तत्रेह विवक्षातः प्राथम्यवचन एकशब्दो वेदितव्यः।

**आदिशब्दश्चावयववचनः॥२॥** आदिशब्दश्च। किम्? अनेकार्थसंभवे विवक्षात इहावयववचनो वेदितव्यः। इत्यर्थः। क्वचित्प्रकारे, 'भुजङ्गादयः परिहर्तव्याः, भुजङ्ग-प्रकाराः विषवन्तः' इत्यर्थः। क्वचित्सामीप्ये, 'नद्यादीनि क्षेत्राणि, नदीसमीपानि' इत्यर्थः। क्वचिदवयवे, 'ऋगादिमधीते, ऋगवयवमधीते' इत्यर्थः। तेनैतदुक्तं भवति - एकस्यादिरेकादिः प्रथमावयव इति। कस्य? प्रथमस्य परोक्षस्य। कः पुनरवयवः? मतिज्ञानम् ।

**सामीप्यवचनो वा॥३॥** अथवा, अयमादिशब्दः सामीप्यवचनो द्रष्टव्यः। तेन प्रथमस्य मतिज्ञानस्य श्रुतं समीपमित्युक्तं भवति।

**मतेर्बहिर्भावप्रसङ्ग इति चेन्न; अनयोः सदाऽव्यभिचारात् ॥४॥** स्यादेतत् - एवं सति मतेर्बहिर्भावः प्राप्नोतीति; तन्न; किं कारणम्? अनयोः सदाऽव्यभिचारात्। एते हि मतिश्रुते सर्वकालमव्यभिचारिणी नारदपर्वतवत्। तस्मादनयोरन्यतरग्रहणे इतरस्य ग्रहणं सन्निहितं भवति।

**ततोऽन्यपदार्थे वृत्तावेकस्यादिशब्दस्य निवृत्तिरुष्ट्रमुखवत् ॥५॥** यथा, 'उष्ट्रस्य मुखमुष्ट्रमुखम्, उष्ट्रमुखवन्मुखमस्य' इति वृत्तौ एकस्य मुखशब्दस्य निवृत्तिः; एवमिहापि 'एकादिरादिर्येषां तानीमान्येकादीनि' इत्येकस्यादिशब्दस्य निवृत्तिः।

**अवयवेन विग्रहः समुदायो वृत्त्यर्थः ॥६॥** अवयवेन विग्रहः क्रियते, वृत्त्यर्थः समुदायो भवति। तेनैकादीन्यभ्यन्तरीकृत्य भाज्यान्यर्पयितव्यानीत्यर्थः। किं सर्वाणि? न, इत्याह 'आ चतुर्भ्यः'। कुत एतत्?

**केवलस्याऽसहायत्वादितरेषां च क्षयोपशमनिमित्तत्वाद्यौगपद्याभावः ॥७॥** यतः केवलज्ञानं क्षायिकं तदसहायम्, इतराणि च ज्ञानानि क्षयोपशमनिमित्तानि, अतो विरोधाद्युगपदसंभवः, तस्मादुच्यते 'आ चतुर्भ्यः' इति।

**नाभावोऽभिभूतत्वादहनि नक्षत्रवदिति चेन्न; क्षायिकत्वात् ॥८॥** स्यादेतत् - नाभावः क्षायोपशमिकानां ज्ञानानां केवलिनि, किन्तु केवलज्ञानेन महताऽभिभूतानि स्वप्रयोजने न व्याप्रियन्ते भास्करप्रभाभिभूतनक्षत्रवदिति; तन्न; किं कारणम्? क्षायिकत्वात्। संक्षीणसकलज्ञानावरणे भगवत्यर्हति कथं क्षायोपशमिकानां ज्ञानानां संभवः। न हि परिप्राप्तसर्वशुद्धौ पदे प्रदेशाऽशुद्धिरस्ति।

**इन्द्रियवत्त्वादिति चेन्न; आर्षार्थानवबोधात् ॥९॥** स्यादेतत् - एवमागमः प्रवृत्तः "पञ्चेन्द्रिया असंज्ञिपञ्चेन्द्रियादारभ्य आ अयोगिकेवलिनः" इति। अत इन्द्रियवत्त्वात्तत्कार्येणापि ज्ञानेन भवितव्यमिति; तन्न; किं कारणम्? आर्षार्थानवबोधात्।

आर्षे हि सयोग्ययोगिकेवलिनोः पञ्चेन्द्रियत्वं द्रव्येन्द्रियं प्रत्युक्तं न भावेन्द्रियं प्रति। यदि हि भावेन्द्रियमभविष्यत्, अपि तु तर्हि असंक्षीणसकलावरणत्वात् सर्वज्ञतैवास्य न्यवर्तिष्यत। तस्मादेतदुक्तं भवति - एकस्मिन्नात्मनि द्वे मतिश्रुते, क्वचित् त्रीणि मतिश्रुतावधिज्ञानानि, मतिश्रुतमनःपर्ययज्ञानानि वा, क्वचिच्चत्वारि मतिश्रुतावधि-मनःपर्ययज्ञानानि, न पञ्चैकस्मिन् युगपत् संभवन्ति।

**संख्यावचनो वैकशब्दः॥१०॥** अथवा, संख्यावचनोऽयमेकशब्दः। एकमादिर्येषां तानीमान्येकादीनि। कथम्? मतिज्ञानमेकस्मिन्नात्मन्येकम्, यदक्षरश्रुतं द्व्यनेकद्वा-दशभेदमुपदेशपूर्वकं तद्भजनीयम् - स्याद्वा न वेति। इतरत् पूर्ववत्।

अपर आह - संख्याऽसहायप्राधान्यवचने एकशब्दे सत्येकादीनि केवलादीनी-त्यर्थः। एकस्मिन्नात्मन्येकं केवलज्ञानं क्षायिकत्वात्। द्वे मतिश्रुते इत्यादि पूर्ववत्।

अथोक्तानि मत्यादीनि ज्ञानव्यपदेशमेव लभन्त उताऽन्यथापीति? अत आह –

## मतिश्रुतावधयो विपर्ययश्च॥३१॥

विपर्ययो मिथ्येत्यर्थः। कुतः? सम्यगधिकारात्। चशब्दः समुच्चयार्थः। विपर्ययश्च सम्यक् चेति। कुतः पुनरेषां विपर्ययः?

**मिथ्यादर्शनपरिग्रहान्मत्यादिविपर्ययः॥१॥** योऽसौ दर्शनमोहनीयोदये सति मिथ्या-दर्शनपरिणामः तेन सहैकार्थसमवायात् मत्यादीनां विपर्ययो भवति। ननु च मणिकनकादीनां वर्चोगृहगतानामपि स्वभावविनाशो न भवति तद्वन्मत्यादीनामपि स्यात्; नैष दोषः।

**सरजसकटुकालाबूगतदुग्धवत् स्वगुणविनाशः॥३॥** यथा सरजसकटुकालाबूभाजने निहितं दुग्धं स्वगुणं परित्यजति तथा मत्यादीन्यपि मिथ्यादृष्टिभाजनगतानि दुष्यन्तीति। आधारस्य दोषाद्धि आधेयस्य दोषो जायते।

ननु च नायमेकान्तः, उक्तमेतत्-'मणिकनकादयो वर्चोगृहगता अपि स्वभावं न त्यजन्ति' इति; तत्र कथमेतदध्यवसीयते - अलाबूदुग्धवद् दुष्यन्ति मत्यादीनि न पुनर्मण्यादिवन्न दुष्यन्तीति?

**परिणामकशक्तिविशेषात् ॥४॥** परिणामकस्य हि वस्तुनः शक्तिविशेषादन्यथाभावो भवति। यथा अलाबूद्रव्यं दुग्धं विपरिणामयितुं शक्नोति तथा मिथ्यादर्शनमपि मत्यादीनामन्यथात्वं कर्तुमलं तदुदये अन्यथानिरूपणदर्शनात्। वर्चोगृहं तु मण्यादीनां विकारं नोत्पादयितुमलम्, विपरिणामदर्शनाभावात् (मिथ्यादर्शनपरिणामाभावात्) तेषां मत्यादीनां सम्यक्त्वम्, अतः सम्यग्दर्शनमिथ्यादर्शनोदयविशेषात्तेषां त्रयाणां द्विधा क्लृप्तिर्भवति - मतिज्ञानं मत्यज्ञानं श्रुतज्ञानं श्रुताऽज्ञानमवधिज्ञानं विभङ्ज्ञानमिति।

अत्राह - रूपादिविषयोपलब्धिव्यभिचाराभावाद्विपर्ययाभावः। यथैव मतिज्ञानेन सम्यग्दृष्टयो रूपादीनुपलभन्ते तथा मिथ्यादृष्टयोऽपि मत्यज्ञानेन। यथैव घटादिषु रूपादीन् श्रुतेन निश्चिन्वन्त्युपदिशन्ति च परेभ्यः तथा श्रुताज्ञानेनापि। यथैवावधिना रूपिणोऽर्थानवयन्ति तथा विभङ्गेनापीति। तस्मान्नास्ति विपर्यय इति। अत आह -

## सदसतोरविशेषाद्यदृच्छोपलब्धेरुन्मत्तवत् ॥३२॥

**सच्छब्दस्यानेकार्थसंभवे विवक्षातः प्रशंसार्थग्रहणम् ॥१॥** 'अयं सच्छब्दोऽनेकार्थः' इति व्याख्यातः। तस्येह विवक्षातः प्रशंसार्थस्य ग्रहणं वेदितव्यम् - प्रशस्तं तत्त्वज्ञान-मित्यर्थः। असदज्ञानम्। तयोः सदसतोः। अविशेषेण यदृच्छयोपलब्धेर्विपर्ययो भवति।

कथम्? उन्मत्तवत्। यथा उन्मत्तो दोषोदयादुपहतेन्द्रियमतिः विपरीतग्राही भवति सः अश्वं 'गौः' इत्यध्यवस्यति, गां वा 'अश्वः' इति, लोष्टं 'सुवर्णम्' इति, सुवर्णं च लोष्टमिति, लोष्टं लोष्टमिति, सुवर्णं सुवर्णमिति, तस्यैवमविशेषेणाध्यवस्यतोऽज्ञानमेव भवति, तद्वत् मिथ्यादर्शनोपहतेन्द्रियमतेर्मतिश्रुतावधयोऽप्यज्ञानमेव भवन्तीति।

**भवत्यर्थग्रहणं वा॥२॥** अथवा, सच्छब्दोऽयं भवत्यर्थे वेदितव्यः। सद्विद्यमान-मित्यर्थः, असदविद्यमानम्, तयोरविशेषेण यदृच्छोपलब्धेः विपर्ययो भवति - कदाचिद्रूपादि सदप्यसदिति प्रतिपद्यते असदपि सदिति। कदाचित्तु सत्सदेव असदप्यसदेवेति। कुतः?

**प्रवादिपरिकल्पनाभेदाद्विपर्ययग्रहः॥३॥** प्रवादिनां कल्पनाभेदात् विपर्ययग्रहो भवति। तद्यथा केचित्तावदाहुः - 'द्रव्यमेव न रूपादयः' इति। अपर आहुः - 'रूपादय एव न द्रव्यम्' इति। अपरेषां दर्शनम् - अन्यद् द्रव्यमन्ये च रूपादयः' इति। कथमेषां विपर्ययग्रहः? उच्यते - यदि द्रव्यमेव न रूपादयः; लक्षणाभावाल्लक्ष्यानवधारणप्रसङ्गः। किञ्च, इन्द्रियेण सन्निकृष्यमाणं द्रव्यं रूपाद्यभावे सर्वात्मना सन्निकृष्येत, ततः सर्वात्मना ग्रहणप्रसङ्गः, करणभेदाभावप्रसङ्गश्च। न चासौ दृष्ट इष्टो वा। अथ रूपादय एव न द्रव्यम्; एवमपि निराधारत्वादभावप्रसङ्गः।

किञ्च, परस्परविलक्षणानां रूपादीनां समुदयेऽपि सत्येकानर्थान्तरभावात् समुदयस्य सर्वाभावः परस्परतोऽर्थान्तरभूतत्वात्। अथ ह्यन्यद् द्रव्यं अन्ये रूपादयः; एवमपि तेषां लक्ष्यलक्षणभावाभावः परस्परतोऽर्थान्तरभूतत्वात्। दण्डिदण्डवत् लक्ष्यलक्षणभाव इति चेन्न; वैषम्यात्। पृथक्सतोर्लक्ष्यलक्षणभावो युक्तो नासतोरिति।

किञ्च, रूपादिषु गुणेष्वमूर्तेषु द्रव्यादर्थान्तरभूतेषु नेन्द्रियसन्निकर्षो युक्तः ततश्च ज्ञानाभावः। न चार्थान्तरभूतं द्रव्यं कारणं भवितुमर्हति। किञ्च

**मूलकारणविप्रतिपत्तेः॥४॥** एषां घटरूपादीनां मूलकारणे प्रवादिनां विप्रतिपत्तिः। तद्यथा, केचिदाहुः-'अव्यक्तान्महदहङ्कारतन्मात्रेन्द्रियमहाभूतमृत्पिण्डादिविवृत्तिक्रमेण घटा-देर्विश्वरूपस्य जगत उत्पादः' इति; तदयुक्तम्; न हि प्रधानस्य अमूर्तत्वनिरवयवत्व-निष्क्रियत्वाऽतीन्द्रियत्वानन्त्यनित्यत्वापरप्रयोज्यत्वादिविशेषोपेतस्य तद्विलक्षणो घटादिः कार्यो भवितुमर्हति, अदृष्टत्वात्। न चापरप्रयोज्यस्य प्रधानस्य स्वयमभिप्रायरहितस्य अभिप्रायपूर्वकप्रसवक्रमो युक्तः। पुरुषस्तावन्निष्क्रियत्वान्न महदादिसर्गार्थं प्रधानं प्रयुङ्क्ते; स्वयं निष्क्रियत्वात् प्रधानं नात्मानं महदादिसर्गार्थं प्रयोक्तुमर्हति। न हि स्वयं गतिविकलः पङ्गुरात्मानमेवावष्टभ्योत्थाय गच्छन् दृष्टः। किञ्च, अप्रयोजनस्य प्रधानस्य महदादिसर्गो न युक्तिमान्। पुरुषभोगः प्रयोजनमिति चेन्न; स्वार्थाभावात्, नित्यस्य विभोरात्मनः भोगपरिणामाभावाच्च। किञ्च, अचेतनत्वात्। इह लोके चेतनश्चैत्र ओदनार्थी क्रियाफलसाधनज्ञः तदर्थेष्वग्निसन्धुक्षणादिषु प्रवर्तमानो दृष्टः; न च तथा प्रधानं चेतनम्, अतोऽस्य महदादिक्रियाप्रसवक्रमाभावः। न च पुरुषस्तस्य क्रमस्य प्रयोजकः; निष्क्रियत्वात्।

अपर आहुः-'परमाणुभ्यः प्रतिनियतपार्थिवादिजातिविशिष्टेभ्योऽदृष्टादि हेतुसन्निधाने सति संहतेभ्योऽर्थान्तरभूतघटादिकार्यात्मलाभः' इति; तदप्ययुक्तम्; नित्यत्वादणूनां कार्यारम्भशक्त्यभावात्। सति चारम्भे नित्यत्वहानेः। न चार्थान्तरभूतस्य कार्यस्यारम्भो युक्तः; व्यतिरेकानुपलब्धेः, उपलब्धौ चाणुमहत्त्वाभावः। न च जातिप्रतिनियमोऽस्ति; भिन्नजातीयानामप्यारम्भदर्शनात्। भिन्नजातीयेषु समुदायमात्रमिति चेत्; तुल्यजातीयेष्वपि तत्प्रसङ्गः। न चात्मनो घटाद्यारम्भे कर्तृत्वमुपपन्नम्; निष्क्रियत्वान्नित्यत्वाच्च। नाप्यात्मगुणस्यादृष्टादेः; निष्क्रियत्वादेव। न च निष्क्रियोऽर्थान्तरे क्रियाहेतुर्दृष्टः।

अन्ये मन्यन्ते - 'वर्णादिपरमाणुसमुदयात्मका रूपपरमाणवोऽतीन्द्रियाः समुदिताः सन्तः इन्द्रियग्राह्यत्वमनुभूय घटादिकार्यात्मलाभहेतुत्वं प्रतिपद्यन्ते इति; तदप्ययुक्तम्; प्रत्येकं रूपपरमाणूनामतीन्द्रियत्वात्ततोऽनन्यस्य कार्यस्याप्यतीन्द्रियत्वप्रसङ्गात्, ततश्च दृश्यविषयप्रमाणप्रमाणाभासविकल्पाभावः। कार्याभावाच्च तल्लिङ्गस्य कारणस्याप्य-भावः। किञ्च, क्षणिकत्वान्निष्क्रियत्वाच्च कार्यारम्भाभावः, विविक्तशक्तीनां परस्पराभि-संबन्धाभावाश्च। न चान्योऽर्थश्चेतनस्तेषां संबन्धस्य कर्तास्ति, तदभावात्संबन्धाभावः। एवमन्येष्वपि प्रवादिषु सत्यसदित्यसत्यपि सदिति विपर्ययो मिथ्यादर्शनोदयवशाद्वे-दितव्यः पित्तोदयाकुलितरसनेन्द्रियविपर्ययवत्। ततो यदुक्तम्-'रूपादिविषयोपलब्धिव्य-भिचाराभावान्न मिथ्यादृष्टेर्ज्ञानत्रयमज्ञानम्' इति; तदसम्यक्।

व्याख्यातं ज्ञानं लक्षणादिभिः। इदानीं चारित्रं निर्देष्टव्यं तदुल्लङ्घ्य नया उच्यन्ते। कस्मात्? मोक्षविधाने तस्य वक्ष्यमाणत्वात्। कुतः पुनस्तन्मोक्षविधौ वक्ष्यते इति चेत्? मोक्षं प्रति प्रधानकारणत्वात्। किंकृतं प्राधान्यम्? कृत्स्नकर्मेन्धन-निर्दहनकृतम्। यत आत्मा व्युपरतक्रियाध्यानाविर्भूतात्मबलः कृत्स्नकर्मेन्धननिर्दहनसमर्थो भवति, न तु क्षायिकसम्यक्त्वकेवलज्ञानोपेतोऽपि। यदि स्यात्; क्षायिकसम्य-क्त्वकेवलज्ञानोत्पत्त्यनन्तरमेव कृत्स्नकर्मक्षयः स्यात्, व्युपरतक्रियाध्यानोत्पत्त्य-नन्तरमेव भवति। तच्चोत्तमं चारित्रम्, **"कर्मादानहेतुक्रियाव्युपरतिश्चारित्रम्"** इति वचनात्। यदीह तदुच्येत मोक्षविधानेऽपि तद्वक्तव्यमिति गौरवं स्यात्। एवमपि जीवादयो निर्देष्टव्या उच्यन्ते। प्रमाणं व्याख्यातम्। प्रमाणैकदेशा नयाः **"प्रमाणनयैरधिगमः"** इति वचनात्, तदनन्तरवचनार्हा नयाः। यद्येवं के ते नया इति? अत आह –

## नैगमसंग्रहव्यवहारर्जुसूत्रशब्दसमभिरूढैवम्भूता नयाः॥३३॥

शब्दापेक्षयैकादिसंख्येयविकल्पा नयाः। तत्रातिसंक्षेपादप्रतिपत्तिः, अतिविस्तरे चाल्पप्रज्ञानामननुग्रह इति मध्ययया प्रतिपत्त्या सप्त नया अत्रोच्यन्ते। तेषां सामान्यविशेषलक्षणं वक्तव्यम्। तत्र सामान्यलक्षणमुच्यते–

**प्रमाणप्रकाशिताऽर्थविशेषप्ररूपको नयः॥१॥** प्रकर्षेण मानं प्रमाणं सकलादेशि इत्यर्थः, तेन प्रकाशितानां न प्रमाणाभासपरिगृहीतानामित्यर्थः; तेषामर्थानामस्तित्व-नास्तित्वनित्यत्वानित्यत्वाद्यन्तात्मनां जीवादीनां ये विशेषाः पर्यायास्तेषां प्रकर्षेण रूपकः प्ररूपकः निरुद्धदोषानुषङ्गद्वारेणेत्यर्थः। एवंलक्षणो नयः।

तस्य द्वौ मूलभेदौ द्रव्यास्तिकः पर्यायास्तिक इति। द्रव्यमस्तीति मतिरस्य द्रव्यभवनमेव नातोऽन्ये भावविकाराः, नाप्यभावः तद्व्यतिरेकेणानुपलब्धेरिति द्रव्यास्तिकः। पर्याय एवास्तीति मतिरस्य जन्मादिभावविकारमात्रमेव भवनं न ततोऽन्यद् द्रव्यमस्ति तद्व्यतिरेकेणानुपलब्धेरिति पर्यायास्तिकः। अथवा, द्रव्यमेवार्थो-ऽस्य न गुणकर्मणी तदवस्थारूपत्वादिति द्रव्यार्थिकः। पर्याय एवार्थोऽस्य रूपाद्युत्क्षेपणा-दिलक्षणो न ततोऽन्यद् द्रव्यमिति पर्यायार्थिकः। अथवा अर्यते गम्यते निष्पाद्यत इत्यर्थः कार्यम्। द्रवति गच्छतीति द्रव्यं कारणम्। द्रव्यमेवार्थोऽस्य कारणमेव कार्यं नार्थान्तरम्, न च कार्यकारणयोः कश्चिद्रूपभेदः तदुभयमेकाकारमेव पर्वाङ्गुलिद्रव्यवदिति द्रव्यार्थिकः। परि समन्तादायः पर्यायः। पर्याय एवार्थः कार्यमस्य न द्रव्यम् अतीतानागतयोर्विनष्टानुत्पन्नत्वेन व्यवहाराभावात् स एवैकः कार्यकारणव्यपदेशभागिति पर्यायार्थिकः। अथवा, अर्थनमर्थः प्रयोजनम्, द्रव्यमेवार्थोऽस्य प्रत्ययाभिधानानु-प्रवृत्तिलिङ्गदर्शनस्य निह्नोतुमशक्यत्वादिति द्रव्यार्थिकः। पर्यायोऽर्थः प्रयोजनमस्य वाग्विज्ञानव्यावृत्तिनिबन्धनव्यवहारप्रसिद्धेरिति पर्यायार्थिकः। तद्भेदा नैगमादयः।

एषां विशेषलक्षणमुच्यते –

**अर्थसंकल्पमात्रग्राही नैगमः॥२॥** निगच्छन्ति तस्मिन्निति निगमनमात्रं वा निगमः, निगमे कुशलो भवो वा नैगमः। तस्य लोके व्यापारोऽर्थसंकल्पमात्रग्रहणं प्रस्थेन्द्रगृहगम्यादिषु। तद्यथा - कश्चित् प्रगृह्य परशुं पुरुषं गच्छन्तमभिसमीक्ष्याह 'किमर्थं गच्छति भवान्' इति? स तस्मै आचष्टे प्रस्थार्थमिति। एवमिन्द्रगृहादावपि। तथा 'कतरोऽत्र गमी' इत्युक्ते आचष्टे- 'अहं गमी' इति, संप्रत्यगच्छत्यपि गमीति व्यवहारः। एवं प्रकारोऽन्योऽपि नैगमनयस्य विषयः।

**भाविसंज्ञाव्यवहार इति चेन्न; भूतद्रव्यासन्निधानात् ॥३॥** स्यादेतत् - नायं नैगमनयविषयः भाविसंज्ञाव्यवहार इति; तन्न; किं कारणम्? भूतद्रव्यासन्निधानात्। भूतं हि कुमारतण्डुलादिद्रव्यमाश्रित्य राजौदनादिका भाविनी संज्ञा प्रवर्तते, न च तथा नैगमनयविषये किञ्चिद् भूतं द्रव्यमस्ति यदाश्रया भाविनी संज्ञा विज्ञायेत।

**उपकारानुपलम्भात् संव्यवहारानुपपत्तिरिति चेन्न; अप्रतिज्ञानात् ॥४॥** स्यादेतत् नैगमनयवक्तव्ये उपकारो नोपलभ्यते, भाविसंज्ञाविषये तु राजादावुपलभ्यते, ततो नायं युक्त इति; तन्न; किं कारणम्? अप्रतिज्ञानात्। नैतदस्माभिः प्रतिज्ञातम् - 'उपकारे सति भवितव्यम्' इति। किं तर्हि? अस्य नयस्य विषयः प्रदर्श्यते। अपि च, उपकारं प्रत्यभिमुखत्वादुपकारवानेव।

**स्वजात्यविरोधेनैकत्वोपनयात् समस्तग्रहणं संग्रहः॥५॥** बुद्ध्यभिधानानुप्रवृत्ति लिङ्गं सादृश्यं स्वरूपानुगमो वा जातिः, सा चेतनाचेतनाद्यात्मिकाः शब्दप्रवृत्ति निमित्तत्वेन प्रतिनियमात् स्वार्थव्यपदेशभाक्। स्वा जातिः स्वजातिः; अप्रच्यवनम-विरोधः, स्वजातेरविरोधः स्वजात्यविरोधस्तेन स्वजात्यविरोधेनैकत्वोपनयात्। केषाम्? भेदानाम्। समस्तग्रहणं संग्रहो यथा सद् द्रव्यं घट इत्यादि। 'सत्' इत्युक्ते

सत्तासंबन्धार्हाणां द्रव्यपर्यायतद्भेदप्रभेदानां तदव्यतिरेकात् तेनैकत्वेन संग्रहः। 'द्रव्यम्' इति चोक्ते जीवाजीवतद्भेदप्रभेदानां द्रव्यत्वाविरोधात्तेनैकत्वेन संग्रहः। 'घटः' इति चोक्ते नामादिभेदात् मृत्सुवर्णादिकारणविशेषाद् वर्णसंस्थानादिविकाराच्च भिन्नानां घटशब्द वाच्यानां तदव्यतिरेकादेकत्वेन संग्रहः। एवमितरेष्वपीति। तत्राभिधानप्रत्ययौ सामान्यं निराकृतविशेषभावात्।

आह - सत्ताद्यर्थान्तरभूतमस्ति, तदभिसंबन्धात् सदादिव्यपदेश इति तन्न; उभयथाऽनुपपत्तेः। इदमिह संप्रधार्यम् - सत्तासंबन्धात्प्राग् द्रव्यादिषु सदित्यभिधानं प्रत्ययश्च स्याद्वा, न वेति? यदि स्यात्; सत्तासंबन्धवैयर्थ्यं प्रकाशितप्रकाशनवैयर्थ्यवत्, सत्ताद्वयप्रसङ्गश्च - एका आभ्यन्तरी अपरा बाह्येति। अतश्च समयविरोधः-"सल्लिङ्गा-विशेषाद्विशेषलिङ्गाभावाच्चैको भावः" इति। अथ नास्ति; खरविषाणादिष्वतिप्रसङ्गः। समवायकृतोऽयं विशेष इति चेन्न; तस्य प्रतिषिद्धत्वात्।

किञ्च, सत्तायाः सदिति व्यपदेशस्य सत्तान्तरहेतुकत्वाहेतुकत्वयोरनवस्था-प्रतिज्ञाहानिदोषप्रसङ्गः। अथ पदार्थशक्तिप्रतिनियमाद् द्रव्यादिषु सदिति व्यपदेशो निमित्तान्तरहेतुकः, सत्तायां स्वत एवेति चेत्; संसर्गवादत्यागः, इच्छामात्रकल्पना-प्रसङ्गश्च।

किञ्च, सत्तादेः पदार्थान्तरस्य द्रव्यादिषु वृत्तिः सोऽस्येति वा स्यात् सोऽयमिति वा? यदि सोऽस्येति वृत्तिः; मत्त्वर्थान्तरस्य भवितव्यम् 'सत्तावद्द्रव्यम्' इति, यथा गोमान् यवमानिति, अतो मत्त्वर्थस्य (वतोर्मत्त्वर्थस्य) भावार्थस्य च निवृत्तिर्वक्तव्या। अथ सोऽयमित्यभिसंबन्धेन वृत्तिः; 'सत्ता द्रव्यम्' इति प्राप्नोति यथा 'यष्टिः पुरुषः' इति, न 'सद्द्रव्यम्' इति, तत्र भावार्थस्य निवृत्तिर्वक्तव्या।

किञ्च, दृष्टान्ताभावात्। न ह्येकं किञ्चिदनेकसंबन्धि दृष्टं यदभिसमीक्ष्य सत्तैका अनेकसंबन्धिनी गम्येत। नीलीद्रव्यवदिति चेन्न तस्यानेकत्वात्। नीलीत्ववदिति चेन्न तस्यासिद्धत्वात्।

**अतो विधिपूर्वकमवहरणं व्यवहारः॥६॥** एतस्मादतः। कुतः। संग्रहात् संग्रहनयाक्षिप्तानामर्थानां विधिपूर्वकमवहरणं व्यवहारः। को विधिः? संग्रहगृहीतोऽर्थस्त दानुपूर्व्येणैव व्यवहारः प्रवर्तते इत्ययं विधिः। तद्यथा - सर्वसंग्रहेण सत् संगृहीतम् तच्चानपेक्षितविशेषं नालं संव्यवहारायेति व्यवहारनय आश्रीयते - यत्सत्तद् 'द्रव्यं गुणो वा' इति। द्रव्येणापि च संग्रहाक्षिप्तेन जीवाजीवाविशेषानपेक्षेण न शक्यः संव्यवहार इति 'जीवद्रव्यमजीवद्रव्यम्' इति वा व्यवहार आश्रीयते। जीवाजीवावपि च संग्रहाक्षिप्तौ नालं संव्यवहारायेति प्रत्येकं देवनारकादिर्घटादिश्च व्यवहारेणाऽऽश्रीयते। 'कषायो भैषज्यम्' इत्युक्ते च सामान्यस्य विशेषात्मकत्वात् नैयग्रोधादिविशेषसामर्थ्यम् ( विशेषस्य सामर्थ्येन ग्रहणम्)। नहि शक्यः प्रभुणापि चक्रभृता सर्वः कषायसमाहारः कर्तुम्। नामस्थापनाद्रव्याणि च संग्रहोपात्तानि नालं व्यवहारायेति भाव एव गृह्यते। एवमयं नयस्तावद्वर्तते यावत्पुनर्नास्ति विभागः।

**सूत्रपातवद्दजुत्वाद्दजुसूत्रः॥७॥** यथा ऋजुःसूत्रपातस्तथा ऋजु प्रगुणं सूत्रयति तन्त्रयति ऋजुसूत्रः। पूर्वांस्त्रिकालविषयानतिशय्य वर्तमानकालविषयमादत्ते। अतीतानाग गतयोर्विनष्टानुत्पन्नत्वेन व्यवहाराभावात्। समयमात्रमस्य निर्दिधिक्षितम्।

'कषायो भैषज्यम्' इत्यत्र च संजातरसः कषायो भैषज्यं न प्राथमिककषायो-ऽल्पोऽनभिव्यक्तरसत्वादस्य विषयः।

पच्यमानः पक्वः। पक्वस्तु स्यात्पच्यमानः स्यादुपरतपाक इति। असदेतत् विरोधात्। 'पच्यमानः' इति वर्तमानः 'पक्वः' इत्यतीतः तयोरेकस्मिन्नवरोधो विरोधीति;

नैष दोषः; पचनस्यादावविभागसमये कश्चिदंशो निर्वृत्तो वा, न वा? यदि न निर्वृत्तः; तद्द्वितीयादिष्वप्यनिर्वृत्तेः पाकाभावः स्यात्। ततोऽभिनिर्वृत्तः तदपेक्षया 'पच्यमानः पक्वः,' इतरथा हि समयस्य त्रैविध्यप्रसङ्गः। स एवौदनः पच्यमानः पक्वः, स्यात्पच्यमान इत्युच्यते पक्तुरभिप्रायस्यानिर्वृते; पक्तुर्हि सुविशदसुस्विन्नौदने पक्वाभिप्रायः, स्यादुपरतपाक इति चोच्यते कस्यचित् पक्तुस्तावतैव कृतार्थत्वात्।

एवं क्रियमाणकृतभुज्यमानभुक्तबाध्यमानबद्धसिध्यत्सिद्धादयो योज्याः।

तथा प्रतिष्ठन्तेऽस्मिन्निति प्रस्थः, यदैव मिमीते, अतीतानागतधान्यमानासंभवात्।

कुम्भकाराभावः शिविकादिपर्यायकरणे तदभिधानाभावात्। कुम्भपर्यायसमये च स्वावयवेभ्य एव निर्वृत्तेः।

स्थितप्रश्ने च 'कुतोऽद्यागच्छसि' इति? न 'कुतश्चित्' इत्ययं मन्यते, तत्कालक्रियापरिणामाभावात्।

यमेवाकाशदेशमवगाढुं समर्थ आत्मपरिणामं वा तत्रैवास्य वसतिः।

न कृष्णः काकः, उभयोरपि स्वात्मकत्वात् - कृष्णः कृष्णात्मको न काकात्मकः। यदि काकात्मकः स्यात्; भ्रमरादीनामपि काकत्वप्रसङ्गः। काकश्च काकात्मको न कृष्णात्मकः। यदि कृष्णात्मकः; शुक्लकाकाभावः स्यात्। पञ्चवर्णत्वाच्च पित्तास्थिरुधिरादीनां पीतशुक्लरक्तादिवर्णत्वात्, तद्व्यतिरेकेण काकाभावाच्च। न सामानाधिकरण्यमेकस्य पर्यायेभ्योऽनन्यत्वात्पर्याया एव विविक्तशक्तयो द्रव्यं नाम न किञ्चिदस्तीति। कृष्णगुणप्राधान्यादिति चेन्न; आस्तरकादिष्वतिप्रसङ्गात्, कषायमधुरे च मधुनि विरोधात्। अप्रत्यक्षे चाख्यायमाने संशयदर्शनात्। कृष्णकाकविशेषज्ञेन केनचिद्

द्वीपान्तरनिवासिन्यनुपलब्धकृष्णकाकविशेषे पुरुषे प्रतिपाद्यमाने संशयो जायते 'किमयं काकस्य काष्ण्यर्गुणप्राधान्यादाचष्टे, द्रव्यस्यैव वा तथा परिणामात्' इति?

अतः पलालादिदाहाभावः प्रतिविशिष्टकालपरिग्रहात्। अस्य हि नयस्याविभागो वर्तमानसमयो विषयः। अग्निसंबन्धनदीपनज्वलनदहनान्यसंख्येयसमयान्तरालानि यतोऽस्य दहनाभावः। किञ्च, यस्मिन् समये दाहः न तस्मिन् पलालम् भस्मताभिनिर्वृत्तेः; यस्मिंश्च पलालं न तस्मिन् दाह इति। यत्पलालं तद्दहतीति चेन्न; सावशेषात्। समुदायाभिधायिनां शब्दानामवयवेषु वृत्तिदर्शनाद्दोष इति चेन्न तदवस्थत्वात्, एकदेशदाहाभावस्योक्तत्वात्। निरवशेषदाहासंभवादिति चेन्न; वचनविरोधात् तदवस्थत्वाच्च। वचनविरोधस्तावद्यदि निरवशेषस्य पलालस्य दाहस्यासंभव इत्येकदेशदाहात् पलालदाहो नादाहः; ननु भवद्वचनस्य निरवशेषपरपक्षदूषकत्वाभावात् परपक्षैकदेशस्य दूषकत्वमतः एकदेशदूषकत्वात् कृत्स्नमपीदं दूषकमेवेत्यस्य साधकत्वसामर्थ्याभाव इति। तदवस्थत्वमपि 'एकसमये दाहाभावः' इत्युक्तत्वात्। अवयवानेकत्वे यद्यवयवदाहात् सर्वत्र दाहोऽवयवान्तराऽदाहात् ननु सर्वदाहाभावः। अथ दाहः सर्वत्र कस्मान्नाऽदाहः? अतो न दाहः। एवं पानभोजना-दिव्यवहाराभावः।

न शुक्लः कृष्णीभवति; उभयोर्भिन्नकालावस्थत्वात्, प्रत्युत्पन्नविषये निवृत्तपर्यायानभिसंबन्धात्। सर्वसंव्यवहारलोप इति चेन्न; विषयमात्रप्रदर्शनात्, पूर्वनयवक्तव्यात् संव्यवहारसिद्धिर्भवति।

**शपत्यर्थमाह्वयति प्रत्याययतीति शब्दः॥८॥** उच्चरितः शब्दः कृतसंगीतेः पुरुषस्य स्वाभिधेये प्रत्ययमादधाति इति शब्द इत्युच्यते।

**स च लिङ्गसंख्यासाधनादिव्यभिचारनिवृत्तिपरः॥९॥** लिङ्गं स्त्रीत्वपुंस्त्वनपुंसकत्वानि। संख्या एकत्वद्वित्वबहुत्वानि। साधनमस्मदादि। एकादीनां व्यभिचारो न

न्याय्य इति तन्निवृत्तिपरोऽयं नयः। तद्यथा, लिङ्गव्यभिचारस्तावत् - स्त्रीलिङ्गे पुल्लिङ्गाभिधानं तारका स्वातिरिति। पुल्लिङ्गे स्त्र्यभिधानम् अवगमो विद्येति। स्त्रीत्वे नपुंसकाभिधानम् वीणा आतोद्यमिति। नपुंसके स्त्र्यभिधानम् आयुधं शक्तिरिति। पुल्लिङ्गे नपुंसकाभिधानं पटो वस्त्रमिति। नपुंसके पुल्लिङ्गाभिधानं द्रव्यं परशुरिति। संख्याव्यभिचारः - एकत्वे द्वित्वम्, नक्षत्रं पुनर्वसू इति। एकत्वे बहुत्वम् - नक्षत्रं शतभिषज इति। द्वित्वे एकत्वम् - गोदौ ग्राम इति। द्वित्वे बहुत्वम् - पुनर्वसू पञ्चतारका इति। बहुत्वे एकत्वम् - आम्राः वनमिति। बहुत्वे द्वित्वम् - देवमनुष्या उभौ राशी इति। साधनव्यभिचारः - एहि, मन्ये रथेन यास्यसि, नहि यास्यसि यातस्ते पितेति। आदिशब्देन कालादिव्यभिचारो गृह्यते। विश्वदृश्वाऽस्य पुत्रो जनिता, भावि कृत्यमासीदिति कालव्यभिचारः। सन्तिष्ठते प्रतिष्ठते विरमत्युपरमतीति उपग्रहव्यभिचारः। एवमादयो व्यभिचारा अयुक्ताः। कुतः? अन्यार्थस्याऽन्यार्थेन संबन्धाभावात्। यदि स्यात् घटः पटो भवतु पटो वा प्रासाद इति। तस्माद्यथालिङ्गं यथासंख्यं यथासाधनादि च न्याय्यमभिधानम्। लोकसमयविरोध इति चेत् विरुध्यताम्, तत्त्वं मीमांस्यते, सुहृत्सूपचारः।

**नानार्थसमभिरोहणात् समभिरूढः॥१०॥** यतो नानार्थान् समतीत्यैकमर्थमाभिमुख्येन रूढस्ततः समभिरूढः। कुतः? वस्त्वन्तरासंक्रमेण तन्निष्ठत्वात्। कथम्? अवितर्कध्यानवत्। यथा तृतीयं शुक्लं सूक्ष्मक्रियमवितर्कमवीचारं ध्यानमर्थव्यञ्जनयोगसङ्क्रान्त्यभावात् सूक्ष्मकाययोगनिष्ठत्वात् तथा गौरित्ययं शब्दो वागादिषु वर्तमानो गव्यधिरूढः। एवं शेषेष्वपि रूढिशब्दोऽस्य विषयः। अथवा, 'अर्थगत्यर्थः शब्दप्रयोगः' इति तत्रैकस्यार्थस्यैकेन गतत्वात् पर्यायशब्दप्रयोगोऽनर्थकः। शब्दभेदश्चेदस्त्यर्थभेदेनाप्यवश्यं भवितव्यमिति नानार्थसमभिरोहणात् समभिरूढः इन्दनादिन्द्रः शकनाच्छक्रः पूर्दारणात्पुरन्दर इति। एवं सर्वत्र। अथवा, यो यत्राधिरूढः स तत्र समेत्याभिमुख्येनारोहणात् समभिरूढः। यथा क्व भवानास्ते? स्वात्मनीति। कुतः? वस्त्वन्तरे

वृत्त्यभावात्। यद्यन्यस्यान्यत्र वृत्तिः स्यात् ज्ञानादीनां रूपादीनां चाकाशे वृत्तिः स्यात्।

**येनात्मना भूतस्तेनैवाऽध्यवसाययतीत्येवंभूतः॥११॥** येनात्मना येनाभिधेयेन भूतः शब्दस्तेनैवाऽध्यवसाययति। यथा, इन्द्रशब्दः परमेश्वरत्वाभिधेयः, स परिणामो यत्र यदा वर्तते तत्र तदैव युक्तो न नामस्थापनाद्रव्येषु तत्परिणामाभावादिति। एवमितरेष्वपि शब्देषु स्वाभिधेयक्रियापरिणतिक्षम एव युक्तिर्नान्यदेति। अथवा, येनात्मना येन स्वरूपेण भूतोऽर्थस्तेनैवाध्यवसाययति, यथा गच्छतीति गौरिति। यदैव गच्छति तदैव गौरिति न स्थितो न शयित इति, पूर्वोत्तरकालयोस्तदर्थाभावाद्दण्डिवत्। एवमितरेष्वपि। अथवा, येनात्मना येन ज्ञानेन भूतः परिणतस्तेनैवाध्यवसाययति यथेन्द्राग्निज्ञानपरिणत आत्मैवेन्द्रोऽग्निश्चेति एवंभूतार्थप्रत्यायनाच्छब्द एवंभूतः तत्कार्यत्ताच्छब्द्यसिद्धेः।

**दाहकत्वाद्यतिप्रसङ्ग इति चेत्; तदव्यतिरेकादप्रसङ्ग इति॥१२॥** स्यादेतत् - अग्न्यादिव्यपदेशो यद्यात्मनि क्रियते दाहकत्वाद्यतिप्रसज्यते इति; उच्यते तदव्यतिरे- कादप्रसङ्गः। तानि नामादीनि येन रूपेण व्यपदिश्यन्ते ततस्तेषामव्यतिरेकः प्रतिनियतार्थवृत्तित्वाद्धर्माणाम्। ततो नो आगमभावाग्नौ वर्तमानं दाहकत्वं कथमागम भावाग्नौ वर्तेत? उक्ता नैगमादयो नयाः।

उत्तरोत्तरसूक्ष्मविषयत्वादेषां क्रमः पूर्वपूर्वहेतुकत्वाच्च। एवमेते नयाः पूर्वपूर्वविरुद्धमहाविषया उत्तरोत्तरानुकूलाल्पविषया द्रव्यस्यानन्तशक्तेः प्रतिशक्तिभिद्यमाना बहुविकल्पा जायन्ते। त एते गुणप्रधानतया परस्परतन्त्राः सम्यग्दर्शनहेतवः पुरुषार्थ-क्रियासाधनसामर्थ्यात्, तन्त्वादय इव यथोपायं विनिवेश्यमानाः पटादिसंज्ञाः स्वतन्त्राश्चाऽसमर्थाः। तन्त्वादिवदेव विषम उपन्यासः, तन्त्वादयो निरपेक्षा अपि काञ्चिदर्थमात्रां जनयन्ति। भवति हि कश्चित् प्रत्येकं तन्तुस्त्वक्त्राणे समर्थ एकश्च वल्कलो बन्धने समर्थः। इमे पुनर्नया निरपेक्षाः सन्तः न

काञ्चिदपि सम्यग्दर्शनमात्रां प्रादुर्भावयन्तीति। नैष दोषः अभिहितानवबोधात्। अभिहितमर्थमनवबुध्य परेणेदमुपालभ्यते। एतदुक्तं निरपेक्षेषु तन्त्वादिषु पटादिकार्यं नास्तीति। यत्तु तेनोपदर्शितं न तत् पटादिकार्यम्। किं तर्हि तन्त्वादिकार्यम्। तन्त्वादिकार्यमपि तन्त्वाद्यवयवेषु निरपेक्षेषु नास्त्येवेत्यस्मत्पक्षसिद्धिरेव। अथ तन्त्वादिषु पटादिकार्यं शक्त्यपेक्षया अस्तीत्युच्यते नयेष्वपि निरपेक्षेषु बुद्ध्यभिधानरूपेषु कारणवशात् सम्यग्दर्शनहेतुत्वविपरिणतिसद्भावात् शक्त्यात्मनाऽस्तित्वमिति साम्यमेवोपन्यासस्य।

**ज्ञानदर्शनयोस्तत्त्वं नयानां चैव लक्षणम्।**
**ज्ञानस्य च प्रमाणत्वमध्यायेऽस्मिन्निरूपितम्॥**

**जीयाच्चिरमकलङ्कब्रह्मा लघुहव्वनृपतिवरतनयः।**
**अनवरतनिखिलविद्वज्जननुतविद्यः प्रशस्तजनहृद्यः॥**

**इति तत्त्वार्थवार्तिकव्याख्यानालङ्कारे प्रथमोऽध्यायः॥१॥**

# द्वितीयोऽध्यायः

अत्राह - मोक्षमार्गव्याख्याप्रसङ्गेन सम्यग्दर्शनादीन्युपदिश्यन्ते। तेषां च लक्षणोत्पत्तिविषयनिबन्धादीनि व्याख्यातानि। तत्र तत्त्वार्थश्रद्धानं सम्यग्दर्शनमुपदिष्टम्। तत्त्वार्थाश्च जीवादयः। तत्रादावुपदिष्टस्य जीवस्य किं श्रद्धातव्यं यदवधारणप्रतिपत्त्यु-पासनादिभ्यस्तन्निष्पद्यत इति? उच्यते - तत्त्वमात्मनः स्वभावः श्रद्धेयः।

यद्येवमुच्यतां तदीयं किं तत्त्वमिति? अत उत्तरं पठति -

**औपशमिकक्षायिकौ भावौ मिश्रश्च जीवस्य स्वतत्त्वमौदयिकपारिणामिकौ च॥१॥**

अथवा, प्रमाणनया अनन्तरं विनिर्दिष्टाः। ते च प्रमेयाधिगमरूपाः। प्रमेयाश्च जीवादयः पदार्था इदानीं निर्देष्टव्याः। यद्येवमस्यैव तावदादावुपदिष्टजीवस्य किं तत्त्व-मिति? अत आह - औपशमिकादीति।

**कर्मणोऽनुद्भूतस्ववीर्यवृत्तितोपशमोऽधःप्रापितपङ्कवत् ॥१॥** यथा सकलुषस्याम्भसः कतकादिद्रव्यसंपर्कादधःप्रापितमलद्रव्यस्य तत्कृतकालुष्याभावात् प्रसाद उपलभ्यते, तथा कर्मणः कारणवशादनुद्भूतस्ववीर्यवृत्तिताऽऽत्मनो विशुद्धिरुपशमः।

**क्षयो निवृत्तिरात्यन्तिकी॥२॥** यथा तस्यैवाम्भसोऽधःप्रापितपङ्कस्य शुचिभाजना-न्तरसंक्रान्तस्य प्रसाद आत्यन्तिकः, तथाऽऽत्मनोऽपि कर्मणोऽत्यन्तविनिवृत्तौ विशुद्धि रात्यन्तिकी क्षय इत्युच्यते।

**उभयात्मको मिश्रः क्षीणाक्षीणमदशक्तिकोद्रववत् ॥३॥** यथा प्रक्षालनविशेषात् क्षीणाक्षीणमदशक्तिकस्य कोद्रवस्य द्विधा वृत्तिः, तथा यथोक्तक्षयहेतुसन्निधाने सति

कर्मण एकदेशस्य क्षयादेकदेशस्य च वीर्योपशमादात्मनो भाव उभयात्मको मिश्र इति व्यपदिश्यते।

**द्रव्यादिनिमित्तवशात् कर्मणः फलप्राप्तिरुदयः॥४॥** द्रव्यादिनिमित्तं प्रतीत्य कर्मणो विपच्यमानस्य फलोपनिपात उदय इतीमामाख्यां लभते।

**द्रव्यात्मलाभमात्रहेतुकः परिणामः॥५॥** यस्य भावस्य द्रव्यात्मलाभमात्रमेव हेतुर्भवति नान्यन्निमित्तमस्ति स परिणाम इति परिभाष्यते।

**तत्प्रयोजनत्वाद्वृत्तिवचनम्॥६॥** ते उपशमादयः प्रयोजनमस्येति वृत्तिः क्रियते। स उपशमः प्रयोजनमस्येत्यौपशमिकः, क्षयःप्रयोजनमस्येति क्षायिकः, उदयः प्रयोजनमस्ये-त्यौदयिकः, परिणामः प्रयोजनमस्येति पारिणामिकः। ते भावा जीवस्य स्वतत्त्वम् - स्वं तत्त्वं स्वतत्त्वम्, स्वो भावोऽसाधारणो धर्मः।

**व्याप्तेरौदयिकपारिणामिकग्रहणमादाविति चेन्न; भव्यजीवधर्मविशेषख्याप-नार्थत्वादादावौपशमिकादिभाववचनम्॥७॥** स्यादेतत् – सर्वजीव साधारणत्वाद् व्याप्तेः औदयिकपारिणामिकग्रहणमादौ न्याय्यमिति; तन्न; किं कारणम्? भव्यजीवधर्मविशेष-ख्यापनार्थत्वात्। भव्यस्य मोक्षप्रतिपादनार्थो ह्ययं प्रयासः। अतोऽस्य धर्मविशेष औपशमिकादिभाव आदावुच्यते।

**अत्र चादावौपशमिकवचनं तदादित्वात् सम्यग्दर्शनस्य॥८॥** सम्यग्दर्शनस्य हि आदिरौपशमिको भावस्ततः क्षायोपशमिकस्ततः क्षायिक इति, अत औपशमिकस्यादौ ग्रहणं क्रियते।

**अल्पत्वाच्च॥९॥** अल्पश्चौपशमिको भावः क्षायिकात् क्षायोपशमिकाच्च। कुतोऽल्पत्वम्? संचयकालस्याल्पत्वात्। तद्यथा - उपशमसम्यग्दर्शनस्य कालोऽन्तर्मुहूर्तः;

सोऽन्तर्मुहूर्तोऽसंख्येयाः समयाः। तत्र समये समये नैरन्तर्येण संचीयमानां उपशमसम्यग्दृष्टय आ अन्तर्मुहूर्तसमाप्तेः पल्योपमाऽसंख्येयभागप्रमाणा इति सर्वेभ्योऽल्पे।

**ततो विशुद्धिप्रकर्षयुक्तत्वात् क्षायिकः॥१०॥** औपशमिकाद्धि क्षायिकः प्रकृष्ट-शुद्ध्युपेतो मिथ्यात्वसम्यङ्मिथ्यात्वसम्यक्त्वानां साकल्येन संक्षयात्, तत औपशमिकात् परं क्षायिकवचनम्।

**बहुत्वाच्च॥११॥** बहवो हि क्षायिकसम्यग्दृष्टय औपशमिकसम्यक्त्वेभ्यः। कुतः? गुणकारविशेषात्। को गुणकार? आवलिकाया असंख्येयभागः, सोऽसंख्येयाः समयाः। कुतः? असंख्येयस्य राशेरसंख्येया एव भेदा इति। तत आवलिकाया असंख्येयभागेन गुणिता उपशमसम्यग्दृष्टयः क्षायिकसम्यग्दृष्टीन् प्राप्नुवन्ति। कुत? संचयकालस्य महत्त्वात्। इह क्षायिकसम्यग्दृष्टेस्त्रयस्त्रिंशत्सागरोपमाणि सातिरेकाणि काल; तस्य प्राथमिकसमयादारभ्य समये समये संचीयमाना आ तत्कालपरिसमाप्तेर्बहवो भवन्ति।

**तदसंख्येयगुणत्वात्तदनन्तरं मिश्रवचनम्॥१२॥** क्षायिकादसंख्येयगुणः क्षायोपशमिकः, द्रव्यतो न भावतः। क्षायोपशमिकाद्धि क्षायिको भावतोऽनन्तगुणः, विशुद्धिप्रकर्षयोगात्, तस्माद् द्रव्यतोऽसंख्येयगुणः क्षायिकात् क्षायोपशमिकः। कुत? गुणकार-विशेषात्। को गुणकार? आवलिकाया असंख्येयभागः। कुतः? संचयकालस्य महत्त्वात्। इह क्षायोपशमिकसम्यग्दृष्टेः षट्षष्टिसागरोपमाणि पूर्णानि कालः, तस्य प्रथमसमया-दारभ्य समये समये संचीयमानाः क्षायोपशमिकसम्यग्दृष्टय पूर्णानि कालः, तस्य प्रथमसमयादारभ्य समये समये संचीयमानाः क्षायोपशमिकसम्यग्दृष्टय आ तत्कालपरिसमाप्तेर्भूयांसो भवन्ति।

**तदसंख्येयगुणत्वात्तदनन्तरं मिश्रवचनम्॥१३॥** तेषां सर्वेषामेवानन्तगुणा औद-यिकाः पारिणामिकाश्च, ततोऽन्ते तेषां वचनं क्रियते।

**तैरेव चात्मनः समधिगमात् ॥१४॥** अतीन्द्रियत्वादात्मनो मनुष्यतैर्यग्योनादिभि-रौदयिकैः पारिणामिकैश्च चैतन्यजीवत्वादिभिः समधिगमो भवति।

**सर्वजीवतुल्यत्वाच्च॥१५॥** सर्वेषां हि जीवानां तुल्या औदयिकाः पारिणामिकाश्च ततस्तेषामन्ते वचनं न्याय्यम्।

**तत्त्वमिति बहुवचनप्रसङ्ग इति चेन्न; भावस्यैकत्वात् ॥१६॥** स्यादेतत्-औपशमिकादिपञ्चतयभावसामानाधिकरण्यात्ततत्त्वस्य बहुवचनं प्राप्नोतीति; तन्न; किं कारणम्? भावस्यैकत्वात्, 'तत्त्वम्' इत्येष एको भावः।

**फलभेदान्नानात्वमिति चेन्न; स्वात्मभावभेदस्याऽविवक्षितत्वात् 'गावो धनम्' इति यथा॥१७॥** स्यादेतत् - औपशमिकादिपञ्चतयतत्त्वफलभेदाद्भावनानात्वमिति; तन्न; किं कारणम्? स्वात्मभावभेदस्याऽविवक्षितत्वात्, यथा गावो धनमिति। धिनोतेर्धनम्, तच्चैकत्वेन विवक्षितं तथा तत्त्वमिति।

**प्रत्येकमभिसम्बन्धाच्च॥१८॥** एकत्वमुपपद्यते। औपशमिको भावः स्वतत्त्व-मित्यादि।

**द्वन्द्वनिर्देशो युक्त इति चेन्न, उभयधर्मव्यतिरेकेणाऽन्यभावप्रसङ्गात् ॥१९॥** स्यान्मतम् - द्वन्द्वनिर्देशोऽत्र युक्तः-'औपशमिकक्षायिकमिश्रौदयिकपारिणामिकाः' इति। तत्राऽयमप्यर्थो द्विश्च शब्दो न कर्तव्यो भवतीति; तन्न; किं कारणम्? उभयधर्मव्य-तिरेकेणान्यभावप्रसङ्गात्। उभाभ्यां व्यतिरेकेणान्यो भावः प्राप्नोति चशब्दे पुनः सति पूर्वोक्तानुकर्षणार्थो युक्तो भवति।

**क्षायोपशमिकग्रहणमिति चेन्न गौरवात् ॥२०॥** यद्येवं क्षायोपशमिकग्रहणमेव कर्तव्यमन्यभावनिवृत्त्यर्थम् तन्न; किं कारणम्? गौरवात्। तथा सति सूत्रस्य गौरवं स्यादिति।

**मध्ये मिश्रवचनं पूर्वोत्तरापेक्षार्थम् ॥१॥** मध्ये मिश्रवचनं क्रियते पूर्वोत्तरापेक्षार्थम्। किमपेक्षायां प्रयोजनम् ? भव्यानामौपशमिकक्षायिकौ भावौ सम्यक्त्वचारित्राख्यौ क्षायोपशमिकाश्च ज्ञानदर्शनचारित्रभावाः। औदयिकपारिणामिका अभव्यानामपि क्षायोपश-मिकाश्चेति। तत्र चाभव्यानां भव्यानां च मिथ्यादृष्टीनां चारित्राद्दृते क्षायोपशमिका ज्ञानदर्शनविकल्पाः।

**'जीवस्य' इति वचनमन्यद्रव्यनिवृत्त्यर्थम् ॥२॥** जीवस्येदं स्वतत्त्वं नान्य-स्येति।

**स्वभावपरित्यागापरित्यागयोः शून्यताऽनिर्मोक्षप्रसङ्ग इति चेन्न; आदेश-वचनात् ॥३॥** इदमिह संप्रधार्यम्- आत्मौपशमिकादिभावपरित्यागी वा स्यादपरित्यागी वा? किञ्च, अतो यदि तावत् परित्यजति शून्यता प्राप्नोत्यत्मनः, स्वभावाभावा-दग्नेरौष्ण्यस्वभावपरित्यागेऽभाववत्। अथाऽपरित्यागी क्रोधादिस्वभावापरित्यागादा-त्मनोऽनिर्मोक्षः प्राप्नोतीति। तन्न; किं कारणम्? आदेशवचनात्। अनादिपारिणामिक-चैतन्यद्रव्यार्थादेशात् स्यात् स्वभावाऽपरित्यागी आदिमदौदयिकादिपर्यायार्थादेशात् स्यात् स्वभावपरित्यागीत्यादि सप्तभङ्गी पूर्ववत्। यस्यैकान्तेन स्वभावपरित्यागः स्यद्-परित्यागो वा; तस्य यथोक्तदोषः स्यात्, नानेकान्तवादिनः।

**अप्रतिज्ञानात् ॥४॥** नैतत्प्रतिजानीमहे - 'स्वभावपरित्यागादपरित्यागाद्वा मोक्षः' इति। किं तर्हि? अष्टतयकर्मपरिणामवशीकृतस्यात्मनः द्रव्यादिबाह्यनिमित्तसन्निधाने सत्याभ्यन्तरसम्यग्दर्शनादिमोक्षमार्गप्रकर्षावाप्तौ कृत्स्नकर्मसंक्षयात् मोक्षो विवक्षितस्ततो न दोषः। न चाग्नेरुष्णस्वभावपरित्यागेऽप्यभावः। कस्मात्? द्रव्यार्थावस्थानात्। पुद्गलद्रव्यस्य हि पर्याय उष्णभावः, तस्याभावेऽपि सदचेतनत्वादिभिरवस्थानम्। किञ्च

**कर्मसन्निधाने तदभावे चोभयभावविशेषोपलब्धेर्नेत्रवत् ॥२५॥** यथा नेत्रं रूपोपलब्धिस्वभावकं यदा रूपं नोपलभते तदा रूपोपलब्धिस्वभावपरित्यागान्नास्ति, यथा वा क्षायोपशमिकत्वे रूपोपलब्धिस्वभावस्य नेत्रस्य संक्षीणसकलावरणे केवलिनि मतिज्ञानाभावान्नेत्रात्मकस्य रूपोपलब्धिस्वभावस्य परित्यागेऽपि द्रव्यनेत्रावस्थानान्न नेत्राभावः तथा कर्मनिमित्तानामौदयिकादीनामभावेऽपि क्षायिकभावसन्निधानादात्मनो नाऽभावो विशेषोपलब्धेरिति।

अत्राह - तस्यात्मनो ये भावा औपशमिकादयस्ते किं भेदवन्त उताऽभेदा इति? अत्रोच्यते - भेदवन्तः। यद्येवं ते उच्यन्तां कति भेदा इति? अत उत्तरं पठति –

## द्विनवाष्टादशैकविंशतित्रिभेदा यथाक्रमम् ॥२॥

कोऽयं निर्देशः?

**द्व्यादीनां कृतद्वन्द्वानां भेदशब्देन वृत्तिः॥१॥** द्वौ च नव चाष्टादश चैकविंशतिश्च त्रयश्च द्विनवाष्टादशैकविंशतित्रय इति द्वन्द्वे कृते पश्चाद्भेदशब्देन वृत्तिरियं वेदितव्या। ननु चेतरेतरयोगे द्वन्द्वः। स च तुल्ययोगे भवति। न चात्र तुल्ययोगोऽस्ति। कथम्? द्व्यादयः शब्दाः संख्येयप्रधाना एकविंशतिशब्दः संख्यानप्रधान इति। नैष दोषः; संख्या-शब्दानाममीषां संख्येयप्रधानत्वेऽपि निमित्तानुविधानात् संख्यानेऽपि वृत्तिर्भवति। प्रधानं हि किञ्चिन्निमित्तमपेक्ष्य गुणमनुवर्तते। यथा प्रधानभूतोऽपि राजा मन्त्रिणं गुणमाश्रयते, तत्प्रयुक्तक्रियाफलार्थित्वात् तस्य प्राधान्यमप्यनुजानातीति। अस्त्ययं तर्काश्रयसमाधिः लक्षणशास्त्रेण तु विरुध्यते, एवं हि तत्रोक्तम् -"एकादयः प्राग्विंशतेः संख्येयप्रधानाः, विंशत्यादयस्तु कदाचित् संख्यानप्रधानाः कदाचित्संख्येयप्रधानाः" इति। यदि च द्व्यादयः संख्यानेऽपि वर्तेरन् विंशत्यादिभिस्तुल्याः स्युः। तत्र को दोषः? संबन्धिनि व्यतिरेकनिमित्तविभक्तिश्रवणं

स्यात् स्वतश्च संख्यानस्यैकत्वादेकवचनं श्रूयेत 'विंशतिर्गवाम्' इति यथा। ननु च तत्रैव संख्याने वृत्तिरुपलभ्यते ''द्व्येकयोः'' इति; नासौ संख्याने प्रयोगः, किं तर्हि उपसर्जनावयवे समुदाये प्रयोगः यथा 'बहुशक्तिकिटकम्' इति। संख्याप्रधानत्वेऽपि तद्विषयत्वमेव ''अन्तरेणापि भावप्रत्ययं गुणप्रधानो भवति निर्देशः'' इति। एवं तर्हि द्व्यादयः शब्दाः संख्येयप्रधाना एव, एकविंशतिशब्दोऽपि संख्येयवृत्तिः परिगृह्यत इति तुल्ययोगोपपत्तेर्युक्तो द्वन्द्वः।

भेदशब्देन किं स्वपदार्था वृत्तिः, आहोस्विदन्यपदार्था ? स्वपदार्थप्रधाना। कथम्? ''विशेषणं विशेष्येण'' इति। द्विनवाष्टादशैकविंशतित्रय एव भेदा द्विनवाष्टादशैक-विंशतित्रिभेदा इति। ननु च 'द्वियमुनम्' इत्येवमादिषु पूर्वपदार्थप्रधाना वृत्तिरिति द्व्यादीनां विशेष्यत्वमुक्तं तेन भेदशब्दस्य विशेषणत्वे सति पूर्वनिपातः प्राप्नोति? नैष दोषः; सामान्योपक्रमे विशेषाभिधाने तदुक्तम्। के? 'द्वे यमुने' इति ह्युक्ते द्विशब्दप्रयोग एवानर्थक इति। इह तु बहुत्वात् सन्देहः– 'भेदाः' इत्युक्ते 'कति' इति। द्विनवाष्टाद-शैकविंशतित्रयः' इति चोक्ते 'के ते' इति। अत उभयव्यभिचाराद्विशेषणविशेष्य-योर्यथेष्टत्वात् द्व्यादीनां गुणशब्दत्वाच्च विशेषणत्वं विवक्षितम्। अथवा, पुनरस्त्वन्यपदार्था वृत्तिः - द्विनवाष्टादशैकविंशतित्रयो भेदा येषां त इमे द्विनवाष्टादशैक-विंशतित्रिभेदाः इति। अत्र हि संख्याशब्दस्य विशेष्यत्वेऽपि **''सर्वनामसंख्ययोरुप-संख्यानम्''** इति संख्यायाः पूर्वनिपातः। पूर्वस्मिन् अर्थवशाद्विभक्तिपरिणाम इत्यौपशमिकादीनामित्यभिसंबन्धः, उत्तरत्र पठितक्रमेणैव।

**भेदशब्दस्य प्रत्येकं परिसमाप्तिर्भुजिवत् ॥२॥** यथा देवदत्तजिनदत्तगुरूदत्ता भोज्य-न्तामिति प्रत्येकं भुजिः परिसमाप्यते, एवं भेदशब्दस्यापि प्रत्येकं परिसमाप्तिर्वेदितव्या द्विभेदो नवभेद इत्यादि।

**यथानिर्दिष्टौपशमिकादिभावाभिसंबन्धार्थं द्व्यादिक्रमवचनम् ॥३॥** क्रमः आनुपूर्व्यम्, यो यः क्रमो यथाक्रमम्। यथा औपशमिकादयो भावा निर्दिष्टास्तथैव द्व्यादिभिरभिसंबन्धः कथं स्यादिति 'यथाक्रमम्' इत्युच्यते।

तत्रानिर्धारितसंख्येयानां द्व्यादीनां संख्याशब्दानां प्रतिविशिष्टाभिधेयनिर्देशे प्राप्तकाले सति यौगपद्यासंभवात् योऽसावादावुद्दिष्ट औपशमिको भावस्तद्भेदप्रदर्शनार्थमाह–

## सम्यक्त्वचारित्रे॥३॥

व्याख्यातलक्षणे सम्यक्त्वचारित्रे। औपशमिकत्वं कथमिति चेत्? उच्यते –

**सप्तप्रकृत्युपशमादौपशमिकं सम्यक्त्वम् ॥१॥** अनन्तानुबन्धिनः कषायाः क्रोधमानमायालोभाश्चत्वारः चारित्रमोहस्य, मिथ्यात्वसम्यङ्मिथ्यात्वसम्यक्त्वानि त्रीणि दर्शनमोहनीयस्य। आसां सप्तानां प्रकृतीनामुपशमादौपशमिकं सम्यक्त्वमिति।

अनादिमिथ्यादृष्टेर्भव्यस्य कर्मोदयापादिते कालुष्ये सति कुतस्तदुपशमः?

**काललब्ध्याद्यपेक्षया तदुपशमः॥२॥** काललब्ध्यादीन् प्रत्ययानपेक्ष्य तासां प्रकृतीनामुपशमो भवति। तत्र काललब्धिस्तावत् - कर्माविष्ट आत्मा भव्यः कालेऽर्धपुद्गलपरि-वर्तनाख्येऽवशिष्टे प्रथमसम्यक्त्वग्रहणस्य योग्यो भवति नाधिक इतीयं काललब्धिरेका। अपराकर्मस्थितिका काललब्धिः – उत्कृष्टस्थितिकेषु कर्मसु जघन्यस्थितिकेषु च प्रथम-सम्यक्त्वलाभो न भवति। क्व तर्हि भवति? अन्तःकोटिकोटिसागरोपमस्थितिकेषु कर्मसु बन्धमापद्यमानेषु विशुद्धिपरिणामवशात् सत्कर्मसु च ततः संख्येयसागरोपमसहस्रोना-यामन्तःकोटिकोटिसागरोपमस्थितौ स्थापितेषु प्रथमसम्यक्त्वयोग्यो भवति। तथाऽपरा काललब्धिर्भावापेक्षा, सा वक्ष्यते। आदिशब्देन जातिस्मरणादयः परिगृह्यन्ते। स पुनर्भव्यः पञ्चेन्द्रियः संज्ञी मिथ्यादृष्टिः

पर्याप्तकः सर्वविशुद्धः प्रथमसम्यक्त्वमुत्पादयति। उत्पादयन्नसावन्तर्मुहूर्तमपवर्तयति, अपवर्त्यं च मिथ्यात्वकर्म त्रिधा विभजते -सम्यक्त्वं मिथ्यात्वं सम्यङ्मिथ्यात्वं चेति। दर्शनमोहनीयं कर्मोपशमयन् क्वोपशमयति? चतसृषु गतिषु। तत्र नारकाः प्रथमसम्यक्त्वमुत्पादयन्तः पर्याप्तका उत्पादयन्ति नापर्याप्तकाः। पर्याप्तकाश्चान्तर्मुहूर्तस्योपरि उत्पादयन्ति नाधस्तात्। एवं सप्तसु पृथिवीषु। तत्रोपरि तिसृषु पृथिवीषु नारकास्त्रिभिः कारणैः सम्यक्त्वमुपजनयन्ति – केचिज्जातिं स्मृत्वा केचिद्धर्मं श्रुत्वा केचिद्वेदनाभिभूताः। अधस्ताच्चतसृषु पृथिवीषु द्वाभ्यां कारणाभ्यां केचिज्जातिं स्मृत्वाऽपरे वेदनाभिभूताः। तिर्यञ्चश्चोत्पादयन्तः पर्याप्तका उत्पादयन्ति नापर्याप्तकाः। पर्याप्तकाश्च दिवसपृथक्त्वस्योपरि नाधस्तात्। एवं सर्वेषु द्वीपसमुद्रेषु। तिरश्चां त्रिभिः कारणैः सम्यक्त्वस्योत्पत्तिः केचिज्जातिं स्मृत्वा अपरे धर्मं श्रुत्वाऽन्ये जिनबिम्बं दृष्ट्वा। मनुष्या उत्पादयन्तः पर्याप्तका उत्पादयन्ति नापर्याप्तकाः। पर्याप्तकाश्चाऽष्टवर्षस्थितेरुपर्युत्पादयन्ति नाधस्तात्। एवमा तृतीयद्वीपसमुद्रेषु। तेषां त्रिभिः कारणैः सम्यक्त्वस्योत्पत्तिः – केषाञ्चिज्जातिस्मरणादपरेषां धर्मश्रवणादन्येषां जिन-बिम्बदर्शनात्। देवाः सम्यक्त्वमुत्पादयन्तः पर्याप्तका उत्पादयन्ति नापर्याप्तकाः। पर्याप्तकाश्चान्तर्मुहूर्तस्योपरि नाधस्तात्। एवमा उपरिमग्रैवेयकेभ्यः। देवा भवनवास्यादय आ सहस्रारकल्पाच्चतुर्भिः कारणैः प्रथमसम्यक्त्वं लभन्ते – केचिच्चातिस्मरणेनेतरे धर्मश्रवणेनाऽपरे जिनमहिमावेक्षणेनाऽन्ये देवर्धिनिरीक्षणेन। आनतप्राणतारणाच्युतेषु तैरेव देवर्धिविरहितैः। नवसु ग्रैवेयकेषु द्वाभ्यां कारणाभ्याम् – जातिस्मरणाद्धर्मश्रवणाच्च। उपरि देवा नियमेन सम्यग्दृष्टयः।

**अष्टाविंशतिमोहविकल्पोपशमादौपशमिकं चारित्रम् ॥३॥** अनन्तानुबन्ध्यप्रत्या-ख्यानप्रत्याख्यानसंज्वलनविकल्पाः षोडश कषायाः, हास्यरत्यरतिशोकभयजुगुप्सास्त्री-पुंनसकवेदभेदा नव नोकषाया इत्येवं चारित्रमोहः पञ्चविंशतिविकल्पः। मिथ्या-

त्वसम्यङ्मिथ्यात्वसम्यक्त्वभेदात् त्रितयो दर्शनमोहः। एषामष्टाविंशतिमोहविकल्पानामुपशमादौपशमिकं चारित्रम्।

**सम्यक्त्वस्यादौ वचनं तत्पूर्वकत्वाच्चारित्रस्य॥४॥** पूर्वं हि सम्यक्त्वपर्यायेणाविर्भाव आत्मनस्ततः क्रमाच्चारित्रपर्याय आविर्भवतीति सम्यक्त्वस्यादौ ग्रहणं क्रियते।

यः क्षायिको भावो नवविध उद्दिष्टस्तस्य भेदस्वरूपप्रतिपादनार्थमाह –

## ज्ञानदर्शनदानलाभभोगोपभोगवीर्याणि च॥४॥

चशब्देन सम्यक्त्वचारित्रे समुच्चीयेते।

**ज्ञानदर्शनावरणक्षयात् केवले क्षायिके॥१॥** ज्ञानावरणस्य कर्मणः दर्शनावरणस्य च कृत्स्नस्य क्षयात् केवले ज्ञानदर्शने क्षायिके भवतः।

**अनन्तप्राणिगणानुग्रहकरं सकलदानान्तरायसंक्षयादभयदानम्॥२॥** दानान्तरा-यस्य कर्मणोऽत्यन्तसंक्षयादाविर्भूतं त्रिकालगोचरानन्तप्राणिगणानुग्रहकरं क्षायिकमभयदानम्।

**अशेषलाभान्तरायनिरासात् परमशुभपुद्गलानामादानं लाभः॥३॥** लाभान्तरायस्या-शेषनिरासात् परित्यक्तकवलाहारक्रियाणां केवलिनां यतः शरीरबलाधानहेतवोऽन्यमनुजासाधारणाः परमशुभाः सूक्ष्मा अनन्ताः प्रतिसमयं पुद्गलाः संबन्धमुपयान्ति स क्षायिको लाभः। तस्मात् "औदारिकशरीरस्य किञ्चिन्न्यूनपूर्वकोटिवर्षस्थितिः कवलाहारमन्तरेण कथं संभवति" इति यद्वचनं तदशिक्षितकृतं विज्ञायते।

**कृत्स्नभोगान्तरायतिरोभावात् परमप्रकृष्टो भोगः॥४॥** कृत्स्नस्य भोगान्तरायस्य तिरोभावादाविर्भूतोऽतिशयवाननन्तो भोगः क्षायिकः। यत्कृताः पञ्चवर्णसुरभिकुसुमवृष्टिविविधदिव्यगन्धचरणनिक्षेपस्थानसप्तपद्मपङ्क्तिसुगन्धिधूपसुखशीतमारुतादयो भावाः।

**निरवशेषोपभोगान्तरायप्रलयादनन्तोपभोगः क्षायिकः॥५॥** निरवशेषस्योपभोगान्तरायकर्मणः प्रलयात् प्रादुर्भूतोऽनन्त उपभोगः क्षायिकः। यत्कृताः सिंहासनवालव्यजनाशोकपादपछत्रत्रयप्रभामण्डलगम्भीरस्निग्धस्वरपरिणामदेवदुन्दुभिप्रभृतयो भावाः।

**वीर्यान्तरायात्यन्तसंक्षयादनन्तवीर्यम् ॥६॥** आत्मनः सामर्थ्यस्य प्रतिबन्धिनो वीर्यान्तरायकर्मणोऽत्यन्तसंक्षयादुद्भूतवृत्तिःक्षायिकमनन्तवीर्यम् ।

**पूर्वोक्तमोहप्रकृतिनिरवशेषक्षयात् सम्यक्त्वचारित्रे॥७॥** पूर्वोक्तस्य दर्शनमोहत्रिकस्य चारित्रमोहस्य च पञ्चविंशतिविकल्पस्य निरवशेषक्षयात् क्षायिके सम्यक्त्वचारित्रे भवतः।

यद्यनन्तदानलब्ध्यादय उक्ता अभयदानादिहेतवो दानान्तरायादिसंक्षयाद्भवन्ति सिद्धेष्वपि तत्प्रसङ्गः; नैष दोषः; शरीरनामतीर्थकरनामकर्मोदयाद्यपेक्षत्वात्तेषां तदभावे तदप्रसङ्गः, परमानन्ताव्याबाधरूपेणैव तेषां तत्र वृत्तिः; केवलज्ञानरूपेणानन्तवीर्यवृत्तिवत् ।

सिद्धत्वमपि क्षायिकमागमोपदिष्टमस्ति तस्योपसंख्यानमिह कर्तव्यम्? न कर्तव्यम्; विशेषेषु निर्दिष्टेषु तद्विषयं सामान्यमनुक्तसिद्धमेव पर्वादिनिर्देशेऽङ्गुलिसिद्धिवत् । सिद्धत्वं हि सर्वेषां क्षायिकाणां भावानां साधारणमिति।

य उक्तः क्षायोपशमिको भावोऽष्टादशविकल्पस्तद्भेदनिरूपणार्थमाह –

**ज्ञानाज्ञानदर्शनलब्धयश्चतुस्त्रित्रिपञ्चभेदाः सम्यक्त्वचारित्रसंयमासंयमाश्च॥५॥**

**चतुरादीनां कृतद्वन्द्वानां भेदशब्देन वृत्तिः॥१॥** चत्वारश्च त्रयश्च त्रयश्च पञ्च च चतुस्त्रित्रिपञ्च, ते भेदाः यासां ताश्चतुस्त्रित्रिपञ्चभेदा इति द्वन्द्वगर्भा वृत्तिः।

त्रिशब्दस्य द्वन्द्वापवाद एकशेषः कस्मान्न भवति? संख्ययाऽर्थासंप्रत्ययायादन्यपदार्थत्वाच्चानेकशेषः, पृथगभिधाने प्रयोजनसद्भावाच्च।

**यथाक्रमवचनं ज्ञानादिभिरानुपूर्व्यसंबन्धार्थम् ॥२॥** इह यथाक्रममिति वक्तव्यम्। किं प्रयोजनम्? चतुर्भेदं ज्ञानमित्येवमाद्यभिसंबन्धार्थं तत्तर्हि वक्तव्यम् न वक्तव्यम्; यथाक्रममित्यनुवर्तते। क्व प्रकृतम्? ''द्विनवाष्टादशैकविंशतितित्रिभेदा यथाक्रमम्'' इति।

कस्य क्षयात् कस्य चोपशमात् क्षायोपशमिको भावो भवतीति? उच्यते-

**सर्वघातिस्पर्धकानामुदयक्षयात्तेषामेव सदुपशमाद्देशघाति स्पर्धकानामुदये क्षायोपश-मिको भावः॥३॥** द्विविधं स्पर्धकम् - देशघातिस्पर्धकं सर्वघातिस्पर्धकं चेति। तत्र सदा सर्वघातिस्पर्धकस्योदयो भवति तदेषदप्यात्मगुणस्याभिव्यक्तिर्नास्ति तस्मात्तदुदयस्याभावः क्षय इच्युच्यते। तस्यैव सर्वघातिस्पर्धकस्यानुदयप्राप्तस्य सदवस्था उपशम इत्युच्यतेऽनुद्भूतस्ववीर्यवृत्तित्वात्मसाद्भावितसर्वघातिस्पर्धकस्योदयक्षये देशघातिस्पर्ध-कस्य चोदये सति सर्वघात्याभावादुपलभ्यमानो भावः क्षायोपशमिक इत्युच्यते।

किमिदं स्पर्धकं नाम? उच्यते -

**अविभागपरिच्छिन्नकर्मप्रदेशरसभागप्रचयपङ्क्तेः क्रमवृद्धिः क्रमहानिः स्पर्ध-कम् ॥४॥** उदयप्राप्तस्य कर्मणः प्रदेशा अभव्यानामनन्तगुणाः सिद्धानामनन्तभागप्रमाणाः। तत्र सर्वजघन्यगुणः प्रदेशः परिगृहीत; तस्यानुभागः प्रज्ञाछेदेन तावद्धा परिच्छिन्नः यावत्पुनर्विभागो न भवति। ते ऽविभागपरिच्छेदाः सर्वजीवानामनन्तगुणाः, एको राशिः कृतः। एवं तत्प्रमाणाः सर्वे तथैव परिच्छिन्नाः पङ्क्तीकृता वर्गाः वर्गणा। अपर एकाविभागपरिच्छेदाधिकः प्रदेशः परिगृहीतः, तथैव तस्याविभागपरिच्छेदाः कृताः। स एको राशिर्वर्गः। तथैव समगुणाः पङ्क्तीकृताः वर्गा

वर्गणा। एवं पङ्क्तयः कृता यावदेकाविभागपरिच्छेदाधिकलाभम्। तदलाभेऽन्तरं भवति। एवमेतासां पङ्क्तीनां विशेषहीनानां क्रमवृद्धिक्रमहानियुक्तानां समुदयः स्पर्धकमित्युच्यते। तत उपरि द्वित्रिचतुःसंख्येयासंख्येयगुणरसा न लभ्यन्तेऽनन्तगुणरसा एव। तत्रैकप्रदेशो जघन्यगुणः परिगृहीतः, तस्य चानुभागाविभागपरिच्छेदाः पूर्ववत्कृताः। एवं समगुणा वर्गाः समुदिता वर्गणा भवति। एकाविभागपरिच्छेदाधिकाः पूर्ववद्विरलीकृता वर्गा वर्गणाश्च भवन्ति यावदन्तरं भवति तावदेकं स्पर्धकं भवति। एवमनेन क्रमेण विभागे क्रियमाणेऽभव्यानामनन्तगुणानि सिद्धानामनन्तभागप्रमाणानि स्पर्धकानि भवन्ति। तदेतत्समुदितमेकमुदयस्थानं भवति।

**तत्र ज्ञानं चतुर्विधं क्षायोपशमिकमाभिनिबोधिकज्ञानं श्रुतज्ञानमवधिज्ञानं मनःपर्ययज्ञानं चेति॥५॥** वीर्यान्तरायमतिश्रुतज्ञानावरणानां सर्वघातिस्पर्धकानामुदयक्षयात् सदुपशमाच्च देशघातिस्पर्धकानामुदये सति मतिज्ञानं श्रुतज्ञानं च भवति। देशघातिस्पर्धकानां रसस्य प्रकर्षाप्रकर्षयोगाद् गुणघातस्यातिशयानतिशयवत्त्वात् तज्ज्ञान-भेदो भवति। एवमवधिमनःपर्ययज्ञानयोरपि स्वावरणक्षयोपशमभेदात् क्षायोपशमिकत्वं वेदितव्यम्।

**अज्ञानं त्रिविधं मत्यज्ञानं श्रुताज्ञानं विभङ्गञ्चेति॥६॥** तेषां क्षायोपशमिकत्वं पूर्ववत्। ज्ञानाज्ञानविभागस्तु मिथ्यात्वकर्मोदयानुदयापेक्षः।

**दर्शनं त्रिविधं क्षायोपशमिकं चक्षुर्दर्शनमचक्षुर्दर्शनमवधिदर्शनं चेति॥७॥** तेषां क्षायोपशमिकत्वं पूर्ववत्। ज्ञानाज्ञानविभागस्तु मिथ्यात्वकर्मोदयानुदयापेक्षः।

**लब्धयः पञ्च क्षायोपशमिका: दानलब्धिर्लाभलब्धिर्भोगलब्धिरुपभोगलब्धि-वीर्यलब्धिश्चेति॥७॥** दानान्तरायादिसर्वघातिस्पर्धकक्षयोपशमे देशघातिस्पर्धकोदयसद्भावे ताः पञ्च लब्धयो भवन्ति। सम्यक्त्वग्रहणेन वेदकसम्यक्त्वमिह परिगृह्यते।

अनन्तानुबन्धिकषायचतुष्टयस्य मिथ्यात्वसम्यङ्मिथ्यात्वयोश्चोदयक्षयात् सदुपशमाच्च सम्यक्त्वस्य देशघातिस्पर्धकस्योदये सति तत्त्वार्थश्रद्धानं क्षायोपशमिकं सम्यक्त्वम्। अनन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानद्वादशकषायोदयक्षयात् सदुपशमाच्च संज्वलन-कषायचतुष्टयान्यतमदेशघातिस्पर्धकोदये सति नोकषायनवकस्य यथासंभवोदये च निवृत्तिपरिणाम आत्मनः क्षायोपशमिकं चारित्रम्। अनन्तानुबन्ध्यप्रत्याख्यानकषायाष्टकोदयक्षयात् सदुपशमाच्च प्रत्याख्यानकषायोदये संज्वलनकषायस्य देशघातिस्पर्धकोदये नोकषायनवकस्य यथासंभवोदये च विरताविरतपरिणामः क्षायोपशमिकः संयमासंयमः।

**संज्ञित्वसम्यङ्मिथ्यात्वयोगोपसंख्यानमिति चेन्न; ज्ञानसम्यक्त्वलब्धिग्रहणेन गृहीतत्वात् ॥8॥** स्यादेतत् - संज्ञित्वसम्यङ्मिथ्यात्वयोगोपसंख्यानं कर्तव्यम्, तेऽपि हि क्षायोपशमिका इति; तन्न; किं कारणम्? ज्ञानसम्यक्त्वलब्धिग्रहणेन गृहीतत्वात्। संज्ञित्वं हि मतिज्ञानेन गृहीतं सम्यङ्मिथ्यात्वं सम्यक्त्वग्रहणेन। नोइन्द्रियावरण-क्षयोपशमापेक्षत्वादुभयात्मकस्यैकात्मपरिग्रहाच्चोदकव्यामिश्रक्षीरव्यपदेशवत् योगश्च वीर्यलब्धिग्रहणेन गृहीत इति। अथवा, चशब्देन समुच्चयो वेदितव्यः। अथ पञ्चेन्द्रियत्वे समाने नोइन्द्रियावरणक्षयोपशमः कस्यचिद्भवति कस्यचिन्नेति कुतोऽयं विकल्पः? उच्यते - संज्ञिजातिनामकर्मविशेषोदयबललाभे सति नोइन्द्रियावरणक्षयोपशमो भवति, तदभावे न भवतीत्ययं विशेषः, एकेन्द्रियजातिनामाद्युदयविशेषापेक्षयै- केन्द्रियादिक्षयो-पशमभेदवत्।

य एकविंशतिविकल्प औदयिको भाव उद्दिष्टः तस्य भेदसंज्ञाकीर्तनार्थ-मिदमारभ्यते –

## गतिकषायलिङ्गमिथ्यादर्शनाज्ञानासंयतासिद्धलेश्याश्चतुश्चतुस्त्र्येकैकैकैकषड्भेदाः ॥६॥

गत्यादीनामितरेतरयोगे द्वन्द्वः, चतुरादीनां च द्वन्द्वगर्भोऽन्यपदार्थप्रधाना वृत्तिः। पूर्ववदेकशेषाभावः।

**गतिनामकर्मोदयादात्मनस्तद्भावपरिणामाद् गतिरौदयिकी॥१॥** येन कर्मणाऽऽत्मनो नारकादिभावावाप्तिर्भवति तद् गतिनाम चतुर्विधम् - नरकगतिनाम तिर्यग्गतिनाम मनुष्यगतिनाम देवगतिनाम चेति। तत्र नरकगतिनामकर्मोदयान्नारको भावो भवतीति सऔदयिकः। एवं तिर्यग्गतिनामकर्मोदयात्तिर्यग्भाव औदयिकः। मनुष्यगतिनामकर्मोदयात् मनुष्यभाव औदयिकः। देवगतिनामकर्मोदयाद् देवभाव औदयिकः।

**चारित्रमोहविशेषोदयात् कलुषभावः कषाय औदयिकः॥२॥** चारित्रमोहस्य कषाय-वेदनीयस्योदयादात्मनः कालुष्यं क्रोधादिरूपमुत्पद्यमानं 'कषत्यात्मानं हिनस्ति' इति कषाय इत्युच्यते। स औदयिकश्चतुर्विधः - क्रोधो मानो माया लोभश्चेति। तद्भेदा अनन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानसंज्वलनविकल्पाः।

**वेदोदयापादितोऽभिलाषविशेषो लिङ्गम्॥३॥** लिङ्गं द्विविधम् - द्रव्यलिङ्गं भाव-लिङ्गं च। तत्र यद् द्रव्यलिङ्गं नामकर्मोदयापादितं तदिह नाधिकृतमात्मपरिणाम-प्रकरणात्। भावलिङ्गमात्मपरिणामः स्त्रीपुंनपुंसकान्योन्याभिलाषलक्षणः। स पुनश्चारित्र मोहविकल्पस्य नोकषायस्य स्त्रीवेदपुंवेदनपुंसकवेदस्योदयाद्भवतीत्यौदयिकः।

**दर्शनमोहोदयात्तत्वार्थाश्रद्धानपरिणामो मिथ्यादर्शनम्॥४॥** तत्त्वार्थरुचिस्वभाव-स्यात्मनः तत्प्रतिबन्धकारणस्य दर्शनमोहस्योदयात् तत्त्वार्थेषु निरूप्यमाणेष्वपि न श्रद्धानमुत्पद्यते तन्मिथ्यादर्शनमौदयिकमित्याख्यायते।

**ज्ञानावरणोदयादज्ञानम् ॥५॥** ज्ञस्वभावस्यात्मनः तदावरणकर्मोदये सति नावबोधो भवति तदज्ञानमौदयिकम्, घनसमूहस्थगितदिनकरतेजोऽनभिव्यक्तिवत्। तद्यथा- एकेन्द्रि-यस्य रसनघ्राणश्रोत्रचक्षुषामिन्द्रियाणां प्रतिनियताभिनिबोधिकज्ञानावरणस्य। सर्वघाति-स्पर्धकस्योदयात् रसगन्धशब्दरूपाज्ञानं यत्तदौदयिकम्। एवं द्वित्रिचतुरिन्द्रियेषु शेषेन्द्रिय-विषयाज्ञानं वाच्यम्। पञ्चेन्द्रियतिर्यक्षु शुकसारिकादिवर्जितेषु मनुष्येषु च केषुचिदक्षर-श्रुतावरणस्य सर्वघातिस्पर्धकस्योदयादक्षरश्रुतनिर्वृत्त्यभावादक्षरश्रुताज्ञानमौदयिकम्। नोइन्द्रियावरणस्य सर्वघातिस्पर्धकस्योदयाद्धिताहितपरीक्षां प्रत्यसामर्थ्यमसंज्ञित्वमौदयिकं, तदप्यत्रैवान्तर्भवति। एवमवधिमनःपर्ययकेवलज्ञानावरणोदयात् प्रत्येकमज्ञानमौदयिकं वाच्यमिति।

**चारित्रमोहोदयादनिवृत्तिपरिणामोऽसंयतः॥६॥** चारित्रमोहस्य सर्वघातिस्पर्धकस्यो-दयात् प्राण्युपघातेन्द्रियविषये द्वेषाभिलाषनिवृत्तिपरिणामरहितोऽसंयत औदयिकः।

**कर्मोदयसामान्यापेक्षोऽसिद्धः॥७॥** अनादिकर्मबन्धसन्तानपरतन्त्रस्यात्मनः कर्मो-दयसामान्ये सत्यसिद्धत्वपर्यायो भवतीत्यौदयिकः। स पुनर्मिथ्यादृष्ट्यादिषु सूक्ष्म-साम्परायिकान्तेषु कर्माष्टकोदयापेक्षः, शान्तक्षीणकषाययोः सप्तकर्मोदयापेक्षः, सयोगि-केवल्ययोगिकेवलिनोरघातिकर्मोदयापेक्षः।

**कषायोदयरञ्जिता योगप्रवृत्तिर्लेश्या॥८॥** द्विविधा लेश्या - द्रव्यलेश्या भावलेश्या चेति। तत्र द्रव्यलेश्या पुद्गलविपाकिकर्मोदयापादितेति सा नेह परिगृह्यत आत्मनो भावप्रकरणात्। भावलेश्या कषायोदयरञ्जिता योगप्रवृत्तिरिति कृत्वा औदयिकीत्युच्यते। ननु च योगप्रवृत्तिरात्मप्रदेशपरिस्पन्दक्रिया, सा वीर्यलब्धिरिति क्षायोपशमिकी व्याख्या, कषायश्चौदयिको व्याख्यातः, ततो लेश्याऽनर्थान्तरभूतेति; नैष दोषः; कषायोदयतीव्र-मन्दावस्थापेक्षाभेदादर्थान्तरत्वम्। सा षड्विधा - कृष्णलेश्या नीललेश्या कपोतलेश्या

पद्मलेश्या शुक्ललेश्या चेति। तस्यात्मपरिणामस्याऽशुद्धिप्रकर्षाप्रकर्षापेक्षया कृष्णादिशब्दोपचारः क्रियते।

ननु च 'उपशान्तकषाये क्षीणकषाये सयोगकेवलिनि च शुक्ला लेश्यास्ति' इत्यागमः, तत्र कषायानुरञ्जनाभावादौदयिकीत्वं नोपपद्यते; नैष दोषः; पूर्वभावप्रज्ञापननयापेक्षया यासौ योगप्रवृत्तिः कषायानुरञ्जिता 'सैवेयम्' इत्युपचारादौदयिकीत्युच्यते। तदभावादयोगिकेवल्यलेश्य इति च निश्चीयते।

अत्र चोद्यते - यथाऽज्ञानमौदयिकमेवमदर्शनमपि दर्शनावरणोदयाद्भवतीत्यौदयिकम्, निद्रानिद्रादयश्चौदयिकाः, वेदनीयोदयात् सुखदुःखमौदयिकम्, नोकषायाश्च हास्यरत्यादयः षडौदयिकाः, आयुरुदयाद्भवधारणं भवत्यौदयिकम्, उच्चैर्नीचैर्गोत्रकर्मोदयादुच्चनीचगोत्रपरिणामो भवतीत्यौदयिकः, नामकर्मणि च जात्यादय औदयिकाः, एतेषामपरिग्रहान्न्यूनं लक्षणमिति। अथ मतम् - आत्मपरिणामस्याधिकृतत्वाच्छरीरादीनामौदयिकत्वेऽपि पुद्गलविपाकित्वात् तेषामसंग्रह इति, एवमपि ये जीवविपाकिनस्तेषां ग्रहणं कर्तव्यं जात्यादीनाम्? अत उत्तरं पठति-

**मिथ्यादर्शनेऽदर्शनावरोधः॥९॥** मिथ्यादर्शनेऽदर्शनस्यावरोधो भवति। निद्रानिद्रादीनामपि दर्शनसामान्यावरणत्वात्तत्रैवान्तर्भावः। ननु च तत्त्वार्थाश्रद्धानं मिथ्यादर्शनमित्युक्तम्; सत्यमुक्तम्; सामान्यनिर्देशे विशेषान्तर्भावात्, सोऽप्येको विशेषः। अयमपरो विशेषः - अदर्शनमप्रतिपत्तिर्मिथ्यादर्शनमिति।

**लिङ्गग्रहणे हास्यरत्याद्यन्तर्भाव सहचारित्वात् ॥१०॥** लिङ्गग्रहणे हास्यरत्यादीना-मन्तर्भावो भवति। कुतः? सहचारित्वात्, पर्वतग्रहणेन नारदग्रहणवत् ।

**गतिग्रहणमघात्युपलक्षणम् ॥११॥** अघातिकर्मोदयापादिता ये भावाः। तेषां गति-ग्रहणमुपलक्षणं यथा 'काकेभ्यो रक्षतां सर्पिः' इति काकग्रहणमुपघातकोपलक्षणम्। तेन जात्यादयो भावा नामकर्मविशेषोदयापादिता वेदनीयायुर्गोत्रोदयकृताश्च गृह्यन्ते।

इह यथाक्रममिति वक्तव्यं गतिश्चतुर्विधेत्येवमाद्यानुपूर्व्यसंप्रत्ययार्थम् न वक्तव्यम्, 'यथाक्रमम्' इत्यनुवर्तते।

यः पारिणामिको भावस्त्रिभेद उक्तः, तद्विकल्पस्वरूपप्रतिपानादर्थमाह -

## जीवभव्याऽभव्यत्वानि च॥७॥

**अन्यद्रव्यासाधारणास्त्रयः पारिणामिकाः॥१॥** जीवत्वं भव्यत्वमभव्यत्वमित्येते पारिणामिका आत्मनस्त्रयो भावा अन्यद्रव्यासाधारणा वेदितव्याः। कुतः पुनरेषां पारिणामिकत्वम्?

**कर्मोदयक्षयोपशमक्षयोपशमानपेक्षत्वात् ॥२॥** न ह्येवंविधं कर्मास्ति यस्योदयात् क्षयादुपशमात् क्षयोपशमाद्वा जीवो भव्योऽभव्य इति चोच्येत। तदभावादनादिद्रव्य भवनसंबन्धपरिणामनिमित्तत्वात् पारिणामिका इति व्यपदिश्यन्ते।

**आयुर्द्रव्यापेक्षं जीवत्वं न पारिणामिकमिति चेन्न, पुद्गलद्रव्यसंबन्धे सत्यन्यद्रव्यसामर्थ्याभावात् ॥३॥** स्यादेतत् - आयुर्द्रव्योदयाज्जीवतीति जीवो नानादि-पारिणामिकत्वादिति चेन्न; किं कारणम्? पुद्गलद्रव्यसंबन्धे सत्यन्यद्रव्यसामर्थ्या-भावात्। आयुर्हि पौद्गलिकं द्रव्यम्। यदि च तत्संबन्धाज्जीवस्य जीवत्वंस्यात्; नन्वेवमन्यद्रव्यस्यापि धर्मादेरायुःसंबन्धाज्जीवत्वं स्यात्। किञ्च

**सिद्धस्याजीवत्वप्रसङ्गात् ॥४॥** यद्यायुःसंबन्धापेक्षं जीवत्वं ननु सिद्धस्यायुरभावाद-जीवत्वं प्रसज्येत। ततस्तदनपेक्षत्वाज्जीवत्वं पारिणामिकमेव।

**जीवे त्रिकालविषयविग्रहदर्शनादिति चेन्न रूढिशब्दस्य निष्पत्त्यर्थत्वात् ॥५॥** स्यान्मतम् - 'जीवति अजीवीत् जीविष्यति इति त्रिकालविषयो विग्रहो दृश्यते ततः प्राणधारणार्थत्वात् कर्मापेक्षत्वे न पारिणामिकत्वमिति' तच्च न; कस्मात्? रूढिशब्दस्य निष्पत्त्यर्थत्वात्। रूढिशब्देषु हि क्रियोपात्तकाला व्युत्पत्त्यर्थैव न तन्त्रम्, यथा गच्छतीति गौरिति।

**चैतन्यमेव वा जीवशब्दस्यार्थः॥६॥** अथवा, चैतन्यं जीवशब्देनाभिधीयते, तच्चानादिद्रव्यभवननिमित्तत्वात् पारिणामिकम्।

**सम्यग्दर्शनज्ञानचारित्रपरिणामेन भविष्यतीति भव्यः॥७॥** भव्यादीनां प्रायेण भविष्यत्कालविषयत्वात् 'सम्यग्दर्शनादिपर्यायेण य आत्मा भविष्यति स भव्यः' इतीमं व्यपदेशमास्कन्दति।

**तद्विपरीतोऽभव्यः॥८॥** यो न तथा भविष्यत्यसावभव्य इत्युच्यते। किं कृतोऽयं विशेषः? द्रव्यस्वभावकृतः, अतः पारिणामिकत्वमनयोः।

**योऽनन्तेनापि कालेन न सेत्स्यत्यसावभव्य एवेति चेन्न; भव्यराश्यन्तर्भावात् ॥९॥** स्यादेतत् - अनन्तकालेनापि यो न सेत्स्यत्यसावभव्यतुल्यत्वादभव्य एव। अथ सेत्स्यति सर्वो भव्यः; तत उत्तरकालं भव्यशून्यं जगत् स्यादिति? तन्न; किं कारणम्? भव्यराश्यन्तर्भावात्। यथा योऽनन्तकालेनापि कनकपाषाणो न कनको भविष्यति न तस्यान्धपाषाणत्वं कनकपाषाणशक्तियोगात्। यथा वाऽऽगामिकालो योऽनन्तेनापि कालेन नागमिष्यति न तस्यागामित्वं हीयते, तथा भव्यस्यापि स्वशक्तियोगादसत्यामपि व्यक्तौ न भव्यत्वहानिः।

**भावस्यैकत्वनिर्देशो युक्त इति चेन्न; द्रव्यभेदाद्भावभेदसिद्धेः॥१०॥** स्यादेतत् - 'जीवश्च भव्यश्चाऽभव्यश्च जीवभव्याभव्याः' इति द्वन्द्वे कृते तेषां भावे विवक्षिते

एकत्वनिर्देशो युक्तो जीवभव्याभव्यानां भावो जीवभव्याभव्यत्वमिति? तन्न; किं कारणम्? द्रव्यभेदाद्भावभेदसिद्धेः। नहि 'भाव एकत्वेन वक्तव्यः' इति नियमोऽस्ति, ततो द्रव्यभेदाद्भेदे सति बहुत्वनिर्देशो युक्तो जीवभव्याभव्यानां भावा जीवभव्याभव्यत्वानीति। पुनः प्रत्येकमभिसंबन्धो भवति - जीवत्वं भव्यत्वमभव्यत्वमिति।

**द्वितीयगुणग्रहणमार्षोक्तत्वादिति चेन्न; तस्य नयापेक्षत्वात्॥११॥** अथ मतम् - द्वितीयगुणग्रहणमिह कर्तव्यम्। कोऽसौ द्वितीयो गुणः? सासादनसम्यग्दृष्टिः। सोऽपि जीवस्यासाधारणः पारिणामिकः। एवं ह्यार्षे उक्तम्-"सासादनसम्यग्दृष्टिरिति को भावः? पारिणामिको भावः" इति। न कर्तव्यम्; कुतः? तस्य नयापेक्षत्वात्। मिथ्यात्वकर्मण उदयं क्षयमुपशमं क्षयोपशमं वा नापेक्षत इत्यार्षे पारिणामिकः, इह पुनरसावौदयिक इत्येवं गृह्यते अनन्तानुबन्धिकषायोदयात्तस्य निर्वृत्तेः। चशब्दः किमर्थः?

**अस्तित्वान्यत्वकर्तृत्वभोक्तृत्वपर्यायवत्त्वाऽसर्वगतत्वाऽनादिसन्ततिबन्धनबद्धत्व प्रदेशवत्त्वारूपत्वनित्यत्वादिसमुच्चयार्थश्चशब्दः॥१२॥** अस्तित्वादयोऽपि पारिणामिका भावाः सन्ति तेषां समुच्चयार्थश्चशब्दः। यदि तेऽपि पारिणामिकाः सूत्रे तेषां ग्रहणं कस्मान्न कृतम्?

**अन्यद्रव्यसाधारणत्वादसूत्रिताः॥१३॥** अस्तित्वादयो हि धर्मा अन्येषामपि द्रव्याणां साधारणास्ततस्ते न सूत्रिताः। तद्यथा - अस्तित्वं तावत्साधारणं षड्द्रव्यविषय-त्वात्। तत् कर्मोदयक्षयक्षयोपशमानपेक्षत्वात् पारिणामिकम्। अन्यत्वमपि साधारणं सर्वद्रव्याणां परस्परतोऽन्यत्वात् कर्मोदयाद्यपेक्षाभावात् तदपि पारिणामिकम्।

कर्तृत्वमपि साधारणं क्रियानिष्पत्तौ सर्वेषां स्वातन्त्र्यात्। ननु च जीवपुद्गलानां क्रियापरिणामयुक्तानां कर्तृत्वं युक्तम्, धर्मादीनां कथम्? तेषामप्यस्त्यादिक्रिया-विषयमस्ति कर्तृत्वं कर्मोदयाद्यपेक्षाभावात् तदपि पारिणामिकम्। ननु चात्मप्रदेश

परिस्पन्दस्य योगसंज्ञकस्य यत्कर्तृत्वं न तत्साधारणमप्यसाधारणेषूपसंख्येयम्; न; तस्य क्षयोपशमनिमित्तत्वात्। यदस्य पुण्यपापयोः कर्तृत्वं तदन्यद्रव्याणामसाधारणमपि सन्न पारिणामिकम्। कस्मात्? उदयक्षयोपशमनिमित्तत्वात्। मिथ्यादर्शनं हि दर्शनमोहोदयनिमित्तम्, अविरतिप्रमादकषायाः चारित्रमोहोदयनिमित्ताः, योगाश्च क्षायोपश-मिका इति। अन्यद्रव्यासाधारणानादिपारिणामिकचैतन्यसन्निधाने पुण्यपापयोः कर्तृत्वमिति पारिणामिकमिति चेन्न, सार्वकालिककर्तृत्वप्रसङ्गात्। मुक्तानामपि चैतन्य-मस्तीति पुण्यपापयोः कर्तृत्वं स्यात् संसारिणां चाविशिष्टं स्यात् चैतन्यकारणस्याभेदात्।

भोक्तृत्वमपि साधारणम्। कुतः? तल्लक्षणोपपत्तेः। वीर्यप्रकर्षात् परद्रव्यवीर्या-दानसामर्थ्यं भोक्तृत्वलक्षणम्। यथाऽऽत्माऽऽहारादेः परद्रव्यस्यापि वीर्यात्मसात्करणा-द्भोक्ता, तथा विषस्याचेतनस्य वीर्यप्रकर्षात् कोद्रवद्रव्यादिसारसंग्रहाद्भोक्तृत्वम्। लवणादीनां च वीर्यप्रकर्षात् काष्ठादिद्रव्यलवणकरणाद्भोक्तृत्वं कर्मोदयापेक्षाभावात्तदपि पारिणामिकम्। यच्चात्मनः शुभाशुभकर्मफलस्योपभोक्तृत्वं च तत्साधारणं न च पारिणामिकम्; तस्य क्षयोपशमनिमित्तत्वात्, वीर्यान्तरायक्षयोपशमाङ्गोपाङ्गनामलाभा-वष्टम्भादात्मनः शुभा-शुभकर्मफलोपभोगे सामर्थ्यमाविर्भवति। आहारादिवीर्यात्मसात्करणलक्षणोपभोगश्च भोगान्तरायक्षयोपशमादुपात्तस्य च जरणं वीर्यान्तरायक्षयोपशमात्। कर्मान्तरेण विषादीनां कथं भोक्तृत्वमिति चेत्? प्रतिनियतशक्तित्वाद् द्रव्याणां भास्करप्रतापवत्।

पर्यायवत्त्वमपि साधारणं सर्वद्रव्याणां प्रतिनियतपर्यायोपपत्तेः। कर्मोदयाद्यपेक्षा-भावात्तदपि पारिणामिकम्।

असर्वगतत्वमपि साधारणं परमाण्वादीनामविभुत्वात्, धर्मादीनां च परिमिता-संख्यातप्रदेशत्वात्। कर्मोदयाद्यपेक्षाभावात्तदपि पारिणामिकम्। यदस्य कर्मोपात्तशरीर प्रमाणानुविधायित्वं तदसाधारणमपि सन्न पारिणामिकम्; कर्मनिमित्तत्वात्।

अनादिसन्ततिबन्धनबद्धत्वमपि साधारणम्। कस्मात्? तस्य सर्वद्रव्याणां स्वात्मीयसन्तानबन्धनबद्धत्वं प्रत्यनादित्वात्। सर्वाणि हि द्रव्याणि जीवधर्माधर्मा काशकालपुद्गलाख्यानि प्रतिनियतानि पारिणामिकचैतन्योपयोगगतिस्थित्यवकाशदान वर्तनापरिणामवर्णगन्धरसस्पर्शादिपर्यायसन्तानबन्धनबद्धानि। कर्मोदयाद्यपेक्षाभावात्तदपि पारिणामिकम्। यदस्यानादिकर्मसन्ततिबन्धनबद्धत्वं तदसाधारणमपि तन्न पारिणामि-कम्; कर्मोदयनिमित्तत्वात्। वक्ष्यते हि "अनादिसंबन्धे च"। "सर्वस्य" इति।

प्रदेशवत्त्वमपि साधारणं संख्येयाऽसंख्येयानन्तप्रदेशोपेतत्वात् सर्वद्रव्याणाम्। तदपि कर्मोदयाद्यपेक्षाभावात् पारिणामिकम्।

अरूपत्वमपि साधारणं जीवधर्माधर्मकालाकाशानां रूपयोगाभावात्। तदपि कर्मोदयाद्यपेक्षाभावात् पारिणामिकम्।

नित्यत्वमपि साधारणं द्रव्यार्थादेशात् सर्वद्रव्याणां व्ययोदययोगाभावात्। तच्च कर्मोदयाद्यपेक्षाभावात् पारिणामिकम्।

ऊर्ध्वगतित्वमपि साधारणमग्न्यादीनामूर्ध्वगतिपारिणामिकत्वात्। तच्च कर्मो-दयाद्यपेक्षाभावात् पारिणामिकम्। अन्ये चात्मनः साधारणाः पारिणामिका योज्याः।

**अनन्तरसूत्रनिर्दिष्टोपसंग्रहार्थश्चशब्द इति चेन्न; अनिष्टत्वात्॥१४॥** स्यान्मतम्-अनन्तरसूत्रे निर्दिष्टानां गत्यादीनामुपसंग्रहार्थश्चशब्दो नाऽस्तित्वादिसमुच्चयार्थ इति; तन्न; किं कारणम्? अनिष्टत्वात्। नहि गत्यादीनां पारिणामिकत्वमिष्यते तल्लक्षणा भावात्।

**त्रिभेदपारिणामिकभावप्रतिज्ञानाच्च॥१५॥** यतश्चौपशमिकादिभावसंख्याविधायिनि सूत्रे त्रिभेदः पारिणामिक इति प्रतिज्ञातमतो न गत्यादिसमुच्चयार्थश्चशब्दः।

**गत्यादीनामुभयवत्त्वं क्षायोपशमिकभाववदिति चेन्न; अन्वर्थसंज्ञाकरणात् ॥१६॥** अथ मतमेतत् - यथा क्षायोपशमिकभावस्य क्षयोपशमात्मकत्वादुभयवत्त्वं तथा गत्यादीनामुभयवत्त्वादौदयिकपारिणामिकत्वमिति 'औदयिक एकविंशतिभेदः, पारिणामिकश्च त्रिभेदः' इति सिद्धमिति; तन्न; किं कारणम् ? अन्वर्थसंज्ञाकरणात्। 'परिणामः स्वभावः प्रयोजनमस्येति पारिणामिकः' इत्यन्वर्थसंज्ञा। न चासौ स्वभावो गत्यादिषु विद्यते कर्मोदयनिमित्तत्वात्। किञ्च

**तथानभिधानात् ॥१७॥** यथा उभयवत्त्वाज्ज्ञानादयः 'क्षायोपशमिकाः' इत्यभिधीयन्ते तथा गत्यादयः "औदयिकपारिणामिकाः" इत्यभिधीयेरन् न चाभि धीयन्ते। तथा नौमधानात् क्षायोपशमिकवद् गत्यादयो नोभयवन्तः। किञ्च

**अनिर्मोक्षप्रसङ्गात् ॥१८॥** गत्यादीनामुभयवत्त्वात् पारिणामिकत्वे सत्यनिर्मोक्ष प्रसङ्गः सातत्यावस्थानात्। तस्मात्स्थितमेतत् - 'अस्तित्वादिसमुच्चयार्थ एव चशब्दः' इति।

**आदिग्रहणमत्र न्याय्यमिति चेन्न; त्रिविधपारिणामिकभावप्रतिज्ञाहानेः॥१९॥** स्यादेतत् - 'जीवभव्याभव्यत्वानि' इत्यत्राऽऽदिग्रहणं न्याय्यम्, अस्तित्वादीनामपीष्टत्वादिति; तन्न; किं कारणम्? त्रिविधपारिणामिकभावप्रतिज्ञाहानेः. आदिग्रहणे हि क्रियमाणे तस्य हानिः स्यात्।

**समुच्चयार्थेऽपि चशब्दे तुल्यमिति चेन्न; प्रधानापेक्षत्वात् ॥२०॥** स्यान्मतम् - समुच्चयार्थेऽपि चशब्देऽस्तित्वादीनां पारिणामिकत्वेन समुच्चयात्त्रिभेदप्रतिज्ञाहानिस्तुल्येति; तन्न; किं कारणम्? प्रधानापेक्षत्वात्। कण्ठोक्तानि त्रीणि प्रधानानि तदपेक्षा

त्रिभेदप्रतिज्ञेति नास्ति विरोध:। अस्तित्वादीनि तु साधारणत्वात् चब्देन द्योतितानीति तेषां गुणभावः। आदिशब्दे हि क्रियमाणेऽस्तित्वादीनां प्राधान्यं स्यात्, जीवत्वादीना-मुपलक्षणार्थत्वादप्राधान्यम्। तद्गुणसंविज्ञाने चोभयेषां प्राधान्यं प्रसज्येत।

**सान्निपातिकभावोपसंख्यानमिति चेन्न; अभावात् ॥२१॥** स्यादेतत् - आर्षे सान्निपातिकभाव उक्तः स इहोपसंख्यातव्य इति; तन्न; किं कारणम्? अभावात्। नहि षष्ठो भावोऽस्ति।

**मिश्रशब्देनाक्षिप्तत्वाच्च॥२२॥** यद्यप्यसौ विद्यते मिश्रशब्देनासावाक्षिप्तः। ननु च मिश्रशब्दः क्षायोपशमिकसंग्रहार्थो न सान्निपातिकग्रहणार्थ इति? उच्यते –

**चशब्दवचनात् ॥२३॥** 'औपशमिकक्षायिकौ भावौ मिश्रो जीवस्य स्वतत्त्वमौदयिक-पारिणामिकौ च' इति सिद्धे यन्मिश्रशब्दसमीपे चशब्दकरणं तेन ज्ञायते मिश्रशब्देनोभय-मुच्यते इति। मिश्रश्च कः? क्षायोपशमिको भावः सान्निपातिकश्चेति। इदमयुक्तं वर्तते। किमत्रायुक्तम्? यद्यस्ति सान्निपातिको भावः 'अभावात्' इति विरुध्यते। अथ नास्ति; कथमार्षे सान्निपातिको भाव उक्तः? कस्य वा मिश्रशब्देनाक्षेपः? नैष दोषः; सान्निपातिक एको भावो नास्तीति 'अभावात्' इत्युच्यते, संयोगभङ्गापेक्षया अस्तीत्यार्षं वचनम्। तत्राभावपक्षे आदिसूत्रे पूर्वोक्तानुकर्षणार्थश्चशब्द उक्तः, भावपक्षे सान्निपातिकप्रतिपादनार्थश्चशब्दः। पूर्वोक्तानुकर्षस्तु अपेक्षया वेदितव्यः। अथार्षोक्तः सान्निपातिकभावः कतिविध इति? अत्रोच्यते –

**षड्विंशतिविधः षड्त्रिंशद्विध एकचत्वारिंशद्विध इत्येवमादिरागमे उक्तः॥२४॥।** तत्र-

**"दुग तिग चदु पंचेव य संयोगा होंति सन्निवादेसु।**

**दस दस पंच य एक्क य भावा छव्वीस पिंडेण॥"**

द्विभावसंयोगेन दशौदयिकं परिगृह्यौपशमिकादिचतुष्टयस्य चैकैकत्यागेन प्रथमे द्विभेदभावसंयोगे चत्वारो भङ्गाः। तत्रैक औदयिकौपशमिकसान्निपातिकजीवभावो नाम मनुष्य उपशान्तक्रोधः। द्वितीय औदयिकक्षायिकसान्निपातिकजीवभावो नाम मनुष्यः क्षीणकषायः। तृतीय औदयिकक्षायोपशमिकसान्निपातिकजीवभावो नाम मनुष्यः पञ्चेन्द्रियः। चतुर्थ औदयिकपारिणामिकसान्निपातिकजीवभावो नाम मनुष्यो जीवः। द्वितीयद्विभावसंयोगे औदयिकं परित्यज्यौपशमिकपरिग्रहात् क्षायिकादिभावत्रयस्यै कैकत्यागेन त्रयो भङ्गाः। तत्रैक औपशमिकक्षायिकसान्निपातिकजीवभावो नाम उपशान्तलोभः क्षीणदर्शनमोहत्वात् क्षायिकसम्यग्दृष्टिः। द्वितीय औपशमिकक्षायोपशमिक-सान्निपातिकजीवभावो नाम उपशान्तमान आभिनिबोधिकज्ञानी। तृतीय औपशमिक-पारिणामिकसान्निपातिकजीवभावो नाम उपशान्तमायो भव्यः। तृतीयद्विभावसंयोगे औपशमिकं परित्यज्य क्षायिकपरिग्रहात् क्षायोपशमिकपारिणामिकयोरेकैकत्यागाद् द्वौ भङ्गौ। तत्रैकः क्षायिकक्षायोपशमिकसान्निपातिकजीवभावो नाम क्षायिकसम्यग्दृष्टिः श्रुतज्ञानी। द्वितीयः क्षायिकपारिणामिकसान्निपातिकजीवभावो नाम क्षीणकषायो भव्यः। चतुर्थद्विभावसंयोगे क्षायिकपरित्यागादेकः क्षायोपशमिकपारिणामिकसान्निपातिकजीवभावो नामाऽवधिज्ञानी जीवः। त एते द्विभावसंयोगभङ्गा समुदिताः दश।

प्रथमत्रिभावसंयोगे औदयिकौपशमिकौ परिगृह्य क्षायिकादिभावत्रयस्यैकैक-भावपरिग्रहात् त्रयो भङ्गाः। तत्रैक औदयिकौपशमिकक्षायिकसान्निपातिकजीवभावो नाम मनुष्य उपशान्तमोहः क्षायिकसम्यग्दृष्टिः। द्वितीय औदयिकौपशमिकक्षायोपशमिकसान्नि-पातिकजीवभावो नाम मनुष्य उपशान्तक्रोधो वाग्योगी। तृतीय औदयिकौपश-मिकपारिणामिकसान्निपातिकजीवभावो नाम मनुष्य उपशान्तमानो जीवः। द्वितीयत्रि-भावसंयोगे औपशमिकं परित्यज्यौदयिकक्षायिकौ

परिगृह्य क्षायोपशमिकपारिणामिकयोरेकैकस्य परिग्रहाद् द्वौ भङ्गौ। तत्रैकः औदयिकक्षायिकक्षायोपशमिकसान्निपातिक-जीवभावो नाम मनुष्यो क्षीणकषायः श्रुतज्ञानी। द्वितीय औदयिकक्षायिकपारिणामिक-सान्निपातिकजीवभावो नाम मनुष्यः क्षीणदर्शनमोहो जीवः। तृतीयत्रिभावसंयोगे औदयिकपरिग्रहादौपशमिकक्षायिकत्यागादेकः औदयिकक्षायोपशमिकपारिणामिकसान्नि-पातिकजीवभावो नाम मनुष्यमनोयोगी जीवः। चतुर्थत्रिभावसंयोगे औदयिकं परित्यज्यौपशमिकादिभावचतुष्टयस्यैकैकत्यागाच्चत्वारो भङ्गाः। तत्रैक औपशमिकक्षा-यिकक्षायोपशमिकसान्निपातिकजीवभावो नाम उपशान्तमानः क्षीणदर्शनमोहः काययोगी। द्वितीय औपशमिकक्षायिकपारिणामिकसान्निपातिकजीवभावो नाम उपशान्तवेदः क्षायिकसम्यग्दृष्टिर्भव्यः। तृतीय औपशमिकक्षायोपशमिकपारिणामिकसान्निपातिक-जीवभावो नामोपशान्तमानो मतिज्ञानी जीवः। चतुर्थः क्षायिकक्षायोपशमिकपारिणामिक-सान्निपातिकजीवभावो नाम क्षीणमोहः पञ्चेन्द्रियः भव्यः। त एते त्रिभावसंयोगभङ्गाः समुदिता दश।

चतुर्भावसंयोगेन पञ्च भङ्गा औदयिकादीनामेकैकत्यागात्। तत्रैक औपशमिकक्षा-यिकक्षायोपशमिकपारिणामिकसान्निपातिकजीवभावो नामोपशान्तलोभः क्षीणदर्शनमोहः पञ्चेन्द्रियो जीवः। द्वितीय औदयिकक्षायिकक्षायोपशमिकपारिणामिकसान्निपातिक-जीवभावो नाम मनुष्यः क्षीणकषायो मतिज्ञानी भव्यः। तृतीय औदयिकौपशमिकक्षा-योपशमिकपारिणामिकसान्निपातिकजीवभावो नाम मनुष्य उपशान्तवेदः श्रुतज्ञानी जीवः। चतुर्थ औदयिकौपशमिकक्षायिकपारिणामिकसान्निपातिकजीवभावो नाम मनुष्य उप-शान्तरागः क्षीणदर्शनमोहो जीवः। पञ्चम औदयिकौपशमिकक्षायिकक्षायोपशमिकसान्नि-पातिकजीवभावो नाम मनुष्य उपशान्तमोहः क्षायिकसम्यग्दृष्टिरवधिज्ञानी।

पञ्चभावसंयोगेनैकः औदयिकौपशमिकक्षायिकक्षायोपशमिकपारिणामिकसान्निपातिकजीवभावो नाम मनुष्य उपशान्तमोहः क्षायिकसम्यग्दृष्टिः पञ्चेन्द्रियो जीवः।

एवं षड्विंशतिविधः सान्निपातिकभावः।

षड्त्रिंशद्विध उच्यते - द्वयोरौदयिकयोः सन्निपातादौदयिकस्यौपशमिकादिभिः चतुर्भिरेकशः सन्निपातात् पञ्च भङ्गाः। तत्र प्रथम औदयिकौदयिकसान्निपातिकजीवभावो नाम मनुष्यः क्रोधी शान्तः। द्वितीय औदयिकौपशमिकसान्निपातिकजीवभावो नाम मनुष्यः उपशान्तक्रोधः। तृतीय औदयिकक्षायिकसान्निपातिकजीवभावो नाम मनुष्यः क्षीणकषायः। चतुर्थ औदयिकक्षायोपशमिकसान्निपातिकजीवभावो नाम क्रोधी मतिज्ञानी। पञ्चम औदयिकपारिणामिकसान्निपातिकजीवभावो नाम मनुष्यो भव्यः। द्वयोरौपशमिकयोः सन्निपातादौपशमिकस्यौदयिकादिभिश्चतुर्भिरेकशः सन्निपातात् पञ्च भङ्गाः। तत्रैक औपशमिकौपशमिकसान्निपातिकजीवभावो नामोपशमसम्यग्दृष्टिरुपशान्तकषायः। द्वितीय औपशमिकौदयिक-सान्निपातिकजीवभावो नामोपशान्तकषायो मनुष्यः। तृतीय औपशामिकक्षायिकसान्नि-पातिकजीवभावो नामोपशान्तक्रोधः क्षायिकसम्यग्दृष्टिः। चतुर्थ औपशमिकक्षायोपशमिक-सान्निपातिकजीवभावो नामोपशान्तकषायः अवधिज्ञानी। पञ्चम औपशमिकपारिणामिक-सान्निपातिकजीवभावो नामोपशान्तदर्शनमोहो जीवः। द्वयोः क्षायिकयोः सन्निपातात् क्षायिकस्य चौदयिकादिभिः चतुर्भिरेकशः सन्निपातात् पञ्च भङ्गाः। तत्रैकः क्षायिकक्षायिकसान्निपातिकजीवभावो नाम क्षायिकसम्यग्दृष्टिः क्षीणकषायः। द्वितीयः क्षायिकौदयिकसान्निपातिकजीवभावो नाम क्षीणकषायो मनुष्यः। तृतीयः क्षायिकौपशमिकसान्निपातिकजीवभावो नाम क्षायिकसम्यग्दृष्टिरुपशान्तवेदः। चतुर्थः क्षायिकपारिणामिकसान्निपातिकजीवभावो नाम क्षीणकषायो मतिज्ञानी। पञ्चमः क्षायिकपारिणामिक सान्निपातिकजीवभावो नाम क्षीणमोहो भव्यः। द्वयोः

क्षायोपशमिकयोः सन्निपातात् क्षायोपशमिकस्य चौदयिकादिभिश्चतुर्भिरेकशः सन्निपातात् पञ्च भङ्गाः। तत्रैकः क्षायोपशमिकक्षायोपशमिकसान्निपातिकजीवभावो नाम संयतोऽ- वधिज्ञानी। द्वितीयः क्षायोपशमिकौदयिकसान्निपातिकजीवभावो नाम संयतो मनुष्यः। तृतीयः क्षायोपशमिकौपशमिकसान्निपातिकजीवभावो नाम संयत उपशान्तकषायः। चतुर्थः क्षायोपशमिकक्षायिकसान्निपातिकजीवभावो नाम संयतासंयतः क्षायिक-सम्यग्दृष्टिः। पञ्चमः क्षायोपशमिकपारिणामिकसान्निपातिकजीवभावो नामाऽप्रमत्तसंयतो जीवः। द्वयोः पारिणामिकयोः सन्निपातात् पारिणामिकस्य चौदयिकादिभिः चतुर्भिरेकशः सन्निपातात् पञ्च भङ्गाः। तत्रैकः पारिणामिकपारिणामिकसान्निपातिकजीवभावो नाम जीवो भव्यः। द्वितीयः पारिणामिकौदयिकसान्निपातिकजीवभावो नाम जीवः क्रोधी। तृतीयः पारिणामिकौपशमिकसान्निपातिकजीवभावो नाम भव्य उपशान्तकषायः। चतुर्थः पारिणामिकक्षायिकसान्निपातिकजीवभावो नाम भव्यः क्षीणकषायः। पञ्चमः पारिणामिकक्षायोपशमिकसान्निपातिकजीवभावो नाम संयतो भव्यः। एते द्विभावसंयोगाः पञ्चविंशतिस्त्रिभावसंयोगभङ्गा दश पूर्वोक्ताः पञ्चभावसंयोगेन चैकः। एते सपिण्डिताः षट्त्रिंशत्।

पूर्वोत्पन्नचतुर्भावसंयोगात्पञ्चभङ्गक्षेपादेत एव षड्त्रिंशदेकचत्वारिंशद्भङ्गा भवन्ति। एवमादयोऽन्ये च विकल्पा नेतव्या आगमाविरोधेन।

**औपशमिकाद्यात्मतत्त्वानुपपत्तिः, अतद्भावादिति चेन्न; तत्परिणामात्॥२३॥**

स्यान्मतम् - य एत औपशमिकादयो भावा एतेषामात्मतत्त्वव्यपदेशो नोपपद्यते। कुतः? अतद्भावात्। सर्वे हि ते पौद्गलिकाः कर्मबन्धोदयनिर्जरापेक्षत्वादिति; तन्न; किं कारणम्? तत्परिणामात्। पुद्गलद्रव्यशक्तिविशेषवशीकृत आत्मा तद्रञ्जनः

संस्तन्निमित्तं यं यं परिणाममास्कन्दति यदा तदा तन्मयत्वात्तल्लक्षण एव भवति। उक्तं च –

"परिणमदि जेण दव्वं तक्कालं तम्मयंति पण्णत्तं।
तम्हा धम्मपरिणदो आदा धम्मो मुणेयव्वो॥" इति

स परिणामोऽन्यद्रव्यसाधारणत्वादात्मतत्त्वमित्याख्यायते।

**अमूर्तित्वादभिभवानुपपत्तिरिति चेन्न; तदवद्विशेषसामर्थ्योपलब्धेश्चैतन्यवत् ॥२४॥** अथ मतमेतत् - अमूर्तिरात्मा कर्मपुद्गलैर्नाभिभूयते ततस्तत्परिणामाभाव इति? तन्न; किं कारणम्? तदवद्विशेषसामर्थ्योपलब्धेः। सोऽस्याऽनादिकर्मबन्धसन्तानोऽस्तीति तद्वान्, तद्वतो विशेषसामर्थ्यं तद्वद्विशेषसामर्थ्यम्। कथम् ? चैतन्यवत्। यथाऽ-नादिपारिणामिकचैतन्यवशीकृत आत्मा तद्वान्, तस्य तद्वतश्चैतन्यवतः नारकादि-मत्यादिपर्यायविशेषवृत्तिरपि चेतना, तथाऽनादिकार्मणशरीराशक्तत्वात् कर्मवदात्मनो मूर्तिमत्त्वात् गत्यादिमत्यादिपर्यायविशेषसामर्थ्योपलब्धिरपि मूर्तिमतीति। एवं सति नामूर्तिरात्मा। किञ्च,

**अनेकान्तात् ॥२५॥** अनादिकर्मबन्धसन्तानपरतन्त्रस्यात्मनोऽमूर्तत्वं प्रत्यने-कान्तः - बन्धपर्यायं प्रत्येकत्वात् स्यान्मूर्त्तिः; तथापि ज्ञानादिस्वलक्षणापरित्यागात् स्यादमूर्त्तिः, इत्यादि पूर्ववत्। यस्यैकान्तेनाऽमूर्त्तिरेवात्मा भवेत् तस्यायं दोषो नार्हतस्य। किञ्च,

**सुराभिभवदर्शनात् ॥२६॥** मदमोहविभ्रमकरीं सुरां पीत्वा नष्टस्मृतिर्जनः काष्ठवद परिस्पन्द उपलभ्यते, तथा कर्मोदयाभिभवादात्माऽनाविर्भूतस्वलक्षणो मूर्त इति निश्चीयते।

**करणमोहकरं मद्यमिति चेन्न; तद्विविधकल्पनाया दोषोपपत्तेः॥२७॥**

स्यादाकूतम् - चक्षुरादीनां करणानां व्यामोहकारणं मद्यं पृथिव्यादिभूतप्रसादात्मकत्वादिन्द्रियाणां नात्मगुणस्याऽमूर्तित्वादिति; तन्न; किं कारणम्? तद्विविधकल्पनायां दोषोपपत्तेः। इदमिह संप्रधार्यम् - तानि करणानि चेतनानि वा स्युरचेतनानि वा? यद्यचेतनानि; अचेतनत्वात्तेषां न मदकरं मद्यम्। यदि स्यात्; प्रागेव स्वभाजनानां मदकरं स्यात्। अथ चेतनानि; पृथगनुपलब्धचैतन्यस्वभावानां पृथिव्यादीनां चेतनाद्रव्यसंबन्धत्वादेव चैतन्य-व्यपदेश इत्यात्मगुणस्यैव मोहकरत्वं सिद्धम्।

अथ मतमेतत् - पृथिव्यादीनामेव संयोगविशेषे सति पिष्टकिण्वोदकादिसमाहारे मदशक्तिव्यक्तिवत् सुखदुःखाद्यभिव्यक्तिरिति; नैतद्युक्तम्; रूपादिवैधर्म्यात्। रूपादयो हि पृथिव्यादिगुणाः सन्तो विभक्तेष्वविभक्तेषु च क्रमेणैव हानिमास्कन्दन्ति। न च तथा शरीरावयवेषु विभक्तेष्वविभक्तेषु च सुखादीनां क्रमेणैव हानि; युगपच्चोपलभ्यते, तस्मान्न पृथिव्यादिगुणाः।

किञ्च, यदि पृथिव्यादिगुणाः सुखादयो शवशरीरावस्थायामप्युपलभ्यरेन् रूपादिवत्। सूक्ष्मभूतापगमान्नोपलब्धिरिति चेत्; भूयसां स्थूलानां संभवात् तदुपलब्धिः स्यात्।

किञ्च, तदपाये तदनुपलब्धेस्तेषामेव ते गुणा इति; समुदायधर्मत्वाभावात् मद्यदृष्टान्तायुक्तिः।

किञ्च, भूतसूक्ष्मास्तित्वसिद्धिवदात्मसिद्धिरपि स्यात्।

अथवा, तान्यन्तःकरणानि वा स्युः, बहिःकरणानि वा? यदि बहिःकरणानि; तेषामचेतनत्वात् व्यामोहाभावः। अथान्तःकरणानि; तेषामपि चेतनत्वमचेतनत्वं वा

स्यात्? अचेतनत्वे पूर्ववन्मोहाभावः। चेतनत्वे विज्ञानरूपत्वाद् व्यामोहो युक्तः, न युक्तम् - 'अमूर्तत्वादभिभवाभावः' इति।

यद्येवं कर्मोदयमद्यावेशवशीकृतस्य तस्यास्तित्वं दुरुपलक्ष्यम्? नैष दोषः; तदावेशेऽपि स्वलक्षणत्वेनोपलब्धिर्भवति। उक्तञ्च –

यद्येवं कर्मोदयमद्यावेशवशीकृतस्य तस्यास्तित्वं दुरुपलक्ष्यम्? नैष दोषः; तदावेशेऽपि स्वलक्षणत्वेनोपलब्धिर्भवति। उक्तञ्च –

"बंधं पडि एयत्तं लक्खणदो होदि तस्स णाणत्तं।
तम्हा अमुत्तिभावो णेयंतो होदि जीवस्स॥"

यद्येवं तदेव तावदुच्यतां लक्षणं यत्सन्निधानाद् बन्धपरिणामं प्रत्यविवेकेऽपि सति विभागोऽवगृह्यते जीवस्येति? अत आह –

## उपयोगो लक्षणम् ॥८॥

उपयोग इत्युच्यते। क उपयोगो नाम?

**बाह्याभ्यन्तरहेतुद्वयसन्निधाने यथासंभवमुपलब्धुश्चैतन्यानुविधायी परिणाम उपयोगः॥१॥** द्विविधो हेतुर्बाह्य आभ्यन्तरश्च। द्वाववयवौ यस्य स द्वयः। ननु च स्वरूपनिर्देशादेव द्वित्वप्रतीतेर्द्वयवचनमनर्थकम्; नानर्थकम्; प्रत्येकं द्वैविध्यसंप्रत्ययार्थम्- बाह्यो संबन्धमापन्नविशिष्टनामकर्मोपात्तपरिच्छिन्नस्थानपरिमाणनिर्माणश्चक्षुरादिकरणग्राम आत्मभूतः। प्रदीपादिरनात्मभूतः। आभ्यन्तरश्च द्विविधः - अनात्मभूत आत्मभूतश्चेति। तत्र मनोवाक्कायवर्गणालक्षणो द्रव्ययोगः चिन्ताद्यालम्बनभूतोऽन्तराभिनिविष्टत्वा-दाभ्यन्तर इति व्यपदिश्यमान आत्मनोऽन्यत्वादनात्मभूत इत्यभिधीयते। तन्निमित्तो

भावयोगो वीर्यान्तरायज्ञानदर्शनावरणक्षयक्षयोपशमनिमित्त आत्मनः प्रसादश्चात्मभूत इत्याख्यामर्हति। तस्यैतस्य हेतुविकल्पस्य यथासंभवमुपलब्धुः सन्निधानं भवति। तद्यथा – प्रदीपादेस्तावत् केषाञ्चित् सन्निधानं तेन विना चक्षुरादिविज्ञानाप्रवृत्तेः केषाञ्चित्तु द्वीपिमार्जारादीनां तमन्तरेणाप्युपलब्धेरनियमः। चक्षुरादीनामपि पञ्चेन्द्रियविकलेन्द्रियै-केन्द्रियविषयत्वेन सन्निधानाऽसन्निधानं प्रत्यनियमः। अन्तःकरणमप्यसंज्ञिनां मनोवर्जितम्, संज्ञिनां त्रितयम्, एकेन्द्रियाणां विग्रहगतिमुपगतानां समुद्घातगतानां च सयोगकेवलिनामेक एव काययोग; भावयोगश्च तत्कृतः, तच्च तत्र नियतः क्षयोपशमश्चाऽऽक्षीणकषायात्। अत ऊर्ध्वं क्षय इत्येवं यथासंभवं सन्निधाने सति चैतन्यमात्मनः स्वभावोऽनादिः तमनुविदधातीत्येवंशीलश्चैतन्यानुविधायी सुवर्णस्वभावानुविधायी कटकाङ्गदकुण्डलादिविकारवत्। स एवं प्रकार आत्मनः परिणाम उपयोग इत्युपदिश्यते।

अत्र कश्चिदाह - चैतन्यं सुखदुःखमोहरूपं तदनुविधायिना परिणामेन सुखदुःख क्रोधादिना भवितव्यम्, उत्तरत्र च उपयोगप्रकारा ज्ञानदर्शनविकारा वक्ष्यन्ते, तदिदं पूर्वापरविरुद्धमालक्ष्यत इति; नैष दोषः; चैतन्यं नामात्मधर्मः सामान्यभूतः, यस्याऽसन्निधानादितरेषु द्रव्येषु जीवव्यपदेशो नास्ति, यद्भेदाश्चैते ज्ञानदर्शनादयः, तेषां समुदाये वर्तमानश्चैतन्यशब्दः क्वचिदवयवेऽपि सुखादौ वर्तते – "समुदायेषु हि प्रवृत्ताः शब्दा अवयवेष्वपि वर्तन्ते" इति। इह पुनः समुदाय एव वर्तमानः परिगृहीत; उत्तरत्र च तद्भेदा ज्ञानदर्शनविकारा वक्ष्यन्ते इति नास्ति विरोधः। अथ किं लक्षणम्?

**परस्परव्यतिकरे सति येनान्यत्वं लक्ष्यते तल्लक्षणम्॥२॥** बन्धपरिणामानुविधानात् परस्परप्रदेशानुप्रवेशाद् व्यतिकीर्णस्वभावत्वेऽपि सत्यन्यत्वप्रत्तिपत्तिकारणं लक्षणमिति समाख्यायते। यथा सुवर्णरजतयोः सत्यपि बन्धं प्रत्येकत्वे वर्णप्रमाणादिस-

साधारणो धर्मः अजहदुपलभ्यते उत्तरकालं सति विवेके तद्दर्शनात् तथा पुद्गलद्रव्येण बन्धं प्रत्यविभागेऽपि विभागहेतुः ज्ञानादिरुपयोगो लक्षणं भवति।

**तल्लक्षणं द्विविधम् - आत्मभूताऽनात्मभूतभेदात्तदुष्णदण्डवत् ॥३॥** तदेतल्लक्षणं द्विविधमात्मभूतमनात्मभूतञ्चेति। तत्र आत्मभूतमग्नेरौष्ण्यम्, अनात्मभूतं देवदत्तस्य दण्डः। इहात्मभूतं लक्षणमुपयोगः।

**गुणगुणिनोरन्यत्वमिति चेन्न; उक्तत्वात् ॥४॥** स्यादेतत् - औष्ण्यं गुणोऽग्निर्गुणी तथा च आत्मा गुणी ज्ञानादिर्गुण इति। तयोश्च लक्षणभेदादन्यत्वमिति; तन्न; किं कारणम्? उक्तत्वात्। उक्तमेतत्– 'अतत्स्वाभाव्येऽनवधारणप्रसङ्गोऽग्निवत्' इत्यादि।

**लक्ष्यलक्षणभेदादिति चेन्न; अनवस्थानात् ॥५॥** अथ मतमेतत्–लक्ष्यो गुणी गुणो लक्षणम्, लक्ष्याच्च लक्षणेनार्थान्तरभूतेन भवितव्यमित्यतोऽनयोरन्यत्वमिति; तन्न; किं कारणम्? अनवस्थानात्। येन लक्षणेन लक्ष्यं लक्ष्यते तत् सलक्षणमलक्षणं वा ? यदि तदलक्षणम्; मण्डूकशिखण्डवदभावमापद्येत। असति च तस्मिन् लक्ष्यानवधारणम्। अथ सल्लक्षणम्; तदपि ततोऽन्यत्, तदपि ततोऽन्यदित्यनवस्था स्यात्। किञ्च,

**आदेशवचनात् ॥६॥** लक्ष्यलक्षणयोरव्यतिरेकात् स्यादेकत्वम् संज्ञादिभेदत्वाच्च स्यान्नानात्वम्' इत्यादेशवचनादेकान्तदोषानुषङ्गाभावः। कश्चिदाह –

**नोपयोगलक्षणो जीवस्तदात्मकत्वात् ॥७॥** इह लोके यद्यदात्मकं न तत्तेनोपयुज्यते तथा क्षीरं क्षीरात्मकं न तत्तेनैवात्मनोपयुज्यते। एवमात्मनोऽपि ज्ञानाद्यात्मकत्वान्न तेनैवोपयोग इति जीवस्योपयोगाभावः। कुतश्च।

**विपर्ययप्रसङ्गात् ॥८॥** सति चानन्यत्वे उपयोगमिच्छतोऽनिच्छतश्च कस्यचिद्विपर्ययः प्राप्नोति। कथम्? अविपर्ययवत्। तद्यथा'जीव एव ज्ञानादनन्यत्वे सति ज्ञाना-

त्मनोपयुज्यते' इति मन्यसे न क्षीरादयः क्षीराद्यात्मभिः; एवं क्षीरादय एव क्षीराद्यात्मभिः परिणमेयुः, न तु जीवो ज्ञानात्मनोपयुज्यते। अनिष्टं चैतत्।

**न; अतस्तत्सिद्धेः॥९॥** नैतद्युक्तम्। कुत? अतस्तत्सिद्धेः। यत एवानन्यत्वमत एवोपयोगः सिद्धः। न ह्यत्यन्तमन्यत्वे उपयोगः सिद्ध्यति आकाशस्य रूपाद्युपयोगाभा-ववत्। ननु चोक्तम्'यथा क्षीरं क्षीरात्मकं न तत्तेनात्मनोपयुज्यते' इति; न; अतस्तत्सिद्धेरित्येव। यथा तृणजलादिकारणवशात् क्षीरभावावाप्तिं प्रत्यभिमुखं क्षीरं क्षीरव्यपदेशभाक् तच्छक्त्यव्यतिरेकात् 'क्षीरात्मना परिणमति' इत्युच्यते, तथा आत्मापि ज्ञानादिस्वभावशक्तिप्रत्ययवशात् घटपटाद्याकारावग्रहरूपेण परिणमतीत्युपयोगः सिद्धः। इतरथा ह्यतद्भावे तद्भावाऽभावादुपयोगाभावः स्यात्। किञ्च

**उभयथापि त्वद्वचनासिद्धेः॥१०॥** अनेकान्तवादप्रवणमार्हन्त्यन्यायमविज्ञाय यदुपा-दिक्षत् भवान्'यद्यदात्मकं न तस्य तेनैव परिणामः' इति; नन्वेवमुभयथापि त्वदीयस्य वचसोऽसिद्धिः। तद्यथा - तदात्मकानुपयोगवादिनः स्ववचसः स्वपरपक्षसाधनदूषणा-त्मकस्य स्वपक्षपरपक्षयोः साधकत्वदूषकत्वापरिणामात् यत्रोपदिष्टः तत्रासाधकस्तेऽयं हेतुः। यथा क्षीरस्य दधित्वेन परिणाम इष्यते न क्षीरत्वेनैव, तथैव त्वद्वचसः स्वपक्षसाधनात्मकस्य तेनैवापरिणामाद् दूषकत्वेन परिणाम एषितव्यो न साधकत्वेन। अस्यैव च परपक्षदूषकात्मस्य तेनैवापरिणामात्साधकत्वेन परिणाम एषितव्यो न दूषकत्वेनातः 'तदात्मकत्वेऽनुपयोगात्' इति त्वद्वचनासिद्धिः। अथ त्वद्वचनं स्वपर-पक्षसाधकदूषकात्मकमपि सत् स्वपरपक्षयोः साधकदूषकपर्यायाभ्यां परिणमति; नन्वेवमपि यदवोचद्भवान्–'तदात्मकत्वेऽनुपयोगान्न तस्य तेनैव परिणामः' इति; तदसत्। किञ्च

**स्वसमयविरोधात् ॥११॥** यदि 'यद्यदात्मकं न तत्तेनैव परिणमति' इतीष्टं वः। ननु पृथिव्यप्तेजोवायुमहाभूतानां रूपाद्यात्मकत्वात् रूपाद्यात्मनाविपरिणामः स्यात्। इष्यते च शुक्लादिरूपादिविशेषपरिणामः। अतः स्वसमयविरोधः। किञ्च,

**केनचिद्विज्ञानात्मकत्वात् ॥१२॥** यस्यैकान्तेन ज्ञानात्मक आत्मा स्यात्, तस्य ज्ञानात्मना परिणामाभावः परिणतत्वात्। आर्हतस्य तु केनचिद्विज्ञानात्मकः तत्पर्यायादेशात्, केनचिदन्यात्मक इतरपर्यायादेशादिति कथञ्चित्तदात्मकत्वात् केनचिदतदात्मकत्वात् परिणामसिद्धिः। यदि चैकान्तेन ज्ञानात्मक एव स्यादितरात्मक एव वा, तद्भावाविरामः स्यात्। विरामे चात्मनोऽपि विरामः प्रसक्तः। किञ्च,

**तदात्मकस्य तेनैव परिणामदर्शनात् क्षीरवत् ॥१३॥** यथा क्षीरं द्रवमधुरादिक्षीरस्वभावमजहद् गुडादिद्रव्यसंबन्धाद् गुडक्षीरादिपरिणामान्तरमास्कन्दति, गवादेः स्तनान्तरनिर्गतमात्रं चोष्णं पुनः शीतं भवति, पुनश्चाग्निद्रव्यसंबन्धादुष्णं घनं च भवति, तदभावे च शीतमिति क्षीरजातिमजहदुष्णक्षीरादिव्यपदेशभागिति क्षीरं क्षीरात्मनैव परिणतम्। यदि क्षीरं क्षीरात्मना न परिणमेत्; तत्र तत्र क्षीरव्यपदेशाभावः स्यात्। तथोपयोगात्मक आत्मा उपयोगस्वभावमजहज्ज्ञानाद्यात्मना परिणाममियर्तीति नास्ति विरोधः।

**अतश्चैतदेवं यदि हि न स्यात्; निःपरिणामत्वप्रसङ्गोऽर्थस्वभावसंकरो वा ॥१४॥** यदि यद्यदात्मकं तस्य तेनापरिणामः स्यात्; भावानां निष्परिणामत्वप्रसङ्गः। ततश्च सर्वथा नित्यत्वे क्रियाकारकव्यवहारलोपः स्यात्। परिणामवत्त्वे च परात्मना परिणामात् सर्वपदार्थस्व-भावसंकरप्रसङ्गः स्यात्। अथैतदुभयं नेष्यते; सिद्धः स्वेनात्मना परिणामः। कश्चिदाह –

**उपयोगस्य लक्षणत्वानुपपत्तिर्लक्ष्याभावात् ॥१५॥** इह लोके सतो लक्ष्यस्य लक्षणं भवति यथा सतो देवदत्तस्य दण्डादिः। न चासतः शशविषाणादेः किञ्चिल्लक्षणमस्ति।

तथा स एवात्मा लक्ष्यो दुरुपपादः। तदभावात् कुत उपयोगस्य लक्षणत्वमिति? तत्कथमिति चेत्? उच्यते –

**तदभावश्चाकारणत्वादिभिः॥१६॥** तस्य लक्ष्यस्यात्मनोऽभावः। कुतः? अकारण-त्वादेः मण्डूकशिखण्डवत्।

**सत्यपि लक्षणत्वानुपपत्तिरनवस्थानात्॥१७॥** सत्यप्यात्मनि लक्ष्ये उपयोगस्य लक्षणत्वं नोपपद्यते। कुतः? अनवस्थानात्। उपयोगो हि ज्ञानदर्शनस्वभावः, स चानवस्थितः क्षणिकत्वात्। न चानवस्थितं लक्षणं भवति। तदपाये तदनुपलब्धेः; यथा 'कतरद्देवदत्तस्य गृहम्? अधो यत्रासौ काकः' इत्युत्पतिते काके नष्टं तद्गृहं भवति तथा ज्ञानादिलक्षणस्यात्मनस्तदभावेऽभावः प्राप्नोतीति। अत्रोच्यते-

**आत्मनिह्नवो न युक्तः साधनदोषदर्शनात्॥१८॥** इहात्मनो निह्नवो न युक्तः। कुतः? साधनदोषदर्शनात्। यत्तावदुक्तम्–'नास्त्यात्मा अकारणत्वात् मण्डूकशिखण्डवत्' इति; हेतुरयमसिद्धो विरुद्धोऽनैकान्तिकश्च। कारणवानेवात्मा इति निश्चयो नः, नरकादिभवव्यतिरिक्तद्रव्यार्थाभावात्, तस्य च मिथ्यादर्शनादिकारणत्वादसिद्धता। अत एव द्रव्यार्थाभावात् पर्यायस्य च पर्यायान्तरानाश्रयत्वदाश्रयाभावादप्यसिद्धता। अकारणमेव ह्यस्ति सर्वं घटादि, तेनायं द्रव्यार्थिकस्य विरुद्ध एव। सतोऽकारणत्वात्, यदस्ति तन्नियमेनैवाकारणम्, न हि किञ्चिदस्ति च कारणवच्च। यदि तदस्त्येव किमस्य कारणेन नित्यनिर्वृत्तत्वात्? कारणत्त्वं चासत एव कार्यार्थत्वात् कारणस्येति विरुद्धार्थता। मण्डूकशिखण्डकादीनामसत्प्रत्ययहेतुत्वेन परिच्छिन्नसत्त्वानामभ्युपगमात्तेषां च कारणा-भावादुभयपक्षवृत्तेरनैकान्तिकत्वम्।

दृष्टान्तोऽपि साध्यसाधनोभयधर्मविकलः। कर्मावेशवशात् नानाजातिसंबन्धमा पन्नवतो जीवतो जीवस्य मण्डूकभवावाप्तौ तद्व्यपदेशभाजः पुनर्युवतिजन्मन्यवाप्ते 'यः

शिखण्डकः स एवायम्' इत्येकजीवसंबन्धित्वात् मण्डूकशिखण्ड इत्यस्ति। पुद्गलद्रव्य स्याप्यनाद्यनन्तपरिणामस्य युवतिभुक्ताहारादिकेशभावपरिणामाच्छिखण्डनिष्पत्तेः कारण-त्वमिति नास्तित्वाकारणत्वधर्माभावात्। एवं वन्ध्यापुत्र शशविषाणादिष्वपि योज्यम्।

आकाशकुसुमे कथम्? तत्रापि यथा वनस्पतिनामकर्मोदयापादितविशेषस्य वृक्षस्य जीवपुद्गलसमुदायस्य पुष्पमिति व्यपदिश्यते, अन्यदपि पुद्गलद्रव्यं पुष्पभावेन परिणतं तेन व्याप्तत्वात्, एवमाकाशेनापि व्याप्तत्वं समानमिति तत्तस्यापीति व्यपदेशो युक्तः। अथ तत्कृतोपकारापेक्षया तस्येत्युच्यते; आकाशकृतावगाहनोपकारापेक्षया कथं तस्य न स्यात्? वृक्षात् प्रच्युतमप्याकाशान्न प्रच्यवते इति नित्यं तत्संबन्धि। अथ अर्थान्तरभावात्तस्य न स्यादिति मतम्; वृक्षस्यापि न स्यात्। सर्वत्रैवात्र नामाद्यपेक्षया संबन्धो योजयितव्यः। बहिरङ्गार्थाकारपरिणतविज्ञानविषयत्वापेक्षया वा दोषोद्भावन-मूहितव्यम्।

यदप्युच्यते – नास्त्यात्माऽप्रत्यक्षत्वाच्छशशृङ्गवदिति; अयमपि न हेतुर-सिद्धविरुद्धानैकान्तिकत्वाऽप्रच्युतेः। सकलविषयकेवलज्ञानप्रत्यक्षत्वाच्छुद्धात्मा प्रत्यक्षः, कर्मनोकर्मबन्धपरतन्त्रपिण्डात्मा चावधिमनःपर्ययज्ञानयोरपि प्रत्यक्ष इति 'अप्रत्यक्ष-त्वात्' इत्यसिद्धो हेतुः। इन्द्रियप्रत्यक्षत्वाभावादप्रत्यक्ष इति चेन्न; तस्य परोक्षत्वाभ्युपगमात्। अप्रत्यक्षा घटादयोऽग्राहकनिमित्तग्राह्यत्वाद् धूमाद्यनुमिताग्निवत्। अग्राहकमिन्द्रियं तद्विगमेऽपि गृहीतस्मरणात् गवाक्षवत्। किञ्च, प्रत्यक्षादन्योऽप्रत्यक्ष इति पर्युदासो वा स्यात्, प्रत्यक्षो न भवतीत्यप्रत्यक्ष इति प्रसज्यप्रतिषेधो वा? यदि पर्युदासः; अन्यत्वस्य द्विष्ठत्वाद्वस्तुत्वसिद्धेः नास्तित्वविरोध्यस्तित्वसाधनाद्विरुद्धः। अथ प्रसज्यप्रतिषेधः; सति प्रतिषेध्ये प्रतिषेधसिद्धेः विधिविषयसिद्धिरिति कथञ्चित् प्रत्यक्षत्वोपपत्तेः पुनरप्यसिद्धता। असति

च शशशृङ्गादौ सति च विज्ञानादा- वप्रत्यक्षत्वस्य वृत्तेरनैकान्तिकता। अथ विज्ञानादेः स्वसंवेद्यत्वात् योगिप्रत्यक्षत्वाच्च हेतोरभाव इति चेदात्मनि कोऽपरितोषः? दृष्टान्तोऽपि साध्यसाधनोभयधर्मविकलः पूर्वोक्तेन विधिनाऽप्रत्यक्षत्वस्य नास्तित्वस्य चासिद्धेः।

किञ्च, सर्वस्य वागर्थस्य विधिप्रतिषेधात्मकत्वात्, न हि किञ्चिद्वस्तु सर्वनिषेधगम्यमस्ति। अस्ति त्वेतदुभयात्मकम्, यथा कुरवका रक्तश्वेतव्युदासेऽपि नाऽवर्णा भवन्ति नापि रक्ता एव श्वेता एव वा प्रतिषिद्धत्वात्। एवं वस्त्वपि परात्मना नास्तीति प्रतिषेधेऽपि स्वात्मनाऽस्तीति सिद्धम्। तथा चोक्तम्—

"अस्तित्वमुपलब्धिश्च कथञ्चिदसतः स्मृते।
नास्तितानुपलब्धिश्च कथञ्चित्सत एव ते॥१॥
सर्वथैव सतो नेमौ धर्मौ सर्वात्मदोषतः।
सर्वथैवाऽसतो नेमौ वाचां गोचरताऽत्ययात्॥२॥" इति।

नास्तित्वाप्रत्यक्षत्वाभ्यामपि रहितं तदवस्त्विति धर्म्यसिद्धिश्च। एवमन्येऽपि हेतव एकान्तवादिभिरुपनीता दोषवत्तयोत्प्रेक्ष्याः। तदस्तित्वं च साध्यते-

**ग्रहणविज्ञानासंभविफलदर्शनाद् गृहीतृसिद्धिः॥९॥** यान्यमूनि ग्रहणानि पूर्वकृत-कर्मनिर्वर्तितानि हिरुक्कृतस्वभावसामर्थ्यजनितभेदानि रूपरसगन्धस्पर्शशब्दग्राहकाणि चक्षूरसनघ्राणत्वक् श्रोत्राणि। यानि च ज्ञानानि तत्सन्निकर्षजानि तानि, तेष्वसंभवि-फलमुपलभ्यते। किं पुनस्तत्? आत्मस्वभावस्थानज्ञानविषयसम्प्रतिपत्तिः। तदेतद् ग्रहणानां तावन्न संभवति; अचेतनत्वात् क्षणिकत्वाच्च। विज्ञानानां च न संभवति, एकार्थग्राहित्वादुत्पत्त्यनन्तरनिरोधाच्च। दृश्यते चेदम्। अकस्माच्च न भवतीति तत्प्रत्तिपत्तिपतिना ततो व्यतिरिक्तेन केनचिद्भवितव्यमिति गृहीतृसिद्धिः। किञ्च,

**अस्मदात्मास्तित्वप्रत्ययस्य सर्वविकल्पेष्विष्टसिद्धेः॥२०॥** योऽयमस्माकम् 'आत्माऽस्ति' इति प्रत्ययः स संशयानध्यवसायविपर्ययसम्यक्प्रत्ययेषु यः कश्चित् स्यात्, सर्वेषु च विकल्पेष्विष्टं सिध्यति। न तावत्संशयः; निर्णयात्मकत्वात्। सत्यपि संशये तदालम्बनात्मसिद्धिः। न ह्यवस्तुविषयः संशयो भवति। नाप्यनध्यवसायो जात्यन्धबधिररूपशब्दवदनादिसंप्रतिपत्तेः। स्याद्विपर्ययः; एवमप्यात्मास्तित्वसिद्धिः पुरुषे स्थाणुप्रतिपत्तौ स्थाणुसिद्धिवत्। स्यात्सम्यक्प्रत्ययः; अविवादमेतदात्मास्तित्वमिति सिद्धो नः पक्षः।

**सन्तानादिति चेन्न; तस्य संवृतिसत्त्वात्, द्रव्यसत्त्वे वा संज्ञाभेदमात्रम्॥२१॥** स्यान्मतम्–सन्तानो नाम कश्चिदर्थोऽस्ति एकोऽनेकक्षणवृत्तिः; तदाश्रयं ग्रहणविज्ञानात्म-स्वभावस्थानादिसंप्रतिपादनमिति; तन्न; किं कारणम्? तस्य संवृतिसत्त्वात्। स हि सन्तानः संवृतिः सन्, तस्मिन्नसति कल्पितात्मनि कथं स्यात्तद्विशेषप्रत्ययः? अथ द्रव्यसत्त्वमस्यावसीयते; संज्ञाभेदमात्रम् – आत्मा सन्तान इति नार्थविप्रतिपत्तिः।

यदप्युक्तम्-'सत्यपि लक्षणत्वानुपपत्तिरनवस्थानात्' इति, कथञ्चिदवस्थाना-दुपयोगस्य लक्षणत्वोपपत्तिः। न हि सर्वथा विनाशोऽवस्थानं वोपयोगस्याभ्युपगम्यते। किं तर्हि? कथञ्चिद्विनाशः कथञ्चिदवस्थानं च। पर्यायार्थादेशात् सतोऽर्थस्यानु पलब्धेर्विनाशो द्रव्यार्थादेशादवस्थानमित्यसकृत्परीक्षितमेतत्। तस्मादुपयोगस्य लक्षण्य त्वमुपपद्यते।

**तदुपरमाभावाच्च॥२२॥** कस्यचिदुपयोगस्य उत्पादः कस्यचिद् विनाशः इत्युपयोगपरम्परा नोपरमतीति तस्य लक्षणत्वमवसेयम्।

**सर्वथा विनाशे पुनरनुस्मरणाभावः॥२३॥** यदि सर्वथोपयोगस्य विनाशः स्याद-नुस्मरणं न स्यात्। अनुस्मरणं हीदं स्वयमनुभूतस्यार्थस्य दृष्टं नाननुभूतस्य नान्येनानुभूतस्य। तदभावात्तन्मूलः सर्वलोकसंव्यवहारो विनाशमुपगच्छेत्।

**उपयोगसंबन्धो लक्षणमिति चेन्न; अन्यत्वे संबन्धाभावात् ॥२३॥** स्यान्मतम् - उपयोगो लक्षणमात्मनो नोपपद्यते। कुतः? अन्यत्वात्। किं तर्हि? तत्संबन्धो लक्षणम्। यथा देवदत्तस्य न दण्डो लक्षणम्, किं तर्हि? संबन्धः। यदि हि दण्डो लक्षणम-संसक्तोऽपि लक्षणं स्यात्, एवं च कृत्वोक्तम्- ''क्रियावद्गुणवत्समवायिकारणं द्रव्य-लक्षणम्'' इति; तन्न; किं कारणम्? अन्यत्वे संबन्धाभावात्। द्रव्याद् गुणोऽर्थान्तरभूतो यदि स्यात्; तस्य संबन्धाभाव इत्युक्तं पुरस्तात्। तस्मादात्मभूतउपयोगो लक्षणमिति न कश्चिद्दोषः।

य उक्त उपयोगस्तद्भेददर्शनार्थमाह –

## स द्विविधोऽष्टचतुर्भेदः॥६॥

कथं द्विविधः?

**साकारानाकारभेदाद् द्विविधः॥१॥** साकार उपयोगोऽनाकार उपयोगश्चेति द्विविधः। साकारं ज्ञानमनाकारं दर्शनम्।

**अभ्यर्हितत्वाज्ज्ञानग्रहणमादौ॥२॥** ज्ञानं ह्यभ्यर्हितमर्थानां विभावकत्वात्, दर्शनमालोचनमात्रमतस्तस्मात् पूर्वकालभाविनोऽपि दर्शनाज्ज्ञानं प्राग्गृह्यते। कथं पुनर्ज्ञायते ज्ञानग्रहणमादौ क्रियते इति?

**संख्याविशेषनिर्देशात्तन्निश्चयः॥३॥** यतः संख्याविशेषनिर्देशः क्रियते-'अष्टभेद-श्चतुर्भेदः' इति, ततस्तस्य निश्चयो वेदितव्यः। ननु च चतुःशब्दस्य पूर्वनिपातेन

भवितव्यम् "**संख्याया अल्पीयस्याः**" इति वचनात्, यथा चतुर्दशेति; नैष दोषः; उक्तमेतत्- 'अभ्यर्हितत्वात् पूर्वनिपातः इति।

तत्र ज्ञानोपयोगोऽष्टविधः – मतिज्ञानं श्रुतज्ञानमवधिज्ञानं मनःपर्ययज्ञानं केवलज्ञानं मत्यज्ञानं श्रुताऽज्ञानं विभङ्गज्ञानं चेति। दर्शनोपयोगश्चतुर्विधः – चक्षुर्दर्शनमचक्षुर्दर्शनमवधिदर्शनं केवलदर्शनं चेति। एषां च लक्षणादीनि व्याख्यातानि। अवग्रहान्नान्यत् दर्शनमिति चेत् व्याख्यातमन्यत्वम्। छद्मस्थेषु तयोः क्रमेण वृत्तिः निरावरणेषु युगपत्।

यथोक्तेनानेनाहितपरिणामेन सर्वात्मसाधारणेनोपयोगेन ये उपलक्षिता उपयोगिनः ते द्विविधाः-

## संसारिणो मुक्ताश्च॥१०॥

**आत्मोपचितकर्मवशादात्मनो भवान्तरावाप्तिः संसारः॥१॥** आत्मनोपचितं कर्माष्ट-विधं प्रकृतिस्थित्यनुभागप्रदेशबन्धभेदभिन्नम्, तद्वशादात्मनो भवान्तरावाप्तिः संसार त्युच्यते। द्विरात्मग्रहणं किमर्थम्? 'आत्मैव कर्मणः कर्ता, तत्फलस्य चात्मैव भोक्ता' इत्येतस्य प्रदर्शनार्थम्। अन्ये तु 'त्रैगुण्यं कर्तृ, परमात्मा भोक्ता' इति मन्यन्ते; तदयुक्तम्; अचेतनस्य पुण्यपापविषयकर्तृतानुपपत्तेर्घटादिवत्। परकृतफलभोगे चानि-र्मोक्षप्रसङ्गः स्यात् कृतप्रणाशश्चेति। तस्माद्यः कर्ता स एव भोक्तेति युक्तम्।

संसारः पञ्चविधः द्रव्यतः क्षेत्रतः कालतो भावतो भवतश्चेति। स येषामस्ति ते संसारिणः।

**निरस्तद्रव्यभावबन्धा मुक्ताः॥2॥** बन्धो द्विविधो द्रव्यबन्धो भावबन्धश्चेति। तत्र द्रव्यबन्धः कर्मनोकर्मपरिणतः पुद्गलद्रव्यविषयः। तत्कृतः क्रोधादिपरिणामवशीकृतो भाव-बन्धः। स उभयोऽपि निरस्तो यैः ते मुक्ताः।

**द्वन्द्वनिर्देशो लघुत्वादिति चेन्न; अर्थान्तरप्रतीतेः॥३॥** स्यान्मतम् – द्वन्द्व-निर्देशोऽत्र युक्तः। कुतः? लघुत्वात्, द्वन्द्वे हि सत्युक्तार्थत्वाच्चशब्दाप्रयोगे लाघवं भवति इति; तन्न; किं कारणम्? अर्थान्तरप्रतीतेः। संसारिणश्च मुक्ताश्चेति द्वन्द्वे सति अल्पाच्तरत्वादभ्यर्हितत्वाच्च मुक्तशब्दस्य पूर्वनिपाते सति मुक्तसंसारिण इति प्राप्नोति, तथा च सत्यर्थान्तरं प्रतीयेत – मुक्तः संसारो येन भावेन स मुक्तसंसारस्तद्वन्तः मुक्तसंसारिण इति। तथा सति मुक्तानामेवोपयोगित्वमुक्तं स्यान्न संसारिणामतो वाक्यमेव क्रियते।

**समुच्चयाभिव्यक्त्यर्थं चशब्दोऽनर्थक इति चेन्न; उपयोगस्य गुणभाव-प्रदर्शनार्थत्वात् ॥४॥** स्यान्मतम्–चशब्दोऽनर्थकः। कुतः? अर्थभेदात् समुच्चयसिद्धेः। भिन्ना हि संसारिणो मुक्ताश्च ततो विशेषणविशेष्यत्वानुपपत्तेः समुच्चयः सिद्धः यथा "पृथिव्यापस्तेजोवायुः" इति; तन्न; किं कारणम्? उपयोगस्य गुणभावप्रदर्शनार्थत्वात्। नायं चशब्दः समुच्चये, क्व तर्हि? अन्वाचये। तत्र ह्येकः प्रधानभूतः इतरो गुणभूतः यथा 'भैक्षं चर देवदत्तं चानय' इति प्रधानशिष्टं भैक्षचरणं देवदत्तानयनमप्रधानशिष्टम्। तथा संसारिणः प्राधान्येनोपयोगिनो मुक्ता गुणभावेनेत्येतस्य प्रदर्शनार्थः। कथं संसारिषु मुख्य उपयोगः कथं वा मुक्तेषु गौणः?

**परिणामान्तरसंक्रमाभावाद् ध्यानवत् ॥५॥** यथैकाग्रचिन्तानिरोधो ध्यानमिति छद्मस्थे ध्यानशब्दार्थो मुख्यश्चिन्ताविक्षेपवतः तन्निरोधोपपत्तेः, तदभावात् केवलिन्यु-पचरितः फलदर्शनात्, तथोपयोगशब्दार्थोऽपि संसारिषु मुख्यः परिणामान्तरसंक्रमात्, मुक्तेषु तदभावाद् गौणः कल्प्यते उपलब्धिसामान्यात्।

**संसारिग्रहणमादौ बहुविकल्पत्वात् तत्पूर्कत्वात् स्वसंवेद्यत्वाच्च॥६॥** संसारि-ग्रहणमादौ क्रियते बहुविकल्पत्वात् बहवो हि संसारिणां विकल्पा गत्यादयः। किञ्च, तत्पूर्वकत्वात्। संसारिपूर्वका हि मुक्ताः न मुक्तपूर्वाः संसारिण इति। स्वसंवेद्यत्वाच्च। स्वसंवेद्या हि संसारिणो गत्यादिपरिणामानामनुभूतत्वात्, मुक्ताः पुनरत्यन्तपरोक्षाः, तदनुभवस्याप्राप्तत्वात्।

तत्र य एते शुभाशुभकर्मफलानुभवनसंबन्धवशीकृतस्वभावा अप्रच्युतसंसरणाः पूर्वकृतनामकर्मनिमित्तकरणविशेषाः प्राणिनः ते खलु –

## समनस्काऽमनस्काः॥११॥

**मनःसन्निधानासन्निधानापेक्षया द्विविधाः संसारिणः॥१॥** मनो द्विविधम्– द्रव्यमनो भावमनश्चेति। तत्र पुद्गलविपाकिकर्मोदयापेक्षं द्रव्यमनः। वीर्यान्तरायनो-इन्द्रियावरणक्षयोपशमापेक्षाऽऽत्मनो विशुद्धिर्भावमनः। तेन मनसा सह वर्तन्त इति समनस्काः। न विद्यते मनो येषां तेऽमनस्का इति द्विविधाः संसारिणो भवन्ति। अत्राह –

**द्विविधजीवप्रकरणाद्यथासंख्यप्रसङ्गः॥२॥** द्विविधा हि जीवाः प्रकृताः संसारिणो मुक्ताश्च। तत्र संसारिणः समनस्काः मुक्ताश्चाऽमनस्का इति यथासंख्यं प्राप्नोति।

**इष्टमिति चेन्न; सर्वसंसारिणां समनस्कत्वप्रसङ्गात्॥३॥** स्यादेतत् – इष्टमेवेदं संसारिणः समनस्का मुक्ताश्चामनस्का इति; तन्न; किं कारणम्? सर्वसंसारिणां समन-स्कत्वप्रसङ्गात्। एकद्वित्रिचतुरिन्द्रियाणां पञ्चेन्द्रियेषु च केषाञ्चित् मनोविषयविशेष व्यवहाराभावादमनस्कतेष्टा तद्व्याघातोऽतः स्यात्। अत्रोच्यते–

**पृथग्योगप्रक्लृप्तेः संसारिसंप्रत्ययः॥४॥** यदिदं पृथग्योगकरणं तेन ज्ञायते संसारिणोऽत्र संबन्ध्यन्त इति। इतरथा हि एक एव योगः क्रियते - 'संसारिणो मुक्ताश्च समनस्कामनस्काः' इति।

**औपरिष्टसंसारिवचनप्रत्यासत्तेश्च॥५॥** औपरिष्टमस्ति संसारिवचनम्, तस्य प्रत्या-सत्तेरभिसंबन्धाच्च संसारिसंप्रत्ययो भवति। अत्राह –

**तदभिसंबन्धे यथासंख्यप्रसङ्गः॥६॥** यदि तदभिसंबन्धः क्रियते तत्तत्र त्रसस्थावरग्रहणमस्ति तेन यथासंख्यं प्राप्नोति 'समनस्कास्त्रसा अमनस्काः स्थावरा' इति।

**इष्टमेवेति चेन्न; सर्वत्रसानां समनस्कत्वप्रसङ्गात् ॥७॥** स्यादेतत्–इष्टमेवेदं त्रसाः समनस्काः स्थावरा अमनस्का इति; तन्न; किं कारणम्? सर्वत्रसानां समनस्कत्व-प्रसङ्गात्, द्वित्रिचतुरिन्द्रियाणामसंज्ञिपञ्चेन्द्रियाणामपि समनस्कत्वं प्रसज्येत। अनिष्टं चैतत् । अत्रोच्यते

**नानभिसंबन्धात् ॥८॥** संसारिग्रहणमात्रमत्राभिसंबध्यते न त्रसस्थावरग्रहणम् । इच्छावशेन हि संबन्धो भवति।

**एकयोगाकरणात् ॥९॥** यदि त्रसस्थावरग्रहणेनापि संबन्ध इष्टः स्यात् एक एव योगः क्रियेत – 'समनस्कामनस्काः संसारिणस्त्रसस्थावराः' इति। नत्वेवं कृतः। तेन ज्ञायते त्रसस्थावरग्रहणं न संबध्यत इति। अथवा, एकयोगाकरणात् मन्यामहे – अतीतस्य संसारिमुक्तग्रहणस्य वक्ष्यमाणस्य च त्रसस्थावरग्रहणस्य समनस्कामन-स्कग्रहणेनाभिसंबन्धो न भवतीति।

**इतरथाऽन्यतरत्र संसारिग्रहणे सतीष्टार्थत्वादुपरि संसारिग्रहणमनर्थकम् ॥१०॥** इतरेण प्रकारेणेतरथा। कथम्? यदि संसारिमुक्तग्रहणेन त्रसस्थावरग्रहणेन चास्याभि-

संबन्धः स्यादेक एव योगः क्रियते – 'संसारिमुक्ताः समनस्कामनस्कास्त्रसस्थावराश्च' इति। यथा सत्यन्यतरत्र संसारिग्रहणं कर्तव्यं स्यात्। क्वान्यतरत्र? समनस्कामनस्कसूत्रस्यादावन्ते वा। एवं सतीष्टार्थस्य सिद्धत्वात् 'संसारिणः त्रसस्थावराः' इत्यत्र संसारिग्रहणमनर्थकं स्यात्।

**आदौ समनस्कग्रहणमभ्यर्हितत्वात् ॥११॥** आदौ समनस्कग्रहणं क्रियते। कुतः? अभ्यर्हितत्वात्। कथमभ्यर्हितत्वम्? तत्र हि समग्राणि करणानीति।

य एते स्वकृतकर्मफलापेक्षपरिपूर्णापरिपूर्णकरणग्रामाहितद्वैविध्यविशिष्टाः कार्मण-शरीरप्रणालिकापादितनियतावस्थाविशेषास्ते खलु –

## संसारिणस्त्रसस्थावराः॥१२॥

अत्राह–के त्रसाः, के स्थावरा इति? उच्यन्ते –

**त्रसनामकर्मोदयापादितवृत्तयस्त्रसाः॥१॥** त्रसनामकर्मणो जीवविपाकिन उदयापादित-वृत्तिविशेषाः त्रसा इति व्यपदिश्यन्ते।

**त्रसेरुद्वेजनक्रियस्य त्रसा इति चेन्न; गर्भादिषु तदभावादत्रसत्वप्रसङ्गात् ॥२॥** स्यान्मतम् – त्रसेरुद्वेजनक्रियस्य त्रस्यन्तीति त्रसा इति? तन्न; किं कारणम्? गर्भादिषु तदभावादत्रसत्वप्रसङ्गात्। गर्भाण्डजमूर्च्छितसुषुप्तादीनां त्रसानां बाह्यभयनिमित्तोपनिपाते सति चलनाभावादत्रसत्वं स्यात्। कथं तर्ह्यस्य निष्पत्तिः 'त्रस्यन्तीति त्रसाः' इति? व्युत्पत्तिमात्रमेव नार्थः प्राधान्येनाश्रियते गोशब्दप्रवृत्तिवत्।

**स्थावरनामकर्मोदयोपजनितविशेषाः स्थावराः॥३॥** स्थावरनामकर्मणो जीवविपाकिन उदयेनोपजनितविशेषाः स्थावरा इत्याख्यायन्ते।

**स्थानशीला स्थावरा इति चेन्न; वाय्वादीनामस्थावरत्वप्रसङ्गात् ॥४॥** स्यादेतत्– तिष्ठन्तीत्येवं शीलाः स्थावरा इति? तन्न; किं कारणम्? वाय्वादीनामस्था-

वरत्वप्रसङ्गात्। वायुतेजोऽम्भसां हि देशान्तरप्राप्तिदर्शनादस्थावरत्वं स्यात्। कथं तर्ह्यस्य निष्पत्तिः-'स्थानशीलाः स्थावराः' इति? एवं रूढिविशेषबललाभात् क्वचिदेव वर्तते।

**इष्टमेवेति चेन्न, समयार्थानवबोधात्॥५॥** अथ मतमेत् – इष्टमेव वाय्वादीना-मस्थावरत्वमिति तन्न, किं कारणम्? समयार्थानवबोधात्। एवं हि समयोऽवस्थित सत्प्ररूपणायां कायानुवादे त्रया: नाम द्वीन्द्रियादारम्य आ अयोगकेवलिन: इति। तस्मान्न चलनाचलनापेक्षं त्रसस्थावरत्वं कर्मोदयापेक्षमेवेति स्थितम्।

**त्रसग्रहणमादावल्पाच्तरत्वादभ्यर्हितत्वाच्च॥६॥** त्रसग्रहणमादौ क्रियते। कुतः? अल्पाच्तरत्वादभ्यर्हितत्वाच्च। सर्वोपयोगसंभवादभ्यर्हितत्वम्।

सामान्यविशेषसंज्ञाहितभेदमात्रविज्ञाने सति विशेषेणाऽनिर्ज्ञातानां त्रसस्थावराणां निर्ज्ञाने कर्तव्ये एकेन्द्रियाणामतिबहुवक्तव्याभावाद् विभज्यमनुपूर्वीं स्थावरभेदप्रति-पत्त्यर्थमाह –

## पृथिव्यप्तेजोवायुवनस्पतयः स्थावराः॥१३॥

**नामकर्मोदयनिमित्ताः पृथिव्यादयः संज्ञाः॥१॥** स्थावरनामकर्मभेदाः पृथिवी-कायादयः सन्ति, तदुभयनिमित्ता जीवेषु पृथिव्यादयः संज्ञा वेदितव्याः। प्रथनादिप्रकृति निष्पन्ना अपि रूढिवशात् प्रथनाद्यनपेक्षा वर्तन्ते।

एषां पृथिव्यादीनामार्षे चातुर्विध्यमुक्तं प्रत्येकम्। तत्कथमिति चेत् उच्यते - पृथिवी पृथिवीकायः पृथिवीकायिकः पृथिवीजीव इत्यादि। तत्राचेतना वैश्रसिक-परिणामनिर्वृत्ता काठिन्यादिगुणात्मिका पृथिवी। अचेतनत्वादसत्यपि पृथिवीकायिक नामकर्मोदये प्रथनक्रियोपलक्षितैवेयम्। अथवा पृथिवी सामान्यम्; उत्तरत्रये संभवात्। कायः शरीरम्, पृथिवीकायिकजीवपरित्यक्तः पृथिवीकाय; मृतमनुष्यादिकायवत्। पृथिवी

कायोऽस्यास्तीति पृथिवीकायिकः तत्कायसंबन्धवशीकृत आत्मा। समवाप्तपृथिवीकायिकनामकर्मोदयः कार्मणकाययोगस्थो यो न तावत् पृथिवीं कायत्वेन गृह्णाति स पृथिवीजीवः। एवमापः, अप्कायः, अप्कायिकः, अप्जीवः। तेजः, तेजस्कायः, तेजस्कायिकः, तेजो जीवः। वायुर्वायुकायो वायुकायिको वायुजीवः। वनस्पतिर्वनस्पतिकायो वनस्पतिकायिको वनस्पतिजीव इति योज्यम्।

**सुखग्रहणहेतुत्वात् स्थूलमूर्तित्वादुपकारभूयस्त्वाच्चादौ पृथिवीग्रहणम्॥२॥** पृथिव्यां हि सत्यामपां कुम्भादिभिः अग्नेश्च शरावादिभिः वायोश्च चर्मघटादिभिः सुखेन ग्रहणं क्रियते। स्थूलमूर्तिश्च पृथिवी विमानभवनप्रस्तारादिभावपरिणामात्। स्नानपानाद्युपकारादपां पाकशोषप्रकाशनाद्युपकाराच्चाग्नेः स्वेदखेदापनोदाद्युपकाराच्च वायोर्भूयानुपकारः पृथिव्या अशनाच्छादनवसनादिभावो वनस्पतेः। अपादीनां यश्चोक्त उपकारः प्रतिनियत इति स सत्यां पृथिव्यां संभवतीतरथा हि क्वावस्थितानां स उपकारः स्यात्, अतः पृथिव्या ग्रहणमादौ क्रियते।

**तदनन्तरमपां वचनं भूमितेजसोर्विरोधादाधेयत्वाच्च॥३॥** तदनन्तरमपां वचनं क्रियते। कुतः? भूमितेजसोर्विरोधादाधेयत्वाच्च। भूमेर्हि तेजो विरोधि विनाशकत्वात् अतोऽद्भिर्व्यवधानं क्रियते। भूरपामाधारः आधेया आप इति च।

**ततस्तेजोग्रहणं तत्परिपाकहेतुत्वात्॥४॥** पृथिव्या अपां च परिपाकहेतुस्तेजः, तदनन्तरं तस्य ग्रहणं क्रियते।

**तेजोऽनन्तरं वायुग्रहणं सर्वेषां तत्प्रादुर्भावे निमित्तत्वादनन्तगुणत्वाच्च॥५॥** वनस्पतिप्रादुर्भावे हि पृथिव्यादयः सर्वे निमित्ततामुपव्रजन्ति। सर्वेषां तेषां वनस्पतिकायिका अनन्तगुणास्ततोऽन्ते वनस्पतिग्रहणं क्रियते। एते पञ्चविधाः प्राणिनः स्थावराः।

कति पुनरेषां प्राणाः? चत्वारः – स्पर्शनेन्द्रिप्राणः कायबलप्राण उच्छवास-निश्वासप्राण आयुःप्राणश्चेति।

अथ के त्रसा इति? अत्रोच्यते –

## द्वीन्द्रियादयस्त्रसाः॥१४॥

**आदिशब्दस्यानेकार्थत्वे विवक्षातो व्यवस्था संप्रत्ययः॥१॥** अयमादिशब्दोऽनेकार्थः व्यवस्थाप्रकारसामीप्यादिवचनत्वात्, तत्र विवक्षात इह व्यवस्थायां गृह्यते। आगमे हि ते व्यवस्थिता द्वीन्द्रियस्त्रीन्द्रियश्चतुरिन्द्रियः पञ्चेन्द्रियश्चेति। कोऽस्य विग्रहः? द्वे इन्द्रिये यस्य सोऽयं द्वीन्द्रियः स आदिर्येषां ते द्वीन्द्रियादय इति। यद्येवम् –

**अन्यपदार्थनिर्देशाद् द्वीन्द्रियाग्रहणम्॥२॥** अन्यपदार्थोऽत्र प्राधान्येनाश्रितः। द्वीन्द्रियग्रहणमुपलक्षणम्, अतस्त्रसग्रहणे द्वीन्द्रियस्य ग्रहणं न प्रोप्नोति यथा 'पर्वतादीनि क्षेत्राणि' इति न पर्वतः क्षेत्रग्रहणेन गृह्यते।

**न वा तद्गुणसंविज्ञानात्॥३॥** न वैषः दोषः; किं कारणम्? तद्गुणसंविज्ञानात्। यथा शुक्लवाससमानयेति तद्गुण आनीयते तथेहापि द्वीन्द्रियस्याप्यन्तर्भावो भवति।

**अवयवेन विग्रहे सति समुदायस्य वृत्त्यर्थत्वाद्वा॥४॥** अथवा "अवयवेन विग्रहः समुदायो वृत्त्यर्थः" इति द्वीन्द्रियस्योपलक्षणस्यापि त्रसत्वेऽन्तर्भावः, यथा "सर्वादिः सर्वनाम" इति। कथं तर्हि पर्वतादीनि क्षेत्राणीति पर्वतस्य बहिर्भावः? पर्वतस्य क्षेत्रत्वसंभवाभावाद् व्युदासः। ते एते चतुर्विधाः प्राणिनस्त्रसाः।

कति पुनरेषां प्राणाः? द्वीन्द्रियस्य तावत् षट्प्राणाः – स्पर्शनरसनेन्द्रियप्राणौ वाक्कायबलप्राणावुच्छवासनिश्वासप्राणः आयुःप्राणश्चेति। त्रीन्द्रियस्य सप्त त एव प्राणाः घ्राणाधिकाः। चतुरिन्द्रियस्याष्टौ त एव चक्षुरधिकाः। पञ्चेन्द्रिस्य तिरश्चोऽसंज्ञिनो नव

प्राणाः त एव श्रोत्राधिकाः। संज्ञिपञ्चेन्द्रितिर्यङ्मनुष्यदेवनारकाणां दश प्राणा मनोबलाधिकास्त एव।

आदिशब्देन निर्दिष्टानामिन्द्रियाणामनिर्ज्ञातसंख्यानामियत्तावधारणार्थमाह –

## पञ्चेन्द्रियाणि॥१५॥

अथवा स्वां प्रक्रियामाचिख्यासवः केचित् पञ्च षडेकादश चेन्द्रियाणीत्यध्यवस्यन्ति तत्रानिष्टनिवृत्त्यर्थं नियमयन्नाह - पञ्चेन्द्रियाणि नाधिकानीति।

**इन्द्रस्यात्मनो लिङ्गमिन्द्रियम् ॥१॥** उपभोक्तुरात्मनोऽनिवृत्तकर्मबन्धस्यापि परमे-श्वरत्वशक्तियोगादिन्द्रव्यपदेशमर्हतः स्वयमर्थान् गृहीतुमसमर्थस्योपयोगोपकरणं लिङ्ग-मिन्द्रियमित्युच्यते।

**इन्द्रेण कर्मणा सृष्टमिति वा॥२॥** अथवा स्वकृतकर्मविपाकवशादात्मा देवेन्द्रादिषु तिर्यगादिषु चेष्टानिष्टमनुभवतीति कर्मैव तत्रेन्द्रः; तेन सृष्टमिन्द्रियमित्याख्यायते। तद्भेदाः स्पर्शनादयः पञ्च वक्ष्यमाणाः।

**मनोऽपीन्द्रियमिति चेन्न; अनवस्थानात् ॥३॥** स्यान्मतम् – मनोऽपीन्द्रिय-मित्युपसंख्येयम्, कर्ममलीमस्यात्मनोऽसहायस्य स्वयमेवार्थचिन्तनं प्रत्यसहिष्णोर्बला-धानं भवति मनः कर्मकृतं चेति? तन्न; किं कारणम्? अनवस्थानात्। यथा चक्षुरादीनि प्रतिनियतदेशावस्थानानि न तथा मन इत्यनिन्द्रियं तत्।

**इन्द्रियपरिणामाच्च प्राक् तद्व्यापारात् ॥४॥** चक्षुरादीनां रूपादिविषयोपयोग-परिणामात् प्राक् मनसो व्यापारः। कथम्? शुक्लादिरूपं दिदृक्षुः प्रथमं मनसोपयोगं करोति 'एवंविधं रूपं पश्यामि रसमास्वादयामि' इति, ततस्तद्बलाधानीकृत्य चक्षुरादीनि विषयेषु व्याप्रियन्ते। ततश्चास्याऽनिन्द्रियत्वम्।

**कर्मेन्द्रियोपसंख्यानमिति चेन्न; उपयोगप्रकरणात् ॥५॥** स्यादेतत् – कर्मेन्द्रियाणि वागादीनि वचनादिक्रियानिमित्तानि सन्ति तेषामिहोपसंख्यानं कर्तव्यमिति? तन्न; किं कारणम्? उपयोगप्रकरणात्। उपयोगोऽत्र प्रकृतः, तदुपकरणानीहेन्द्रियाणि गृह्यन्ते, तेन कर्मेन्द्रियाणामप्रसङ्गः।

**अनिन्द्रियत्वं वा तेषामनवस्थानात् ॥६॥** न वागादीनामिन्द्रियत्वमस्ति, उपयोगसाधनेषु हीन्द्रियव्यपदेशो युक्तो न क्रियासाधनेषु। यदि च क्रियासाधनेष्वपि स्यादनवस्था प्रसज्येत, सर्वाणि ह्यङ्गोपाङ्गादीनि मूर्धादीनि क्रियासाधनानीति।

इष्टानिष्टविषयोपलब्धार्थानि भोक्तुरात्मनो यान्यमूनीन्द्रियाणि तेषामुक्तसामर्थ्य-विशेषादुपनिपतितभेदानां प्रत्येकं भेदप्रतिपत्त्यर्थमाह –

## द्विविधानि ॥१६॥

**विधशब्दस्य प्रकारवाचिनो ग्रहणम् ॥१॥** अयं विधशब्दः प्रकारवाची गृह्यते, विधयुक्तगतप्रकाराः समानार्था इति। द्वौ विधौ येषां तानि द्विविधानि द्विप्रकाराणीत्यर्थः। कौ च द्वौ प्रकारौ? द्रव्येन्द्रियं भावेन्द्रियमिति।

तत्र द्रव्येन्द्रियस्वरूपनिर्ज्ञानार्थमाह –

## निर्वृत्त्युपकरणे द्रव्येन्द्रियम् ॥१७॥

**निर्वर्त्यत इति निर्वृत्तिः ॥१॥** कर्मणा या निर्वर्त्यत निष्पाद्यते सा निर्वृत्तिरित्युपदिश्यते।

**सा द्वेधा बाह्याभ्यन्तरभेदात् ॥२॥** सा निर्वृत्तिर्द्वेधा। कुतः? बाह्याभ्यन्तरभेदात्। तत्र –

**विशुद्धात्मप्रदेशवृत्तिराभ्यन्तरा॥३॥** उत्सेधाङ्गुलस्याऽसंख्येयभागप्रमितानां विशु-द्धानामात्मप्रदेशानां प्रतिनियतचक्षुरादीन्द्रियसंस्थानमानावमानावस्थितानां वृत्तिराभ्यन्तरा निर्वृत्तिः।

**तत्र नामकर्मोदयापादितावस्थाविशेषः पुद्गलप्रचयो बाह्या॥४॥** तेष्वात्मप्रदेशे-ष्विन्द्रियव्यपदेशभाक् यः प्रतिनियतसंस्थानो नामकर्मोदयापादितावस्थाविशेषः पुद्गल-प्रचयः स बाह्या निर्वृत्तिः।

**उपक्रियतेऽनेनेत्युपकरणम् ॥५॥** येन निवृत्तेरूपकारः क्रियते तदुपकरणम् ।

**तद् द्विविधं पूर्ववत् ॥६॥** तदुपकरणं द्विविधं पूर्ववत् बाह्याभ्यन्तरभेदात् ।

**तत्राभ्यन्तरं शुक्लकृष्णमण्डलम्, बाह्यमक्षिपत्रपक्ष्मद्वयादि॥७॥** एवं शेषेष्वपी-न्द्रियेषु ज्ञेयम् ।

भावेन्द्रियमुच्यते –

## लब्ध्युपयोगौ भावेन्द्रियम् ॥१८॥

लब्धिरिति कोऽयं शब्दः? लाभो लब्धिः। यद्येवं षित्वादङ् प्राप्नोति; **"अनुबन्धकृतमनित्यम्"** इति न भवति तथा **"वर्णानुपलब्धौ चातदर्थगतेः"** इत्येवमादिषु। अथवा **"स्त्रियां क्तिः, लभादिभ्यश्च"** इति व्याप्रियते स ज्ञानावरणक्षयो-पशमविशेषो लब्धिरिति विज्ञायते।

**इन्द्रियनिर्वृत्तिहेतुः क्षयोपशमविशेषो लब्धिः॥१॥** यत्सन्निधानादात्मा द्रव्येन्द्रिय-निर्वृत्तिं प्रति व्याप्रियते स ज्ञानावरणक्षयोपशमविशेषो लब्धिरिति विज्ञायते।

**तन्निमित्तः परिणामविशेष उपयोगः॥२॥** तदुक्तं निमित्तं प्रतीत्य उत्पद्यमान आत्मनः परिणाम उपयोग इत्युपदिश्यते। तदेतदुभयं भावेन्द्रियमिति।

**उपयोगस्य फलत्वादिन्द्रियव्पदेशानुपपत्तिरिति चेन्न; कारणधर्मस्य कार्येऽनुवृत्तेः॥३॥** स्यान्मतम् - इन्द्रियफलमुपयोगः स कथमिव इन्द्रियव्यपदेशमापद्यत इति? तन्न; किं कारणम्? कारणधर्मस्य कार्येऽनुवृत्तेः। कार्यं हि लोके कारणमनुवर्तमानं दृष्टं यथा घटाकारपरिणतं विज्ञानं घट इति, तथेन्द्रियनिमित्त उपयोगोऽपि इन्द्रियमिति व्यपदिश्यते।

**शब्दार्थसंभवाच्च॥४॥** यः शब्दार्थः 'इन्द्रस्य लिङ्गमिन्द्रेण सृष्टम्' इति वा स उपयोगे प्राधान्येन विद्यत इतीन्द्रियव्यपदेशो युक्तः।

उक्तानां पञ्चानामिन्द्रियाणां संज्ञानुपूर्व्यविशेषप्रतिपादनार्थमाह -

## स्पर्शनरसनघ्राणचक्षुःश्रोत्राणि॥१९॥

**स्पर्शनादीनां करणसाधनत्वं पारतन्त्र्यात् कर्तृसाधनत्वं च स्वातन्त्र्याद् बहुलवचनात्॥१॥** इमानि स्पर्शनादीनि करणसाधनानि। कुतः? पारतन्त्र्यादिन्द्रियाणां हि लोके पारतन्त्र्येण विवक्षा विद्यते, आत्मनः स्वातन्त्र्यविवक्षायां यथा 'अनेनाऽक्ष्णा सुष्ठु पश्यामि, अनेन कर्णेन सुष्ठु शृणोमि इति। ततो वीर्यान्तरायप्रतिनियतेन्द्रियावरणक्षयोपशमाङ्गोपाङ्गनामलाभावष्टम्भात् स्पर्शत्यनेनात्मेति स्पर्शनम् रसयत्यनेनात्मेति रसनम्, जिघ्रत्यनेनात्मेति घ्राणम्, चष्टेरनेकार्थत्वाद्दर्शनार्थविवक्षायां चष्टेऽर्थान् पश्यत्यनेनात्मेति चक्षुः, शृणोत्यनेनात्मेति श्रोत्रम्। कर्तृसाधनत्वं च भवति स्वातन्त्र्यविवक्षायाम्। इन्द्रियाणां हि लोके स्वातन्त्र्येण विवक्षा यथा 'इदं मेऽक्षि सुष्ठु पश्यति, अयं मे कर्णः सुष्ठु शृणोति इति। ततः पूर्वोक्तहेतुसन्निधाने सति स्पृश

त्यात्मैवेति स्पर्शनम्। कथम्? कर्तरि युट् बहुलवचनात्। रसयतीति रसनम् जिघ्रतीति घ्राणम्, चष्टे इति चक्षुः, शृणोतीति श्रोत्रमिति।

अत्र 'इन्द्रियाणि' इति केषाञ्चित् पाठः। नासौ युक्तः। कुत?

**अधिकृतत्वात् 'इन्द्रियाणि' इत्यवचनम् ॥२॥** 'पञ्चेन्द्रियाणि' इत्यत इन्द्रिय-ग्रहणमनुवर्तते तेनेह 'इन्द्रियाणि' इति वचनमनर्थकम्।

**स्पर्शनग्रहणमादौ शरीरव्यापित्वात् ॥३॥** यतो वितत्य शरीरमवतिष्ठते स्पर्शन-मतोऽस्य ग्रहणमादौ क्रियते।

**वनस्पत्यन्तानामेकमिति च स्पर्शनस्य तत्र व्यापारात् ॥४॥** वक्ष्यते "वनस्पत्य-न्तानामेकम्" इति तत्र, स्पर्शनस्य ग्रहणार्थञ्चादौ वचनम्।

**सर्वसंसारिषूपलब्धेश्च॥५॥** सर्वेषु संसारिषु स्पर्शनमस्त्यतो नानाजीवापेक्षया व्यापित्वाच्चादौ ग्रहणं क्रियते।

**ततो रसनघ्राणचक्षुषां क्रमवचनमुत्तरोत्तराल्पत्वात् ॥६॥** ततः पश्चाद्रसनादीनां त्रयाणां क्रमवचनं क्रियते। कुतः? उत्तरोत्तराल्पत्वात्। तद्यथा - सर्वतः स्तोकाश्चक्षुःप्रदेशाः, श्रोत्रेन्द्रियप्रदेशाः संख्येयगुणाः, घ्राणेन्द्रिये विशेषाधिकाः, जिह्वायामसंख्येयगुणाः, स्पर्शने-ऽनन्तगुणा इति।

यद्येवं चक्षुषोऽन्ते ग्रहणं कर्तव्यं सर्वेभ्योऽल्पीयस्त्वात्? सत्यम्, एवमेतत्; तथापि –

**श्रोत्रस्यान्ते वचनं बहूपकारित्वात् ॥७॥** यतः श्रोत्रबलाधानादुपदेशं श्रुत्वा हिता-हितप्राप्तिपरिहारार्थमान्द्रियन्ते। अतः श्रोत्रं बहूपकारीत्यन्ते गृह्यते।

**रसनमपि वक्तृत्वनेति चेन्न; अभ्युपगमात् ॥८॥** स्यादेतत् - रसनमपि बहूपकारि। कथम्? वक्तृत्वेन। यतो रसनमभ्युदयनिःश्रेयसार्थोच्चारणाऽध्ययनादिषु प्रवणमतो रसनमेवान्ते वाच्यमिति? तन्न; किं कारणम्? अभ्युपगमात्। अभ्युपगम्य श्रोत्रस्य बहूपकारित्वं रसनस्यापि बहूपकारित्वं वर्णयता भवता तदभ्युपगतमित्यवसितोऽभिमतवादः। अनभ्युपगमे वा प्रसङ्गनिवृत्तिः 'रसनमपि बहूपकारि' इति। किञ्च,

**श्रोत्रप्रणालिकापादितोपदेशात् ॥९॥** श्रोत्रप्रणालिकयोपदेशमुपश्रुत्य रसनं वक्तृत्वं प्रति व्याप्रियते अतः श्रोत्रमेव बहूपकारि।

**सर्वज्ञे तदभाव इति चेन्न; इन्द्रियाधिकारात् ॥१०॥** स्यान्मतम् - न हि सर्वज्ञः श्रोत्रेन्द्रियबलाधानात् परत उपश्रुत्य वक्तृत्वमास्कन्दतीति किन्तु सकलज्ञानावरण-संक्षयाविर्भूतातीन्द्रियकेवलज्ञानः रसनोपष्टम्भमात्रादेव वक्तृत्वेन परिणतः सकलान् श्रुतविषयानर्थानुपदिशति, अतो रसनमेव बहूपकारीति? तन्न; किं कारणम्? इन्द्रियाधिकारात्। इन्द्रियाधिकारोऽयम् अतो येष्विन्द्रियकृतो हिताहितोपदेशः साकल्ये-नास्ति तान् प्रत्येतदुक्तं न सर्वज्ञं प्रतीति नास्ति दोषः।

**एकैकवृद्धिक्रमज्ञानपनार्थं च स्पर्शनादिवचनम् ॥११॥** "कृमिपिपीलीकाभ्रमर-मनुष्यादीनामेकैकवृद्धानि" इति वक्ष्यते, तत्र वृद्धिक्रमज्ञापनार्थं च स्पर्शनादीनामानुपूर्व्यं वेदितव्यम्।

**एषां च स्वतस्तद्वतश्चैकत्वपृथकत्वं प्रत्यनेकान्तः॥१२॥** एषां च स्पर्शनादीना-मिन्द्रियाणां स्वतस्तद्वतश्चैकत्वपृथक्त्वं प्रत्यनेकान्तो वेदितव्यः - स्यादेकत्वं स्यात् पृथक्त्वमित्यादि। तद्यथा स्वतस्तावत् - ज्ञानावरणक्षयोपशमशक्तेरभेदविवक्षायां स्पर्शना-दीनां स्यादेकत्वम्, समुदायव्यतिरेकाभावात् समुदायिनां

समुदायस्यैकत्वादवयवाना-मप्येकत्वमिति वा स्यादेकत्वम्। प्रतिनियतक्षयोपशमलब्धिविशेषापेक्षया स्यान्नानात्व-मवयवभेदविवक्षायां वा स्यान्नानात्वम्। इन्द्रियबुद्ध्यभिधानानुवृत्तिव्यावर्तनार्पणाभेदाद्वा स्यादेकत्वं स्यात् पृथक्त्वं च। तद्वतोऽपि चैतन्यापरित्यागेनोभयपरिणामकारणापेक्षस्ये-न्द्रियपर्यायात्मलाभे सति निष्टप्तायःपिण्डवत्तथापरिणामात् तद्व्यतिरेकेणेन्द्रियस्यानुपलब्धिरिति स्यादिन्द्रियेन्द्रियवतोरेकत्वम्। इतरथा एकान्तान्यत्वेऽनिन्द्रिय आत्मा स्यात् घटवत्। यथाऽन्यतमेन्द्रियनिवृत्तौ तद्वतोऽवस्थानात् स्यान्नानात्वम्, पर्यायिपर्याय-भेदाच्च स्यान्नानात्वम्। संज्ञादिभेदाभेदविवक्षोपपत्तेश्च स्यादेकत्वं स्यान्नानात्वं वाऽवसेयम्। पूर्ववदुत्तरे च भङ्गा नेतव्याः।

तेषामिन्द्रियाणां विषयप्रदर्शनार्थमाह –

## स्पर्शरसगन्धवर्णशब्दास्तदर्थाः॥२०॥

**स्पर्शादीनां कर्मभावसाधनत्वं द्रव्यपर्यायविवक्षोपपत्तेः॥१॥** स्पर्शादीनां कर्मसाध-नत्वं भावसाधनत्वं च भवति। कुतः? द्रव्यपर्यायविवक्षोपपत्तेः यदा द्रव्यं प्राधान्येन विवक्षितं तदेन्द्रियेण द्रव्यमेव सन्निकृष्यते ततो न व्यतिरिक्ताः स्पर्शादयः केचन सन्तीत्येतस्यां विवक्षायां कर्मसाधनत्वं स्पर्शादीनामवसीयते - स्पृश्यत इति स्पर्शः, रस्यत इति रसः, गन्ध्यत इति गन्धः, वर्ण्यत इति वर्णः, शब्द्यत इति शब्दः। यदा तु पर्यायः प्राधान्येन विवक्षितस्तदा भेदोपपत्तेः औदासीन्यावस्थितभावकथनाद् भावसाधनत्वं स्पर्शादीनां युज्यते। ततः स्पर्शनं स्पर्शः, रसनं रसः, गन्धनं गन्धः, वर्णनं वर्णः, शब्दनं शब्द इति। यद्येवं सूक्ष्मेषु परमाण्वादिषु स्पर्शादिव्यवहारो न प्राप्नोति? नैष दोषः; सूक्ष्मेष्वपि ते स्पर्शादयः सन्ति तत्कार्येषु स्थूलेषु दर्शनादनुमीयमानाः न

ह्यत्यन्तमसतां प्रादुर्भावोऽस्तीति, किन्त्विन्द्रियग्रहणयोग्या न भवन्त्ययोग्यत्वेऽपि तेषु स्पर्शादिव्यवहारो रूढिवशाद्भवति।

तदर्था इति कोऽयं शब्दः? तेषामर्थास्तदर्था इति। तेषां केषाम्? इन्द्रियाणाम्। यद्येवं –

**तदर्था इति वृत्त्यनुपपत्तिरसमर्थत्वात्॥१॥** तदर्था इति वृत्तिर्नोपपद्यते। कुतः? असमर्थत्वात्। समर्थायावयवानां हि वृत्त्या भवितव्यम्। न चात्र सामर्थ्यमस्ति। कुतः? "सापेक्षमसमर्थं भवति" इति। इन्द्रियाणि ह्यत्रापेक्ष्यन्ते।

**न वा; गमकत्वान्नित्यसापेक्षेषु संबन्धिशब्दवत्॥३॥** न वैष दोषः; किं कारणम्? गमकत्वादत्र वृत्तिर्भवति। गमकत्वं च नित्यसापेक्षेषु। कथम्? संबन्धिशब्दवत्। यथा संबन्धिशब्देषु 'देवदत्तस्य गुरुकुलं देवदत्तस्य गुरुपुत्रः' इत्येवमादिषु वृत्तिर्भवति, गुरुशब्दो हि नित्यं शिष्यमपेक्षत इति, एवमिहापि तच्छब्दः सामान्यवचनोऽवश्यं विशेषाकाङ्क्षी सन् प्रकृतानीन्द्रियाण्यपेक्षमाणोऽपि वृत्तिंलभते।

**स्पर्शादीनामानुपूर्व्येण निर्देश इन्द्रियक्रमाभिसंबन्धार्थः॥४॥** 'स्पर्शश्च रसश्च गन्धश्च वर्णश्च शब्दस्य स्पर्शरसगन्धवर्णशब्दाः' इत्यानुपूर्व्येण निर्देशः स्पर्शनादिभिरिन्द्रियैः क्रमेणाभिसंबन्धो यथा स्यादिति। एते पुद्गलद्रव्यस्य गुणा अविशेषेण वेदितव्याः।

अत्र केचिद्विशिष्य तान् कल्पयन्ति "रूपरसगन्धस्पर्शवती पृथिवी। रूपरसस्पर्शवत्य आपो द्रवाः स्निग्धाश्च। तेजो रूपस्पर्शवत्। वायुः स्पर्शवान्" इति; तदयुक्तम्; रूपादिमान् वायुः स्पर्शवत्त्वाद् घटवत्। तेजोऽपि रसगन्धवद्रूपवत्त्वाद् गुडवत्। आपोऽपि गन्धवत्यः रसवत्त्वादाम्रफलवत्।

किञ्च, अबादिषु गन्धादीनां साक्षादुपलब्धेश्च। पार्थिवपरमाणुसंयोगात्तदु-पलब्धिरिति चेन्न; विशेषहेत्वभावात्। नात्र विशेषहेतुरस्ति- पार्थिवपरमाणूनामेते गुणाः। संसर्गात्त्वन्यत्रोपलभ्यन्ते नत्वबादीनामिति। वयं तु ब्रूमहे - तद्गुणत्वात्। तत्रोपल-ब्धिरिति। यदि हि संयोगादुपलब्धिः कल्प्यते रसाद्युपलब्धिरपि संयोगादेव कल्प्यताम्।

न च पृथिव्यादीनां जातिभेदोऽस्ति, पुद्गलजातिमजहन्तः परमाणुस्कन्धविशेषा निमित्तवशाद्विश्वरूपतामापद्यन्त इति दर्शनात्। दृश्यते हि पृथिव्याः कारणवशाद् द्रवता, द्रवाणां चापां करकाश्मभावेन घनभावो दृष्टः, पुनश्च द्रवभावः। तेजसोऽपि मषीभावः।

वायोरप्यदृष्टा रूपादयः कथं गम्यन्त इति चेत्? परमाणुषु तेषां रूपादीनां कथं गतिः? तत्कार्येषु दर्शनादनुमानमिति चेद्विहापि तत एव वेदितव्यम्।

**तेषां च स्वतस्तद्वतश्चैकत्वं पृथक्त्वं प्रत्यनेकान्तः॥५॥** तेषां च स्पर्शादीनां स्वतस्तद्वतश्चैकत्वपृथक्त्वं प्रत्यनेकान्तो वेदितव्यः - स्यादेकत्वं स्यात् पृथक्त्व मित्यादि।

अत्रान्ये एकत्वं पृथक्त्वं चैकान्तेनाध्यवस्यन्ति, तदयुक्तम्; कथम्? यद्येकान्तेनै-कत्वं स्यात्; स्पर्शनेन स्पर्शोपलब्धौ रसादीनामप्युपलब्धिः स्यात्। तद्वतोऽपि तेषामपृथक्त्वे तदेव वा स्यात् त एव वेति? तदेव चेत्; लक्षणाभावाल्लक्ष्याभावः। कथं त एव; निराधारत्वात्तेषामप्यभावः। अथैकान्तेन पृथक्त्वम्; घटरूपोलब्धौ पटादिरूपानुप-लब्धिवत् स्पर्शोपलब्धौ रूपादीनामनुपलब्धेः 'स्पृष्टो घटोऽयम्' इति न ज्ञायेत स्पर्शाद्यनात्मकत्वात्। तस्मात् तद्वतोऽप्यत्यन्तपृथक्त्वे उभयेषामभावः स्यात्। ग्रहणभेदात् स्पर्शादीनामन्यत्वमिति चेन्न; ग्रहणाभेदेपि नानात्वोपलब्धेः। शुक्ल-कृष्णादिषु

संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वकर्मसत्तागुणत्वानां स्पसम-वायाच्चाक्षुषाणां नानात्वोपलब्धेश्च। संज्ञा स्वतत्त्वमिति लक्षणभेदान्नानात्वमिति चेन्न; तदभेदेऽपि द्रव्यगुणकर्मणां नानात्वोपलब्धेः। स्पर्शादीनां व्यतिरेकेणानुपलब्धेरना-नात्वमिति चेन्न; प्रतिज्ञातविरोधात्। यदि ह्येवं स्यात् महदादिपरिणतानां सत्त्वरजस्तमसां व्यतिरेकेणानुपलभ्यमानानामपि प्रतिज्ञातमन्यत्वं हीयते। यदि हि तत्राप्यनन्यत्वमेव स्यात्; व्यक्ताव्यक्तलक्षणभेदकल्पनाऽनर्थिका स्यात्। तस्मात् स्यादेकत्वं स्यात्पृथक्त्वं चाभ्युपगन्तव्यम्- द्रव्यार्पणादेकत्वं पर्यायार्पणान्नानात्व-मिति।

अत्राह-यन्मनोऽनवस्थानादिन्द्रियं न भवतीति प्रत्याख्यातं तत्किमुपयोगस्योप-कारकम्, उत नेति? तदप्युपकार्येव; तेन विनेन्द्रियाणां विषयेषु स्वप्रयोजनवृत्त्यभावात्। किमस्यैषां सहकारित्वमात्रमेव प्रयोजनमुतान्यदपीति? अत आह –

## श्रुतमनिन्द्रियस्य॥२१॥

श्रुतज्ञानविषयोऽर्थः श्रुतम्, स विषयोऽनिन्द्रियस्य। परिप्राप्तश्रुतज्ञानावरणक्षयो-पशमस्यात्मनः श्रुतार्थेऽनिन्द्रियालम्बनज्ञानप्रवृत्तेः। अथवा श्रुतज्ञानं श्रुतं तदनिन्द्रिय-स्यार्थः प्रयोजनमिति यावत्, तत्पूर्वकत्वात्तस्येति। अयमनिन्द्रियस्येन्द्रियव्यापार-निर्मुक्तोऽर्थः।

**श्रुतं श्रोत्रेन्द्रियस्य विषय इति चेन्न; श्रोत्रेन्द्रियग्रहणे श्रुतस्य मतिज्ञान-व्यपदेशात्॥१॥** स्यान्मतम् - न श्रुतमनिन्द्रियस्य विषयः। कस्य तर्हि? श्रोत्रे-न्द्रियस्येति; तत्र; किं कारणम्? श्रोत्रेन्द्रियग्रहणे श्रुतस्य मतिज्ञानमिति व्यपदेशात्। यदा हि श्रोत्रेण गृह्यते तदा तन्मतिज्ञानमवग्रहादि व्याख्यातम्, तत उत्तरकालं यत्तत्पूर्वकं जीवादिपदार्थस्वरूपविषयं तत् श्रुतमनिन्द्रियस्येत्यवसेयम्।

उक्तानामिन्द्रियाणां प्रतिनियतविषययाणां स्वामित्वनिर्देशे कर्तव्ये यत्प्रथमं गृहीतं स्पर्शनं तस्य तावत्स्वामित्वावधारणार्थमाह –

## वनस्पत्यन्तानामेकम् ॥२२॥

**अन्तशब्दस्याऽनेकार्थत्वे विवक्षातोऽवसानगतिः॥१॥** अयमन्तशब्दोऽनेकार्थः। क्वचिदवयवे, यथा वस्त्रान्तः वसनान्तः। क्वचित्सामीप्ये, यथोदकान्तं गतः–उदकसमीपे गत इति। क्वचिदवसाने वर्तते, यथा संसारान्तं गतः – संसारावसानं गत इति। तत्रेह विवक्षातोऽवसानगतिर्वेदितव्या। वनस्पत्यन्तानां वनस्पत्यवसानानामिति।

**सामीप्यवचने हि वायुत्रससंप्रत्ययप्रसङ्गः॥२॥** वनस्पत्यन्तानां वनस्पतिसमीपानामित्यर्थे गृह्यमाणे वायुकायिकानां त्रसानां च संप्रत्ययः प्रसज्येत।

**अन्तशब्दस्य संबन्धिशब्दत्वादादिसंप्रत्ययः॥३॥** अयमन्तशब्दः संबन्धिशब्दत्वात् कांश्चित् पूर्वानपेक्ष्य वर्तते ततोऽर्थादादिसंप्रत्ययो भवति। तस्मादयमर्थो गम्यते - पृथिव्यादीनां वनस्पत्यन्तानामेकमिन्द्रियमिति। अत्राह –

**अविशिष्टैकेन्द्रियप्रसङ्गोऽविशेषात् ॥४॥** पृथिव्यादीनां वनस्पत्यन्तानां स्पर्शनादिष्वविशिष्टमेकमिन्द्रियं प्राप्नोति। कुतः? अविशेषात्। न हि कश्चिद्विशेषोऽस्ति 'अनेनैवैकेन भवितव्यम्' इति। संख्यावाची ह्ययमेकशब्दः।

**न वा; प्राथम्यवचने स्पर्शनसंप्रत्ययात् ॥५॥** न वैष दोषः। किं कारणम्? प्राथम्यवचने स्पर्शनसंप्रत्ययात्। अयमेकशब्दः प्राथम्यवचन; सूत्रपाठे च प्राथम्यमाश्रितम्, ततः स्पर्शनस्य संप्रत्ययो भवति। अस्ति च लोके प्राथम्यवचनः, एको गोत्रे प्रथमो गोत्र इति।

तस्योत्पत्तिकारणमुच्यते – वीर्यान्तरायस्पर्शनेन्द्रियावरणक्षयोपशमे शेषेन्द्रिय-सर्वघातिस्पर्धकोदये च शरीराङ्गोपाङ्गलाभोपष्टम्भे एकेन्द्रियजातिनामोदयवशवर्तितायां च सत्यां स्पर्शनमेकमिन्द्रियमाविर्भवति।

इतरेषामिन्द्रियाणां स्वामित्वप्रदर्शनार्थमाह –

## कृमिपिपीलिकाभ्रमरमनुष्यादीनामेकैकवृद्धानि॥२३॥

**एकैकमिति वीप्सानिर्देशः॥१॥** एकैकमिति शब्दो वीप्सायां द्रष्टव्यः।

**बहुत्वनिर्देशः सर्वेन्द्रियापेक्षः॥२॥** सर्वाणीन्द्रियाण्यपेक्ष्य बहुत्वनिर्देशः कृतः। एकैकं वृद्धमेषां तानीमान्येकैकवृद्धानीति।'तत्र किं पूर्वमुत्तरम् इति सन्देहः?

**असन्दिग्धं स्पर्शनमेकैकेन वृद्धमित्यादिविशेषणात्॥३॥** 'स्पर्शनम्' इत्यनुवर्तते, तदारभ्यैकैकेन वृद्धिमित्यादिविशेषणात् नास्ति सन्देहः। तत्कथम्?

**वाक्यान्तरोपप्लवात्॥४॥** अस्मान्निबन्धनस्थानाद्वाक्यात् वाक्यान्तराण्युपप्ल-वन्ते। यथा-'अक्षः' इत्येतस्मात् 'अक्षो भक्ष्यताम्, अक्षो भज्यताम्, अक्षो दीव्यताम्' इति वाक्यान्तरोपप्लवः क्रियते, एवमिहापि 'स्पर्शनं रसनवृद्धं कृम्यादीनाम् स्पर्शनरसने घ्राणवृद्धे पिपीलिकादीनाम्, स्पर्शनरसनघ्राणानि चक्षुर्वृद्धानि भ्रमरादीनाम् तानि श्रोत्रवृद्धानि मनुष्यादीनाम् इति वाक्यान्तराण्युपप्लवन्ते।

**आदिशब्दः प्रकारे व्यवस्थायां वा॥५॥** अयमादिशब्दः प्रकारे व्यवस्थायां वा वेदितव्यः। यदागमो नापेक्षितस्तदा प्रकारे कृमिप्रकाराः कृम्यादय इति। यदा त्वागमोऽपेक्ष्यते तदा व्यवस्थायाम्, आगमे हि ते व्यवस्थिता इति।

तेषां निष्पत्तिः स्पर्शनोत्पत्त्या व्याख्याता उत्तरोत्तरसर्वघातिस्पर्धकोदयेन।

एवमेतेषु संसारिषु द्विभेदेष्विन्द्रियभेदात् पञ्चविधेषु ये पञ्चेन्द्रियास्तद्भेदस्यानुक्तस्य प्रतिपत्त्यर्थमाह –

## संज्ञिनः समनस्काः॥२४॥

मनो व्याख्यातम्, सह तेन ये वर्तन्ते ते संज्ञिनः। अत्र चोद्यते –

**समनस्कविशेषमनर्थकं संज्ञिशब्देन गतत्वात्॥१॥** संज्ञिन इत्यनेनैव विशेषणेन गतत्वात् 'समनस्काः' इति विशेषणमनर्थकम्। कथमिति चेत्? उच्यते –

**हिताहितप्राप्तिपरिहारयोर्गुणदोषविचारणात्मिका संज्ञा॥२॥** 'इदं हितमिदमहितम्, अस्य प्राप्तौ परिहारे चायं गुणोऽयं दोषः' इति च विचारणात्मिका संज्ञेत्युच्यते।

**ब्रीह्यादिपाठादिनि सिद्धेः॥३॥** तस्मात् संज्ञाशब्दाद् ब्रीह्यादिपाठादिनि सति 'संज्ञिनः' इति सिध्यति।

**न वा शब्दार्थव्यभिचारात्॥४॥** न वैष दोषः। किं कारणम्? शब्दार्थव्यभिचारात्। संज्ञाशब्दोऽर्थं हि व्यभिचरति। तत्र को दोषः?

**संज्ञा नामेति चेत्; निवर्त्याभावः॥५॥** यदि संज्ञा रूढिर्नामेत्युच्यते; सा सर्वेषां प्राणिनां प्रतिनियताऽस्तीत्यसंज्ञिनामभावात् निवर्त्याभावः स्यात्।

**संज्ञानं संज्ञा ज्ञानमिति चेत्; तुल्यः॥६॥** कः? निवर्त्याभावः? सर्वेषां प्राणिनां ज्ञानात्मकत्वात्।

**आहारादिसंज्ञेति चेन्न; अनिष्टत्वात्॥७॥** स्यादेतत् – आहारभयमैथुनपरिग्रह-विषया संज्ञेति? तन्न; किं कारणम्? अनिष्टत्वात्। सर्वे हि संसारिण आहारभय-मैथुन-परिग्रह संज्ञासन्निधानात् संज्ञिनः स्युः। अनिष्टं चैतत्। तस्मात् समनस्का इति

विशेषणमर्थवत्। एवं च कृत्वा गर्भाण्डमूर्च्छितसुषुप्ताद्यवस्थासु हिताहितपरीक्षाभावेऽपि मनःसन्निधानात् संज्ञित्वमुपपन्नं भवति।

यद्यस्य संसारिणो हिताहितप्राप्तिनिवृत्तिहेतुः परिस्पन्दो मनस्करणसन्निधाने सति भवति, अथाभिनवशरीरं प्रत्यागूर्णस्य विशीर्णपूर्वमूर्तेरात्मनो निर्मनस्कस्य यत्कर्म तत्कुतः इति? अत्रोच्यते –

## विग्रहगतौ कर्मयोगः॥२५॥

अथवा, यदि संप्रधार्य समनस्काः प्राणिनः क्रियाः प्रारभन्ते भिन्नदेहस्याऽसति मनसि उपपादक्षेत्रं प्रत्याभिमुख्येन या प्रवृत्तिर्विग्रहार्था सा कुतो भवति? अत आह 'विग्रहगतौ कर्मयोगः' इति।

**विग्रहो देहस्तदर्था गतिर्विग्रहगतिः॥१॥** औदारिकादिशरीरनामोदयात् तन्निर्वृत्तिसमर्थान् विविधान् पुद्गलान् गृह्णाति विगृह्यते वासौ संसारिणेति विग्रहो देहः, विग्रहाय गतिर्विग्रहगतिः। ननु विकृतिप्रकृत्यभिसंबन्धे सति तादर्थ्ये वृत्तिः, इह विकृतिप्रकृत्यभिसंबन्धाभावाद् वृत्तिर्न प्राप्नोति नैष दोषः, अश्वघासादिवद् वृत्तिर्वेदितव्या, तादर्थ्यं तु चतुर्थ्या वाक्ये प्रदर्श्यते।

**विरुद्धो ग्रहो विग्रहो व्याघात इति वा॥२॥** अथवा विरुद्धो ग्रहो विग्रहो व्याघातः नोकर्मपुद्गलादानविरोध इत्यर्थः।

**विग्रहेण गतिर्विग्रहगतिः॥३॥** आदाननिरोधेन गतिरित्यर्थः।

**कर्मेति सर्वशरीरप्ररोहणसमर्थं कार्मणम्॥४॥** सर्वाणि शरीराणि यतः प्ररोहन्ति तत् बीजभूतं कार्मणं शरीरं कर्मेत्युच्यते।

**योग आत्मप्रदेशपरिस्पन्दः॥५॥** कायादिवर्गणानिमित्त आत्मप्रदेशपरिस्पन्दो योग इत्याख्यायते।

**कर्मनिमित्तो योगः कर्मयोगः॥६॥** तस्यां विग्रहगतौ कार्मणशरीरकृतो योगो भवति यत्कृतं कर्मादानम्, यदुपपादिता चाऽमनस्कस्यापि विग्रहार्था गतिः।

अथाकाशप्रदेशेषु परमाणुप्रतिष्ठासंबन्धेनोपचरितेष्वाधेया जीवपुद्गला देशान्तरप्राप्तिं प्रत्यभिमुखा किं निराकृतप्रदेशक्रमां व्रज्यामभिनिर्वर्तयन्ति, उताक्रान्तप्रदेशक्रमामिति विचारे सति सन्निर्धारणार्थमाह –

## अनुश्रेणि गतिः॥२६॥

**आकाशप्रदेशपङ्क्तिः श्रेणिः॥१॥** लोकमध्यादारभ्योर्ध्वमधस्तिर्यक्क्रमाकाशप्रदेशानां क्रमसन्निविष्टानां पङ्क्तिः श्रेणिरित्युच्यते।

**अनोरानुपूर्व्ये वृत्तिः॥२॥** अनुशब्दस्यानुपूर्व्ये वृत्तिर्भवति श्रेणेरानुपूर्व्येणानुश्रेणि इति।

**जीवाधिकारात् पुद्गलासंप्रत्यय इति चेन्न; गतिग्रहणात्॥३॥** स्यादेतत्- जीवाधिकारात् पुद्गलानामनुश्रेणिगतिसंप्रत्ययो न भवतीति; तन्न; किं कारणम्? गतिग्रहणात्। यदि हि जीवस्यैव गतिरिहेष्टा स्याद् गत्यधिकारे पुनर्गतिग्रहणमनर्थकं स्यात्, ततो ज्ञायते सर्वेषां गतिमतां गतिर्गृह्यते इति।

**क्रियान्तरनिवृत्त्यर्थं गतिग्रहणमिति चेन्न; अवस्थानाद्यसंभवात्॥४॥** स्यान्मतम्–गतिग्रहणं क्रियान्तरनिवृत्त्यर्थं गतिरेव नान्या क्रियते? तन्न; किं कारणम्? अवस्थानाद्यसंभवात्। न विग्रहगतिमापन्नस्य जन्तोरवस्थानशयनासनादयः क्रियाः संभवन्ति।

**उत्तरसूत्रे जीवग्रहणाच्च॥५॥** 'अविग्रहा जीवस्य' इत्युत्तरत्र जीवग्रहणाच्च मन्यामहे इहोभयगतिराश्रितेति।

**विश्रेणिगतिदर्शनान्नियमायुक्तिरिति चेन्न; कालदेशनियमात्॥६॥** स्यादेतत् – विश्रेणिगतिरपि दृश्यते चक्रादीनां ज्योतिषां च मेरुप्रदक्षिणगतीनां माण्डलिकवायूनां विद्याधराणां च मेर्वादिप्रदक्षिणकाले, ततोऽनुश्रेणि गतिरिति नियमो नोपपद्यते; तन्न; किं कारणम्? कालदेशनियमात्। कालनियमस्तावज्जीवानां मरणकाले भवान्तरसंक्रमे, मुक्तानां चोर्ध्वगमनकालेऽनुश्रेण्येव गतिः। देशनियमोऽपि या ऊर्ध्वलोकादधोगतिरधोलोकाच्चोर्ध्वगतिस्तिर्यग्लोकाच्चाधोगतिरूर्ध्वं वाऽत्रानुश्रेण्येव। पुद्गलानामपि च या लोकान्तप्रापणी सा नियमादनुश्रेणिगतिः। या त्वन्या सा भजनीया। ततो भ्रमणरेचनादिगतिः सिद्धा।

पूर्वभावप्रज्ञापकनयावभासितं व्यवहारमन्तर्नीय रूढिवशाद्वा विनिर्मुक्तकर्मबन्धस्यापि जीवत्वमवधृत्येदमुपादिक्षत् —

## अविग्रहा जीवस्य॥२७॥

विग्रहो व्याघातः कौटिल्यमित्यनर्थान्तरम्, स यस्यां न विद्यतेऽसावविग्रहा गतिः। कस्य ? जीवस्य। कीदृशस्य ? मुक्तस्य। कथं गम्यते मुक्तस्येति?

**उत्तरत्र संसारिग्रहणादिह मुक्तगतिः॥१॥** उत्तरसूत्रे संसारिग्रहणादिह मुक्तगतिर्वि-ज्ञायते। किमर्थमिदमुच्यते ? ननु श्रेण्यन्तरसंक्रमो विग्रहः तस्याभावः अनुश्रेणिः इत्यनेनैव सिद्धः नार्थोऽनेन? इदं प्रयोजनम् – पूर्वसूत्रे जीवपुद्गलानां क्वचिद्विश्रेणिरपि गतिर्भवतीत्येतस्य ज्ञापनार्थम्। ननु तत्रैवोक्तं कालदेशनियमादनुश्रेणिर्भवति न सर्वत्रेति; न; अतस्तत्सिद्धेः।

यद्यसङ्गस्यात्मनोऽप्रतिबन्धेन गतिरालोकान्तादवधृतकाला प्रतिज्ञायते 'सदेहस्य पुनर्गतिः किं प्रतिबन्धिन्युत मुक्तात्मवत् इति परिप्रश्ने सतीदमुच्यते —

## विग्रहवती च संसारिणः प्राक् चतुर्भ्यः॥२८॥

**कालपरिच्छेदार्थं प्राक् चतुर्भ्य इति वचनम्॥१॥** समयो वक्ष्यते। चतुर्भ्यः समयेभ्यः प्राक् विग्रहवती गतिर्भवतीति कालपरिच्छेदार्थं प्राक् चतुर्भ्य इत्युच्यते। ऊर्ध्वं कस्मान्नेति चेत्? विग्रहनिमित्ताभावात्। सर्वोत्कृष्टविग्रहनिमित्तनिष्कुटक्षेत्रे उत्पित्सुः प्राणी निष्कुटक्षेत्रानुपूर्व्यर्जुश्रेण्यभावादिषुगत्यभावे निष्कुटक्षेत्रप्रापणनिमित्तां त्रिविग्रहां गतिमारभते नोर्ध्वं तथाविधोपपादक्षेत्राभावात्। तेनैव च कालेनोपपादक्षेत्रप्राप्तेः षष्टिकाद्यात्मलाभवत्। यथा षष्टिकादीनां व्रीहीणां परिच्छिन्नकालावधिपरिपाको न न्यूनेन नाभ्यधिकेनेह तथाऽन्तरभवेऽपि कालनियमो वेदितव्यः।

**चशब्दः समुच्चयार्थः॥२॥** विग्रहवती च अविग्रहा चेति समुच्चयार्थः चशब्दः। उपपादक्षेत्रं प्रति ऋज्वी गतिरविग्रहा, कुटिला विग्रहवती।

**आङ्ग्रहणं लघ्वर्थमिति चेन्न; अभिविधिप्रसङ्गात्॥३॥** स्यादेतत्–आङ्ग्रहणं कर्तव्यं लघ्वर्थमिति; तन्न; किं कारणम्? अभिविधिप्रसङ्गात्। तेन चतुर्थसमय मभिव्याप्तविग्रहः प्रवर्तेत, स चानिष्टः।

**उभयसंभवे व्याख्यानात् मर्यादासंप्रत्यय इति चेन्न; प्रतिपत्तेर्गौरवात्॥४॥** स्यान्मतम्मर्यादाभिविध्योराङ्, तत्र व्याख्यानतो विशेषप्रतिपत्तिरिति मर्यादासंप्रत्यय इत्याङ्यपि सति न दोष इति; तन्न; किं कारणम्? प्रतिपत्तेर्गौरवात्। एवं सति प्रतिपत्तेर्गौरवं स्यात्, तस्माद्विस्पष्टार्थं प्राग्ग्रहणं क्रियते।

आसां चतसृणां गतीनामार्षोक्ताः संज्ञाः – इषुगतिः, पाणिमुक्ता, लाङ्गलिका, गोमूत्रिका चेति। तत्राविग्रहा प्राथमिकी, शेषा विग्रहवत्यः। इषुगतिरिवेषुगतिः। क उपमार्थः? यथेषोर्गतिरालक्ष्यदेशाद् ऋज्वी तथा संसारिणां सिद्ध्यतां च जीवानां ऋज्वी गतिरैकसमयिकी। पाणिमुक्तेव पाणिमुक्ता। क उपमार्थः? यथा पाणिना तिर्यक् प्रक्षिप्तस्य द्रव्यस्य गतिरेकविग्रहा तथा संसारिणामेकविग्रहा गतिः पाणिमुक्ता द्वैसमयिकी। लाङ्गलमिव लाङ्गलिका। क उपमार्थः? यथा लाङ्गलं द्विवक्रितं तथा द्विविग्रहा गतिर्लाङ्गलिका त्रैसमयिकी। गोमूत्रिकेव गोमूत्रिका। क उपमार्थः? यथा गोमूत्रिका बहुवक्रा तथा त्रिविग्रहा गतिर्गोमूत्रिका चातुःसमयिकी।

यद्यमुष्या विग्रहवत्याः क्रियायाश्चातुःसमयिक्यवस्था निश्चीयते परित्यक्तव्याबाधा पुनर्गतिः कियत्काला भवतीति? अत आह –

## एकसमयाऽविग्रहा॥२६॥

**अधिकृतगतिसामानाधिकरण्यात् स्त्रीलिङ्गनिर्देशः॥१॥** गतिरधिकृता, तत्सामानाधिकरण्यादत्र स्त्रीलिङ्गनिर्देशो द्रष्टव्यः। एकः समयोऽस्या एकसमया, न विद्यते विग्रहोऽस्या:अविग्रहेति। गतिमतां हि जीवपुद्गलानामव्याघातेनैकसमयिकी गतिरालोकान्तादपीति।

**आत्मनोऽक्रियावत्त्वसिद्धेरयुक्तमिति चेन्न; क्रियापरिणामहेतुसद्भावाल्लोष्टवत् ॥२॥** स्यादेतत्–सर्वगतत्वान्निष्क्रियस्यात्मनः क्रियावत्त्वं नास्ति, ततो गतिकल्पनम-युक्तमिति? तन्न; किं कारणम्? क्रियापरिणामहेतुसद्भावात्। कथम्? लोष्टवत्। यथा लोष्टः स्वयं क्रियापरिणामित्वाद् बाह्याभ्यन्तरकारणापेक्षो देशान्तरप्राप्तिसमर्थां क्रियामारभमाणो दृष्टः तथाऽऽत्मा

कर्मवशाच्छरीरपरिणामानुविधायी तद्विधेयां क्रियामास्कन्दति, तदभावे च प्रदीपशिखावत् स्वाभाविकीमिति नास्ति दोषः।

**सर्वगतत्वे तु संसाराभावः॥३॥** यदि च सर्वगत आत्मा स्यात् क्रियाभावात् संसाराभावः स्यात्।

बन्धसन्ततिं प्रत्यनादौ कर्मोपचयवृत्तिसंबन्धेन चाक्रिमिति पञ्चविधेऽपि द्रव्यक्षेत्रकालभवभावे संसारे मिथ्यादर्शनादिप्रत्ययसन्निधाने च सत्युपयोगात्मकोऽयमात्मा सातत्येन कर्माण्यादधानो विग्रहगतावप्याहारकः प्रसक्तस्ततो नियमार्थमिदमुच्यते-

## एकं द्वौ त्रीन्वाऽनाहारकः॥३०॥

**समयसंप्रत्ययः प्रत्यासत्तेः॥१॥** 'एकसमयाऽविग्रहा' इत्यत्र समयशब्द उक्तस्तेनेह प्रत्यासत्तेरभिसंबन्धो वेदितव्यः – एकं समयं द्वौ समयौ त्रीन् समयान् इति। ननु च तत्र समयशब्द उपसर्जनीभूतः कथमिहाभिसंबध्यते ? अन्यस्यासंभवात् सामर्थ्यात् संबन्धो द्रष्टव्यः।

**वा शब्दो विकल्पार्थः॥२॥** वाशब्दोऽत्र विकल्पार्थो ज्ञेयः। विकल्पश्च यथेच्छातिसर्गः, एकं वा द्वौ वा त्रीन्वेति।

**सप्तमीप्रसङ्ग इति चेन्न; अत्यन्तसंयोगस्य विवक्षितत्वात्॥३॥** स्यादेतत् - आहरणक्रियाया अधिकरणं काल इति सप्तमी प्राप्नोतीति; तन्न; किं कारणम्? अत्यन्तसंयोगस्य विवक्षितत्वात्। अत्यन्तसंयोगे हि तदपवादात् द्वितीया विधीयते।

**त्रयाणां शरीराणां षण्णां पर्याप्तीनां योग्यपुद्गलग्रहणमाहारः॥४॥** तैजसकार्मणशरीरे ह्यासंसारान्तान्नित्यमपचीयमानस्वयोग्यपुद्गलेऽतः शेषाणां त्रयाणां

शरीराणामौदारिकवै-क्रियिकाहारकाणामाहाराद्यभिलाषकारणानां षण्णां पर्याप्तीनां योग्यपुद्गलग्रहणमाहार इत्यु-च्यते।

**विग्रहगतावसंभवादाहारकशरीरनिवृत्तिः॥५॥** ऋद्धिप्राप्तानामृषीणामाहारकशरीरमा-विर्भवतीति विग्रहगतौ तस्यासंभवान्निवृत्तिः।

**शेषाहाराभावो व्याघातात्॥६॥** विग्रहगतौ शेषस्याहारस्याभावः। कुतः? व्याघातात्। अष्टविधकर्मपुद्गलसूक्ष्मपरिणतोपचितमूर्तिकार्मणशरीरवशात् प्रावृट्कालपरिणतजलधर निर्गतसलिलग्रहणसमर्थनिक्षिप्ततप्तायससायकवत् पूर्वदेहनिवृत्तिसमुद्घातदुःखोष्णत्वाद् व्रज-न्नप्याहारकः, वक्रगतिवशादेकं द्वौ त्रीन्वा समयाननाहारको भवति। तत्रैकसमयिक्या-मिषुगतावुक्तमाहारमनुभवन्नेव गच्छति। पाणिमुक्तायामेकविग्रहायां द्विसमयायां प्रथमे समयेऽनाहारकः। लाङ्गलिकायां द्विविग्रहायां त्रिसमयायां प्रथमद्वितीययोः समययोरनाहार-कस्तृतीये आहारकः। गोमूत्रिकायां त्रिविग्रहायां चतुःसमयायां चतुर्थसमये आहारक इतरेष्वनाहारकः।

तस्य खलु संसारिणः शुभाशुभफलप्रदकार्मणशरीरानुगृहीतक्रियाविशेषस्यानु-श्रेण्यास्कन्दतः पूर्वोपात्तानुभवनं प्रति कर्मभिरापूर्यमाणस्याविग्रहविग्रहवद्गमनद्वयाक्षिप्त-देशान्तरस्याभिनवमूर्त्यन्तरनिर्वृत्तिप्रकारप्रतिपादनार्थमिदमाह –

## सम्मूर्च्छनगर्भोपपादा जन्म॥३१॥

**समन्ततो मूर्च्छनं सम्मूर्च्छनम्॥१॥** त्रिषु लोकेषूर्ध्वमधस्तिर्यक् च देहस्य समन्ततो मूर्च्छनं सम्मूर्च्छनमवयवप्रकल्पनम्।

**शुक्रशोणितगरणाद् गर्भः॥२॥** यत्र शुक्रशोणितयोः स्त्रिया उदरमुपगतयोर्गरणं मिश्रणं भवति स गर्भः।

**मात्रोपयुक्ताहारात्मसात्करणाद्वा॥३॥** अथवा, मात्रोपयुक्तस्याहारस्यात्मसात्करणाद् गरणाद् गर्भः।

**उपेत्य पद्यतेऽस्मिन्नित्युपपादः॥४॥** "हलः" इत्यधिकरण साधनो घञ्। देवनारकोत्पत्तिस्थानविशेषस्य संज्ञेति। एते त्रयः संसारिणां जीवानां जन्मप्रकाराः।

**सम्मूर्च्छनग्रहणमादावतिस्थूलत्वात् ॥५॥** सम्मूर्च्छनजं हि शरीरमतिस्थूलम्, अतोऽस्य ग्रहणमादौ क्रियते। ननु गर्भजशरीरमपि वैक्रियिकशरीरादतिस्थूलं तयोः कस्यादौ वचनं न्याय्यमिति? उच्यते –

**अल्पकालजीवित्वात् सम्मूर्च्छनम् ॥६॥** गर्भजौपपादिकजीवेभ्यः समूर्च्छनजाः प्राणिनोऽल्पकालजीविनस्ततः सम्मूर्च्छनस्यादौ न्याय्यम्। किञ्च

**तत्कार्यकारणप्रत्यक्षत्वात् ॥७॥** गर्भोपपादजन्मनोः कार्यकारणेऽप्रत्यक्षे, यत्पुनः सम्मूर्च्छनजन्मनः कारणं मांसादि तत्कार्यं च शरीरं तदुभयं लोके प्रत्यक्षम्, ततश्चास्यादौ ग्रहणं क्रियते।

**तदनन्तरं गर्भग्रहणं कालप्रकर्षनिष्पत्तेः॥८॥** गर्भजन्म हि सम्मूर्च्छनजन्मनः कालप्रकर्षेण निष्पद्यते, ततस्तदनन्तरं तस्य ग्रहणं न्याय्यम्।

**उपपादग्रहणमन्ते दीर्घजीवित्वात् ॥९॥** सम्मूर्च्छनेभ्यो गर्भजेभ्यश्चौपपादिका दीर्घजीविन इत्यन्ते ग्रहणं क्रियते। आह – किं कृतोऽयं जन्मविकल्प इति? उच्यते –

**अध्यवसायविशेषात् कर्मभेदे तत्कृतो जन्मविकल्पः॥१०॥** अध्यवसायः परिणामः सोऽसंख्येयलोकविकल्पः, तद्भेदात्तत्कार्यकर्मबन्धविकल्पस्ततस्तत्फलं जन्मविकारो वेदि-

तव्यः। कारणानुरूपं हि लोके दृश्यते कार्यम्। शुभाशुभलक्षणं च कर्म तद्रूपमेव जन्म प्रादुर्भावयति।

**प्रकारभेदाज्जन्मभेद इति चेन्न; तद्विषयसामान्योपादानात्॥११॥** स्यादेतत्प्रकारा बहवः तत्सामानाधिकरण्याज्जन्मनोऽपि बहुत्वं प्राप्नोति, यथा 'जीवादयः पदार्थाः' इति; तन्न; किं कारणम्? तद्विषयसामान्योपादानात्। तत्प्रकारविषयमिह सामान्यं जन्मशब्देनोपादीयते, तत एकत्वनिर्देशः, यथा जीवादयस्तत्त्वमिति।

अथाधिकृतस्य संसारिविषयोपभोगपलब्ध्यधिष्ठानप्रवणस्य जन्मनो योनिविकल्पो वक्तव्य इति? अत आह —

## सचित्तशीतसंवृताः सेतरा मिश्राश्चैकशस्तद्योनयः॥३२॥

**आत्मनः परिणामविशेषश्चित्तम्॥१॥** आत्मनश्चैतन्यपरिणामविशेषश्चित्तं तेन सह वर्तन्त इति सचित्ताः।

**शीत इति स्पर्शविशेषः॥२॥** शीत इत्यनेन स्पर्शविशेषो गृह्यते। शुक्लादिवदुभय वचनत्वात्तद्युक्तं द्रव्यमप्याह।

**संवृतो दुरुपलक्षः॥३॥** सम्यग्वृतः संवृत इति दुरुपलक्षः प्रदेश उच्यते।

**सेतराः सप्रतिपक्षाः॥४॥** सह इतरैः सेतराः सप्रतिपक्षा इत्यर्थः। के पुनरितरे? अचित्तोष्णविवृताः।

**मिश्रग्रहणमुभयात्मकसंग्रहार्थम्॥५॥** मिश्रग्रहणं क्रियते उभयात्मकसंग्रहार्थं सचित्ताचित्तशीतोष्णसंवृतविवृता इति।

**चशब्दः प्रत्येकसमुच्चयार्थः॥६॥** मिश्राश्चेति च शब्दः क्रियते प्रत्येकसमुच्चयार्थः। इतरथा हि पूर्वोक्तानामेव विशेषणं स्यात्। तेन सचित्तशीतसंवृताः सेतरा यदा मिश्रास्तदा योनयो भवन्तीत्ययमर्थो लभ्यते। चशब्दे पुनः सचित्तादयः प्रत्येकं च योनयो भवन्ति मिश्राश्चेत्ययमर्थो लब्धः।

**न वाऽन्तरेणापि तत्प्रतीतेः॥७॥** न वैतत् प्रयोजनमस्ति। कुतः? अन्तरेणापि तत्प्रतीतेः। अन्तरेणापि हि चशब्दं समुच्चयार्थः प्रतीयते यथा "पृथिव्यापस्तेजो वायुः" इति। ननु चोक्तम् – इतरथा हि पूर्वोक्तानामेव विशेषणं स्यादिति; नैष दोषः; विशेषणस्य समुच्चयस्य च संभवे समुच्चय इति व्याख्यायते।

**इतरयोनिभेदसमुच्चयार्थस्तु॥८॥** सूत्रेऽनुक्तानां योनिभेदानां समुच्चयार्थस्तर्हि चशब्दः। के पुनस्ते? उत्तरत्र वक्ष्यन्ते।

**एकशो ग्रहणं क्रममिश्रप्रतिपत्त्यर्थम्॥९॥** एकैकः एकश इति वीप्सायां शस्, तस्य ग्रहणं क्रममिश्रप्रतिपत्त्यर्थम्। यथैवं विज्ञायेत सचित्तश्चाऽचित्तश्च शीतश्चोष्णश्च संवृतश्च विवृतश्चेति। मैवं विज्ञायि सचित्तशीतश्चेत्यादि।

**तद्ग्रहणं प्रकृतापेक्षम्॥१०॥** तद्ग्रहणं क्रियते प्रकृतापेक्षार्थम्। तेषां योनयस्त द्योनयः। केषाम्? सम्मूर्च्छनादीनामिति। यूयत इति योनिः।

**सचित्तादिद्वन्द्वे पुंवद्भावाभावो भिन्नार्थत्वात्॥११॥** योनिशब्दोऽयं स्त्रीलिङ्गस्तद-पेक्षाः सचित्तादयः शब्दाः स्त्रीलिङ्गाः, तेषां द्वन्द्वे पुंवद्भावो न प्राप्नोति – सचित्ताश्च शीताश्च संवृताश्च सचित्तशीतसवृता इति। कुतः? भिन्नार्थत्वात्। एकाश्रये हि पुंवद्भाव उक्तः।

**न वा; योनिशब्दस्योभयलिङ्गत्वात्॥१२॥** न वैष दोषः। किं कारणम्? उभय-लिङ्गत्वाद्योनिशब्दस्य। इह पुल्लिङ्गो वेदितव्यः।

**योनिजन्मनोरविशेष इति चेन्न; आधाराधेयभेदाद्विशेषोपपत्तेः॥१३॥** स्यान्मतम् –योनिजन्मनोरविशेषः, यत आत्मैव देवादिजन्मपर्यायादौपपादिक इत्युच्यते, सैव च योनिरितिः; तन्न; किं कारणम्? आधाराधेयविशेषोपपत्तेः। आधारो हि योनिराधेयं जन्म, यतः सचित्तादियोन्यधिष्ठान आत्मा सम्मूर्च्छनादिजन्मना शरीराहारेन्द्रियोग्यान् पुद्गलाना-दत्ते।

**सचित्तग्रहणमादौ चेतनात्मकत्वात्॥१४॥** सचित्तग्रहणमादौ क्रियते। कुतः? चेतनात्मकत्वात्। चेतनात्मको लोके ह्यर्थः प्रधानम्।

**तदनन्तरं शीताभिधानं तदाप्यायनहेतुत्वात्॥१५॥** तदनन्तरं शीताभिधानं क्रियते। कुतः? तदाप्यायनहेतुत्वात्। सचेतनस्य ह्यर्थस्य शीतमाप्यायनकारणं भवति।

**अन्ते संवृतग्रहणं गुप्तरूपत्वम्॥१६॥** अन्ते संवृतग्रहणं क्रियते। कुतः? गुप्तरूपत्वात्। गुप्तरूपं हि लोके कर्माग्राह्यं भवति।

**एक एव योनिरिति चेन्न; प्रत्यात्मं सुखदुःखानुभवनहेतुसद्भावात्॥१७॥** स्यान्मतमेक एव योनिरस्तु सर्वेषां जीवानामिति? तन्न; किं कारणम्? प्रत्यात्मं सुखदुःखानुभवनहेतुसद्भावात्। शुभाशुभपरिणामा हि प्रत्यात्मं भिन्नास्तज्जनितश्च कर्मबन्धो विचित्रः, अतस्तेन सुखदुःखानुभवनकारणं बहुविधमारभ्यते।

**तत्राऽचित्तयोनिका देवनारकाः॥१८॥** देवाश्च नारकाश्चाऽचित्तयोनिकाः। तेषां हि योनिरुपपादप्रदेशपुद्गलप्रचयोऽचित्तः।

**गर्भजा मिश्रयोनयः॥१९॥** गर्भजा ये जीवास्ते मिश्रयोनयो वेदितव्याः। तेषां हि मातुरुदरे शुक्रशोणितमचित्तं तदात्मना चित्तवता मिश्रं योनिः।

**शेषास्त्रिविकल्पाः॥२०॥** शेषाः सम्मूर्च्छनजास्त्रिविकल्पा भवन्ति – केचित् सचित्तयोनयः, अन्येऽचित्तयोनयः, अपरे मिश्रयोनय इति। तत्र सचित्तयोनयः साधारणशरीराः। कुतः? परस्पराश्रयत्वात्। इतरेऽचित्तयोनयो मिश्रयोनयश्च।

**शीतोष्णयोनयो देवनारकाः॥२१॥** देवा नारकाश्च शीतयोनयो भवन्ति उष्णयोनयश्च। तेषां हि उपपादस्थानानि कानिचिच्छीतानि कानिचिदुष्णानि इति।

**उष्णयोनिस्तेजस्कायिकः॥२२॥** अग्निकायिको जीव उष्णयोनिर्द्रष्टव्यः।

**इतरे त्रिप्रकाराः॥२३॥** इतरे जीवास्त्रिप्रकारयोनयो भवन्ति - केचिच्छीतयोनयः, अन्ये उष्णयोनयः, अपरे मिश्रयोनय इति।

**देवनारकैकेन्द्रियाः संवृतयोनयः॥२४॥** देवनारका एकेन्द्रियाश्च संवृतयोनयो भवन्ति।

**विकलेन्द्रिया विवृतयोनयः॥२५॥** विकलेन्द्रिया जीवा विवृतयोनयो वेदितव्याः।

**मिश्रयोनयो गर्भजाः॥२६॥** गर्भजा जीवा मिश्रयोनयोऽवगन्तव्याः।

**तद्भेदाश्च शब्दसमुच्चिताः प्रत्यक्षज्ञानिदृष्टा इतरेषामागमगम्याश्चतुरशीतिशत-सहस्त्रसंख्याः॥२७॥** तेषां नवानां योनीनां भेदाः कर्मभेदजनितविविक्तवृत्तयः प्रत्यक्ष-ज्ञानिभिर्दिव्येन चक्षुषा दृष्टाः, इतरेषां छद्मस्थानामागमेन श्रुताख्येन गम्याश्चतुरशीति-शतसहस्रसंख्या आख्यायन्ते। तद्यथा – नित्यनिगोतानां सप्त शतसहस्राणि, अनित्य-निगोतानां च सप्त शतसहस्राणि। के पुनर्नित्यनिगोताः के चानित्यनिगोताः? त्रिष्वपि कालेषु त्रसभावयोग्या ये न भवन्ति ते नित्यनिगोताः। त्रसभावमवाप्ता अवाप्स्यन्ति च ये तेऽनित्यनिगोताः। पृथिव्यप्तेजोवायूनां सप्त सप्त शतसहस्राणि, वनस्पतिकायिकानां दश शतसहस्राणि, विकलेन्द्रियाणां षट् शतसहस्राणि, देवनारकपञ्चेन्द्रियतिरश्चां प्रत्येकं

चत्वारि शतसहस्राणि, मनुष्याणां चतुर्दश शतसहस्राणि। तान्येतानि समुदितानि चतुरशीतिशतसहस्राण्याख्यायन्ते। उक्तं च –

**"णिच्चिदरधादुसत्त य तरुदस वियलिंदिएसु छच्चेव।**
**सुरणिरयतिरियचउरो चोद्दस मणुएसु सदसहस्सा॥"** इति।

एवमेतस्मिन्नवयोनिभेदसंकटे त्रिविधे जन्मनि सर्वप्राणिभृतामनियमेन प्रसक्तेऽवधारणार्थमाह –

## जरायुजाण्डजपोतानां गर्भः॥३३॥

**जालवत्प्राणिपरिवरणं जरायुः॥१॥** यज्जालवत् प्राणिपरिवरणं विततमांसशोणितं तज्जरायुरित्युच्यते।

**शुक्रशोणितपरिवरणमुपात्तकाठिन्यं नखत्वक्सदृशं परिमण्डलमण्डम्॥२॥** यत्र खलु नखत्वक्सदृशमुपात्तकाठिन्यं शुक्रशोणितपरिवरणं परिमण्डलं तदण्डमित्याख्यायते।

**संपूर्णावयवः परिस्पन्दादिसामर्थ्योपलक्षितः पोतः॥३॥** किञ्चित् परिवरणमन्तरेण परिपूर्णावयवो योनिनिर्गतमात्र एव परिस्पन्दादिसामर्थ्योपेतः पोत इत्युच्यते। जरायौ जाताः जरायुजाः अण्डे जाता अण्डजाः जरायुजाश्चाऽण्डजाश्च पोताश्च जरायुजाण्डजपोताः।

**पोतजा इत्ययुक्तम्; अर्थभेदाभावात्॥४॥** केचित् पोतजा इति पठन्ति, तदयुक्तम्; कुतः? अर्थभेदाभावात्। न हि पोते कश्चिदन्यो जातोऽस्ति।

**आत्मा पोतज इति चेन्न; तत्परिणामात् ॥३॥** स्यान्मतम् – आत्मा पोते जातः पोतज इत्यर्थभेदोऽस्तीति? तन्न; किं कारणम्? तत्परिणामात्। आत्मैव पोतपरिणामेन परिणतः पोत इत्युच्यते, न पृथगात्मनः पोतो नाम कश्चिदस्ति जरायुवत्। पोतोऽजनिष्ट पोतज इति चेदर्थविशेषो नास्ति।

**जरायुजग्रहणमादावभ्यर्हितत्वात् ॥६॥** जरायुजग्रहणमादौ क्रियते। कुतः? अभ्यर्हितत्वात्। कथमभ्यर्हितत्वम्?

**क्रियारम्भशक्तियोगात् ॥७॥** अण्डजपोतासाधारण्यो हि भाषाध्ययनादयः क्रिया जरायुजेषु दृश्यन्ते।

**केषाञ्चिन्महाप्रभावत्वात् ॥८॥** तत्र हि जाताः केचन चक्रधरवासुदेवादयो महाप्रभावा भवन्ति। किञ्च,

**मार्गफलाभिसंबन्धात् ॥९॥** सम्यग्दर्शनादिमार्गफलेन मोक्षसुखेन चाभिसंबन्धो नान्येषामित्यभ्यर्हितत्वम्।

**तदनन्तरमण्डजग्रहणं पोतेभ्योऽभ्यर्हितत्वात् ॥१०॥** तदनन्तरमण्डजग्रहणं क्रियते। कुतः? पोतेभ्योऽभ्यर्हितत्वात्। अण्डजेषु हि केषुचित् शुकसारिकादयोऽक्षरोच्चारणादिषु क्रियासु कुशला भवन्तीत्यभ्यर्हिताः पोतेभ्यः।

**उद्देशवन्निर्देश इति चेन्न; गौरवप्रसङ्गात् ॥११॥** स्यान्मतमुद्देशवन्निर्देशेन भवितव्यमिति संमूर्च्छनजानां प्राग्ग्रहणं कर्तव्यमिति तन्न; किं कारणम्? गौरवप्रसङ्गात्। यदि हि संमूर्च्छनजनिर्देश आदौ क्रियते शास्त्रस्य गौरवं स्यात् – एकद्वित्रिचतुरिन्द्रियाणां पञ्चेन्द्रियाणां तिरश्चां मनुष्याणां च केषाञ्चित्समूर्च्छनमिति, अतो गर्भजौपपादिकानुक्त्वा 'शेषाणां संमूर्च्छनम्' इति लघुनोपायेन निर्देक्ष्यामीत्युद्देशक्रमोऽतिक्रान्तः।

**सिद्धे विधिरवधारणार्थः॥१२॥** जरायुजादीनां सामान्येन सिद्धे गर्भजन्मसंबन्धे पुनर्विधिरारभ्यमाणो नियमार्थः, जरायुजाण्डजपोतानामेव गर्भ इति। अथ नियमार्थे आरम्भे सति जरायुजाण्डजपोतानां गर्भ एवेति नियमः कस्मान्न भवति? उत्तरत्र शेषाणामिति वचनात्।

यद्यमीषां जरायुजाण्डजपोतानां गर्भोऽवध्रियते। अथोपपादः खलु केषां भवतीति? अत आह –

## देवनारकाणामुपपादः॥३४॥

**देवादिगत्युदय एवास्य जन्मेति चेन्न; शरीरनिर्वर्तकपुद्गलाभावात्॥१॥** स्यादेतत् मनुष्यस्तैर्यग्योनो वा छिन्नायुः कार्मणकाययोगस्थो देवादिगत्युदयाद् देवादिव्यपदेशभागिति कृत्वा तदेवास्य जन्मेति मतमिति; तन्न; किं कारणम् ? शरीरनिर्वर्तक-पुद्गलाभावात्। देवादिशरीरनिर्वृत्तौ हि देवादिजन्मेष्टम् तस्यां चावस्थायामनाहारकत्वान्न देवादिशरीरनिर्वृत्तिरस्ति तत उपपादो जन्म युक्तम्, तच्च देवनारकाणामिति।

निर्दिष्टजन्मभेदेभ्यो जरायुजादिभ्योऽन्येषां किं जन्म इति? अत आह –

## शेषाणां सम्मूर्च्छनम्॥३५॥

**उभयत्र नियमः पूर्ववत्॥१॥** उभयोरपि योगयोः पूर्ववन्नियमो वेदितव्यः, देवनारकाणामेवोपपादः, शेषाणामेव संमूर्च्छनं नोक्तानामिति।

कथं पुनर्ज्ञायते पूर्वत्र जन्मनियमो न जन्मवन्नियम इति?

**शेषग्रहणात् पूर्वत्र जन्मनियमः॥१॥** इह शेषग्रहणाज्ज्ञायते पूर्वत्र जन्मनियम इति। जरायुजाण्डजपोतानामेव गर्भो देवनारकाणामेवोपपाद इत्यवधारणे गर्भोपपादजन्मनी नियते, जरायुजादयो न नियतास्तेषां सम्मच्छेनमपि प्राप्तमतः शेषग्रहणं क्रियते 'शेषाणामेव संमूर्च्छनं नोक्तानाम्' इत्यवधारणार्थः। यदि हि जन्मवतां नियमः स्यात् जरायुजाण्डजपोतानां गर्भ एव देवनारकाणामुपपाद एवेति गर्भोपपादयोरनवधारणात् यत्र सम्मूर्च्छनं चान्यच्चास्ति तत्र सम्मूर्च्छनमेवेति नियमाच्छेषग्रहणमनर्थकं स्यात्।

आह - इदं सूत्रमनर्थकम्। कथम्? पूर्वयोर्योगयोरुभयतो नियमे सति जरायुजादीनां गर्भोपपादयोश्चाऽसति व्यभिचारे, शेषाणामेव सम्मूर्च्छनमुत्सर्गोऽवतिष्ठते इति। उच्यते – स एवोभयतो नियमो दुर्लभः, यत्तस्यैकत्वादतोऽन्यतरनियम एवाश्रयितव्यः, तस्मिंश्च सति सूत्रमिदमारब्धव्यम्।

तेषां पुनः संसारिणां त्रिविधजन्मनामाहितबहुविकल्पनवयोनिभेदानां शुभाशुभ नामकर्मनिर्वर्तितानि बन्धफलानुभवनाधिष्ठानानि शरीराणि कानीति? अत आह –

## औदारिकवैक्रियिकाहारकतैजसकार्मणानि शरीराणि॥३६॥

**शीर्यन्त इति शरीराणि॥१॥**

**घटाद्यतिप्रसङ्ग इति चेन्न; नामकर्मनिमित्तत्वाभावात्॥२॥** यदि शीर्यन्त इति शरीराणि घटादीनामपि विशरणमस्तीति शरीरत्वमतिप्रसज्येत; तन्न; किं कारणम्? नामकर्मनिमित्तत्वाभावात्। शरीरनामकर्मोदयाच्छरीरम् न च घटादिषु सोऽस्तीति नास्त्यतिप्रसङ्गः।

**विग्रहाभाव इति चेन्न; रूढिशब्देष्वपि व्युत्पत्तौ क्रियाश्रयात् ॥३॥** स्यान्मतम् - यदि शरीरनामकर्मोदयाच्छरीरव्यपदेशः 'शीर्यन्त इति शरीराणि' इति विग्रहो नोपपद्यत इति; तन्न; किं कारणम्? रूढिशब्देष्वपि व्युत्पत्तौ क्रियाश्रयात्। यथा 'गच्छतीति गौः' इति विगृह्यते, एवं 'शीर्यन्त इति शरीराणि' इति विग्रहो भवति।

**शरीरत्वादिति चेन्न; तदभावात् ॥४॥** स्यान्मतम् – शरीरत्वं नाम सामान्य-विशेषोऽस्ति, तद्योगाच्छरीरं न नामकर्मोदयादिति; तन्न; किं कारणम्? तदभावात्। 'अतत्स्वभावेऽनवधारणप्रसङ्गोऽग्निवत्' इत्येवमादिनाऽर्थान्तरभूतजातिसंबन्धकल्पना प्रतिविहितेति नास्ति शरीरत्वम्।

**उदारात् स्थूलवाचिनो भवे प्रयोजने वा ठञ् ॥५॥** उदारं स्थूलमिति यावत्, ततो भवे प्रयोजने वा ठञि औदारिकमिति भवति।

**विक्रियाप्रयोजनं वैक्रियिकम् ॥६॥** अष्टगुणैश्वर्ययोगादेकानेकाणुमहच्छरीरविविध-करणं विक्रिया, सा प्रयोजनमस्येति वैक्रियिकम्।

**आह्रियते तदित्याहारकम् ॥७॥** सूक्ष्मपदार्थनिर्ज्ञानार्थमसंयमपरिजिहीर्षया च प्रमत्तसंयतेनाह्रियते निर्वर्त्यते तदित्याहारकम्।

**तेजोनिमित्तत्वात्तैजसम् ॥८॥** यत्तेजोनिमित्तं तत्तैजसमिदम्, तेजसि भवं वा तैजसमित्याख्यायते।

**कर्मणामिदं कर्मणां समूह इति वा कार्मणम् ॥९॥** कर्मणामिदं कार्यं कर्मणां समूह इति वा कथञ्चिद्भेदविवक्षोपपत्तेः कार्मणमिति व्यपदिश्यते।

**सर्वेषां कार्मणत्वप्रसङ्ग इति चेन्न; प्रतिनियतौदारिकादिनिमित्तत्वात् ॥१०॥** स्यान्मतम् – यदि कर्मणामिदं कर्मणां समूह इति वा कार्मणमित्युच्यते सर्वेषामपि

तत्तुल्यमित्यौदारिकादीनामपि कार्मणत्वप्रसङ्ग इति; तन्न; किं कारणम्? प्रतिनियतौदारिकादिनिमित्तत्वात्। औदारिकशरीरनामादीनि हि प्रतिनियतानि कर्माणि सन्ति तदुदयभेदाद्भेदो भवति।

**तत्कृतत्वेऽप्यन्यत्वदर्शनात् घटादिवत्॥११॥** यथा मृत्पिण्डकारणाविशेषेऽपि घटशरावादीनां संज्ञास्वालक्षण्यादिभेदाद्भेदः तथा कर्मकृतत्वाविशेषेऽप्यौदारिकादीनां संज्ञादिभेदाद्भेदोऽवसेयः।

**तत्प्रणालिकया चाभिनिष्पत्तेः॥१२॥** कार्मणशरीरप्रणालिकया चौदारिकादीनामभिनिष्पत्तिः, अतः कार्यकारणभेदान्न सर्वेषां कार्मणत्वम्। किञ्च

**विस्रसोपचयेन व्यवस्थानात् क्लिन्नगुडरेणुश्लेषवत्॥१३॥** यथा वैसस्रिकपरिणामात् क्लिन्नगुडे रेणूनामुपश्लिष्टानामवस्थानं तथा कार्मणोऽप्यौदारिकादीनां वैस्रसिकोपचये-नावस्थानमिति नानात्वं सिद्धम्।

**कार्मणमसत् निमित्ताभावादिति चेन्न; निमित्तनिमित्तिभावात्तस्यैव प्रदीपवत्॥१४॥** स्यादेतत् – न कार्मणं नाम शरीरमस्ति। कुतः? निमित्ताभावात्। यस्य च निमित्तं नास्ति तदसत् यथा खरविषाणमिति तन्न; किं कारणम्? तस्यैव निमित्त-निमित्तिभावात् प्रदीपवत्। यथा प्रदीपात्मैवात्मप्रकाशनात् प्रकाश्यप्रकाशकश्च कार्मणमेवात्मनो निमित्तं निमित्ति चेति सिद्धम्।

**मिथ्यादर्शनादिनिमित्तत्वाच्च॥१५॥ न** कार्मणस्य निमित्तं नास्ति। किं तर्हि निमित्तम्? मिथ्यादर्शनादि। ततोऽसिद्धमेतत् - 'निमित्ताभावात्' इति।

**इतरथा ह्यनिर्मोक्षप्रसङ्गः॥१६॥** यदि कार्मणमनिमित्तमिति गृह्येत, अनिर्मोक्षः स्यादहेतुकस्य विनाशहेतुत्वाभावात्।

**अशरीरं विशरणाभावादिति चेन्न; उपचयापचयधर्मत्वात् ॥१७॥** स्यादेतत् - यथौदारिकादि शीर्यत इति शरीरं न तथा कार्मणं शीर्यत इत्यशरीरत्वमस्येति; तन्न; किं कारणम्? उपचयापयचयधर्मत्वात्। निमित्तवशाद्धि कर्मायव्ययौ सततं स्त इति विशरणमस्त्येव।

**तद्ग्रहणमादाविति चेन्न; तदनुमेयत्वात् ॥१८॥** स्यादेतत् – कार्मणग्रहणमादौ कर्तव्यम्। कुतः? तदधिष्ठानत्वादितरेषामिति? तन्न; किं कारणम्; तदनुमेयत्वात्। यथा घटादिकार्योपलब्धे परमाण्वनुमानं तथौदारिकादिकार्योपलब्धेः कार्मणानुमानम् "कार्य-लिङ्गं हि कारणम्" इति।

**तत एव कर्मणो मूर्तिमत्त्वं सिद्धम् ॥१९॥** यस्मात् मूर्तिमदस्य कार्यं तत एव कर्मणः कारणस्य मूर्तिमत्त्वं सिद्धम्। न ह्यमूर्तेनात्मगुणेन निष्क्रियेणाऽदृष्टेन मूर्तिमतः क्रियावतो द्रव्यस्यारम्भो युक्त इति।

**औदारिकग्रहणमादावतिस्थूलत्वात् ॥२०॥** अतिस्थूलमिदमौदारिकमिन्द्रियग्राह्य-त्वात्, ततोऽस्य ग्रहणमादौ क्रियते।

**उत्तरेषां क्रमः सूक्ष्मक्रमप्रतिपत्त्यर्थः ॥२१॥** उत्तरेषां वैक्रियिकादीनां पाठक्रमः सूक्ष्मक्रमप्रतिपत्त्यर्थो वेदितव्यः। वक्ष्यते हि 'परं परं सूक्ष्मम्' इति।

यथौदारिकस्येन्द्रियैरुपलब्धिस्तथेतरेषां कस्मान्न भवतीति? अत आह –

## परं परं सूक्ष्मम् ॥३७॥

**परशब्दस्यानेकार्थत्वे विवक्षातो व्यवस्थार्थगतिः॥१॥** परशब्दोऽयमनेकार्थवचनः। क्वचिद्व्यवस्थायां वर्तते – यथा पूर्वः पर इति। क्वचिदन्यार्थे वर्तते – यथा परपुत्रः परभार्येति, अन्यपुत्रोऽन्यभार्येति गम्यते। क्वचित्प्राधान्ये वर्तते – यथा परमियं कन्या

अस्मिन् कुटुम्बे प्रधानमिति गम्यते। क्वचिदिष्टार्थे वर्तते–यथा परं धाम गत इष्टं धाम गत इत्यर्थः। तत्रेह विवक्षातो व्यवस्थार्थो गृह्यते।

**पृथग्भूतानां शरीराणां सूक्ष्मगुणेन वीप्सानिर्देशः॥२॥** संज्ञालक्षणप्रयोजनादिभिः पृथग्भूतानां शरीराणां सूक्ष्मगुणेन वीप्सानिर्देश क्रियते 'परं परम्' इति।

यदि परं परं सूक्ष्मं प्रदेशतोऽपि नूनं परं परं हीनमिति विपरीत-प्रतिपत्तिनिवृत्त्यर्थमाह –

## प्रदेशतोऽसंख्येयगुणं प्राक् तैजसात् ॥३८॥

**प्रदेशाः परमाणवः॥१॥** प्रदिश्यन्ते इति प्रदेशाः परमाणवः, ते हि घटादिष्व-वयवत्वेन प्रदिश्यन्ते। प्रदिश्यन्ते एभिरिति वा प्रदेशाः, तैर्हि आकाशादीनां क्षेत्रादिविभागः प्रदिश्यते।

**प्रदेशेभ्यः प्रदेशतः॥२॥ "अपादानेऽहीयरुहोः"** इति तसिः।

**प्रदेशैर्वा प्रदेशतः॥३॥** तसि प्रकरणे **"आद्यादिभ्य उपसंख्यानम्"** इति तसिः।

**संख्यानातीतोऽसंख्येयः॥४॥** संख्यानं गणनमतीतो यः सोऽसंख्येयः, असंख्येयो गुणोऽस्य तदिदमसंख्येयगुणम् ।

**परं परमित्यनुवृत्तेः प्राक् तैजसादिति वचनम्॥५॥** 'परं परम्' इत्युनुवर्तते, तेन आकर्मणादसंख्येयगुणत्वे प्राप्ते मर्यादानिर्णयार्थं प्राक् तैजसादित्युच्यते।

**प्रदेशत इति विशेषणमवगाहक्षेत्रनिवृत्त्यर्थम्॥६॥** प्रदेशतः परं परमसंख्येयगुणं नावगाहक्षेत्रत इत्येतस्य प्रतिपत्त्यर्थं 'प्रदेशतः' इति विशेषणमुपादीयते। तेनैतदुक्तं

भवति - औदारिकाद्वैक्रियिकमसंख्येयगुणप्रदेशं वैक्रियिकादाहारकमसंख्येयगुणप्रदेशमिति। को गुणकारः? पल्योपमस्यासंख्येयभागः।

**उत्तरोत्तरस्य महत्त्वप्रसङ्ग इति चेन्न; प्रचयविशेषादयःपिण्डतूलनिचयवत् ॥९॥** स्यान्मतम्–यद्युत्तरोत्तरमसंख्येयगुणप्रदेशं परिमाणमहत्त्वेनापि भवितव्यमिति? तन्न; किं कारणम्? प्रचयविशेषादयःपिण्डतूलनिचयवत्। यथा अयःपिण्डस्य बहुप्रदेशत्वेऽप्यल्प-परिमाणत्वं तूलनिचयस्य चाल्पप्रदेशत्वेऽपि महापरिमाणत्वं प्रचयविशेषात्, तथोत्तरस्य शरीरस्यासंख्येयगुणप्रदेशत्वेऽप्यल्पपरिमाणत्वं बन्धविशेषाद्वेदितव्यम्।

उक्तं प्राक् तैजसात् परं परमसंख्येयगुणमिति, अथोत्तरयोः किं समप्रदेशत्व-मुतास्ति कश्चिद्विशेषः? अस्तीत्याह –

## अनन्तगुणे परे॥३९॥

प्रदेशत इत्यनुवर्तते। तेनैवमभिसम्बन्धः क्रियते आहारकात्तैजसं प्रदेशतोऽनन्तगुणं तैजसात् कार्मणं प्रदेशतोऽनन्तगुणमिति। को गुणकारः? अभव्यानामनन्तगुणः सिद्धाना-मनन्तभागः।

**अनन्तगुणत्वादुभयोस्तुल्यत्वमिति चेन्न; अनन्तस्यानन्तविकल्पत्वात् ॥१॥** स्यादेतत् – अनन्तगुणत्वादुभयोस्तैजसकार्मणयोस्तुल्यत्वमिति, तन्न; किं कारणम्? अनन्तस्यानन्तविकल्पत्वात्। अनन्तो ह्यनन्तविकल्पः संख्येयस्य संख्येयविकल्पवत्।

**आहारकादुभयोरनन्तगुणत्वमिति चेन्न; परं परमित्यभिसंबन्धात् ॥२॥** स्यान्मतम् – आहारकादुभयोरनन्तगुणत्वमेव गम्यते न तैजसात् कार्मणस्यानन्तगुणत्वम्,

अतस्तयोस्तुल्यप्रदेशत्वं प्राप्नोतीति; तन्न; किं कारणम्? परं परमित्यभिसंबन्धात् परं परमनन्तगुणमिति गम्यते।

**परस्मिन् सत्यारातीयस्यापरत्वात् परापर इति निर्देशः॥३॥** परं कार्मणं तस्मिन् सति तैजसमपरं भवत्यतः परापरे इति निर्देशो न्याय्यः।

**न वा; बुद्धिविषयव्यापारात्॥४॥** न वैष दोषः। किं कारणम्? बुद्धिविषय-व्यापारात्। न शब्दोच्चारणक्रमेण तैजसकार्मणयोः परव्यपदेशः। किं तर्हि? बुद्ध्या तैजसकार्मणे तिर्यग्व्यवस्थाप्याहारकात् परे इति व्यपदेशः।

**व्यवहिते वा परशब्दप्रयोगात्॥५॥** अथवा व्यवहिते परशब्दप्रयोगो दृश्यते यथा परा पाटलिपुत्रात् मथुरेति तथाऽऽहारकात्तेजसस्य परत्वम्, तैजसेन व्यवहितस्यापि कार्मणस्य परत्वमिति।

**बहुद्रव्योपचितत्वात्तदुपलब्धिप्रसङ्ग इति चेन्न; उक्तत्वात्॥६॥** स्यादेतत् – बहुद्रव्योपचितत्वात् तैजसकार्मणयोरुपलब्धिः प्राप्नोतीति? तन्न; किं कारणम्? उक्त – त्वात्। उक्तमेतत्–प्रचयविशेषात् सूक्ष्मपरिणाम इति।

तत्रैतत् स्यात्–शल्यकवन्मूर्तिमद्द्रव्योपचितत्वात् संसारिणो जीवस्याभिप्रेतगति निरोधप्रसङ्ग इति; तन्न; किं कारणम्? यस्मादुभेऽप्येते –

## अप्रतीघाते॥४०॥

**प्रतीघातो मूर्त्यन्तरेण व्याघातः॥१॥** मूर्तिमतो मूर्त्यन्तरेण व्याघातः प्रतीघात इत्युच्यते।

**तदभावः सूक्ष्मपरिणामादयःपिण्डे तेजोऽनुप्रवेशवत् ॥२॥** यथा अयःपिण्डस्यान्तःसूक्ष्मपरिणामात्तेजोऽनुप्रवेशो दृष्टस्तथा तैजसकार्मणयोरपि नास्ति वज्रपटलादिषु व्याघात इत्यप्रतीघाते इत्युच्यते।

**वैक्रियिकाहारकयोरप्यप्रतीघात इति चेन्न; सर्वत्र विवक्षितत्वात् ॥३॥** स्यान्मतम्– वैक्रियिकाहारकयोरपि प्रतीघातो नास्ति सूक्ष्मपरिणामादेव, तत्र किमुच्यते तैजसकार्मणे एवाप्रतीघाते इति? तन्न; किं कारणम्? सर्वत्र विवक्षितत्वात्। आलोकान्तात् सर्वत्र तैजसकार्मणयोर्नास्ति प्रतीघात इत्ययं विशेषो विवक्षित; वैक्रियिकाहारकयोस्तु न तथा, अस्ति प्रतीघातः।

आह किमेतावानेव विशेष आहोस्वित् कश्चिदन्योऽप्यस्तीति? अत आह –

## अनादिसम्बन्धे च॥४१॥

अथवा, अनादित्वादात्मनः शरीरस्यादिमत्वाद्विकरणस्याऽऽदिशरीरसम्बन्धः किं कृतः इति? अत आह - अनादिसम्बन्धे चेति। चशब्दः किमर्थः?

**चशब्दो विकल्पार्थः॥१॥** चशब्दो विकल्पार्थो वेदितव्यः, अनादिसंबन्धे सादिसंबन्धे चेति। कथमिति चेत्? उच्यते –

**बन्धसन्तत्यपेक्षयाऽनादिः सम्बन्धः सादिश्च विशेषतो बीजवृक्षवत् ॥२॥** यथा वृक्षो बीजादुत्पन्नः, तच्च बीजमपरस्माद् वृक्षात्, स चापरस्माद्बीजादिति कार्यकारणसंबन्धसामान्यापेक्षयाऽनादिसंबन्धः। अस्माद् बीजादयं वृक्षोऽस्माच्च वृक्षादिदं बीजमिति विशेषापेक्षया सादिः। एवं तैजसकार्मणयोरपि पौनर्भविकनिमित्तनैमित्तकसन्तत्यपेक्षयाऽनादिसंबन्धः, विशेषापेक्षया सादिरिति।

**एकान्तेनादिमत्त्वे अभिनवशरीरसंबन्धाभावो निर्निमित्तत्वात् ॥३॥** यस्यैकान्तेनादिमान् शरीरसंबन्धः तस्य प्रागात्यन्तिकीं शुद्धिमादधतो जीवस्याभिनवशरीरसंबन्धो न स्यात्। कुत? निर्निमित्तत्वात्।

**मुक्तात्माभावप्रसङ्गश्च॥४॥** यद्येकान्तेन सादिसंबन्धः; यथाऽऽदिशरीरमकस्मात् संबध्यते एवं मुक्तात्मनोऽप्याकस्मिकशरीरसंबन्धः स्यादिति मुक्तात्माभावप्रसङ्गः स्यात्।

**एकान्तेनानादित्वे चानिर्मोक्षप्रसङ्गः॥५॥** अथैकान्तेनानादित्वं कल्प्यते; एवमपि यस्यानादित्वं तस्यान्तोऽपि नास्तीत्याकाशवत् कार्यकारणसंबन्धाभावात् ततश्चानिर्मोक्षः प्रसजति। ननु चानादेरपि बीजवृक्षसन्तानस्याग्निसम्बन्धे सत्यन्तो दृष्ट; न; तस्यैकान्तेनाऽनादित्वाभावात्। बीजवृक्षौ हि विशेषापेक्षया आदिमन्ताविति। तस्मात् साधूक्तं केनचित्प्रकारेणानादिः सबन्धः, केनचित्प्रकारेणादिमानिति।

त एते तैजसकार्मणे किं कस्यचिद्देव भवतः उताऽविशेषेणेति? अत आह –

## सर्वस्य॥४२॥

**सर्वशब्दो निरवशेषवाची॥१॥** निरवशेषस्य संसारिणो जीवस्य ते द्वेऽपि शरीरे भवत इत्यर्थः।

**संसरणधर्मसामान्यादेकवचननिर्देशः॥२॥** संसरणधर्मसामान्ययोगादेकवचननिर्देशः क्रियते। यदि हि कस्यचित् संसारिणस्ते न स्यातां संसारित्वमेवास्य न स्यात्।

अविशेषाभिधानात्तैरौदारिकादिभिः सर्वस्य संसारिणो यौगपद्येन संबन्धप्रसङ्गे संभविशरीरप्रदर्शनार्थमिदमुच्यते –

## तदादीनि भाज्यानि युगपदेकस्मिन्नाचतुर्भ्यः ॥४३॥

**तद्ग्रहणं प्रकृतशरीरद्वयप्रतिनिर्देशार्थम् ॥१॥** प्रकृते द्वे शरीरे तैजसकार्मणे, तत्प्रतिनिर्देशार्थं तदित्युच्यते।

**आदिशब्देन व्यवस्थावाचिना शरीरविशेषणम् ॥२॥** पूर्वसूत्रे व्यवस्थितानां शरीराणामानुपूर्व्यप्रतिपादनेनाऽऽदिशब्देन विशेषणं क्रियते, ते आदिर्येषां तानीमानि तदादीनीति।

**पृथक्त्वादेव तेषां भाज्यग्रहणमनर्थकमिति चेन्न; एकस्य द्वित्रिचतुःशरीर-संबन्धविभागोपपत्तेः॥३॥** स्यान्मतम् – भाज्यानि पृथक् कर्तव्यानीत्यर्थः; तान्यौदारिकादीनि परस्परत आत्मनश्च पृथग्भूतान्येव लक्षणभेदादतो भाज्यग्रहणमनर्थकमिति; तन्न; किं कारणम्? एकस्य द्वित्रिचतुःशरीरसंबन्धविभागोपपत्तेः। कस्यचिदात्मनो द्वे तैजसकार्मणे। अपरस्य त्रीणि औदारिकतैजसकार्मणानि वैक्रियिकतैजसकार्मणानि वा। अन्यस्य चत्वारि औदारिकाऽऽहारकतैजसकार्मणानीति विभागः क्रियते।

**युगपदिति कालैकत्वे॥४॥** 'युगपत्' इत्ययं निपातः कालैकत्वे द्रष्टव्यः, एकस्मिन् काले। कालभेदे तु पञ्चापि भवन्त्येव।

**आङभिविध्यर्थः॥५॥** आङयमभिविध्यर्थो द्रष्टव्यः, तेन चत्वार्यपि कस्यचिद्भवन्ति। मर्यादायां सत्यां चत्वारि न स्युः। अथ पञ्च युगपत् कस्मान्न भवन्तीति?

**वैक्रियिकाहारकयोर्युगपदसंभवात् पञ्चाभावः॥६॥** यस्य संयतस्याऽऽहारकं न तस्य वैक्रियिकम्, यस्य देवस्य नारकस्य वा वैक्रियिकं न तस्याऽऽहारकमिति युगपत् पञ्चानामसंभवः।

पुनरपि तेषां शरीराणां विशेषप्रतिपत्त्यर्थमाह –

## निरुपभोगमन्त्यम् ॥४४॥

सूत्रक्रमापेक्षयाऽन्ते भवमन्त्यं कार्मणम्, निरुपभोगमिति वचनादर्थादापन्न-मेतदितराणि सोपभोगानीति।

**कर्मादाननिर्जरासुखदुःखानुभवनहेतुत्वात् सोपभोगमिति चेन्न; विवक्षिता-परिज्ञानात् ॥१॥** स्यान्मतम् – कार्मणकाययोगेन कर्मादत्ते निर्जरयति च, सुखदुःखं चानुभवति, ततः सोपभोगमेव न निरुपभोगमिति ? तन्न; किं कारणम्? विवक्षिता-परिज्ञानात्। विवक्षितमुपभोगमपरिज्ञाय परेणेदं चोदितम्। कोऽसौ विवक्षित उपभोगः?

**इन्द्रियनिमित्तशब्दाद्युपलब्धिरुपभोगः॥२॥** इन्द्रियप्रणालिकया शब्दानामुपलब्धि-रूपभोग इत्युच्यते। विग्रहगतौ सत्यामपीन्द्रियोपलब्धौ द्रव्येन्द्रियनिर्वृत्त्यर्थाभावात् शब्दादिविषयानुभवाभावान्निरुपभोगं कार्मणमिति कथ्यते।

ननु तैजसमपि निरुपभोगं तत्र किमुच्यते निरुपभोगमन्त्यमिति? अत आह –

**तैजसस्य योगनिमित्तत्वाभावादनधिकारः॥३॥** तैजसं शरीरं योगनिमित्तमपि न भवति ततोऽस्योपभोगविचारेऽनधिकारः। ततो योगनिमित्तेषु शरीरेष्वन्त्यं निरुपभोगं सोपभोगानीतराणीत्ययमर्थोऽत्र विवक्षितः।

तत्राम्नातलक्षणेषु जन्मस्वमूनि शरीराणि प्रादुर्भावमापद्यमानानि किमविशेषेण भवन्त्युत कश्चिदस्ति प्रतिविशेषः? अस्तीत्याह –

## गर्भसम्मूर्च्छनजमाद्यम् ॥४५॥

सूत्रक्रमापेक्षयाऽऽदौ भवमाद्यमौदारिकमित्यर्थः। यद् गर्भजं यच्च संमूर्च्छनजं तत्सर्वमौदारिकं द्रष्टव्यम्।

तदनन्तरं यन्निर्दिष्टं तत्कस्मिन् जन्मनीति? अत आह –

## औपपादिकं वैक्रियिकम् ॥४६॥

उपपादे भवमौपपादिकमध्यात्मादित्वादिकः। यदौपपादिकं तत्सर्वं वैक्रियिकं वेदितव्यम्।

यद्यौपपादिकं वैक्रियिकमनौपपादिकस्य वैक्रियिकत्वाभाव इति? अत आह –

## लब्धिप्रत्ययं च॥४७॥

वैक्रियिकमित्यभिसंबध्यते।

**प्रत्ययशब्दस्यानेकार्थत्वे विवक्षातः कारणगतिः॥१॥** अयं प्रत्ययशब्दोऽनेकार्थः। क्वचिज्ज्ञाने वर्तते, यथाऽर्थाभिधानप्रत्यया इति। क्वचित्सत्यतायां वर्तते, प्रत्ययं कुरु सत्यं कुर्वित्यर्थः। क्वचित्कारणे वर्तते मिथ्यादर्शनाविरतिप्रमादकषाययोगाः प्रत्यया इति। तत्रेह विवक्षातः कारणपर्यायवाची वेदितव्यः।

**तपोविशेषर्द्धिप्राप्तिर्लब्धिः॥२॥** तपोविशेषाद् ऋद्धिप्राप्तिर्लब्धिरित्युच्यते। लब्धिः प्रत्ययो यस्य तल्लब्धिप्रत्ययम्। अथ लब्ध्युपपादयोः को विशेष?

**निश्चयकादाचित्ककृतो विशेषो लब्ध्युपपादयोः॥३॥** उपपादो हि निश्चयेन भवति जन्मनिमित्तत्वात्। लब्धिस्तु कादाचित्की जातस्य सत उत्तरकालं तपोविशेषाद्यपेक्षत्वादित्ययमनयोर्विशेषः।

**सर्वशरीराणां विनाशित्वाद्वैक्रियिकविशेषानुपपत्तिरिति चेन्न; विवक्षितापरिज्ञानात् ॥४॥** स्यान्मतम् – विक्रिया विनाशः, सा च सर्वशरीराणां साधारणी मुहुर्मुहुरुपचयापचयधर्मत्वादुच्छेदाच्च ततो न वैक्रियिके कश्चिद्विशेषोऽस्तीति? तन्न; किं कारणम्? विवक्षितापरिज्ञानात्। नात्र विक्रियेति विनाशो विवक्षितः। किं तर्हि? विविधकरणं विक्रिया। सा द्वेधैकत्वविक्रिया पृथक्त्वविक्रिया चेति। तत्रैकत्वविक्रिया स्वशरीरादपृथग्भावेन सिंहव्याघ्रहंसकुररादिभावेन विक्रिया। पृथक्त्वविक्रिया स्वशरीरादन्यत्वेन प्रासादमण्डपादिविक्रिया। सोभयी च विद्यते भवनवासिव्यन्तरज्योतिष्ककल्पवासिनाम्। वैमानिकानाम् आ सर्वार्थसिद्धेः प्रशस्तरूपैक्त्वविक्रियैव। नारकाणां त्रिशूलचक्रासिमुद्गरपरशुभिण्डिवालाद्यनेकायुधैकत्वविक्रिया न पृथक्त्वविक्रिया आ षष्ठयाः। सप्तम्यां महागोकीटकप्रमाणलोहितकुन्थरूपैकत्वविक्रिया, नानेकप्रहरणविक्रिया, न च पृथक्त्वविक्रिया। तिरश्चां मयूरादीनां कुमारादिभावं प्रतिविशिष्टैकत्वविक्रिया न पृथक्त्वविक्रया। मनुष्याणां तपोविद्यादिप्राधान्यात् प्रतिविशिष्टैकत्वपृथक्त्वविक्रिया।

किमेतदेव लब्ध्यपेक्षमुतान्यदप्यस्तीति? अत आह –

## तैजसमपि॥४८॥

ननु च वैक्रियिकानन्तरमाहारकं वक्तव्यमकालप्राप्तं तैजसं किमर्थमिहोच्यते?

**लब्धिप्रत्ययापेक्षार्थं तैजसग्रहणम् ॥१॥** लब्धिप्रत्ययमित्यनुवर्तते, तदभिसमीक्ष्येह तैजसग्रहणं क्रियते।

वैक्रियिकानन्तरं यदुपदिष्टं तस्य स्वरूपनिर्धारणार्थं स्वामिनिदर्शनार्थं चाह-

## शुभं विशुद्धमव्याघाति चाहारकं प्रमत्तसंयतस्यैव॥४९॥

**शुभकारणत्वाच्छुभव्यपदेशोऽन्नप्राणवत् ॥१॥** यथा प्राणकारणेष्वन्नेषु प्राणव्य-पदेशः 'अन्नं वै प्राणाः' तथा शुभकर्मण आहारककाययोगस्य कारणत्वादाहारकं शरीरं शुभमित्युच्यते।

**विशुद्धकार्यत्वाद्विशुद्धाभिधानं कार्पासतन्तुवत् ॥२॥** यथा कार्पासकार्येषु तन्तुषु कार्पासव्यपदेशः कार्पासास्तन्तव इति। तथा विशुद्धस्य पुण्यकर्मणोऽशबलस्य निरवद्यस्य कार्यत्वाद्विशुद्धमित्याख्यायते।

**उभयतो व्याघाताभावादव्याघाति॥३॥** न ह्याहारकशरीरेणान्यस्य व्याघातो नाप्यन्येनाहारकस्येत्युभयतो व्याघाताभावादव्याघातीति व्यपदिश्यते।

**चशब्दस्तत्प्रयोजनसमुच्चयार्थः॥४॥** तस्य प्रयोजनसमुच्चयार्थश्चशब्दः क्रियते। तद्यथा कदाचिल्लब्धिविशेषसद्भावज्ञानार्थं कदाचित्सूक्ष्मपदार्थनिर्धारणार्थं संयमपरिपाल-नार्थं च भरतैरावतेषु केवलिविरहे जातसंशयस्तन्निर्णयार्थं महाविदेहेषु केवलिसकाशं जिगमिषुरौदारिकेण मे महानसंयमो भवतीति विद्वानाहारकं निर्वर्तयति।

**आहारकमिति प्रागुक्तस्य प्रत्याम्नायः॥५॥** एवं प्रकारमाहारकमित्येतस्य प्रतिपादनार्थं पुनस्तस्य प्रत्याम्नायः क्रियते।

**प्रमत्तसंयतग्रहणं स्वामिविशेषप्रतिपत्त्यर्थम् ॥६॥** यदाऽऽहारकशरीरं निर्वर्तयितुमार-भते तदा प्रमत्तो भवतीति प्रमत्तसंयतस्येत्युच्यते।

**इष्टतोऽवधारणार्थमेवकारोपादानम् ॥७॥** यथैवं विज्ञायते 'प्रमत्तसंयतस्यैवाहारकं नान्यस्य' इति, मैवं विज्ञायि 'प्रमत्तसंयतस्याहारकमेव' इति, माभूदौदारिका-दिनिवृत्तिरिति।

**एषां शरीराणां परस्परतः संज्ञास्वालक्षण्यस्वकारणस्वामित्वसामर्थ्यप्रमाणक्षेत्र-स्पर्शनकालाऽन्तरसंख्याप्रदेशभावाऽल्पबहु त्वादिभिर्विशेषोऽवसेयः॥८॥**

उक्तानुक्तार्थसंग्रहार्थ-मिदं वाक्यम्। तत्र संज्ञातोऽन्यत्वमौदारिकादीनां घटपटादिवत्। स्वालक्षण्यान्नानात्वम्, स्थौल्यलक्षणमौदारिकम्। विविधर्द्धिगुणयुक्तविकरणलक्षणं वैक्रियिकम्। दुरधिगमसूक्ष्मपदार्थतत्त्वनिर्णयलक्षणमाहारकम्। शङ्खधवलप्रभालक्षणं तैजसम्। तद्द्विविधम्-निःसरणात्मकमितरच्च। औदारिकवैक्रियिकाहारकदेहाभ्यन्तरस्थं देहस्य दीप्तिहेतुरनिः-सरणात्मकम्। यतेरुग्रचारित्रस्यातिक्रुद्धस्य जीवप्रदेशसंयुक्तं बहिर्निष्क्रम्य दाह्यं परिवृत्यावतिष्ठमानं निष्पावकहरितफलपरिपूर्णां स्थालीमग्निरिव पचति, पक्त्वा च निवर्तते। अथ चिरमवतिष्ठतेऽग्निसाद् दाह्योऽर्थो भवति, तदेतन्निःसरणात्मकम्। सर्वकर्मशरीरप्ररोहणलक्षणं कार्मणम्।

स्वकारणतोऽन्यत्वम् – औदारिकशरीरनामकारणमौदारिकम्, वैक्रियिकशरीरनाम-कारणं वैक्रियिकम्। आहारकशरीरनामकारणमाहारकम्, तैजसशरीरनामकारणं तैजसम्, कार्मणशरीरनामकारणं कार्मणम्।

स्वामिभेदादन्यत्वम् – औदारिकं तिर्यङ्मनुष्याणाम्, वैक्रियिकं देवनारकाणाम्, तेजोवायुकायिकपञ्चेन्द्रियतिर्यङ्मनुष्याणां च केषाञ्चित्।

आह चेदेकः–जीवस्थाने योगभङ्गे सप्तविधकाययोगस्वामिप्ररूपणायाम् **"औदा-रिककाययोगः औदारिकमिश्रकाययोगश्च तिर्यङ्मनुष्याणाम्, वैक्रियिककाययोगो वैक्रियिक-मिश्रकाययोगश्च देवनारकाणाम्"** उक्तः। इह तिर्यङ्मनुष्याणामपीत्युच्यते; तदिदमार्ष-विरुद्धमिति; अत्रोच्यते – न, अन्यत्रोपदेशात्। व्याख्याप्रज्ञप्तिदण्डकेषु शरीरभङ्गे वायोरौदारिकवैक्रियिकतैजसकार्मणानि चत्वारि शरीराण्युक्तानि मनुष्याणाञ्च एवमप्या-र्षयोस्तयोर्विरोधः; न विरोधः; आभिप्रायकत्वात्। जीवस्थाने सर्वदेवनारकाणां सर्वकालं वैक्रियिकदर्शनात् तद्योगविधिरित्यभिप्रायः; नैवं तिर्यङ्मनुष्याणां लब्धिप्रत्ययं

वैक्रियिकं सर्वेषां सर्वकालमस्ति कादाचित्कत्वात्। व्याख्याप्रज्ञप्तिदण्डकेषु त्वस्तित्वमात्रमभि-प्रेत्योक्तम्। आहारकं प्रमत्तसंयतस्य। तैजसकार्मणे सर्वसंसारिणाम्।

सामर्थ्यतोऽन्यत्वम् – औदारिकस्य सामर्थ्यं द्वेधा भवगुणप्रत्ययत्वात्। तिर्यङ्मनुष्याणां सिंहाष्टापदचक्रधरवासुदेवादीनां प्रकृष्टावकृष्टवीर्यदर्शनाद्भवप्रत्ययम्। प्रकृष्टतपो-बलानामृषीणां यच्छरीरविकरणसामर्थ्यं तद् गुणप्रत्ययम्। तपःसामर्थ्यं तदिति चेन्न; औदारिकशरीरादृते तपसः केवलस्य शरीरविकरणसामर्थ्याभावात्। वैक्रियिकस्य सामर्थ्यं मेरुप्रचलनसकलमहीमण्डलोद्वर्तनादि। आहारकस्य सामर्थ्यमप्रतिहतवीर्यता। वैक्रियि-कस्याप्यप्रतिहतसामर्थ्यं वज्रपटलादिष्वप्रतिघातदर्शनादिति चेन्न; इन्द्रसामानिकादीनां प्रकर्षाप्रकर्षदर्शनादनन्तवीर्ययतिना चेन्द्रवीर्यस्य प्रतिघातश्रुतेः सप्रतिघातसामर्थ्यं वैक्रियिकम्। सर्वाणि चाहारकशरीराणि तुल्यवीर्यत्वादप्रतिहतत्वाच्चाऽप्रतिघातवीर्याणि। तैजसस्य सामर्थ्यं कोपप्रसादापेक्षं दाहानुग्रहरूपम्। कार्मणस्य सामर्थ्यं सर्वकर्मावकाशदानम्।

प्रमाणतोऽन्यत्वम् – सर्वजघन्येनाङ्गुलासंख्येयभागप्रमाणं सूक्ष्मनिगोतौदारिक-मुत्कर्षेण साधिकयोजनसहस्रप्रमाणं नन्दीश्वरवापीपद्मौदारिकम्। वैक्रियिकं मूलशरीरतो जघन्येनारत्निप्रमाणं सर्वार्थसिद्धिदेवस्य, उत्कर्षेण पञ्चधनुःशतप्रमाणं तमस्तमःप्रभायां नारकस्य। विक्रिययोत्कर्षेण जम्बूद्वीपप्रमाणं वैक्रियिकं शरीरं विकरोति देवः। आहारकमरत्निप्रमाणम्। तैजसकार्मणे जघन्येन यथोपात्तौदारिकशरीरप्रमाणे, उक्तर्षेण केवलिसमुद्घाते सर्वलोकप्रमाणे।

क्षेत्रतोऽन्यत्वम् – औदारिकवैक्रियिकाहारकाणि लोकस्यासंख्येयभागक्षेत्रे। तैजस-कार्मणे लोकस्यासंख्येयभागेऽसंख्येयेषु वा भागेषु सर्वलोके वा प्रतरलोकपूरणयोः।

स्पर्शनतोऽन्यत्वम् – औदारिकादानीमेकजीवं प्रति वक्ष्यामः। औदारिकेण तिर्यग्भिः सर्वलोकः स्पृष्टः। मनुष्यैः लोकस्यासंख्येयभागः। मूलवैक्रियिकशरीरेण लोकस्याः संख्येयभागा उत्तरवैक्रियिकेणाऽष्टौ चतुर्दशभागा देशोनाः। कथम्? सौधर्मदेवः स्वपरप्राधान्यादारणाच्युतविहारात् षड्रज्जूर्गच्छति। स्वप्राधान्यादध आवालुकापृथिव्या द्वे रज्जू इति। आहारकेण लोकस्यासंख्येयभागं स्पृशति। तैजसकार्मणाभ्यां सर्वलोकम्।

कालतोऽन्यत्वम् – एकं जीवं प्रति वक्ष्यामः। मिश्रकं वर्जयित्वौदारिकस्य तिर्यङ्मनुष्याणां जघन्येनान्तर्मुहूर्तः; उत्कर्षेण त्रीणि पल्योपमान्यन्तर्मुहूर्तोनानि। स चान्तर्मुहूर्तोऽपर्याप्तकालः। वैक्रियिकस्य देवान् प्रति मूलवैक्रियिकदेहस्य जघन्येन दशवर्षसहस्राण्यपर्याप्तकालान्तर्मुहूर्तोनानि उक्तर्षेण त्रयस्त्रिंशत्सागरोपमाण्यपर्याप्तकालान्तर्मुहूर्तोनानि। उत्तरवैक्रियिकस्य जघन्य उत्कृष्टश्चाऽन्तर्मुहूर्तः। तीर्थकरजन्मनन्दी-श्वरार्हदायतनादिपूजासु कथमिति चेत्? पुनः पुनर्विकरणात् सन्तत्यविच्छेदः। आहारकस्य कालो जघन्य उत्कृष्टश्चाऽन्तर्मुहूर्तः। तैजसर्कामणयोः सन्तत्यादेशादभव्यान् प्रत्यनादिरपर्यवसानः कालः; भव्यांश्च कांश्चित् प्रति येऽनन्तेनापि कालेन न सेत्स्यन्ति। ये सेत्स्यन्ति तान् प्रत्यनादिः सपर्यवसानः। एकसमयिकः निषेकं प्रति। तैजसस्य षट्षष्टिसागरोपमाणि। कार्मणस्य कर्मस्थितिः सप्ततिसागरोपमकोटिकोट्यः।

अन्तरतोऽन्यत्वम् – औदारिकादीनामेकजीवं प्रति वक्ष्यामि। मिश्रकं वर्जयित्वौदारिकस्यान्तर्मुहूर्तोऽन्तरं जघन्यम्। कतरोऽन्तर्मुहूर्तः? औदारिकमिश्रकालोऽन्तर्मुहूर्तः। कथम्? इह चातुर्गतिकः तिर्यङ्मनुष्येषूत्पन्नोऽन्तर्मुहूर्तमपर्याप्तको भूत्वा पर्याप्तकत्वं प्राप्याऽन्तर्मुहूर्तं जीवित्वा मृतः पुनस्तिर्यङ्मनुष्ययोरन्यतरत्रोत्पन्नोऽपर्याप्तिमान्तर्मुहूर्तिकीमनुभूय पर्याप्तको जातः, लब्धमौदारिकान्तरम्। उत्कर्षेण त्रयस्त्रिंश-त्सागरोपमाणि सातिरेकाणि। कथम्? यो मनुष्यस्त्रयस्त्रिंशत्सागरोपमायुष्केषु

देवेषूत्पद्य स्थितिक्षये प्रच्युतः पुनर्मनुष्येषूत्पद्यते तस्य योऽपर्याप्तिकालस्तेनाधिकानि त्रयस्त्रिंश-त्सागरोपमाणि।

वैक्रियिकस्य जघन्यमन्तरमन्तर्मुहूर्तः। कथम्? मनुष्यस्तिर्यग्वा मृतः दशवर्षसहस्रायुष्कदेवेषूत्पद्य च्युतः मनुष्येषु तिर्यक्षु चोत्पद्यापर्याप्तकालमनुभूय पुनर्देवायुर्बद्ध्वा उत्पद्यते, लब्धमन्तरम्। वैक्रियिकस्योत्कर्षेणान्तरमनन्तकालः। कथम्? देवत्वाच्च्युतोऽनन्तकालं तिर्यङ्मनुष्येष्वटित्वा देवो जातः, अपर्याप्तकालमनुभूय वैक्रियिकशरीरो दृष्टः, लब्धमन्तरम्।

आहारकस्यान्तरं जघन्यमन्तर्मुहूर्तः। प्रमत्तसंयत आहारकं निर्वर्त्यान्तर्मुहूर्त माहारकेण स्थितः प्रकृताहारकशरीरकार्यमुपसंहृत्य पुनर्लब्धिसन्निधानादन्तर्मुहूर्त मवस्थाय निर्वर्तयतीति लब्धमन्तरम्। उत्कर्षेणार्धपुद्गलपरिवर्तोऽन्तर्मुहूर्तोनः। कथम्? योऽनादि-मिथ्यादृष्टिः दर्शनमोहमुपशम्योपशमसम्यक्त्वं संयमं च युगपत्प्रतिपन्न उपशमसम्य-क्त्वाच्च्युतो वेदकसम्यक्त्वेनोत्पद्यान्तर्मुहूर्तं स्थितः सन्नप्रमत्तसंयतस्थाने आहारकं बद्ध्वा ततः प्रमत्तसंयतो निर्वर्त्य मूलशरीरं प्रविश्य मिथ्यात्वं गतः, सोऽर्धपुद्गलपरिवर्तं देशोनमटित्वा मनुष्येषूत्पद्य पूर्वविधिना सम्यक्त्वमुत्पाद्याऽसंयतसम्य-ग्दृष्टिसंयतासंयतयोरन्यतरत्र देशोनमटित्वा मनुष्येषूत्पद्य पूर्वविधिना सम्यक्त्वमुत्पाद्याऽसंयतसम्यग्दृष्टिसंयतासंयतयोरन्यतरत्र दर्शनमोहं क्षपयित्वा संयमं प्रति-पद्याप्रमत्त आहारकस्य बन्धकः प्रमत्तो निर्वर्तयतीति लब्धमन्तरम्। अत्र क्षयोपशम ये प्राथमिकाश्चत्वारोऽन्तर्मुहूर्तास्ते कतरे? प्रथमो दर्शनमोहोपशमसम्यक्त्वसमान-कालसंयमान्तर्मुहूर्तः। द्वितीयो वेदकसम्यक्त्वान्तर्मुहूर्तः। तृतीय आहारकबन्धान्तर्मुहूर्तः। चतुर्थ आहारकनिर्वृत्त्यन्तर्मुहूर्तः। एते चत्वार आद्या अन्तर्मुहूर्ता; उत्तरकालमाहारक-शरीरनिर्वृत्त्यन्तर्मुहूर्तः पञ्चमः मूलशरीरं प्रविश्य प्रमत्ताप्रमत्ताभ्यां बहून् वाराननुभवतो बहवोऽन्तर्मुहूर्ता अतोऽधःप्रवृत्तकरणविशुद्ध्या

विशुद्धो विश्रान्तः। अपूर्वकरणानिवृत्तिसूक्ष्म साम्परायक्षीणकषायसयोग्ययोगिनामेकैकोऽन्तमुहूर्तः। इयता कालेन हीनोऽर्धपुद्गल परिवर्तः। तैजसकार्मणयोर्नास्त्यन्तरं सर्वसंसारिषु सर्वकालं सन्निधानात्।

संख्यातोऽन्यत्वम् – औदारिकाण्यसंख्येया लोकाः। वैक्रियिकाण्यसंख्याताः श्रेणयो लोकप्रतरस्यासंख्येयभागः। आहारकाणि संख्येयानि चतुःपञ्चाशत्। तैजसकार्मणान्यनन्तान्यनन्तानन्तलोकाः।

प्रदेशतोऽन्यत्वम् – औदारिकस्यानन्ताः प्रदेशाः अभव्यानामनन्तगुणाः सिद्धाना-मनन्तभागाः। एवं शेषाणां चतुर्णामपि शरीराणामनन्तस्यानन्तविकल्पत्वादुत्तोत्त-रोत्तराण्यधिकानि, आधिक्यपरिमाणं प्रागुक्तम्।

भावतोऽन्यत्वम् – औदारिकादिस्वशरीरनामोदयात् सर्वाण्यौदयिकभावानि।

अल्पबहुत्वतोऽन्यत्वम् – सर्वतः स्तोकान्याहारकाणि, वैक्रियिकाण्यसंख्येय-गुणानि। को गुणकारः? असंख्याताः श्रेणयः, लोकप्रतरस्यासंख्येयभागाः। तत औदारिकाणि असंख्येयगुणानि। को गुणकारः? असंख्येया लोकाः। तैजसकार्मणा-न्यनन्तगुणानि। को गुणकारः? सिद्धानामनन्तगुणाः।

आत्माधिश्रितकार्मणनिमित्तविजृम्भितानि शरीराणि बिभ्रतां संसारिणां चातु-र्विध्यवतामिन्द्रियसंबन्धं प्रति विकल्पभाजां प्रति प्राणिनः किं त्रिलिङ्गसन्निधानमुत लिङ्गनियमः कश्चिदस्तीति? अत उत्तरं पठति-

## नारकसम्मूर्च्छिनो नपुंसकानि॥५०॥

**धर्मार्थकाममोक्षकार्यनरणान्नराः॥१॥** धर्मार्थकाममोक्षलक्षणानि कार्याणि नृणन्ति नयन्तीति नराः।

**नरान् कायन्तीति नरकाणि॥२॥** शीतोष्णासद्वेद्योदयापादितवेदनया नरान् कायन्ति शब्दायन्त इति नरकाणि।

**नृणन्तीति वा॥३॥** अथवा पापकृतः प्राणिन आत्यन्तिकं दुःखं नृणन्ति नयन्तीति नरकाणि। औणादिकः कर्तर्यकः।

नरकेषु भवा नारकाः। संमूर्च्छनं संमूर्च्छः; स एषामस्तीति संमूर्च्छिनः। नारकाश्च संमूर्च्छिनश्च नारकसंमूर्च्छिनः।

**नपुंसकवेदाशुभनामोदयान्नपुंसकानि॥४॥** चारित्रमोहविकल्पनोकषायभेदस्य नपुंसकवेदस्याशुभनाम्नश्चोदयान्न स्त्रियो न पुमांस इति नपुंसकानि भवन्ति। नारकसंमूर्च्छिनो नपुंसकान्येवेति नियमः। तत्र हि स्त्रीपुंसविषया मनोज्ञशब्दगन्धरूपरसस्पर्शसंबन्धनिमित्ता स्वल्पापि सुखमात्रा नास्ति।

यद्येवमवध्रियतेऽर्थादापन्नमेतदुक्तेभ्योऽन्ये ये संसारिणः तेषां त्रिलिङ्गत्वमिति, यत्रात्यन्तनपुंसकलिङ्गस्याभावस्तत्प्रतिपादनार्थमाह –

## न देवाः॥५१॥

**स्त्रीपुंसविषयनिरतिशयसुखानुभवनाद् देवेषु नपुंसकाभावः॥१॥** स्त्रैणं पौस्नं च यन्निरतिशयं सुखं शुभगतिनामोदयापेक्षं तदेवानुभवन्तीति न तेषु नपुंसकानि सन्ति। तच्चोपरिवक्ष्यते।

अथेतरे कियल्लिङ्गा इति? अत आह –

## शेषास्त्रिवेदाः॥५२॥

त्रयो वेदा येषां त्रिवेदाः। के पुनस्ते? स्त्रीत्वं पुस्त्वं नपुंसकत्वमिति। कथं तेषां सिद्धिः?

**नामकर्मचारित्रमोहनोकषायोदयाद्वेदत्रयसिद्धिः॥१॥**
नामकर्मणश्चारित्रमोहविकल्पस्य नोकषायस्य चोदयाद्वेदत्रयस्य सिद्धिर्भवति। वेद्यत इति वेदो लिङ्गमित्यर्थः। तल्लिङ्गं द्विविधम् – द्रव्यलिङ्गं भावलिङ्गं चेति। नामकर्मोदयाद् योनिमेहनादि द्रव्यलिङ्गं भवति। नोकषायोदयाद्भावलिङ्गम्। तत्र स्त्रीवेदोदयात् स्त्यायत्यस्यां गर्भ इति स्त्री। पुंवेदोदयात् सूते जनयत्यपत्यमिति पुमान्। नपुंसकवेदोदयात् तदुभयशक्तिविकलं नपुंसकम्। रूढिशब्दाश्चैते। रुढिषु च क्रिया व्युत्पत्त्यर्थैव, यथा गच्छतीति गौरिति। इतरथा हि गर्भधारणादिक्रियाप्राधान्ये बालवृद्धानां तिर्यङ्मनुष्याणां देवानां कार्मणकाययोगस्थानां च तदभावात् स्त्रीत्वादिव्यपदेशो न स्यात्। तत्र हि स्त्रीवेदो दारुवह्निवत् पुंवेदस्तृणाग्निवत् इष्टकाग्निवन्नपुसंकवेदः। ते एते त्रयोऽपि वेदाः शेषाणां गर्भजानां भवन्ति।

य इमे जन्मयोनिशरीरलिङ्गसंबन्धाहितविशेषाः प्राणिनो निर्दिश्यन्ते देवादयो विचित्रधर्माधर्मवशीकृताश्चतसृषु गतिषु शरीराणि धारयन्तः किं यथाकालमुपभुक्तायुषो मूर्त्यन्तराण्यास्कन्दन्त्युतायथाकालमपीति? अत उत्तरं पठति –

## औपपादिकचरमोत्तमदेहाऽसंख्येयवर्षायुषोऽनपवर्त्त्यायुषः॥५३॥

**औपपादिका उक्ताः॥१॥** उक्ता व्याख्याता औपपादिका देवनारका इति।

**चरमशब्दस्यान्तवाचित्वात्तज्जन्मनि निर्वाणार्हग्रहण्॥२॥** चरमशब्दोऽन्तपर्याय-वाची। चरमो देहो येषां त इमे चरमदेहा इति परीतसंसारास्तज्जन्मनि निर्वाणार्हा गृह्यन्ते।

**उत्तमशब्दस्योत्कृष्टवाचित्वाच्चक्रधरादिग्रहणम्॥३॥** अयमुत्तमशब्द उत्कृष्टवाची, उत्तमो देहो येषां त इमे चरमदेहा इति चक्रधरादिग्रहणं वेदितव्यम्।

**उपमाप्रमाणगम्यायुषोऽसंख्येवर्षायुषः॥४॥** अतीतसंख्यानमुपमाप्रमाणेन पल्यादिनां गम्यमायुर्येषां त इमेऽसंख्येयवर्षायुषस्तिर्यङ्मनुष्या उत्तरकुर्वादिषु प्रसूताः।

**बाह्यप्रत्ययवशादायुषो ह्रासोऽपवर्तः॥५॥** बाह्यस्योपघातनिमित्तस्य विषशस्त्रादेः सति सन्निधाने ह्रासोऽपवर्त इत्युच्यते। अपवर्त्त्यमायुर्येषां त इमे अपवर्त्यायुषः, नापवर्त्यायुषोऽनपवर्त्यायुषः। एते औपपादिकादय उक्ता अनपवर्त्यायुषा; न हि तेषामायुषो बाह्यनिमित्तवशादपवर्तोऽस्ति।

**अन्त्यचक्रधरवासुदेवादीनामायुषोऽपवर्तदर्शनादव्याप्तिः॥६॥** उत्तमदेहाश्चक्रधरादयो-ऽनपवर्त्यायुषः इत्येतल्लक्षणमव्यापि। कुतः? अन्तस्य चक्रधरस्य ब्रह्मदत्तस्य वासुदेवस्य च कृष्णस्यान्येषां च तादृशानां बाह्यनिमित्तवशादायुरपवर्तदर्शनात्।

**न वा; चरमशब्दस्योत्तमविशेषणत्वात्॥७॥** न वैष दोषः। किं कारणम्? चरम-शब्दस्योत्तमविशेषणत्वात्। चरम उत्तमो देहो येषां ते चरमोत्तमदेहा इति।

**उत्तमग्रहणमेवेति चेन्न; तदनिवृत्तेः॥८॥** स्यादेतत्–उत्तमग्रहणमेवास्तु उत्तमदेहा इति? तन्न; किं कारणम्? तदनिवृत्तेः; यो दोष उक्तोऽव्याप्तिरिति स तदवस्थ एव तेषा-मप्युत्तमदेहत्वात्।

**चरमग्रहणमेवेति चेन्न; तस्योत्तमत्वप्रतिपादनार्थत्वात्॥९॥** स्यान्मतम् - चरमग्रहणमेवास्तु चरमदेहा इति, नार्थ उत्तमग्रहणेनेति; तन्न; किं कारणम्? तस्योत्तमत्वप्रतिपादनार्थत्वात्। स हि चरमो देहः, सर्वेषामुत्तम इत्यर्थः प्रतिपाद्यते। चरमदेह इति वा केषाञ्चित् पाठः। एतेषां नियमेनायुरनपवर्त्यमितरेषामनियमः।

**अप्राप्तकालस्य मरणानुपलब्धेरपवर्ताभाव इति चेन्न; दृष्टत्वादाम्रफलादिवत् ॥१०॥** यथा अवधारितपाककालात् प्राक् सोपायोपक्रमे सत्याम्रफलादीनां दृष्टः पाकस्तथा परिच्छिन्नमरणकालात् प्रागुदीरणाप्रत्यय आयुषो भवत्यपवर्तः।

**आयुर्वेदसामर्थ्याच्च॥११॥** यथा अष्टाङ्गायुर्वेदविद्भिषक् प्रयोगेऽतिनिपुणो यथाकाल-वाताद्युदयात् प्राक् वमनविरेचनादिनाऽनुदीर्णमेव श्लेष्मादि निराकरोति, अकालमृत्यु-व्युदासार्थं रसायनं चोपदिशति, अन्यथा रसायनोपदेशस्य वैयर्थ्यम्। न चादोऽस्ति? अत आयुर्वेदसामर्थ्यादस्त्यकालमृत्युः।

**दुखप्रतीकारार्थं इति चेन्न; उभयथा दर्शनात् ॥१२॥** स्यान्मतम् – दुःखप्रतीकारोऽर्थ आयुर्वेदस्येति? तन्न; किं कारणम्? उभयथा दर्शनात्। उत्पन्नानुत्पन्नवेदनयोर्हि चिकित्सादर्शनात्।

**कृतप्रणाशप्रसङ्ग इति चेन्न; दत्वैव फलं निवृत्तेः॥१३॥** स्यान्मतम् - यद्यकालमृत्युरस्ति कृतप्रणाशः प्रसज्यते इति तन्न; किं कारणम्? दत्वैव फलं निवृत्तेः नाकृतस्य कर्मणः फलमुपभुज्यते, न च कृतकर्मफलविनाशः, अनिर्मोक्षप्रसङ्गात् दानादिक्रियारम्भाभावप्रसङ्गाच्च। किन्तु कृतं कर्म कर्त्रे फलं दत्वैव निवर्तते विततार्द्रपटशोषवदयथाकालनिर्वृत्तः पाक इत्ययं विशेषः।

**इति तत्त्वार्थवार्तिके व्याख्यानालङ्कारे द्वितीयोऽध्यायः समाप्तः।**

# तृतीयोऽध्यायः

मोक्षमार्गे त्रिविधेऽधिकृते आदावुपदिष्टस्य सम्यग्दर्शनस्य विषयप्रदर्शनार्थे जीवादिपदार्थोपदेशे कर्तव्ये जीवा निर्दिष्टाः। इदानीं तदधिष्ठानव्याख्यानप्रसङ्गेन लोकविभागो वक्तव्यः। स पुनस्त्रिविधः–अधोलोकस्तिर्यग्लोक ऊर्ध्वलोकः। तत्र क्रम -प्राप्तस्याऽधोलोकस्य वर्णनार्थमुच्यते। अथवा संवेगहेतुत्वात्ताः नारकीः शीतोष्णनिमित्ताः सुतीव्रवेदनाः श्रुत्वाऽयं कथं संविग्नः स्यादिति प्रथममधोलोक उच्यते। अथवा, ''भवप्रत्ययोऽवधिर्देवनारकाणाम्'' इत्येवमादिषु नारकाः श्रुताः, ततः पृच्छति के नारका इति? तत्प्रतिपादनार्थं तदधिकरणनिर्देशः क्रियते –

## रत्नशर्करावालुकापङ्कधूमतमोमहातमःप्रभाभूमयो घनाम्बुवाताकाश-प्रतिष्ठाः सप्ताधोऽधः॥१॥

**रत्नादीनामितरेतरयोगे द्वन्द्वः॥१॥** रत्नं च शर्करा च वालुका च पङ्कश्च धूमश्च तमश्च महातमश्च रत्नशर्करावालुकापङ्कधूमतमोमहातमांसीतीतरेतरयोगे द्वन्द्वो द्रष्टव्यः।

**प्रभाशब्दस्य प्रत्येकं परिसमाप्तिर्भुजिवत् ॥२॥** यथा देवदत्तजिनदत्तगुरुदत्ता भोज्य-न्तामिति प्रत्येकं भुजिः परिसमाप्यते, एवं प्रभाशब्दस्यापि प्रत्येकं परिसमाप्तिर्वेदितव्या रत्नप्रभा शर्कराप्रभा वालुकाप्रभा पङ्कप्रभा धूमप्रभा तमःप्रभा महातमःप्रभा चेति।

**साहचर्यात्ताच्छब्द्यसिद्धिर्यष्टिवत् ॥३॥** यथा यष्टिसहचरितो देवदत्तो यष्टिरित्युच्यते तथा चित्रवज्रवैडूर्यलोहिताक्षमसारगल्वगोमेदप्रवालज्योतीरसाञ्जनमूलकाङ्कस्फटिक-

चन्दनबर्बकबकुलशिलामयाख्यषोडशधापरिक्लृप्तरत्नप्रभासहचरितत्वात् रत्नप्रभा भूमिः। शर्कराप्रभासहचरिता शर्कराप्रभा। वालुकाप्रभासहचरिता वालुकाप्रभा। पङ्कप्रभासहचरिता पङ्कप्रभा। धूमप्रभासहचरिता धूमप्रभा। तमःप्रभासहचरिता तमप्रभा। महातमः प्रभासहचरिता महातमःप्रभेति।

**तमःप्रभेति विरुद्धमिति चेन्न; स्वात्मप्रभोपपत्तेः॥४॥** स्यान्मतम्– तमोऽन्धकारः प्रभा प्रकाश इति विरुद्धावेतावर्थौ – यदि तमो न प्रभा, अथ प्रभा न तमः, तमःप्रभेत्यभिधानमनुपपन्नमिति; तन्न; किं कारणम्? स्वात्मप्रभोपपत्तेः। न दीप्तिरूपैव प्रभा। किं तर्हि? द्रव्याणां स्वात्मैव मृजा प्रभा यत्सन्निधानात् मनुष्यादीनामयं संव्यवहारो भवति स्निग्धिकृष्णप्रभमिदं रूक्षकृष्णप्रभमिदमिति, ततस्तमसोऽपि स्वात्मैव कृष्णा प्रभाऽस्तीति नास्ति विरोधः। बाह्यप्रकाशापेक्षा सेति चेत्; अविशेषप्रसङ्गः स्यात्।

**अनादिपारिणामिकसंज्ञानिर्देशाद्वा इन्द्रगोपवत्॥५॥** यथा इन्द्रगोप इति कस्यचिज्जन्तोः संज्ञाऽनादिः स्वाभाविकी। न ह्यसौ इन्द्रं गोपायतीतीन्द्रगोपः। एवं तमःप्रभादिसंज्ञा अपि अनादिपारिणामिक्यो वेदितव्याः।

**भेदे रूढिशब्दानामगमकत्वमवयवार्थाभावादिति चेन्न; सूत्रस्य प्रतिपादनोपायत्वात्॥६॥** स्यादेतत् – यद्येतेऽन्तेऽनैमित्तिका रूढिशब्दा भेदे गमकत्वमेषां नास्ति। कुतः? अवयवार्थाभावादिति; तन्न; किं कारणम्? सूत्रस्य प्रतिपादनोपायत्वात्। तेषां संज्ञाशब्दानां प्रतिपादनोपायभूतमिदम्। अस्मान्निबन्धनस्थानाच्छब्दान्तराण्युपप्लवन्ते यैरर्थाः संज्ञायन्ते।

**भूमिग्रहणमधिकरणविशेषप्रतिपत्त्यर्थम् ॥७॥** यथा स्वर्गपटलानि भूमिमनाश्रित्या-वस्थितानि न तथा नारकावासाः। किं तर्हि? भूमीराश्रित्य व्यवस्थिता इत्यधिकरण-विशेषप्रतिपत्त्यर्थं भूमिग्रहणम् ।

**घनाम्ब्वादिग्रहणं तदालम्बननिर्ज्ञानार्थम् ॥८॥** तासां भूमीनामालम्बननिर्ज्ञानार्थं घनाम्ब्वादिग्रहणं क्रियते। घनमेवाम्बु घनाम्बु। घनाम्बु च वातश्चाकाशं च घनाम्बुवाता-काशानि, तानि प्रतिष्ठा आश्रयो यासां ता घनाम्बुवाताकाशप्रतिष्ठाः। सर्वा एता भूमयः घनोदधिवलयप्रतिष्ठाः, घनोदधिवलयं घनवातवलयप्रतिष्ठं घनवातवलयं तनुवातवलय-प्रतिष्ठम्, तनुवातवलयमाकाशप्रतिष्ठम्, आकाशमात्मप्रतिष्ठं तस्यैवाधाराधेयत्वात् । त्रीण्यप्येतानि वलयान्यन्वर्थसंज्ञानि प्रत्येकं विंशतियोजनसहस्रबाहल्यानि। तत्र घनोदधयो मुद्गसन्निभाः, घनवाता गोमूत्रवर्णाः, अव्यक्तवर्णास्तनुवाताः।

तत्र रत्नप्रभाया बाहल्यमेकयोजनशतसहस्रमशीतिश्च योजनसहस्राणि। तस्यास्त्रयो भागाः–खरपृथिवीभागः, पङ्कबहुलः, अब्बहुलश्चेति। तत्र चित्रादिषोडशधा प्रक्लृ-प्तरत्नाञ्चितः खरपृथिवीभागः, षोडशयोजनसहस्त्रबहलः। पङ्कबहुलः चतुरशीति-योजनसहस्त्रबहलः। अब्बहुलोऽशीतियोजनसहस्रबहलः। त खरपृथिवीभागस्योपर्यधश्चैकैकं योजनसहस्रं परित्यज्य मध्यमभागेषु चतुर्दशसु योजनसहस्रेषु किन्नरकिम्पुरुषमहोरगगन्धर्वयक्षभूतपिशाचानां सप्तानां व्यन्तराणां नागविद्युत्सुपर्णाग्निवातस्तनितो-दधिद्वीपदिक्कुमाराणां नवानां भवनवासिनां चावासाः। पङ्कबहुलभागेऽसुरराक्ष-सानामावासाः। अब्बहुलभागे नरकाणि। शर्कराप्रभायां बाहल्यं द्वात्रिंशद्योजनसहस्राणि। ततोऽधोऽधस्तनानि चतुर्भिश्च चतुर्भिर्योजनसहस्रोनानि बाहल्यानि वेदितव्यानि आ षष्ठ्याः। सप्तम्यामष्टौ योजनसहस्राणि। सर्वासां तासामन्तराणि तिर्यक् चासंख्येया योजनकोटिकोट्यः।

**सप्तग्रहणमियत्तावधारणार्थम् ॥९॥** यथा गम्येत सप्तैव नरकाधारा भूमयो नाष्टौ न षट् चेति संख्यान्तरनिवृत्त्यर्थम्। सन्ति हि केचित्तन्त्रान्तरीयाः "अनन्तेषु लोकधातु-ष्वनन्ताः पृथिवीप्रस्ताराः" इत्यध्यवसिताः। कथं तेषां निवृत्तिः? स्याद्वादनीति-निरूपितकर्मफलसंबन्धादिषु युक्तिसद्भावादार्हतस्यागमस्य प्रामाण्यं न शेषाणां तदभावादिति।

**अधोऽधोवचनं तिर्यक्प्रचयनिवृत्त्यर्थम् ॥१०॥** यथा गम्येताधोऽध एव सप्तापि भूमयो न तिर्यक्प्रचयेनावस्थिता इति प्रतिपत्त्यर्थमधोऽधोग्रहणम्।

**सामीप्याभावाद् द्वित्वानुपपत्तिरिति चेन्न; अन्तरस्याविवक्षितत्वात् ॥११॥** स्यान्मतम् – प्रत्येकं भूमीनामन्तराण्यसंख्यातयोजनकोटीकोटिपरिमाणानि ततः सामीप्याभावाद् द्वित्वाभाव इति; तन्न; किं कारणम्? अन्तरस्याविवक्षितत्वात्। कथमविवक्षा सतः? सतोऽप्यविवक्षा भवति यथाऽलोमिका एडका अनुदरा कन्येति।

**तुल्यजातीयेनाव्यवधानं सामीप्यमिति वा॥१२॥** अथवा यदन्तरं तत्पूर्वोत्तर-भागान्तः पातित्वात् सामीप्यमिति तद्द्योतनार्थं द्वित्वम्।

**'पृथुतराः' इति केषाञ्चित् पाठः॥१३॥** केचिदत्र 'पृथुतराः' इति पठन्ति।

**अत्र तरनिर्देशः कुतः? प्रकर्षाभावात् ॥१४॥** द्वयोर्द्वयोर्वाऽभिसंबन्धे सति महत्त्व-विशेषप्रख्यापनार्थस्तरशब्दः। एवमपि रत्नप्रभायाः पृथुतराव्यपदेशो नास्ति प्रतियोग्य-भावात्। अपि च शर्कराप्रभादीनां प्रकर्षाभावः अधोऽधो हीनपरिमाणत्वात्। तस्मादधोऽधः पृथुतरा इति व्यपदेशो नोपपद्यते।

स्यादेतत् – अधोलोकस्य वेत्रासनसंस्थानस्याधोऽधः पृथुत्वप्रकर्षात् पृथुतरा इति व्यपदेश इति; तच्च न; भूमिभ्यो बहिस्तत्पृथुत्वम्। एवं ह्युक्तम् "**स्वयम्भूरमण-समुद्रान्तादवलम्बिता रज्जुः सप्तम्याः भूमेरवसाने पूर्वादिदिग्विभागावगाहिकाल-**

**महाकालरौरवमहारौरवान्ते पतति"** इति। अथापि कथञ्चित् स्यात् प्रकर्षः तिर्यक् पृथुतरा इति वक्तव्यं स्यान्नधोऽधः इति। अथापि कथञ्चिदनेन विशेषणेनार्थः, एवं ग्राह्यः अधोऽधो वेदनाप्रकर्षाप्रकर्षयोगादायुषोऽतिशयाद्वा तन्निमित्तस्य तद्व्यपदेशदर्शनात्, तत्संबन्धाद्वा भूमयः पृथुतरा इति व्यपदिश्यन्ते। एवमपि रत्नप्रभायां पृथुतराव्यपदेशो नोपपद्यत एव।

अत्राह–किं ता भूमयो नारकाणां सर्वत्रावासा आहोस्वित् क्वचित् क्वचिदिति तन्निर्धारणार्थमाह –

## तासु त्रिंशत्पञ्चविंशतिपञ्चदशदशत्रिपञ्चोनैकनरकशतसहस्राणि पञ्च चैव यथाक्रमम् ॥२॥

तासु रत्नप्रभादिषु भूमिषु नरकाण्यनेन संख्यायन्ते।

**त्रिंशदादीनां परस्पराभिसंबन्धे वृत्तिः॥१॥** त्रिंशदादीनां पदानां परस्पराभिसंबन्धे सति वृत्तिर्वेदितव्या। पञ्चभिरूनं पञ्चोनं पञ्चोनं च तदेकं च तत्पञ्चोनैकम् । त्रिंशच्च पञ्चविंशतिश्च पञ्चदश च दश च त्रीणि च पञ्चोनैकं च। त्रिंशत्पञ्चविंशति-पञ्चदशदशत्रिपञ्चोनैकानि। शतानां सहस्राणि शतशहस्राणि नरकाणां शतसहस्राणि नरकशतसहस्राणि, त्रिंशत्पञ्चविंशतिपञ्चदशदशत्रिपञ्चोनैकानि च तानि नरकशत-सहस्राणि च तानि त्रिंशत्पञ्चविंशतिपञ्चदशदशत्रिपञ्चोनैकनरकशतसहस्राणि।

**यथाक्रमवचनं यथासंख्याभिसंबन्धार्थम् ॥२॥** यो यः क्रमो यथाक्रमम्, यस्य वचनं रत्नप्रभादिभिः, त्रिंशतादीनां यथासंख्याभिसंबन्धो यथा स्यादिति। तद्यथा – रत्नप्रभायां त्रिंशन्नरकशतसहस्राणि। शर्कराप्रभायां पञ्चविंशतिनरकशतसहस्राणि। वालुकाप्रभायां पञ्चदशनरकशतसहस्राणि। पङ्कप्रभायां दशनरकशतसहस्राणि। धूमप्रभायां त्रीणि

नरकशतसहस्राणि। तमःप्रभायां पञ्चोनमेकं नरकशतसहस्रम् । महातमप्रभायां पञ्च नरकाणि।

तत्र रत्नप्रभायामब्बहुलभागे उपर्यधश्चैकैकं योजनसहस्रं वर्जयित्वा मध्ये नरकाणि भवन्ति। तानि त्रिधा वर्ण्यन्ते, इन्द्रकश्रेणिपुष्पप्रकीर्णकविभागेन। तत्र रत्नप्रभायां त्रयोदशनरकप्रस्ताराः, त्रयोदशैवेन्द्रकनरकाणि सीमन्तकनिरयरौरवोभ्रोन्तोद्भ्रान्त-सम्भ्रान्तविभ्रान्ततप्तत्रस्तव्युत्क्रान्तावक्रान्तविक्रान्तनामानि। शर्कराप्रभायामेकादश नरक-प्रस्ताराः एकादशैवेन्द्रकनरकाणि स्तनकसंस्तनकवनकमनकघाटसंघाटदशजिह्वोज्जि-ह्विकालोललोलुकस्तनलोलुकाख्यानि। वालुकाप्रभायां नव नरकप्रस्तारा नवैवेन्द्रकनरकाणि तप्तत्रस्ततपनाऽऽतपननिदाघप्रज्वलितोज्वलितसंज्वलितसंप्रज्वलितसंज्ञकानि। पङ्कप्रभायां सप्तनरकप्रस्तारा: सप्तैवेन्द्रनरकाणि आरमारतारवर्चस्कवैमनस्कखडाखडाख्यानि। धूमप्र-भायां पञ्च नरकप्रस्ताराः – पञ्चैवेन्द्रकनरकाणि तमोभ्रमझषान्धतमिस्राभिधानानि। तमःप्रभायां त्रयो नरकप्रस्ताराः – त्रीण्येवेन्द्रकनरकाणि हिमवर्दललल्लकनामधेयानि। महातमःप्रभायामेको नरकप्रस्तारः, एकमेवेन्द्रकनरकमप्रतिष्ठानाख्यम् ।

तत्र सीमन्तकस्य चतसृषु दिक्षु चतस्रो नरकश्रेण्यो निर्गतास्तथा विदिक्ष्वपि। तदन्तरेषु पुष्पप्रकीर्णकनरकाणि। तत्रैकैकस्यां दिङ्नरकश्रेण्यामेकोनपञ्चाशदेकोन-पञ्चाशन्नरकाणि। तथैकैकस्यां विदिङ्नरकश्रेण्यामष्टचत्वारिंशदष्टचत्वारिंशन्नरकाणि। एवं निरयादिष्वप्येकैकं परिहाप्य नेतव्यानि।

तत्र प्रथमायां पृथिव्यां श्रेणीन्द्रकनरकाणां संख्या चतुश्चत्वारिंशच्छतानि त्रयस्त्रिंशानि। पुष्पप्रकीर्णकानामेकोनत्रिंशच्छतसहस्राणि पञ्चनवतिश्च सहस्राणि पञ्च

शतानि सप्तषष्ट्यधिकानि। एतावुभावपि राशी सपिण्डितौ त्रिंशन्नरकशतसहस्राणि। द्वितीयायां श्रेणीन्द्रकनरकसंख्या षड्विंशतिः शतानि पञ्चनवत्युत्तराणि। पुष्पप्रकीर्णकानां संख्या चतुर्विंशतिः शतसहस्राणि सप्तनवतिः सहस्राणि त्रीणि शतानि पञ्च च। एतावुभावपि राशी सपिण्डितौ पञ्चविंशतिः नरकशतसहस्राणि। तृतीयायां श्रेणीन्द्रकनरकसंख्या चतुर्दशशतानि पञ्चाशीत्यधिकानि। पुष्पप्रकीर्णकसंख्या चतुर्दश शतसहस्राणि अष्टानवतिः सहस्राणि पञ्चशतानि पञ्चदशाधिकानि। एतावुभावपि राशी सपिण्डितौ पञ्चदशनरकशतसहस्राणि। चतुर्थ्यां श्रेणीन्द्रकनरकसंख्या सप्ताधिकानि सप्तशतानि। पुष्प्रकीर्णकसंख्या नवनरकशतसहस्राणि नवनवतिश्च सहस्राणि द्वे शते त्रिनवत्युत्तरे। एतावुभावपि राशी सपिण्डितौ दशनरकशतसहस्राणि। पञ्चम्यां श्रेणीन्द्रकनरकसंख्या द्वे नरकशते पञ्चषष्ट्यधिके। पुष्पप्रकीर्णकसंख्या द्वे शतसहस्रे नवनवतिश्च सहस्राणि सप्तशतानि पञ्चशतानि पञ्चत्रिंशानि च। एतावुभावपि राशी सपिण्डतौ त्रीणि नरकशतसहस्राणि। षष्ठ्यां श्रेणीन्द्रकनरकसंख्या त्रिषष्टिनरकाणि। पुष्पप्रकीर्णकसंख्या नवनवतिः नरकसहस्राणि नवशतानि द्वात्रिंशानि। एतावुभावपि राशी सपिण्डितौ नवनवतिः सहस्राणि नवशतानि पञ्चनवत्युत्तराणि। सप्तम्यामिन्द्र-कनरकमेकमप्रतिष्ठानं नाम। श्रेणीनरकाणि चत्वारि। प्राच्यां दिशि कालं प्रतीच्यां महाकालमपाच्यां रौरवमुदीच्यां महारौरवम्। विदिक्श्रेणीनरकाणि न सन्ति। तान्येतानि पञ्च सर्वश्रेणीन्द्रकनरकसंख्या षण्णवतिर्नरकशतानि त्रिपञ्चाशानि। सर्वपुष्प-प्रकीर्णकसंख्या त्र्यशीतिर्नरकशतसहस्राणि नवतिसहस्राधिकानि त्रीणि च शतानि सप्तचत्वारिंशानि। एतावुभावपि राशी सपिण्डितौ चतुरशीतिः नरकशतसहस्राणि।

तासु सप्तास्वपि पृथिवीषु कानिचिन्नरकाणि संख्येयविस्ताराणि कानिचिद-संख्येयविस्ताराणि। यानि संख्येयविस्ताराणि तानि संख्येययोजनशतसहस्रविस्ताराणि, यान्यसंख्येयविस्ताराणि तान्यसंख्येययोजनशतसहस्रविस्ताराणि। सर्वत्र च नरकाणां पञ्चमो भागः संख्येयविस्ताराणां चत्वारो भागा असंख्येयविस्ताराणाम् बाहल्यमुच्यते

क्रोशः प्रथमपृथिव्यामितरास्वर्धाधिकाः क्रमेणैव।
चत्वारः सप्तम्यां सर्वेन्द्रकनरकबाहल्यम् ॥
स्वेन्द्रकबाहल्यं स्वत्रिभागपरिवर्धितं तच्छ्रेण्याः।
श्रेणीन्द्रकबाहल्यसहितं ज्ञेयं प्रकीर्णकस्य॥

तान्येतानि नरकाणि उष्ट्रकाद्यशुभसंस्थानानि शोचनरोदनाक्रन्दनाद्यशुभनामानि वेदितव्यानि।

अथ तेषु सीमन्तकादिषु नरकेषु पापकर्मवशात् प्रादुर्भवन्तः प्राणिनः किंलक्षणा इति? अत आह –

## नारका नित्याऽशुभतरलेश्यापरिणामदेहवेदनाविक्रियाः॥३॥

**लेश्यादिशब्दा उक्तार्थाः॥१॥** लेश्यादयः शब्दा उक्तार्था वेदितव्याः। लेश्या च परिणामश्च देहश्च वेदना च विक्रिया च लेश्यापरिणामदेहवेदनाविक्रियाः। लोके प्रतियोग्यन्तरापेक्षया प्रकर्षो दृष्टः। इह अशुभतरा इति किमपेक्ष्य प्रकर्षनिर्देशः? उच्यते–

**तिर्यग्व्यपेक्षोऽतिशयनिर्देशः॥२॥** तिरश्चामप्यशुभा लेश्यादयो नारकाणां च। ततः प्रकर्षेण नारकाणामित्यशुभतराः।

**ऊर्ध्वापेक्षो वाऽधोगतानाम् ॥३॥** अथवा ऊर्ध्वनरकाशुभतरलेश्याद्यपेक्षयाऽधोगतानां प्रकर्षो द्रष्टव्यः।

**नित्यग्रहणाल्लेश्याद्यनिवृत्तिप्रसङ्ग इति चेन्न ; आभीक्ष्ण्यवचनत्वात् नित्यप्रहसितवत् ॥४॥** स्यादेतत् – नित्यशब्दोऽयं कूटस्थेष्वविचलेषु भावेषु दृष्टः; यथा नित्या द्यौः नित्या पृथिवी नित्यमाकाशमिति, तथा लेश्यादीनामपि व्ययोदयाभावान्नित्यत्वे

सति नरकादप्रच्यवः स्यादिति? तन्न; किं कारणम्? आभीक्ष्ण्यवचनान्नित्यप्रहसितवत्। यथा नित्यप्रहसितो देवदत्त इत्युच्यते योऽभीक्ष्णं प्रहसति न च तस्य प्रहसनानिवृत्तिः, कारणे सति भावात्। तथाऽशुभकर्मोदयनिमित्तवशात् लेश्यादयोऽनारतं प्रादुर्भवन्तीत्याभीक्ष्ण्यवचनो नित्यशब्दः प्रयुक्तः। नित्यमशुभतरा नित्याशुभतराः सुप्सुपेति वृत्तिर्मयूरव्यंसकादित्वाद्वा। नित्याशुभतरा लेश्यापरिणामदेहवेदनाविक्रिया येषां त इमे नित्याशुभतरलेश्यापरिणामदेहवेदनाविक्रियाः।

तत्राशुभतरलेश्या इति प्रथमाद्वितीययोः कापोतलेश्या। तृतीयायामुपरिष्टात् कापोती अधो नीला। चतुर्थ्यां नीला। पञ्चम्यामुपरि नीला अधः कृष्णा। षष्ठ्यां कृष्णा। सप्तम्यां परमकृष्णा। एतेषां नारकाणां स्वायुःप्रमाणावधृता द्रव्यलेश्या उक्ता; भावलेश्यास्तु षडपि प्रत्येकमन्तर्मुहूर्तपरिवर्तिन्यः।

अशुभतरपरिणामा इति स्पर्शरसगन्धवर्णशब्दपरिणामाः क्षेत्रविशेषनिमित्तवशादतिदुःखहेतवोऽशुभतराः।

अशुभतरदेहा इति तेषां शरीराण्यशुभनामप्रत्ययादशुभाङ्गोपाङ्गस्पर्शरसगन्धवर्णस्वराणि हुण्डसंस्थानानि निर्लूनाण्डशरीराकृतीनि क्रूरकरणवीभत्सप्रतिभयदर्शनानि। यथेह श्लेष्ममूत्रपुरीषमलरुधिरवसामेदःपूयवमनपूतिमांसकेशास्थिचर्माद्यशुभमौदारिकगतं ततोऽप्यतीवाशुभत्वं नारकाणां वैक्रियिकशरीरत्वेऽपि। तत्र रत्नप्रभायां नारकशरीरोत्सेधः सप्त धनूंषि त्रयो हस्ताः षट् चाङ्गुलयः। अधोऽधो द्विगुणद्विगुण उत्सेधः।

अशुभतरवेदना इत्यभ्यन्तरासद्वेद्योदये सत्यनादिपारिणामिकशीतोष्णबाह्यनिमित्तजनिताः सुतीव्रवेदना भवन्ति नारकाणाम्। तद्यथा– निदाघे मध्याह्ने व्यभ्रे नभसि पटुतपनकिरणसन्तप्तदिगन्तराले दूरीकृतशीतवाते दवाग्निदाहोद्वाहिपरुषसमीरणे रूक्षदेशे सर्वतो दीप्ताग्निशिखापरीतस्य तृष्णार्तस्य पित्तज्वरसंतापितशरीरस्य

निष्प्रतीकारस्य यादृगुष्णजं दुःखं ततोऽप्यनन्तगुणमुष्णनरकेषु दुःखं भवति। माघमासे हिमानीपतन-व्याप्तशीतदिगन्तराले नभसि प्रस्पन्दजलाप्लुतकर्दममहीतले रात्रौ शीतवातपातप्रस्फुरित-गात्रकृतदन्तवीणस्य शीतज्वराभिभूततनोर्निरग्न्याश्रयप्रावरणस्य यादृक् शीतसमुद्भवं दुःखं ततोऽप्यनन्तगुणं कष्टं शीतनरकेषु दुःखं भवति। अथवा हिमवन्मात्रस्ताम्रगिरिरुष्णनरकेषु यदि निक्षिप्येत क्षिप्रमेव हि द्रवीभवेत्। स एवं द्रवीभूतः शीतनरकेषु यदि निक्षिप्येत अक्षिनिमेषमात्र एव घनः स्यादित्येवमनुमीयमानं शीतोष्णं तत्र वेदितव्यम्।

प्रथमाद्वितीयातृतीयाचतुर्थीषूष्णवेदनान्येव नरकाणि। पञ्चम्यामुष्णवेदने द्वे नरकशतसहस्रे, अधः शीतवेदनानामेकं शतसहस्रम् षष्ठीसप्तम्योः शीतवेदनान्येव। सर्वसमुदायेन द्व्यशीतिनरकशतसहस्राणि उष्णवेदनानि, द्वे नरकशतसहस्रे शीतवेदने।

अशुभतरविक्रिया इति शुभं करिष्याम इत्यशुभतरमेव विकुर्वन्ति। दुःखाभिभूतमनसश्च दुःखप्रतीकारचिकीर्षया गरीयस एव दुःखहेतून् विकुर्वन्ति। त एते भावा अधोऽधोऽशुभतराः वेदितव्याः।

किमेषां नारकाणां शोतोष्णजनितमेव दुःखमुतान्यथापि भवतीति? अत आह –

## परस्परोदीरितदुःखाः ॥४॥

कथं परस्परोदीरितदुःखत्वम्?

**निर्दयत्वात् परस्परदर्शने सति कोपोत्पत्तेः श्ववत् ॥१॥** यथा श्वानः शाश्वतिकाकारणानादिकालप्रवृत्तजातिकृतवैरापादितनिर्दयत्वात् परस्परभक्षणभेदनछेदनमदयुदीरितदुःखा भवन्ति, तथा नारका अपि भवप्रत्ययेनावधिज्ञानेन मिथ्यादर्शनोदयाद्विभङ्गव्यपदेशभाजा च दूरादेव दुःखहेतूनवगम्योत्पन्नदुःखाः प्रत्यासत्तौ

परस्परालोकनाच्च प्रज्वलितकोपाग्नयः स्वविकृतासिवासीपरशुभिण्डिपालादिभिः परस्पर-देहतक्षणभेदनछेदनपीडनादिभिरुदीरितदुःखा भवन्ति।

किमेतावानेव दुःखोत्पत्तिकारणप्रकार उतान्योऽपि कश्चिदस्तीति? अत आह –

## संक्लिष्टासुरोदीरितदुःखाश्च प्राक् चतुर्थ्याः॥५॥

**पूर्वभवसंक्लेशपरिणामोपात्ताशुभकर्मोदयात् सततं क्लिष्टाः संक्लिष्टाः॥१॥** पूर्वजन्मनि भावितेनातितीव्रेण संक्लेशपरिणामेन यदुपार्जितं पापकर्म तस्योदयात् सततविरतं क्लिष्टाः संक्लिष्टाः।

**असुरनामकर्मोदयादसुराः॥२॥** देवगतिनामकर्मविकल्पस्यासुरत्वसंवर्तनस्य कर्मण उदयादस्यन्ति परानित्यसुराः।

**संक्लिष्टविशेषणमन्यासुरनिवृत्त्यर्थम्॥३॥** न सर्वेऽसुरा नारकाणां दुःखमुत्पादयन्ति। किं तर्हि? अम्बाबरीषादय एव केचनेति प्रदर्शनार्थं संक्लिष्टविशेषणम्।

**असुराणां गतिविषयनियमप्रदर्शनार्थं प्राक्चतुर्थ्या इति वचनम्॥४॥** तेषां संक्लिष्टानामसुराणां वेदनोदीरणकारणानां तिसृषु पृथिवीषु गतिर्नातः परमिति प्रदर्शनार्थं प्राक्चतुर्थ्या इत्युच्यते।

**आङो ग्रहणं लघ्वर्थमिति चेन्न; संदेहात्॥५॥** स्यान्मतम्–आङत्र प्रयोक्तव्यः लघ्वर्थम्। स एव मर्यादां गमयतीति; तन्न; किं; कारणम्? सन्देहात्। अभिविधावपि

आङ् वर्तते मर्यादायामपि, ततः सन्देहः स्यात् – 'किं सह चतुर्थ्या उत ततः प्राग्' इति अतोऽसंदेहार्थं प्राग्वचनमेव युक्तम्।

**चशब्दः पूर्वहेतुसमुच्चयार्थः ॥६॥** संक्लिष्टासुरोदीरितदुःखाश्च पूर्वोक्तहेतूदीरितदुःखाश्चेति समुच्चयार्थश्चशब्दः; इतरथा हि तिसृषु भूमिषु पूर्वोक्तहेत्वभावः प्रतीयेत।

**अनन्तरत्वादुदीरितग्रहणानर्थक्यमिति चेन्न; तस्य वृत्तौ परार्थत्वात् ॥७॥** स्यान्मतम् – अनन्तरमुदीरितग्रहणमस्ति तेनैवात्राभिसंबन्धः कर्तव्यः। अनर्थकं पुनरुदीरितग्रहणमिति; तन्न; किं कारणम्? तस्य वृत्तौ परार्थत्वात्। स ह्युदीरितशब्दो वृत्तौ परार्थे सन्नवस्थित इह संबद्धुमशक्यः।

**वाक्यवचनमिति चेन्न; उदीरणहेतुप्रकारप्रदर्शनार्थत्वात् ॥८॥** स्यादेतत् – वाक्यमेव वक्तव्यं परस्परेणोदीरितदुःखाः संक्लिष्टासुरैश्च प्राक् चतुर्थ्या इति? तन्न; किं कारणम्? उदीरणहेतुप्रकारप्रदर्शनार्थत्वात्। पुनरुदीरितग्रहणेनोदीरणकारणप्रकाराः प्रदर्श्यन्ते। तद्यथा – तप्तायोरसपायननिष्टप्तायस्तम्भालिङ्गनकूटशाल्मल्यारोहणावतरणाऽयोघनाभिघातवासीक्षुरतक्षणक्षरणतप्ततैलावसेचनाऽयःकुम्भीपाकाऽम्बरीषभर्जनयन्त्रपीलनैः शूलशलाकाव्यधनक्रकचपाटनाऽङ्गारधाम्निवाहनसूचीशाड्वलाकर्षणैः व्याघ्रर्क्षद्वीपिश्वशृगालवृककोकमार्जारनकुलाखुसर्पवायसगृध्रकङ्कोलूकश्येनादिखादनैः तप्तवालुका-विचरणाऽसिपत्रवनप्रवेशनवैतरण्यवतारणपरस्परयोधनादिभिश्च ते संक्लिष्टासुरा दुःखमुदीरयन्ति नारकाणाम्। किमर्थं त एवं कुर्वन्तीति चेत्? पापकर्माभिरतत्वात्, यथा गोमहिषमेषवराहकुक्कुटवर्तिकालावकान् मल्लांश्च युद्ध्यमानान् परस्परं घ्नतश्च दृष्ट्वा रागद्वेषमोहाभिभूतानामकुशलानुबन्धिपुण्यानां नराणां प्रीतिरुत्पद्यते, तथा तेषामसुराणां नारकांस्तथा कारयतामन्योन्यं च घ्नतः पश्यतां परा प्रीतिरुत्पद्यते। तेषां सत्यपि देवत्वे

मायानिदानमिथ्यादर्शनशल्यतीव्रकषायोपहतस्याऽनालोचितभावदोषस्याऽप्रत्यवमर्शस्याऽ-कुशलानुबन्धस्य पुण्यस्य कर्मणस्तपसश्च सावद्यदोषानुकर्षिणस्तत्फलं यत् सत्स्वप्य नेकेषु प्रीतिहेतुष्वशुभा एव प्रीतिहेतव इति। एवं छेदभेदादिभिः शकलीकृतमूर्तीनामपि तेषां न मरणमकाले विद्यते। कुतः? **"औपपादिका अनपवर्त्यायुषः"** इति वचनात्। तेषां हि जघन्यमध्यमोत्कृष्टभेदभिन्नं यावदायुरवबद्धं तावद्यथाकालमेव विपच्यते नोदीरण-प्रत्ययवशादपवर्त्यते।

यद्येवं तदेव तावदुच्यतां नारकाणां कियदायुरिति? अत आह –

## तेष्वेकत्रिसप्तदशसप्तदशद्वाविंशतित्रयस्त्रिंशत्सागरोपमा सत्त्वानां परा स्थितिः॥६॥

सागरोपमेति कोऽयं शब्दः? सागर उपमा यस्याः सेयं सागरोपमा। क उपमार्थः?

**सागरस्योपमात्वं द्रव्यभूयस्त्वात्॥१॥** यथा सागरो जलसमूहेन भूयसा युक्तस्तथा आयुःकर्मापि भवधारणकारणपुद्गलद्रव्यसमूहेन महता योगात् सागरेणोपमीयते।

**एकादीनां कृतद्वन्द्वानां सागरोपमाविशेषणत्वम्॥२॥** एकादयः शब्दाः कृतद्वन्द्वाः सागरोपमाशब्दस्य विशेषणत्वेन नियुज्यन्ते। एका च तिस्रश्च सप्त च दश च सप्तदश च द्वाविंशतिश्च त्रयस्त्रिंशच्च एकत्रिसप्तदशसप्तदशद्वाविंशतित्रयस्त्रिंशतस्ता एव सागरोपमाः एकत्रिसप्तदशसप्तदशद्वाविंशतित्रयस्त्रिंशत्सागरोपमाः। कथमेकशब्दस्य पुंवद्भावः? ननु भिन्नाधिकरणत्वान्न प्राप्नोति; नायं पुंवद्भावः, औत्तरपदिकं ह्रस्वत्वम्, यथैकक्षीरमिति। अथवा सागर उपमा यस्य तत्सागरोपममायुः, एकं च त्रीणि च सप्त च सप्तदश च द्वाविंशतिश्च त्रयस्त्रिंशच्च

एकत्रिसप्तदशसप्तदशद्वाविंशतित्रयस्त्रिंशत्सागरोपममायुर्यस्याः सैकत्रिसप्तदशसप्तदशद्वाविंशतित्रयस्त्रिंशत्सागरोपमेति स्थित्यपेक्षः स्त्रीलिङ्गनिर्देशः।

**रत्नप्रभादिभिरानुपूर्व्येण संबन्धो यथाक्रमानुवृत्तेः॥३॥** 'यथाक्रमम्' इत्युनुवर्तते। ततो रत्नप्रभादिभिरेकादीनामानुपूर्व्येण संबन्धो वेदितव्यः। रत्नप्रभायामेकसागरोपमा स्थितिः, शर्कराप्रभायां त्रिसागरोपमा स्थितिः, वालुकाप्रभायां सप्तसागरोपमा स्थितिः, पङ्कप्रभायां दशसागरोपमा स्थितिः, धूमप्रभायां सप्तदशसागरोपमा स्थितिः, तमःप्रभायां द्वाविंशतिसागरोगमा स्थितिः, महातमःप्रभायां त्रयस्त्रिंशत्सागरोपमा स्थितिरिति।

**नरकप्रसङ्गः 'तेषु' इति वचनादिति चेन्न; रत्नप्रभाद्युपलक्षितत्वात् ॥४॥** स्यान्मतम् – 'तेषु' इति वचनान्नरकाभिसंबन्धः प्राप्नोति। ततः किम्? रत्नप्रभायां त्रयोदशेन्द्रकनरकसंज्ञानि तत्रारादेव सीमन्तकादिष्विन्द्रकनरकेषु स्थितिरियं परिसमाप्येत, नेष्यते च, तस्मात्तेष्विति वचनमयुक्तमिति; तन्न; किं कारणम्? रत्नप्रभाद्युपलक्षितत्वात्। यानि रत्नप्रभाद्यधिकरणत्वेनोपलक्षितानि त्रिंशच्छतसहस्राद्यवधृतपरिमाणानि तेष्वेकसागरोपमादिका स्थितिरिरिति नास्ति दोषः।

**साहचर्याद्वा ताच्छब्द्यसिद्धिः॥५॥** अथवा नरकसहचरिता भूमयोऽपि नरकाणीत्युच्यन्ते। अतस्तेषु रत्नप्रभादिषु नरकेषु प्रादुर्भवतां सत्त्वानामेकसागरोपमादिका स्थितिरित्यभिसंबन्धः। एवं च कृत्वा तेष्विति वचनमर्थवदितरथा हि व्यवधानाद् भूमिभिरनभिसंबन्धः स्यात्।

**नरकस्थितिप्रसङ्ग इति चेन्न; सत्त्वानामिति वचनात् ॥६॥** स्यादेतत्– यदि पृथिव्युपलक्षितनरकाभिसंबन्ध इष्टः, ननु नरकाणामेवैकसागरोपमादिस्थितिसम्बन्धः प्राप्नोति न नारकाणामिति; तन्न किं कारणम्? सत्त्वानामिति वचनात् तेषु नरकेषु सत्त्वानामियं स्थितिर्न नरकाणामिति।

**परोत्कृष्टेति पर्यायौ॥७॥** परोत्कृष्टेति पर्यायशब्दाविमौ तेन नारकाणामुक्ता स्थितिरुत्कृष्टा। रत्नप्रभादिषु प्रतिप्रस्तारं जघन्यापि स्थितिरुच्यते – सीमन्तकेन्द्रके तच्छ्रेणिषु चाष्टास्वपि नारकाणां जघन्या स्थितिर्दशवर्षसहस्राण्युत्कृष्टा नवतिवर्ष-सहस्राणि, अजघन्योत्कृष्टा मध्ये समयोत्तरा। निरयेन्द्रके तच्छ्रेणिषु चाष्टास्वपि नारकाणां जघन्या नवतिर्वर्षसहस्राणि, 'दशवर्षशतसहस्राणि 'इति क्वापि पाठः'। उत्कृष्टा नवतिर्वर्षशतसहस्राणि, अजघन्योत्कृष्टा मध्ये समयोत्तरा। रोरुकेन्द्रके तच्छ्रेणिषु चाष्टास्वपि नारकाणां जघन्यैका पूर्वकोटी, उत्कृष्टेनाऽसंख्याताः पूर्वकोट्यः, अजघन्योत्कृष्टा मध्ये समयोत्तरा। भ्रान्तेन्द्रके तच्छ्रेणिषु चाष्टास्वपि नारकाणां जघन्या असंख्याताः पूर्वकोट्यः, उत्कर्षेण सागरोपमस्यैको दशभागः, अजघन्योत्कृष्टा मध्ये समयोत्तरा। उद्भ्रान्तेन्द्रके तच्छ्रेणिषु चाष्टास्वपि नारकाणां जघन्या सागरोपमस्यैको दशभागः, उत्कृष्टा सागरोपमस्य द्वौ दश भागौ, अजघन्योत्कृष्टा मध्ये समयोत्तरा। संभ्रान्तेन्द्रके तच्छ्रेणिषु चाष्टास्वपि नारकाणां जघन्या सागरोपमस्य द्वौ दशभागावुत्कर्षेण सागरोपमस्य त्रयो दशभागाः, अजघन्योत्कृष्टा मध्ये समयोत्तरा। असंभ्रान्तेन्द्रके तच्छ्रेणिषु चाष्टास्वपि नारकाणां जघन्या सागरोपमस्य त्रयो दशभागाः, उत्कृष्टा सागरोपमस्य चत्वारो दशभागाः, अजघन्योत्कृष्टा मध्ये समयोत्तरा। विभ्रान्तेन्द्रके तच्छ्रेणिषु चाष्टास्वपि नारकाणां जघन्या सागरोपमस्य चत्वारो दशभागाः उत्कृष्टा सागरोपमस्य पञ्च दशभागाः, अजघन्योत्कृष्टा मध्ये समयोत्तरा। तप्तेन्द्रके तच्छ्रेणिषु चाष्टास्वपि नारकाणां जघन्या सागरोपमस्य पञ्च दशभागाः, उत्कृष्टा सागरोपमस्य षड् दशभागाः, अजघन्योत्कृष्टा मध्ये समयोत्तरा। त्रस्तेन्द्रके तच्छ्रेणिषु चाष्टास्वपि नारकाणां जघन्या सागरोपमस्य षड् दशभागाः, उत्कृष्टा सागरोपमस्य सप्त दशभागाः, अजघन्योत्कृष्टा मध्ये समयोत्तरा। व्युत्क्रान्तेन्द्रके तच्छ्रेणिषु चाष्टास्वपि नारकाणां जघन्या सागरोपमस्य सप्त दशभागाः उत्कृष्टा सागरोपमस्याष्टौ दशभागाः अजघन्योत्कृष्टा मध्ये समयोत्तरा। अवक्रान्तेन्द्रके तच्छ्रेणिषु चाष्टास्वपि

नारकाणां जघन्या सागरोपमस्याष्टौ दशभागाः, उत्कृष्टा सागरोपमस्य नव दशभागाः अजघन्योत्कृष्टा मध्ये समयोत्तरा। विक्रान्तेन्द्रके तच्छ्रेणिषु चाष्टास्वपि नारकाणां जघन्या सागरोपमस्य नव दशभागाः, उत्कृष्टा सागरोपमा, अजघन्योत्कृष्टा मध्ये समयोत्तरा।

शर्कराप्रभादिषु प्रतिप्रस्तारमुत्कृष्टा स्थितिः करणक्रमेण वेदितव्या। कथमिति चेत्? उच्यते –

**"उपरिस्थितेर्विशेषः स्वप्रतरविभाजितेऽष्टसंगुणितः।**

**उपरिपृथिवीस्थितियुतः स्वेष्ट प्रतरस्थितिर्महती॥१॥"**

उपर्युत्कृष्टाऽधो जघन्या सर्वत्र समयाधिका अजघन्योत्कृष्टा मध्ये समयोत्तरा।

अथैतेषां नारकाणामुत्पादविरहकालः कियानिति? अत्रोच्यते – सर्वासु पृथिवीषु जघन्य एकसमयः, उत्कृष्टाश्चतुर्विंशतिमुहूर्ताः सप्तरात्रिंदिवानि, पक्षः, मासः, द्वौ मासौ, चत्वारो मासाः, षण्मासा इति रत्नप्रभादिषु क्रमेण ज्ञेयाः।

अथोत्पादः क्व केषामिति? अत्रोच्यते – प्रथमायामसंज्ञिन उत्पद्यन्ते। प्रथमा-द्वितीययोः सरीसृपाः। तिसृषु पक्षिणः। चतसृषूरगाः। पञ्चसु सिंहाः। षट्सु स्त्रियः। सप्तसु मत्स्यमनुष्याः। न च देवनारका वा नरकेषूत्पद्यन्ते।

प्रथमायामुत्पद्यमाना नारका मिथ्यात्वेनाधिगताः केचिन्मिथ्यात्वेन निर्यान्ति, मिथ्यात्वेनाधिगताः केचित् सासादनसम्यक्त्वेन निर्यान्ति। मिथ्यात्वेनाधिगताः केचित्सम्यक्त्वेन निर्यान्ति। केचित्सम्यक्त्वेनाधिगताः सम्यक्त्वेनैव निर्यान्ति क्षायिकसम्यग्दृष्ट्यपेक्षया। द्वितीयादिषु पञ्चसु नारका मिथ्यात्वेनाधिगताः केचि-न्मिथ्यात्वेन निर्यान्ति, मिथ्यात्वेनाधिगताः केचित् सासादनसम्यक्त्वेन न्र्यान्ति, मिथ्यात्वे प्रविष्टाः केचित् सम्यक्त्वेन निर्यान्ति। सप्तम्यां नारका मिथ्यात्वेनाधिगता

मिथ्यात्वेनैव निर्यान्ति। षड्भ्य उपरि पृथिवीभ्यो नारकाः मिथ्यात्वसासादनसम्य-क्त्वाभ्यामुद्वर्तिता केचित् तिर्यङ्मनुष्यगती आयान्ति। तिर्यक्ष्वायाताः पञ्चेन्द्रिय-गर्भजसंज्ञिपर्याप्तकसंख्येयवर्षायुष्षूत्पद्यन्ते नेतरेषु। मनुष्येष्वायाता गर्भजपर्याप्तकेषु संख्येयवर्षायुष्षूत्पद्यन्ते नेतरेषु। नारकाः सम्यङ्मिथ्यादृष्टयस्तेन गुणेन नोद्वर्तन्ते। नारकाः सम्यग्दृष्टयः सम्यक्त्वेनोद्वर्तिता एकामेव मनुष्यगतिमायान्ति, मनुष्येष्वायाताः गर्भजपर्याप्तकसंख्येयवर्षायुष्षूत्पद्यन्ते नेतरेषु। सप्तम्यां नारका मिथ्यादृष्टयो नरकेभ्य उद्वर्तिता एकामेव तिर्यग्गतिमायान्ति, तिर्यक्ष्वायाताः पञ्चेन्द्रियगर्भजपर्याप्तकसंख्येय-वर्षायुष्षूत्पद्यन्ते नेतरेषु।

तत्र चोत्पन्नाः सर्वे मतिश्रुतावधिसम्यक्त्वसम्यङ्मिथ्यात्वसंयमासंयमान् नोत्पादयन्ति। षष्ठ्याः उद्वर्तिता नारकास्तिर्यङ्मनुष्येषु जाता केचिन्मतिश्रुतावधिसम्य क्त्वसम्यङ्मिथ्यात्वं संयमासंयमान् षड्त्पादयन्ति न सर्वे नाप्यतोऽन्यत्। पञ्चम्या उद्वर्तितास्तिर्यक्षूत्पन्नाः केचित् षड्त्पादयन्ति न सर्वे नाप्यतोऽन्यत् मनुष्येषूत्पन्नाः केचिन्मतिश्रुतावधिमनःपर्ययसम्यक्त्वसम्यङ्मिथ्यात्वसंयमासंयमानुत्पादयन्ति न सर्वे नाप्यतोऽन्यत्। चतुर्थ्या उद्वर्तितास्तिर्यक्षूत्पन्नाः केचिन्मत्यादीन् षड्त्पादयन्ति न सर्वे नाप्यतोऽन्यत्, मनुष्येषूत्पन्नाः केचिन्मतिश्रुतावधिमनःपर्ययकेवलसम्यक्त्वसम्य-ङ्मिथ्यात्वसंयमासंयमानुत्पादयन्ति, न च बलदेववासुदेवचक्रधरतीर्थकरत्वान्यु-त्पादयन्ति, केचित् कर्माष्टकान्तकराः सिद्ध्यन्ति। उपरि तिसृभ्य उद्वर्तितास्तिर्यक्षु जाताः केचित् षड्त्पादयन्ति, मनुष्येषूत्पन्नाः केचित् मतिश्रुतावधिमनःपर्ययकेवल सम्यक्त्वसम्यङ्मिथ्यात्वसंयमासंयमसंयमानुत्पादयन्ति न च बलदेववासुदेवचक्र-धरत्वान्युत्पादयन्ति केचित्तीर्थकरत्वमुत्पादयन्ति, अपरे कर्माष्टकान्तकराः सिध्यन्ति।

उक्तः सप्तावनिविस्तीर्णोऽधोलोकः।

इदानीं तिर्यग्लोकोऽवसरप्राप्तो व्याख्येयः। तत्रैतत्स्यात् – किमत्र व्याख्येयम्? द्वीपसमुद्राधिष्ठातृधरणीधरवनक्षेत्रान्तरपरिमाणादि। यद्येवं तदवतिष्ठताम् इदमेव तावद्व्या-क्रियतां कुतः पुनरियं तिर्यग्लोकसंज्ञा प्रवृत्तेति ? उच्यते – यतोऽसंख्येयाः स्वयंभूरमण-पर्यन्तास्तिर्यक्प्रचयविशेषणावस्थिता द्वीपसमुद्रास्ततः तिर्यग्लोकः इति। यद्येवं के पुनस्तिर्यगवस्थिता इति? अत आह –

## जम्बूद्वीपलवणोदादयः शुभनामानो द्वीपसमुद्राः॥७॥

आह - कुतः पुनरियं जम्बूद्वीपसंज्ञेति? उच्यते –

**प्रतिविशिष्टजम्बूवृक्षासाधारणाधिकरणत्वाज्जम्बूद्वीपः॥१॥** अयं हि द्वीपः प्रतिविशिष्टस्य जम्बूवृक्षस्य सपरिवारस्यासाधारणाधिकरणत्वं बिभर्ति नान्ये धातकीखण्डादयो द्वीपास्ततोऽस्य तत्साहचर्यात् जम्बूद्वीप इति संज्ञाऽनादिकालप्रवृत्ता। तद्यथा – उत्तरकुरुमध्ये जगती पञ्चयोजनशतायामविष्कम्भा तत्त्रिगुणसातिरेकपरिक्षेपा ततः प्रदेशहान्या बहिःपरिहीयमाणा मध्ये द्वादशयोजनबाहल्या, अन्ते क्रोशद्वयबाहल्या सा चैकया पद्मवरवेदिकया जाम्बूनदमय्या परिक्षिप्ता। तस्याः बहुदेशमध्यभागे नानारत्नमयमेकं पीठमष्टयोजनायामं चतुर्योजनविष्कम्भं तावदुच्छ्रायं द्वादशभिः पद्मवरवेदिकाभिः परिक्षिप्तम्। तासां च पद्मवरवेदिकानां प्रत्येकं चत्वारि तोरणानि श्वेतानि वरकनकस्तूपिकानि, तस्योपरि मणिमयमुपपीठं योजनायामविष्कम्भं क्रोशद्वयोच्छ्रायम्। तन्मध्ये जम्बूवृक्षः सुदर्शनाख्यो योजनद्वयोच्छ्रितस्कन्धः षड्योजनोत्सेधविटपः, मध्ये षड्योजनविष्कम्भपरिमण्डलोऽष्टयोजनायामः तदर्धमुच्छ्रितानां जम्बूनामष्टशतेन परिवृतः सुरवनिताक्रान्त; तद्योगाज्जम्बूद्वीपः।

**लवणरसाम्बुयोगाल्लवणोदः॥२॥** लवणरसोनाम्बूना योगात् समुद्रो लवणोद इति संज्ञायते। उदक्शब्दस्य पूर्वपदभूतस्योत्तरपदभूतस्य च संज्ञायामुदभावोऽन्वाख्यातः।

जम्बूद्वीपश्च लवणोदश्च जम्बूद्वीपलवणोदौ तावादी येषां ते जम्बूद्वीपलवणोदादयः। द्वीपाश्च समुद्राश्च द्वीपसमुद्रा यथासंख्यमभिसंबन्धः। जम्बूद्वीपादयो द्वीपा लवणोदादयः समुद्रा इति। किं नामानस्ते? शुभनामानः। यानि लोके शुभानि नामानि तान्येषां नामानि तद्यथा – जम्बूद्वीपो लवणोदः, धातकीखण्डः कालोदः, पुष्करवरः पुष्करोदः, वारुणीवरः वारुणोदः, क्षीरवरः क्षीरोदः, घृतवरः घृतोदः, इक्षुवरः इक्षूदः, नन्दीश्वरवरः नन्दीश्वरोद इत्येवमादयोऽसंख्येया द्वीपसमुद्राः स्वयम्भूरमणद्वीपस्वयम्भूरमणोदपर्यन्ताः। कियदसंख्येयाः? अर्धतृतीयसागरोपमसमयसंख्याः।

अमीषां विष्कम्भसन्निवेशसंस्थानविशेषप्रतिपत्त्यर्थमाह –

## द्विर्द्विर्विष्कम्भाः पूर्वपूर्वपरिक्षेपिणो वलयाकृतयः॥८॥

**द्विर्द्विरिति वीप्साभ्यावृत्तिवचनं विष्कम्भद्विगुणत्वव्याप्त्यर्थम्॥१॥** आद्यस्य द्वीपस्य यो विष्कम्भस्तद् द्विगुणो जलधिस्तद्द्विगुणविष्कम्भो द्वितीयो द्वीपः तद्द्विगुणविष्कम्भो द्वितीयो जलधिरिति द्वैगुण्यव्याप्त्यर्थं द्विर्द्विरुच्यते। द्विर्द्विर्विष्कम्भो येषां ते द्विर्द्विर्विष्कम्भाः।

ननु च वृत्त्याऽभ्यावृत्तिरुच्यते द्विर्दश द्विदशा इति। वीप्सा च क्वचिदुच्यते सप्तपर्ण इति। तद्वदिह वीप्साऽभ्यावृत्त्योर्वृत्त्योक्तवात् द्वित्वस्य सुचश्चाप्रयोगः प्राप्नोति? नैष दोषः; यत्र गम्यते न तत्र प्रयुज्यते, इह तु द्विर्विष्कम्भा इत्युक्ते तदर्थागतेर्द्विर्द्विरित्युच्यते।

**अनिष्टविनिवेशव्यावृत्त्यर्थं पूर्वपूर्वपरिक्षेपिवचनम् ॥१॥** ग्रामनगरादिवदनिष्टविनिवेशो मा विज्ञायीति 'पूर्वपूर्वपरिक्षेपिणः' इत्युच्यते। तेनोत्तरोत्तरानन्तर्यसिद्धिर्भवति। पूर्वं पूर्वं परिक्षिपन्तीत्येवंशीलाः पूर्वपूर्वपरिक्षेपिणः अत्राप्यगमकत्वाद् द्वित्वम् ।

**चतुरस्रादिनिवृत्त्यर्थं वलयाकृतिवचनम् ॥३॥** आकृतिस्संस्थानम्, वलयस्येवा-कृतिर्येषां ते वलयाकृतयः। एतेन चतुरस्रादिसंस्थानान्तरनिवृत्तिः कृता भवति। ततो मिथ्यावादिप्रणीतसंस्थानान्तरप्रतिकल्पना न तत्त्वम् ।

अत्राह जम्बूद्वीपस्य प्रदेशसंस्थानविष्कम्भा वक्तव्याः, तन्मूलत्वादितरविष्कम्भा-दिविज्ञानस्येति? अत आह –

## तन्मध्ये मेरुनाभिर्वृत्तो योजनशतसहस्रविष्कम्भो जम्बूद्वीपः ॥९॥

**तच्छब्दः पूर्वद्वीपसमुद्रनिर्देशार्थः ॥१॥** पूर्वोक्तानामसंख्येयानां द्वीपसमुद्राणां निर्देशा-र्थस्तच्छब्दो द्रष्टव्यः। तेषां मध्ये तन्मध्ये नाभिरिव नाभिः। मेरुर्नाभिर्यस्य स भवति मेरुनाभिः, वृत्त आदित्यमण्डलोपमानः। शतानां सहस्रं शतसहस्रं योजनानां शतसहस्रं योजनशतसहस्रं विष्कम्भो यस्य सोऽयं योजनशतसहस्रविष्कम्भः।

तस्य परिक्षेपः त्रीणि शतसहस्राणि षोडशसहस्राणि द्वे शते सप्तविंशतिश्च योजनानाम्, त्रीणि गव्यूतानि, शतं धनुषामष्टाविंशत्युत्तरम्, त्रयोदशाङ्गुलयोऽर्धाङ्गुलं सातिरेकम् ।

तस्य समन्तात् परिक्षेप्त्री जगत्येकार्धयोजनावगाहाऽष्टयोजनोत्सेधा मूलमध्या-न्तेषु द्वादशाष्टचतुर्योजनविष्कम्भा वज्रमयमूला वैडूर्यमयान्ता सर्वरत्ननिर्मितमध्या गवाक्षघण्टामुक्ताहेममणिकिंकिणीकपद्मरत्नकनकरत्नसर्वरत्नजालैर्नवभिरुपर्युपरिस्थितैः

प्रत्येकमर्धयोजनोच्छ्रायैः पञ्चधनुश्शतविष्कम्भजगती समायामैरलङ्कृता। तस्याः पूर्व-दक्षिणापरोत्तरासु चतसृषु दिक्षु विजयवैजयन्तजयन्तापराजितसंज्ञानि चत्वारि महाद्वाराणि। यथाक्रमं तानि चतुर्योजनविष्कम्भाण्यष्टयोजनोत्सेधानि विष्कम्भसम-प्रवेशानि। तत्र विजयवैजयन्तयोरन्तरमेकान्नाशीतिसहस्राणि द्विपञ्चाशद्योजनान्यर्धयोजनं योजनचतुर्भागोऽर्धगव्यूतं गव्यूतचतुर्भागः द्वात्रिंशच्च धनूषिं तिस्रोऽङ्गुलयो-ऽङ्गुलचतुर्भागोऽर्धाङ्गुलचतुर्भागश्च सातिरेकः। एवमितरेषामप्यन्तराणां प्रमाणं वेदित-व्यम् ।

तत्र जम्बूद्वीपे षड्भिः कुलपर्वतैर्विभक्तानि सप्त क्षेत्राणि। कानि तानीति? अत आह –

## भरतहैमवतहरिविदेहरम्यकहैरण्यवतैरावतवर्षाः क्षेत्राणि॥१०॥

भरत इति संज्ञा कुतः?

**भरतक्षत्रिययोगाद्वर्षो भरतः॥१॥** विजयार्धस्य दक्षिणतो जलधेरुत्तरतः गङ्गा-सिन्ध्वोर्बहुमध्यदेशभागे विनीता नाम नगरी द्वादशयोजनायामा, नवयोजनविस्तारा। तस्यामुत्पन्नः सर्वराजलक्षणसंपन्नो भरतो नामाद्यश्चक्रधरः षट्खण्डाधिपतिः। अवसर्पिण्या राज्यविभागकाले तेनादौ भुक्तत्वात् तद्योगाद्भरत इत्याख्यायते वर्षः।

**अनादिसंज्ञासंबन्धाद्वा॥२॥** अथवा जगतोऽनादित्वादहेतुकाऽनादिसंबन्धपारिणा-मिकी भरतसंज्ञा। अथ क्व भरत इति? अत्रोच्यते-

**हिमवत्समुद्रत्रयमध्ये भरतः॥३॥** हिमवतोऽद्रेस्त्रयाणां समुद्राणां पूर्वदक्षिणाऽपराणां मध्ये भरतो वेदितव्यः। स पुनर्गङ्गासिन्धूभ्यां विजयार्धेन च षड्भागसंविभक्तः।

कोऽसौ विजयार्धो नाम?

**पञ्चाशद्योजनविस्तारस्तदर्धोत्सेधः सक्रोशषड्योजनावगाहो रजताद्रिर्विजयार्धो-ऽन्वर्थः॥४॥** चक्रभृद्विजयार्धकरत्वाद्विजयार्ध इति गुणतः कृताभिधानो रजताद्रिः तस्य पञ्चाशद्योजनानि विस्तारः पञ्चविंशतियोजनान्युत्सेधः सक्रोशानि षड्योजनान्यवगाहः पूर्वापरकोटिभ्यामसौ पूर्वापरजलधी स्पृशति। तस्य पूर्वापरपार्श्वबाहू चत्वारि योजनशतान्यष्टाशीत्यधिकानि षोडश चैकोनविंशतिर्भागाः योजनस्यार्धभागश्च सातिरेकः। विजयार्धोत्तरपार्श्वज्या दशयोजनसहस्राणि सप्त च शतानि विंशतिर्योजनानां द्वादश चैकोनविंशतिभागा योजनस्य किञ्चिद्विशेषोनाः। अस्याः ज्यायाः धनुषः पृष्ठं दशयोजनानां सहस्राणि सप्तशतानि त्रिचत्वारिंशानि पञ्चदश चैकान्नविंशतिभागा योजनस्य सविशेषाः। विजयार्धदक्षिणपार्श्वज्या नवसहस्राणि सप्तशतान्यष्टचत्वारिंशानि योजनानां द्वादशभागाः किञ्चिद्विशेषाधिकाः। अस्याः ज्यायाः धनुषः पृष्ठं नवसहस्राणि सप्तशतानि षट्षष्ट्युत्तराणि योजनानामेकश्च भागः सविशेषः। तस्योभयोः पार्श्वयोरर्धयोजनविष्कम्भौ पर्वतसमानायामावर्धयोजनोच्छ्रायपञ्चधनुःशतविष्कम्भवन-समायामाभ्यां क्वचित्क्वचित्कनकस्तूपिकाभ्यामलङ्कृतबहुतोरणोपेतपद्मवरवेदिकाभ्यां प्रत्येकं परिक्षिप्तौ सर्वर्तुजफलकुसुमतरुवरमण्डितौ वनखण्डौ। तस्य द्वे गुहे तमिस्रखण्डप्रपातसंज्ञे पञ्चाशद्योजनोदग्दक्षिणायाते प्राक्प्रत्यक्द्वादशयोजनविष्कम्भेऽष्ट-योजनोत्सेधोत्तरदक्षिणद्वारद्वये षट्क्रोशषड्योजनविष्कम्भक्रोशबाहुल्याष्टयोजनोच्छ्राय-वज्रमयकपाटे। याभ्यां चक्रवर्ती उत्तरभरतविजयार्धं याति। यतश्च गङ्गासिन्धू निर्गते। तत्र चाभ्यन्तरे विजयार्धप्रभवे प्रत्येकं द्विनद्यौ गङ्गासिन्धू अनुप्रविष्टे उन्मग्नजला निमग्नजला चान्वर्थसंज्ञे। तृणादेः पतितस्य द्रव्यस्याहत्योपरितलप्रक्षेपणादुन्मग्नजला। तथा तृणादेः पतितस्याधस्तलप्रक्षेपणान्निमग्नजला।

तस्यैवाद्रेर्भूमितलाद्दशयोजनान्युत्प्लुत्योभयोः पार्श्वयोः दशयोजनविस्तारे पर्वत-समायामे द्वे विद्याधरश्रेण्यौ भवतः। तत्र दक्षिणश्रेण्यां रथनूपुरचक्रवालादीनि

पञ्चाशद्विद्या-धरनगराणि। उत्तरश्रेण्यां गगनवल्लभादीनि षष्टिर्विद्याधरनगराणि। तन्निवासिनो विद्याधरा भरतवत् षट्कर्मजीविनः केवलं प्रज्ञप्त्यादिविद्याधरणमात्रादेव विशिष्टाः। ततो दशयोजनान्युत्प्लुत्योभयोः पार्श्वयोर्दशयोजनविस्तारे पर्वतसमायामे द्वे व्यन्तरश्रेण्यौ भवतः। तत्र शक्रलोकपालानां सोमयमवरुणवैश्रवणानामाभियोग्यव्यन्तरदेवानां निवासा भवन्ति। ततः पञ्चयोजनान्युत्प्लुत्य शिखरतलं भवति दशयोजनविष्कम्भं पर्वतसमायामम्। तत्र प्राच्यां दिशि षड्योजनक्रोशाधिकोच्छ्रायविष्कम्भं सिद्धायतनकूटं पद्मवरवेदिकापरिवृतम्। तस्योपर्युदग्दक्षिणायामं प्राक्प्रत्यग्विस्तारं क्रोशायामं क्रोशार्ध-विष्कम्भं देशोनक्रोशोच्छ्रायं पद्मवरवेदिकापरिवृतमर्हदायतनं पूर्वोत्तरदक्षिणद्वारमर्ह-दायतनवर्णनोपेतम्। तस्य पश्चाद्दक्षिणार्धभरतकूटखण्डकप्रपातकूटमाणिकभद्रकूट-विजयार्धकूटपूर्णभद्रकूटतमिस्रगुहाकूटोत्तरार्धभरतकूटवैश्रवणकूटनामान्यष्टौ कूटानि सिद्धाय-तनकूटसमोच्छ्रायविष्कम्भायामानि। तेषामुपरि दक्षिणार्धभरतदेववृत्तमाल्यदेवमाणिभद्र-देवविजयार्धगिरिकुमारदेवपूर्णभद्रदेवकृतमालदेवोत्तरार्धभरतदेववैश्रवणदेवानां यथाक्रमं प्रासादाः सिद्धायतनसमायामविष्कम्भोच्छ्रायाः। सोऽयं विजयार्धपर्वतो नवभिः कूटैर्मुकुटै-रिवोद्गतैर्गिरिराजत्वं प्राप्त इवाभाति। अथ हैमवत इति कथं संज्ञा?

**हिमवतोऽदूरभवः सोऽस्मिन्नस्तीति वा हैमवतः॥५॥** हिमवान्नाम पर्वतः तस्यादूरभावः सोऽस्मिन्नस्तीति वाऽणि सति हैमवतो वर्षः। क्व पुनरसौ?

**क्षुद्रहिमवन्महाहिमवतोर्मध्ये॥६॥** क्षुद्रहिमवन्तमुत्तरेण दक्षिणेन महाहिमवन्तं पूर्वापरसमुद्रयोर्मध्ये हैमवतः।

**तन्मध्ये शब्दवान् वृत्तवेदाढ्यः॥७॥** तस्य हैमवतस्य मध्ये शब्दवान्नाम पटहाकारः वृत्तत्वाद् वृत्तवेदाढ्य इत्यन्वर्थसंज्ञः योजनसहस्रोच्छ्रायः अर्धतृतीययोजन-

शतावगाह उपरिमूले च योजनसहस्रायामविष्कम्भस्तत्त्रिगुणसातिरेकपरिक्षेपः पर्वतः, अर्धयोजनविष्कम्भाद्रिपरिक्षेपायामयुक्तया पूर्वादिदिग्विभागविनिवेशिचतुस्तोरणविभक्तया पद्मवरवेदिकयाऽलङ्कृतः। तत्तलमध्ये सक्रोशद्वयद्विषष्टियोजनोत्सेधः सक्रोशैकत्रिंशद्योजन-विष्कम्भः स्वातिदेवविहारः। अथ कथं हरिवर्षसंज्ञा?

**हरिवर्णमनुष्ययोगाद्धरिवर्षः॥८॥** हरिः सिंहस्तस्य शुक्लरूपपरिणामित्वात् तद्वर्ण-मनुष्याद्युषितत्वाद्धरिवर्ष इत्याख्यायते। क्व पुनरसौ?

**निषधमहाहिमवतोरन्तराले॥९॥** निषधस्य दक्षिणतो महाहिमवत उत्तरतः पूर्वापरसमुद्रयोरन्तराले हरिवर्षः।

**तन्मध्ये विकृतवान् वृत्तवेदाढ्यः॥१०॥** तस्य हरिवर्षस्य मध्ये विकृतवान्नाम वृत्तवेदाढ्यः शब्दवद्वृत्तवेदाढ्येन तुल्यवर्णनः। तस्योपर्यरुणदेवविहारः। अथ कथं विदेहसंज्ञा?

**विदेहयोगाज्जनपदे विदेहव्यपदेशः॥११॥** विगतदेहाः विदेहाः। के पुनस्ते? येषां देहो नास्ति, कर्मबन्धसन्तानोच्छित्तये वा सत्यपि देहे विगतशरीरसंस्कारास्ते विदेहाः। तद्योगाज्जनपदे विदेहव्यपदेशः। तत्र हि मुनयो देहोच्छेदार्थं यतमाना विदेहत्व-मास्कन्दन्ति। ननु च भरतैरावतयोरपि विदेहाः सन्ति? सत्यम्, सन्ति कदाचिन्न तु सर्वकालम्, तत्र तु सततं धर्मोच्छेदाभावाद्विदेहाः सन्तीति प्रकर्षापेक्षो विदेहव्यपदेशः। क्व पुनरसौ?

**निषधनीलवतोरन्तराले तत्सन्निवेशः॥१२॥** निषधस्योत्तरात् नीलवतो दक्षिणात् पूर्वापरसमुद्रयोरन्तरे तस्य विदेहस्य सन्निवेशो द्रष्टव्यः।

**स चतुर्विधः पूर्वविदेहादिभेदात्॥१३॥** स विदेहश्चतुर्विधः। कुतः? पूर्वविदेहा-दिभेदात्। पूर्वविदेहः, अपरविदेहः, उत्तरकुरवः, देवकुरवश्चेति। कुतः पुनः पूर्वविदेहा-

दिव्यपदेशः? मेरोः प्राक् क्षेत्रं पूर्वविदेहः, उत्तरक्षेत्रमुदक्कुरवः, अपरक्षेत्रमपरविदेहः दक्षिणक्षेत्रं देवकुरव इति।

नैष युक्तो व्यपदेशः – पूर्वविदेहे हि सविता नीलादुदेति निषधेऽस्तमुपैति। तत्र प्राङ् नीलः प्रत्यङ् निषधः अपाक् समुद्रः, मेरुरुदक्। अपरविदेहे तु निषधे उदयः नीलेऽस्तमय इति। तत्र प्राङ् निषधः, प्रत्यङ् नील: अपाक् समुद्र: उदङ् मेरू:। उदक्कुरूषु गन्धमादनादुदयो माल्यवतोऽस्तमय:। तत्र गन्धमादन: प्राक्, माल्यवान् प्रत्यक् नीलः अपाक्, मेरुः उदक्। देवकुरुषु सौमनसादुदयः विद्युत्प्रभेऽस्तमयः तत्र सौमनसः प्राक्, विद्युत्प्रभः प्रत्यक्, निषधोऽपाक् मेरुरुदगिति? सत्यमेवमेतत्; यदि तत्रत्यो दिग्विभाग आश्रियेत। इह भरतक्षेत्रदिग्विभागमाश्रित्य मेरोः पूर्वादिव्यपदेशो युक्तः। तत्र विदेहमध्यभागे मेरुः। तस्मादपरोत्तरदिशि गन्धमालिनी। विषयसमी-पदेवारण्यात्प्राक् गन्धमादनाख्यो वक्षारपर्वतः उदक्दक्षिणायतः प्राक्प्रत्यक्विस्तीर्णः दक्षिणोत्तरकोटिभ्यां मेरुनीलाद्रिस्पर्शी द्वाभ्यामर्धयोजनविष्कम्भपर्वतसमायामाभ्यां वनखण्डाभ्यामलङ्कृतः मूलमध्याग्रेषु सुवर्णमयः नीलाद्रिपर्यन्ते चतुर्योजनशतोच्छ्रितः; योजनशतावगाहः प्रदेशवृद्ध्या वर्धमानः मेरुपर्यन्ते पञ्चयोजनशतोत्सेधः पञ्चविंशतियोजनशतावगाहः; पञ्चयोजनशतविष्कम्भः। ततः प्रदेशहान्या हीयमानः नीलान्तेऽर्धतृतीययोजनशतविष्कम्भः। त्रिंशत्सहस्राणि द्वे च नवोत्तरे शते योजनानां षट्चैकान्नविशंतिभागाः सातिरेका आयामः। तस्योपरि मेरुपर्यन्ते पञ्चविंशति-योजनशतोच्छ्रायमूलविष्कम्भसिद्धायतनकूटम्। तस्योत्तरतः क्रमेण व्यवस्थितानि षट् कूटानि गन्धमादनोदक्कुरुगन्धमालिस्फटिकलोहिताक्षाऽऽनन्दकूटनामानि। तत्र सिद्धायतनकूटे जिनायतनम्। स्फटिककूटस्योपरि प्रासादे भोगन्धरी देवी पल्योपमस्थितिका। लोहिताक्षकूटस्योपरि प्रासादे पल्योपमस्थितिका दिक्कुमारी भोगवती वसति। शेषेषु चतुर्षु कूटेषु कूटसमनामानो देवा वसन्ति। मेरोरुदक् प्राच्यां दिशि नीलादपाच्यां कच्छविजयात् प्रतीच्यां माल्यवान् वक्षारपर्वतः। मूलमध्याग्रेषु वैडूर्यमयः

विष्कम्भायामोच्छ्रायावगाहसंस्थानैर्गन्धमादेनन समः। तस्योपरि मेरूपर्यन्ते सिद्धाय-तनकूटं यथोक्तपरिमाणम्। तस्योपर्यर्हदायतनम्। तस्योत्तरतो यथाक्रमं माल्यवदु-दक्कुरुकच्छविजयसागररजतपूर्णभद्रसीताहरिमहाकूटानि नव भवन्ति। सागरकूटे सुभगा दिक्कुमारी, रजतकूटे भोगमालिनी दिक्कुमारी वसति। शेषेषु सप्तसु कूटेषु कूटसमना-मानो देवा वसन्ति। मेरोरुदक् गन्धमादनात्प्राक्, नीलादपाक्, माल्यवतः प्रत्यक्, उदक्कुरवः प्राक् प्रत्यगायताः, उदगपाग्विस्तीर्णा यमकाद्रिद्वयपञ्चसरोवरकाञ्चनगिरि-शतोपशोभिताः। एकादश सहस्राण्यष्टौ शतानि द्वाचत्वारिंशानि योजनानां द्वौ चैकान्नविंशतिभागावुदक्कुरुविष्कम्भः। नीलसमीपे त्रिपञ्चाशद्योजनसहस्राणि ज्याषष्टि-सहस्राणि चत्वारि शतान्यष्टादशानि योजनानां द्वादश चैकान्नविंशतिभागाः साधिका धनुः।

तत्र सीतायाः प्राग्दिग्भागे जम्बूवृक्षो वर्णितः तस्योत्तरस्यां दिशि शाखायामर्हदायतनं क्रोशायामार्धक्रोशविष्कम्भदेशोनक्रोशोनक्रोशोत्सेधम्। प्राच्यां दिशि शाखायां तत्तुल्यप्रासादः। तत्र जम्बूद्वीपाधिपतिव्यन्तरेश्वरोऽनावृतनामा वसति। दक्षिणस्यां दिशि शाखायां प्रतीच्यां च प्रासादयोः शयनीयानि रमणीयानि। ततः पूर्वोत्तरोत्तरापरोत्तरासु दिक्ष्वनावृतदेवसामानिकानां चत्वारि जम्बूसहस्राणि। दक्षिणपूर्वस्यां दिश्यभ्यन्तर-परिषद्देवानां द्वात्रिंशत्सहस्राणि। दक्षिणस्यां मध्यमपरिषद्देवानां चत्वारिंशत्सहस्राणि। दक्षिणापरस्यां दिशि बाह्यपरिषद्देवानामष्टचत्वारिंशत्सहस्राणि। प्रतीच्यामनीकमहत्तराणां सप्तानां सप्तजम्ब्वः, चतसृणामग्रमहिषीणां सपरिवाराणां जम्ब्वः चतस्रः। पूर्वदक्षिणा-परोत्तरासु षोडशसहस्रात्मरक्षदेवानां च षोडशसहस्राणि। एते सुदर्शनजम्बूवृक्षस्य परिवारभूताः पूर्वोक्ताष्टशतेन सह समुदिताः एकं शतसहस्रं चत्वारिंशत्सहस्राणि शतं चैकन्नविंशतिः। त एते सर्व एव जम्बूवृक्षाः पद्मवरवेदिकापरिवृताः सर्वरत्नकाञ्चनपरिणामाः मुक्तामणिहेमघण्टाजालमाल्यदामध्वजपताकाछत्राधिच्छत्रविभूषिताः। सुदर्शनाख्योऽसौ

जम्बूवृक्षः पद्मवरवेदिकापरिक्षिप्तैस्त्रिभिर्वनखण्डैः परिक्षिप्तः। प्राथमिक-वनखण्डे चतसृषु दिक्षु क्रोशायामक्रोशार्धविष्कम्भदेशोनक्रोशोत्सेधानि चत्वारि भवनानि। विदिक्षु चतस्रः पुष्करिण्यो दशयोजनावगाहाः पञ्चाशद्योजनायामाः तदर्धविष्कम्भाः चतुष्कोणा आयतचतुरस्राः शुचिसुरभिसलिलपूर्णाः। तेषां भवनानां पुष्करिणीनां चाष्टासु दिक्षु श्वेतान्यर्जुनसुवर्णनिर्वृत्तानि प्रत्येकमष्टौ कूटानि। तेषामुपरि प्रत्येकं क्रोशायाम-क्रोशार्धविष्कम्भदेशोनक्रोशोच्छ्रायाः चत्वारः प्रासादाः।

नीलाद् दक्षिणस्यां दिश्येकं योजनसहस्रं तिर्यगतीत्य सीतामहानद्या उभयोः पार्श्वयोः पञ्चयोजनशतान्तरौ सप्रणिधी द्वौ यमकाद्री योजनसहस्रोच्छ्रायावर्धतृतीय-योजनशतावगाहौ मूलमध्याग्रेषु योजनैकसहस्रार्धाष्टमयोजनशतपञ्चयोजनशतविष्कम्भौ। तयोरुपरि योजनद्विषष्ट्यर्धयोजनोच्छ्रायौ सक्रोशैकत्रिंशद्योजनविष्कम्भौ तावत्प्रवेशौ प्रासादौ। तत्र यमकनामानौ देवौ वसतः। प्राच्यां दिशि द्वेऽर्हदायतने यमकाभ्या-मवाक्पञ्चयोजनशतानि तिर्यगतीत्य सीतामहानद्याः योजनसहस्रोदगपागायतः पञ्च-योजनशतप्राक्प्रत्यग्विष्कम्भः दशयोजनावगाहो नीलो नाम महाह्रदो भवति। ह्रदमध्ये जलस्योपर्यर्धयोजनोच्छ्रायाणि दशयोजनावगाहनालानि मध्ये योजनविष्कम्भाणि क्रोशायतपत्राणि द्विक्रोशकर्णिकान्याग्रमूलयोर्द्विक्रोशविस्तराणि पद्मानि पद्मह्रदजपद्म-वर्णनोपेतानि। तत्र नीलसंज्ञो नागेन्द्रकुमारो वसति। तस्य पद्मानि जम्बूवृक्षसमसंख्यानि।

नीलह्रदात्प्रागदूरे दश काञ्चनाद्रयः सप्रणिधयो योजनशतोत्सेधाः पञ्चविंशति-योजनावगाहाः मूलमध्याग्रेषु शतपञ्चसप्ततिपञ्चाशद्योजनविष्कम्भाः काञ्चनपरिणामाः। तेषामुपरि सक्रोशैकत्रिंशद्योजनोत्सेधाः सक्रोशपञ्चदशयोजनविष्कम्भाः प्रासादाः काञ्चन-संज्ञदेवानामावासाः। तादृशा एव प्रत्यक् दशकाञ्चनाद्रयः। नीलह्रदादपाक् पञ्चयोजनशतानि तिर्यगतीत्योत्तरकुरुह्रदो भवत्युत्तरकुरुसंज्ञनागेन्द्रकुमारावासः। नीलह्रदतुल्यवर्णनः, प्राक्प्रत्यक् च

दशदशकाञ्चनाद्रयः। उदक्कुरुह्रदादपाक् पञ्च-योजनशतान्यतीत्य चन्द्रह्रदः, चन्द्रनागेन्द्रकुमारावासः। पूर्ववत्काञ्चनाद्रयश्च। चन्द्र-ह्रदादपाक् पञ्चयोजनशतानि तिर्यगतीत्यैरावतह्रदो भवत्यैरावतनागेन्द्रकुमारावासः। पूर्ववत्काञ्चनाद्रयश्च। ऐरावतह्रदादपाक् पञ्चयोजनशतानि तिर्यगतीत्य माल्यवान्नाम ह्रदो भवति माल्यवान्नामनागेन्द्रकुमारावासः। पूर्ववत् काञ्चनाद्रयश्च। काञ्चनाद्रिशते पूर्वदिग्विनिवेशि जिनायतनशतम्।

मेरोरपाक् प्राच्यां दिशि मंगलावद्विषयात् प्रत्यङ् निषधादुदक् सौमनसो नाम वक्षारगिरिः सर्वस्फटिकपरिणामः, गन्धमादनेन विष्कम्भायामोच्छ्रायावगाहसंस्थानै-स्तुल्यः। तस्योपरि मेरुपर्यन्ते सिद्धायतनकूटमर्हदायतनालङ्कृतं पूर्वोक्तपरिमाणम्। तस्य दक्षिणतो यथाक्रमं सौमनसदेवकुरुमङगलावत्पूर्वविदेहकनककाञ्चनविशिष्टोज्ज्वल-कूटान्यष्टौ गन्धमादनकूटसमानानि। तत्र कनककूटस्योपरि प्रासादे सुवत्सा दिक्कुमारी, काञ्चनकूटस्योपरि प्रासादे वत्समित्रा दिक्कुमारी, शेषेषु स्वकूटनामानो देवाः। मेरोरपाक् प्रतीच्यां दिशि निषधादुदक् पद्मवद्विजयात् प्राक् विद्युत्प्रभो नाम वक्षारगिरिस्त-पनीयपरिणामो गन्धमादनसमवर्णनः। तस्योपरि मेरुपर्यन्ते सिद्धायतनकूटमर्हदायत-नालङ्कृतम्। तस्य दक्षिणतो यथाक्रमं विद्युत्प्रभदेवकुरुपद्मवद्विजयाऽपरविदेहस्वस्तिकश-तज्वालसीतोदाहरिनामान्यष्टौ कूटानि गन्धमादनकूटसमानानि। तत्र पद्मवद्विषय-कूटस्योपरि प्रासादे वारिषेणा नाम दिक्कुमारी, स्वस्तिककूटस्योपरि प्रासादे बला नाम दिक्कुमारी, शेषेषु स्वकूटनाम्मानो देवाः।

मेरोरपाक् सौमनसात्प्रत्यक् निषधादुदक् विद्युत्प्रभात्प्राक् देवकुरवः। तेषां ज्याधनुरिषुगणना उत्तरकुरुगणनया व्याख्याता। मेरोर्दक्षिणापरस्यां दिशि निषधादुदक् सीतोदायाः प्रत्यक् विद्युत्प्रभात्प्राक् मध्ये सुप्रभा नाम शाल्मलिः सुदर्शनया जम्ब्वा

व्याख्यातवर्णना। तस्या उत्तरशाखायामर्हदायतनम्। पूर्वदक्षिणापरासु शाखासु प्रासादेषु गरुत्मान् वेणुदेवो वसति। तस्य परिवारः सर्वोऽनावृतदेवपरिवारेण तुल्यः। निषधादुदगेकयोजनसहस्रं तिर्यगतीत्य सीतोदायाः महानद्या उभयोः पार्श्वयोश्चित्रकूटविचित्रकूटौ गिरी यमकपर्वताभ्यां तुल्यवर्णनौ। निषधदेवकुरुसूर्यसुरेशविद्युत्प्रभह्रदाख्याः पञ्चह्रदाः। उत्तरकुरुषु ह्रदैर्व्याख्यातवर्णनाः। काञ्चनगिरिशतं च तद्वदेव ज्ञेयम्।

सीतया महानद्या पूर्वविदेहो द्विधा विभक्तः उत्तरो दक्षिणश्चेति। तत्रोत्तरो भागश्चतुर्भिर्वक्षारपर्वतैस्तिसृभिर्विभङ्गनदीभिश्च विभक्तोऽष्टधा भिन्नोऽष्टाभिश्चक्रधरैरुपभोग्यः। तत्र चित्रकूटः पद्मकूटो नलिनकूटः एकशिलश्चेति वक्षाराः, तेषामन्तरेषु ग्राहावतीह्रदावतीपङ्कावती चेति विभङ्गनद्यः। तत्र चत्वारोऽपि वक्षारका दक्षिणोत्तरकोटिभ्यां सीतानीलस्पृशो नीलान्ते चतुर्योजनशतोत्सेधाः योजनशतावगाहाः प्रदेशवृद्ध्या वर्धमानाः शीतानद्यन्ते पञ्चयोजनशतोत्सेधाः पञ्चविंशतियोजनशतावगाहाः अश्वस्कन्धाकाराः सर्वत्र पञ्चयोजनशतविष्कम्भाः। षोडशसहस्राणि पञ्चशतानि द्वानवत्यधिकानि योजनानां द्वौ चैकान्नविंशतिभागौ तेषामायामः। तत्र चित्रकूटस्योपरि चत्वारि कूटानि - सिद्धायतनचित्रकच्छविजयसुकच्छविजयकूटाख्यानि। पद्मकूटस्योपरि चत्वारि कूटानि सिद्धायतनपद्ममहाकच्छकच्छावद्विजयकूटाभिधानानि। नलिनकूटस्योपरि चत्वारिकूटानि सिद्धायतननलिननलिनावर्तलाङ्गलावर्तकूटसंज्ञानि। एकशिलस्योपरि चत्वारि कूटानि सिद्धायतनैकशिलपुष्कलपुष्कलावत्कूटनामानि। सर्वाण्येवैतानि हिमवदद्रिकूटतुल्यपरिमाणानि, तद्गतार्हदायतनप्रासादतुल्यवर्णनजिनायतनप्रासादानि, सर्वत्र सीतान्ते सिद्धायतनकूटानि इतरेषु कूटसमनामानो देवाः। तिस्रोऽपि विभङ्गनद्यः स्वतुल्यनामकुण्डेभ्यो विंशतियोजनशतविष्कम्भायामेभ्यो वरवज्रतलेभ्यः सुवृत्तेभ्यः स्वतुल्यनामदेवीनिवासालङ्कृतदशयोजनद्विगव्यूतोच्छ्रायषोडशयोजनविष्कम्भायामद्वीपो

पे-तेभ्यः नीलाद्रिनितम्बनिवेशिभ्यो निर्गताः। प्रभवे द्विक्रोशाधिकद्वादशयोजनविष्कम्भा गव्यूतावगाहाः, मुखे पञ्चविंशतियोजनशतविष्कम्भा दशगव्यूतावगाहाः प्रत्येकमष्टाविंशतिनदीसहस्रपरिवृताः सीतां प्रविशन्ति।

एतैर्विभक्ता अष्टौ जनपदाः कच्छसुकच्छमहाकच्छकच्छकावर्तलाङ्गलावर्तपुष्कलपुष्कलावर्ताख्याः। तेषां मध्ये राजधान्यः – क्षेमा, क्षेमपुरी, अरिष्टा, अरिष्टपुरी, खड्गा, मञ्जूषा, औषधिः, पौण्डरीकिणी चेति नगर्यः। तत्र सीताया उदक् नीलादपाक् चित्रकूटात्प्रत्यक् माल्यवत्समीपदेवारण्यात्प्राक् कच्छविषयः, चित्रकूटसमायामः द्वे सहस्रे द्वे च शते त्रयोदशयोजनानां केनचिद्विशेषेणोनः, प्राक्प्रत्यग्विस्तीर्णः। तस्य बहुदेशे मध्यभागे विजयार्धनामा रजतगिरिः भरतविजयार्धतुल्योच्छ्रायावगाहविष्कम्भः कच्छ-विषयविस्तारसमायामः। तत्रोभयोर्विद्याधरश्रेण्योः प्रत्येकं पञ्चपञ्चाशन्नगराणि। व्यन्तरश्रेण्योरैशानस्य देवराजस्य लोकपालानां सोमयमवरुणवैश्रवणानामा-भियोग्यदेवनगराणि। प्राच्यसिद्धायतनादिकूटनवके च दक्षिणार्धकच्छोत्तरार्धकच्छकूटे वाच्ये। विजयार्धादुदक् नीलादपाक् सिद्धकूटाद् वृषभाद्रेश्च प्राक् चित्रकूटात् प्रत्यक् त्रिषष्टियोजनविष्कम्भायामं तत्त्रिगुणसातिरेकपरिक्षेपं दशयोजनावगाहं वरवज्रतलं गङ्गाकुण्डम्। अस्य बहुमध्यदेशभावी द्वीपोऽष्टयोजनविष्कम्भायामो दशयोजनद्विगव्यूतोच्छ्रायः पद्मवरवेदिकाचतुस्तोरणालङ्कृतः सुवृत्तो गङ्गादेवीनिवासः। ततो दक्षिणतोरणाद्विनिःसृता प्राङ्मुखी भरतक्षेत्रगङ्गातुल्यविष्कम्भावगाहा विषयसमायामा विजयार्धखण्डप्रपातगुहातोरणनिर्गता चतुर्दशनदीसहस्रपरिवारा गङ्गा महानदी सीतां प्रविशति। विजयार्धादुदङ् नीलादपाक् वृषभाद्रेः प्रत्यङ् माल्यवत्समीपदेवारण्यात्प्राक् सिन्धुकुण्डं गङ्गाकुण्डतुल्यवर्णनं सिन्धूदेवीनिवासालङ्कृतम्। ततो विनिःसृता गङ्गातुल्या विजयार्धतमिस्रगुहान्तरान्निर्गता चतुर्दशनदीसहस्रपरिवारा सिन्धूर्महानदी सीतां प्रविशति।

तत्र सीताया उदक् विजयार्धादपाक् गङ्गासिन्ध्वोर्बहुमध्यदेशभाविनी क्षेमा नाम राजधानी। एवमितरे सप्तापि जनपदाः क्रमेण पूर्वदेशनिवेशिनो नेतव्याः।

लवणसमुद्रवेदिकायाः प्रत्यक् पुष्कलावत्याः प्राक् सीताया उदक् नीलादपाक् देवारण्यं नाम वनम्। तस्य द्वे सहस्रे नव च शतानि द्वाविंशतिर्योजनानां सीतामुखे विष्कम्भः। षोडशसहस्राणि पञ्चशतानि द्वानवत्यधिकानि योजनानां द्वौ चैकोन-विंशतिभागौ आयामः। सीताया अपाक् निषधादुदक् वत्सविषयात् प्राक् लवणसमुद्रवेदिकायाः प्रत्यक् पूर्ववद् देवारण्यम्।

सीताया दक्षिणतः पूर्वविदेहश्चतुर्भिवक्षारपर्वतैस्तिसृभिश्च विभङ्गनदीभि र्विभक्तोऽष्टधा भिन्नोऽष्टाभिश्चक्रधरैरुपभोग्यः। तत्र त्रिकूटो वैश्रवणकूटोऽञ्जन आत्माञ्जनश्चेति वक्षाराः। तेषामन्तरेषु तप्तजला मत्तजलोन्मत्तजला चेति तिस्रो विभङ्गनद्यः। एतैर्विभक्ता अष्टौ जनपदाः – वत्सासुवत्सामहावत्सावत्सवतीरम्यरम्यक-रमणीयमङ्गलावत्याख्याः। तेषां मध्ये राजधान्यः – सुसीमा कुण्डलाऽपराजिता-प्रभाकर्यङ्कावतीपद्मावतीशुभारत्नसञ्चयावतीनगर्यः। तेषु जनपदेषु द्वे द्वे नद्यौ रक्तारक्तो-दासंज्ञे। एको विजयार्धः। तेषां सर्वेषां विष्कम्भायामादिवर्णना पूर्ववद्वेदितव्याः। वक्षारपर्वतेषु प्रत्येकं चत्वारि कूटानि सिद्धायतनस्वनामपूर्वापरदेशनामानि। सीताया उत्तरतटे दक्षिणतटे च प्रतिजनपदं त्रीणि तीर्थानि मागध वरदान प्रभाससंज्ञानि। तानि समुदितान्यष्टचत्वारिंशत्तीर्थानि पूर्वविदेहे।

सीतोदया महानद्याऽपरविदेहो द्विधा विभक्तो दक्षिण उत्तरश्चेति। तत्र दक्षिणो भागश्चतुर्भिर्वक्षारपर्वतैस्तिसृभिश्च विभङ्गनदीभिर्विभक्तोऽष्टधा भिन्नोऽष्टाभिश्चक्रधरैरुप-भोग्यः। तत्र शब्दावद्विकृतावदाशीविषसुखावहसंज्ञाश्चत्वारो वक्षाराद्रयः। तेषामन्तरेषु क्षीरोदासीतोदास्रोतोऽन्तर्वाहिनी चेति तिस्रो विभङ्गनद्यः।

एतैर्विभक्ता अष्टौ जनपदाः – पद्मसुपद्ममहापद्मपद्मवर्तशङ्खनलिनकुमुदसरिदाख्याः। तेषां मध्ये राजधान्यः – अश्वपुरी, सिंहपुरी, महापुरी, विजयपुरी, अरजा, विरजा, अशोका, वीतशोका चेति नगर्यः। तेषु जनपदेषु द्वे द्वे नद्यौ रक्तारक्तोदासंज्ञे। एकैको विजयार्धश्च। तेषां सर्वेषां विष्कम्भायामादिवर्णना पूर्ववद्वेदितव्या। वक्षारपर्वतेषु प्रत्येकं चत्वारि कूटानि सिद्धायतन-स्वनामपूर्वापरदेशनामानि। देवारण्ये द्वेऽपि पूर्ववद्वेदितव्ये।

उत्तरो विभागश्चतुर्भिर्वक्षारपर्वतैस्तिसृभिर्विभङ्गनदीभिश्च विभक्तोऽष्टधा भिन्नः, अष्टाभिश्चचक्रधरैरुपभोग्यः। तत्र चन्द्रसूर्यनागदेवसंज्ञाश्चत्वारो वक्षारपर्वताः। तेषामन्तरेषु गम्भीरमालिनी, फेनमालिनी, ऊर्मिमालिनी चेति तिस्रो विभङ्गनद्यः। एतैर्विभक्ता अष्टौ जनपदाः – वप्रसुवप्रमहावप्रवप्रावत्वल्गुसुवल्गुगन्धिलगन्धिमालिसंज्ञाः। तेषां मध्ये राजधान्यः – विजया, वैजयन्ती, जयन्ती, अपराजिता, चक्रपुरी, खड्गपुरी, अयोध्या, अवध्या चेति नगर्यः। तेषु जनपदेषु गङ्गासिन्धूसंज्ञे द्वे नद्यौ। एकैको विजयार्धश्च। तेषां सर्वेषां विष्कम्भायामादिवर्णना पूर्ववद्वेदितव्या। वक्षारपर्वतेषु प्रत्येकं चत्वारि कूटानि सिद्धायतनस्वनामपूर्वापरदेशनामानि। सीतोदाया अपि तीर्थानि सीताया इवाष्टचत्वारिंशत्।

विदेहस्य मध्ये मेरुर्नवनवतियोजनसहस्रोत्सेधः। धरणीतले सहस्रावगाहः। दशसहस्राणि नवतिश्च योजनानां दश चैकादशभागा अधस्तलेऽस्य विस्तारः। एकत्रिंशत्सहस्राणि नवशतान्येकादश च योजनानि किञ्चिन्न्यूनान्यधस्तलेऽस्य परिधिः। दशसहस्राणि योजनानां भूतलेऽस्य विष्कम्भः। एकत्रिंशत्सहस्राणि षट्शतानि त्रयोविंशानि योजनानि किञ्चिन्न्यूनानि तत्रास्य परिधिः। स चतुर्वनः त्रिकाण्डः त्रिश्रेणिः। चत्वारि वनानि भद्रसालवनं नन्दनं सौमनसं पाण्डुकं चेति। भूमितले भद्रसालवनं पूर्वापरदिशोर्द्वाविंशतियोजनसहस्राण्यायतम्

दक्षिणोत्तरदिशोरर्धतृतीययोजनशतान्यायतम्।

एकयाऽर्धयोजनोच्छ्रायपञ्चशतधनुर्विष्कम्भवनसमायामया बहुतोरणविभक्तया पद्मवरवेदिकया परिवृतम्।

मेरोश्चतसृषु दिक्षु भद्रसालवने पद्मोत्तरनीलस्वस्तिकाऽञ्जनकुमुदपलाशाऽवतंसरोचनसंज्ञान्यष्टौ कूटानि। एकैकस्यां दिशि द्वे द्वे कूटे भवतः। तत्र मेरोः प्रागुदक्कूले सीतायाः पद्मोत्तरकूटम्। मेरोः प्राक् अपाक्कूले सीतायाः नीलकूटम्। मेरोरपाक् सीतोदाया प्राक्कूले स्वस्तिककूटम्। मेरोरपाक् सीतोदाया प्रत्यक्कूले अञ्जनकूटम्। मेरोः प्रत्यक् सीतोदाया दक्षिणकूले कुमुदकूटम्। मेरोः प्रत्यक् सीतोदाया उत्तरकूले पलाशकूटम्। मेरोरुदक् सीतायाः प्रत्यक्कूलेवतंसकूटम्। मेरोरुदक् सीतायाः प्राक्कूले रोचनकूटम्। तान्येतानि सर्वाणि कूटानि पञ्चविंशतियोजनावगाहनानि योजनशतोच्छ्रायाणि योजनशतमूलविस्ताराणि पञ्चसप्ततियोजनमध्यविष्कम्भाणि पञ्चाशद्योजनाग्रविस्ताराणि पद्मवरवेदिकापरिवृतानि। तेषामुपरि मध्यदेशभाजः सक्रोशैकत्रिंशद्योजनोत्सेधाः पञ्चदशयोजनद्विगव्यूतायामविष्कम्भा अष्टौ प्रासादाः। तेषु स्वकूटनामानः सोमयमवरुणवैश्रवणानां लोकपालानामाभियोग्या अनेकैरावतरुपविकरणसमर्थाः दिग्ग-जेन्द्रा देवा वसन्ति। तत्र पद्मोत्तरनीलस्वस्तिकाञ्जनकूटेषु शक्रलोकपालानां भौमविहाराः। कुमुदपलाशावतंसरोचनकूटेष्वैशानलोकपालानां भौमविहाराः। मेरोः प्राक् सीताया दक्षिणकूले भद्रसालवनेऽर्हदायतनम्। मेरोरपाक् सीतोदायाः प्राक्कूले-र्हदायतनम्। मेरोरूदक् सीतायाः प्रत्यक्कूलेऽर्हदायतनम्। चत्वार्यप्येतानि पञ्चसप्ततियोजनोच्छ्रायाणि योजनशतोदक्दक्षिणायामानि, प्राक् प्रत्यक् पञ्चाशद्योजनविष्कम्भाणि, षोडशयोजनोच्छ्रा-यतदर्धविष्कम्भतावत्प्रवेशप्रागुदग्दक्षिणद्वाराणि नानामणिकाञ्चनरजतपरिणामानि सहस्रजिह्वेनापि वर्णयितुमशक्यानि। यानि सहस्राक्षः सहस्रमक्ष्णां विस्तीर्य विलोकमानोऽपि सततं न तृप्तिमुपयाति। तेषां

पुरस्ताद्योजनशतायामतदर्धविष्कम्भ-सातिरेकषोडशयोजनोच्छ्राया मुखमण्डपाः। तेषां पुरस्ताद्योजनशतायामतदर्धविष्कम्भसाति-रेकषोडशयोजनोच्छ्रायाः प्रेक्षागृहाः। तेषां पुरस्ताच्चतुःषष्टियोजनायामविष्कम्भास्त-त्त्रिगुणसातिरेकपरिधयः स्तूपाः। तेषां पुरस्ताच्चैत्यवृक्षपीठानि षोडशयोजनायामानि तदर्धविष्कम्भाणि तावदुत्सेधानि प्रत्येकं चतुस्तोरणविभक्तानां पद्मवरवेदिकानां चतुर्विंशत्या परिवृतानि। तेषां मध्ये सिद्धार्थनामकाः चैत्यवृक्षाः सिद्धार्थतीर्थकरप्रतिकृतिपवित्रीकृताः षोडशयोजनोच्छ्रायचतुर्योजनोत्सेधयोजनविष्कम्भस्कन्धा द्वादशयोजनोच्छ्राय-गव्यूतविष्कम्भायाममहेन्द्रध्वजाः। ततः प्राङ् नन्दाख्याः पुष्करिण्यः योजनशतायामत-दर्धविष्कम्भदशयोजनावगाहाः। अर्हदायतनमध्यदेशनिवेशिनः षोडशयोजनायामतदर्ध-विष्कम्भोच्छ्राया रत्नमया देवच्छन्दाः। तत्र पञ्चधनुःशतोत्सेधाः कनकमयदेहास्त-पनीयहस्तपादतलतालुजिह्वा लोहिताक्षमणिपरिक्षिप्ताङ्कस्फटिकमणिनयना अरिष्टमणिमय-नयनतारका रजतमयदन्तपङ्क्तयः विद्रुमच्छाया-धरपुटा अञ्जनमूलमणिमयाक्षपक्ष्मभ्रूलता नीलमणिविरचितासिताञ्चिकेशाः प्रगृहीतसितविमलवरचामराग्रहस्तोभयपार्श्वस्थविविध-मणिकनकविधृताभरणाङ्कृतयक्षनागमिथुनाः सुश्लिष्टाष्टसहस्रलक्षणव्यञ्जनाङ्किता वैडूर्य-दण्डमणिहेममुक्ताजालालङ्कृतरत्नशलाका शत-काञ्चनतुम्बबिम्बरजतच्छदछत्राधिच्छत्रा भव्यजनस्तवनवन्दनपूजनाद्यर्हा अर्हत्प्रतिमा अनाद्यनिधना अष्टशतसंख्या विशिष्टगुण-वर्णितगुणा अष्टशतकलशभृङ्गाराद्युपकरणपरिवारा वर्णनातीतविभवा मूर्ता इव जिनधर्मा विराजन्ते।

ततो भूमितलात् पञ्चयोजनशतान्युत्प्लुत्य पञ्चयोजनशतविष्कम्भं मेरुसमायाममण्डलं पद्मवरवेदिकापरिक्षिप्तं वृत्तवलयपरिधिनन्दनवनम्। तत्र बाह्यगिरिविष्कम्भः नवसहस्राणि नव च शतानि चतुःपञ्चाशानि योजनानां षट् चैकादशभागाः। तत्परिधिरेकत्रिंशत्सहस्राणि चत्वारि शतान्येकान्नशीत्यधिकानि सातिरेकाणि योजनानाम्।

अभ्यन्तरगिरिविष्कम्भोऽष्टौ सहस्राणि नवशतानि चतुःपञ्चाशानि योजनानां ष चैकादशभागाः। तत्परिधिरष्टाविंशतिसहस्राणि त्रीणि शतानि षोडशानि योजनानामष्टौ चैकादशभागाः। चतसृषु दिक्षु चतस्रो गुहाः – प्राच्यां दिशि मणिगुहा, अपाच्यां गन्धर्वगुहा, प्रतीच्यां चारणगुहा, उदीच्यां चन्द्रगुहा। ता एतास्त्रिंशद्योजनविष्कम्भायामाः साधिकनवतियोजनपरिधयः पञ्चाशद्योजनावगाहाः। तासु यथासख्यं सोमयमवरुण-कुबेराणां विहाराः। मेरोः पूर्वोत्तरदिशि नन्दनवने बलभद्रकूटं योजनसहस्रोच्छ्रायं मूलमध्याग्रेषु योजनसहस्रार्धाष्टमयोजनशतपञ्चयोजनशतविस्तारम्। तत्त्रिगुणसातिरेका परिधिः। तस्योपरि मन्दराधिपतेरावासाः। मेरोश्चतसृषु दिक्षु द्वे द्वे कूटे – प्राच्यां दिशि तावन्ननन्दनमन्दिरे। अपाच्यां निषधहैमवते। प्रतीच्यां रजतरुचके। उदीच्यां सागरचित्रवज्रे। अष्टावप्येतानि कूटानि पञ्चयोजनशतोच्छ्रायानि मूलमध्याग्रेषु पञ्चशतपञ्चसप्तत्यधिकशतत्रयार्धतृतीयशतयोजनविष्कम्भाणि। तेषामुपरि द्विषष्टियोजन-द्विगव्यूतोच्छ्रायाः सक्रोशैकत्रिंशद्योजनविष्कम्भास्तावत्प्रवेशा एवाष्टौ प्रासादाः। तेषु मेघङ्करीमेघवतीसुमेघामेघमालिनीतोयन्धराविचित्रापुष्करमालाऽनिन्दितासंज्ञा। अष्टौ दिक्कुमार्यः यथाक्रमं परिवसन्ति मेरोर्दक्षिणपूर्वस्यां दिशि उत्पलगुल्मानलिनोत्पलोत्प-लोज्वलाख्याश्चतस्रो वाप्यः। दक्षिणापरस्यां भृङ्गाभृङ्गनिभाकज्जलाकज्जलप्रभाश्चतस्रः पुष्करिण्यः। अपरोत्तरस्यां दिशि श्रीकान्ताश्रीचन्द्राश्रीनिलयाश्रीमहिताश्चतस्रो वाप्यः। उत्तरपूर्वस्यां दिशि पद्मापद्मगुल्माकुमुदाकुमुदप्रभाश्चतस्रो वाप्यः। ताः सर्वाः पञ्चाशद्यो जनायामतदर्धविष्कम्भदशयोजनावगाहाः चतुष्कोणा आयतचतुरस्राः। तासां मध्ये प्रत्येकमेकैकः प्रासादः द्विषष्टियोजनार्धयोजनोत्सेधः सगव्यूतैकत्रिंशद्योजनविष्कम्भ स्तावत्प्रवेशः। तत्र दक्षिणस्यां दिशि विदिशोः प्रासादाः शक्रस्य भौमविहाराः। उत्तरस्यां दिशि विदिशोरैशानस्य भौमविहाराः। मेरोश्चतसृषु दिक्षु नन्दनवने चत्वारि जिनायतनानि षट्त्रिंशद्योजनोत्सेधानि पञ्चाशद्योजनायामतदर्धविष्कम्भाणि

तावत्प्रवेशानि अष्टयोजनो-च्छ्रायतदर्धविष्कम्भायामप्रागुदगपाग्द्वाराण्यर्हदायतनवर्णनोपेतानि।

नन्दनात् समभूमिभागाद् द्विषष्टियोजनसहस्राणि पञ्चशतान्युत्प्लुत्य कृत-वलयपरिधिपञ्चयोजनशतविष्कम्भं पद्मवरवेदिकापरिक्षिप्तं सौमनसवनम्। तत्र बाह्यगिरि-विष्कम्भश्चत्वारि सहस्राणि द्वे शते द्वासप्ततिश्च योजनानामष्टौ चैकादशभागाः। तत्परिधिस्त्रयोदशसहस्राणि पञ्चशतान्येकादशानि योजनानां षट्चैकादशभागाः। अभ्यन्तरगिरिविष्कम्भस्त्रीणि सहस्राणि द्वे शते द्वासप्ततिर्योजनानामष्टौ चैकादशभागाः। तत्परिधिर्दशसहस्राणि त्रीणि शतान्येकोनपञ्चाशानि योजनानां त्रयश्चैकादशभागाः किञ्चिद्विशेषोनाः। बलभद्रकूटदिक्कुमारीकूटाष्टकहीनं सौमनसम्। षोडशात्र वाप्यः-नन्दनवापीसदृशायामविष्कम्भावगाहाः। तन्मध्यदेशे भवनानि। पञ्चाशद्योजनायामत-दर्धविस्तारषट्त्रिंशद्योजनोच्छ्रायाणि। चतुर्दिशं चत्वार्यर्हदायतनान्यष्टयोजनोच्छ्रिततदर्ध-विस्तारतावत्प्रवेशप्रागुदगपाग्द्वाराणि जिनायतनवर्णनोपेतानि।

सौमनसात्समाद् भूभागात् षट्त्रिंशत्सहस्राण्यारुह्य योजनानि वृत्तवलयपरिधि पाण्डुकवनं चतुर्नवत्युत्तरचतुःशतविष्कम्भं पद्मवरवेदिकापरिवृतं चूलिकां परीत्य स्थितम्। शिखरं मेरोरेकयोजनसहस्रविष्कम्भम्। तत्परिधिस्त्रीणि सहस्राणि द्विषष्ट्यधिकं शतं योजनानां साधिकम्।

पाण्डुकवनबहुमध्यदेशभाविनी चत्वारिंशद्योजनोच्छ्राया मूलमध्याग्रेषु द्वादशाष्ट-चतुर्योजनविष्कम्भा सुवृत्ता चूलिका। तस्याः प्राच्यां दिशि पाण्डुकशिला उदक्दक्षिणायामा प्राक्प्रत्यग्विस्तारा। अपाच्यां पाण्डुकम्बलशिला प्राक्प्रत्यगायामा उदग्दक्षिणविस्तारा। प्रतीच्यां रक्तकम्बलशिला उदगपागायता प्राक्प्रत्यग्विस्तीर्णा। उदीच्यां अतिरक्त-कम्बलशिला प्राक्प्रत्यगायता उदगपाग्विस्तीर्णा। तत्रार्जुनसुवर्णमयी

पाण्डुकशिला। रजतपरिणामा पाण्डुकम्बलशिला। विद्रुमवर्णा रक्तकम्बलशिला। जाम्बूनदसुवर्णमयी अतिरक्तकम्बलशिला। ता एताश्चतस्रोऽपि पञ्चयोजनशतायामतदर्धविष्कम्भाश्चतुर्योजन-बाहल्या अर्धचन्द्रसंस्थाना अर्धयोजनोत्सेधपञ्चधनुःशतविष्कम्भकशिलासमायामैकपद्म-वरवेदिकापरिवृत्ताः श्वेतवरकनकस्तूपिकालङ्कृतचतुस्तोरणद्वारविराजिताः। तासामुपरि बहुमध्यदेशभावीनि पञ्चधनुःशतोत्सेधायामतदर्धविष्कम्भाणि प्राङ्मुखानि सिंहासनानि। पौरस्त्ये सिंहासने पूर्वविदेहजान् अपाच्ये भरतजान् प्रतीच्येऽपरविदेहजान् उदीच्ये ऐरावतजांस्तीर्थकरान् चतुर्णिकायदेवाधिपाः सपरिवाराः महत्या विभूत्या क्षीरोदवारि-परिपूर्णाष्टसहस्रकनककलशैरभिषिञ्चन्ति। अत्रापि षोडशपुष्करिण्यः पूर्ववद्वेदितव्याः। चूलिकायाश्चतसृषु महादिक्षु सक्रोशत्रयस्त्रिंशद्योजनायामानि द्विगव्यूताधिकषोडश-योजनविष्कम्भाणि पञ्चविंशतियोजनोच्छ्रायाणि योजनोत्सेधतदर्धविष्कम्भतावत्प्रवेश-प्रागपागुदग्द्वाराणि चत्वार्यर्हदायतनान्यर्हदायतनवर्णनोपेतानि।

भद्रशालवनभाविनि भूतले लोहिताक्षकल्पः परिक्षेपः। तत ऊर्ध्वमर्धसप्तदश-योजनसहस्राण्यारुह्य द्वितीयः पद्मवर्णः। ततोऽप्यर्धसप्तदशयोजनसहस्राण्यारुह्य तृतीय-स्तपनीयवर्णः। ततोऽप्यर्धसप्तदशयोजनसहस्राण्यारुह्य चतुर्थो वैडूर्यवर्णः। ततोऽप्यर्धसप्त-दशयोजनसहस्राण्यारुह्य पञ्चमो नीलवर्णो वज्रप्रभः। ततोऽप्यर्धसप्तदशयोजनसहस्राण्यारुह्य षष्ठो हरितालवर्णः। ततोऽप्यर्धसप्तदशयोजनसहस्राण्यारुह्य जाम्बूनदसुवर्णवर्णो भवति। अधोभूम्यवगाही योजनसहस्रायामः प्रदेशः पृथिव्युपलवालुकाशर्कराचतुर्विधपरिणामः। उपरि वैडूर्यपरिणामः प्रथमः काण्डः। सर्वरत्नमयः द्वितीयः काण्डः। जाम्बूनदमयः. तृतीयः काण्डः। चूलिका वैडूर्यमयी। मेरुरयं त्रयाणां लोकानां मानदण्डः। अस्याधस्तलादधोलोकः। चूलिकामूलादूर्ध्वमूर्ध्वलोकः। मध्यप्रमाणः तिर्यग्विस्तीर्णस्तिर्यग्लोकः। एवं च कृत्वाऽन्वर्थनिर्वचनं क्रियते 'लोकत्रयं मिनातीति मेरुः' इति।

तस्य भूमितलादारभ्याऽऽशिखरादैकादशिकी प्रदेशहानिः। एकादशसु प्रदेशेषु एकप्रदेशो हीयते। एकादशसु गव्यूतेषु एकगव्यूतं हीयते। एकादशसु योजनेषुएकयोजनं हीयते। एवं सर्वत्राशिखराद् भूमितलस्याधः ऐकादशिकी प्रदेशवृद्धिः – एकादशसु प्रदेशेषु एकः प्रदेशो वर्धते। एकादशसु गव्यूतेषु एकं गव्यूतं वर्धते। एकादशसु योजनेषु एकं योजनं वर्धते। एवं सर्वत्र आ अधस्तलात्। अथ कथं रम्यकसंज्ञा?

**रमणीयदेशयोगाद्रम्यकाभिधानम् ॥१४॥** यस्माद्रमणीयैर्देशैः सरित्पर्वतकाननादिभि-युक्तः, तस्मादसौ रम्यक् इत्यभिधीयते। अन्यत्रापि रम्यकदेशयोगः समान इति चेन्न; रूढिविशेषबललाभाद् गोशब्दवृत्तिवत्। अत एवसंज्ञायां को विहितः। क्व पुनरसौ?

**नीलरुक्मिणोरन्तराले तत्सन्निवेशः॥१५॥** नीलादुदक् रुक्मिणोऽपाक् पूर्वापर-समुद्रयोरन्तराले तस्य रम्यकस्य सन्निवेशो द्रष्टव्यः।

**तन्मध्ये गन्धवान्वृत्तवेदाढ्यः॥१६॥** तस्य रम्यकस्य मध्ये गन्धवान्नाम वृत्तवेदाढ्यः शब्दवद्वृत्तवेदाढ्येन तुल्यवर्णनः। तस्योपरि प्रासादे पद्मदेवो वसति। अथ कथं हैरण्यवतसंज्ञा?

**हिरण्यवतोऽदूरभवत्वाद्धैरण्यवतव्यपदेशः॥१७॥** हिरण्यवान् रुक्मिनामा पर्वतस्त-स्याऽदूरभवत्वाद्धैरण्यवतव्यपदेशः। क्व पुनरसौ?

**रुक्मिशिखरिणोरन्तराले तद्विस्तारः॥१८॥** रुक्मिण उदक् शिखरिणोऽपाक् पूर्वापरसमुद्रयोरन्तराले तस्य हैरण्यवतस्य विस्तारो वेदितव्यः।

**तन्मध्ये माल्यवान् वृत्तवेदाढ्यः॥१९॥** तस्य हैरण्यवतस्य मध्ये माल्यवान्नाम वृत्तवेदाढ्यः शब्दवद्वृत्तवेदाढ्येन तुल्यवर्णनः। तस्योपरि प्रासादे प्रभासदेवो वसति।

अथ कथमैरावतसंज्ञा?

**ऐरावतक्षत्रिययोगादैरावताभिधानम् ॥२०॥** रक्तारक्तोदयोः बहुमध्यदेशभाविनो अयोध्या नाम नगरी। तस्यामुत्पन्न ऐरावतो नाम राजा तत्परिपालितत्वाज्जनपदस्यै-रावताभिधानम्। क्व पुनरसौ?

**शिखरिसमुद्रत्रयान्तरे तदुपन्यासः॥२१॥** शिखरिणो गिरेस्त्रयाणां पूर्वापरोत्तर-समुद्राणां मध्ये तस्यैरावतस्य उपन्यासो वेदितव्यः।

**तन्मध्ये पूर्ववद्विजयार्धः॥२२॥** तस्यैरावतस्य मध्ये विजयार्धो रजतगिरिः पूर्व-वद्वेदितव्यः। यैर्विभक्तानि सप्तक्षेत्राणि व्याख्यातानि। के पुनस्ते कथं वा व्यवस्थिता इति? अत आह –

## तद्विभाजिनः पूर्वापरायता हिमवन्महाहिमवन्निषधनीलरुक्मि-शिखरिणो वर्षधरपर्वताः॥११॥

तानि विभजन्तीत्येवं शीला तद्विभाजिनः पूर्वापराभ्यामायताः पूर्वापरायताः पूर्वापरकोटिभ्यां लवणजलधिस्पर्शिन इत्यर्थः। तद्विभाजित्वादेव तेषां वर्षधरव्यपदेशोऽसंकरेण भरतादिवर्षाणां धारणात्। कथं हिमवानिति संज्ञा?

**हिमाभिसंबन्धाद्धिमवद्व्यपदेशः॥१॥** हिममस्यास्तीति हिमवानिति व्यपदेशः। अन्यत्रापि तत्सम्बन्ध इति चेत्? रूढिविशेषबललाभात्तत्रैव वृत्तिः। क्वासौ हिमवानिति? उच्यते-

**भरतहैमवतयोः सीमनि स्थितः॥२॥** भरतस्य हैमवतस्य च सीमनि व्यवस्थितः क्षुद्रहिमवान् वेदितव्यः। कथं पुनरस्य क्षुद्रहिमवत्त्वम्? महाहिमवदपेक्षया। सूत्रेऽनुक्तं कथं गम्यते इति चेत्? महाहिमवत्प्रयोगादेव। सति हि क्षुद्रे महत्त्वमित्यर्थात् क्षुद्रत्वं गम्यते। स पञ्चविंशतियोजनावगाहः योजनशतोच्छ्रायः योजनसहस्रं

द्विपञ्चाशद्योजनानां द्वादशैकोनविंशतिभागः तस्य विष्कम्भः। तस्योत्तरपार्श्वे ज्या चतुर्विंशतिसहस्राणि नवशतानि द्वात्रिंशानि योजनानामेकश्चैकोनविंशतिभागो देशोनः। अस्या ज्याया धनुः पच्चविंशतिसहस्राणि द्वे शते त्रिंशच्चत्वारश्चैकोनविंशतिभागाः साधिकाः। तस्य पूर्वापरपार्श्वबाहू प्रत्येकं पञ्चसहस्राणि त्रीणि शतानि पञ्चाशद्योजनानि पञ्चदश चैकान्नविंशतिभागाः साधिकोऽर्धभागश्च। तस्योपरि प्राच्यां दिशि सिद्धायतनकूटं पञ्चयोजनशतोच्छ्रायमूलविष्कम्भं पञ्चसप्तत्यधिकशतत्रयमध्यविष्कम्भमर्धतृतीय-शताग्रविष्कम्भम्। तत्त्रिगुणसातिरेकपरिधिः। तस्योपरि षट्त्रिंशद्योजनोच्छ्रायं पञ्चाशद्यो-जनोद्गदक्षिणायामं पञ्चविंशतियोजनप्राक्प्रत्यग्विस्तारं तावत्प्रवेशमष्टयोजनोत्सेधत-दर्धविष्कम्भं तावत्प्रवेशोदग्दक्षिणपूर्वद्वारमर्हदायतनम्। द्वारत्रये सातिरेकाष्टयोजनोच्छ्राय-पञ्चाशद्योजनायामतदर्धविष्कम्भा यो मुखमण्डपाः। सातिरेकाष्टयोजनोच्छ्रायपञ्चा-शद्योजनायामविष्कम्भाणि त्रीणि प्रेक्षागृहाणि। पौरस्त्यप्रेक्षागृहात् प्राक् स्तूपादयः पूर्वोक्ताः। चैत्यालयाभ्यन्तरवर्णना पूर्ववद्वेदितव्या। तेषां सर्वेषामेव परिक्षेप्त्री चतुस्तोरण-द्वारविभक्ता पद्मवरवेदिका। ततः प्रतीच्यां दिशि दशकूटानि। हिमवद्भरते लागङ्गाश्री-रोहितास्यासिंधुसुराहैमवतवैश्रवणकूटाभिधानानि यथाक्रमं वेदितव्यानि सिद्धायतन-कूटतुल्यानि। तेषामुपरि प्रासादाः दशैव सक्रोशद्वयद्विषष्टियोजनोत्सेधाः हिमवद्भरतहैमवत-वैश्रवणकूटेषु देवाः, इतरेषु देव्यः।

अथ कथं महाहिमवत्संज्ञा?

**महाहिमवति चोक्तम् ॥१॥** किमुक्तम्? हिमाभिसंबन्धाद्धिमवदभिधानम्, महांश्चासौ हिमवांश्च महाहिमवानिति, असत्यपि हिमे हिमवदाख्या इन्द्रगोपवत्। क्व पुनरसौ?

**हैमवतहरिवर्षयोर्विभागकरः॥४॥** हैमवतादुदक् हरिवर्षादपाक् तयोर्विभागकरो महाहिमवान् वेदितव्यः। स द्वियोजनशतोच्छ्रायः पञ्चाशद्योजनावगाहः, चत्वारि योजनसहस्राणि द्वे च शते दशोत्तरे दश चैकान्नविंशतिभागाः तस्य विष्कम्भः। पूर्वापरपार्श्वबाहू प्रत्येकं नवयोजनसहस्राणि द्वे शते षट्सप्तत्यधिके योजनानां नव चैकान्नविंशतिभागाः अर्धभागश्च साधिकः। तस्योत्तरपार्श्वे ज्या त्रिपञ्चाशद्योजनसहस्राणि नव च शतानि एकत्रिंशानि षट्चैकान्नविंशतिभागाः साधिकाः। तस्याः ज्याया धनुः सप्तपञ्चाशद्योजनसहस्राणि द्वे शते त्रिनवत्युत्तरे दश चैकोनविंशतिभागाः साधिकाः। तस्योपर्यष्टौ कूटानि सिद्धायतनमहाहिमवतहैमवतरोहितहरिहरिकान्ताहरिवर्षवैडूर्यकूटाभि-धानानि क्षुद्रहिमवत्कूटतुल्यप्रमाणानि। तेषामुपरि जिनायतनप्रासादास्तत्तुल्या एव। प्रासादेषु स्वकूटनामानो देवा देव्यश्च वसन्ति। अथ कथं निषधसंज्ञा?

**निषीधन्ति तस्मिन्निति निषधः॥५॥** यस्मिन् देवा देव्यश्च क्रीडार्थं निषीधन्ति स निषधः, पृषोदरादिपाठात् सिद्धः। अन्यत्रापि तत्तुल्यकारणत्वात्तत्प्रसङ्गः इति चेत्? न; रूढिविशेषबललाभात्। क्व पुनरसौ?

**हरिविदेहयोर्मर्यादाहेतुः॥६॥** हरिवर्षादुदक् विदेहादपाक् तयोमर्यादाहेतुर्निषध इत्या-ख्यायते। स चतुर्योजनशतोत्सेधः, योजनशतावगाहः, षोडशयोजनसहस्राण्यष्टौ च शतानि द्वाचत्वारिंशानि द्वौ चैकान्नविंशतिभागौ तस्य विष्कम्भः। पूर्वापरपार्श्वबाहू प्रत्येकं विंशतियोजनसहस्राणि पञ्चषष्ट्यधिकमेकं च शतं द्वौ चैकान्नविंशतिभागावर्धभागश्च साधिकः। उत्तरपार्श्वज्या चतुर्नवतिसहस्राणि षट्पञ्चाशमेकं च योजनशतं द्वौ चैकान्नविंशतिभागौ साधिकौ। तस्या धनुरेकं योजनशतसहस्रं चतुर्विंशतिसहस्राणि त्रीणि च शतानि षट्चत्वारिंशानि नव चैकान्नविंशतिभागाः साधिकाः। तस्योपरि नवकूटानि – सिद्धायतननिषधहरिवर्षपूर्वविदेहहरिधृतिसीतोदाऽपरविदेहरुचकनामानि, क्षुद्रहिमवत्कूट-

तुल्यप्रमाणानि। तेषामुपरि जिनायतनप्रासादास्तत्तुल्याः। प्रासादेषु स्वकूटनामानो देवा देव्यश्च वसन्ति।

अथ कथं नीलसंज्ञा?

**नीलवर्णयोगान्नीलव्यपदेशः॥७॥** नीलेन वर्णेन योगात् पर्वतो नील इति व्यपदिश्यते। संज्ञा चाऽस्य वासुदेवस्य कृष्णव्यपदेशवत्। क्व पुनरसौ?

**विदेहरम्यकविनिवेशविभागी॥८॥** स नीलाख्यः पर्वतः विदेहस्य रम्यकस्य च विनिवेशं विभजते। स निषधेन व्याख्यातप्रमाणः। तस्योपरि नवकूटानि – सिद्धायतननीलपूर्वविदेहसीताकीर्तिनरकान्ताऽपरविदेहरम्यकाऽऽदर्शककूटसंज्ञानि, क्षुल्लक-हिमवत्कूटतुल्यप्रमाणानि। तेषामुपरि जिनायतनप्रासादाः तत्तुल्याः। प्रासादेषु स्वकूट नामानो देवा देव्यश्च वसन्ति।अथ कथं रुक्मिसंज्ञा?

**रुक्मसद्भावाद्रुक्मीत्यभिधानम्॥९॥** रुक्ममस्यास्तीति रुक्मीत्यभिधानम्। अन्यत्रापि तत्संभवाद् रूढिवशाद्विशेषे वृत्तिः; करिवत्। क्व पुनरसौ?

**रम्यकहैरण्यवतविवेककरः॥१०॥** रम्यकस्य हैरण्यवतस्य च विवेकं करोत्यसौ। स महाहिमवता तुल्यप्रमाणः। तस्योपर्यष्टौ कूटानि – सिद्धायतनरुक्मिरम्यकनारीबुद्धि-रूप्यकूलहैरण्यवतमणिकाञ्चनकूटाख्यानि क्षुद्रहिमवत्कूटतुल्यप्रमाणानि। तेषामुपरि जिनायतनप्रासादास्तत्तुल्याः। प्रासादेषु स्वकूटनामानो देवा देव्यश्च वसन्ति।

अथ कथं शिखरिसंज्ञा?

**शिखरसद्भावाच्छिखरीति संज्ञा॥११॥** शिखराणि कूटान्यस्य सन्तीति शिखरीति संज्ञायते। अन्यत्रापि तत्सद्भावे रूढिवशाद्विशेषे वृत्तिः शिखण्डिवत्। क्व पुनरसौ?

**हैरण्यवतैरावतसेतुबन्धः स गिरिः॥१२॥** हैरण्यवतस्यैरावतस्य च सेतुबन्ध इव स गिरिरवस्थितः क्षुद्रहिमवत्तुल्यप्रमाणः। तस्योपर्येकादशकूटानि सिद्धायतनशिखरिहैरण्य वतरसदेवीरक्तावतीश्लक्ष्णकूलालक्ष्मीगन्धदेव्यैरावतमणिकाञ्चनकूटनामानि क्षुद्रहिमवत्तुल्य-प्रमाणानि। तेषामुपरि जिनायतनप्रासादास्तत्तुल्याः। प्रासादेषु स्वकूटनामानो देवा देव्यश्च वसन्ति।

तेषां वर्णविशेषप्रतिपत्त्यर्थमाह –

## हेमार्जुनतपनीयवैडूर्यरजतहेममयाः॥१२॥

त एते हिमवदादयः पर्वता हेमादिमया वेदितव्याः। मयट् प्रत्येकं परिसमाप्यते। यथाक्रमं हिमवदादयः संबध्यन्ते। हेममयो हिमवान् चीनपट्टवर्णः। अर्जुनमयो महाहिमवान् शुक्लः। तपनीयमयो निषधः तरुणादित्यवर्णः। वैडूर्यमयो नीलः मयूरग्रीवाभः। रजतमयो रुक्मी शुक्लः। हेममयः शिखरी चीनपट्टवर्ण इति। षडपि चैतेऽद्रयः प्रत्येकमुभयपार्श्वगतार्धयोजनविष्कम्भाद्रिसमायामाभ्यां बहुतोरणविभक्तैकपद्मवरवेदिका-परिवृतवनखण्डाभ्यामुपेताः।

पुनरपि तद्विशेषणार्थमेवाह –

## मणिविचित्रपार्श्वा उपरि मूले च तुल्यविस्ताराः॥१३॥

नानावर्णप्रभावादिगुणोपेतैर्मणिभिर्विविधचित्राणि विचित्राणि, मणिविचित्राणि पार्श्वानि येषां त इमे मणिविचित्रपार्श्वाः।

**अनिष्टसंस्थाननिवृत्त्यर्थमुपर्यादिवचनम् ॥१॥** अनिष्टसंस्थानस्य निवृत्त्यर्थमुपर्यादिवचनं क्रियते। चशब्दो मध्यसमुच्चयार्थः। य एषो मूलविस्तारः स उपरि मध्ये च तुल्यः।

तेषां मध्ये लब्धास्पदा ह्रदा उच्यन्ते –

## पद्ममहापद्मतिगिञ्छकेसरिमहापुण्डरीकपुण्डरीका ह्रदास्तेषामुपरि॥१४॥

**पद्मादिभिः सहचरणाद् ह्रदेषु पद्मादिव्यपदेशः॥१॥** पद्मं महापद्मं तिगिञ्छं केसरि महापुण्डरीकं पुण्डरीकमिति पद्मनामानि तैः सहचरणात् ह्रदेषु पद्मादिसंज्ञावृत्तिर्भवति। तेषां हिमवदादीनामुपरि यथाक्रमं ते ह्रदा वेदितव्याः।

तत्राद्यस्य संस्थानविशेषप्रतिपत्त्यर्थमाह –

## प्रथमो योजनसहस्रायामस्तदर्धविष्कम्भो ह्रदः॥१५॥

प्राक् प्रत्यक् योजनसहस्रायामः उदगपाक् पञ्चयोजनशतविस्तारः वज्रमयतलः विविधमणिकनकरजतविचित्रतटः श्वेतवरकनकस्तूपिकालङ्कृतचतुस्तोरणविभक्तार्धयोजनोत्सेधपञ्चधनुःशतविष्कम्भह्रदसमायामैकपद्मवरवेदिकापरिवृतः चतुर्दिग्गतचतुर्वनखण्डमण्डितः विमलस्फटिकमणिस्वच्छगम्भीराक्षयवारिः विविधजलजकुसुमपरिभ्राजितः शरदि प्रसन्नचन्द्रताराराजिविराजितपर्यन्तपरीतविचित्रपयोधरपटलः, विपर्यस्तो नभोभाग इव विभाति पद्मनामा ह्रदः। तस्यैवावगाहप्रतिपत्त्यर्थमिदमुच्यते –

## दशयोजनावगाहः॥१६॥

अवगाहोऽधःप्रवेशो निम्नता। दशयोजनान्यवगाहोऽस्य दशयोजनावगाहः।

## तन्मध्ये योजनं पुष्करम् ॥१७॥

योजनप्रमाणं योजनं क्रोशायामपत्रत्वात् क्रोशद्वयविष्कम्भकर्णिकत्वाच्च। योजना-यामविष्कम्भजलतलात् क्रोशद्वयोच्छ्रायनालं तावद्बहलपत्रप्रचयं वज्रमयमूलमरिष्ट-मणिकन्दं रजतमणिमृणालं वैडूर्यसुप्रतिष्ठनालम्। तस्य बाह्यपत्रं तपनीयपरिशिष्टम्, जाम्बून-दाभ्यन्तरदलं तपनीयकेसरं नानामणिविचित्रसुवर्णकर्णिकं पुष्करमवगन्तव्यं तदर्धोत्सेधैरष्टशतसंख्यैः पद्मैः परिवृतम्। तस्मात् पूर्वोत्तरोत्तरापरोत्तरासु तिसृषु दिक्षु श्रियः सामानिकदेवानां चत्वारि पद्मसहस्राणि। दक्षिणपूर्वस्यां दिश्यभ्यन्तरपरिषद्देवानां द्वात्रिंशत्पद्मसहस्राणि। दक्षिणस्यां मध्यमपरिषद्देवानां चत्वारिंशत्पद्मसहस्राणि। दक्षिणा-परस्यां बाह्यपरिषद्देवानामष्टचत्वारिंशत्पद्मसहस्राणि। अपरस्यां सप्तानामनीकमहत्तराणां सप्तपद्मानि। चतसृषु महादिक्ष्वात्मरक्षदेवानां षोडशपद्मसहस्राणि। तान्येतानि सर्वाणि परिवारपद्मानि तदर्धोत्सेधान्येकं शतसहस्रं चत्वारिंशत्सहस्राणि शतं च पञ्चदशम्।

इतरेषां ह्रदानां पुष्कराणां चायामादिज्ञापनार्थमाह –

## तद्द्विगुणद्विगुणा ह्रदाः पुष्कराणि च॥१८॥

स च तच्च ते, तयोर्द्विगुणा द्विगुणास्तद्द्विगुणद्विगुणाः।

**द्विगुणद्विगुणा इति द्वित्वं व्याप्त्यर्थम्॥१॥** द्विगुणद्विगुणा इति द्वित्वम् उच्यते। किमर्थम्? व्याप्त्यर्थम्। द्विगुणत्वेनोत्तरेषां व्याप्तिर्यथा स्यादिति। केन द्विगुणाः? आयामा-दिना। पद्मह्रदस्य द्विगुणायामविष्कम्भावगाहो महापद्मह्रदः। महापद्मह्रदस्य द्विगुणायाम-विष्कम्भावगाहस्तिगिञ्छह्रदः। पुष्कराणि च। किम्? द्विगुणानि द्विगुणानि इत्यभि-सम्बध्यते।

**द्वित्वात्तयोर्बहुवचनाभाव इति चेन्न; विवक्षितापरिज्ञानात् ॥2॥** स्यादेतत्-तयोर्ह्रदयोः पुष्करयोश्च द्वित्वाद् बहुवचनं नोपपद्यते इति; तन्न; किं कारणम्? विवक्षितापरिज्ञानात्। आद्यन्ताभ्यां पद्मपुण्डरीकह्रदाभ्यां तुल्यप्रमाणाभ्यामन्ये ह्रदा दक्षिणत उत्तरतश्च द्वैगुण्येन निर्दिष्टा इति विवक्षितोऽत्रायमर्थः। अतो बहुवचनमुपपद्यते। कथं पुनस्तच्छब्दे पूर्वनिर्दिष्टापेक्षे सत्यनिर्दिष्टार्थो गृह्यते?

**बहुवचननिर्देशात्तद्ग्रहणम् ॥3॥** वहुवचनिर्देशात्तस्य ग्रहणं विज्ञायते। बहुवचननिर्देशात् केसर्यादयः कथन्न गृह्यन्ते?

**व्याख्यानतो वक्ष्यमाणसंबन्धाच्चानिष्टनिवृत्तिः॥4॥** ''व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्'' इत्यनिष्टस्य निवृत्तिर्भवति। अथवा वक्ष्यते एतत्– ''उत्तरा दक्षिणतुल्याः'' इति तदभिसंबन्धाच्चेष्टसंप्रत्ययः कर्तव्यः। तद्यथा – महाहिमवत उपरि बहुमध्यदेशभावी महापद्महृदः, यो द्वियोजनसहस्रायामस्तदर्धविष्कम्भो विंशतियोजना-वगाहः। तन्मध्ये जलतलाद् द्विक्रोशोच्छ्रायं योजनबहलपत्रप्रचयं द्विक्रोशायामपत्रत्वाद् योजनायामकर्णिकत्वाच्च द्वियोजनविष्कम्भं पुष्करम्। तत्परिवारपद्मसंख्या पूर्वोक्तैव। निषधस्योपरि बहुमध्यदेशभाक् तिगिञ्छह्रदः चतुर्योजनसहस्रायामस्तदर्धविष्कम्भः; चत्वारिंशद्योजनावगाहः। तन्मध्ये जलतलाद् द्विक्रोशोद्गमं द्वियोजनबहलपत्रप्रचयं योजनायामपत्रत्वाद् द्वियोजनायतकर्णिकत्वाच्चतुर्योजनायामविष्कम्भं पुष्करम्। तत्परिवारपद्मसंख्या पूर्वोक्तैव। नीलस्योपरि बहुमध्यदेशभावी केसरिह्रदः तिगिञ्छह्रदतुल्यः पद्मानि च तत्तुल्यप्रमाणानि। रुक्मिण उपरि बहुमध्यदेशभाक् महापुण्डरीको ह्रदः महापद्महृदतुल्यः, पद्मानि च तद्गतपद्मप्रमाणानि। शिखरिण उपरि बहुमध्यदेशभावी पुण्डरीको ह्रदः पद्महृदतुल्यः; पुष्कराणि च तद्गतपद्मप्रमाणानि।

अत्र चोद्यते – तच्छब्दस्य यदि द्विगुणशब्देन वृत्तिः क्रियते द्वित्वं संघातस्य प्राप्नोति। अथ कृतद्वित्वेन तच्छब्दस्य वृत्तिः क्रियते समुदायस्यासुबन्तत्वाद् वृत्तिर्न प्राप्नोति। वीप्सायां द्वित्वे सति वाक्यमेवावतिष्ठत इति? नैष दोषः; तदित्ययं निपातः अपादानार्थे वर्तते। तद् द्विगुणा द्विगुणा ततो द्विगुणा द्विगुणा इत्यर्थः।

तन्निवासिनीनां देवीनां संज्ञाजीवितपरिवारप्रतिपादनार्थमाह –

## तन्निवासिन्यो देव्यः श्रीह्रीधृतिकीर्तिबुद्धिलक्ष्म्यः पल्योपमस्थितयः ससामानिकपरिषत्काः॥१६॥

तेषु पुष्करे कर्णिकामध्यमैकदेशविनिवेशिनः शरद्विमलपूर्णचन्द्रद्युतिहराः क्रोशायामक्रोशार्धविष्कम्भदेशोनक्रोशोत्सेधाः प्रासादाः तेषु निवसन्तीत्येवं शीला देव्यस्तन्निवासिन्यः।

**श्र्यादीनामितरेतरयोगे द्वन्द्वः॥१॥** श्रीश्च ह्रीश्च धृतिश्च कीर्तिश्च बुद्धिश्च लक्ष्मीश्च श्रीह्रीधृतिकीर्तिबुद्धिलक्ष्म्य इतीतरेतरयोगलक्षणो द्वन्द्वः। तेषु पद्मादिषु ह्रदेषु यथाक्रमं देव्यः श्र्यादयो वसन्ति।

**स्थितिविशेषनिर्ज्ञानार्थं पल्योपमवचनम्॥२॥** देवीसामान्यस्थितौ विशेषनिर्ज्ञानार्थं पल्योपमस्थितयः इत्युच्यते। पल्योपमा स्थितिरासां ताः पल्योपमस्थितय इति।

**परिवारनिर्ज्ञानार्थं सामानिकपरिषत्कवचनम्॥३॥** परिवारप्रतिपत्त्यर्थं सामानिकपरिषद्ग्रहणं क्रियते। समाने स्थाने भवाः सामानिकाः ''समानस्य तदादेश्च'' इति ठञ्। सामानिकाश्च परिषदश्च सामानिकपरिषदः। अभ्यर्हितत्वात् सामानिकपदस्य पूर्वनिपातः। सह सामानिकपरिषद्भिर्वर्तन्ते इति ससामानिकपरिषत्काः। तेषां पद्मानि पूर्वनिर्दिष्टानि तन्मध्यवर्तिषु प्रासादेषु ते वसन्ति।

यकाभिः सरिद्भिस्तानि क्षेत्राणि विभक्तानि ता उच्यन्ते –

## गङ्गासिन्धूरोहिद्रोहितास्याहरिद्धरिकान्तासीतासीतोदानारीनरकान्ता सुवर्णकूलारूप्यकूलारक्तारक्तोदाः सरितस्तन्मध्यगाः॥२०॥

गङ्गादीनामितरेतरयोगे द्वन्द्वः। उदकस्य उदभाव उक्तः। सरितो न वाप्यः। ताः किमनन्तरा उत समीपा इति? अत आह - तन्मध्यगा इति। तेषां क्षेत्राणां मध्ये मध्येन वा गच्छन्तीति तन्मध्यगाः।

एकत्र सर्वासां प्रसङ्गनिवृत्त्यर्थं दिग्विशेषप्रतिपत्त्यर्थं चाह–

## द्वयोर्द्वयोः पूर्वाः पूर्वगाः॥२१॥

**द्वयोर्द्वयोरेकक्षेत्रं विषयः इत्यभिसंबन्धादेकत्र सर्वासां प्रसङ्गनिवृत्तिः॥१॥** विकल्प्यो हि वाक्यशेषः। वाक्यं वक्तर्यधीनं हीति इच्छातो वाक्यशेषप्रक्लृते; द्वयोर्द्वयोरेकक्षेत्रं विषय इत्यभिसंबन्धात् सर्वासां सरितामेकस्मिन् क्षेत्रे प्रसङ्गो निवर्तितो भवति।

**पूर्वाः पूर्वगा इति वचनं दिग्विशेषप्रतिपत्त्यर्थम्॥२॥** तत्र पूर्वा याः सरितस्ताः पूर्वगाः। पूर्वसमुद्रं गच्छन्तीति पूर्वगाः। किमपेक्षं पूर्वत्वम्? सूत्रनिर्देशापेक्षम्। यद्येवं गङ्गासिन्ध्वादयः सप्त पूर्वगा इति प्राप्तम्? नैष दोषः; द्वयोर्द्वयोरित्यभिसंबन्धाद् द्वयोर्द्वयोः पूर्वाः पूर्वगा वेदितव्याः। ननु च द्वयोर्द्वयोरिति ग्रहणमन्यार्थमुक्तम्? "अन्यार्थमपि प्रकृतमन्यार्थं भवति"।

इतरासां दिग्विभागप्रतिपत्त्यर्थमाह –

## शेषास्त्वपरगाः॥२२॥

द्वयोर्द्वयोरवशिष्टा यास्ता अपरगा प्रत्येतव्या अपरं समुद्रं गच्छन्तीत्यपरगाः।

**तत्र पद्महृदप्रभवा पूर्वतोरणद्वारनिर्गता गङ्गा॥१॥** क्षुल्लकहिमवत उपरि पद्महृदो वर्णितश्चतुस्तोरणद्वारमण्डितः। तत्र पूर्वतोरणद्वारेण निर्गता पञ्चयोजनशतानि प्राङ्मुखी गत्वा गङ्गाकूटं स्रोतसा आस्फाल्य पञ्चयोजनशतानि त्रयोविंशानि षट्चैकोन-विंशतिभागान् अपाङ्मुखी गत्वा स्थूलमुक्तावलीव साधिकयोजनशतप्रमाणधाराप्रपाता सक्रोशषड्योजनविस्तारा योजनार्धबाहुल्या षष्टियोजनायामविष्कम्भे दशयोजनावगाहे वज्रमयतले श्रीदेवीगृहप्रमाणप्रासादमण्डितमध्ये सद्विक्रोशदशयोजनोच्छ्रायाष्टयोजनायाम-विष्कम्भद्वीपालङ्कृतान्तरे कुण्डे पतिता। दक्षिणतोरणद्वारेण विनिःसृता अर्धगव्यूतावगाहा विजयार्धं व्यतीत्य दक्षिणमुखा दक्षिणार्धभरतमध्यं प्राप्य प्राङ्मुखी सती मुखे सक्रोशयोजनावगाहा सार्धद्विषष्टियोजनविस्तारा लवणोदधिं मागधतीर्थेन प्राविशत्।

**अपरतोरणद्वाराद्विनिर्गता सिन्धूः॥२॥** पाश्चात्यतोरणद्वाराद्विनिर्गता पञ्चयोजनशतं गत्वा सिन्धूकूटं वीचीबाहूपगूहेनास्फाल्य गङ्गावत्सिन्धूकूण्डे पतिता तमिस्रगुहा-मुखागतेन विजयार्धं व्यतीत्य प्रभासतीर्थेनापरसमुद्रं प्राविक्षत्। तत्र गङ्गाकुण्डद्वीपप्रासादे गङ्गादेवी वसति। सिन्धूकुण्डद्वीपप्रासादे सिन्धूदेवी वसति। हिमवत उपरि किञ्चित्प्राक् प्रत्यक् चातीत्य गङ्गासिन्ध्वोर्मध्ये द्वे पद्माकारे कूटे वैडूर्यपरिणामनाले जलस्योपरि क्रोशमुच्छ्रिते क्रोशद्वयायामविष्कम्भे लोहिताक्षमणिमयार्धगव्यूतायतपत्रे तपनीयकेसरेऽ-र्कमणिनिर्वृत्तगव्यूतायतकर्णिके। तयोः कर्णिकयोर्मध्ये रत्नमयमेकैकं कूटम्। तत्र चैकैकः प्रासादः। प्राच्यकूटप्रासादे पल्योपमस्थितिका वला नाम देवी वसति। प्रतीच्यप्रासादकूटे पल्योपमस्थितिका लवणा नाम देवी वसति।

**उदीच्यतोरणद्वारनिर्गता रोहितास्या॥३॥** पद्महृदस्यैव उदीच्यतोरणद्वारनिर्गता द्वे योजनशते षट्सप्तत्युत्तरे षट्चैकोनविंशतिभागान् हिमवत उपरि उदङ्मुखी गत्वा गङ्गातुल्यायामधाराप्रपाता अर्धत्रयोदशयोजनविस्तारा योजनबाहल्या विंशतियोजनशता-यामविष्कम्भे विंशतियोजनावगाहे वज्रतले श्रीदेवीगृहप्रमाणप्रासादमण्डितमध्ये सद्विक्रोश-दशयोजनोच्छ्रायषोडशयोजनायामविष्कम्भद्वीपालङ्कृतान्तरे कुण्डे पतिता। ततः कुण्डा-दुदीच्यतोरणद्वारेण निर्गता उदङ्मुखी शब्दवद्वृत्तवेदाढ्यं प्रदक्षिणीकृत्यार्धयोजनेनाप्राप्ता प्रत्यङ्मुखी सती प्रभवे क्रोशावगाहाऽर्धत्रयोदशयोजनविष्कम्भा मुखेऽर्धतृतीययोजनावगाहा पञ्चविंशतियोजनशतविष्कम्भा रोहितास्याऽपरलवणोदधिं प्राविशत्। रोहितास्याकुण्ड प्रासादे रोहितास्या देवी वसति।

**महापद्महृदप्रभवाऽपाच्यतोरणद्वारनिर्गता रोहित्॥४॥** महाहिमवत उपरि महा-पद्महृदादपाच्यतोरणद्वारेण निर्गता षोडशयोजनशतानि पञ्चोत्तराणि पञ्चैकोनविंशति-भागानपागागम्य पतितेत्यादि रोहितास्यया तुल्यम्। अयं तु विशेषः - साधिक-द्वियोजनशतायामधारा। रोहित्कुण्डप्रासादनिवासिनी रोहित् देवी। सा रोहिन्महानदी पूर्वार्णवं प्राविशत्।

**उदीच्यतोरणद्वारनिर्गता हरिकान्ता॥५॥** तत एव महापद्महृदादुदीच्यतोरणद्वारेण निर्गता हरिकान्ता नाम महानदी रोहिदिवाद्रितले गत्वा उदङ्मुखी साधिकद्वियोजन-शतधाराप्रपाता द्वियोजनबाहल्या पञ्चविंशतियोजनविस्तारा श्रीदेवीगृहतुल्यप्रासाद मण्डितमध्ये सद्विक्रोशदशयोजनोच्छ्रायद्वात्रिंशद्योजनायामविष्कम्भद्वीपालङ्कृतान्तरे चत्वा-रिंशद्योजनावगाहे चत्वारिंशद्विशतयोजनायामविष्कम्भे वज्रतले कुण्डे पतिता। ततः कुण्डादुदीच्यतोरणद्वारेण निर्गता प्रभवेऽर्धयोजनावगाहा पञ्चविंशतियोजनविष्कम्भा विकृतवद्वृत्तवेदाढ्यमर्धयोजनेनाप्राप्य प्रदक्षिणीकृत्य प्रत्यङ्मुखी सती मुखे

पञ्चयोजनावगाहाऽर्धतृतीययोजनशतविष्कम्भा पाश्चात्याऽर्णवं प्राविक्षत्। हरिकान्ताकुण्ड प्रासादे हरिकान्तादेवी वसति।

**तिगिञ्छह्रदप्रभवा दक्षिणद्वारनिर्गता हरित्॥६॥** निषधस्योपरि तिगिञ्छह्रदाद् दक्षिणतोरणद्वारेण विनिःसृता हरिन्महानदी सप्तसहस्राणि चत्वारि शतान्येकविंशानि योजनानामेकं चैकोनविंशतिभागमद्रितले प्राङ्मुखी गत्वा पतितेत्यादि सर्वं हरिकान्तातुल्यम्। अयं तु विशेषः साधिकचतुर्योजनशतायामधारा। हरिकुण्डप्रासादनिवासिनी हरिदेवी। सा प्राच्यमुदधिं प्राविक्षत्।

**उदीच्यतोरणद्वारविनिर्गता सीतोदा॥७॥** तत एव तिगिञ्छह्रदादुदीच्यतोरणद्वारेण हरिदिवाद्रितलं गत्वोदङ्मुखी साधिकचतुर्योजनशतधाराप्रपाता चतुर्योजनबाहल्या पञ्चाशद्योजनविस्तारा श्रीदेवीगृहप्रमाणप्रासादमण्डितमध्ये सद्विक्रोशदशयोजनोच्छ्रायचतुष्षष्टि-योजनायामविष्कम्भद्वीपालङ्कृतान्तरे साशीतिचतुर्योजनशतायामविष्कम्भेऽशीतियोजना-वगाहे वज्रतले कुण्डे पतिता। ततः कुण्डादुदीच्यतोरणद्वारेण निर्गता देवकुरुषु चित्रविचित्रकूटमध्येनोदङ्मुखी गत्वाऽर्धयोजनेनाऽप्राप्ता मेरुं प्रदक्षिणीकृत्य विद्युत्प्रभं विदार्यापरविदेहमध्यगामिनी, प्रभवे योजनावगाहा पञ्चाशद्योजनविस्तारा मुखे दशयोजनावगाहा पञ्चयोजनशतविस्तारा सीतोदा नाम महानदी पाश्चात्यसमुद्रं प्राविक्षत्। सीतोदाकुण्डप्रासादनिवासिनी सीतोदा देवी।

**केसरिह्रदप्रभवाऽपाच्यद्वारनिर्गता सीता॥८॥** नीलस्योपरि केसरिह्रदादपाच्यतोरण-द्वारेण निर्गता सीता महानदीत्यादि सर्वं सीतोदातुल्यम्। अयं तु विशेषः सीताकुण्डप्रासादे सीतादेवी वसति। सा माल्यवन्तं विदार्य पूर्वविदेहमध्यगामिनी प्राच्यसमुद्रं प्राविक्षदिति।

**उदीच्यतोरणद्वारनिर्गता नरकान्ता॥९॥** तत एव केसरिह्रदादुदीच्यतोरणद्वारेण निर्गता नरकान्ता महानदीत्यादि सर्वं हरिता व्याख्यातम्। अयं तु विशेषः नरकान्ताकुण्डप्रासादे नरकान्ता देवी वसति। गन्धवद्वृत्तवेदाढ्यं प्रदक्षिणीकृत्य पाश्चात्यसमुद्रं प्राविक्षदिति।

**महापुण्डरीकह्रदप्रभवा दक्षिणतोरणद्वारनिर्गता नारी॥१०॥** रुक्मिण उपरि महापुण्डरीकह्रदाद् दक्षिणतोरणद्वारेण निर्गता नारी महानदीत्यादि सर्वं हरिकान्तया व्याख्यातम्। अयं तु विशेषः नारीकुण्डप्रासादे नारीदेवी वसति। गन्धवद्वृत्तवेदाढ्यं प्रदक्षिणीकृत्य पूर्वोदधिं प्राविक्षदिति।

**उदीच्यद्वारनिर्गता रूप्यकूला॥११॥** तस्मादेव महापुण्डरीकह्रदादुदीच्यतोरणद्वारेण निर्गता रूप्यकूला महानदीत्यादि सर्वं तु रोहिता व्याख्यातम्। अयं तु विशेषः रूप्यकूलाकुण्डप्रासादे रूप्यकूला देवी वसति। माल्यवद्वृत्तवेदाढ्यं प्रदक्षिणीकृत्य प्रतीच्यसमुद्रं प्राविक्षदिति।

**पुण्डरीकह्रदप्रभवापाच्यतोरणद्वारनिर्गता सुवर्णकूला॥१२॥** शिखरिण उपरि पुण्डरीकह्रदाद् दक्षिणतोरणद्वारेण निर्गता सुवर्णकूला महानदीत्यादि सर्वं रोहितास्यया व्याख्यातम्। अयं तु विशेषः सुवर्णकूलाकुण्डप्रासादे सुवर्णकूला देवी वसति। माल्यवद्वृत्तवेदाढ्यं प्रदक्षिणीकृत्य प्राच्यमर्णवं प्राविक्षदिति।

**पूर्वतोरणद्वारनिर्गता रक्ता॥१३॥** तस्मादेव पुण्डरीकह्रदात् पूर्वतोरणद्वारेण विनिर्गता रक्ता महानदीत्यादि सर्वं गङ्गया व्याख्यातम्। अयं तु विशेषः रक्ताकुण्डप्रासादे रक्तादेवी वसति।

**प्रतीच्यद्वारनिर्गता रक्तोदा॥१४॥** तस्मादेव पुण्डरीकह्रदात् प्रतीच्यतोरणद्वारेण विनिर्गता रक्तोदा महानदीत्यादि सर्वं सिन्ध्वा वर्णितम्। अयं तु विशेषः रक्तोदाकुण्डप्रासादे रक्तोदा देवी वसति।

गङ्गासिन्धूरक्तारक्तोदाः भुजङ्गकुटिलगतयोऽन्यत्र गिरितलधाराप्रपाताभ्याम्, शेषा ऋजुगतयोऽन्यत्र मेरुनाभिगिरिप्रदेशेभ्यः। चतुर्दशाप्येता अर्धयोजनविष्कम्भनदीसमाया-माभ्यामुभयपार्श्वगताभ्यां प्रत्येकमर्धयोजनोत्सेधपञ्चधनुःशतविष्कम्भवनसमायामपद्म-वरवेदिकाद्वयपरिवृताभ्यां वनखण्डाभ्यामलङ्कृताः।

तासां परिवारप्रतिपादनार्थमाह –

## चतुर्दशनदीसहस्रपरिवृता गङ्गासिन्ध्वादयो नद्यः॥२३॥

**गङ्गासिन्ध्वाद्यग्रहणं प्रकरणादिति चेन्न; अनन्तरग्रहणप्रसङ्गात्॥१॥** स्यान्म-तम् – गङ्गासिन्ध्वादिग्रहणमनर्थकम्। कुतः? प्रकरणात्। प्रकृता हि ता इति; तन्न; किं कारणम्? अनन्तरग्रहणप्रसङ्गात्। "**अनन्तरस्य विधिर्वा भवति प्रतिषेधो** वा" इति अपरगानामेव ग्रहणं स्यात्।

**गङ्गादिग्रहणमिति चेन्न; पूर्वगाग्रहणप्रसङ्गात्॥२॥** अथ मतम् - गङ्गादि-ग्रहणमेवास्त्वनन्तरनिवृत्त्यर्थमिति; तच्च न; कस्मात्? पूर्वगाग्रहणप्रसङ्गात्। गङ्गादयो हि पूर्वगा इति।

**नदीग्रहणात् सिद्धिरिति चेन्न; द्विगुणाभिसंबन्धार्थत्वात्॥३॥** स्यादेतत् – नद्यः प्रकृतास्ततो नदीग्रहणमन्तरेणापि नदीसम्प्रत्यये सिद्धे तद्ग्रहणं सर्वनदीसंप्रत्ययार्थं भविष्यति नार्थो गङ्गासिन्ध्वादिग्रहणेनेति? तन्न; किं कारणम्? द्विगुणाभि-संबन्धार्थत्वात्। द्विगुणा द्विगुणा इत्यस्याभिसंबन्ध इह कथं स्यादिति गङ्गा

सिन्ध्वादिग्रहणं क्रियते। किं गतमेतदनेनाऽऽहोस्विच्छब्दाधिक्यादर्थाधिक्यं गतमित्याह। कथम्? द्विगुणानुवृत्तौ गङ्गा चतुर्दशनदीसहस्रपरिवृता तद्द्विगुणनदीसहस्रपरिवारा सिन्धूरिति प्रसक्ते तन्निवृत्त्यर्थं गङ्गासिन्धूग्रहणमिति। तत्र गङ्गासिन्ध्वौ प्रत्येकं चतुर्दशनदीसहस्रपरिवृते। ततो द्विगुणा द्विगुणाः परिवारनद्यो वेदितव्या आसीतोदाया; ततः परतोऽर्धहीनाः।

उक्तो जम्बूद्वीपविष्कम्भाम्भोनिधिह्रदसरित्पर्वतवर्षनिवेशक्रमः। इदमिदानीं प्रक्रिय-तां किममूनि क्षेत्राणि तुल्यविस्ताराण्युत विस्तारविशेषोऽस्तीति? अत आह –

## भरतः षड्विंशपञ्चयोजनशतविस्तारः षट्चैकोनविंशतिभागा योजनस्य॥२४॥

षडधिका विंशतिः षड्विंशतिः षड्विंशतिरधिका येषु तानि षड्विंशानि पञ्च-योजनशतानि विस्तारोऽस्य षड्विंशपञ्चयोजनशतविस्तारो भरतः। किमेतावानेव? नेत्याह – षट् चैकोनविंशतिभागा योजनस्य विस्तारोऽस्येत्यभिसम्बन्ध्यते।

इतरेषां विष्कम्भविशेषप्रतिपत्त्यर्थमाह –

## तद्द्विगुणद्विगुणविस्तारा वर्षधरवर्षा विदेहान्ताः॥२५॥

ततो द्विगुणो द्विगुणो विस्तारो येषां त इमे तद्द्विगुणद्विगुणविस्ताराः।

**वर्षधरशब्दस्य पूर्वनिपात आनुपूर्व्यप्रतिपत्त्यर्थः॥१॥** वर्षधरशब्दस्य पूर्वनिपातः क्रियते आनुपूर्व्यप्रतिपत्तिर्यथा स्यादिति। इतरथा हि वर्षधराश्च वर्षाश्चेति द्वन्द्वे वर्षशब्दस्य पूर्वनिपातः प्रसज्येताऽल्पाच्तरत्वात्। न च लक्षणमस्ति

आनुपूर्व्यप्रतिपत्त्यर्थः पूर्वप्रयोगः कर्तव्य इति? सत्यं नास्ति कण्ठोक्तम्, ज्ञापकात्तु भवति "लक्षणहेत्वोः क्रियायाः" इति।

**विदेहान्तवचनं मर्यादार्थम् ॥२॥** विदेहोऽन्तो येषां त इमे विदेहान्ता इति मर्यादाक्रियते। इतरथा हि नीलादयोऽपि द्विगुणद्विगुणविस्ताराः प्रसज्येरन्। तथाहि - हिमवतो विष्कम्भो द्विपञ्चाशमेकं योजनसहस्रं द्वादश चैकोनविंशतिभागाः। हैमवतस्य द्वियोजनसहस्रे पञ्चोत्तरशतं पञ्च चैकोनविंशतिभागाः। महाहिमवतश्चत्वारि योजनसहस्राणि दशाधिके द्वे शते दश चैकोनविंशतिभागाः। निषधस्य षोडशयोजनसहस्राणि अष्टौ शतानि द्विचत्वारिंशानि द्वौ चैकोनविंशतिभागौ। विदेहस्य त्रयस्त्रिंशद्योजनसहस्राणि षट्शतानि चतुरशीत्यधिकानि चत्वारश्चैकोनविंशतिभागाः।

यद्येवं भरतादीनां विदेहान्तानां विस्तारक्रम उक्तः, अथोत्तरेषां कथमिति? अत आह –

## उत्तरा दक्षिणतुल्याः ॥२६॥

उत्तरा ऐरावतादयः नीलान्ता भरतादिभिर्दक्षिणैस्तुल्याः द्रष्टव्याः, अतीतस्य सर्वस्यायं विशेषो द्रष्टव्यः।

अत्राह – उक्तेषु भरतादिषु क्षेत्रेषु मनुष्याणां किं तुल्योऽनुभवादिः आहोस्वित्कश्चिदस्ति प्रतिविशेष इति? अत आह –

## भरतैरावतयोर्वृद्धिह्रासौ षट्समयाभ्यामुत्सर्पिण्यवसर्पिणीभ्याम् ॥२७॥

इमौ वृद्धिह्रासौ कस्य? भरतैरावतयोः। ननु ते क्षेत्रे व्यवस्थितावधिके कथं तयोर्वृद्धिह्रासौ? अत उत्तरं पठति –

**तात्स्थ्यात्ताच्छब्द्यसिद्धिर्भरतैरावतयोर्वृद्धिह्रासयोगः॥१॥** इह लोके तात्स्थ्यात्ताच्छब्द्यं भवति, यथागिरिस्थेषु वनस्पतिषु दह्यमानेषु गिरिदाह इत्युच्यते, तथा भरतैरावतस्थेषु मनुष्येषु वृद्धिह्रासावापद्यमानेषु भरतैरावतयोर्वृद्धिह्रासावुच्येते।

**अधिकरणनिर्देशो वा॥२॥** अथवा भरतैरावतयोरित्यधिकरणनिर्देशोऽयम्, स चाधेयमाकाङ्क्षतीति भरते ऐरावते च मनुष्याणां वृद्धिह्रासौ वेदितव्यौ किं कृतौ पुनस्तौ?

**अनुभवायुःप्रमाणादिकृतौ वृद्धिह्रासौ॥३॥** अनुभवः उपभोगपरिभोगसम्पत्, आयुर्जीवितपरिमाणम्, प्रमाणं शरीरोत्सेध इत्येवमादिकृतौ मनुष्याणां वृद्धिह्रासौ प्रत्येतव्यौ। किं हेतुकौ पुनस्तौ? कालहेतुकौ। स च कालो द्विविधः– उत्सर्पिणी अवसर्पिणी चेति। तद्भेदाः षट् प्रत्येकम् । अन्वर्थसंज्ञे चैते।

**अनुभवादिभिरवसर्पणशीलाऽवसर्पिणी॥४॥** अनुभवादिभिः पूर्वोक्तैरवसर्पणशीला हानिस्वाभाविका अवसर्पिणीसमा।

**तद्विपरीतोत्सर्पिणी॥५॥** तद्विपरीतैरेवोत्सर्पणशीला वृद्धिस्वाभाविकोत्सर्पिणीत्यु-च्यते। तत्रावसर्पिणी षड्विधा – सुषमसुषमा, सुषमा, सुषमदुःषमा, दुःषमसुषमा, दुःषमा, अतिदुःषमा चेति। उत्सर्पिण्यपि अतिदुःषमाद्या सुषमसुषमान्ता षड्विधैव भवति। अवसर्पिण्याः परिमाणं दश सागरोपमकोटीकोट्यः, उत्सर्पिण्यपि तावत्येव। सोभयी कल्प इत्याख्यायते। तत्र सुषमसुषमा चतस्रः सागरोपमकोटीकोट्यः। तदादौ मनुष्या उत्तर-कुरुमनुष्यतुल्याः। ततः क्रमेण हानौ सत्यां सुषमा भवति तिस्रः सागरोपमकोटीकोट्यः। तदादौ मनुष्या हरिवर्षमनुष्यसमाः। ततः क्रमेण हानौ सुषमदुःषमा भवति द्वे सागरोपमकोटीकोट्यौ तदादौ मनुष्या हैमवतमनुष्यसमाना भवन्ति। ततः क्रमेण हानौ सत्यां दुःषमसुषमा भवति एकसागरोपमकोटीकोटी द्विचत्वारिंशद्वर्षसहस्रोना। तदादौ

मनुष्या विदेहजनतुल्या भवन्ति। ततः क्रमेण हानौ सत्यां दुःषमा भवति एकविंशतिवर्षसहस्राणि। ततः क्रमेण हानौ सत्यां अतिदुःषमा भवति एकविंशति वर्षसहस्राणि। एवमुत्सर्पिण्यपि विपरीतक्रमा वेदितव्या।

अथेतरासु भूमिषु काऽवस्थितिः? अत आह –

## ताभ्यामपरा भूमयोऽवस्थिताः॥२८॥

ताभ्यां भरतैरावताभ्यामपरा भूमयोऽवस्थिता भवन्ति। न हि तत्रोत्सर्पिण्य-वसर्पिण्यौ स्तः।

किं तासु भूमिषु मनुष्यास्तुल्यायुष आहोस्वित् कश्चिदस्ति प्रतिविशेष इति? अस्तीत्याह –

## एकद्वित्रिपल्योपमस्थितयो हैमवतकहारिवर्षकदैवकुरवकाः॥२९॥

**हैमवतादिभ्यो भवार्थे वुञ् मनुष्यप्रतिपत्त्यर्थः॥१॥** हैमवते भवा इत्येवमादिना विग्रहेण वुञि कृते हैमवतकादिसिद्धिर्भवति। स किमर्थः? मनुष्यप्रतिपत्त्यर्थः। तत्र भवा मनुष्याः प्रतिपद्येरन्निति।

**एकादीनां हैमवतकादिभिर्यथासंख्यं संबन्धः॥२॥** हैमवतकादयस्त्रय एकादयस्त्रयः तत्र यथासंख्यं संबन्धो भवति। एकपल्योपमस्थितयो हैमवतकाः। द्विपल्योपमस्थितयो हारिवर्षकाः। त्रिपल्योपमस्थितयो दैवकुरवका इति। तत्र पञ्चसु हैमवतेषु सुषमदुःषमा सदाऽवस्थिता। तत्र मनुष्या एकपल्योपमायुषो द्विधनुःसहस्रोच्छ्रिताश्चतुर्थभक्ताहारा नीलोत्पलवर्णाः। पञ्चसु हरिवर्षेषु सुषमा सदाऽवस्थिता, तत्र मनुष्या द्विपल्योप-मस्थितयश्चतुश्चापसहस्रोत्सेधाः षष्ठभक्ताहाराः शङ्खवर्णाः। पञ्चसु देवकुरुषु

सुषमसुषमा सदाऽवस्थिता, तत्र मनुष्यास्त्रिपल्योपमायुषः षड्धनुःसहस्रोत्सेधा अष्टमभक्ताहारा कनकवर्णाः।

अथोत्तरेषु काऽवस्थेति? अत आह –

## तथोत्तराः॥३०॥

यथा दक्षिणाः तथोत्तरा वेदितव्याः। हैरण्यवतका हैमवतकैस्तुल्याः। राम्यका हारिवर्षकैस्तुल्याः। दैवकुरवकैरौत्तरकुरवका व्याख्याताः।

अथ विदेहेष्ववस्थितेषु का स्थितिक्रिया? अत उच्यते –

## विदेहेषु संख्येयकालाः॥३१॥

सर्वेषु विदेहेषु संख्येयकालाः मनुष्याः। तत्र कालः सुषमदुःषमान्तोपमः सदाऽवस्थितः। मनुष्याश्च पञ्चधनुःशतोत्सेधा नित्याहारा उत्कर्षेणैकपूर्वकोटिस्थितिका जघन्येनान्तर्मुहूर्तायुषः।

## भरतस्य विष्कम्भो जम्बूद्वीपस्य नवतिशतभागः॥३२॥

किमर्थमिदमुच्यते ननु पुनस्ताद्भरतस्य विष्कम्भो व्याख्यातः?

**पुनर्भरतविष्कम्भवचनं प्रकारान्तरप्रतिपत्त्यर्थम्॥१॥** पुनर्भरतविष्कम्भ उच्यते प्रकारान्तरेण प्रतिपत्तिः कथं स्यादिति। भरतविष्कम्भप्रमाणैः खण्डैः छद्यिमानो जम्बूद्वीपः नवत्युत्तरेण खण्डशतेन परिच्छिद्यत इत्यर्थः।

**उत्तराभिसम्बन्धार्थं वा॥२॥** अथवा, उत्तरत्र वक्ष्यते- ''द्विर्धातकी खण्डे। पुष्करार्धे च'' इति, तदभिसंबन्धार्थं पुनर्वचनं क्रियते।

**तलमूलयोर्दशयोजनसहस्रविस्तारो लवणोदः॥३॥** समे भूमितले द्वियोजनशत-सहस्रविष्कम्भ इत्युक्तं पुरस्तात्। तस्य गोतीर्थवदुभयतोऽधः क्रमेण हान्या मूले दशयोजनसहस्रविस्तारः तावद्विष्कम्भजलतलः योजनसहस्रावगाहः समाद् भूमितलादूर्ध्वं षोडशयोजनसहस्रजलोत्सेधः यवराशिरिवोच्छ्रितजलः मृदङ्गसंस्थानो लवणोदो वेदितव्यः।

**तन्मध्ये दिक्षु महापातालानि योजनशतसहस्रावगाहानि॥४॥** तस्य लवणोदस्य मध्ये चतसृषु दिक्षु रत्नवेक्कियाः पञ्चनवतियोजनसहस्राणि तिर्यगतीत्य क्षितिविवराणि वज्रमयतलपार्श्वानि, अलिञ्जरसंस्थानानि प्रत्येकमेकयोजनशतसहस्रावगाहानि ताव-न्मध्यविष्कम्भाणि तलमूलयोर्दशयोजनसहस्रविस्ताराणि महापातालानि वेदितव्यानि चत्वारि पातालबडवामुखयूपकेसरकलम्बुकसंज्ञानि। तत्र प्राच्यां दिशि पातालम्, प्रतीच्यां बडवामुखम्, उदीच्यां यूपकेसरम्, अपाच्यां कलम्बुकम्। तेषामेकैकस्त्रिभाग स्त्रयस्त्रिंशत्सहस्राणि योजनानां त्रीणि शतानि त्रयस्त्रिंशानि योजनत्रिभागश्च साधिकः। तेषामधस्त्रिभागे वातस्तिष्ठति। मध्यत्रिभागे वायुतोये। उपरित्रिभागे तोयम्। रत्नप्रभा-खरपृथ्वीभागसन्निवेशिभवनालयवातकुमारतद्वनिताक्रीडाजनिताऽनिलसंक्षोभकृतपातालो न्मीलननिमीलनहेतुकौ वायुतोयनिष्क्रमप्रवेशौ भवतः। तत्कृता दशयोजनसहस्रविस्तार-मुखजलस्योपरि पञ्चाशद्योजनावधृता जलवृद्धिः। तत उभयत आरत्नवेदिकायाः सर्वत्र द्विगव्यूतप्रमाणा जलवृद्धिः। पातालोन्मीलनवेगोपशमेन हानिः। पातालानां चतुर्णामप्यन्त-राणि प्रत्येकं द्वे शतसहस्रे सप्तविंशतिसहस्राणि सप्ततिशतं च योजनानां त्रीणि च गव्यूतानि साधिकानि।

**विदिक्षु क्षुद्रपातालानि दशयोजनसहस्रावगाहानि॥५॥** तन्मध्ये चतसृषु विदिक्षु चत्वारि क्षुद्रपातालानि दशयोजनसहस्रावगाहानि तावन्मध्यविष्कम्भाणि मुखमूलयो-

र्योजनसहस्रविस्ताराणि वेदितव्यानि। तेषामेकैकस्त्रिभागस्त्रीणि सहस्राणि त्रीणि शतानि त्रयस्त्रिंशानि योजनानां योजनत्रिभागश्च साधिकः। अधस्त्रिभागे वातः, मध्यत्रिभागे वायुतोये, उपरि त्रिभागे तोयम्।

**तदन्तरेषु क्षुद्रपातालानां योजनसहस्रावगाहानां सहस्रम्॥६॥** तेषां दिग्वि-दिग्विभागानां पातालानामन्तरेष्वष्टास्वपि योजनसहस्रावगाहानां तावन्मध्यविष्कम्भाणां मुखमूलयोस्तदर्धविस्ताराणां क्षुद्रपातालानां सहस्रं प्रत्येतव्यम्। तेषां त्रिभागाः पूर्ववद्वेदितव्याः। तत्रैकैकस्मिन्नन्तरे क्षुद्रपातालानां मुक्तावलीवदवस्थितानां शतं पञ्चविंशमन्यान्यपि पातालानि सन्ति। अन्तरालेषु सप्तसहस्राण्यष्टौ शतान्यशीतिश्च पातालसमुदायः।

**दिक्षु वेलन्धरनागाधिपतिनगराणि चत्वारि॥७॥** रत्नवेदिकायास्तिर्यग्द्वाचत्वारिंश-द्योजनसहस्राणि गत्वा चतसृषु दिक्षु द्वाचत्वारिंशद्योजनसहस्रायामविष्कम्भाणि चत्वारि वेलन्धरनागाधिपतिनगराणि भवन्ति। तेषु वेलन्धरनागाधिपतयः पल्योपमायुषो दश-कार्मुकोत्सेधाः प्रत्येकं चतसृभिरग्रमहिषीभिः परिवृता वेलन्धरनागाश्च निवसन्ति। तत्र द्वाचत्वारिंशन्नागसहस्राणि लवणोदाभ्यन्तरवेलां धारयन्ति। द्वासप्ततिर्नागसहस्राणि बाह्यवेलां धारयन्ति। अष्टाविंशतिर्नागसहस्राण्यग्रोदकं धारयन्ति। तान्येतानि समुदितान्येकं शतसहस्रं द्वाचत्वारिंशच्च सहस्राणि।

**द्वादशयोजनसहस्रायामविष्कम्भो गौतमद्वीपश्च॥८॥** रत्नवेदिकायास्तिर्यग्द्वादश-योजनसहस्राणि गत्वा द्वादशयोजनसहस्रायामविष्कम्भो गौतमस्य समुद्राधिपतेर्द्वीपश्च तत्र भवति।

रत्नवेदिकायास्तिर्यक्पञ्चनवतिप्रदेशेषु गतेष्वेकः प्रदेशावगाहः, पञ्चनवतिहस्तेषु गतेष्वेकहस्तावगाहः, पञ्चनवतियोजनेषु गतेष्वेकयोजनावगाहः, पञ्चनवतियोजनशतेषु

गतेष्वेकयोजनशतावगाहः, पञ्चनवतियोजनसहस्रेषु गतेष्वेकयोजनसहस्रावगाहः। लवणोदस्यान्ते यथा वेला तथा बहिरपि, विजयादीनि द्वाराणि चात्र लवणोदस्यैव वेला नान्योदधीनां तत्रैव च पातालानि नान्यत्र। सर्वे च लवणोदादयः स्वयम्भूरमणपर्यन्ता एकयोजनसहास्रावगाहाः। द्वीपोदधिपर्यन्ते चोभे वेदिके। या द्वीपान्ते ता द्वीपानां याः समुद्रान्ते ताः समुद्राणाम्। लवणोद च्छ्रितसलिलः, शेषाः प्रस्तारजलाः। भिन्नरसाश्चत्वारः, त्रय उदकरसाः, शेषा इक्षुरसाः सागराः। लवणोदो लवणरसजलः। वारुण्युदो वारुणीरसजलः। क्षीरोदः क्षीररसजलः। घृतोदो घृतरसजलः। कालोदपुष्करसे दस्वयम्भूरमणोदा उदकरसाः। लवणोदकालोदस्वयम्भूरमणोदा मत्स्यकूर्मादिजलचरावासाः नेतरे। लवणोदे नदीमुखेऽष्टादशयोजनशरीरा मत्स्याः, सागराभ्यन्तरेऽष्टादशयोजनशरीराः। कालोदे नदीमुखेऽष्टादशयोजनशरीरा मत्स्याः, सागराभ्यन्तरे षट्त्रिंशद्योजनशरीराः। स्वयम्भूरमणोदे नदीमुखे पञ्चशतयोजनशरीरा मत्स्याः, सागराभ्यन्तरे एकयोजनसहस्रशरीरा मत्स्याः।

योऽयं वर्षवर्षधरह्रदपुष्करादीनां संख्याविष्कम्भादिविधिरुक्तो जम्बूद्वीपे, तद्द्विगुणो धातकीखण्ड इति प्रतिपादयितुमिच्छन्नाह –

## द्विर्धातकीखण्डे॥३३॥

**द्रव्याभ्यावृत्तौ सुजभाव इति चेन्न; क्रियाध्याहाराद् द्विस्तावानिति यथा॥१॥** स्यान्मतम् – भरतादीनि द्रव्याण्यत्राभ्यावर्तन्ते न तु क्रिया तस्मान्नास्ति सुजिति? तन्न; किं कारणम्? क्रियाध्याहारात्। यथा द्विस्तावानयं प्रासाद इति 'मीयते' इत्येवमाद्यध्याह्रियमाणक्रियापेक्षया सुजुत्पत्तिः, एवमिहापि धातकीखण्डे भरतादयो 'द्विःसंख्यान्ते' इत्येवं सामर्थ्यप्रापितक्रियापेक्षया सुज्वेदितव्यः। तच्च संख्यानं द्विधा-स्वरूपभेदेन विष्कम्भादिभेदेन च। तत्र स्वरूपसंख्यानं द्वौ भरतौ द्वौ हिमवन्ता-

वित्येवमादि। विष्कम्भादिसंख्यानं जम्बूद्वीपे हिमवदादीनां वर्षधराणां यो विष्कम्भः तद्द्विगुणो धातकीखण्डे हिमवदादीनामिति।

अथ धातकीखण्डे भरतस्य को विष्कम्भः? उच्यते –

**षट्षष्टिशतानि चतुर्दशानि योजनानां धातकीखण्डभरताभ्यन्तरविष्कम्भः एकोनत्रिंशच्च भागशतम् ॥२॥** षट्सहस्राणि षट्शतानि चतुर्दशोत्तराणि योजनानां योजनस्य द्वादशद्विशतभागाः एकोनविंशच्च भागशतं धातकीखण्डभरताभ्यन्तर-विष्कम्भः।

**सैकाशीतिपञ्चशताधिकद्वादशसहस्राणि मध्यविष्कम्भः षट्त्रिंशच्च भागाः॥३॥** द्वादशसहस्राणि योजनानां पञ्चशतान्येकाशीत्युत्तराणि षट्त्रिंशच्च भागा धातकीखण्ड-भरतमध्यविष्कम्भः।

**सप्तचत्वारिंशत्पञ्चशताष्टादशसहस्राणि बाह्यविष्कम्भः पञ्चपञ्चाशच्च भाग-शतम् ॥४॥** अष्टादशसहस्राणि योजनानां पञ्चशतानि सप्तचत्वारिंशानि पञ्चपञ्चाशच्च-भागशतं बाह्यभरतविष्कम्भः।

**वर्षाद्वर्षश्चतुर्गुणविस्तार आ विदेहात् ॥५॥** वर्षाद्वर्षश्चतुर्गुणविस्तार आ विदेहाद् द्रष्टव्यः भरताच्चतुर्गुणविष्कम्भो हैमवतः। हैमवताच्चतुर्गुणविष्कम्भो हरिवर्षः। हरिवर्षा-च्चतुर्गुणविष्कम्भो विदेह इति। तथा च भरततुल्यविस्तार ऐरावतः। ऐरावता-च्चतुर्गुणविस्तारो हैरण्यवतः। हैरण्यवताच्चतुर्गुणविस्तारो रम्यकः। धातकीखण्डवलय-विष्कम्भश्चत्वारि योजनशतसहस्राणि। तत्परिधिरेकचत्वारिंशद्योजनशतसहस्राणि दश-सहस्राणि नव योजनशतानि विशेषोनैकषष्ट्युत्तराण्येकं शतसहस्रमष्टसप्ततिसहस्राण्यष्टौ शतानि च द्वाचत्वारिंशानि योजनानि धातकीखण्डे वर्षधररुद्धक्षेत्रम्। तत्परिधिम पनीयावशिष्टं द्वादशद्विशतभागहृतं लब्धम्, भरतविष्कम्भ उक्तः।

**वर्षाणां वर्षधराणां सरितां वृत्तवेदाढ्यानां ह्रदानामन्येषां च तान्येवावगाहादीनि॥६॥** वर्षधरा हिमवदादयः उक्तोत्सेधावगाहा द्विगुणविस्ताराः। चत्वारोऽपि वृत्तिवेदाढ्या उक्तोच्छ्रायावगाहसमा द्वियोजनसहस्रविस्ताराः। यमकाद्री च व्याख्यातोत्सेधावगाहौ द्वियोजनसहस्रमूलविस्तारौ पञ्चदशयोजनशतमध्यविष्कम्भावुपर्येकयोजनसहस्रविस्तारौ। काञ्चनाद्रयश्च व्याख्यातोच्छ्रायावगाहा द्विगुणविस्ताराः। ह्रदाश्च पद्मादयः षडपि द्विगुणा-यामविष्कम्भावगाहाः। द्वीपाः पद्मानि च द्विगुणायामविष्कम्भावगाहानि।

**भरतैरावतविभाजिनाविष्वाकारगिरी॥७॥** उदगपाक् भरतैरावतयोर्विभागहेतू कालो-दलवणोदस्पर्शिनौ योजनशतावगाहौ चतुर्योजनशतोत्सेधावध उपरि चैकयोजनसहस्र-विस्तारौ काञ्चनपरिणामाविष्वाकारगिरी भवतः।

तत्र धातकीखण्डे द्वौ मेरू पूर्वापरौ योजनसहस्रावगाहौ पञ्चनवतियोजन-शतमूलविष्कम्भौ धरणीतले चतुर्नवतियोजनशतविस्तारौ चतुरशीतियोजनसहस्रोत्सेधौ योजनसहस्रविस्तारतलौ पूर्वोक्तप्रमाणचूलिकौ। समाद् भूमितलात् पञ्चयोजनशतान्यु त्प्लुत्य नन्दनवनं भवति पञ्चयोजनशतविस्तारम्। पञ्चपञ्चाशद्योजनशताधिक पञ्चाशद्योजनसहस्राणि तत उत्प्लुत्य सौमनसनाम वनं पञ्चशतयोजनविष्कम्भं भवति। ततोऽष्टाविंशतियोजनसहस्राण्युत्प्लुत्य पाण्डुकवनं भवति। तयोर्दशसु प्रदेशेष्वेकप्रदेशवृद्धिः।

जम्बूद्वीपे यत्र जम्बूवृक्षः तत्र धातकीखण्डे धातकीवृक्षः।परिवाराश्च पूर्वोक्तवर्णनाः। तन्निवासी द्वीपाधिपतिस्तत एव द्वीपस्य धातकीखण्ड इति नाम वेदितव्यम्। तत्र चक्रारान्तरसंस्थाना वर्षा वर्षधराश्च चक्राकारा उभयजलधिस्पर्शिनः। तत्परिक्षेपिका-लोदसमुद्रः टङ्कच्छिन्नतीर्थोऽष्टयोजनशतसहस्रवलयविष्कम्भ

एकनवतिशतसहस्राणि सप्ततिश्च सहस्राणि साधिकपञ्चोत्तराणि षट्शतानि योजनानां तत्परिधिः।

कालोदपरिक्षेपिपुष्करद्वीपः षोडशयोजनशतसहस्रवलयविष्कम्भः। तत्र द्वीपाम्भो-निधिद्विगुणपरिक्लृप्तिवत् धातकीखण्डवर्षादिद्विगुणविधिप्रसङ्गे विशेषावधारणार्थमाह –

## पुष्करार्धे च॥३४॥

चशब्दः किमर्थः?

**संख्याभ्यावृत्त्यनुवर्तनार्थश्चशब्दः॥१॥** द्विरित्येतस्याः संख्याभ्यावृत्तेरनुवर्त्तनार्थश्चशब्दः क्रियते, पुष्करार्धे च द्विर्भरतादयः संख्यायन्त इति। किं जम्बूद्वीपभरतादिसंख्या द्विरावर्त्यत इत्यभिसंबध्यते आहोस्वित् धातकीखण्डभरतादिसंख्येति? ' जम्बूद्वीपभरता-दिसंख्यैव संबध्यते। अनन्तरा कस्मान्नाभिसंबध्यत इति? इच्छातो विशेषसम्बन्ध इति। अतश्चैतदेवं धातकीखण्डे हिमवदादीनामपि विष्कम्भः, पुष्करार्धे च हिमवदादीनां द्विगुण इष्यत इति। नामानि च तान्येव वेदितव्यानि। अथ भरतस्य को विष्कम्भः?

**एकोनाशीत्युत्तरपञ्चशताधिकैकचत्वारिंशद्योजनसहस्राणि भरताभ्यन्तरविष्कम्भः सत्रिसप्ततिभागशतं च॥२॥** एकचत्वारिंशत्सहस्राणि पञ्चशतान्येकोनाशीत्युत्तराणि योजनानां त्रिसप्तत्युत्तरभागशतं च भरताभ्यन्तरविष्कम्भो वेदितव्यः।

**द्वादशपञ्चशतोत्तरत्रिपञ्चाशद्योजनसहस्राणि मध्यविष्कम्भो नवनवत्यधिकं च भागशतम् ॥३॥** त्रिपञ्चाशत्सहस्राणि योजनानां पञ्चशतानि द्वादशानि नवनवत्यधिकं च भागशतं मध्यभरतविष्कम्भः।

**द्वाचत्वारिंशच्चतुःशतोत्तरपञ्चषष्टिसहस्राणि बाह्यविष्कम्भस्त्रयोदश च भागाः॥४॥** पञ्चषष्टिसहस्राणि योजनानां चत्वारि शतानि द्वाचत्वारिंशानि त्रयोदशभागाः बाह्यभरत-विष्कम्भः।

**वर्षाद्वर्षश्चतुर्गुणविस्तार आ विदेहात्॥५॥** वर्षात् वर्षः चतुर्गुणविस्तार आविदेहात् द्रष्टव्यः। भरताच्चतुर्गुणविष्कम्भो हैमवतः, हैमवताच्चतुर्गुणविष्कम्भो हरिवर्षः, हरि-वर्षाच्चतुर्गुणविष्कम्भो विदेह इति। तथा भरततुल्यविस्तार ऐरावतः, ऐरावता-च्चतुर्गुणविस्तारो हैरण्यवतः, हैरण्यवताच्चतुर्गुणविस्तारो रम्यक इति। एककोटिद्वा-चत्वारिंशच्छतसहस्राणि त्रिंशत्सहस्राणि द्वे च शते योजनानां सविशेषा चैकान्नपञ्चाशत् पुष्करार्धान्तःपरिधिः। त्रीणि शतसहस्राणि पञ्चपञ्चाशत्सहस्राणि षट्शतानि चतुरशीतिश्च योजनानि पुष्करार्धे पर्वतरुद्धक्षेत्रम् परिधेरपनीयाऽवशिष्टं द्वादशद्विशतभागहृतलब्धं भरतविष्कभ्भ उक्तः। वर्षधरविजयार्धवृत्तवेदाढ्यादयः जम्बूद्वीपवर्णनायां विहितोत्सेधाव-गाहाः धातकीखण्डविहितद्विगुणविस्ताराः पुष्करार्धे च वेदितव्याः। इष्टावारौ मन्दरौ च तावत्परिमाणावेव। यत्र जम्बूवृक्षस्तत्र पुष्करं सपरिवारं वेदितव्यम्। तन्निवासी द्वीपाधिपतिः; तत एव तस्य दीपस्य नाम रूढं पुष्करद्वीप इति। अथ कथं पुष्करार्धसंज्ञा?

**मानुषोत्तरशैलेन विभक्तार्धत्वात् पुष्करार्धसंज्ञा॥६॥** पुष्करद्वीपस्य बहुमध्यदेशभावी वलयवृत्तो मानुषोत्तरनामशैलः; तेन विभक्तार्धत्वात् पुष्करार्धसंज्ञा वेदितव्या। सप्तदश-योजनशतान्येकविंशान्यस्योच्छ्रायः। चत्वारि योजनशतानि त्रिंशानि सक्रोशान्यवगाहः, द्वाविंशं योजनसहस्रं मूलविस्तारः। सप्तयोजनशतानि त्रयोविंशानि मध्यविस्तारः। चतुर्विंशानि चत्वारि योजनशतान्युपरि विस्तारः। सोऽयमभ्यन्तरमुखनिषण्णसिंहा-कृतिरर्धयवराश्युपमानः मानुषोत्तराद्रिः। तस्योपरि चतसृषु दिक्षु पञ्चाशद्योजनायामतदर्ध-

विस्तारसार्धयोजनसप्तत्रिंशद्योजनोत्सेधान्यष्टयोजनोत्सेधतदर्धविष्कम्भतावत्प्रवेशद्वाराण्य-र्हदायतनवर्णनोपेतानि चत्वार्यर्हदायतनानि प्रागादिषु दिक्षु प्रदक्षिणावृतानि। वैडूर्याश्मगर्भसौगन्धिकरुचकलोहिताक्षाऽञ्जनकाऽञ्जनमूलकनकरजतस्फटिकाऽङ्कप्रवालवज्र-तपनीयकूटसंज्ञानि चतुर्दशकूटानि पञ्चयोजनशतोच्छ्रायाणि पञ्चयोजनशतमूलविष्कम्भाणि पञ्चसप्तत्युत्तरत्रियोजनशतमध्यविष्कम्भाण्यर्धतृतीययोजनशतोपरिविष्कम्भाणि। तत्र चतसृषु दिक्षु त्रीणि त्रीणि कूटानि पूर्वोत्तरस्यां दिश्येकं कूटं पूर्वदक्षिणस्यां दिश्येकम्। तेषु यशस्वदादयः पल्योपमस्थितयः सुपर्णकुमाराणां राजानो निवसन्ति। प्राच्यां दिशि वैडूर्ये यशस्वान्, अश्वगर्भे यशष्कान्तः, सौगन्धिके यशोधरः। अपाच्यां रुचके नन्दनः, लोहिताक्षे नन्दोत्तरः, अञ्जनकेऽशनिघोषः। प्रतीच्यामञ्जनमूले सिद्धार्थः, कनके क्रमणः, रजते मानुषः। उदीच्यां स्फटिके सुदर्शनः, अङ्केऽमोघः, प्रवाले सुप्रबुद्धः। पूर्वोत्तरस्यां वज्रे हनुमान्। पूर्वदक्षिणस्यां तपनीये स्वातिः। चतसृषु विदिक्षु पुनरिमानि चत्वारि कूटानि रत्नसर्वरत्नवैलम्बप्रभञ्जननामानि पूर्वकूटपरिमाणानि। निषधाद्रिस्पृष्टभागे पूर्वदक्षिणस्यां रत्ने पन्नगेन्द्रो वेणुदेवः। नीलाद्रिस्पृष्टभागे पूर्वोत्तरस्यां सर्वरत्ने सुपर्णेन्द्रो वेणुतालिः। निषधाद्रिस्पृष्टभागेऽपरदक्षिणस्यां वैलम्बकूटे वातेन्द्रो वैलम्बः। नीलाद्रिस्पृष्टभागेऽपरोत्तरस्यां प्रभञ्जनकूटे वातेन्द्रः प्रभञ्जनो निवसति।

अत्राह – किमर्थं जम्बूद्वीपधराधरादिसंख्या द्विरावृत्ता पुष्कराध कथ्यते न पुनः कृत्स्न एव पुष्करद्वीपे इति ? अत्रोच्यते –

## प्राङ्मानुषोत्तरान्मनुष्याः॥३५॥

यस्मात् प्राङ्मानुषोत्तरान्मनुष्या न बहिः, ततो न बहिः पूर्वोक्तक्षेत्रविभागोऽस्ति। अथवा, उक्तमिन्द्रियविकल्पाधिकारे

''कृमिपिपीलिकाभ्रमरमनुष्यादीनामेकैकवृद्धानि' इति। तत्र न ज्ञायते क्व मनुष्या इति? अतस्तदधिकरणविशेषप्रतिपत्त्यर्थमुच्यते–जम्बूद्वीपादारभ्य प्राङ मानुषोत्तरात् मनुष्या न बहिरिति। व्याख्यातो मानुषोत्तराद्रिः। नास्मादुत्तरं कदाचिदपि विद्याधराः ऋद्धिप्राप्ता अपि मानुषा गच्छन्ति। अन्यत्रोपपाद-समुद्घाताभ्याम्, ततोऽस्याऽन्वर्थसंज्ञा।

एवं द्विगुणद्विगुणवलयविष्कम्भेषु द्वीपसमुद्रेषु गतेष्वष्टमो नन्दीश्वरो द्वीपः। तस्य वलयविष्कम्भः कोटिशतं त्रिषष्टिकोट्यः चतुरशीतिश्च योजनशतसहस्राणि। तत्परिधिः द्वे कोटिसहस्रे द्विसप्ततिकोटयः त्रयस्त्रिंशच्छतसहस्राणि चतुःपञ्चाशत्सहस्राण्येकशतं नवति-योजनानि गव्यूतं च साधिकम्। तद्बहुमध्यदेशभाविनश्चतसृषु दिक्षु चत्वारोऽञ्जनगिरयः योजनसहस्रावगाहाश्चतुरशीतियोजनसहस्रोत्सेधाः मूलमध्याग्रेषूत्सेधसमायामविष्कम्भाः पटहाकाराः। तेषां चतसृषु दिक्षु तिर्यगेकं योजनशतसहस्रमतीत्य प्रत्येकं चतस्रो वाप्यो भवन्ति। तत्र पौरस्त्याञ्जनगिरेः नन्दानन्दवतीनन्दोत्तरानन्दिघोषासंज्ञा योजन-सहस्रावगाहाः योजनशतसहस्रायामविष्कम्भाश्चतुष्कोणाः मत्स्यकच्छपादिजलचरविरहिताः पद्मोत्पलादिजलरूहकुसुमसञ्छादितस्फटिकमणिस्वच्छगम्भीरनीराः। प्राच्यां दिशि नन्दा शक्रस्य, अपाच्यां नन्दावती ऐशानस्य, प्रतीच्यां नन्दोत्तरा चमरस्य, उदीच्यां नन्दिघोषा वैरोचनस्य। दाक्षिणात्याञ्जनगिरेर्विजया वैजयन्ती जयन्ती अपराजिता चेति चतस्रो वाप्यः पूर्वोक्तप्रमाणवर्णनाः शक्रलोकपालानाम्। प्राच्यां दिशि विजया वरुणस्य, अपाच्यां वैजयन्ती यमस्य, प्रतीच्यां जयन्ती सोमस्य, उदीच्यामपराजिता वैश्रवणस्य। पाश्चात्याञ्जनगिरेरशोका सुप्रबुद्धा कुमुदा पुण्डरीकिणी चेति चतस्रो वाप्यः पूर्वोक्तप्रमाणवर्णनाः। पूर्वस्यां दिशि अशोका वेणुदेवस्य दक्षिणस्यां सुप्रबुद्धा वेणुतालेः, अपरस्यां कुमुदा वरुणस्य, उत्तरस्यां पुण्डरीकिणी भूतानन्दस्य। उदीच्याञ्जनगिरेः प्रभङ्करा, सुमना, आनन्दा, सुदर्शना चेति चतस्रो वाप्यः पूर्वोक्तप्रमाणर्णना ऐशानलोकपालानाम्। प्राच्यां दिशि प्रभङ्करा वरुणस्य, अपाच्यां सुमना यमस्य,

प्रतीच्यामानन्दा सोमस्य, उदीच्यां सुदर्शना वैश्रवणस्य। षोडशानामप्यासामभ्यन्तरान्तराणि पञ्चषष्टिसहस्राणि योजनानां पञ्चशतानि पञ्चचत्वारिंशानि। मध्यान्तराण्येकं शतसहस्रं योजनानां चत्वारिंशत्सहस्राणि षट् च शतानि द्वियोजनोत्तराणि। बाह्यान्तराणि द्वे शतसहस्रे योजनानां त्रयोविंशतिसहस्राणि षट् च शतान्येकषष्ट्युत्तराणि। षोडशानामपि तासां मध्येषु सहस्रावगाहा मूलमध्याग्रेषु दशयोजनसहस्रायामविष्कम्भाः तावदुत्सेधाः पटहाकाराः जाम्बूनदमयाः, अर्जुनसुवर्णशिखरत्वाद् दधिमुखा इति कृत्वाऽन्वर्थसंज्ञाः षोडश नगवराः। परितस्ता वाप्यः। चत्वारि वनानि प्रत्येकमशोकसप्तपर्णचम्पकचूतनामानि वापीसमायामानि तदर्धविष्कम्भाणि।

**पूर्वेणाऽशोकवनं दक्षिणतः सप्तपर्णवनमाहुः।**

**अपरेण चम्पकवनमुत्तरतश्चूतवृक्षवनम् ॥१॥**

एतद्वापीकोणसमीपस्थाः प्रत्येकं चत्वारो नगा रतिकराख्या अर्धतृतीययोजनशतावगाहा एकयोजनसहस्रोत्सेधा मूलमध्याग्रेषु तावदायामविष्कम्भाः पटहाकाराः काञ्चनमणिपरिणामाः। सर्वे ते समुदिताश्चतुःषष्टिः। तत्र येऽभ्यन्तरकोणस्था द्वात्रिंशन्नगा देवानामाक्रीडनस्थानैरलङ्कृताः। ये बाह्यकोणस्थाः द्वात्रिंशद्रतिकरा अञ्जनाद्रयो दधिमुखाश्च तेषां द्विपञ्चाशदुपरि बहुमध्यदेशभावीनि प्राङ्मुखानि योजनशतायामतदर्ध विष्कम्भाणि पञ्चसप्ततियोजनोत्सेधान्यष्टयोजनोत्सेधतदर्धविस्तारतावत्प्रवेशपूर्वोत्तर-दक्षिणद्वाराणि द्विपञ्चादशर्हदायतनान्यर्हदायतनवर्णनोपेतानि चातुर्मासिकमहामहिमार्हाणि। पूर्वोक्तचतुःषष्टिवनखण्डबहुमध्यदेशभाविनो द्विषष्टियोजनोत्सेधा एकत्रिंशद्यो-जनायामविष्कम्भा अष्टयोजनोत्सेधतदर्धविस्तारद्वाराश्चतुःषष्टिरेव प्रासादाः। एतेष्वशोक-वनावतंसकादयः पल्योपमायुषः दशकार्मुकोत्सेधाः स्वभवननामानो देवा निवसन्ति।

एवं द्विगुणवलयविष्कम्भेषु द्वीपसमुद्रेषु गतेष्वेकादशमः कुण्डलवरद्वीपः। तद् बहुमध्यदेशभाविवलयाकारः सम्पूर्णयवराश्युपमानः कुण्डलनगः योजनसहस्रावगाहो द्विचत्वारिंशद्योजनसहस्रोत्सेधः द्वाविंशदशसहस्रयोजनमूलविस्तारः त्रयोविंशसप्तसहस्र योजनमध्यविस्तारश्चतुविंशचतुर्योजनसहस्राग्रविस्तारः। तस्योपरि पूर्वादिदिग्विभावीनि वज्रवज्रप्रभकनककनकप्रभरजतरजतप्रभसुप्रभमहाप्रभाऽङ्काऽङ्कप्रभमणिमणिप्रभस्फटिक-स्फटिकप्रभहिमवन्महेन्द्रकूटसंज्ञानि षोडश कूटानि मानुषोत्तरकूटतुल्यप्रमाणान्येकैकस्यां दिशि चत्वारि चत्वार्यवसेयानि। पूर्वस्यां दिशि वज्रे त्रिशिराः, वज्रप्रभे पञ्चशिराः, कनके महाशिराः, कनकप्रभे महाभुजः। अपाच्यां रजते पद्मः, रजतप्रभे पद्मोत्तरः, सुप्रभे महापद्मः, महाप्रभे वासुकिः। अपरस्यामङ्के स्थिरहृदयः, अङ्कप्रभे महाहृदयः, मणिकूटे श्रीवृक्षः, मणिप्रभे स्वस्तिकः। उदीच्यां स्फटिके सुन्दरः, स्फटिकप्रभे विशालाक्षः, हिमवति पाण्डुरः, महेन्द्रे पाण्डुकः। एते त्रिशिर प्रभृतयः पाण्डुकान्ताः षोडशापि नागेन्द्राः पल्योपमायुषः। पूर्वापरयोर्दिशोः कुण्डलनगे एकयोजनसहस्रोत्सेधे तावन्मूलविष्कम्भेऽ-र्धाष्टमशतमध्यविष्कम्भे पञ्चशताग्रविष्कम्भे कुण्डलवरद्वीपाधिपतेरावासौ द्वे कूटे। तस्यैवोपरि पूर्वादिषु दिक्षु चत्वार्यर्हदायतनान्यञ्जनाद्रिजिनायतनतुल्यप्रमाणानि।

कुण्डलवरद्वीपद्विगुणवलयविष्कम्भः कुण्डलवरोदः, तद्द्विगुणवलयविष्कम्भः शङ्खवरद्वीपः, तद्द्विगुणवलयविष्कम्भः शङ्खवरोदः तद्द्विगुणवलयविष्कम्भः रुचकवर-द्वीपः। तद्वहुमध्यदेशभावी वलयाकार रुचकवरनगः एकयोजनसहस्रावगाहश्चतुरशीति-योजनसहस्रोत्सेधः, मूलमध्याग्रेषु द्विचत्वारिंशद्योजनसहस्रविस्तारः। तस्योपरि पूर्वादिषु दिक्षु चत्वारि कूटानि नन्द्यावर्तस्वस्तिकश्रीवृक्षवर्धमानसंज्ञानि पञ्चयोजनशतोत्सेधानि मूलमध्याग्रेषु योजनसहस्रायामविष्कम्भाणि। प्राच्यां दिशि नन्द्यावर्ते पद्मोत्तरः, अपाच्यां स्वस्तिके सुहस्ती, प्रतीच्यां श्रीवृक्षे नीलः, उदीच्यां वर्धमानेऽञ्चनगिरिः। त एते पद्मोत्तरादयश्चत्वारो दिग्गजेन्द्राः पल्योपमायुषः। तस्यैवोपरि पूर्वस्यां दिशि वैडूर्य-काञ्चनकनकारिष्टदिक्स्वस्तिकनन्दनाञ्जनाञ्जनमूलकनामान्यष्टौ कूटानि पूर्वोक्तकूट-

तुल्यप्रमाणानि। वैडूर्ये विजया, काञ्चने वैजयन्ती, कनके जयन्ती, अरिष्टेऽपराजिता, दिक्स्वस्तिके नन्दा, नन्दने नन्दोत्तरा, अञ्जने आनन्दा, अञ्जनमूलके नान्दीवर्धमाना। एता दिक्कुमार्यः तीर्थकरजन्मकाले इहाऽऽगत्याऽर्हन्मातृसमीपे भृङ्गारान् गृहीत्वाऽवतिष्ठन्ते। दक्षिणस्याममोघसुप्रबुद्धमन्दिरविमलरुचकरुचकोत्तरचन्द्रसुप्रतिष्ठ संज्ञान्यष्टौ कूटानि पूर्वोक्तकूटतुल्यप्रमाणानि। अमोघे सुस्थिता, सुप्रबुद्धे सुप्रणिधिः, मन्दिरे सुप्रबुद्धा, विमले यशोधरा, रुचके लक्ष्मीमती, रुचकोत्तरे कीर्त्तिमती, चन्द्रे वसुन्धरा, सुप्रतिष्ठे चित्रा। एता दिक्कुमार्यः इहाऽऽगत्याऽर्हन्मातृसमीपे आदर्श धारिण्योऽवतिष्ठन्ते। अपरस्यां लोहिताक्षजगत्कुसुमपद्मनलिनकुमुदसौमनसयशोभद्रा ख्यान्यष्टौ कूटानि पूर्वोक्तकूटतुल्यप्रमाणानि। लोहिताक्षे इलादेवी, जगत्कुसुमे सुरादेवी, पद्मे पृथिवी, नलिने पद्मावती, कुमुदे कानना, सौमनसे नवमिका, यशसि यशस्विनी, भद्रकूटे भद्रा। एता दिक्कुमार्य इहाऽऽगत्याऽर्हन्मातृसमीपे छत्राणि धारयन्त्यो गायन्त्य आसते। उदीच्यां स्फटिकाऽङ्काऽञ्जनकाञ्चनरजतकुण्डलरुचिरसुदर्शनसंज्ञान्यष्टौ कूटानि पूर्वोक्तकूटतुल्यप्रमाणानि। स्फटिकेऽलंभूषा, अङ्के मिश्रकेशी, अञ्जने पुण्डरीकिणी, काञ्चने वारुणी, रजत आशा, कुण्डले ह्री, रुचिरे श्रीः, सुदर्शने धृतिरिति। एता दिक्कुमार्यः प्रगृहीतचामरा अर्हन्मातॄः सेवन्ते। पूर्वादिषु दिक्षु पुनरपराणि चत्वारि कूटानिविमलनित्यालोकस्वयंप्रभनित्योद्योतसंज्ञानि। पूर्वस्यां दिशि विमले चित्रा, दक्षिणस्यां नित्यालोके कनकचित्रा, अपरस्यां स्वयंप्रभे त्रिशिराः, उत्तरस्यां नित्योद्योते सूत्रमणिः। एता विद्युत्कुमार्यः इहाऽऽगत्य जिनमातृसमीपे भास्करवदुद्योतं कुर्वन्त्यः आसते। विदिक्षु चत्वारि कूटानि वैडूर्यरुचकमणिप्रभरुचकोत्तमनामानि। पूर्वोत्तरस्यां वैडूर्ये रुचका, पूर्वदक्षिणस्यां रुचके रुचकाभा, अपरदक्षिणस्यां मणिप्रभे रुचकान्ता, अपरोत्तरस्यां रुचकोत्तमे रुचकप्रभा एता दिक्कुमारीमहत्तरिकाः। विदिक्षु पुनरपराणि चत्वारि कूटानि रत्नरत्नप्रभसर्वरत्नरत्नोच्चयाख्यानि। पूर्वोत्तरस्यां रत्ने विजया, पूर्वदक्षिणस्यां रत्नप्रभे वैजयन्ती, अपरदक्षिणस्यां सर्वरत्ने जयन्ती, अपरोत्तरस्यां

रत्नोच्चयेऽपराजिता। एता विदिक्कुमारीमहत्तरिकाः। एता अष्टावपि महत्तरिका इहाऽऽगत्य तीर्थकराणां जातकर्माणि कुर्वन्ति। तान्येतानि विदिक्कुमारीणां महत्तरिकाणां च कूटानि द्वादशाप्येकयोजन-सहस्रोत्सेधानि मूलमध्याग्रेष्वेकसहस्राऽर्धाऽष्टमशतपञ्चशतविस्ताराणि। रुचकनगस्योपरि चतसृषु दिक्षु चत्वार्यर्हदायतनानि प्राङ्मुखान्यञ्जनाद्रिजिनालयतुल्य-प्रमाणानि। एवं द्विगुणद्विगुणवलयविष्कम्भा असंख्येया दीपसमुद्रा वेदितव्याः।

यो मानुषोत्तराद्रिरुक्तः तस्मात्प्राग्भवन्तः गतिनामापेक्षाभिधानाः पूर्वोदिता द्विविधाः कथमिति चेत्? उच्यते –

## आर्या म्लेच्छाश्च॥३६॥

**आर्या द्विविधा ऋद्धिप्राप्तेतरविकल्पात्॥१॥** गुणैर्गुणवद्भिर्वाऽर्यन्ते सेव्यन्ते इत्यार्याः। ते द्विविधाः ऋद्धिप्राप्तार्याः, अनृद्धिप्राप्तार्याश्चेति।

**अनृद्धिप्राप्तार्याः पञ्चविधाः क्षेत्रजातिकर्मचारित्रदर्शनभेदात्॥२॥** ये अनृद्धिप्राप्तार्यास्ते पञ्चविधा भवन्ति – क्षेत्रार्याः जात्यार्याः कर्मायाः चारित्रार्याः दर्शनार्याश्चेति। तत्र क्षेत्रार्याः काशीकोशलादिषु जाताः। इक्ष्वाकुज्ञातिभोजादिषु कुलेषु जाता जात्यार्थाः। कर्मार्यास्त्रेधा - सावद्यकर्मार्या अल्पसावद्यकर्मार्या असावद्यकर्मार्याश्चेति। सावद्यकर्मार्याः षोढा – असिमषीकृषिविद्याशिल्पवणिक्कर्मभेदात्। असिधनुरादिप्रहरणप्रयोगकुशला असिकर्मार्याः। द्रव्यायव्ययादिलेखननिपुणा मषीकर्मार्याः। हलकुलिदन्तालकादि-कृष्युपकरणविधानविदः कृषीबलाः कृषिकर्मार्याः। आलेख्यगणितादिद्विसप्ततिकलावदाता विद्याकर्मार्याः चतुःषष्टिगुणसम्पन्नाश्च। रजकनापिताऽयस्कारकुलालसुवर्णकारादयः शिल्पकर्मार्याः। चन्दनादिगन्धघृतादिरसशाल्यादिधान्यकार्पासाद्याच्छादनमुक्तादिनानाद्रव्यसंग्रहकारिणो

बहु विधा वणिक्कर्मार्याः। षडप्येतेऽविरतिप्रवणत्वात् सावद्यकर्मार्या; अल्पसावद्यकर्मार्याः श्रावकाः श्राविकाश्च विरत्यविरतिपरिणतत्वात्, असावद्यकर्मार्याः संयताः, कर्मक्षयार्थोद्यतविरतिपरिणतत्वात्। चारित्रार्या द्वेधा अभिगतचारित्रार्याः अनभिगतचारित्रार्याश्चेति। तद्भेदोऽनुपदेशोपदेशापेक्षभेदकृतः। चारित्रमोहस्योपशमात् क्षयाच्च बाह्योपदेशानपेक्षा आत्मप्रसादादेव चारित्रपरिणामास्कन्दिन उपशान्तकषायाः क्षीणकषायाश्चाऽभिगतचारित्रार्याः। अन्तश्चारित्रमोहक्षयोपशमसद्भावे सति बाह्योपदेश-निमित्तविरतिपरिणामा अनभिगतचारित्रार्याः। दर्शनार्याः दशधा - आज्ञामार्गोपदेशसूत्र-बीजसंक्षेपविस्तारार्थावगाढपरमावगाढरुचिभेदात्। तत्र भगवदर्हत्सर्वज्ञप्रणीताज्ञामात्र निमित्तश्रद्धाना आज्ञारुचयः। निःसङ्गमोक्षमार्गश्रवणमात्रजनितरुचयो मार्गरुचयः। तीर्थकरबलदेवादिशुभचरितोपदेशहेतुकश्रद्धाना उपदेशरुचयः। प्रव्रज्यामर्यादाप्ररूपणाचारसूत्र श्रवणमात्रसमुद्भूतसम्यग्दर्शनाः सूत्ररुचयः। बीजपदग्रहणपूर्वकसूक्ष्मार्थतत्वार्थश्रद्धाना बीजरुचयः। जीवादिपदार्थसमाससंबोधनसमुद्भूतश्रद्धानाः संक्षेपरुचयः। अङ्गपूर्वविषयजीवा द्यर्थविस्तारप्रमाणनयादिनिरूपणोपलब्धश्रद्धाना विस्ताररुचयः। वचनविस्तारविरहितार्थ-ग्रहणजनितप्रसादा अर्थरुचयः। आचारादिद्वादशाङ्गाऽभिनिविष्टश्रद्धाना अवगाढरुचयः। परमावधिकेवलज्ञानदर्शनप्रकाशितजीवाद्यर्थविषयात्मप्रसादाः परमावगाढरुचयः।

**ऋद्धिप्राप्तार्या अष्टविधाः – बुद्धिक्रियाविक्रियातपःबलौषधरसक्षेत्रभेदात्॥३॥** ऋद्धि-प्राप्तार्या अष्टविधा भवन्ति बुद्ध्यादिविकल्पात्। तत्र बुद्धिरवगमो ज्ञानं तद्विषया अष्टादशविधाः ऋद्धयः – केवलज्ञानमवधिज्ञानं मनःपर्ययज्ञानं बीजबुद्धिः कोष्ठबुद्धिः पदानुसारित्वं संभिन्नश्रोतृत्वं दूरादास्वादनदर्शनस्पर्शनघ्राणश्रवणसमर्थता दशपूर्वित्वं चतुर्दशपूर्वित्वं अष्टाङ्गमहानिमित्तज्ञता प्रज्ञाश्रवणत्वं प्रत्येकबुद्धता वादित्वं चेति। तत्र केवलाऽवधिमनःपर्यया व्याख्याताः। सुकृष्टसुमथीकृते क्षेत्रे सारवति कालादिसहायापेक्षं बीजमेकमुप्तं यथाऽनेकबीजकोटिप्रदं भवति तथा नोइन्द्रियश्रुतावरणवीर्यान्त-रायक्षयोपशमप्रकर्षे सत्येकबीजपदग्रहणादनेकपदार्थप्रतिपत्तिर्बीजबुद्धिः। कोष्ठागारिक-

स्थापितानामसंकीर्णानामविनष्टानां भूयसां धान्यबीजानां यथा कोष्ठेऽवस्थानं तथा परोपदेशादवधारितानामर्थग्रन्थबीजानां भूयसामव्यतिकीर्णानां बुद्धाववस्थानं कोष्ठबुद्धिः। पदानुसारित्वं त्रेधा - अनुस्रोतः प्रतिस्रोतः उभयथा चेति। एकपदस्यार्थं परत उपश्रुत्यादावन्ते च मध्ये वा शेषग्रन्थार्थावधारणं पदानुसारित्वम्। द्वादशयोजनायामे नवयोजनविस्तारे चक्रधरस्कन्धावारे गजवाजिखरोष्ट्रमनुष्यादीनामक्षरानक्षररूपाणां नानाविध-शब्दानां युगपदुत्पन्नानां तपोविशेषबललाभापादितसर्वजीवप्रदेशश्रोत्रेन्द्रियपरिणामात् सर्वेषामेककालग्रहणं संभिन्नश्रोतृत्वम्। तपःशक्तिविशेषाविर्भावितासाधारणरसनेन्द्रियश्रुतावरणवीर्यान्तरायक्षयोपशमाङ्गोपाङ्गनामलाभापेक्षस्याऽवधृतनवयोजनक्षेत्राद् बहिर्बहुयोजनविप्रकृष्टक्षेत्रादायातस्य रसस्याऽऽस्वादनसामर्थ्यम्। एवं शेषेष्वपीन्द्रियविषये-ष्ववधृतक्षेत्राद् बहिर्बहुयोजनप्रकृष्टदेशादायातेषु ग्रहणसामर्थ्यं योज्यम्। महारोहिण्यादिभिस्त्रिभिरागताभिः प्रत्येकमात्मीयरूपसामर्थ्याविष्करणकथनकुशलाभिर्वेगवतीभिर्विद्यादेवता-भिरविचलितचारित्रस्य दशपूर्वदुस्तरसमुद्रोत्तरणं दशपूर्वित्वम्। संपूर्णश्रुतकेवलिता चतुर्दश-पूर्वित्वम्।

अष्टौ महानिमित्तान्यन्तरिक्षभौमाऽङ्गस्वरव्यञ्जनलक्षणछिन्नस्वप्ननामानि। तत्र रविशशिग्रहनक्षत्रभगणोदयास्तमयादिभिरतीतानागगतफलप्रविभागप्रदर्शनमन्तरिक्षम्। भुवो घनशुषिरस्निग्धरुक्षादिविभावनेन पूर्वादिदिक्सूत्रनिवासेन वा वृद्धिहानिजयपराजयादिविज्ञानं भूमेरन्तर्निहितसुवर्णरजतादिसंसूचनं च भौमम्। अङ्गप्रत्यङ्गदर्शनस्पर्शनादिभिस्त्रिकालभाविसुखदुःखादिविभावनमङ्गम्। अक्षरानक्षरशुभाशुभशब्दश्रवणेनेष्टा-निष्टफलाविर्भावनं महानिमित्तं स्वरम्। शिरोमुखग्रीवादिषु तिलकमशकलक्ष्म-व्रणादिवीक्षणेन त्रिकालहिताहितवेदनं व्यञ्जनम्। श्रीवृक्षस्वस्तिकभृङ्गारकलशादिलक्षणवीक्षणात् त्रैकालिकस्थानमानैश्वर्यादिविशेषज्ञानं लक्षणम्। वस्त्रशस्त्रछत्रोपानदासनशयनादिषु देवमानुषराक्षसादिविभागैः

शस्त्रकण्टकमूषिकादिकृतछेदनदर्शनात् कालत्रयविषयलाभालाभसुखदुःखादिसूचनं छिन्नम्। वातपित्तश्लेष्मदोषोदयरहितस्य पश्चिमरात्रिभागे चन्द्रसूर्यधराद्रिसमुद्रमुखप्रवेशनसकलमहीमण्डलोपगूहनादिशुभघृततैलाक्तात्मीयदेहखरकरभा रूढापाग्दिग्गमनाद्यशुभस्वप्नदर्शनाऽगामिजीवितमरणसुखदुःखाद्याविर्भावकः स्वप्नः। एतेषु महानिमित्तेषु कौशलमष्टाङ्गमहानिमित्तज्ञता। अतिसूक्ष्मार्थतत्त्वविचारगहने चतुर्दशपूर्विण एव विषयेऽनुयुक्तेऽनधीतद्वादशाङ्गचतुर्दशपूर्वस्य प्रकृष्टश्रुतावरणवीर्यान्तरायक्षयो-पशमाविर्भूताऽसाधारणप्रज्ञाशक्तिलाभान्निःसंशयं निरूपणं प्रज्ञाश्रमणत्वम्। परोपदेशमन्तरेण स्वशक्तिविशेषादेव ज्ञानसंयमविधाननिपुणत्वं प्रत्येकबुद्धता। शक्रादिष्वपि प्रतिबन्धिषु सत्स्वप्रतिहततया निरुत्तराभिधानं पररन्ध्रापेक्षणं च वादित्वम्।

क्रियाविषया ऋद्धिर्द्विविधा - चारणत्वमाकाशगामित्वं चेति। तत्र चारणा अनेक-विधाः जलजङ्घातन्तुपुष्पपत्रश्रेण्यग्निशिखाद्यालम्बनगमनाः। जलमुपादाय वाप्यादिष्वप्कायान् जीवानविराधयन्तः भूमाविव पादोद्धारनिक्षेपकुशला जलचारणाः। भुव उपर्याकाशे चतुरङ्गुलप्रमाणे जङ्घोत्क्षेपनिक्षेपशीघ्रकरणपटवो बहुयोजनशताशुगमनप्रवणा जङ्घाचारणाः। एवमितरे च वेदितव्याः। पर्यङ्कावस्थानिषण्णा वा कायोत्सर्गशरीरा वा पादोद्धारनिक्षेपणविधिमन्तरेणाऽऽकाशगमनकुशला आकाशगामिनः।

विक्रियागोचरा ऋद्धिरनेकविधा - अणिमा महिमा लघिमा गरिमा प्राप्तिः प्राकाम्यमीशित्वं वशित्वमप्रतिघातोऽन्तर्धानं कामरूपित्वमित्येवमादिः। तत्राणुशरीर-विकरणमणिमा, विसच्छिद्रमपि प्रविश्याऽऽसित्वा तत्र च चक्रवर्तिपरिवारविभूतिं सृजेत्। मेरोरपि महत्तरशरीरविकरणं महिमा। वायोरपि लघुतरशरीरता लघिमा। वज्रादपि गुरुतरदेहता गरिमा। भूमौ स्थित्वाऽङ्गुल्यग्रेण मेरुशिखरदिवाकरादिस्पर्शनसामर्थ्यं प्राप्तिः। अप्सु भूमाविव गमनं भूमौ जल इवोन्मज्जननिमज्जनकरणं प्राकाम्यम्।

त्रैलोक्यस्य प्रभुता ईशित्वम् । सर्वजीववशीकरणलब्धिर्वशित्वम् । अद्रिमध्ये वियतीव गमनागमनमप्रतीघातः। अदृश्यरूपशक्तिताऽन्तर्धानम् । युगपदनेकाकारूपविकरणशक्तिः कामरूपित्वमिति।

तपोऽतिशयर्द्धिः सप्तविधा - उग्रदीप्ततप्तमहाघोरतपोवीरपराक्रमघोरब्रह्मचर्यभेदात् । चतुर्थषष्ठाष्टमदशमद्वादशपक्षमासाद्यनशनयोगेष्वन्यतमयोगमारभ्य आमरणादनिवर्तका उग्रतपसः। महोपवासकरणेऽपि प्रवर्धमानकायवाङ्मानसबलाः विगन्धरहितवदनाः पद्मोत्पलादिसुरभिनिश्वासा अप्रच्युतमहादीप्तिशरीरा दीप्ततपसः। तप्तायसकटाहपतितजल-कणवदाशुशुष्काल्पाहारतया मलरुधिरादिभावपरिणामविरहिताभ्यवहाराः तप्ततपसः। सिंहनिष्क्रीडितादिमहोपवासानुष्ठानपरायणयतयो महातपसः। वातपित्तश्लेष्मसन्निपात-समुद्भूतज्वरकासश्वासाक्षिशूलकुष्ठप्रमेहादिविविधरोगसन्तापितदेहा अप्यप्रच्युताऽनशन-कायक्लेशादितपसो भीमश्मशानाद्रिमस्तकगुहादरीकन्दराशून्यग्रामादिषु प्रदुष्टयक्षराक्षस-पिशाचप्रवृत्तवेतालरूपविकारेषु परुषशिवारुतानुपरतसिंहव्याघ्रादिव्यालमृगभीषणस्वनपोरचौरादिप्रचरितेष्वभिरुचितावासाश्च घोरतपसः। त एव गृहीततपोयोगवर्धनपरा घोरपराक्रमाः। चिरोषिताऽस्खलितब्रह्मचर्यवासाः प्रकृष्टचारित्रमोहनीयक्षयोपशमात् प्रणष्टदुःस्वप्ना घोरब्रह्मचारिणः।

बलालम्बना ऋद्धिस्त्रिविधा - मनोवाक्कायभेदात् । तत्र मनःश्रुतावरणवीर्यान्तराय क्षयोपशमप्रकर्षे सत्यन्तर्मुहूर्ते सकलश्रुतार्थचिन्तनेऽवदाता मनोबलिनः। मनोजिह्वाश्रुतावरणवीर्यान्तरायक्षयोपशमातिशये सत्यन्तर्मुहूर्ते सकलश्रुतोच्चारणसमर्थाः सतत-मुच्चैरुच्चारणे सत्यपि श्रमविरहिता अहीनकण्ठाश्च वाग्बलिनः। वीर्यान्तरायक्षयो-

पशमाविर्भूताऽसाधारणकायबलत्वात् मासिकचातुर्मासिकसांवत्सरिकादिप्रतिमायोग-धारणेऽपि श्रमक्लमविरहिताः कायबलिनः।

औषधर्द्धिरष्टविधा - असाध्यानामप्यामयानां सर्वेषां विनिवृत्तिहेतुरामर्शक्ष्वेलजल्लमलविट्सर्वौषधिप्राप्तास्याविषदृष्टिविषविकल्पात्। आमर्शः संस्पर्शः, यदीयहस्तपादाद्यामर्श औषधिप्राप्तो यैस्ते आमर्शौषधिप्राप्ताः। क्ष्वेलो निष्ठीवनमौषधिर्येषां ते क्ष्वेलौषधिप्राप्ताः। स्वेदालम्बनो रजोनिचयो जल्लः, स औषधिप्राप्तो येषां ते जल्लौषधिप्राप्ताः। कर्णदन्तनासाक्षिसमुद्भवं मलमौषधिप्राप्तं येषां ते मलौषधिप्राप्ताः। विड्डुच्चार औषधिर्येषां ते विडौषधिप्राप्ताः। अङ्गप्रत्यङ्गनखदन्तकेशादिरवयवः तत्संस्पर्शी वाय्वादिस्सर्व औषधिप्राप्तो येषां ते सर्वौषधिप्राप्ताः। उग्रविषसंपृक्तोऽप्याहारो येषामास्यगतो निर्विषीभवति पदीयास्यनिर्गतवचः श्रवणाद्वा महाविषयरीता अपि निर्विषी भवन्ति ते आस्याविषाः। येषामालोकनमात्रादेवातितीव्रविषदूषिता अपि सन्तः विगतविषा भवन्ति ते दृष्टिविषाः।

रसर्द्धिप्राप्तार्याः षड्विधाः - आस्यविषा दृष्टिविषाः क्षीरास्रविणः मध्वास्रविणः सर्पिरास्रविणः अमृतास्रविणश्चेति। प्रकृष्टतपोबला यतयो यं ब्रुवते म्रियस्वेति स तत्क्षण एव महाविषपरीतो म्रियते, ते आस्यविषाः। उत्कृष्टतपसो यतयः क्रुद्धा यमीक्षन्ते स सदैवोग्रविषपरीतो म्रियते ते दृष्टिविषाः। विरसमप्यशनं येषां पाणिपुटनिक्षिप्तं क्षीररसगुणपरिणामि जायते, येषां वा वचनानि क्षीरवत्क्षीणानां सन्तर्पकाणि भवन्ति ते क्षीरास्रविणः। येषां पाणिपुटपतित आहारो नीरसोऽपि मधुरसवीर्यपरिणामो भवति, येषां वचांसि श्रोतृणां दुखार्दितानामपि मधुगुणं पुष्णन्ति ते मध्वास्रविणः। येषां पाणिपात्रगतमन्नं रूक्षमपि सर्पी रसवीर्यविपाकानाप्नोति, सर्पिरिव वा येषां भाषितानि प्राणिनां संतर्पकाणि भवन्ति ते सर्पिरास्रविणः। येषां पाणिपुटप्राप्तं भोजनं

यत्किञ्चिदमृततामास्कन्दति, येषां वा व्याहृतानि प्राणिनाममृतवदनुग्राहकाणि भवन्ति तेऽमृतास्रविणः।

क्षेत्रर्द्धिप्राप्तार्या द्वेधा - अक्षीणमहानसा अक्षीणमहालयाश्चेति। लाभान्तराय-क्षयोपशमप्रकर्षप्राप्तेभ्यो यतिभ्यो यतो भिक्षा दीयते ततो भाजनाच्चक्रधरस्कन्धावारोऽपि यदि भुञ्जीत तद्दिवसे नान्नं क्षीयते तेऽक्षीणमहानसाः। अक्षीणमहालयलब्धिप्राप्ता यतयो यत्र वसन्ति देवमनुष्यतैर्यग्योना यदि सर्वेऽपि तत्र निवसेयुः परस्परमबाधमानाः सुखमासते। त एते सर्वे ऋद्धिप्राप्तार्याः।

**म्लेच्छा द्विविधा अन्तरद्वीपजाः कर्मभूमिजाश्चेति॥४॥** म्लेच्छा द्विविधा वेदितव्याः अन्तरद्वीपजाः कर्मभूमिजाश्चेति। तत्रान्तरद्वीपाः लवणोदधेरष्टासु दिक्ष्वष्टौ, तदन्तरेषु चाष्टौ। हिमवच्छिखरिणोरुभयोश्च विजयार्धयोरन्तेष्वष्टौ। तत्र दिक्षु द्वीपाः वेदिकायास्तिर्यक्पञ्चयोजनशतानि प्रविश्य भवन्ति। विदिक्ष्वन्तरेषु च द्वीपाः पञ्चाशेषु पञ्चयोजनशतेषु गतेषु भवन्ति। शैलान्तेषु द्वीपाः षट्सु योजनशतेषु गतेषु भवन्ति। दिक्षु द्वीपाः शतयोजनविस्तीर्णाः, विदिक्ष्वन्तरेषु च द्वीपाः तदर्धविष्कम्भाः। शैलान्तेषु पञ्चविंशतियोजनविस्ताराः। तत्र पूर्वस्यां दिशि एकोरुकाः। अपरस्यां लाङ्गूलिनः। उत्तरस्यामभाषकाः। दक्षिणस्यां विषाणिनः। शशकर्णशष्कुलीकर्णकर्मप्रावरणलम्बकर्णाः विदिक्षु। अश्वसिंहश्वमहिषवराहव्याघ्रोलूककपिमुखा अन्तरेषु। मेघविद्युन्मुखाः शिखरिण उभयोरन्तयोः। मत्स्यमुखाः कालमुखा हिमवत उभयोरन्तयोः। हस्तिमुखादर्शमुखा उत्तरविजयार्धस्योभयोरन्तयोः। गोमुखमेषमुखा दक्षिणविजयार्धस्योभयोरन्तयोः। एकोरूका मृदाहारा गुहावासिनः शेषाः पुष्पफलाहाराः वृक्षवासिनः सर्वे ते पल्योपमायुषः ते चतुर्विंशतिरपि द्वीपा जलतलादेकयोजनोत्सेधाः। तथा कालोदेऽपि वेदितव्याः। त एते अन्तरद्वीपजा म्लेच्छाः। कर्मभूमिजाश्च शकयवनशबरपुलिन्दादयः।

काः पुनः कर्मभूमय इति? अत आह –

## भरतैरावतविदेहाः कर्मभूमयोऽन्यत्र देवकुरूत्तरकुरुभ्यः॥३७॥

अथवा, मोक्षमार्गस्त्रितयः प्रकृतः। स किं सर्वेषु क्षेत्रेषु भवति? न इत्याह कर्मभूमिष्वेव। कुत एतत्? भोगभूमिषु हि यद्यपि मनुष्याणां ज्ञानदर्शने स्तः चारित्रं तु नास्ति अविरतभोगपरिणामित्वात्। यद्येवं कास्ताः कर्मभूमयः इति? अतस्तत्प्रति-पादनार्थमिदमुच्यते।

**कर्मभूमय इति विशेषणानुपपत्तिः सर्वत्र कर्मणो व्यापारात्॥१॥** अष्टविधस्य कर्मणो बन्धस्तत्फलानुभवनं च सर्वेष्वेव मनुष्यक्षेत्रेषु साधारणः। अतः कर्मभूमय इति विशेषणं नोपपद्यते?

**न वा; प्रकृष्टशुभाशुभकर्मोपार्जननिर्जराधिष्ठानोपपत्तेः॥२॥** न वा एष दोषः। किं कारणम्? यतः प्रकृष्टं शुभकर्म सर्वार्थसिद्धिसौख्यप्रापकं तीर्थकरत्वमहर्द्धिनिर्वर्तकं वाऽसाधारणम्। अशुभकर्म च प्रकृष्टं कलङ्कलसकलपृथिवीमहादुःखप्रापकम-प्रतिष्ठाननरकगमनं च कर्मभूमिष्वेवोपार्ज्यते द्रव्यभवक्षेत्रकालभावापेक्षत्वात् कर्मबन्धस्य। सकलसंसारकारणनिर्जराकर्म चात्रैव प्रवर्तते। ततो भरतादिष्वेव कर्मभूमय इति युक्तो व्यपदेशः।

**षट्कर्मदर्शनाच्च॥३॥** षण्णां कर्मणां कृषिमषीविद्यावणिक्शिल्पानामत्रैव दर्शनाच्च कर्मभूमिव्यपदेशो युक्तिमान्।

**अन्यत्रशब्दः परिवर्जनार्थः॥४॥** यथा 'न क्वचित्सर्वदा सर्वविस्रम्भगमनं नयोऽ-न्यत्र धर्मात्' तस्य अन्यो मार्ग एव न विद्यते इति धर्मं वर्जयित्वा अर्थकामयोरविस्रम्भगमनं नयः, धर्मे तु विस्रम्भ एव कार्य इति, एवमिहापि 'विदेहाः

कर्मभूमयः' इत्युक्ते विदेहाभ्यन्तरत्वाद्देवकुरूत्तरकुरूणामपि कर्मभूमित्वप्रसङ्गेऽन्यत्र-वचनाद् देवकुरूत्तरकुरुभ्योऽन्ये विदेहाः कर्मभूमयः, देवकुरूत्तरकुरवो हैमवतादयश्च भोगभूमय इति वेदितव्याः।

सर्वास्वेव भूमिषु मनुष्याणां स्थितिपरिच्छेदार्थमाह –

## नृस्थिती परावरे त्रिपल्योपमान्तर्मुहूर्ते॥३८॥

**यथासंख्यमभिसंबन्धः॥१॥** त्रिपल्योपमान्तर्मुहूर्तयोर्यथासंख्यमभिसंबन्धो वेदितव्यः - परा नृस्थितिः त्रिपल्योपमा, अपराऽन्तर्मुहूर्तेति। त्रीणि पल्यान्युपमा यस्याः स्थितेः सा त्रिपल्योपमा। अन्तर्गतो मुहूर्तो यस्याः सा अन्तर्मुहूर्ता। अत्राह- किमिदं पल्यं नाम इति? उच्यते - तत्परिच्छेदः प्रमाणविधिनिर्णयपुरस्सर इति प्रमाणविधिरेव तावदुच्यते।

**प्रमाणं द्विविधं लौकिकलोकोत्तरभेदात्॥२॥** लौकिकं लोकोत्तरमिति प्रमाणं द्वेधा विभज्यते।

**लौकिकं षोढा मानोन्मानावमानगणनाप्रतिमानतत्प्रमाणभेदात्॥३॥** लौकिकं मानं षोढा विभज्यते – मानमुन्मानमवमानं गणना प्रतिमानं तत्प्रमाणं चेति। तत्र मानं द्वेधा–रसमानं बीजमानं चेति। घृतादिद्रव्यपरिच्छेदकं षोडशिकादि रसमानम्। कुडवादि बीजमानम्। कुष्ठतगरादिभाण्डं येनोत्क्षिप्य मीयते तदुन्मानम्। निवर्तनादिविभागेन क्षेत्रं येनावगाह्य मीयते तदवमानं दण्डादि। एकद्वित्रिचतुरादिगणितमानं गणनामानम्। पूर्वमानापेक्षं मानं प्रतिमानं प्रतिमल्लवत्। चत्वारि महाधिक्तृणफलानि श्वेतसर्षप एकः, षोडशसर्षपफलानि धान्यमाषफलमेकम्, द्वे धान्यमाषफले गुञ्जाफलमेकम्, द्वे गुञ्जाफले रूप्यमाष एकः, षोडशरूप्यमाषकाः धरणमेकम्, अर्धतृतीयधरणानि सुवर्णानि सुवर्णः, स च कंसः, चत्वारः कंसाः पलम्, पलशतं तुला, अर्धकंसः त्रीणि च पलानि

कुडवः, चतुःकुडवः प्रस्थः, चतुः प्रस्थमाढकम्, चतुराढकं द्रोणः, षोडश द्रोणा खारी, विंशखार्यो वाह इत्यादि मागधकप्रमाणम्। मणिजात्यश्वादेर्द्रव्यस्य दीप्त्युच्छ्रायगुणविशेषादिमूल्य-परिमाणकारणे प्रमाणमस्येति तत्प्रमाणम्। तद्यथा – मणिरत्नस्य दीप्तिर्यावत्क्षेत्रमुपरि व्याप्नोति तावत्प्रमाणं सुवर्णकूटं मूल्यमिति। अश्वस्य च यावानुच्छ्रायस्तावत्प्रमाणं सुवर्णकूटं मूल्यम्। यावता रत्नस्वामिनः परितोषः तावद्रत्नमूल्यम् एवमन्येषामपि द्रव्याणाम्।

**लोकोत्तरं चतुर्धा द्रव्यक्षेत्रकालभावभेदात् ॥४॥** लोकोत्तरं प्रमाणं चतुर्धा भिद्यते। कुतः? द्रव्यक्षेत्रकालभावभेदात्। तत्र द्रव्यप्रमाणं जघन्यमध्यमोत्कृष्टमेकपरमाणु द्वित्रिचतुरादिप्रदेशात्मकम्। आमहास्कन्धात्। क्षेत्रप्रमाणं जघन्यमध्यमोत्कृष्टमेकाकाश द्वित्रिचतुरादिप्रदेशनिष्पन्नमासर्वलोकात्। कालप्रमाणं जघन्यमध्यमोत्कृष्टमेकद्वित्रिचतुरा-दिसमयनिष्पन्नमा अनन्तकालात्। भावप्रमाणमुपयोगः साकाराऽनाकारभेदो जघन्यः सूक्ष्मनिगोतस्य, मध्यमोऽन्यजीवानाम्, उत्कृष्टः केवलिनः।

**तत्र द्रव्यप्रमाणं द्वेधा संख्योपमाभेदात् ॥५॥** संख्याप्रमाणमुपमाप्रमाणं चेति द्वेधा द्रव्यप्रमाणं विभज्यते।

**तत्र संख्याप्रमाणं त्रिधा संख्येयासंख्येयानन्तभेदात् ॥६॥** तत्र संख्येयप्रमाणं त्रेधा, इतरे द्वे नवधा नवधा ज्ञेये। जघन्यमजघन्योत्कृष्टमुत्कृष्टं चेति संख्येयं त्रिविधम्। संख्येयप्रमाणावगमार्थं जम्बूद्वीपतुल्यायामविष्कम्भा योजनसहस्रा-वगाहः बुद्ध्या कुशूलाश्चत्वारः कर्तव्याः – शलाकाप्रतिशलाकामहाशलाकाख्यास्त्रयोऽवस्थिताः चतुर्थोऽन-वस्थितः। अत्र द्वौ सर्षपौ निक्षिप्तौ जघन्यमेतत्संख्येयप्रमाणम्, तमनवस्थितं सर्षपैः पूर्णं गृहीत्वा कश्चिद् देवः एकैकं सर्षपमेकैकस्मिन् द्वीपे समुद्रे च प्रतिक्षपेत् तेन विधिना स रिक्तः। रिक्तः इति शलाकाकुशले एकं सर्षपं प्रक्षिपेत्। यत्र अन्त्यसर्षपो

निक्षिप्तस्तमवधिं कृत्वा अन्वस्थितं कुशूलं परिकल्प्य सर्षपैः पूर्णं कृत्वा ततः परेषु द्वीपसमुद्रेष्वेकैकसर्षपप्रदानेन स रिक्तः कर्तव्यः। रिक्त इति शलाकाकुशूले पुनरेकं प्रक्षिपेत्। अनेन विधिना अनवस्थितकुशूलपरिवर्धनेन शलाकाकुशूले परिपूर्णे पूर्ण इति प्रतिशलाकाकुशूले एकः सर्षपो निक्षेप्तव्यः। एवं तावत्कर्तव्यो यावत्प्रतिशलाकाकुशूलः परिपूर्णो भवति। परिपूर्णे इति महाशलाकाशूले एकः सर्षपः प्रक्षेप्तव्यः। सोऽपि तथैव परिपूर्णः। एवमेतेषु चतुर्ष्वपि पूर्णेषु उत्कृष्टसंख्येयमतीत्य जघन्यपरीतासंख्येयं गत्वैकं रूपं पतितम्, ततः एकस्मिन् रूपेऽपनीते उत्कृष्टसंख्येयं भवति। मध्यममजन्यो-त्कृष्टसंख्येयम्। यत्र संख्येयेन प्रयोजनं तत्राजघन्योत्कृष्टसंख्येयं ग्राह्यम्।

यदसंख्येयं तत्त्रिविधं परीतासंख्येयं युक्तासंख्येयमसंख्येयासंख्येयं चेति। तत्र परीतासंख्येयं त्रिविधं जघन्योत्कृष्टमध्यमभेदात्। एवमितरे चाऽसंख्येये भिद्येते।

तथाऽनन्तमपि त्रिविधं परीतानन्तं युक्तानन्तमनन्तानन्तं चेति। तदपि प्रत्येकं पूर्ववत्त्रिधा भेद्यम्। यज्जघन्यपरीतासंख्येयं तद्विरलीकृत्य मुक्तावलीकृता अत्रैकैकस्यां मुक्तायां जघन्यपरीतासंख्येयं देयम्। एवमेतद्वर्गितम्। प्राथमिकीं मुक्तावलीमनीय यान्येकैकस्यां मुक्तायां जघन्यपरीतासंख्येयानि दत्तानि तानि संपिण्ड्य मुक्तावली कार्या। ततो यो जघन्यपरीतासंख्येयसंपिण्डनान्निष्पन्नो राशिः स देयः एकैकस्यां मुक्तायाम्। एवमेतत्संवर्गितमुत्कृष्टपरीतासंख्येयमतीत्य जघन्ययुक्तासंख्येयं गत्वा पतितम्। अत एकरूपेऽपनीते उत्कृष्टपरीतासंख्येयं भवति। मध्यमजघन्योत्कृष्टपरीतासंख्येम्। यत्रावलिकया कार्यं तत्र जघन्ययुक्तासंख्येयं भवति। मध्यमजघन्योत्कृष्टपरीतासंख्येयम्। यत्रावलिकाया कार्यं तत्र जघन्यमुक्तासंख्येयं ग्राह्यम्। यज्जघन्यमुक्तासंख्येयं तद्विरलीकृत्य मुक्तावली रचिता। तत्रैकैकमुक्तायां जघन्ययुक्तासंख्येयानि देयानि। एवमेतत् सकृद्वर्गितमुत्कृष्टयुक्तासंख्येयमतीत्य जघन्याऽसंख्येयाऽसंख्येयं गत्वा पतितम्, तत एकरूपेऽपनीते उत्कृष्टं युक्तासंख्येयं

भवति मध्यममजघन्योत्कृष्टयुक्तासंख्येयं भवति। यज्जघन्याऽसंख्येयासंख्येयं तद्विरलीकृत्य पूर्वविधिना त्रीन्वारान् वर्गितसंवर्ग्मिमुत्कृष्टासंख्येयासंख्येयं प्राप्नोति। ततो धर्माधर्मैकजीवलोकाकाशप्रत्येकशरीर-जीवबादरनिगोतशरीराणि षडप्येतान्यसंख्येयानि स्थितिबन्धाध्यवसायस्थानान्यनुभाग-बन्धाध्यवसायस्थानानि योगाविभागपरिच्छेदरूपाणि चासंख्येयलोकप्रदेशपरिमाणा-न्युत्सर्पिण्यवसर्पिणीसमयांश्च प्रक्षिप्य पूर्वोक्तराशौ त्रीन्वारान् वर्गितसंवर्गितं कृत्वा उत्कृष्टाऽसंख्येयाऽसंख्येयमतीत्य जघन्यपरीतानन्तं गत्वा पतितम्। तत एकरूपेऽपनीते उत्कृष्टाऽसंख्येयाऽसंख्येयं भवति। मध्यममजघन्योत्कृष्टाऽसंख्येयाऽसंख्येयं भवति। यत्रासंख्येयाऽसंख्येयेन प्रयोजनं तत्राऽजघन्योत्कृष्टाऽसंख्येयाऽसंख्येयं ग्राह्यम्। यज्जघन्यपरीतानन्तं तत्पूर्ववद्वर्गितसंवर्गितमुत्कृष्टपरीतानन्तमतीत्य जघन्ययुक्तानन्तं गत्वा पतितम्। तत एकरूपेऽपनीते उत्कृष्टपरीतानन्तं तद्भवति। मध्यममजघन्यो-त्कृष्टपरीतानन्तम्। अभव्यराशिप्रमाणमार्गणे जघन्यमुक्तानन्तं ग्राह्यम्। यज्जघन्ययुक्तानन्तं तद्विरलीकृत्यात्रैकैकरूपे जघन्ययुक्तानन्तं दत्त्वा सकृद्वर्गितमुत्कृष्टयुक्तानन्तमतीत्य जघन्यमनन्तानन्तं गत्वा पतितम्। तत एकरूपेऽपनीते उत्कृष्टयुक्तानन्तं भवति। मध्यममजघन्योत्कृष्टयुक्तानन्तम्। यज्जघन्याऽनन्ताऽनन्तं तद्विरलीकृत्यपूर्व-वत्त्रीन्वारान् वर्गितसंवर्गितमुत्कृष्टाऽन्ताऽनन्तं न प्राप्नोति। ततः सिद्धनिगोतजीव-वनस्पतिकायातीताऽनागतकालसमयसर्वपुद्गलसर्वाऽऽकाशप्रदेशधर्माधर्मास्तिकायाऽगुरुलघु-गुणाननन्तान् प्रक्षिप्य प्रक्षिप्य त्रीन् वारान् वर्गितसंवर्गिते कृते उत्कृष्टाऽनन्ताऽनन्तं न प्राप्नोति, ततोऽनन्ते केवलज्ञाने दर्शने च प्रक्षिप्ते उत्कृष्टाऽनन्ताऽनन्तं भवति। तत एकरूपेऽपनीतेऽजघन्योत्कृष्टाऽनन्ताऽनन्तं भवति। यत्राऽनन्ताऽनन्तमार्गणा तत्राजघन्यो-त्कृष्टाऽनन्ताऽनन्तं ग्राह्यम्।

**उपमाप्रमाणमष्टविधं पल्यसागरसूचीप्रतरघनाङ्गुलजगच्छ्रेणीलोकप्रतरलोक-भेदात् ॥६॥** अन्तादिमध्यहीनोऽविभागोऽतीन्द्रियः एकरसवर्णगन्धः द्विस्पर्शः परमाणुः।

अनन्तानन्तपरमाणुसंघातपरिमाणादाविर्भूता उत्संज्ञासंज्ञैका। अष्टावुत्संज्ञासंज्ञासंहताः संज्ञासंज्ञैका। अष्टौ संज्ञासंज्ञा एकस्त्रुटिरेणुः। अष्टौ त्रुटिरेणवः संहताः एकस्त्रसरेणुः। अष्टौ त्रसरेणवः संहताः एको रथरेणुः। अष्टौ रथरेणवः संहताः एका देवकुरूत्तरकुरु-मनुजकेशाग्रकोटी भवति। ता अष्टौ समुदिता एका रम्यकहरिवर्षमनुजकेशाग्रकोटी भवति। अष्टौ ताः संहताः हैरण्यवतहैमवतमनुजकेशाग्रकोटी भवति। ता अष्टौ सम्पिण्डिताः भरतैरावतविदेहमनुजकेशाग्रकोटी भवति। ता अष्टौ संहता एक लिक्षा भवति। अष्टौ लिक्षा संहता यूका भवति। अष्टौ यूका एकं यवमध्यम्। अष्टौ यवमध्यानि एकमङ्गुलमुत्सेधाख्यम्। एतेन नारकतैर्यग्योनानां देवमनुष्याणामकृत्रिमजिनालय-प्रतिमानां च देहोत्सेधो मातव्यः। तदेव पञ्चशतगुणितं प्रमाणाङ्गुलं भवति। एतदेव चावसर्पिण्यां प्रथमचक्रधरस्याऽऽत्माङ्गुलं भवति। तदानीं तेन ग्रामनगरादिप्रमाण-परिच्छेदो ज्ञेयः। इतरेषु युगेषु मनुष्याणां यद्यदात्माङ्गुलं तेन तेन तदा ग्रामनगरादिप्रमाणपरिच्छेदो ज्ञेयः। यत्तत्प्रमाणाङ्गुलं तेन द्वीपसमुद्रजगतीवेदिकापर्वत-विमाननरकप्रस्ताराद्यकृत्रिमद्रव्यायामविष्कम्भादिपरिच्छेदोऽवसेयः। तत्र षडङ्गुलः पादः। द्वादशाङ्गुलो वितस्तिः। द्विवितस्तिः हस्तः। द्विहस्तः किष्कुः। द्विकिष्कुर्दण्डः। द्वे दण्डसहस्रे गव्यूतम्। चतुर्गव्यूतं योजनम्।

**पल्यं त्रिविधं व्यवहारोद्धाराद्धाविकल्पादन्वर्थात् ॥७॥** व्यवहारपल्यमुद्धारपल्यम-द्धापल्यमिति त्रिधा पल्यं विभज्यते। अन्वर्थश्चायं विकल्पः। आद्यं व्यवहारपल्यमुत्तर-पल्यव्यवहारबीजत्वान्नानेन किञ्चित्परिच्छद्येमस्ति। द्वितीयमुद्धारपल्यं तत उद्धृतैर्लो-मच्छेदैर्द्वीपसमुद्रसंख्यानिर्णय इति। तृतीयमद्धापल्यमद्धाकाल इत्यर्थः। अतो हि स्थितेः परिच्छेदः इति। तद्यथा – प्रमाणाङ्गुलपरिमितयोजनायामविष्कम्भावगाहानि त्रीणि पल्यानि कुशूला इत्यर्थः। एकादिसप्तान्ताहोरात्रिजाताविकलोमाग्राणि तावच्छिन्नानि यावद् द्वितीयं कर्तरीच्छेदं नावाप्नुवन्ति। तादृशैर्लोमच्छेदैः परिपूर्णं घनीकृतं

व्यवहारपल्यमित्युच्यते। ततो वर्षशते वर्षशतेऽतीते एकैकलोमापकर्षणविधिना यावता कालेन तद्रिक्तं भवेत् तावत्कालो व्यवहारपल्योपमाख्यः। तैरेव रोमच्छेदैः प्रत्येकमसंख्येयवर्षकोटिसमयमात्रच्छिन्नैः पूर्णमुद्धारपल्यम्। ततः समये समये एकैकस्मिन् रोमच्छेदेऽपकृष्यमाणे यावता कालेन तद्रिक्तं भवेत् तावत्कालः उद्धारपल्योपमाख्यः। एषामुद्धारपल्यानां दशकोटीकोट्यः एकमुद्धारसागरोपमम्। अर्धतृतीयोद्धारसागरोपमाणां यावन्तो रोमच्छेदास्तावन्तो द्वीपसमुद्राः। पुनरुद्धारपल्य-रोमच्छेदैर्वर्षशतसमयमात्रच्छिन्नैः पूर्णमद्धापल्यम्। ततः समये समये एकैकस्मिन् रोमच्छेदेऽपकृष्यमाणे यावता कालेन तद्रिक्तं भवति तावत्कालः अद्धापल्योपमाख्यः। एषामद्धापल्यानां दशकोटीकोट्य एकमद्धासागरोपमम्। दशाद्धासागरोपमकोटीकोट्य एकाऽवसर्पिणी, तावत्येवोत्सर्पिणी। अनेनाऽद्धापल्येन नारकतैर्यग्योनानां देवमनुष्याणां च कर्मस्थितिर्भवस्थितिरायुःस्थितिः कायस्थितिश्च परिच्छेत्तव्या। अद्धापल्यस्याऽर्द्धच्छेदेन शलाकाविरलीकृत्य प्रत्येकमद्धापल्यप्रदानं कृत्वाऽन्योऽन्यगुणिते कृते यावन्तश्छेदास्तावद्भिराकाशप्रदेशैर्मुक्तावली कृता सूच्यङ्गुलेनाऽभ्यस्तं घनाङ्गुलम्। असंख्येयानां वर्षाणां यावन्तः समयास्तावत्खण्डमद्धापल्यं कृतम्। ततोऽसंख्येयान् खण्डानपनीयाऽसंख्येयमेकं भागं बुद्ध्या विरलीकृत्य एकैकस्मिन् घनाङ्गुलं दत्त्वा परस्परेण गुणिता जाता जगच्छ्रेणी। साऽपरया जगच्छ्रेण्याऽभ्यस्ता प्रतरलोकः। स एवाऽपरया जगच्छ्रेण्या संवर्गितो घनलोकः।

क्षेत्रप्रमाणं द्विविधम् – अवगाहक्षेत्रं विभागनिष्पन्नक्षेत्रं चेति। तत्रावगाहक्षेत्र-मनेकविधम् – एकद्वित्रिचतुःसंख्येयाऽसंख्येयाऽनन्तप्रदेशपुद्गलद्रव्यावगाह्येकाद्यसंख्येया-काशप्रदेशभेदात्। विभागनिष्पन्नक्षेत्रं चाऽनेकविधम् – असंख्येयाकाशश्रेणयः, क्षेत्रप्रमा-णाङ्गुलस्यैकोऽसंख्येयभागः, असंख्येयाः क्षेत्रप्रमाणाङ्गुलाऽसंख्येयभागाः क्षेत्रप्रमाणा-

ङ्गुलस्यैकोऽसंख्येयभागः, असंख्येयाः क्षेत्रप्रमाणाङ्गुलाऽसंख्येयभागाः क्षेत्रप्रमाणाङ्गुलमेकं भवति। पादवितस्त्यादि पूर्ववद्वेदितव्यम्।

कालप्रमाणमुच्यते – सर्वजघन्यगतिपरिणतस्य परमाणोः स्वावगाढप्रदेशव्यतिक्रमकालः परमनिषिद्धो निर्विभागः समयः। असंख्येयाः समया आवलिकाः। असंख्येयावलिका एक उच्छ्वासस्तावानेव निश्वासः। तावुभावनुपहतस्य पुंसः प्राण एकः। सप्तप्राणाः स्तोकः। सप्त स्तोकाः लवः। सप्तसप्ततिर्लवाः मुहूर्तः। त्रिंशन्मुहूर्ता अहोरात्रः। पञ्चदशाऽहोरात्राः पक्षः। द्वौ पक्षौ मासः। द्वौ मासौ ऋतुः। ऋतवस्त्रयोऽयनम्। द्वेऽयने संवत्सरः। चतुरशीतिवर्षशतसहस्राणि पूर्वाङ्गम्। चतुरशीतिपूर्वाङ्गशतसहस्राणि पूर्वम्। एवमनयैव वृद्ध्या पूर्वाङ्गपूर्वनयुताङ्गनयुतकुमुदाङ्गकुमुदपद्माङ्गपद्मनलिनाङ्ग नलिनकमलाङ्गकमलतुट्याङ्गतुट्याऽट्टाङ्काऽट्टाऽममाङ्गाऽममहूहूअङ्गहूहूलताङ्ग लतामहालताङ्गमहालताप्रभृतिसंज्ञा। कालो वर्षगणनागम्यः संख्येयो वेदितव्यः। ततः परोऽसंख्येयः पल्योपमसागरोपमप्रमितः। ततः परोऽनन्तः कालोऽतीतोऽनागतश्च सर्वज्ञप्रत्यक्षः।

**भावप्रमाणं पञ्चविधं ज्ञानम्॥८॥** पुनस्ताद्व्याख्यातम्।

यथैवेते उत्कृष्टजघन्ये स्थिती नृणां तथैव –

## तिर्यग्योनिजानाञ्च॥३९॥

तिरश्चां योनिस्तिर्यग्योनिः। का पुनरसौ?

**तिर्यङ्नामकर्मोदयापादितं जन्म तिर्यग्योनिः॥१॥** तिर्यग्गतिनाम्नः कर्मणः उदयेनापादितं जन्म तिर्यग्योनिरिति व्यपदिश्यते। तिर्यग्योनौ जातास्तिर्यग्योनिजाः।

तेषां तिर्यग्योनिजानामुत्कृष्टा भवस्थितिः त्रिपल्योपमा, जघन्याऽन्तर्मुहूर्ता। मध्ये विकल्पः, तत्प्रतिपादनार्थमिदमुच्यते –

**तिर्यञ्चः त्रिविधा एकेन्द्रियविकलेन्द्रियपञ्चेन्द्रियभेदात् ॥२॥** एकेन्द्रियाः विकले-न्द्रियाः पञ्चेन्द्रियाश्चेति त्रिविधाः तिर्यञ्चो वेदितव्याः।

**द्वादशद्वाविंशतिदशसप्तत्रिवर्षसहस्राणि एकेन्द्रियाणामुत्कृष्टा स्थितिर्यथासंभवं त्रीणि रात्रिन्दिवानि च॥३॥** एकेन्द्रियाः पञ्चविधाः पृथिवीकायिका अप्कायिकाः तेजस्कायिकाः वायुकायिका वनस्पतिकायिकाश्चेति। तत्र पृथिवीकायिका द्विविधाः शुद्धपृथिवीकायिकाः खरपृथिवीकायिकाश्चेति। तत्र शुद्धपृथिवीकायिकानामुत्कृष्टा स्थितिर्द्वादशवर्षसहस्राणि। खरपृथिवीकायिकानां द्वाविंशतिवर्षसहस्राणि। वनस्पतिकायिकानां दशवर्षसहस्राणि। अप्कायिकानां सप्तवर्षसहस्राणि। वायुकायिकानां त्रीणि वर्षसहस्राणि। तेजस्कायिकानां त्रीणि रात्रिन्दिवानि।

**विकलेन्द्रियाणां द्वादशवर्षा एकानूनपञ्चाशद्रात्रिन्दिवानि षण्मासाश्च॥४॥** द्वीन्द्रियाणामुत्कृष्टा स्थितिर्द्वादशवर्षाः। त्रीन्द्रियाणां एकोनपञ्चाशद्रात्रिन्दिवानि। चतुरि-न्द्रियाणां षण्मासाः।

**पञ्चेन्द्रियाणां पूर्वकोटिनवपूर्वाङ्गानि द्विचत्वारिंशद्द्वासप्ततिवर्षसहस्राणि त्रिपल्यो-पमा च॥५॥** पञ्चेन्द्रियाः तैर्यग्योनाः पञ्चविधाः–जलचराः, परिसर्पाः, उरगाः, पक्षिणः, चतुःपादश्चेति। तत्र जलचराणामुत्कृष्टा स्थितिः मत्स्यादीनां पूर्वकोटी। परिसर्पाणां गोधानकुलादीनां नव पूर्वाङ्गानि। उरगाणां द्विचत्वारिंशद्वर्षसहस्राणि। पक्षिणां द्वासप्ततिवर्षसहस्राणि। चतुष्पदां त्रीणि पल्योपमानि। सर्वेषां तेषां जघन्या स्थिति-रन्तर्मुहूर्ता।

किमर्थो योगविभागः?

**पृथग्योगकरणं यथासंख्यनिवृत्त्यर्थम् ॥4॥** प्रत्येकं यथा स्यातामिति यथासंख्य-निवृत्त्यर्थो योगविभागः क्रियते।

अथैतेषां भवस्थितिः कायस्थितिः का? कः पुनरनयोर्विशेषः? एकभवविषया भवस्थितिः। कायस्थितिरेककायापरित्यागेन नानाभवग्रहणविषया। यद्येवमुच्यतां कस्य का कायस्थितिः? उच्यते–पृथिव्यप्तेजोवायुकायिकानां कायस्थितिरुत्कृष्टा असंख्येया लोकाः। वनस्पतिकायिकस्याऽनन्तः कालोऽसंख्येयाः पुद्गलपरिवर्ता आवलिकाया असंख्येयभागमात्राः। विकलेन्द्रियाणामसंख्येयानि वर्षसहस्राणि। पञ्चेन्द्रियाणां तिर्यङ्म-नुष्याणां तिस्रः पल्योपमाः पूर्वकोटीपृथक्त्वेनाऽभ्यधिकाः। तेषां सर्वेषां जघन्या कायस्थितिरन्तर्मुहूर्ता। देवनारकणां भवस्थितिरेव कायस्थितिरिति।

इति तत्त्वार्थवार्तिके व्याख्यानालङ्कारे तृतीयोऽध्यायः समाप्तः।

## चतुर्थोऽध्यायः

असकृद् देवशब्द उक्तः "भवप्रत्ययोऽवधिर्देवनारकाणाम्" इत्येवमादिषु, तत्र न ज्ञायते के देवाः कियन्तो वा इति? तन्निश्चयार्थमित उत्तरं प्रक्रम्यते। अथवा, सम्यग्दर्शनविषयजीवभेदत्रसस्थावरनिर्णयाय तदधिकरणभूताधस्तिर्यग्लोकनिवेशक्रमो व्याख्यातः, इतस्तद्विशेषप्रतिपत्तये ऊर्ध्वलोकविभागो वक्तव्यः। तत्र बहुवक्तव्यसद्भावेऽप्य-धिपतिप्रतिपादनपुरस्सरस्तदधिकरणविभागनिर्णय इतीदमुच्यते –

## देवाश्चतुर्णिकायाः ॥१॥

**देवगतिनामकर्मोदये सति द्युत्याद्यर्थावरोधाद् देवाः ॥१॥** अन्तरङ्गहेतौ देवगति-नामकर्मोदये सति बाह्यद्युत्यादिक्रियासंबन्धमन्तर्नीय दीव्यन्तीति देवा इति व्यपदिश्यन्ते। एकत्वेन निर्देशः कर्तव्यः देवश्चतुर्णिकायः इति; स जात्यभिधाना बहूनामर्थानां प्रतिपादको भवतीति? अत उत्तरं पठति –

**बहुत्वनिर्देशोऽन्तर्गतभेदप्रतिपत्त्यर्थः ॥२॥** इन्द्रादिकृताः स्थित्यादिजनिताश्चाऽन्त-र्गता बहवो देवभेदाः सन्ति तेषां प्रतिपत्त्यर्थं बहुत्वनिर्देशः क्रियते।

**स्वधर्मविशेषापादितसामर्थ्यात् निचीयन्त इति निकायाः ॥३॥** तस्य देवगतिनाम-कर्मोदयस्वधर्मविशेषापादितभेदस्य सामर्थ्यान्निचीयन्त इति निकायाः संघाता इत्यर्थः चत्वारो निकाया येषां ते चतुर्णिकायाः। के पुनस्ते? भवनवासिनो व्यन्तरा ज्योतिष्का वैमानिकाश्चेति।

तेषां लेश्यावधारणार्थमुच्यते –

## आदितस्त्रिषु पीतान्तलेश्याः ॥२॥

**आदित इति वचनं विपर्यासनिवृत्त्यर्थम् ॥१॥** अन्तेऽन्यथा वा ग्रहणं मा विज्ञायीत्यादित इत्युच्यते। आदौ आदितः।

**द्व्येकनिवृत्त्यर्थं त्रिग्रहणम् ॥१॥** द्वयोरेकस्य च निवृत्त्यर्थं त्रिग्रहणं क्रियते। अथ चतुर्णां निवृत्त्यर्थं कस्मान्न भवति? आदित इति वचनात्।

**लेश्यावधारणार्थं पीतान्तवचनम् ॥२॥** षट्लेश्या उक्ताः। तत्र चतसृणां लेश्यानामव-धारणार्थं क्रियते पीतान्तग्रहणम्। पीतं तेज इत्यर्थः। पीता अन्ते यासां ताः पीतान्ताः, पीतान्ता लेश्या येषां ते पीतान्तलेश्याः। तेनैतदुक्तं भवति - आदितस्त्रिषु निकायेषु भवनवासिव्यन्तरज्योतिष्कनामसु देवानां कृष्णा नीला कापोता पीतेति चतस्रो लेश्या भवन्तीति।

तेषां निकायानामन्तर्विकल्पप्रतिपादनार्थमाह –

## दशाष्टपञ्चद्वादशविकल्पाः कल्पोपपन्नपर्यन्ताः॥३॥

**चतुर्णां दशादिभिर्यथासंख्यमभिसंबन्धः॥१॥** चतुर्णां देवनिकायानां दशादिभिः संख्याशब्दैः यथासंख्यमभिसंबन्धो वेदितव्यः। दशविकल्पा भवनवासिनः, अष्टविकल्पा व्यन्तराः, पञ्चविकल्पाः ज्योतिष्काः, द्वादशविकल्पा वैमानिका इति। सर्वेषां वैमानिकानां द्वादशविकल्पान्तःपातित्वे प्रसक्ते तद्व्यपोहार्थमाह –

**कल्पोपपन्नपर्यन्तवचनं ग्रैवेयकादिव्युदासार्थम् ॥२॥** ग्रैवेयकादयोः वक्ष्यन्ते तेषां द्वादशविकल्पेष्वन्तर्भावो मा विज्ञायीति विशेषणमुपादीयते। अथ कथं कल्पाः?

**इन्द्रादिविकल्पाधिकरणत्वात्कल्पा रूढिवशात् ॥३॥** इन्द्रादयः प्रकारा वक्ष्यमाणा दश एषु कल्प्यन्ते इति कल्पाः। भवनवासिषु चु दशविकल्पसद्भावात् कल्पप्रसङ्ग इति चेन्न; रूढिवशादिति विशेष्योक्तत्वात्। कल्पेषूपपन्नाः कल्पोपपन्नाः कल्पोपन्नाः पर्यन्ता येषां ते इमे कल्पोपपन्नपर्यन्ताः। कल्पोपपन्ना इति कथं वृत्तिः? "साधनं कृता" इति वा मयूरव्यंसकादित्वाद्वा।

पुनरपि तद्विशेषप्रतिपत्त्यर्थमाह –

## इन्द्रसामानिकत्रायस्त्रिंशपारिषदात्मरक्षलोकपालानीकप्रकीर्णकाभियोग्यकिल्विषिकाश्चैकशः॥४॥

**परमैश्वर्यादिन्द्रव्यपदेशः॥१॥** अन्यदेवाऽसाधारणाणिमादिगुणयोगादिन्दन्तीतीन्द्राः।

**तत्स्थानार्हत्वात् सामानिकाः॥२॥** तेषामिन्द्राणामाज्ञैश्वर्यवर्जितं यत् स्थानायुर्वीर्यपरिवारभोगोपभोगादि तदेतेषां समानम्, समाने भवाः सामानिकाः "समानस्य तदादेश्च" इति ठञ्। महत्तरपितृगुरूपाध्यायतुल्याः।

**मन्त्रिपुरोहितस्थानीयास्त्रायस्त्रिंशाः॥३॥** यथेह राज्ञां मन्त्रिपुरोहिता हितानुशासिनस्तथा तत्रेन्द्राणां त्रायस्त्रिंशा वेदितव्याः। कथं त्रायस्त्रिंशाः? त्रयस्त्रिंशति जाताः त्रायस्त्रिंशाः "दृष्टे साम्नि च जाते च अण् डिद्वा विधीयते" इत्यभिधानमस्तीति अण् डिद् भवति। ननु च भेदाभावाद् वृत्तिर्न प्राप्नोति? संख्यानसंख्येयभेदविवक्षायामाधाराधेयत्वोपपत्तेर्वृत्तिर्भवति। स्वार्थे को वा, वात् अण् त्रयस्त्रिंशदेव त्रायस्त्रिंशा इति। कुतः? "हृत" इति बहुत्वनिर्देशाद्दन्तमादिवत्।

**वयस्यपीठमर्दसदृशाः पारिषदाः॥४॥** परिषदि जाता भवा वा पारिषदाः, ते वयस्यपीठमर्दसदृशा वेदितव्याः।

**आत्मरक्षाः शिरोरक्षोपमाः॥५॥** आत्मानं रक्षन्तीति आत्मरक्षास्ते शिरोरक्षोपमाः। आवृतावरणाः प्रहरणोद्यता रौद्राः पृष्ठतोऽवस्थायिनः। अपायाभावात्तत्कल्पनावैयर्थ्यमिति चेन्न; ऋद्धिविशेषख्यापनार्थत्वात् प्रीतिप्रकर्षहेतुत्वाच्च।

**आरक्षकार्थचरसमा लोकपालाः॥६॥** लोकं पालयन्तीति लोकपाला अर्थचरा रक्षकसमा ते वेदितव्याः।

**दण्डस्थानीयान्यनीकानि॥७॥** पदात्यादीनि सप्तानीकानि दण्डस्थानीयानि वेदितव्यानि।

**प्रकीर्णकाः पौरजनपदकल्पाः॥८॥** यथेह राज्ञां पौरा जानपदाश्च प्रीतिहेतवः तथा तत्रेन्द्राणां प्रकीर्णकाः प्रत्येतव्याः।

**आभियोग्या दाससमानाः॥९॥** यथेह दासा वाहनादिव्यापारं कुर्वन्ति तथा तत्राऽऽभियोग्या वाहनादिभावेनोपकुर्वन्ति। आभिमुख्येन योगोऽभियोगः, अभियोगे भवा आभियोग्यास्ततः स्वार्थे चातुर्वर्ण्यादिवत् ट्यण। अथवाऽभियोगे साधव आभियोग्याः, अभियोगमर्हन्तीति वा।

**अन्त्यवासिस्थानीयाः किल्विषिकाः॥१०॥** किल्विषं पापं तदेषामस्तीति किल्विषिकाः तेऽन्त्यवासिस्थानीया मताः।

**एकश इति वीप्सार्थे शस् ॥११॥** एकैकस्य निकायस्य एकश इति वीप्सार्थे द्योत्ये शस्प्रयुज्यते। एत इन्द्रादयो दश विकल्पाश्चतुर्षु निकायेषूत्सर्गेण प्रसक्तास्ततोऽपवादार्थमाह-

## त्रायस्त्रिंशलोकपालवर्ज्या व्यन्तरज्योतिष्काः॥५॥

व्यन्तरेषु ज्योतिष्केषु च त्रायस्त्रिंशान् लोकपालांश्च वर्जयित्वेतरेऽष्टौ विकल्पा द्रष्टव्याः।

अथ तेषु निकायेषु किमेकैक इन्द्रः उताऽन्यः प्रतिनियमः कश्चिदस्तीति? अत आह –

## पूर्वयोर्द्वीन्द्राः ॥६॥

**पूर्वयोरिति वचनं प्रथमद्वितीयनिकायप्रतिपत्त्यर्थम् ॥१॥** प्रथमस्य द्वितीयस्य च निकायस्य प्रतिपत्त्यर्थं पूर्वयोरिति द्विवचनं क्रियते। कथं पूर्वशब्दो द्वितीयं गमयति? तृतीयापेक्षया पूर्वोपपत्तेः। चतुर्थापेक्षया तृतीयस्यापि पूर्वत्वप्रसङ्ग इति चेन्न; प्रत्यासत्तेर्द्वितीयस्यैवोपादानात्। अथ कथमत्र भेद? ननु व्यतिरेकाभावादभेदेन निर्देशो न्याय्यः? उच्यते –

**समूहसमूहिनोः कथञ्चिदर्थान्तरत्वोपपत्तेर्भेदविवक्षा॥२॥** संज्ञालक्षणप्रयोजनादिभिः कथञ्चिदर्थान्तरत्वं समूहसमूहिनोर्लोके दृष्टम्। यथा व्रीहीणां राशिः, आम्राणां वनमिति। तथा देवानां निकाययोश्च भेदविवक्षायामधिकरणत्वेन सम्बन्धित्वेन वा निर्देशः क्रियते।

**द्वीन्द्रा इत्यन्तर्नीतवीप्सार्थो निर्देशः॥३॥** द्वौ द्वाविन्द्रौ येषां ते द्वीन्द्रा इति वीप्सार्थमन्तर्नीय निर्देशः क्रियते यथा द्विपदिका त्रिपदिका इति। युज्यते तत्र वीप्सागतिर्वीप्सायां वुनो विधानात्, इह तु न विधानमस्ति? यथा तर्हि सप्तपर्णोऽष्टा-पदमिति न चोच्यते वीप्सायामिति गम्यते च, तथेहापि वीप्सार्थसंप्रत्ययः।

के पुनस्ते द्वित्ववीप्साविषयत्वेन विवक्षिताः इति? अत्रोच्यते - भवनवासिषु तावत् द्वावसुरकुमाराणामिन्द्रौ चमरो वैरोचनश्च। नागकुमाराणां धरणो भूतानन्दश्च। विद्युत्कुमाराणां हरिसिंहो हरिकान्तश्च। सुपर्णकुमाराणां वेणुदेवो वेणुधारी च। अग्नि-कुमाराणामग्निशिखोऽग्निमाणवश्च। वातकुमाराणां वैलम्बः प्रभञ्जनश्च।

स्तनितकुमाराणां सुघोषो महाघोषश्च। उदधिकुमाराणां जलकान्तो जलप्रभश्च। द्वीपकुमाराणां पूर्णो वशिष्टश्च। दिक्कुमाराणाममितगतिरमितवाहनश्चेति।

व्यन्तरेष्वपि द्वौ किन्नराणामिन्द्रौ किन्नरः किम्पुरुषश्च। किम्पुरुषाणां सत्पुरुषो महापुरुषश्च। महोरगाणामतिकायो महाकायश्च। गन्धर्वाणां गीतरतिर्गीतयशाश्च। यक्षाणां पूर्णभद्रो मणिभद्रश्च। राक्षसानां भीमो महाभीमश्च। पिशाचानां कालो महाकालश्च। भूतानां प्रतिरूपोऽप्रतिरूपश्च।

अथैषां देवानां सुखं कीदृशमित्युक्ते सुखावबोधार्थमुच्यते–

## कायप्रवीचारा आ ऐशानात् ॥७॥

प्रवीचार इति कोऽयं शब्दः?

**मैथुनोपसेवनं प्रवीचारः॥१॥** प्रविपूर्वाच्चरेः संज्ञायां घञ्। प्रविचरणं प्रवीचारः मैथुनव्यवहार इत्यर्थः। काये प्रवीचारो येषां ते इमे कायप्रवीचाराः।

**आङ्ग्रहणमभिविध्यर्थम् ॥२॥** आङयमभिविध्यर्थो वेदितव्यः - ईशानोऽधिपतिः "**तस्येदम्**" इत्यणि, ऐशानः कल्पः। आ एतस्मादधो ये देवास्ते कायप्रवीचाराः संक्लिष्टकर्मत्वात् मनुष्यवत् स्त्रीविषयसुखमनुभवन्तीत्यर्थः। प्राग्ग्रहणे हि क्रियमाणे ऐशाने कल्पे देवान् वर्जयित्वेत्ययमर्थः संप्रतीयेत।

**असंहितानिर्देशोऽसन्देहार्थः॥३॥** आ ऐशानादित्यसंहितया निर्देशः क्रियतेऽसन्देहार्थम्। ऐशानादित्युच्यमाने सन्देहः स्यात् -'किमाङन्तर्भूतः उत दिक्शब्दोऽध्याहार्यः' इति? अथवा विमुच्य संशयमनिष्टं कल्प्येत पूर्वयोरित्यधिकारादैशानात् पूर्वयोरित्यवधि ग्रहणात्।

इतरेषां सुखविभागेऽनिर्ज्ञाते तत्प्रतिपादनार्थमाह –

## शेषाः स्पर्शरूपशब्दमनःप्रवीचाराः॥८॥

शेषग्रहणं किमर्थम्?

**उक्तावशिष्टसंग्रहार्थं शेषग्रहणम्॥१॥** उक्तानामवशिष्टानां संग्रहार्थं शेषग्रहणं क्रियते। के पुनस्ते? सानत्कुमारादिकल्पनिवासिनः, इतरथा हि ग्रैवेयकादिष्वपि संप्रत्ययः स्यात् "परेऽप्रवीचाराः" इति वक्ष्यमाणमनवधारितविषयं स्यात्। स्पर्शश्च रूपं च शब्दश्च मनश्च स्पर्शरूपशब्दमनांसि, स्पर्शरूपशब्दमनःसु प्रवीचारो येषां त इमे स्पर्शरूप-शब्दमनःप्रवीचाराः। अत्र चोद्यते –

**विषयविवेकापरिज्ञानादनिर्देशः॥२॥** इमे स्पर्शप्रवीचारा एते रूपप्रवीचारा इत्यादि-विषयविवेकापरिज्ञानादयमनिर्देशः, अगमको निर्देशोऽनिर्देशः।

**द्वयोर्द्वयोरिति वचनात्सिद्धिरिति चेन्न; आर्षविरोधात्॥३॥** स्यान्मतं द्वयोर्द्वयोरिति वक्तव्यं तेन विषयविवेकसिद्धिर्भवति इति? तन्न; किं कारणम्? आर्षविरोधात्। आर्षे ह्युक्तम् – "सानत्कुमारमाहेन्द्रयोर्देवाः स्पर्शप्रवीचाराः। ब्रह्मबह्मोत्तरलान्तवकापिष्ठेषु रूपप्रवीचाराः। शुक्रमहाशुक्रसतारसहस्रारेषु शब्दप्रवीचाराः। आनतप्राणताऽऽरणाऽच्युत-कल्पेषु मनःप्रवीचाराः।

**इन्द्रापेक्षयेति चेन्न; आनतादिषु दोषात्॥४॥** स्यादेतत् – इन्द्रापेक्षया द्वयोः द्वयोरिति वचनं नार्षविरोधि? तद्यथा – सानत्कुमारमाहेन्द्रयोः कल्पयोर्द्वाविन्द्रौ तयोर्देवाः स्पर्शप्रवीचाराः, ब्रह्मब्रह्मोत्तरयोरेक इन्द्रः, लान्तवकापिष्ठयोरप्येकः, तयोर्देवा रूपप्रवीचाराः। शुक्रमहाशुक्रयोरेक इन्द्रः, सतारसहस्रारयोरप्येकः, तयोर्देवाः शब्दप्रवीचारा इति? तन्न; किं कारणम्? आनतादिषु दोषात्। आनतादिषु हि चत्वार इन्द्राः। कथं तर्हि निर्देशः कर्तव्यः? यथागममिति। स तर्हि तथानिर्देशः कर्तव्यः?

**न वा पुनः प्रवीचारग्रहणादिष्टार्थगतेः॥५॥** न वैष दोषः, किं कारणम् ? पुनःप्रवी-चारग्रहणादिष्टार्थगतेः। कथम् ? प्रवीचारग्रहणमनुवर्तते। क्व प्रकृतम् ? 'कायप्रवीचाराः' इति। ननु च तद्वृत्तावुपसर्जनीभूतमशक्यमनुवर्तयितुम्? अर्थवशात् अनुवर्तत इति व्याख्यायते। तत एवं वक्तव्यं शेषाः स्पर्शरूपशब्दमनःस्विति। एवमप्यनुवर्तमानः प्रवीचारशब्दः भावसाधनो वृत्तिमन्तरेण 'शेषाः' इत्यनेन सामानाधिकरण्यं न प्रतिपद्यते? शेषाणामिति तर्हि निर्देशः कर्तव्यः; एवं सिद्धे यत्पुनः प्रवीचारग्रहणं तस्यैतत्प्रयोजन- मिष्टप्रवीचारसिद्धिः कथं स्यादिति। कः पुनरिष्टः। आर्षाविरोधी – सानत्कुमारमाहेन्द्रयोर्हि देवान् मैथुनसुखप्रेप्सयोत्पन्नेच्छान् विदित्वा देव्य उपतिष्ठन्ते, तदङ्गस्पर्शनमात्रादेव प्रीतिमुपलभन्ते विनिवृत्तेच्छाश्च भवन्ति तथा देव्योऽपि। ब्रह्मब्रह्मोत्तरलान्तवकापिष्ठेषु देवा दिव्याङ्गनास्वभावसुभगश्रृंगाराकारविलासचतुरमनोज्ञवेषरूपालोकनमात्रादेव परं सुखम-वाप्नुवन्ति। शुक्रमहाशुक्रसतारसहस्रारेषु देवाः सुरवनितानां मधुरसङ्गीतमृदुहसितकथन भूषणरवोपदर्शनश्रवणरसायनं पीत्वैव परां प्रीतिमास्कन्दन्ति। आनतप्राणताऽऽरणा-ऽच्युतकल्पेषु देवाः स्वाङ्गनामनःसंकल्पमात्रादेव परं सुखमनुभवन्ति।

अथोत्तरेषां किं प्रकारं सुखमित्युक्ते तन्निश्चयार्थमाह –

## परेऽप्रवीचाराः॥६॥

पर इति किमर्थम्, अप्रवीचारा इत्येव सिद्धमुत्तरेषां ग्रहणम्?

**परवचनं कल्पातीतसर्वदेवसंग्रहार्थम्॥१॥** कल्पातीतानां सर्वेषां देवानां संग्रहार्थं परवचनं क्रियते, इतरथाऽनिष्टमपि कल्पयितुं शक्येत।

**अप्रवीचारग्रहणं प्रकृष्टसुखप्रतिपत्त्यर्थम्॥२॥** प्रवीचारो हि वेदनाप्रतीकारस्तदभावे तेषां परमसुखमनवरतमित्येतस्य प्रतिपत्त्यर्थमप्रवीचारा इत्युच्यते।

उक्तमादिनिकायदेवा दश विकल्पा इति तेषां सामान्यविशेषसंज्ञानिर्ज्ञानार्थमाह –

## भवनवासिनोऽसुरनागविद्युत्सुपर्णाग्निवातस्तनितोदधिद्वीपदिक्कुमाराः॥१०॥

**भवनेषु वसनशीला भवनवासिनः॥१॥** भवनेषु वसन्तीत्येवंशीला भवनवासिन इति प्रथमनिकायस्येयं सामान्यसंज्ञा।

**असुरादयस्तद्विकल्पाः॥२॥** तेषां भवनवासिनामसुरादयो दश विकल्पा द्रष्टव्याः।

**सर्वे नामकर्महेतुकाः॥३॥** सर्वे ते नामकर्मोदयापादितविशेषा वेदितव्याः।

**अस्यन्ति देवैः सहासुरा इति चेन्न; अवर्णवादात्॥४॥** स्यान्मतं युद्धे देवैः सहास्यन्ति प्रहरणादीनित्यसुरा इति; तन्न किं कारणम्? अवर्णवादात्। अवर्णवाद एषः देवानामुपरि मिथ्याज्ञाननिमित्तः। कुतः?

**महाप्रभावत्वात्॥५॥** ते हि सौधर्मादयो देवा महाप्रभावाः, न तेषामुपरीतरेषां निकृष्टबलानां मनागपि प्रातिलोम्येन वृत्तिरस्ति। अपि च

**वैरकारणाभावात्॥६॥** तेषां प्रतिविशिष्टशुभकर्मोदयापादितविभवानामर्हत्पूजाभोगानुभवनमात्रतन्त्राणां परदारहरणादिनिमित्तं न वैरमस्ति ततो नासुराः सुरैर्युध्यन्ते।

अथ ते कथं कुमाराः?

**कौमारवयोविशेषविक्रियादियोगात्कुमाराः॥७॥** सर्वेषां देवानामवस्थितवयःस्वभावत्वेऽपि कौमारवयोविशेषस्वभावस्वरूपं विक्रिया च कुमारवदुद्धतवेषभाषाऽऽभरणप्रहरणावरणयानवाहनत्वं चोल्वणरागक्रीडनप्रियत्वं चेत्येतैर्योगात् कुमारा इति व्यपदिश्यन्ते।

**प्रत्येकमभिसम्बन्धः॥८॥** तस्य कुमारशब्दस्य प्रत्येकमभिसम्बन्धः क्रियते - असुरकुमारा नागकुमारा इत्येवमादि।

अत्राह क्व तेषां भवनानीति? अत्रोच्यते –

**अस्या रत्नप्रभायाः पङ्कबहुलभागेऽसुरकुमारणां भवनानि चतुःषष्टिशतसहस्राणि॥९॥** अस्माज्जम्बूद्वीपात् तिर्यगपागसंख्येयान् द्वीपसमुद्रान् अतीत्य पङ्कबहुलभागे चमरस्याऽसुरेन्द्रस्य चतुस्त्रिंशद्भवनशतसहस्राणि, चतुःषष्टिसामानिकसहस्राणि, त्रयस्त्रिंशत्त्रायस्त्रिंशाः, तिस्रः परिषदः, सप्तानीकानि चत्वारो लोकपालाः, पञ्चाग्रमहिष्यः, चत्वारि चतुःषष्ट्युत्तराण्यात्मरक्षसहस्राणि, एवं विभवपरिवारः दक्षिणार्धपतिः दिव्यान् भोगान् अनुभवति। तथोत्तरस्यां दिशि वैरोचनस्य त्रिंशद्भवनशतसहस्राणि षष्टिसामानिकसहस्राणि, त्रयस्त्रिंशत्त्रायस्त्रिंशाः, तिस्रः परिषदः, सप्तानीकानि, चत्वारो लोकपालाः, पञ्चाग्रमहिष्यः, चत्वारि चतुःषष्ट्युत्तराणि आत्मरक्षसहस्राणि, एवं विभवपरिवारः उत्तरार्धपतिः दिव्यान् भोगाननुभुङ्क्ते।

**खरपृथ्वीभागे उपर्यधश्चैकैकयोजनसहस्रं वर्जयित्वा शेषे नवानां कुमाराणां भवनानि भवन्ति॥१०॥** तद्यथा – अस्माज्जम्बूद्वीपात्तिर्यगपागसंख्येयान् द्वीपसमुद्रान् अतीत्य धरणस्य नागराजस्य चतुश्चत्वारिंशत्भवनशतसहस्राणि, षष्टिसामानिकसहस्राणि, त्रयस्त्रिंशत्त्रायस्त्रिंशाः, तिस्रः परिषदः सप्तानीकानि, चत्वारो लोकपालाः, षडग्रमहिष्यः षडात्मरक्षसहस्राण्याख्यायन्ते। तथाऽस्माज्जम्बूद्वीपात्तिर्यगुदगसंख्येयान् द्वीपसमुद्रान् अतीत्य भूतानन्दस्य नागेन्द्रस्य चत्वारिंशद्भवनशतसहस्राणि, अवशिष्टं धरणेन्द्रवज्ज्ञेयम्। तान्येतानि नागकुमाराणां चतुरशीतिभवनशतसहस्राणि। तथा सुपर्णकुमाराणां द्विसप्तति-र्भवनशतसहस्राणि। तत्र वेणुदेवस्य दक्षिणाधिपतेरष्टत्रिंशद्भवनशतसहस्राणि। इतरद्धरणेन्द्र-वन्नेयम्। उत्तराधिपतेर्वेणुधारिणः चतुस्त्रिंशद्भवनशतसहस्राणि। अवशिष्टं धरणेन्द्रवन्नेयम्।

विद्युदग्निस्तनितोदधिद्वीपदिक्कुमाराणां षण्णामपि प्रत्येकं षट्सप्ततिर्भवनशतसहस्राणि। तत्र दक्षिणेन्द्राणां हरिसिंहाग्निशिखसुघोषजलकान्तपूर्णामितगतीनां प्रत्येकं चत्वारिंशद्भवनशतसहस्राणि। हरिकान्ताग्निमाणवमहाघोषजलप्रभवशिष्टामितवाहनानामुत्तराधिपतीनां प्रत्येकं षट्त्रिंशद्भवनशतसहस्राणि। वातकुमाराणां षण्णवतिर्भवनशतसहस्राणि। तत्र वैलम्बस्य दक्षिणेन्द्रस्य पञ्चाशद्भवनशतसहस्राणि। उत्तराधिपतेः प्रभञ्जनस्य षट्चत्वा-रिंशद्भवनशतसहस्राणि। सर्वेषामेषां धरणेन्द्रवन्नेयम्। तान्येतानि भवनानि समुदितानि सप्तकोट्यो द्विसप्ततिश्च शतसहस्राणि।

द्वितीयनिकायस्य सामान्यविशेषसंज्ञावधारणार्थमाह –

## व्यन्तराः किन्नरकिम्पुरुषमहोरगगन्धर्वयक्षराक्षसभूतपिशाचाः॥११॥

**विविधदेशान्तरनिवासित्वाद् व्यन्तराः॥१॥** विविधदेशान्तराणि येषां निवासास्ते व्यन्तरा इत्यन्वर्थाः। सामान्यसंज्ञेयमष्टानामपि विकल्पानाम्।

**किन्नरादयस्तद्विकल्पाः॥२॥** तेषां व्यन्तराणामष्टौ विकल्पाः किन्नरादयो द्रष्ट-व्याः।

**नामकर्मोदयविशेषतस्तद्विशेषसंज्ञाः॥३॥** देवगतिनाम्नो मूलस्योत्तरोत्तरप्रकृति-भेदस्योदयाद्विशेषसंज्ञा भवन्ति। किन्नरनामकर्मोदयात् किन्नराः किम्पुरुषनामकर्मो-दयात् किम्पुरुषाः इत्यादि।

**क्रियानिमित्ता एवेति चेन्न; उक्तत्वात्॥४॥** स्यादेतत् – क्रियानिमित्ता एवैताः संज्ञाः, किन्नरान् कामयन्त इति किन्नराः; किम्पुरुषान् कामयन्त इति किम्पुरुषाः; पिशिताशनात् पिशाचा इत्यादि तन्न; किं कारणम्? उक्तत्वात्। उक्तमेतत् –

अवर्णवाद एष देवानामुपरीति। कथम्? न हि ते शुचिवैक्रियिकदेहा अशुच्यौदारिकशरीरान् नरान् कामयन्ते नापि पिशितमश्नन्ति। मांसमदिरादिषु दृष्टा लोके प्रवृत्तिरिति चेन्न; क्रीडासुखनिमित्तत्वात्, मानसाहारा हि ते।

क्व पुनस्तेषामावासाः इति ? अत्रोच्यते - अस्माज्जम्बूद्वीपात्तिर्यगपागसंख्येयान् द्वीपसमुद्रान्तीत्यौपरिष्टे खरपृथिवीभागे किन्नरस्य किन्नरेन्द्रस्यासंख्येयानि नगरशत-सहस्राणि वर्ण्यन्ते। तस्य चत्वारि सामानिकसहस्राणि, तिस्रः परिषदः, सप्तानीकानि, चतस्रोऽग्रमहिष्यः, षोडशात्मरक्षसहस्राणि। उदीच्यां दिशि पूर्ववदेव किन्नरेन्द्रः किम्पुरुषस्तादृग्विभवपरिवारः। एवं शेषाणां षण्णां दक्षिणेन्द्राणां सत्पुरुषाति-कायगीतिरतिपूर्णभद्रस्वरूपकालाख्यानां दक्षिणे भागे आवासाः। तथा महापुरुषमहाकाय-गीतयशोमाणिभद्राऽप्रतिरूपमहाकालानां त्वत्तराधिपतीनामुत्तरभागे आवासास्तावन्त एव वेदितव्याः। राक्षसेन्द्रस्य भीमस्य दक्षिणस्यां दिशि पङ्कबहुलभागेऽसंख्येयानि नगरशतसहस्राण्याख्यायन्ते। उत्तरस्यां दिशि महाभीमस्य राक्षसेन्द्रस्य पङ्कबहुल-भागेऽसंख्येयानि नगरशतसहस्राणि वर्ण्यन्ते। षोडशानामप्येषां व्यन्तरेन्द्राणां सामानि-कादिपरिवारास्तुल्याः। भूमितलेऽपि द्वीपाद्रिसमुद्रदेशग्रामनगरत्रिकचतुष्कचत्वरगृहङ्गण-रथ्याजलाशयोद्यानदेवकुलादीन्यसंख्येयान्यावासशतसहस्राणि तेषामाख्यायन्ते।

तृतीयस्य निकायस्य सामान्यविशेषसंज्ञासंकीर्तनार्थमाह –

## ज्योतिष्काः सूर्याचन्द्रमसौ ग्रहनक्षत्रप्रकीर्णकतारकाश्च॥१२॥

**द्योतनस्वभावत्वाज्ज्योतिष्काः॥१॥** द्योतनं प्रकाशनं तत्स्वभावत्वादेषां पञ्चाना-मपि विकल्पानां ज्योतिष्का इतीयमन्वर्था सामान्यसंज्ञा। काऽस्याः सिद्धिः?

**ज्योतिःशब्दात्स्वार्थे के निष्पत्तिः॥२॥** ज्योतिःशब्दात् स्वार्थे के सति ज्योतिष्का इति निष्पद्यते। कथं स्वार्थे कः? यवादिषु पाठात्।

**प्रकृतिलिङ्गानुवृत्तिप्रसङ्ग इति चेन्न; अतिवृत्तिदर्शनात्॥३॥** स्यान्मतम् – यदि स्वार्थिकोऽयं कः, ज्योतिःशब्दस्य नपुंसकलिङ्गत्वात् कान्तस्यापि नपुंसकलिङ्गता प्राप्नोतीति? तन्न; किं कारणम्? अतिवृत्तिदर्शनात्। प्रकृतिलिङ्गातिवृत्तिरपि दृश्यते – यथा कुटीरः शमीरः शुण्डार इति।

**तद्विशेषाः सूर्यादयः॥४॥** तेषां ज्योतिष्काणां सूर्यादयः पञ्च विकल्पा द्रष्टव्याः।

**पूर्ववत्तन्निर्वृत्तिः॥५॥** तेषां संज्ञाविशेषाणां पूर्ववन्निर्वृत्तिर्वेदितव्या– देवगतिनाम-कर्मविशेषोदयादिति।

**सूर्याचन्द्रमसावित्यानङ् देवताद्वन्द्वे॥६॥** सूर्यश्च चन्द्रमाश्च द्वन्द्वे कृते पूर्वपदस्य "देवताद्वन्द्वे" इत्यानङ् भवति।

**सर्वत्र प्रसङ्ग इति चेन्न; पुनर्द्वन्द्वग्रहणादिष्टे वृत्तिः॥७॥** स्यादेतत्– यदि "देवताद्वन्द्वे" इत्यानङ् भवति, इहापि प्राप्नोति ग्रहनक्षत्रप्रकीर्णकताराः किन्नर-किम्पुरुषादयोऽसुरनागादय इति; तन्न; किं कारणम्? "आनङ् द्वन्द्वे" इत्यतः द्वन्द्व इति वर्तमाने पुनर्द्वन्द्वग्रहणादिष्टे द्वन्द्वे वृत्तिर्जायते।

**पृथग्ग्रहणं प्राधान्यख्यापनार्थम्॥८॥** सूर्याचन्द्रमसोर्ग्रहादिभ्यः पृथक् ग्रहणं क्रियते प्राधान्यख्यापनार्थम्। ज्योतिष्केषु हि सर्वेषु सूर्याणां चन्द्रमसां च प्राधान्यम्। किं कृतं पुनस्तत्? प्रभावादिकृतम्।

**सूर्यस्यादौ ग्रहणमल्पाच्तरत्वादभ्यर्हितत्वाच्च॥९॥** सूर्यशब्द आदौ प्रयुज्यते। कुतः? अल्पाच्तरत्वादभ्यर्हितत्वाच्च। सर्वाभिभवसमर्थत्वाद्धि अभ्यर्हितः सूर्यः।

**ग्रहादिषु च॥१०॥** किम्? 'अल्पाच्तरत्वात् अभ्यर्हितत्वाच्च पूर्वनिपातः इति वाक्यविशेषः। ग्रहशब्दस्तावत् अल्पाच्तरोऽभ्यर्हितश्च तारकाशब्दात् नक्षत्रशब्दोऽभ्यर्हितः।

क्व पुनस्तेषां निवास इति? अत्रोच्यते – अस्मात् समात् भूमिभागादूर्ध्वंसप्त योजनशतानि नवत्युत्तराण्युत्पत्य सर्वज्योतिषामधोभाविन्यस्तारकाश्चरन्ति। ततो दशयोजनान्युत्पत्य सूर्याश्चरन्ति। ततोऽशीतिर्योजनान्युत्पत्य चन्द्रमसो भ्रमन्ति। ततस्त्रीणि योजनान्युत्पत्य नक्षत्राणि। ततस्त्रीणि योजनानि उत्पत्य बुधाः। ततस्त्रीणि योजनानि उत्पत्य शुक्राः। ततस्त्रीणि योजनान्युत्लुत्य बृहस्पतयः। ततः चत्वारि योजनान्युत्प्लुत्याऽङ्गारकाः। ततः चत्वारि योजनान्युत्क्रम्य शनैश्चराश्चरन्ति। स एष ज्योतिर्गणगोचरो नभोऽवकाशः दशाधिकयोजनशतबहुलः तिर्यगसंख्यातद्वीपसमुद्रप्रमाणो घनोदधिपर्यन्तः। उक्तं च –

**"णवदुत्तरसत्तसया दससीदिच्चदुतिगं च दुगचदुक्कं।**
**तारारविससिरिक्खा बुधभग्गवगुरुअंगिरारसणी॥"**

तत्राभिजित् सर्वाभ्यन्तरचारी, मूलः सर्वबहिश्चारी, भरण्यः सर्वाधश्चारिण्यः स्वातिः सर्वोपरिचारी। तप्ततपनीयसमप्रभाणि लोहिताक्षमणिमयानि अष्टचत्वारिंशद्योजनैकषष्टि-भागविष्कम्भायामानि तत्त्रिगुणाधिकपरिधीनि चतुर्विंशतियोजनैकषष्टिभागबाहुल्यानि अर्धगोलकाकृतीनि षोडशभिर्देवसहस्रैरूढानि सूर्यविमानानि। प्रत्येकं पूर्वदक्षिणोत्तरापरान् भागान् क्रमेण सिंहकुञ्जरवृषभतुरगरूपाणि विकृत्य चत्वारि चत्वारि देवसहस्राणि वहन्ति। एषामुपरि सूर्याख्या देवाः। तेषां प्रत्येकं चतस्रोऽग्रमहिष्यः – सूर्यप्रभा सुसीमा अर्चिमालिनी प्रभङ्करा चेति, प्रत्येकं देवीरूपचतुःसहस्रविकरणसमर्थाः। ताभिः सह दिव्यं सुखमनुभवन्तोऽसंख्येयशतसहस्राधिपतयः सूर्याः परिभ्रमन्ति। विमलमृणालवर्णान्य

ङ्कमयानि चन्द्रविमानानि। षट्पञ्चाशद्योजनैकषष्टिभागविष्कम्भायामान्यष्टाविंशति-योजनैकषष्टिभागबाहुल्यानि, प्रत्येकं षोडशभिर्देवसहस्रैः पूर्वादिषु दिक्षु क्रमेण सिंहकुञ्जराश्ववृषभरूपविकारिभिरूढानि। तेषामुपरि चन्द्राख्या देवाः। तेषां प्रत्येकं चतस्रोऽग्रमहिष्यः- चन्द्रप्रभा सुसीमा अर्चिमालिनी प्रभङ्करा चेति, प्रत्येकं चतुर्देवीरूपसहस्रविकरणपटवः। ताभिः सह सुखमुपभुञ्जानाश्चन्द्रमसोऽसंख्येयविमानशतसहस्राधिपतयो विहरन्ति। अञ्जनसमप्रभाण्यरिष्टमणिमयानि राहुविमानान्येकयोजनायामविष्कम्भाण्यर्धतृतीय धनुःशतबाहल्यानि। नवमल्लिकाप्रभाणि रजतपरिणामानि शुक्रविमानानि गव्यूतायाम-विष्कम्भाणि। जात्यमुक्ताद्युतीन्यङ्कमणिमयानि बृहस्पतिविमानानि देशोनगव्यूतायाम विष्कम्भाणि। कनकमयान्यर्जुनवर्णानि बुधविमानानि। तपनीयमयानि तप्ततपनीयाभानि शनैश्चरविमानानि। लोहिताक्षमयानि तप्तकनकप्रभाण्यङ्गारकविमानानि। बुधादिविमा-नान्यर्धगव्यूतायामविष्कम्भाणि। शुक्रादिविमानानि राहुविमानतुल्यबाहल्यानि। राहवादि विमानानि प्रत्येकं चतुर्भिः देवसहस्रैरुह्यन्ते। नक्षत्रविमानानां प्रत्येकं चत्वारि देवसहस्राणि वाहकानि। तारकाविमानानां प्रत्येकं द्वे देवसहस्रे वाहके। राहवाद्याभियोग्यानां रूपविकाराश्चन्द्रवन्नेयाः। नक्षत्रविमानानामुत्कृष्टो विष्कम्भः क्रोशः। तारकाविमानानां वैपुल्यं जघन्यं क्रोशचतुर्भागः। मध्यमं साधिकः क्रोशचतुर्भागः। उत्कृष्टमर्धगव्यूतम्। ज्योतिष्कविमानानां सर्वजघन्यवैपुल्यं पञ्चधनुःशतानि। ज्योतिषामिन्द्राः सूर्याचन्द्रमसः, ते चाऽसंख्याताः।

ज्योतिष्काणां गतिविशेषप्रतिपत्त्यर्थमाह –

**मेरुप्रदक्षिणा नित्यगतयो नृलोके ॥१३॥**

**मेरुप्रदक्षिणवचनं गत्यन्तरनिवृत्त्यर्थम् ॥१॥** मेरोः प्रदक्षिणा मेरुप्रदक्षिणा इत्युच्य-न्ते। किमर्थम्? गत्यन्तरनिवृत्त्यर्थं विपरीता गतिर्माभूत्।

**गतेः क्षणे क्षणेऽन्यत्वात् नित्यत्वाभाव इति चेन्न; आभीक्ष्ण्यस्य विवक्षि-तत्वात् ॥२॥** अयं नित्यशब्दः कूटस्थेष्वविचलेषु भावेषु वर्तते, गतिश्च क्षणे क्षणेऽन्या, ततोऽस्या नित्येति विशेषणं नोपपद्यत इति चेन्न; किं कारणम्? आभीक्ष्ण्यस्य विवक्षितत्वात्। यथा नित्यप्रहसितो नित्यप्रजल्पित इत्याभीक्ष्ण्यं गम्यत इति, एवमिहापि नित्यगतयोऽनुपरतगतय इत्यर्थः।

**अनेकान्ताच्च॥३॥** यथा सर्वभावेषु द्रव्यार्थादेशात् स्यान्नित्यत्वं पर्यायार्थादेशात् स्यादनित्यत्वं तथा गतावपीति नित्यत्वमविरुद्धमविच्छेदात्।

**नृलोकग्रहणं विषयार्थम् ॥४॥** येऽर्धतृतीयेषु द्वीपेषु द्वयोश्च समुद्रयोर्ज्योतिष्कास्ते मेरुप्रदक्षिणा नित्यगतयो नान्ये इति विषयावधारणार्थं नृलोकग्रहणं क्रियते।

**गतिकारणाभावादयुक्तिरिति चेन्न; गतिरताभियोग्यदेववहनात् ॥५॥** स्यान्मतमिह लोके भावानां गतिः कारणवती दृष्टा, न च ज्योतिष्कविमानानां गतेः कारणमस्ति ततस्तदयुक्तिरिति; तन्न; किं कारणम् ? गतिरताभियोग्यदेववहनात्। गतिरता हि आभियोग्यदेवा वहन्तीत्युक्तं पुरस्तात्।

**कर्मफलविचित्रभावाच्च॥६॥** कर्मणां हि फलं वैचित्र्येण पच्यते ततस्तेषां गतिपरिणतिमुखेनैव कर्मफलमवबोद्धव्यम्। एकादशभिः योजनशतैरेकविंशैर्मेरुमप्राप्य ज्योतिष्काः प्रदक्षिणाश्चरन्ति।

तत्र जम्बूद्वीपे द्वौ सूर्यौ, द्वौ चन्द्रमसौ, षट्पञ्चाशन्नक्षत्राणि, षट्सप्तत्यधिकं ग्रहशतम्, एकं कोटीकोटिशतसहस्रं त्रयस्त्रिंशत्कोटीकोटिसहस्राणि नवकोटीकोटिशतानि पञ्चाशच्च कोटीकोट्यस्तारकाणाम्। लवणोदे चत्वारः सूर्याः, चत्वारश्चन्द्राः, नक्षत्राणां

शतम्, द्वादश ग्रहाणाम्, त्रीणि शतानि द्वापञ्चाशानि द्वे कोटीकोटिशतसहस्रे सप्तषष्टिकोटीकोटिसहस्राणि नव च कोटीकोटिशतानि तारकाणाम्। धातकीखण्डे द्वादश सूर्याः, द्वादश चन्द्राः, नक्षत्राणां त्रीणि शतानि षट्त्रिंशानि, ग्रहाणां सहस्रं षट्पञ्चाशम्, अष्टौ कोटीकोटिशतसहस्राणि सप्तत्रिंशच्च कोटीकोटिशतानि तारकाणाम्। कालोदे द्वाचत्वारिंशदादित्याः, द्वाचत्वारिंशच्चन्द्राः, एकादश नक्षत्रशतानि षट्सप्तत्यधिकानि, षट्त्रिंशत् ग्रहशतानि षण्णवत्यधिकानि, अष्टाविंशतिकोटीकोटिशतसहस्राणि द्वादशकोटी-कोटिसहस्राणि नवकोटिशतानि पञ्चाशच्च कोटीकोट्यस्तारकाणाम्। पुष्करार्धे द्वासप्ततिः सूर्याः, द्वासप्ततिश्चन्द्राः, द्वे नक्षत्रसहस्रे, षोडशत्रिषष्टिः ग्रहशतानि, षट्त्रिंशान्य-ष्टचत्वारिंशत्कोटीकोटिशतसहस्राणि द्वाविंशतिः कोटीकोटिसहस्राणि द्वे कोटीकोटिशते तारकाणाम्। बाह्ये पुष्करार्धे च ज्योतिषामियमेव संख्या। ततश्चतुर्गुणाः पुष्करवरोदे ततः परा द्विगुणा द्विगुणा ज्योतिषां संख्या अवसेया।

जघन्यं तारकान्तरं गव्यूतसप्तभागः, मध्यं पञ्चाशत् गव्यूतानि, उत्कृष्टं योजनसहस्रम्। जघन्यं सूर्यान्तरं चन्द्रान्तरं च नवनवतिः सहस्राणि योजनानां षट्शतानि चत्वारिंशदधिकानि। उत्कृष्टमेकं योजनशतसहस्रं षट्शतानि पष्ट्युत्तराणि। जम्बूद्वीपादिष्वैकैकस्य चन्द्रमसः षट्षष्टिकोटीकोटिसहस्राणि नवकोटीकोटिशतानि पञ्चसप्ततिश्च कोटीकोट्यः तारकाणाम्। अष्टाशीतिर्महाग्रहाः, अष्टाविंशतिर्नक्षत्राणि। परिवारः सूर्यस्य चतुरशीतिमण्डलशतमशीतिः योजनशतं जम्बूद्वीपस्याऽन्तरमवगाह्य प्रकाशयति। तत्र पञ्चषष्टिरभ्यन्तरमण्डलानि लवणोदस्यान्तस्त्रीणि त्रिंशानि योजनशतान्यवगाह्य प्रकाशयति। तत्र मण्डलानि बाह्यान्येकान्नविंशतिशतम्। द्वियोजनमेकैकमण्डलान्तरम्। द्वे योजनेऽष्टचत्वारिंशद्योजनैकषष्टिभागाश्चैकैकमुदयान्तरम्। चतुश्चत्वारिंशद्योजनसहस्रैरष्टाभिश्च शतैर्विंशैरप्राप्य मेरुं सर्वाभ्यन्तरमण्डले सूर्यः

प्रकाशयति। तस्य विष्कम्भो नवनवतिः सहस्राणि षट्शतानि चत्वारिंशानि योजनानाम्। तदाऽहनि मुहूर्ता अष्टादश भवन्ति। पञ्चसहस्राणि द्वे शते एकपञ्चाशयोजनानामेकान्न-त्रिंशद्योजनषष्टिभागाश्च मुहूर्तगतिक्षेत्रम्। सर्वबाह्यमण्डले चरन् सूर्यः पञ्चचत्वारिंशत्सहस्रैः त्रिभिश्च शतैः त्रिंशैर्योजनानां मेरुमप्राप्य भासयति। तस्य विष्कम्भः एकं शतसहस्रं षट् च शतानि षष्ट्यधिकानि योजनानाम्। तदा दिवसस्य द्वादशमुर्हूता। पञ्चसहस्राणि त्रीणि शतानि पञ्चोत्तराणि योजनानां पञ्चदशयोजनषष्टिभागाश्च मुहूर्तगतिक्षेत्रम्। तदैकत्रिंशद्योजनसहस्रेष्वष्टासु च योजनशतेष्वर्धद्वात्रिंशेषु स्थितो दृश्यते। सर्वाभ्यन्तरमण्डले दर्शनविषयपरिमाणं प्रागुक्तम्। मध्ये हानिवृद्धिक्रमो यथागमं वेदितव्यः। चन्द्रमण्डलानि पञ्चदश, द्वीपावगाहः समुद्रावगाहश्च सूर्यवद्वेदितव्यः। द्वीपाभ्यन्तरे पञ्च मण्डलानि। समुद्रमध्ये दश। सर्वबाह्याभ्यन्तरमण्डलविष्कम्भविधिः, मेरुचन्द्रान्तरप्रमाणं च सूर्यवत् प्रत्येतव्यम्। पञ्चदशानां मण्डलानामन्तराणि चतुर्दश। तत्रैकैकस्य मण्डलान्तरस्य प्रमाणं पञ्चत्रिंशद्योजनानि योजनैकषष्टिभागास्त्रिंशत् तद्भागस्य चत्वारः सप्तभागाः। सर्वाभ्यन्तरमण्डले पञ्चसहस्राणि त्रिसप्तत्यधिकानि योजनानां सप्तसप्ततिर्भागशतानि चतुश्चत्वारिंशानि मण्डलं त्रयोदशभिर्भागसहस्रैः सप्तभिश्च भागशतैः छित्वाऽवशिष्टानि चन्द्रः एकैकेन मुहूर्तेन गच्छति। सर्वबाह्यमण्डले पञ्चसहस्राणि शतं च पञ्चविंशं योजनानाम् एकोनसप्ततिर्भागशतानि नवत्यधिकानि मण्डलं त्रयोदशभिः भागसहस्रैः सप्तभिश्च भागशतैः पञ्चविंशैः छित्वाऽवशिष्टानि चन्द्रः एकैकेन मुहूर्तेन गच्छति। दर्शनविषयपरिमाणं सूर्यवद्वेदितव्यम्। हानिवृद्धिविधानं च यथागममवसेयम्। पञ्चयोजनशतानि दशोत्तराणि सूर्यचन्द्रमसोश्चारक्षेत्रविष्कम्भः।

गतिमज्ज्योतिःसंबन्धेन व्यवहारकालप्रतिपत्त्यर्थमाह –

**तत्कृतः कालविभागः॥१४॥**

तदिति किमर्थम्?

**गतिमज्ज्योतिःप्रतिनिर्देशार्थं तद्वचनम् ॥१॥** गतिमतां ज्योतिषां प्रतिनिर्देशार्थं तदित्युच्यते। न हि केवलया गत्या नापि केवलैर्ज्योतिर्भिः कालः परिच्छिद्यते, अनुपलब्धेरपरिवर्तनाच्च।

**ज्योतिःपरिवर्तनलभ्यो हि कालपरिच्छेदः॥२॥** कालो द्विविधो व्यावहारिको मुख्यश्च। तत्र व्यावहारिकः कालविभागः तत्कृतः समयावलिकादिर्व्याख्यातः, क्रियाविशेषपरिच्छिन्नोऽन्यस्यापरिच्छिन्नस्य परिच्छेदहेतुः। मुख्योऽन्यो वक्ष्यमाणलक्षणः।

आह – न मुख्यः कालोऽस्ति सूर्यादिगतिव्यतिरिक्तो लिङ्गाभावात्। अपि च, कलानां समूहः कालः, कलाश्च क्रियावयवाः। किञ्च, पञ्चास्तिकायोपदेशात् पञ्चैवास्तिकाया आगमे उपदिष्टा न षष्ठः, ततो न मुख्यः कालोऽस्ति; इत्यपरीक्षिताभिधानमेतत्; यत्तावदुक्तम् – लिङ्गाभावान्नास्ति मुख्यः काल इति; अत्रोच्यते –

**क्रियायां काल इति गौणव्यवहारदर्शनात् मुख्यसिद्धिः॥३॥** योऽयमादित्यगमनादौ क्रियेति रूढेः काल इति व्यवहारः कालनिर्वर्तनापूर्वकः; मुख्यस्य कालस्यास्तित्वं गमयति। नहि मुख्ये गव्यसति वाहीके गौणे गोशब्दस्य व्यवहारो युज्यते।

**अत एव न कलासमूह एव कालः॥४॥** अत एव। कुत एव? मुख्यस्य कालस्यास्तित्वादेव, कलानां समूह एव काल इति व्यपदेशो नोपपद्यते। कल्यते क्षिप्यते प्रेर्यते येन क्रियावद्द्रव्यं स कालः, तस्य विस्तरेण निर्णय उत्तरत्र वक्ष्यते।

**प्रदेशप्रचयाभावादस्तिकायेष्वनुपदेशः॥५॥** प्रदेशप्रचयो हि कायः स एषामस्ति तेऽस्तिकाया इति जीवादयः पञ्चैव उपदिष्टाः। कालस्य

त्वेकप्रदेशत्वादस्तिकायत्वाभावः। यदि ह्यस्तित्वमेवाऽस्य न स्यात् षट्द्रव्योपदेशो न युक्तः स्यात्। कालस्य हि द्रव्यत्वमस्त्यागमेऽपरलक्षणाभावः स्वलक्षणोपदेशसद्भावात्।

इतरत्र ज्योतिषामवस्थाप्रतिपादनार्थमाह –

## बहिरवस्थिताः॥१५॥

बहिरित्युच्यते। कुतो बहिः? नृलोकात्। कथमवगम्यते? अर्थवशाद्विभक्तिपरिणाम इति।

**नृलोके नित्यगतिवचनादन्यत्रावस्थानसिद्धिरिति चेन्न; उभयासिद्धेः॥१॥** स्यान्मतम् – 'नृलोके नित्यगतयः' इति वचनादन्यत्राऽवस्थानं ज्योतिषां सिद्धमतो बहिरवस्थितेति वचनमनर्थकमिति; तन्न; किं कारणम्? उभयासिद्धेः। नृलोकादन्यत्र बहिर्ज्योतिषामस्तित्वमवस्थानं चाऽप्रसिद्धमतस्तदुभयसिद्ध्यर्थं 'बहिरवस्थिताः' इत्युच्यते। असति हि वचने, नृलोके एव सन्ति नित्यगतयश्च इत्यवगम्येत।

तुरीयस्य निकायस्य सामान्यसंज्ञाकीर्तनार्थमाह –

## वैमानिकाः॥१६॥

**वैमानिकग्रहणमधिकारार्थम्॥१॥** इत ऊर्ध्वं ये वक्ष्यन्ते तेषु वैमानिकसंप्रत्ययः कथं स्यादित्यधिकारः क्रियते। विशेषेणाऽऽत्मस्थान् सुकृतिनो मानयन्तीति विमानानि, विमानेषु भवा वैमानिकाः। तानि विमानानि त्रिविधानि – इन्द्रकश्रेणिपुष्पप्रकीर्णकभेदेन। तत्रेन्द्रकविमानानीन्द्रवन्मध्येऽवस्थितानि। तेषां चतसृषु दिक्ष्वाकाशप्रदेशश्रेणिवदवस्थानात् श्रेणिविमानानि। विदिक्षु प्रकीर्णपुष्पवदवस्थानात् पुष्पप्रकीर्णकानि

तेषां वैमानिकानां भेदावबोधनार्थमाह –

## कल्पोपपन्नाः कल्पातीताश्च॥१७॥

कल्पेषूपपन्नाः कल्पोपपन्नाः, कल्पानतीताः कल्पातीताः।

**ग्रैवेयकादिषु नवादिकल्पनासंभवात् कल्पत्वप्रसङ्ग इति चेन्न; उक्तत्वात्॥१॥** स्यान्मतम् – नवग्रैवेयका नवानुदिशाः पञ्चानुत्तराः इति च कल्पनासंभवात् तेषामपि कल्पत्वप्रसङ्ग इति; तन्न; किं कारणम्? उक्तत्वात्। उक्तमेतत् – इन्द्रादिदशतया कल्पनासद्भावात् कल्पा इति। नवग्रैवेयकादिषु इन्द्रादिकल्पना नास्ति तेषामहमिन्द्रत्वात्।

तेषामवस्थाविशेषनिर्ज्ञानार्थमाह –

## उपर्युपरि॥१८॥

**उपर्युपरिवचनमतिर्यगसमस्थितिप्रतिपत्त्यर्थम्॥१॥** न ज्योतिष्कवत्तिर्यगवस्थिता नापि व्यन्तरवदसमस्थितय इति प्रतिपत्त्यर्थमुपर्युपरीत्युच्यते। कथमत्र द्वित्वम्? “सामीप्येऽधोऽध्युपरि” इति। ननु च, नात्र सामीप्यमस्त्यसंख्येययोजनान्तरत्वात्तेषाम्; नैष दोषः; तुल्यजातीयेनाऽव्यवधानं सामीप्यम्। न च तेषां तुल्यजातीयं व्यवधायकं विवक्षितम्। इदं विचार्यते – किमत्राधेयत्वेन कल्प्यमाना देवाः, उत विमानानि, आहोस्वित् कल्पा इति किं वा कामचारः?

**देवा इति चेन्न; अनिष्टत्वात्॥२॥** यदि देवा उपर्युपरीत्यनेनाभिसंबध्यन्ते; तन्न; किं कारणम्? अनिष्टत्वात्। देवानां हि उपर्युपर्यवस्थानमनिष्टम्।

**विमानानि इति चेन्न; श्रेणिप्रकीर्णकानां तिर्यगवस्थानात् ॥३॥** अथ विमानान्युपर्युपरीति कल्प्यन्ते; तदपि नोपपद्यते; श्रेणिप्रकीर्णकानां तिर्यगवस्थानात्। श्रेणिविमानानि पुष्पप्रकीर्णकविमानानि च प्रतीन्द्रकं तिर्यगवस्थितानीतीहेष्यन्ते।

**कल्पा इति चेददोषः॥४॥** यदि कल्पाः; न दोषो भवति। 'यथा न दोषः तथास्तु' कल्पा हि उपर्युपरि स्थिता इति।

**उपसर्जनत्वादनभिसंबन्धः इति चेन्न; दृष्टत्वात् ॥५॥** स्यादेतत् – कल्पोपपन्ना इत्यत्र कल्पग्रहणमुपसर्जनं तेनात्र संबन्धो नोपपद्ये इति; तन्न; किं कारणम्? दृष्टत्वात्। दृष्टो हि उपसर्जनीभूतस्याप्यर्थस्य बुद्ध्याऽपेक्षितस्य विशेषणेनाभिसंबन्धः। 'राजपुरुषोऽयम्। कस्य? राज्ञः' इति, एवमिहापि प्रत्यासत्तेः बुद्ध्योपसर्जनमपि कल्पग्रहणमभिसंबध्यते उपर्युपरि कल्पा इति।

अथ कल्पातीतेषु किमभिसंबध्यते ? विमानानि। यद्येवं कियत्सु कल्पविमानेषु ते देवा भवन्ति इत्यत आह –

**सौधर्मैशानसानत्कुमारमाहेन्द्रब्रह्मब्रह्मोत्तरलान्तवकापिष्ठशुक्रमहाशुक्रशतारसहस्रारेष्वानतप्राणतयोरारणाऽच्युतयोर्नवसु ग्रैवेयकेषु विजयवैजयन्तजयन्ताऽपराजितेषु सर्वार्थसिद्धौ च॥१९॥**

कथमेषां सौधर्मादीनां कल्पाभिधानम्?

**चातुरर्थिकेनाऽणा स्वभावतो वा कल्पाभिधानम् ॥१॥** चातुरर्थिकेन अणा स्वभावतो वा कल्पस्याभिधानं भवति। अथ कथमिन्द्राभिधानम् ?

**स्वभावतः साहचर्याद्वा इन्द्राभिधानम् ॥२॥** स्वभावतो वा साहचर्याद्वेन्द्राभिधानं द्रष्टव्यम्। तत्कथमिति चेत्? उच्यते – सुधर्मा नाम सभा, सा अस्मिन्नस्तीत्यण्

सौधर्मः कल्पः, "तदस्मिन्" इत्यण् तत्कल्पसाहचर्यादिन्द्रोऽपि सौधर्मः। ईशानो नाम इन्द्रः स्वभावतः, ईशानस्य निवासः कल्पः ऐशानः, "तस्य निवासः" इत्यण्, तत्साहचर्यादिन्द्रोऽप्यैशानः। सनत्कुमारो नामेन्द्रः स्वभावतः, तस्य निवासः कल्पः सानत्कुमारः, तत्साहचर्यादिन्द्रोऽपि सानत्कुमारः। महेन्द्रो नामेन्द्रः स्वभावतस्तस्य निवासः कल्पो माहेन्द्रः। तत्साहचर्यादिन्द्रोऽपि माहेन्द्रः। ब्रह्मेन्द्रः स्वभावतस्तस्य लोको ब्रह्मलोक कल्पः एवं ब्रह्मोत्तरश्च। ब्रह्मण इन्द्रस्य निवासः ब्राह्म इति कल्पाभिधानं भवति, तत्साहचर्याद् ब्राह्म इतीन्द्रस्याऽभिधानम्। लान्तवस्येन्द्रस्य निवासः लान्तवः कल्प, तत्साहचर्याद्वेन्द्रोऽपि लान्तवः। शुक्रस्य इन्द्रस्य निवासः शौक्रः कल्पः, तत्साहचर्या-दिन्द्रोऽपि शौक्रः। अथवा शुक्रः कल्पः, तत्साहचर्यात् इन्द्रोऽपि शुक्रः। शतारस्येन्द्रस्य निवासः शातार इति कल्पः, तत्साहचर्यादिन्द्रोऽपि शातारः,। अथवा शतारः कल्पः, तत्साहचर्यादिन्द्रोऽपि शतारः। सहस्रारस्याप्येवम्। आनतस्येन्द्रस्य निवासः आनतः कल्पः तत्साहचर्यादिन्द्रोऽप्यानतः। अथवाऽऽनतः कल्पः, तत्साहचर्यादिन्द्रोऽप्यानतः। प्राणतस्येन्द्रस्य निवासः प्राणतः कल्पः तत्साहचर्यादिन्द्रोऽपि प्राणतः। अथवा प्राणतः कल्पः तत्सहचरित इन्द्रोऽपि प्राणतः। आरणस्य इन्द्रस्य निवासः आरणः कल्पः, तत्साहचर्यादिन्द्रोऽप्यारणः। अथवा आरणः कल्पः, तत्सहचरित इन्द्रोप्यारणः। अच्युतस्येन्द्रस्य इन्द्रोऽप्यच्युतः। लोकपुरुषस्य ग्रीवास्थानीयत्वात् ग्रीवाः ग्रीवासु भवानि ग्रैवेयकाणि विमानानि, तत्साहचर्यादिन्द्रा अपि ग्रैवेयकाः। विजयादयोऽन्वर्थसंज्ञाः अभ्युदयविघ्नहेतुविजयात्। सर्वार्थानां सिद्धेश्च विजयादीनि विमानानि, तत्साहचर्यादिन्द्रा अपि विजयादिनामानः।

अथ किमर्थं सर्वार्थसिद्धस्य पृथग्ग्रहणं न तैः सह द्वन्द्वः कर्तव्य?

**सर्वार्थसिद्धस्य पृथग्ग्रहणं स्थित्यादिविशेषप्रतिपत्त्यर्थम्॥॥** विजयादिषु चतुर्षु जघन्या स्थितिर्द्वात्रिंशत्सागरोपमाः साधिकाः; उत्कृष्टा त्रयस्त्रिंशत्सागरोपमाः।

सर्वार्थसिद्धेः जघन्योत्कृष्टा च त्रयस्त्रिंशत्सागरोपमा। यः प्रभावः सर्वार्थसिद्धैकदेवस्य नासौ सर्वविजया-दिदेवानामित्येवमादिविशेषप्रतिपत्त्यर्थं विजयादिभ्यः सर्वार्थसिद्धस्य पृथग्ग्रहणं क्रियते।

**ग्रैवेयकादीनां पृथग्ग्रहणं कल्पातीतत्वनिर्ज्ञापनार्थम् ॥४॥** सौधर्मादयोऽच्युतान्ता द्वादशकल्पाः, ततोऽन्ये कल्पातीता इत्येतस्य निर्ज्ञापनार्थं ग्रैवेयकादीनां पृथक् ग्रहणं क्रियते।

**नवशब्दस्य वृत्त्यकरणमनुदिशसूचनार्थम् ॥५॥** नवशब्दस्य ग्रैवेयकशब्देन वृत्तिः कर्तव्या नवग्रैवेयकेष्विति, तदकरणमन्यान्यपि नव सन्तीत्येतस्य सूचनार्थम्, तेनाऽ-नुदिशसंग्रहः कृतो भवति। इतरथा हि लघ्वर्था वृत्तिः क्रियते किमिदमनुदिशमिति? प्रतिदिशमित्यर्थः। दिक्शब्दस्य शरत्प्रभृतिषूपादानादनुदिशं विमानान्यनुदिशविमानानि। आकारान्तो वा दिशाशब्दो दिक्पर्यायवाचीति तेनानोर्वृत्तिः।

**उपर्युपरीत्यनेन द्वयोर्द्वयोरभिसंबन्धः॥६॥** आगमाऽपेक्षया व्यवस्था भवतीति उपर्युपरीत्यनेन द्वयोर्द्वयोरभिसंबन्धो वेदितव्यः। प्रथमौ सौधर्मैशानकल्पौ, तयोरुपरि सानत्कुमारमाहेन्द्रौ। तयोरुपरि ब्रह्मलोकब्रह्मोत्तरौ। तयोरुपरि लान्तवकापिष्ठौ। तयोरुपरि शुक्रमहाशुक्रौ। तयोरुपरि शतारसहस्रारौ। तयोरुपरि आनतप्राणतौ। तयोरुपरि आरणाऽच्युतौ।

**प्रत्येकमिन्द्रसंबन्धो मध्ये प्रतिद्वयम् ॥७॥** प्रत्येकमिन्द्रसंबन्धो वेदितव्यः, मध्ये प्रतिद्वयम् । सौधर्मैशानकल्पयोर्द्वाविन्द्रौ। सानत्कुमारमाहेन्द्रयोर्द्वौ। ब्रह्मलोकब्रह्मोत्तरयोरेकः ब्रह्मा नाम। लान्तवकापिष्ठयोरेका लान्तवाऽऽख्यः। शुक्रमहाशुक्रयोरेकः शुक्रसंज्ञः। शतारसहस्रारयोरेकः शतारनामा। आनतप्राणतयोर्द्वौ । आरणाऽच्युतयोर्द्वौ ।

**तथा चोत्तरयोः पृथग्वचनमर्थवत् ॥॥** एवं कृत्वोत्तरयोः पृथग्वचनमर्थवत् भवति - आनतप्राणतयोरारणाऽच्युतयोरिति। इतरथा हि लघ्वर्थ एक एव द्वन्द्वः क्रियते। तद्यथा – अस्माद् भूमितलान्नवनवतिर्योजनसहस्राणि चत्वारिंशच्च योजनान्युत्पत्य सौधर्मै-शानकल्पौ भवतः। तयोरेकत्रिंशद् विमानप्रस्ताराः– ऋतुचन्द्रविमलवल्गुवीराऽरुण-नन्दननलिनलोहितकाञ्चनवञ्चन्मारुतऋद्वीशवैडूर्यरूचकरुचिराऽङ्कस्फटिकतपनीयमेघहा-रिद्रपद्मलोहिताक्षवज्रनन्द्यावर्तप्रभङ्करपिष्टाकगजमस्तकचित्रप्रभासंज्ञाः। मन्दरचूलिकाया उपरि ऋतुविमानम्, तयोरन्तरं वालाग्रमात्रम्। ऋतुविमानाच्चतसृषु दिक्षु चतस्रो विमानश्रेण्यो निर्गताः, प्रत्येकं द्विषष्ठविमानसंख्याः। विदिक्षु पुष्पप्रकीर्णकविमानानि। एवमेकैकश्रेणीविमानहानिरा प्रभाविमानाद्वेदितव्या। एकैकप्रस्तारान्तरमसंख्येयानि योजनशतसहस्राणि। तत्र प्रभासंज्ञादिन्द्रकविमानाद् दक्षिणस्यां दिशि श्रेण्यां द्वात्रिंशद्विमानसंख्यायामष्टादशं श्रेणीविमानं तत्कल्पविमानम्। तस्य स्वस्तिकवर्धमान-विश्रुताख्यास्त्रयः प्राकाराः। तत्र बाहयप्रकारान्तरनिवासीन्यनीकानि पारिषदाश्च। मध्यप्राकारान्तरनिवासिनस्त्रायस्त्रिंशाः, विमानाभ्यन्तरप्राकारनिवासी देवराजः शक्रः सौधर्म इति चोच्यते। तस्य विमानस्य चतसृषु दिक्षु चत्वारि नगराणि काञ्चनाशोकमन्दिरमस्तारगल्वसंज्ञानि। तस्य द्वात्रिंशद्विमानशतसहस्राणि, त्रयस्त्रिंशत् त्रायस्त्रिंशाः, चतुरशीतिरात्मरक्षसहस्राणि, तिस्रः परिषदः, सप्तानीकानि, चतुरशीतिः सामानिकसहस्राणि, चत्वारो लोकपालाः; पद्मा, शिवा, सुजाता, सुलसा, अञ्जुका कालिन्दी श्यामा भानुरित्येतावष्टावग्रमहिष्यः। अन्यानि चत्वारिंशद्वल्लभिकानां देवीनां सहस्राणि। सर्वाश्चैता अग्रमहिष्यो वल्लभिकाश्च प्रत्येकं पञ्चपल्योपमस्थितिकाः षोडशदेवीसहस्रपरिवृताः। एकैका चाऽग्रमहिषी वल्लभिका च षोडशदेवीरूपसहस्र-विकरणसमर्था। तत्र शक्रस्याभ्यन्तरपरिषत् समिता नाम द्वादशसहस्राणि देवानां पञ्चपल्योपमायुषाम्। चन्द्रा नाम मध्यपरिषत् चर्दुशसहस्राणि देवानां चतुःपल्योप-मायुषाम्। जातुर्नाम बाहयपरिषत् षोडशसहस्राणि देवानां त्रिपल्योपमायुषाम्। आभ्यन्तर

परिषदि देवानामेकैकस्य देवस्य देव्यः सप्तशतसंख्या अर्धतृतीयपल्योपमस्थितयः। मध्यपरिषदि देवानामेकैकस्य देवस्य देव्यः षट्शतसंख्याः द्विपल्योपमस्थितयः। बाह्यपरिषदि देवानामेकैकस्य देवस्य देव्यः पञ्चशतसंख्याः अध्यर्धपल्योपमस्थितयः, तावद्देवीरूपविकरणसमर्थाः। अष्टानामप्यग्रमहिषीणामभ्यन्तरपरिषत् सप्तदेवीशतानि। मध्यमपरिषत् षड्देवीशतानि। बाह्यपरिषत् पञ्चदेवीशतानि। एतासु तिसृष्वपि परिषत्सु देव्योऽर्धतृतीयपल्योपमस्थितयः। पदात्यश्वगजवृषभरथनर्तकीगन्धर्वाख्यानि सप्तानीकानि पल्योपमस्थितीनि। अनीकमहत्तराश्च पल्योपमायुषः। तत्र वायुर्नाम पदात्यनीकमहत्तरः सप्तभिः कक्षाभिः परिवृतः। प्रथमा कक्षा चतुरशीतिः पदातिशतसहस्राणि। द्वितीया तद्द्विगुणा। एवं द्विगुणा द्विगुणा पदातिसंख्या आसप्तम्याः। हरिरश्वानीकमहत्तरः। ऐरावतो गजानीकमहत्तरः। दामयष्टिर्वृषभानीकमहत्तरः। मातलिी रथानीकमहत्तरः। नीलाञ्जना नर्तकी गणमहत्तरिका। अरिष्टयशस्को नाम गन्धर्वानीकमहत्तरः। एषां षण्णामप्यनीकानां संख्या पदातिसंख्यया तुल्या, सैषा विक्रियाकृता। प्राकृती त्वेकैकस्यानीकस्य षट्छतसंख्या। तेषां प्राकृतानां देवानां प्रत्येकं षट्छतसंख्यानामेकैकस्य देवस्य षट्देवीशतानि। एकैका चात्र देवी षड्देवीरूपविकरणसमर्थाऽर्धपल्योपमस्थितिका। सप्ताना-मप्यनीकमहत्तराणामेकैकस्य षट्देवीशतानि। एकैका चात्र देवी षड्देवीरूपविकरणसमर्थाऽ-र्धपल्योपमस्थितिका। आत्मरक्षाणां चतुरशीतिसहस्रसंख्यानां पल्योपमायुषामेकैकस्य द्वे द्वे देवीशते। एकैका चात्र देवी षड् देवीरूपविकरणसमर्थाऽर्धपल्योपमस्थितिका। शक्रस्य बालको नामाऽऽभियोग्यः पल्योपमायुः, जम्बूद्वीपप्रमाणायामयानविमानविक्रियासमर्थः। तस्य षड्देवीशतानि। एकैका चात्र षड्देवीरूपविकरणसमर्थाऽर्धपल्योपमस्थितिका। प्राच्यां दिशि स्वयंप्रभे विमाने सोमो लोकपालोऽर्धतृतीयपल्योपमायुः। तस्य चत्वारि सामानिकसहस्राणि अर्धतृतीयपल्योपमायूंषि। चत्वारि देवीसहस्राण्यर्धतृतीयपल्योपमायूँषि। चतुर्णां लोकपालानां चतस्रोऽग्रमहिष्योऽर्धतृतीयपल्योपमायुषः। सोमस्याभ्यन्तरपरिषद्दीषा

नाम पञ्चपञ्चाशद्देवाः सपादपल्योपमायुषः। दृढा नाम मध्यमपरिषत् चत्वारि देवशतानि सपादपल्योपमायूँषि। चतुरन्ता नाम बाह्यपरिषत् पञ्चदेवशतानि सपादपल्योपमायूँषि। अपाच्यां दिशि वरज्येष्ठे विमाने यमो नाम लोकपालः। शेषं सोमवत्। प्रतीच्यां दिश्यञ्जने विमाने वरुणो नाम लोकपालः पादोनत्रिपल्योपमायुः। ईषा नाम तस्याऽभ्यन्तरपरिषत् षष्टिर्देवा अध्यर्धपल्योपमायुषः। मध्या दृढा पञ्चदेवशतानि देशोनाध्यर्धपल्योपमायूंषि। बाह्या चतुरन्ता षड् देवशतानि देशाधिकाध्यर्धपल्योपमायूँषि। तिसृष्वपि परिषत्सु स्वभर्तृस्थितयो देव्यः। शेषं सोमवत्। उदीच्यां दिशि वल्गुविमाने वैश्रवणो नाम लोकपालः त्रिपल्योपमायुः, तस्याऽभ्यन्तरपरिषदीषा, सप्ततिर्देवाः अध्यर्धपल्योपमायुषः। मध्या दृढा षड् देवशतानि देशोनाध्यर्धपल्योपमायूँषि। बाह्या चतुरन्ता सप्तदेवशतानि सपादपल्योपमायूँषि। तिसृष्वपि परिषत्सु स्वभर्तृस्थितयो देव्यः। शेषं सोमवत्। चतुर्णामपि लोकपालानामेकैकस्याऽर्धचतुर्थकोटीसंख्याअप्सरसः। सौधर्मेन्द्रकविमानानामेकत्रिंशच्छ्रेणीविमानानां चत्वारि सहस्राणि त्रीणि शतान्येक-सप्तत्यधिकानि। पुष्पप्रकीर्णकविमानानामेकत्रिंशच्छतसहस्राणि पञ्चनवतिः सहस्राणि पञ्चशतान्यष्टनवत्यधिकानि। तान्येतानि समुदितानि द्वात्रिंशद्विमानशतसहस्राणि भवन्तीत्युक्तः सौधर्मकल्पः।

तथा तस्मात् प्रभाविमानात् उदक्छ्रेण्यां द्वात्रिंशद्विमानविरचितायां यदष्टादशं तत्कल्पविमानम्। तस्य परिवारवर्णना पूर्ववद्वेदितव्या। तस्याधिपतिः – ऐशानो देवराजः। यस्याऽष्टाविंशतिर्विमानशतसहस्राणि, त्रयस्त्रिंशत्त्रायस्त्रिंशा देवाः, अशीतिः सामानिकसहस्राणि, तिस्रः परिषदः, सप्तानीकानि, अशीतिरात्मरक्षसहस्राणि, चत्वारो लोकपालाः। श्रीमती, सुसीमा, वसुमित्रा, वसुन्धरा, जया, जयसेना, अमला, प्रभा चेत्यष्टावग्रमहिष्यः सप्तपल्योपमस्थितयः। द्वात्रिंशद्वल्लभिकासहस्राणि सप्तपल्योपमायूँषि। अभ्यन्तरपरिषत्समिता दशदेवसहस्राणि सप्तपल्योपमायूँषि। चन्द्रा मध्यमा परिषत् द्वादशदेवसहस्राणि षट्पल्योपमायूँषि। जातुर्बाह्यपरिषत्

चतुर्दशदेवसहस्राणि पञ्चपल्योप-मायूँषि। लघुपराक्रमः पदात्यनीकमहत्तरः, अमितगतिः अश्वानीकमहत्तरः, द्रुमकान्तो वृषभानीकमहत्तर; किन्नरो रथानीकमहत्तरः, पुष्पदन्तो गजानीकमहत्तरः, गीतयशा गन्धर्वानीकमहत्तरः श्वेता नर्तकीगणमहत्तारिका। तत्र पदात्यनीकमहत्तरस्य प्रथमा कक्षाऽशीतिर्देवसहस्राणि, द्वितीया तद्द्विगुणा, एवं द्विगुणा द्विगुणा आ सप्तम्याः। एवं शेषाणामप्यनीकानां विक्रिया संख्याता। त एते सर्वेऽनीकदेवाः तन्महत्तराश्च साधिक-पल्योपमायुषः। ऐशानस्य दक्षिणस्यां दिशि समे विमाने सोमो नाम लोकपालः, अर्धपञ्चपल्योपमायुः। तस्याभ्यन्तरपरिषत् षष्टिर्देवाः। मध्यमपरिषत् पञ्चदेवशतानि। बाह्यपरिषत् षड् देवशतानि सप्त च देवाः। अपरस्यां दिशि सर्वतोभद्रे यमो लोकपालः अर्धपञ्चमपल्योपमायुः। शेषः सोमवत्। उत्तरस्यां दिशि सुभद्रे वरुणो लोकपालः पञ्चपल्योपमायुः। तस्याभ्यन्तरपरिषदशीतिर्देवाः। मध्यमपरिषत् सप्तदेवशतानि। बाह्यपरिषदष्टौ देवशतानि। पूर्वस्यां श्रियमिते विमाने वैश्रवणो लोकपालः पादोन-पञ्चपल्योपमायुः। तस्याभ्यन्तरपरिषत् सप्ततिर्देवाः। मध्यमपरिषत् षड् देवशतानि। बाह्यपरिषत् सप्तदेवशतानि। ईशानस्य पुष्पको नामाऽऽभियोग्यो देवः बालकतुल्यः जम्बूद्वीपप्रमाणपुष्पकयानविमानविकरणसमर्थः। शेषः शक्रवन्नेयः। एवमुत्तरश्रेणिविमान-पुष्पकप्रकीर्णकाधिपतिरीशानो वर्णितः।

प्रभाविमानादूर्ध्वं बहूनि योजनसहस्राण्युत्पत्य सानत्कुमारमाहेन्द्रकल्पौ भवतः। तयोः सप्तविमानप्रस्ताराः – अञ्जनवनमालनागगरुडलाङ्गलबलभद्रचक्राभिधानाः। तत्राञ्जनविमानाच्चतसृष्वपि दिक्षु चतस्रो विमानश्रेण्यो निर्गताः। विदिक्षु पुष्पप्रकीर्णक विमानानि। तत्रैकैकस्यां विमानश्रेण्यामेकत्रिंशद्विमानान्येकैकहीनान्याचक्रात्। तेषामन्तरा-ण्यपि बहूनि योजनशतसहस्राणि। चक्राख्यादन्तविमानाद् दक्षिणश्रेण्यां पञ्चविंशति-विमानविराजितायां पञ्चदशं कल्पविमानं सौधर्मकल्पविमानसदृशम्। तस्याधिपतिः सानत्कुमारो देवराजः। तस्य द्वादशविमानशतसहस्राणि, त्रयस्त्रिंशत्त्रायस्त्रिंशा देवाः, द्विसप्ततिः सामानिकसहस्राणि, तिस्रः परिषदः,

सप्तानीकानि, द्विसप्ततिरात्मरक्षसहस्राणि, चत्वारो लोकपालाः। अष्टावग्रमहिष्यः शक्राग्रमहिषीसमाना नवपल्योपमायुषः। एकैका चात्राऽष्टाभिः देवीसहस्रैः परिवृताः द्वात्रिंशद्देवीसहस्रविकरणसमर्थाः। अष्टावन्यानि वल्लभिकानां सहस्राणि तावदायुर्विकरणसमर्थानि। समिताऽभ्यन्तरपरिषदष्टौ देवसहस्राणि साधिकार्धचतुर्थसागरोपमायूंषि। चन्द्रा मध्यमपरिषद् दशदेवसहस्राणि साधिकार्धचतुर्थ-सागरोपमायूंषि। जातुर्बाह्यपरिषत् द्वादशदेवसहस्राणि साधिकार्धचतुर्थसागरोपमायूंषि। अभ्यन्तरपरिषद्देवानामेकैकस्य सप्तदेवीशतानि पञ्चपल्योपमायूंऽषि। मध्यमपरिषद्देवाना-मेकैकस्य, षड् देवीशतानि पञ्चपल्योपमायूंषि। बाह्यपरिषद्देवानामेकैकस्य पञ्चदेवीशतानि पञ्चपल्योपमायूंषि। सर्वाणि च तानि तावद्विक्रियासमर्थानि। तस्यानीकमहत्तराः शक्रानीकमहत्तरसमाना अर्धचतुर्थसागरोपमायुषः। पदातीनां प्रथमकक्षा द्विसप्ततिसहस्राणि। द्वितीया तद्द्विगुणा। एवं द्विगुणा द्विगुणा आ सप्तम्याः। तथा शेषेष्वपि षट्स्वनी-केष्वनीकमहत्तराणामेकैकस्य त्रीणि देवीशतानि पञ्चपल्योपमायूँषि। आत्मरक्षदेवानामे-कैकस्य देवीशतं पञ्चपल्योपमायुः। बालकविमानाभियोग्यदेवस्याऽऽयुरर्धचतुर्थानि सागरो-पमाणि। त्रीणि देवीशतानि पञ्चपल्योपमायूंषि। पूर्वादिषु दिक्षु स्वयंप्रभवरज्येष्ठस्वयंजनवल्गुविमानवासिनः सोमयमवरुणवैश्रवणाः चत्वारो लोकपालाः। एषामेकैकस्य दश दश सामानिकशतानि दश दश देवी शतानि, चतस्रोऽग्रमहिष्यः, तिस्रः परिषदः। सागरोपमत्रयस्थिती सोमयमौ। पादाधिकतावदायुर्वरुणः। अर्धाधिकतावदायुर्वैश्रवणः। सोमयमयोरभ्यन्तरपरिषच्चत्वारिंशद् देवाः। मध्यमपरिषत् त्रीणि देवशतानि। बाह्यपरिषच्चत्वारि देवशतानि। वरुणस्याऽभ्यन्तरपरिषत्पञ्चाशद् देवाः। मध्या चत्वारि देवशतानि। बाह्या पञ्चदेवशतानि। वैश्रवणस्याभ्यन्तरपरिषत् पष्टिर्देवाः। मध्या पञ्चदेवशतानि। बाह्या परिषत् षड्देवशतानि। चतसृष्वप्यभ्यन्तरपरिषत्सु देवानामायुः त्रीणि सागरोपमाणि। एकैकस्य देवीशतम्। चतसृष्वपि मध्यमपरिषत्सु देवानामायुः देशोनानि त्रीणि

सागरोपमाणि। एकैकस्य पञ्चसप्ततिर्देव्यः। चतसृष्वपि बाह्यपरिषत्सु देवा अर्धतृतीयसागरोपमायुष; एकैकस्य पञ्चाशद् देव्यः।

तस्माच्चक्रविमानादुत्तरस्यां दिशि श्रेण्यां पञ्चविंशतिविमानमण्डितायां पञ्चदश-कल्पविमानं पूर्वोक्तवर्णनम्। तस्येश्वरो महेन्द्रो देवराजः। यस्याऽष्टौ विमानशतसहस्राणि, त्रयस्त्रिंशत्त्रायस्त्रिंशा देवाः, सप्ततिः सामानिकसहस्राणि, तिस्रः परिषदः, सप्ततिरात्मरक्ष-सहस्राणि, चत्वारो लोकपालाः, ऐशानाग्रमहिषीतुल्यसंज्ञा अष्टावग्रमहिष्यः एकादशपल्यो-पमायुषः। अष्टौ चास्य वल्लभिकानां सहस्राणि तावदायूँषि। शेषः सानत्कुमाराग्रमहिषी-वल्लभिकावत्। समिताऽभ्यन्तरपरिषत् षड्देवसहस्राणि। चन्द्रा मध्यमपरिषदष्टौदेव-सहस्राणि। जातुर्बाह्यपरिषत् दशदेवसहस्राणि। तिसृष्वपि परिषत्सु देवानां सनत्कुमार-परिषद्देवस्थितेरधिका स्थितिः। शेषो देवीगणपरिमाणायुर्विक्रियासामर्थ्यादिविधिः सानत्कुमारपरिषद्वत्। अनीकमहत्तराणामाख्या ऐशानवद्वेदितव्याः। पदात्यनीकस्य प्रथमकक्षा सप्ततिर्देवसहस्राणि, द्वितीया तद्द्विगुणा, एवं द्विगुणा द्विगुणा आ सप्तम्याः। तथा शेषेष्वपि षट्स्वनीकेषु। अनीकमहत्तराणामेकैकस्य त्रीणि देवीशतानि। एकैका चाऽत्र सप्तपल्योपमस्थितिका। आत्मरक्षाणामायुः साधिकार्धचतुर्थानि सागरोपमाणि। एकैकस्य सप्तपल्योपमायुषां देवीनां शतम्। दक्षिणादिषु दिक्षु समसर्वतोभद्रसुभद्रसमिल विमानवासिनः सोमयमवरुणवैश्रवणलोकपालाः। एकैकस्य दश दश सामानिकशतानि, तावत्संख्या देव्यः, चतस्रोऽग्रमहिष्यः, तिस्रः परिषदः। तत्रार्धचतुर्थसागरोपमस्थि-तिर्वरुणः, तदूनस्थितिर्धनद; ततोऽप्यूनस्थिती सोमयमौ, सोमयमयोरभ्यन्तरपरिषत् पञ्चाशद् देवाः। मध्या चत्वारि देवशतानि। बाह्या पञ्चदेवशतानि। वैश्रवणस्याऽभ्यन्तरपरिषत् षष्टिर्देवाः। मध्या पञ्चदेवशतानि। बाह्या षड्देवशतानि। वरुणस्याभ्यन्तरपरिषत्सप्ततिर्देवाः। मध्या षड्देवशतानि। बाह्या सप्तदेवशतानि। लोकपालचतुष्टयाभ्यन्तरपरिषद्देवानामैकैकस्य देवीशतम्। मध्यमपरिषद्देवानामेकैकस्य

सप्ततिर्देव्यः। बाह्यपरिषद्देवानामेकैकस्य पञ्चाशद्देव्यः। आयुश्च तेषां यथासंख्यं साधिकानि समानि देशोनानि च त्रीणि सागरोपमाणि। पुष्पकयानविमानाभियोग्यदेवः साधिकार्ध-चतुर्थसागरोपमायुः। तस्य देवानां साधिकद्विसागरायुषां शतम्।

शक्रविमानादूर्ध्वं बहूनि योजनशतसहस्राण्युत्पत्य ब्रह्मलोकब्रह्मोत्तरकल्पौ स्तः। तयोश्चत्वारो विमानप्रस्ताराः – अरिष्टो देवसमितो ब्रह्म ब्रह्मोत्तर इति। अरिष्टविमानाच्च चतसृष्वपि दिक्षु चतस्रो विमानश्रेण्यो निर्गताः चतुर्विंशतिविमानगणनाः। विदिक्षु पुष्पप्रकीर्णकानि। एवमेकैकश्रेणिविमानहान्यो नेतव्या आ ब्रह्मोत्तरात्। तेषां प्रस्ताराणा-मन्तराण्यपि बहूनि योजनशतसहस्राणि। ब्रह्मोत्तरविमानाद् दक्षिणश्रेण्यामेकविंशति-विमानविराजितायां द्वादशं कल्पविमानं पूर्वोक्तवर्णनम्। तस्याधिपतिः ब्रह्मो देवराजः। यस्य साधिके द्वे विमानशतसहस्रे त्रयस्त्रिंशत्त्रायस्त्रिंशाः देवाः, षट्त्रिंशत् सामानिकसहस्राणि, तिस्रः परिषदः, सप्तानीकानि, षड्त्रिंशदात्मरक्षसहस्राणि, चत्वारो लोकपालाः। पद्मादयः शक्राग्रमहिषीतुल्यसंज्ञा अष्टावग्रमहिष्यः त्रयोदशपल्योपमस्थितयः चतुर्देवीसहस्रपरिवृताः। द्वे च वल्लभिकासहस्रे त्रयोदशपल्योपमस्थितिके। एकैकाग्रमहिषी वल्लभिका चतुष्षष्टिदेवीरूपसहस्रविकरणसमर्था। समिताभ्यन्तरपरिषत् चत्वारि देवसह स्राण्यष्टसागरोपमायूंषि। चन्द्रा मध्यमपरिषत् षड्देवसहस्राणि देशोनाष्टसागरोपमायूंषि। जातुर्बाह्या अष्टौ देवसहस्राणि अष्टसागरोपमायूंषि। अभ्यन्तरपरिषद्देवानामेकैकस्य पञ्चाशद् देव्यः। मध्यमपरिषद्देवानां चत्वारिंशद् देव्यः। बाह्यपरिषद्देवानां त्रिंशद् देव्यः। वाय्वादयः सप्तानीकमहत्तरा अर्धाष्टसागरोपमायुषः। तत्र वायोः पदात्यनीकमहत्तरस्य प्रथमकक्षा षट्त्रिंशत्सहस्राणि, द्वितीया तद्द्विगुणा, एवं द्विगुणा द्विगुणा आ सप्तम्याः। सर्वेषामनीकमहत्तराणामेकैकस्यार्धतृतीयानि देवीशतानि। चतस्रोऽग्रमहिष्यः। आत्मरक्ष-देवानामायुरर्धाऽष्टमानि सागरोपमाणि। एकैकस्य पञ्चाशद् देव्यः। बालकाभियोग्यदेवोऽपि तावदायुर्देवीकः। पूर्वादिषु दिक्षु

स्वयंप्रभवरज्येष्ठस्वयंजनवल्गुविमाननिवासिनः सोमय-मवरुणवैश्रवणा लोकपालाः। तेषामेकैकस्य पञ्च सामानि-कशतानि, पञ्च देवीशतानि, चतस्रोऽग्रमहिष्यः। अर्धाष्टमसागरोपमायुर्धनदः। तदूनायुर्वरुणः. ततोऽप्यूनस्थिती सोमयमौ। सोमयमयोरभ्यन्तरपरिषत् त्रिंशद्देवाः। मध्या द्वे देवशते। बाह्या त्रीणि देवशतानि। वरुणस्याभ्यन्तरपरिषच्चत्वारिंशद् देवाः। मध्या त्रीणि देवशतानि। बाह्या चत्वारि देवशतानि। वैश्रवणस्याभ्यन्तरपरिषत् पञ्चाशद् देवाः। मध्या चत्वारि देवशतानि। बाह्या पञ्च देवशतानि। चतसृष्वभ्यन्तरपरिषत्सु देवानामायुरष्टौ सागरोपमाणि। मध्यमपरिषद्देवानां देशोनान्यष्टौ सागरोपमाणि। बाह्यपरिषद्देवानां तान्येवार्धाष्टमानि। तेषां देव्यो यथासंख्यं पञ्चाशच्चत्वारिंशत् त्रिंशच्च वेदितव्याः।

ब्रह्मोत्तरादुत्तरश्रेण्यामेकविंशतिविमानायां द्वादशं कल्पविमानं पूर्ववत्। तस्याधिपतिः ब्रह्मोत्तरः। यस्य न्यूने द्वे विमानशतसहस्रे, त्रयस्त्रिंशत्त्रायस्त्रिंशा देवाः, द्वात्रिंशत्सामा-निकसहस्राणि, तिस्रः परिषदः, सप्तानीकानि, द्वात्रिंशदात्मरक्षसहस्राणि, चत्वारो लोकपालाः, ऐशानेन्द्राग्रमहिषीतुल्यसंज्ञा अष्टावग्रमहिष्यः पञ्चदशपल्योपमायुषः, द्वे च वल्लभिकासहस्रे तावदायुषी। अवशिष्टं ब्रह्मेन्द्रवत्। ब्रह्मोत्तरस्याभ्यन्तरपरिषत् समिता द्वे देवसहस्रे। चन्द्रा मध्या चत्वारि देवसहस्राणि। जातुर्बाह्या षड्देवसहस्राणि। अवशिष्टं ब्रह्मेन्द्रपरिषद्वत्। पुष्पकाभियोग्योऽपि तद्वदेव। पदात्यनीकस्य प्रथमकक्षा द्वात्रिंशद् देवसहस्राणि। इतरद् ब्रह्मेन्द्रवत्। आत्मरक्षाश्च तद्वदेव। दक्षिणादिदिक्षु सोमादयो लोकपाला ब्रह्मेन्द्रवन्नेयाः।

ब्रह्मोत्तरविमानादूर्ध्वं बहुयोजनशतसहस्राण्युत्पत्य लान्तवकापिष्ठौ कल्पौ भवतः। ययोर्द्वौ विमानप्रस्तारौ ब्रह्महृदयलान्तवाख्यौ। तत्र लांतवविमानाद् दक्षिणश्रेण्यामे-कान्नविंशतिविमानविरचितायां नवमं कल्पविमानं पूर्वोक्तपरिवारम्। तस्याधिपतिर्लान्तवो नाम देवराजः। यस्याधिकानि पञ्चविंशतिविमानसहस्राणि,

त्रयस्त्रिंशत् त्रायस्त्रिंशा देवा; चतुर्विंशतिः सामानिकसहस्राणि, तिस्रः परिषदः, सप्तानीकानि, चतुर्विंशतिरात्मरक्ष-सहस्राणि, चत्वारो लोकपालाः, शक्राग्रमहिषीसमानसंज्ञा अष्टावग्रमहिष्यः सप्तदश-पल्योपमायुषः, प्रत्येकं द्वाभ्यां देवीसहस्राभ्यां परिवृताः। अन्यानि च वल्लभिकानां तावदायुषां पञ्चशतानि। एकैका चात्राग्रमहिषी वल्लभिका चैकं देवीशतसहस्रमष्टाविंशतिः च देवीसहस्राणि विकरोति। समिताऽभ्यन्तरपरिषदेकं देवसहस्रम्। तत्रैकैकस्य साधिकानि दशसागरोपमाण्यायुः, सप्ताशीतिश्च देव्यः। मध्या चन्द्रा द्वे देवसहस्रे। अत्रैकैकस्य देशोनानि दशसागरोपमाण्यायुः, पञ्चसप्ततिश्च देव्यः। जातुर्बाह्या चत्वारि देवसहस्राणि। तत्रैकैकस्य मध्यपरिषद्देवायुषः किञ्चिन्न्यूनमायु; त्रिषष्टिश्च देव्यः। बालकाभियोग्यो बाह्यपरिषत्समायुः, षष्टिश्चास्य देव्यः। अनीकानां तन्महत्तराणां चायुः मध्यपरिषदायुषः किञ्चिन्न्यूनमायुः। सर्वेषां प्रथमकक्षा चतुर्विंशतिः सहस्राणि। ततो द्विगुणा द्विगुणा आ सप्तम्याः। तत्रैकैकस्य देवस्य महत्तरस्य च षष्टिर्देव्यः। पूर्वादिषु दिक्षु स्वयंप्रभवस्-ज्येष्ठस्वयंजनवल्गुविमाननिवासिनः सोमादयश्चत्वारो लोकपालाः। तत्रैकैकस्य चत्वारि सामानिकशतानि, अर्धतृतीयानि देवीशतानि, चतस्रोऽग्रमहिष्यः, तिस्रः परिषदः। जातुपरिषत्सदृशायुर्वैश्रवणः। ततो न्यूनायुर्वरुणः। ततो न्यूनायुषौ सोमयमौ। सोमयमयोरभ्यन्तरपरिषद्विंशतिर्देवा; मध्या देवशतम्, बाह्या द्वे देवशते। वरुणस्या-भ्यन्तरपरिषत्त्रिंशद् देवाः, मध्या द्वे देवशते। बाह्या त्रीणि देवशतानि। वैश्रवणस्याभ्यन्तरपरिषच्चत्वारिंशद् देवाः, मध्या त्रीणि देवशतानि, बाह्या चत्वारि देवशतानि। सर्वाभ्यन्तरपरिषद्देवानामायुरेकादशसागरोपमाणि। मध्यमपरिषद्देवानां तान्येव किञ्चिन्न्यूनानि। बाह्यपरिषद्देवानां ततोऽपि किञ्चिन्न्यूनानि। तेषां यथाक्रमं पञ्चविंशतिः विंशतिः पञ्चदशदेव्यः।

लान्तवविमानादुत्तरश्रेण्यामेकान्नविंशतिविमानविराजितायां नवमं कल्पविमानं पूर्वोक्तवर्णनम्। तस्याधिपतिः कापिष्ठ। यस्योनानि पञ्चविंशतिः विमानसहस्राणि, त्रयस्त्रिंशत्त्रायस्त्रिंशा देवाः, द्वाविंशतिः सामानिकसहस्राणि, तिस्रः परिषदः

सप्तानीकानि, द्वाविंशतिरात्मरक्षसहस्राणि, चत्वारो लोकपालाः, श्रीमत्यादयोऽष्टावग्रमहिष्यः पञ्चशत-संख्याश्च वल्लभिका एकान्नविंशतिपल्योपमायुषः। अवशिष्टं लान्तवेन्द्रवत्, परिषदश्च। सर्वेषामनीकानां प्रथमकक्षा द्वाविंशतिसहस्राणि, इतरल्लान्तवेन्द्रवत्। आत्मरक्षादिविधिश्च तथैव ज्ञेयः। अयं तु विशेषः लान्तवेन्द्रजातुपरिषत्सदृशायुर्वरुणः। तत ऊनायुः वैश्रवणः। ततोऽप्यूनायुषौ सोमयमौ।

लान्तवविमानाद्बहूनि योजनशतसहस्राण्युत्पत्य महाशुक्रो नाम विमानप्रस्तारो भवति। शुक्रमहाशुक्रौ स्तः। ततो महाशुक्रविमानात् दक्षिणश्रेण्यामष्टादशविमान-परिमण्डितायां द्वादशं कल्पविमानं पूर्वोक्तपरिवारम्। तस्याधिपतिः शुक्रो नाम देवराजः। यस्याधिकानि विंशतिर्विमानसहस्राणि, त्रयस्त्रिंशत्त्रायस्त्रिंशा देवाः, चतुर्दश सामानिक-सहस्राणि, तिस्रः परिषदः, सप्तानीकानि, चतुर्दशाऽऽत्मरक्षसहस्राणि, चत्वारो लोकपालाः, पद्मादयोष्टावग्रमहिष्यः, एकैका चात्र दशभिर्देवीसहस्रैः परिवृता। वल्लभिकाश्चार्धतृतीय-शतसंख्याः। एकैका यत्राग्रमहिषी वल्लभिका चैकविंशतिपल्योपमायुषी, द्वे देवीरूप-शतसहस्रे षट्पञ्चाशतं च देवीरूपसहस्राणि विकरोति। समिताऽभ्यन्तरपरिषत् पञ्चदेवशतानि चतुर्दशसागरोपमायूंषि। तत्रैकैकस्य त्रिचत्वारिंशद् देव्यः। चन्द्रा मध्या एकं देवसहस्रं देशोनचतुर्दशसागरोपमायुः। तत्रैकैकस्याष्टत्रिंशद् देव्यः। जातुर्बाह्या द्वे देवसहस्रे मध्यमपरिषदूनायुषी। अत्रैकैकस्य पञ्चत्रिंशद् देव्यः। अनीकानां महत्तराणां च जातुवदायुः। सर्वेषां प्रथमकक्षा चतुर्दशदेवसहस्राणि, एकैकस्य पञ्चाशद् देव्यः। बालकाभियोग्योऽपि तावदायुर्देवीकः, आत्मरक्षाश्च। पूर्वादिषु दिक्षु स्वयंप्रभवरज्येष्ठ-स्वयंजनवल्गुविमान-वासिनः सोमादयश्चत्वारो लोकपालाः। धनदस्य जातुवदायुः, ततोऽप्यूनायुर्वरुणः, ततोऽप्यूनायुषौ सोमयमौ। तयोरभ्यन्तरपरिषदष्टदेवाः। मध्या पञ्चाशत्। बाह्या देवशतम्। वरुणस्याभ्यन्तरपरिषत् विंशतिर्देवाः। मध्या देवशतम्। बाह्या द्वे देवशते। वैश्रवणस्याभ्यन्तरपरिषद्विंशतिर्देवाः। मध्या द्वे देवशते। बाह्या त्रीणि देवशतानि।

सर्वाभ्यन्तरपरिषद्देवानामायुः पञ्चदश सागरोपमाणि। मध्यमपरिषद्देवा-नामायुस्तान्येव देशोनानि। बाह्यपरिषद्देवानामायुः सार्धचतुर्दशसागरोपमाणि। तेषां यथाक्रमं विंशतिः पञ्चदश दश च देव्यो भवन्ति।

महाशुक्रविमानादुत्तरश्रेण्यामष्टादशविमानशोभितायां द्वादशं कल्पविमानम्। तस्या-धिपतिः महाशुक्रः। यस्योनानि विंशतिर्विमानसहस्राणि, त्रयस्त्रिंशत्त्रायस्त्रिंशा देवाः, द्वादश सामानिकसहस्राणि, तिस्रः परिषदः, सप्तानीकानि, द्वादशात्मरक्षसहस्राणि, चत्वारो लोकपालाः, श्रीमत्यादयोऽष्टावग्रमहिष्योऽर्धतृतीयशतसंख्याश्च वल्लभिकाः त्रयोविंशति-पल्योपमायुषः। शेषं शुक्रवत्। तिस्रोऽपि परिषदः शुक्रवदेव वेदितव्याः। अनीकानां प्रथमकक्षा द्वादशदेवसहस्राणि। शेषं शुक्रवत्। आत्मरक्षाणां पुष्पकाभियोग्यस्य च तथैव विधिः। दक्षिणादिषु दिक्षु समसर्वतोभद्रसुभद्रसमितविमाननिवासिनः सोमादयश्चत्वारो लोकपालाः। शुक्रजातुपरिषत्समस्थितिर्वरुणः। तत ऊनायुर्वैश्रवणः। ततोऽप्यूनायूषौ सोमयमौ। शेषं शुक्रवत्।

महाशुक्रविमानादूर्ध्वं बहूनि योजनशतसहस्राण्युत्पत्य सहस्रार एकविमानप्रस्तारो भवति। यत्र दक्षिणोत्तरौ शतारसहस्रारकल्पौ। तत्र सहस्रारविमानाद् दक्षिणश्रेण्यां सप्तदशविमानगणनायां नवमं कल्पविमानम्। तस्याधिपतिः शतारो नाम देवराजः। यस्याधिकानि त्रीणि विमानसहस्राणि, त्रयस्त्रिंशत्त्रायस्त्रिंशा देवाः, चत्वारि सामानिक-सहस्राणि, तिस्रः परिषदः, सप्तानीकानि, चत्वार्यात्मरक्षसहस्राणि, चत्वारो लोकपालाः, पद्मादयोऽष्टावग्रमहिष्यः पञ्चविंशतिपल्योपमायुषः। एकैका चात्र पञ्चभिर्देवीशतैः परिवृताः पञ्चदेवीरूपशतसहस्राणि द्वादशदेवीरूपसहस्राणि विकरोति। द्विषष्टिर्वल्ल-भिकास्तावदायुर्विक्रियाः। समिताऽभ्यन्तरपरिषदर्धतृतीयानि देवशतानि साधिकषोडश-सागरोपमायूंषि। तेषामेकैकस्यैकविंशतिर्देव्यः। चन्द्रा मध्या पञ्चदेवशतानि देशोनषोडश-

सागरोपमायूंषि। तेषामेकैकस्याऽष्टादश देव्यः। जातुर्बाह्या एकं देवसहस्रं चन्द्रायुरूनायु; तेषामेकैकस्य पञ्चदश देव्यः। सर्वेषामप्यनीकानां महत्तराणां च जातुवदायुः। प्रथमकक्षा चत्वारि देवसहस्राणि। एकैकस्य चत्वारिंशद् देव्यः। पूर्वादिषु दिक्षु स्वयंप्रभादिविमान निवासिनः सोमादयश्चत्वारो लोकपालाः। जातुपरिषत्समायुर्वैश्रवणः। तत ऊनायुर्वरुण; ततोऽप्यूनायुषौ सोमयमौ। तयोरभ्यन्तरपरिषत्पञ्चदेवाः। मध्या पञ्चविंशतिर्देवाः। बाह्या पञ्चाशद् देवाः। वरुणस्याभ्यन्तरपरिषद् दशदेवाः। मध्या पञ्चाशद् देवाः। बाह्या देवशतम्। वैश्रवणस्याभ्यन्तरपरिषत् पञ्चदशदेवाः। मध्या देवशतम्। बाह्या द्वे देवशते। सर्वाभ्यन्तरपरिषद्देवानामायुः सप्तदशसागरोपमाणि। मध्यमपरिषद्देवानामायुः तान्येव देशोनानि। बाह्यपरिषद्देवानामायुः सार्धानि षोडशसागरोपमाणि। तेषां यथाक्रमं पञ्चदश दश पञ्चदेव्यो भवन्ति।

सहस्रारविमानादुत्तरश्रेण्यां सप्तदशविमानभूषितायां नवमं कल्पविमानम्। तस्या धिपतिः सहस्रारः। यस्योनानि त्रीणि विमानसहस्राणि, त्रयस्त्रिंशत्त्रायस्त्रिंशा देवाः, द्वे सामानिकसहस्रे, तिस्रः परिषदः, सप्तानीकानि, द्वे आत्मरक्षसहस्रे, चत्वारो लोकपालाः, श्रीमत्यादयोऽष्टावग्रमहिष्यः सप्तविंशतिपल्योपमायुषः। शेषः शतारेन्द्रवत्। परिषदात्मरक्षा-ऽनीकाभियोग्यवर्णना च शतारेन्द्रवत्। अयं तु विशेषः – अनीकानां प्रथमकक्षा द्वे देवसहस्रे। दक्षिणादिषु दिक्षु समसर्वतोभद्रसुभद्रसमितविमाननिवासिनः सोमादयश्चत्वारो लोकपालाः। तेषामेकैकस्य द्वे सामानिकदेवशते, त्रिषष्टिर्देव्यः, चतस्रोऽग्रमहिष्यः, तिस्रः परिषदः। शेषः शतारेन्द्रवत्। शतारेन्द्रजातुपरिषत्सदृशायुर्वरुणः। ततो न्यूनायुर्धनदः। ततो न्यूनायुषौ सोमयमौ। शेषः शतारेन्द्रवत्।

सहस्रारविमानादूर्ध्वं बहूनि योजनशतसहस्राण्युत्पत्याऽऽनतप्राणतारणाच्युतकल्पाः सन्ति। तत्र षड्विमानप्रस्ताराः – आनतप्राणतपुष्पकसातकारणाच्युतसंज्ञकाः। तत्रानत-विमानाच्चतसृष्वपि दिक्षु चतस्रो विमानश्रेण्यो निर्गताः। विदिक्षु पुष्पप्रकीर्णकानि।

तत्रैकैकस्यां विमानश्रेण्यां षोडशश्रेणिविमानानि। एवमौपरिष्टेषु पञ्चसु विमानप्रस्तारेष्वेकैकश्रेणिविमानहानिर्वेदितव्या। तत्रारणाच्युतविमानाद् दक्षिणश्रेण्यामेकादशविमानविरचितायां षष्ठं कल्पविमानम्। तस्याधिपतिरारणो नाम देवराजः। यस्याधिकान्यर्धचतुर्थानि विमानशतानि, त्रयस्त्रिंशत्त्त्रायत्रिंशा देवाः, दश सामानिकशतानि, तिस्रः परिषदः, सप्तानीकानि, दशात्मरक्षशतानि, चत्वारो लोकपालाः, पद्मादयोऽष्टावग्रमहिष्योऽष्ट-चत्वारिंशत्पल्योपमायुषः। एकैका चात्राऽर्धतृतीयैः देवीशतैः परिवृता दशदेवीरूपशत-सहस्राणि चतुर्विंशति च देवीरूपसहस्राणि विकरोति। वल्लभिकाश्च पञ्चदश तावदायुर्विक्रियाः। समिताऽभ्यन्तरपरिषत् पञ्चविंशतिर्देवशतम्। तत्रैकैकः साधिकविंशति-सागरोपमायुर्दशदेवीकः। चन्द्रा मध्या, अर्धतृतीयानि देवशतानि। तत्रैकैकः देशोनविंशति-सागरोपमस्थितिरष्टदेवीकः। जातुर्बाह्या पञ्चदेवशतानि। तत्रैकैकोऽर्धविंशतिसागरो-पमस्थितिः षड्देवीकः। अनीकानां प्रथमकक्षैकं देवसहस्रम्। सर्वेषां देवानां तन्महत्तराणां चैकैकस्य त्रिंशद्देव्यः। आत्मरक्षाणाञ्च त्रिंशद्वाहकाभियोग्यस्य चन्द्रायुषः ऊनमायुः, त्रिंशद् देव्यः। पूर्वादिषु दिक्षु स्वयंप्रभादिविमाननिवासिनः सोमादयश्चत्वारो लोकपालाः। तेषामेकैकस्य सामानिकशतम्। द्वात्रिंशद् देव्यः, चतस्रोऽग्रमहिष्यः, तिस्रः परिषदः। जातुसमानायुर्वैश्रवणः। ततो न्यूनायुर्वरुणः। ततो न्यनायुषौ सोमयमौ। तयोरभ्यन्तर परिषत्त्रयो देवाः। मध्या द्वादश। बाह्या पञ्चविंशतिः। वरुणस्याभ्यन्तरपरिषत् पञ्चदेवाः। मध्या पञ्चविंशतिः। बाह्या पञ्चाशत्। वैश्रवणस्याभ्यन्तरपरिषत् षड् देवाः। मध्या पञ्चाशत्। बाह्या शतम्। तेषां यथाक्रममेकविंशतिसागरोपमाणि तान्येव देशोनानि तान्येव चार्धोनान्यायुरवगन्तव्यम्, सप्त पञ्च तिस्रश्च देव्यो ज्ञेयाः।

आरणाच्युतविमानादुत्तरश्रेण्यामेकादशविमानविभूषितायां षष्ठं कल्पविमानम्। तस्याधिपतिरच्युतो नाम देवराजः। यस्योनान्यर्धचतुर्थानि विमानशतानि। त्रयस्त्रिंशत्त्राय-स्त्रिंशा देवाः। दश सामानिकशतानि। तिस्रः परिषदः। सप्तानीकानि।

दशाऽऽ-त्मरक्षशतानि। चत्वारो लोकपालाः। श्रीमत्यादयोष्टावग्रमहिष्यः पञ्चपञ्चाशत्प-ल्योपमायुषः, वल्लभिकाश्च पञ्चदश तावदायुषः। अवशिष्टमारणेन्द्रवत्। परिषदादिविधिश्च तथैव नेयः। अयं तु विशेषः वरुणोऽधिकायुः। ततो न्यूनायुर्धनदः। ततोऽप्यूनायुषौ सोमयमौ।

त एते लोकानुयोगोपदेशेन चतुर्दशेन्द्रा उक्ताः। इह द्वादश इष्यन्ते पूर्वोक्तेन क्रमेण ब्रह्मोत्तरकापिष्ठमहाशुक्रसहस्रारेन्द्राणां दक्षिणेन्द्रानुवर्तित्वदानतप्राणतकल्पयोश्चैकैकेन्द्र-त्वात्।

सौधर्मविमानसंख्या प्रागुक्ता। ऐशानेऽष्टाविंशतिर्विमानशतसहस्राणि। श्रेणिविमानानि चतुर्दशशतानि सप्तपञ्चाशानि। पुष्पप्रकीर्णकानां सप्तविंशतिः शतसहस्राण्यष्टनवतिः सहस्राणि पञ्चशतानि त्रिचत्वारिंशानि। सानत्कुमारे द्वादशविमानशतसहस्राणि। श्रेणिविमानानां पञ्चशतानि पञ्चनवत्यधिकानि। प्रकीर्णकानामेकादशशतसहस्राणि। नवनवतिः सहस्राणि चत्वारि शतानि पञ्चोत्तराणि। माहेन्द्रेऽष्टौ विमानशतसहस्राणि। श्रेणिविमानानामेकं शतं षण्णवत्यधिकम्। प्रकीर्णकानां सप्तशतसहस्राणि नवनवति-सहस्राण्यष्टौ शतानि चतुरुत्तराणि। ब्रह्मलोकब्रह्मोत्तरकल्पयोः चत्वारि विमानशतसहस्राणि। श्रेणिविमानानां त्रीणि शतानि चतुःषष्ट्यधिकानि। प्रकीर्णकानां त्रीणि शतसहस्राणि नवनवतिः सहस्राणि षट्शतानि षट्त्रिंशानि। लान्तवकापिष्ठयोः पञ्चाशत्सहस्राणि। श्रेणिविमानानां शतमष्टपञ्चाशम्। प्रकीर्णकानामेकान्नपञ्चाशत्सहस्राण्यष्टौ शतानि द्विचत्वारिंशानि। शुक्रमहाशुक्रयोः चत्वारिंशत्सहस्राणि। श्रेणिविमानानां त्रिसप्ततिः। प्रकीर्णकानामेकान्नचत्वारिंशत्सहस्राणि नवशतानि सप्तविंशानि। शतारसहस्रारकल्पयोः षड्विमानसहस्राणि। श्रेणिविमानानामेकान्नसप्ततिः। प्रकीर्णकानामेकान्नषष्टिशतान्येक-त्रिंशानि। आरणाच्युतकल्पयोः सप्तविमानशतानि। श्रेणिविमानानां त्रीणि शतानि त्रिंशानि।

प्रकीर्णकानां त्रीणि शतानि सप्तत्यधिकानि। चतुर्दशस्वपि कल्पविमानेषु विमानसंख्या चतुरशीतिः शतसहस्राणि षण्णवतिः सहस्राणि सप्त च विमानशतान्यारणाच्युत-विमानादूर्ध्वं बहूनि योजनशतसहस्राण्युत्पत्य सन्ति। तत्राधोग्रैवेयकविमानानि। येषु त्रयो विमानप्रस्ताराः सुदर्शनामोघसुप्रबुद्धाः। तत्र सुदर्शनेन्द्रकाच्चतसृष्वपि दिक्षु चतस्रो विमानश्रेण्यः। तत्रैकैकस्यां विमानश्रेण्यां दश विमानानि। सुदर्शनादूर्ध्वं बहूनि योजनशतसहस्राण्युत्पत्याऽस्ति अमोघो नाम विमानप्रस्तारः। अत्रापि चतसृष्वपि दिक्षु चतस्रो विमानश्रेण्यो निर्गताः। अत्रैकस्यां विमानश्रेण्यां नवविमानानि। अमोघादूर्ध्वं बहूनि योजनशतसहस्राण्युत्पत्यास्ति सुप्रबुद्धो नामा विमानप्रस्तारः। अत्रापि चतसृष्वपि दिक्षु चतस्रो विमानश्रेण्यो विनिर्गताः। एकैकस्यां विमानश्रेण्यामष्टौ विमानानि। त्रिष्वप्येतेषु पुष्पप्रकीर्णकविमानानि न सन्ति। तान्येतान्येकादशोत्तरविमानशतम्। सुप्रबुद्धविमानादूर्ध्वं बहूनि योजनशतसहस्राण्युत्पत्य सन्ति। तत्र मध्यमग्रैवेयकविमानानि। येषु त्रयः प्रस्तारा यशोधरसुभद्रविशालाः। पूर्ववदत्राप्येकैकश्रेणिविमानहान्या पञ्चसप्ततिः श्रेणिविमानानि। पुष्पप्रकीर्णकानि द्वात्रिंशत्। तान्येतानि सप्तोत्तरं शतं। सुविशालविमानादूर्ध्वं बहूनि योजनशतसहस्राण्युत्पत्य सन्ति। तत्रोपरिमग्रैवैयकविमानानि। येषु त्रयः प्रस्ताराः सुमनाः सौमनाः प्रीतिङ्कर इति। पूर्ववदत्राप्येकैकविमानहान्या एकान्नचत्वारिंशत् श्रेणिविमानानि। द्वापञ्चाशत्पुष्पप्रकीर्णकानि। तान्येतानि समुदितान्येकनवतिर्विमानानाम्।

प्रीतिङ्करविमानादूर्ध्वं बहूनि योजनशतसहस्राण्युत्पत्य सन्ति तत्राऽनुदिशविमानानि। येष्वेक एवाऽऽदित्यो नाम विमानप्रस्तारः। तत्र दिक्षु चत्वारि श्रेणिविमानानि। प्राच्यां दिशि अर्चिर्विमानम्, अपाच्यामर्चिमाली, प्रतीच्यां वैरोचनम्, उदीच्यां प्रभासम्, मध्ये आदित्याख्यम्। विदिक्षु पुष्पप्रकीर्णकानि चत्वारि- पूर्वदक्षिणस्यामर्चिप्रभम्, दक्षिणापरस्यामर्चिर्मध्यम्, अपरोत्तरस्यामर्चिरावर्तम्, उत्तरपूर्वस्यामर्चिर्विशिष्टम्। तान्येतानि नव।

आदित्यविमानादूर्ध्वं बहूनि योजनशतसहस्राण्युत्पत्य सन्ति तत्रानुत्तरविमानानि। यत्रैक एव सर्वार्थसिद्धिसंज्ञो विमानप्रस्तारः। दिक्षु प्रदक्षिणानि विजयवैजयन्त-जयन्तापराजितविमानानि चत्वारि, मध्ये सर्वार्थसिद्धिसंज्ञम्। पुष्पप्रकीर्णकानि न सन्ति।

सौधर्मैशानयोः कल्पयोर्विमानानि सप्तविंशैकयोजनशतबाहल्यानि पञ्चयोजनशतो-च्छ्रायाणि। सानत्कुमारमाहेन्द्रयोर्ब्रह्मलोकब्रह्मोत्तरलान्तवकापिष्ठेषु शुक्रमहाशुक्रशतारसह-स्रारेष्वानतप्राणताऽऽरणाऽच्युतेषु नवसु ग्रैवेयकेष्वनुदिशाऽनुत्तरेषु च विमानानां बाहल्यमेकैकयोजनविहीनमुच्छ्रायश्चैकैकयोजनशताधिको यथाक्रमं वेदितव्यः। तान्येतानि श्रेणीन्द्रप्रकीर्णकविमानानि कानिचित् संख्येययोजनविस्ताराणि कानिचिदसंख्येययोजन-विस्ताराणि। यानि संख्येयविस्ताराणि तानि संख्येययोजनशतसहस्रविस्ताराणि, यान्यसंख्येयविस्ताराणि तान्यसंख्येययोजनशतसहस्रविस्ताराणि। सौधर्मैशानयोर्विमानानि पञ्चवर्णानि कृष्णनीलरक्तहारिद्रशुक्लवर्णानि। सानत्कुमारमाहेन्द्रयोः चतुर्वर्णानि कृष्णहीनानि। ब्रह्मलोकब्रह्मोत्तरलान्तवकापिष्ठेषु त्रिवर्णानि विमानानि कृष्णनीलवर्जितानि। शुक्रमहाशुक्रशतारसहस्राराऽऽनतप्राणतारणाच्युतेषु द्विवर्णानि विमानानि हारिद्रशुक्ल वर्णानि। ग्रैवेयकानुदिशानुत्तरविमानानि शुक्लवर्णान्येव। परमशुक्लं सर्वार्थसिद्धिविमानम्।

एषामधिकृतानां वैमानिकानां देवानां परस्परतो विशेषप्रत्तिपत्त्यर्थमाह –

## स्थितिप्रभावसुखद्युतिलेश्याविशुद्धीन्द्रियावधिविषयतोऽधिकाः॥२०॥

**स्वोपात्तायुष उदयात् स्थानं स्थितिः॥१॥** स्वेनोपात्तस्य देवायुषः उदयात्तस्मिन् भवे तेन शरीरेण स्थानं स्थितिरित्युच्यते।

**शापानुग्रहलक्षणः प्रभावः॥२॥** शापोऽनिष्टापादनमनुग्रह इष्टप्रतिपादनम्, तल्लक्षणः प्रवृद्धो भाव प्रभाव इत्याख्यायते।

**सद्वेद्योदये सतीष्टविषयानुभवनं सुखम्॥३॥** सद्वेद्योदयमूलहेतौ सति बाह्यस्येष्ट-विषयस्योपनिपाते तद्विषयमनुभवनं सुखमिति कथ्यते।

**शरीरवसनाभरणादिदीप्तिर्द्युतिः॥४॥** शरीरस्य वसनस्याऽऽभरणादीनाञ्च दीप्तिः द्युतिरित्युपाख्यायते।

**लेश्याशब्द उक्तार्थः॥५॥** लेश्याशब्द उक्तार्थ एव वेदितव्यः। लेश्यायाः विशुद्धिः लेश्याविशुद्धिः।

**इन्द्रियावधिभ्यां विषयाभिसंबन्धः॥६॥** विषयशब्दस्येन्द्रियावधिभ्यामभिसंबन्धो भवति। इन्द्रियं चाऽवधिश्च इन्द्रियावधी, तयोर्विषय इन्द्रियावधिविषय इति।

**इतरथा हि तदाधिक्यप्रसङ्गः॥७॥** अक्रियमाणे ह्येवमभिसंबन्धे उपर्युपरि देवेष्वि-न्द्रियाणामाधिक्यं प्रसज्येत।

**स्थितिग्रहणमादौ तत्पूर्वकत्वादितरेषाम्॥८॥** स्थितिग्रहणमादौ क्रियते तत्पूर्व-कत्वादितरेषां प्रभावादीनाम्। स्थितिमतां हि प्रभावादयो भवन्ति नाऽस्थितस्येति।

**तेभ्यस्तैर्वाऽधिका इति तसिः॥९॥** तेभ्यः स्थित्यादिभ्योऽधिका इति "अपादानेऽहीयरुहोः" इति तसिः। तैर्वाधिका इति तसि प्रकरणे आद्यादिभ्य उपसंख्यानम्" इति तसिः। उपर्युपरि वैमानिकाः इत्यनुवर्तते, तेनैवमभिसंबध्यते उपर्युपरि वैमानिकाः प्रतिकल्पं प्रतिप्रस्तारं च स्थित्यादिभिरेभिरधिका इति। तत्र स्थितिः उत्कृष्टा जघन्या च, सा उपरिष्टाद्वक्ष्यते। इह तु वचनं येषां समा भवति तेषामपि गुणतोऽधिकत्वज्ञापनार्थम्। यः प्रभावः सौधर्मकल्पदेवानां निग्रहानुग्रहविक्रियापराभि-

योगादिषूपर्युपरि ततोऽनन्तगुणः। मन्दाभिमानतयाऽल्पसंक्लिष्टत्वाच्च न प्रवर्तते। एवं सुखादयोऽपि प्रत्येतव्याः। लेश्यानियमः उपरि वक्ष्यते। इह तु वचनं यत्र विधानं समानं तत्रापि कर्मविशुद्धितोऽधिका भवन्तीति प्रतिपादनार्थम्।

यथा स्थित्यादिभिरुपर्यधिका एवं गत्यादिभिरपि इत्यतिप्रसङ्गे तन्निवृत्त्यर्थमाह–

## गतिशरीरपरिग्रहाभिमानतो हीनाः॥२१॥

**देशान्तरप्राप्तिहेतुर्गतिः॥१॥** उभयनिमित्तवशादुत्पद्यमानः कायपरिस्पन्दो गतिरि-त्युच्यते।

**शरीरमुक्तलक्षणम्॥२॥** ''औदारिकवैक्रियिकाऽऽहारकतैजसकार्मणानि शरीराणि'' इत्यत्र शरीरमुक्तलक्षणम्।

लोभकषायोदयान्मूर्च्छा परिग्रहः॥३॥ लोभकषायवेदनीयस्योदयान्मूर्च्छासंकल्पः परिग्रह इत्याख्यायते।

**मानकषायोदयापादितोऽभिमानः॥४॥** मानकषायवेदनीयस्योदयापादितोऽहङ्कारोऽ-भिमान इति कथ्यते। गतिश्च शरीरं च परिग्रहश्चाभिमानश्च गतिशरीरपरिग्रहाभिमानास्तैः गतिशरीरपरिग्रहाभिमानतः। तसिप्रकरणे ''आद्यादिभ्य उपसंख्यानम्'' इति तसिः। यदि ह्यपादानविवक्षा स्यात् ''अहीयरुहोः'' इति प्रतिषेधः स्यात्।

**गतिग्रहणमादौ लक्षणद्वययोगात्॥५॥** गतिग्रहणमादौ क्रियते। कुतः? लक्षण-द्वययोगात् ''द्वन्द्वेसु'' ''अल्पाच्तरम्'' इति।

**ततः शरीरग्रहणं तस्मिन् सति परिग्रहोपपत्तेः॥६॥** ततः परं शरीरग्रहणं क्रियते। कुतः? तस्मिन् सति परिग्रहोपपत्ते; सति शरीरे परिग्रहो ममेदं बुद्धिरुपजायते।

**तद्वत्त्वेऽपि केवलिनः परिग्रहेच्छाभाव इति चेन्न; देवाधिकारात् ॥७॥** स्यादेतत् - शरीरवत्त्वेऽपि केवलिनः ममेदमिति संकल्पो न विद्यते ततोऽयं हेतुव्यभिचार इति; तन्न; किं कारणम्? देवाधिकारात्। देवा हि रागादिमन्तोऽधिकृता; तेषामवश्यं सति शरीरे परिग्रहाभिलाषेण भवितव्यमिति नास्ति व्यभिचारः।

**तन्मूलत्वात्तदनन्तरमभिमानग्रहणम् ॥८॥** परिग्रहमूलो हि लोकेऽभिमानो दृष्टः, ततोऽस्य तदनन्तरं ग्रहणं क्रियते। उपर्युपरीत्यनुवर्तते, तेनोपर्युपरि देवानामुक्ता गत्यादयो हीना वेदितव्याः। तद्यथा– सौधर्मैशानयोर्देवाः क्रीडादिनिमित्तां गतिं महाविषयत्वेन मुहुर्मुहुर्वृत्त्या चाधिकामास्कन्दन्ति न तथोपरि देवाः विषयाभिष्वङ्गोद्रेकाभावात्। ततस्तन्निमित्ता गतिरपि क्रमेण हीयते। शरीरमपि सौधर्मैशानयोर्देवानां सप्तारत्निप्रमाणम्। सानत्कुमारमाहेन्द्रयोः षडरत्निप्रमाणम्। ब्रह्मलोकब्रह्मोत्तरलान्तवकापिष्ठेषु पञ्चारत्निः। शुक्रमहाशुक्रशतारसहस्रारेषु च चतुररत्निः। आनतप्राणतयोरर्धचतुर्थारत्निः। आरणाच्युतयोररत्नित्रयप्रमाणम्। अधोग्रैवेयकेष्वर्धतृतीयारत्निः; मध्यमग्रैवेयकेष्व- रत्निद्वयमात्रम्, उपरिमग्रैवेयकेष्वनुदिशविमानेषु चाध्यर्धारत्निः, अनुत्तरेष्वरत्निप्रमाण-मात्रम्। परिग्रहोऽपि विमानपरिवारादिलक्षण उपर्युपरि हीन इत्युक्तं पुरस्तात्। कुतः पुनरुपर्युपरि परिग्रहाभिमानहानिरिति? उच्यते –

**प्रतनुकषायत्वाल्पसंक्लेशावधिविशुद्धितत्त्वावलोकनसंवेगपरिणामानामुत्तरोत्तराधिक्यादभिमानहानिः॥९॥** प्रतनुकषायत्वादल्पसंक्लेशो भवति, ततोऽवधिविशुद्धिर्जायते, संक्लेशवशादवधिर्हीयत इत्युक्तं पुरस्तात्। ततोऽवधिविशुद्धेरुपर्युपरि देवाः शारीरमानसदुःखपरीतान् नारकतैर्यग्योनमानुषान् प्रकर्षेणाऽवलोकयन्ति।

ततस्तन्निमित्त-संवेगपरिणामः संसाराद्भीरुता उपजायते। ततो दुःखहेतुषु दुरन्तेषु परिग्रहेष्वभिभानो हीयते। किञ्च,

**विशुद्धपरिणामप्रकर्षनिमित्तत्वाच्चोपर्युपर्युपपत्तेः॥१०॥** इह विशुद्धपरिणामभेद-निमित्तः पुण्यकर्मबन्धविकल्पः, तत्पूर्वको देवेषूपपाद इत्युपर्युपर्यभिमानहानिः। कारणसदृशं हि कार्यं दृष्टमिति। तद्यथा – तैर्यग्योनेष्वसंज्ञिनः पर्याप्ताः पञ्चेन्द्रियाः संख्येयवर्षायुषः, अल्पशुभपरिणामवशेन पुण्यबन्धमनुभूय भवनवासिषु व्यन्तरेषु चोत्पद्यन्ते। त एव संज्ञिनो मिथ्यादृष्टयः सासादनसम्यग्दृष्टयश्च आसहस्रारादुत्पद्यन्ते। त एव सम्यग्दृष्टयः सौधर्मादिष्वच्युतान्तेषु जायन्ते। असंख्येयवर्षायुषः तिर्यङ्मनुष्या मिथ्यादृष्टयः सासादनसम्यग्दृष्टयश्च आ ज्योतिष्केभ्य उपजायन्ते, तापसाश्चोत्कृष्टाः। त सम्यग्दृष्टयः सौधर्मैशानयोर्जन्मानुभवन्ति मनुष्याः संख्येयवर्षायुषो मिथ्यादर्शनाः सासादनसम्यग्दर्शनाश्च भवनवासिप्रभृतिषूपरिमग्रैवेयकान्तेषूपपादमास्कन्दन्ति। परिव्राज-कानां देवेषूपपादः आ ब्रह्मलोकात्। आजीवकानाम् आसहस्रारात्। तत ऊर्ध्वमन्यलिङ्गिनां नास्त्युपपादः। निर्ग्रन्थलिङ्गधराणामेवोत्कृष्टतपोऽनुष्ठानोपचितपुण्यबन्धानामसम्यग्दर्श-नानामुपरिमग्रैवेयकान्तेषूपपादः। तत ऊर्ध्वं सम्यग्दर्शनज्ञानचरणप्रकर्षोपेतानामेव जन्म नेतरेषाम्। श्रावकाणां सौधर्मादिष्वच्युतान्तेषु जन्म नाधो नोपरीति परिणामविशुद्धि प्रकर्षयोगादेव कल्पस्थानातिशययोगोऽवसेयः।

पुरस्तात्त्रिषु निकायेषु देवानां लेश्याविधिरुक्त इदानीं वैमानिकेषु लेश्याविधि प्रतिपत्त्यर्थमाह–

## पीतपद्मशुक्ललेश्या द्वित्रिशेषेषु॥२२॥

किमर्थं पृथग्लेश्याभिधानं क्रियते, ननु यत्रैवान्यो लेश्याविधिः तत्रैवेदं वक्तव्यम्? अत उत्तरं पठति –

**पृथग्लेश्याभिधानं लघ्वर्थम् ॥१॥** पृथगिदं लेश्याभिधानं क्रियते लघ्वर्थम्। तत्र हि पाठे क्रियमाणे वैमानिकानां स्वामिनां भेदेन निर्देशः कर्तव्यः स्यात्। अथ कोऽयं निर्देशः? पीतपद्मशुक्ललेश्या इति। पीता च पद्मा च शुक्ला च पीतपद्मशुक्लाः, ता लेश्या येषां त इमे पीतपद्मशुक्ललेश्या इति। यद्येवं द्वन्द्वे पुंवद्भावात् निर्देशो नोपपद्यते नैष दोषः; औत्तरपदिकं ह्रस्वत्वम्, यथाकार्यविपरिणामाद्वा सिद्धम्। "द्रुतायां तपरकरणे मध्यमबिलम्बितयोरुपसंख्यानम्" इत्यत्रौत्तरपदिकं ह्रस्वत्वम्, एवमिहापि वेदितव्यम्।

तत्र कस्य का लेश्या इत्यत्रोच्यते -

**सौधर्मैशानीयाः पीतलेश्याः॥२॥** सौधर्मैशानीया देवाः पीतलेश्या द्रष्टव्याः।

**सानत्कुमारमाहेन्द्रीया देवाः पीतपद्मलेश्याः॥३॥** सानत्कुमारे माहेन्द्रे च देवाः पीतपद्मलेश्याः प्रत्येतव्याः।

**ब्रह्मलोकब्रह्मोत्तरलान्तवकापिष्ठेषु पद्मलेश्याः॥४॥** चतुर्ष्वेषु देवाः पद्मलेश्याः द्रष्टव्याः।

**शुक्रमहाशुक्रशतारसहस्रारेषु पद्मशुक्ललेश्याः॥५॥** चतुर्ष्वेषु देवाः पद्मशुक्ललेश्या विज्ञेयाः।

**आनतादिषु शुक्ललेश्याः॥६॥** आनतादिषु शेषेषु देवाः शुक्ललेश्याः प्रत्येतव्याः। तत्राप्यनुत्तरेषु परमशुक्ललेश्याः।

**शुद्धमिश्रलेश्याविकल्पानुपपत्तिः सूत्रेऽनभिधानादिति चेन्न; मिश्रयोरन्यतर-ग्रहणाद्यथा लोके॥७॥** स्यान्मतमुक्तो लेश्याविकल्पः शुद्धो मिश्रश्च नोपपद्यते, कुतः?

सूत्रेऽनभिधानादिति; तन्न; किं कारणम्? मिश्रयोरन्यतरग्रहणाद्यथा लोके। तद्यथा – छत्रिणो गच्छन्तीत्यछत्रिष्वपि छत्रिव्यपदेशः, एवमिहापि मिश्रयोरप्यन्यतरग्रहणेन ग्रहणं भवतीति पीतपद्मलेश्याः पूर्वग्रहणेन परग्रहणेन वा गृह्यन्ते एवं पद्मशुक्ललेश्या अपीति नास्ति दोषः।

**द्वित्रिशेषग्रहणादग्रहणमिति चेन्न; इच्छातः संबन्धोपपत्तेः॥८॥** स्यान्मतम् - एवमपि ग्रहणं नोपपद्यते। कुतः? द्वित्रिशेषग्रहणात्। सूत्रे ह्येवं पठ्यते – द्वयोः पीतलेश्याः, त्रिषु पद्मलेश्याः, शेषेषु शुक्ललेश्या इति तच्चानिष्टमिति; तन्न; किं कारणम्? इच्छातः संबन्धोपपत्तेः। एवं हि संबन्धः क्रियते – द्वयोः कल्पयुगलयोः पीतलेश्याः, सानत्कुमारमाहेन्द्रयोः पद्मलेश्याया अविवक्षातः। ब्रह्मलोकादिषु त्रिषु कल्पयुगलेषु पद्मलेश्याः, शुक्रमहाशुक्रयोः शुक्ललेश्याया अविवक्षातः। शेषेषु शतारादिषु शुक्ललेश्याः, पद्मलेश्याया अविवक्षातः, इति नास्त्यार्षविरोधः।

**पाठान्तराश्रयाद्वा॥९॥** अथवा पाठान्तरमाश्रियते। किं पुनः तत्? 'पीतमिश्रपद्ममिश्रशुक्ललेश्या द्विद्विचतुश्चतुःशेषेषु इति, ततो न कश्चिदार्षविरोधः।

**निर्देशवर्णपरिणामसंक्रमकर्मलक्षणगतिस्वामित्वसाधनसंख्याक्षेत्रस्पर्शनकालान्तरभावाल्पबहुत्वैश्च साध्या लेश्याः॥१०॥** एतैर्निर्देशादिभिः षोडशभिरनुयोगद्वारैः लेश्याः साधयितव्याः।

तत्र निर्देशस्तावत् – कृष्णलेश्या नीललेश्या कपोतलेश्या तेजोलेश्या पद्मलेश्या शुक्ललेश्या चेति।

वर्णो भ्रमरमयूरकण्ठकपोततपनीयपद्मशङ्खवर्णा यथाक्रमं लेश्याः। वर्णान्तरमासामनन्तविकल्पम्। एकद्वित्रिचतुःसंख्येयाऽसंख्येयाऽनन्तकृष्णगुणयोगात् कृष्णलेश्याऽ-नन्तविकल्पा। एवमितरा अपि।

परिणामः – असंख्येयलोकप्रदेशप्रमाणेष्वसंख्येयगुणेषु कषायोदयस्थानेषूत्कृष्ट-मध्यमजघन्यांशकेषु संक्लेशहान्या परिणामात्मानोऽशुभास्तिस्रः कृष्णनील-कापोतलेश्याः परिणमन्ते। तथा जघन्यमध्यमोत्कृष्टांशकेषु विशुद्धिवृद्ध्या तिस्रः शुभाः तेजःपद्मशुक्ललेश्याः परिणमन्ते। तथोत्कृष्टमध्यमजघन्यांशकेषु विशुद्धिहान्या तिस्रः शुभाः परिणमन्ते। तथा जघन्यमध्यमोत्कृष्टांशेषु संक्लेशविवृद्ध्या तिस्रः अशुभाः परिणमन्ते। एकैका चात्र लेश्या असंख्येयलोकप्रदेशप्रमाणपरिणामाऽध्यवसायस्थाना।

संक्रमः – कृष्णलेश्यः संक्लिश्यमानो नान्यां लेश्यां संक्रामति, कृष्णलेश्ययैव षट्स्थानपतितेन संक्रमेण वर्धते। तद्यथा - कृष्णलेश्याया यत्प्राथमिकं संक्लेशस्थानं ततः स्थानादनन्तभागाभ्यधिका वृद्धिरसंख्येयभागाऽभ्यधिका वा संख्येयभागाभ्यधिका वा संख्येयगुणाभ्यधिका वाऽसंख्येयगुणाभ्यधिका वाऽनन्तगुणाभ्यधिका वा। तथा हीयमानोऽपि लेश्यान्तरसंक्रमं न करोति कृष्णलेश्ययैव षट्स्थाननिपतितसंक्रमेण हीयते। तद्यथा – कृष्णलेश्याया यदुत्कृष्टं संक्लेशस्थानं ततः स्थानादनन्तभागहान्या वा असंख्येयभागहान्या वा संख्येयभागहान्या वा संख्येयगुणहान्या वाऽसंख्येयगुणहान्या वाऽनन्तगुणहान्या वा। यदा कृष्णलेश्याऽनन्तगुणहान्या हीयते तदा नीललेश्याया उत्कृष्टं स्थानं संक्रामति, तदैव कृष्णलेश्यस्य संक्लिश्यमानस्य एको विकल्पो वृद्धौ स्वस्थानसंक्रमो नाम। हानौ पुनर्द्वौ विकल्पौ स्वस्थानसंक्रमः परस्थानसंक्रमश्चेति। एवमितरास्वपि लेश्यासु वृद्धिहान्योः संक्रमविकल्पविधिर्वेदितव्यः। अयं तु विशेषः – शुक्ललेश्यस्य विशुद्धिवृद्धौ लेश्यान्तरसंक्रमो नास्ति स्वस्थानसंक्रमोऽस्ति। संक्लेशविवृद्धौ विशुद्धिहानौ तु स्वस्थानसंक्रमोऽप्यस्ति परस्थानसंक्रमोऽपि। मध्यलेश्यानां हानौ वृद्धौ चोभावपि संक्रमौ स्तः। अनन्तभागपरिवृद्धिः कया परिवृद्ध्या? सर्वजीवैरनन्त-भागपरिवृद्ध्या। असंख्येयभागपरिवृद्धिः कया परिवृद्ध्या? असंख्येयलोकभागपरि-वृद्ध्या। संख्येयभागपरिवृद्धिः कया परिवृद्ध्या? उत्कृष्टसंख्येयभागपरिवृद्ध्या। संख्येय-गुणपरिवृद्धि कया परिवृद्ध्या? उत्कृष्टसंख्येयगुणपरिवृद्ध्या। असंख्येयगुणपरिवृद्धिः

कया परिवृद्धया असंख्येयलोकगुणपरिवृद्ध्या। अनन्तगुणपरिवृद्धिः कया परिवृद्ध्या? सर्वजीवाऽनन्तगुणपरिवृद्ध्या।

लेश्याकर्म उच्यते – जम्बूफलभक्षणं निदर्शनं कृत्वा, स्कन्धविटपशाखानुशाखा-पिण्डिकाछेदनपूर्वकं फलभक्षणं स्वयं पतितफलभक्षणं चोद्दिश्य कृष्णलेश्यादयः प्रवर्तन्ते। अथ लक्षणमुच्यते – अनुनयानभ्युपगमोपदेशाग्रहणवैरामोचनाऽतिचण्डत्वदुर्मुखत्वनिरनुकम्पताक्लेशनमारणापरितोषणादि कृष्णलेश्यालक्षणम्। आलस्यविज्ञानहानिकार्यानिष्ठापनभीरुताविषयातिगृद्धिमायातृष्णाऽतिमानवञ्चनाऽनृतभाषणचापलातिलुब्धत्वादि नीललेश्यालक्षणम्। मात्सर्यपैशुन्यपरपरिभवाऽऽत्मप्रशंसापरपरिवादवृद्धिहान्यगणनाऽऽत्मीयजीवितनिराशताप्रशस्यमानधनदानयुद्धमरणोद्यमादि कपोतलेश्यालक्षणम्। दृढमित्रतासानुक्रोशत्वसत्यवाददानशीलात्मीयकार्यसंपादनपटुविज्ञानयोगसर्वधर्मसमदर्शनादितेजोलेश्यालक्षणम्। सत्यवाक्यक्षमोपेतपण्डितसात्त्विकदानविशारदचतुरर्जुगुरुदेवतापूजाकरणनिरतत्वादि पद्मलेश्यालक्षणम्। वैररागमोहविरहरिपुदोषाग्रहणनिदानवर्जनसार्वसावद्यकार्या-रम्भौदासीन्यश्रेयोमार्गानुष्ठानादि शुक्लेश्यालक्षणम्।

गतिरुच्यते – कपोतलेश्यापरिणत आत्मा कां गतिं गच्छतीति? षड्विंशतिविकल्पेषु लेश्यांशकेष्वायुषो ग्रहणहेतवोऽष्टावंशकाः मध्यमाः। कुतः पुनरेतदनुगम्यते इति चेत्? ''अष्टाभिः अपकर्षैः मध्यमेन परिणामेनाऽऽयुर्बध्नाति' इत्यार्षोपदेशात्। शेषा अष्टादशलेश्यांशका गतिविशेषहेतवः पुण्यपापविशेषोपचयहेतुत्वात्तेषां तदपेक्षो मध्यमपरिणामः तद्योग्यायुर्बन्धहेतुर्भवति तत आयुर्नामकर्मोदयापादितो गतिविशेषो लेश्यावशादवसेयः। तद्यथा – उत्कृष्टशुक्ललेश्यांशकपरिणामादात्मानः कालं कृत्वा सर्वार्थसिद्धं यान्ति। जघन्यशुक्ललेश्यांशकपरिणामात् शुक्रमहाशुक्रशतारसहस्रारान् यान्ति।

मध्यमशुक्ललेश्यांशकपरिणामादानतादिषु प्राक् सर्वार्थसिद्धादुत्पद्यन्ते। उत्कृष्टपद्मलेश्यांशकपरिणामात् सहस्रारमुपगच्छन्ति। जघन्यपद्मशुक्ललेश्यांशकपरिणामात् सानत्कुमारमाहेन्द्रौ यान्ति। मध्यमपद्मलेश्यांशकपरिणामात् ब्रह्मलोकादिषु आ शतारादुपपद्यन्ते। उत्कृष्टतेजोलेश्यांशकपरिणामात् सानत्कुमारमाहेन्द्रकल्पान्त्य चक्रेन्द्रकश्रेणिविमानान्यास्कन्दन्ति। जघन्यतेजोलेश्यांशकपरिणामात् सौधर्मैशान प्रथमेन्द्रकश्रेणिविमानानि यान्ति। मध्यमतेजोलेश्यांशकपरिणामात् चन्द्रद्दीन्द्रकश्रेणि-विमानादिषु आ बलभद्रेन्द्रकश्रेणिविमानेभ्य उपपद्यन्ते। उत्कृष्टकृष्णलेश्यांशकपरिणामाद-प्रतिष्ठानमधितिष्ठन्ति। जघन्यकृष्णलेश्यांशकपरिणामात् पञ्चम्यामध इन्द्रकनरकं तमिस्रसंज्ञकं संश्रयन्ते। मध्यमकृष्णलेश्यांशकपरिणामात् हिमेन्द्रकादिषु आ महारौरवादुपजायन्ते। उत्कृष्टनीललेश्यांशकपरिणामात् पञ्चम्यामन्धेन्द्रकमवाप्नुवन्ति। जघन्यनीललेश्यांशकपरिणामात् वालुकायां तप्तेन्द्रकं यान्ति। मध्यमनीललेश्यांशक परिणामात् वालुकायां त्रस्तेन्द्रकादिषु झषेन्द्रकान्तेषु उत्पद्यन्ते। उत्कृष्टकपोतलेश्यांशक परिणामात् वालुकाप्रभायां संप्रज्वलितनरकं यान्ति। जघन्यकपोतलेश्यांशकपरिणामात् रत्नप्रभायां सीमन्तकं यान्ति। मध्यमकपोतलेश्यांशकपरिणामात् रौरुकादिषु आ संज्वलितेन्द्रकादुपपद्यन्ते। मध्यमकृष्णनीलकपोततेजोलेश्यांशकपरिणामात् भवनवासिव्य-न्तरज्योतिष्कपृथिव्यम्बुवनस्पतीन् व्रजन्ति। मध्यमकृष्णनीलकपोतलेश्यांशकपरिणामात् तेजोवायुकायिकेषु जायन्ते। देवनारकाः स्वलेश्याभिः तिर्यङ्मनुष्यानुयोग्यानां यान्ति।

स्वामित्वमुच्यते – रत्नप्रभाशर्कराप्रभयोः नारकाः कापोतलेश्याः। वालुकाप्रभायां नीलकपोतलेश्याः। पङ्कप्रभायां नीललेश्याः। धूमप्रभायां नीलकृष्णलेश्याः। तमःप्रभायां कृष्णलेश्याः. महातमःप्रभायां परमकृष्णलेश्याः। भवनवासिव्यन्तरज्योतिष्काः कृष्णनील-

कापोततेजोलेश्याः। एकद्वित्रिचतुरिन्द्रियाः संक्लिष्टत्रिलेश्याः। असंज्ञिपञ्चेन्द्रियतिर्यञ्चः संक्लिष्टचतुर्लेश्याः। संज्ञिपञ्चेन्द्रियतिरश्चां मनुष्याणां च मिथ्यादृष्टिसासादनसम्य-ग्दृष्टिसम्यङ्मिथ्यादृष्ट्यसंयतसम्यग्दृष्टीनां षडपि लेश्याः। संयतासंयतप्रमत्तसंयताऽ-प्रमत्तसंयतानां तिस्रः शुभाः। अपूर्वकरणादीनां सयोगकेवल्यन्तानां शुक्ललेश्यैव। अयोगकेवलिनोऽलेश्याः। सौधर्मैशानीयाः तेजोलेश्याः। सानत्कुमारमाहेन्द्रीयाः तेजःपद्म-लेश्याः। ब्रह्मब्रह्मोत्तरलान्तवकापिष्ठेषु देवाः पद्मलेश्याः। शुक्रमहाशुक्रशतारसहस्रारेषु पद्मशुक्ललेश्याः। आनतादिष्वासर्वार्थसिद्धात् शुक्ललेश्याः। सर्वार्थसिद्धाः परमशुक्ललेश्याः।

साधनमुच्यते – द्रव्यलेश्या नामकर्मोदयनिमित्ताः, भावलेश्याः कषायोदयक्षयो-पशमप्रशमप्रक्षयकृताः।

संख्या कथ्यते–कृष्णनीलकापोतलेश्या एकशो द्रव्यप्रमाणेनाऽनन्ताः, अनन्ता-नन्ताभिरुत्सर्पिण्यवसर्पिणीभिर्नापह्रियन्ते कालेन। क्षेत्रेणाऽनन्तानन्तलोकास्तेजोलेश्याः। द्रव्यप्रमाणेन ज्योतिर्देवाः। साधिकाः पद्मलेश्या द्रव्यप्रमाणेन संज्ञिपञ्चेन्द्रियतिर्यग्योनीनां संख्येयभागाः। शुक्ललेश्याः पल्योपमस्याऽसंख्येयभागाः।

क्षेत्रमुच्यते – कृष्णनीलकापोतलेश्या एकशः स्वस्थानसमुद्घातोपपादैः सर्वलोके वर्तन्ते। तेजःपद्मलेश्या एकशः स्वस्थानसमुद्घातोपपादैर्लोकस्याऽसंख्येयभागे। शुक्ललेश्याः स्वस्थानोपपादाभ्यां लोकस्यासंख्येयभागे. समुद्घातेन लोकस्याऽसंख्येयभागे, असंख्येयेषु भागेषु सर्वलोके वा।

स्पर्शनमुच्यते – कृष्णनीलकापोतलेश्यैः स्वस्थानसमुद्घातोपपादैः सर्वलोकः स्पृष्टः। तेजोलेश्यैः स्वस्थानेन लोकस्यासंख्येयभागः, अष्टौ चतुर्दशभागा वा देशोनाः, समुद्घातेन लोकस्याऽसंख्येयभागः अष्टौ नव चतुर्दशभागा वा देशोनाः, उपपादेन लोकस्यासंख्येयभागा अध्यर्धचतुर्दशभागा वा देशोनाः। पद्मलेश्यैः स्वस्थानसमुद्घाताभ्यां

लोकस्यासंख्येयभागः अष्टौ चतुर्दशभागा वा देशोनाः, उपपादेन लोकस्यासंख्येयभागः पञ्चचतुर्दशभागा वा देशोनाः, शुक्ललेश्यैः स्वस्थानोपपादाभ्यां लोकस्यासंख्येयभागः स्पृष्टः षट्चतुर्दशभागा वा देशोनाः। समुद्घातेन लोकस्याऽसंख्येयभागः षट् चतुर्दशभागा वा देशोनाः, असंख्येया वा भागाः सर्वलोको वा।

काल उच्यते – कृष्णनीलकपोतलेश्यानामेकशः जघन्येनान्तर्मुहूर्त; उत्कर्षेण त्रयस्त्रिंशत्सागरोपमाणि साधिकानि, सप्तदशसागरोपमाणि साधिकानि, सप्तसागरोपमाणि साधिकानि। तेजःपद्मशुक्ललेश्यानामेकशः कालो जघन्येनान्तमुहूर्त; उत्कर्षेण द्वे सागरोपमे साधिके, अष्टादश सागरोपमाणि साधिकानि, त्रयस्त्रिंशत्सागरोपमाणि साधिकानि।

अन्तरमभिधीयते – कृष्णनीलकपोतलेश्यानामेकशोऽन्तरं जघन्येनान्तर्मुहूर्त; उत्कर्षेण त्रयस्त्रिंशत्सागरोपमाणि साधिकानि। तेजःपद्मशुक्ललेश्यानामेकशोऽन्तरं जघन्येनाऽन्तर्मुहूर्त; उत्कर्षेणानन्तः कालोऽसंख्येयाः पुद्गलपरिवर्ताः।

भावो व्याख्यायते – षडपि लेश्या औदयिकभावाः शरीरनाममोहनीयकर्मोदयापादितत्वात् ।

अल्पबहुत्वं वक्ष्यते – सर्वतः स्तोकाः शुक्ललेश्याः, पद्मलेश्या असंख्येयगुणाः, तेजोलेश्या असंख्येयगुणाः, अलेश्या अनन्तगुणाः, कपोतलेश्या अनन्तगुणाः, नीललेश्या विशेषाधिकाः, कृष्णलेश्या विशेषाधिकाः।

आह - कल्पोपपन्ना इत्युक्तं तत्रेदं न ज्ञायते के कल्पा इति? अत्रोच्यते –

**प्राग्ग्रैवेयकेभ्यः कल्पाः॥२३॥**

इदं नं ज्ञायते कुत आरभ्य कल्पा भवन्ति इति? सौधर्मादिग्रहणमनुवर्तते, तेनायमर्थो लभ्यते सौधर्मादयः कल्पा इति। यद्येवं तदनन्तरमेवेदं सूत्रं वक्तव्यम्? अत उत्तरं पठति –

**सौधर्माद्यनन्तरं कल्पाभिधाने व्यवधानप्रसङ्गः॥१॥** यदि सौधर्माद्यनन्तरं कल्पाभिधानं क्रियते व्यवधानं प्रसज्येत। कस्य? स्थितिप्रभावादिसूत्रत्रयस्य। सति च व्यवधाने तेन विधीयमानोऽर्थः कल्पेष्वेव स्यादनन्तरत्वाद्, ग्रैवेयकादिषु न स्यात् व्यवहितत्वात्। इह पुनः पाठे सति स्थित्यादिविशेषविधिरविशेषेण सिद्धो भवति। अथ के कल्पातीताः?

**कल्पातीतसिद्धिः परिशेषात्॥२॥** कल्पातीतानां सिद्धिर्भवति। कुतः? परिशेषात्। परिशिष्टा अमी ग्रैवेयकादयोऽनुत्तरान्ताः।

**भवनवास्याद्यतिप्रसङ्ग इति चेन्न; उपर्युपरीत्यभिसम्बन्धात्॥३॥** स्यादेतत्, परिशिष्टा यदि कल्पातीता भवनवास्यादीनामपि वैमानिकत्वमपि प्रसज्येत इति; तन्न; किं कारणम्? उपर्युपरीत्यभिसंबन्धात्। उपर्युपरि वैमानिका नाधस्तात् इति। तेन कल्पातीता अहमिन्द्रा एव। कथं पुनस्तेषामहमिन्द्रत्वम्? सामानिकादिविकल्पाभावात्।

**चतुर्णिकायोपदेशानुपपत्तिः षट्सप्तसम्भवादिति चेन्न; तत्रैवान्तर्भावात् लौकान्तिकवत्॥४॥** स्यान्मतम् – चत्वारो देवनिकाया इत्युपदेशो नोपपद्यते इति। कुतः? षट्सप्तसंभवात्। षण्णिकायाः सम्भवन्ति भवनपातालव्यन्तरज्योतिष्ककल्पोपपन्नविमानाधिष्ठानात्। भवनवासिनो दशविधा उक्ताः। पातालवासिनो लवणोदादि समुद्रावासाः सुस्थितप्रभासादयः। व्यन्तरा अनादृतप्रियदर्शनादयः जम्बूद्वीपाधिपतयः। ज्योतिष्काः पञ्चविधा व्याख्याताः। कल्पोपपन्ना द्वादश वर्णिताः। विमानानि ग्रैवेयकादीनि उपदिष्टानि। अथवा सप्तदेवनिकायाः, त एवाऽऽकाशोपपन्नैः सह।

आकाशोपपन्नाश्च द्वादशविधाः–पांशुतापिलवणतापितपनतापिभवनतापिसोमकायिकयम-कायिकवरुणकायिकवैश्रवणकायिकपितृकायिकानलकायिकरिष्टकारिष्टसम्भवा इति; तन्न; किं कारणम्? तत्रैवान्तर्भावात्, लौकान्तिकवत्। यथा लौकान्तिकानां कल्पवासिष्वन्तर्भावान्न निकायान्तरत्वं तथा पातालवासिनामाकाशोपपन्नानां व्यन्तरेष्वन्तर्भावात्, कल्पवासिनां च वैमानिकत्वान्न निकायान्तरत्वम्। इति नास्ति चातुर्विध्यहानिः।

आह – य एते दृष्टान्तत्वेनोपात्ताः लौकान्तिकास्ते कस्मिन् कल्पे भवन्तीति? अत्रोच्यते –

## ब्रह्मलोकालया लौकान्तिकाः॥२४॥

**एत्य तस्मिंल्लीयन्त इत्यालयः॥१॥** यत्र प्राणिन एत्य लीयन्ते स आलयो निवास इत्यर्थः। ब्रह्मलोक आलयो येषां ते ब्रह्मलोकालयाः।

**सर्वब्रह्मलोकदेवानां लौकान्तिकत्वप्रसङ्ग इति चेन्न; लोकान्तोपश्लेषात्॥२॥** स्यादेतत् – ब्रह्मलोकालया इत्यविशेषाभिधानात्तेषां सर्वेषां लौकान्तिकत्वं प्रसज्येतेति; तन्न; किं कारणम्? लोकान्तोपश्लेषात्। ब्रह्मलोकस्यान्तो लोकान्त; तस्मिन् भवा लौकान्तिकाः। अथवा, जातिजरामरणाकीर्णो लोकः तस्यान्तो लोकान्तः तत्प्रयोजना लौकान्तिकाः। ते हि परीतसंसाराः, ततश्च्युता एकं गर्भवासमवाप्य परिनिर्वान्ति।

तेषां सामान्येनोपदिष्टानां भेदप्रदर्शनार्थमिदमुच्यते –

## सारस्वतादित्यवह्न्यरुणगर्दतोयतुषिताव्याबाधारिष्टाश्च॥२५॥

क इमे सारस्वतादयः?

**पूर्वोत्तरादिषु दिक्षु यथाक्रमं सारस्वतादयः॥१॥** पूर्वोत्तरादिष्वष्टाष्वपि दिक्षु यथाक्रममेते सारस्वतादयो देवगणा वेदितव्याः। तद्यथा अरुणसमुद्रप्रभवः मूले संख्येययोजनविस्तारः तमस्कन्धः समुद्रवदवलयाकारोऽतितीव्रान्धकारपरिणामः, स ऊर्ध्वं क्रमवृद्ध्या गच्छन् मध्येऽन्ते च संख्येययोजनबाहल्योऽरिष्टविमानस्याधोभागे समेतः कुक्कुटकुटीवदवस्थितः। तस्योपरि तमोराजयोऽष्टावुत्पत्यारिष्टेन्द्रकविमानसप्रणिधयः। तत्र चतसृष्वपि दिक्षु द्वन्द्वं गताः तिर्यगालोकान्तात्, तदन्तरेषु सारस्वतादयो ज्ञेयाः। तत्र पूर्वोत्तरकोणे सारस्वतविमानम्, पूर्वस्यां दिशियादित्यविमानम्, पूर्वदक्षिणस्यां वह्निवि-मानम्, दक्षिणस्यामरुणविमानम्, दक्षिणापरकोणे गर्दतोयविमानम्, अपरस्यां दिशि तुषितविमानम्, अपरोत्तरकोणेऽव्याबाधविमानम्, उत्तरस्यामरिष्टविमानम्।

**चशब्दसमुच्चिताः तदन्तरालवर्तिनः॥२॥** तेषामन्तरालेषु चशब्दसमुच्चिता द्वन्द्व-वृत्त्या देवगणाः प्रत्येतव्याः। तद्यथा–

**अग्न्याभसूर्याभचन्द्राभसत्याभश्रेयस्करक्षेमङ्करवृषभेष्टकामचरनिर्माणरजोदिगन्तरक्षितात्मरक्षितसर्वरक्षितमरुद्वस्वश्वविश्वाख्याः॥३॥** एते अग्न्याभादयः षोडश देवगणा लौकान्तिकभेदाः कथ्यन्ते। सारस्वतादित्यान्तर अग्न्याभसूर्याभाः, आदित्यवह्न्यन्तरे चन्द्राभसत्याभाः, वह्न्यरुणान्तराले श्रेयस्करक्षेमङ्कराः, अरुणगर्दतोयान्तराले वृषभेष्टकामचराः, गर्दतोयतुषितमध्ये निर्माणरजोदिगन्तरक्षिताः, तुषिताव्याबाधमध्ये आत्मरक्षितसर्वरक्षिताः, अव्याबाधारिष्टान्तराले मरुद्वसवः, अरिष्टसारस्वतान्तरे अश्वविश्वाः। तान्येतानि विमाननामानि तन्निवासिनां तद्योगात्। तत्र सारस्वताः सप्तशतसंख्याः। आदित्याश्च सप्तशतगणनाः। वह्नयः सप्तसहस्राणि सप्ताधिकानि। अरुणाश्च तावन्त एव। गर्दतोया नवसहस्राणि नवोत्तराणि। तुषिताश्च तावन्त एव। अव्याबाधा एकादशसहस्राणि एकादशानि। अरिष्टा अपि तावन्त एव। चशब्दसमुच्चितानां संख्येत्युच्यते – अग्न्याभे देवाः सप्तसहस्राणि सप्ताधिकानि।

सूर्याभेऽमरा नवसहस्राणि नवोत्तराणि। चन्द्राभे सुराः एकादशसहस्राणि एकादशानि। सत्याभे विबुधाः त्रयोदशसहस्राणि त्रयोदशानि। श्रेयस्करे देवाः पञ्चदशसहस्राणि पञ्चदशाधिकानि। क्षेमङ्करेऽमराः सप्तदशसहस्राणि सप्तदशानि। वृषभेष्टे सुराः एकान्नविंशतिसहस्राणि एकोनविंशतिश्च। कामवरेऽमराः एकविंशतिसहस्राणि एकविंशतिश्च। निर्माणरजसि देवाः त्रयोविंशतिसहस्राणि त्रयोविंशतिश्च। दिगन्तरक्षिते देवाः पञ्चविंशतिसहस्राणि पञ्चविंशतिश्च। आत्मरक्षिते सुराः सप्तविंशतिसहस्राणि सप्तविंशतिश्च। सर्वरक्षिते विबुधा एकान्नत्रिंशत्सहस्राणि एकान्नत्रिंशच्च। मरुति देवाः एकत्रिंशत्सहस्राणि एकत्रिंशच्च। वसुनि सुराः त्रयस्त्रिंशत्सहस्राणि त्रयस्त्रिंशच्च। अश्वे सुराः पञ्चत्रिंशत्सहस्राणि पञ्चत्रिंशच्च। विश्वे देवाः सप्तत्रिंशत्सहस्राणि सप्तत्रिंशच्च। त एते चतुर्विंशतिलौकान्तिकगणाः समुदिताः चत्वारिंशत्सहस्राणि अष्टसप्ततिश्च शतानि षड्उत्तराणि। सर्वे ते स्वतन्त्रा हीनाधिकत्वाभावात्, विषयरतिविरहाद् देवर्षयः, तत इतरेषां देवानामर्चनीयाः, चर्तुदशपूर्वधरा; सततं ज्ञानभावनावहितमनसः, संसारान्नित्यमुद्विग्नाः अनित्याशरणाद्यनुप्रेक्षासमाहितमानसाः, अतिविशुद्धसम्यग्दर्शनाः, तीर्थकरनिष्क्रमणप्रति-बोधनपराः। नामकर्मणोऽसंख्योत्तरोत्तरप्रकृतित्वात् संसारिणां जीवानां संज्ञाः शुभाशुभ नामकर्मोदयापादिताः वेदितव्याः।

एवमयं कार्मणशरीरप्रणालिकया आस्रवापेक्षयापादितसुखदुःखानां भव्याभव्यभेदाहितद्वैविध्यानां प्राणिनां संसारोऽनादिरपर्यवसानः। अन्येषां मोहोपशमप्रध्वंसनं प्रत्यादृतानामप्रतिपतितसम्यग्दर्शनानां परीतविषयः, सप्ताष्टानि भवग्रहणान्युत्कर्षेण वर्तन्ते, जघन्येन द्वित्राण्यनुबन्ध्योच्छिद्यन्ते। प्रतिपतितसम्यक्त्वानां तु भाज्यम्।

आह – अप्रतिपतितसम्यक्त्वेषु किमविशेष एवाऽऽहोस्वित् कश्चिदस्ति प्रतिविशेषः इति? अत्रोच्यते –

## विजयादिषु द्विचरमाः॥२६॥

**विजयादिषु इति आदिशब्दः प्रकारार्थः॥१॥** अयमादिशब्दः प्रकारार्थो द्रष्टव्यः। तेन विजयवैजयन्तजयन्तापराजिताऽनुदिशविमानानामिष्टानां ग्रहणं सिद्धं भवति। कः पुनरत्र प्रकारार्थः? अहमिन्द्रत्वे सति सम्यग्दृष्ट्युपपादः। सर्वार्थसिद्धग्रहणप्रसङ्ग इति चेन्न; तेषां परमोत्कृष्टत्वात्, सर्वार्थसिद्ध इत्यन्वर्थनिर्देशात् एकचरमत्वसिद्धेश्च।

**द्विचरमत्वं मनुष्यदेहद्वयापेक्षम् ॥२॥** चरमशब्द उक्तार्थः। द्वौ चरमौ देहौ येषां ते द्विचरमाः, तेषां भावो द्विचरमत्वम्। एतन्मनुष्यदेहद्वयापेक्षमवगन्तव्यम्। विजयादिभ्यः च्युता अप्रतिपतितसम्यक्त्वा मनुष्येषूत्पद्य संयममाराध्य पुनर्विजयादिषूत्पद्य च्युता मनुष्यभवमवाप्य सिध्यन्ति इति द्विचरमदेहत्वम् इतरथा हि द्वौ मनुष्यभवौ एको देवभवश्चेति त्रिचरमत्वं स्यान्न द्विचरमत्वम्। कुतः पुनः मनुष्यदेहस्य चरमत्वमिति चेत्? उच्यते –

**मनुष्यदेहस्य चरमत्वं तेनैव मुक्तिपरिणामोपपत्तेः॥३॥** यतो मनुष्यभवमवाप्य देवनारकतैर्यग्योनाः सिध्यन्ति न तेभ्य एवेति मनुष्यदेहस्य चरमत्वम्।

**एकस्य चरमत्वमिति चेन्न; औपचारिकत्वात् ॥४॥** स्यान्मतम्–एकस्य भवस्य चरमत्वमन्त्यत्वात्, न द्वयोस्ततो द्विचरमत्वमयुक्तमिति; तन्न; किं कारणम्? औपचारिकत्वात्। येन देहेन साक्षान्मोक्षोऽवाप्यते स मुख्यश्चरमः; तस्य प्रत्यासन्नो मनुष्यभवः तत्प्रत्यासत्तेश्चरम इत्युपचर्यते। देवभवेन व्यवहितत्वात् प्रत्यासत्त्यभाव इति चेन्न; **"येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात्"** इति।

**आर्षविरोध इति चेन्न; प्रश्नविशेषापेक्षत्वात् ॥५॥** स्यान्मतम्–विजयादिषु द्विचरमत्वमार्षविरोधि। कुतः? त्रिचरमत्वात्। एवं ह्यार्षे उक्तमन्तरविधाने-**"अनुदिशानुत्तरविजयवैजयन्तजयन्तापराजितविमानवासिनामन्तरं जघन्येन वर्षपृथक्त्वमुत्कर्षेण**

**द्वे सागरोपमे सातिरेके"** इति। तस्यायमर्थः – तेभ्यः च्युता मनुष्येषूत्पद्याष्टवर्षाः संयममावाप्यान्तर्मूहूर्तेन विजयादिषु भवमाप्नुवन्तीति जघन्येन वर्षपृथक्त्वम्। केचित्तेभ्यश्च्युता मनुष्येषूत्पद्य संयममवाप्य सौधर्मैशानकल्पयोः जनित्वा पुनरपि मनुष्यभवमनुभूय विजयादिषु जायन्ते इत्युत्कर्षेण द्वे सागरोपमे साधिके इति, ततो मनुष्यभवत्रयोपपत्तेर्द्विचरमत्वमयुक्तमिति; तन्न; किं कारणम्? प्रश्नविशेषापेक्षत्वात्। एवं हि व्याख्याप्रज्ञप्तिदण्डकेषूक्तम्– विजयादिषु देवा मनुष्यभवमास्कन्दन्तः कियतीर्गत्या-गतीः विजयादिषु कुर्वन्ति इति गौतमप्रश्ने भगवत्तोक्तं जघन्येनैको भवः आगत्या उत्कर्षेण गत्यागतिभ्यां द्वौ भवौ। सर्वार्थसिद्धाः च्युता मनुष्येषूत्पद्य तेनैव भवेन सिध्यन्तीति, न लौकान्तिकवदेकभविका एवेति विजयादिषु द्विचरमत्वं नार्षविरोधि, कल्पान्तरोत्पत्त्यनपेक्षत्वात् प्रश्नस्येति।

आह – उक्तं भवता जीवस्यौदयिकेषु भावेषु तैर्यग्योनिगतिरौदयिकीति स्थितौ चोक्तम् "तिर्यग्योनिजानां च" इति। आस्रवविधाने च वक्ष्यते "माया तैर्यग्योनस्य" इति। तद्वक्तव्यं के तिर्यग्योनय इति? अत्रोच्यते –

## औपपादिकमनुष्येभ्यः शेषास्तिर्यग्योनयः॥२७॥

अयुक्तोऽयं निर्देशः 'औपपादिकमनुष्येभ्यः' इति। कुतः? मनुष्यशब्दस्य अल्पाच्तरत्वात् पूर्वनिपातप्राप्त्यर्हत्वात्; नैष दोषः; अभ्यर्हितत्वादौपपादिकशब्दस्य पूर्वनिपातः। कथमभ्यर्हितत्वम्? देवानामौपपादिकेष्वन्तर्भावात्, देवा हि स्थितिप्रभावादि-भिरभ्यर्हिता इति व्याख्याताः।

**उक्तेभ्य औपपादिकमनुष्येभ्योऽन्ये शेषाः॥१॥** औपपादिका उक्ता देवनारकाः, मनुष्याश्च व्याख्याताः "प्राङ मानुषोत्तरान्मनुष्याः" इति। तेभ्योऽन्ये ये ते शेषाः तिर्यग्योनयः।

**सिद्धप्रसङ्ग इति चेन्न; सांसारिकप्रकरणात् ॥२॥** स्यान्मतम् – औपपादिक-मनुष्येभ्योऽन्यत्वं सिद्धानामप्यस्तीति तिर्यग्योनित्वप्रसङ्ग इति; तन्न; किं कारणम्? सांसारिकप्रकरणात्। संसारिणः प्रकृता; तेन तेभ्योऽन्ये संसारिण एव तिर्यग्योनयो न सिद्धाः। अथ केयं तिर्यग्योनिः?

**तिरोभावात् तैर्यग्योनिः॥३॥** तिरोभावो न्यग्भावः उपबाह्यत्वमित्यर्थः, ततः कर्मोदयापादितभावा तिर्यग्योनिरित्याख्यायते। तिरश्चि योनिर्येषां ते तिर्यग्योनयः। ते च त्रसस्थावरादिविकल्पा व्याख्याताः।

**देवादिवत्तदाधारनिर्देश इति चेन्न; सर्वलोकव्यापित्वात् ॥४॥** स्यान्मतम् – यथा देवानामूर्ध्वलोकः, मनुष्याणां तिर्यग्लोकः, नारकाणामधोलोक आधारविशेष उक्तः तथा तिरश्चामप्याधारो विशिष्टो निर्देष्टव्य इति; तन्न; किं कारणम्? सर्वलोकव्यापित्वात् ते हि तिर्यञ्चः सर्वान् लोकान् व्याप्य वर्तन्ते इति। कुतः पुनः सर्वलोकव्यापित्वमेषामिति चेत्? उच्यते –

**सूक्ष्मबादरभेदात् ॥५॥** तिर्यञ्चो द्विविधाः – सूक्ष्मा बादराश्चेति सूक्ष्मबादरनाम-कर्मोदयापादितभावाः। तत्र सूक्ष्माः पृथिव्यप्तेजोवायुवनस्पतयः सर्वलोकव्यापिनः। बादराः पृथिव्यप्तेजोवायुवनस्पतयः विकलेन्द्रियाः पञ्चेन्द्रियाश्च क्वचिदेव वर्तन्ते न सर्वत्र।

**द्वितीयेऽध्याये तन्निर्देश इति चेन्न; कृत्स्नलोकभावात् ॥६॥** स्यादेतत् – द्वितीयेऽध्याये एषां तिरश्चां निर्देशः कर्तव्यः नात्रेति; तन्न; किं कारणम्? कृत्स्नलोकभावादयमेव तन्निर्देशो युक्तः, सर्वांल्लोकानुक्त्वा तदाधारनिर्देशः सुगम इति।

**शेषसंप्रतिपत्तेश्च॥७॥** नारकादीन् सर्वानुक्त्वा तेभ्योऽन्ये शेषास्तिर्यञ्च इति शेषसंप्रतिपत्तिश्च भवतीतीहैव तन्निर्देशो युक्तः।

स्थितिरिदानीं वक्तव्या। सा नारकाणां मनुष्याणां तिरश्चां चोक्ता, देवानामुच्यते। तत्र चादावुद्दिष्टानां भवनवासिनां स्थितिप्रतिपादनार्थमाह –

## स्थितिरसुरनागसुपर्णद्वीपशेषाणां सागरोपमत्रिपल्योपमार्धहीनमिता॥२८॥

**असुरादीनां सागरोपमादिभिरभिसंबंधो यथाक्रमम्॥१॥** असुरादीनां सागरोपमादिभिर्यथाक्रममभिसंबन्धो वेदितव्यः। इयं स्थितिरुत्कृष्टा। जघन्याप्युत्तरत्र वक्ष्यते। तद्यथा – असुराणां सागरोपमा स्थितिः, नागानां त्रीणि पल्योपमानि, सुपर्णानामर्धतृतीयानि, द्वीपानां द्वे, शेषाणां षण्णामध्यर्धपल्योपमम् ।

आद्यदेवनिकायस्थित्यभिधानानन्तरं व्यन्तरज्योतिष्कस्थितिवचने क्रमप्राप्ते सति तदुल्लङ्घ्य वैमानिकानां स्थितिरुच्यते। कुतः? तयोरुत्तरत्र लघुनोपायेन स्थितिवचनात् । तेषु चादावुद्दिष्टयोः कल्पयोः स्थितिविधानार्थमाह –

## सौधर्मैशानयोः सागरोपमेऽधिके॥२९॥

**द्विवचननिर्देशाद् द्वित्वगतिः॥१॥** सागरोपमे इति द्विवचननिर्देशाद् द्वे सागरोपमे इति गम्यते।

**अधिके इत्यधिकार आ सहस्रारात्॥२॥** अधिके इत्ययं अधिकारो द्रष्टव्यः। आ कुतः? आ सहस्रारात् । तेन सौधर्मैशानयोर्देवानामुत्कृष्टा स्थितिः द्वे सागरोपमे सातिरेके प्रत्येतव्ये।

उत्तरयोः स्थितिविशेषप्रतिपत्त्यर्थमाह –

## सानत्कुमारमाहेन्द्रयोः सप्त॥३०॥

**अधिकारात् सागराधिकसंप्रत्ययः॥१॥** सागरग्रहणमधिकग्रहणं चानुवर्तते। तेनायमर्थो लभ्यते – सानत्कुमारमाहेन्द्रयोर्देवानामुत्कृष्टा स्थितिः सप्तसागरोपमाणि साधिकानीति।

ब्रह्मलोकादिष्वच्युतावसानेषु स्थितिविशेषप्रतिपत्यर्थमाह –

## त्रिसप्तनवैकादशत्रयोदशपञ्चदशभिरधिकानि तु॥३१॥

**सप्तग्रहणस्य त्र्यादिभिरभिसंबन्धः॥१॥** द्वयोर्द्वयोः सप्तग्रहणं प्रकृतम्, तस्येह निर्दिष्टैः त्र्यादिभिरभिसंबन्धो द्रष्टव्यः। सप्त त्रिभिरधिकानि, सप्त सप्तभिरधिकानीत्यादि।

**तुशब्दो विशेषणार्थः॥२॥** तुशब्दो विशेषणार्थो द्रष्टव्यः। किं विशिनष्टि? अधिक-शब्दोऽनुवर्त्तमानः चतुर्भिरिह संबध्यते नोत्तराभ्यामित्ययमर्थो विशेष्यते। तेनायमर्थो भवति – ब्रह्मलोकब्रह्मोत्तरयोः दशसागरोपमाणि साधिकानि। लान्तवकापिष्ठयोश्चतुर्दश-सागरोपमाणि साधिकानि। शुक्रमहाशुक्रयोः षोडशसागरोपमाणि साधिकानि। शतारसह-स्रारयोरष्टादशसागरोपमाणि साधिकानि। आनतप्राणतयोर्विंशतिः सागरोपमाणि। आरणा-च्युतयोर्द्वाविंशतिः सागरोपमाण्युत्कृष्टा स्थितिरिति। ननु च तुशब्दोऽनर्थकः 'अधिके' इत्यधिकारे आ सहस्रारादित्युक्तत्वात्? न, अतस्तत्सिद्धेः।

ततः ऊर्ध्वं स्थितिविशेषप्रतिपत्यर्थमाह–

## आरणाच्युतादूर्ध्वमेकैकेन नवसु ग्रैवेयकेषु विजयादिषु सर्वार्थसिद्धौ च॥३२॥

**अधिकारादधिकसंबन्धः॥१॥** अधिकग्रहणमनुवर्तते तेनेह संबन्धो वेदितव्यः – एकैकेनाऽधिकानीति। किमर्थं नवसु ग्रैवेयकेषु विजयादिष्विति पृथग् ग्रहणम्?

**ग्रैवेयकेभ्यो विजयादीनां पृथग्ग्रहणमनुदिशसंग्रहार्थम्॥२॥** ग्रैवेयकविजयादि-ष्वित्युच्यमानेऽनुदिशविमानानामसंग्रहः स्यात् ततस्तत्संग्रहार्थं पृथग्ग्रहणं क्रियते।

**प्रत्येकमेकैकवृद्ध्यभिसंबन्धार्थं नवग्रहणम्॥३॥** ग्रैवेयकेष्वित्युच्यमाने यथा विजयादिषु सर्वेष्वेकमेव सागरोपममधिकं तथा सर्वेषु ग्रैवेयकेष्वेकमेव सागरोपम-मधिकमिति प्रतीयेत तस्मान्नवग्रहणं क्रियते। नवसु प्रत्येकमेकैकस्य सागरोपमस्या-धिक्यं यथा स्यादिति। अथ सर्वार्थसिद्धस्य पृथग्ग्रहणं किमर्थम्?

**सर्वार्थसिद्धस्य पृथग्ग्रहणं विकल्पनिवृत्त्यर्थम्॥४॥** यथाऽधस्ताज्जघन्योत्कर्ष-स्थितिविकल्पस्तथा सर्वार्थसिद्धेर्माभूदित्येवमर्थं पृथग्ग्रहणं क्रियते। तेनायमर्थो वेदितव्यः – अधोग्रैवेयकेषु प्रथमे त्रयोविंशतिसागरोपमाणि। द्वितीये चतुर्विंशतिसागरोपमाणि। तृतीये पञ्चविंशतिसागरोपमाणि। मध्यमग्रैवेयकेषु प्रथमे षड्विंशतिसागरोपमाणि, द्वितीये सप्तविंशतिः, तृतीयेऽष्टाविंशतिः। उपरिमग्रैवेयकेषु प्रथमे एकोनत्रिंशत्, द्वितीये त्रिंशत्, तृतीये एकत्रिंशत्। अनुदिशविमानेषु द्वात्रिंशत्। विजयादिषु त्रयस्त्रिंशत् सागरोपमाण्युत्कृष्टा स्थितिः। सर्वार्थसिद्धे त्रयस्त्रिंशदेवेति।

अत्राह मनुष्यतिर्यग्योनिजानां परापरस्थिती व्याख्यायते, देवानां किमुत्कृष्टैव न वेति ? उच्यते–

## अपरा पल्योपममधिकम्॥३३॥

अपरा जघन्येत्यर्थः। स्थितिरित्यनुवर्तते। व्याख्यातपरिमाणपल्योपमम्। केषाम्? देवानामियं जघन्या स्थितिः? सौधर्मैशानयोर्देवानाम्। कथं गम्यते?

**पारिशेष्यात्सौधर्मैशानयोरपरा स्थितिः॥१॥** भवनवास्यादीनां जघन्या स्थिति-र्वक्ष्यते। सानत्कुमारादीनां च परतः पूर्वापूर्वाऽनन्तरेति। ततः परिशेषात् सौधर्मैशानयोर्देवानां साधिकं पल्योपमं जघन्या स्थितिर्वेदितव्या।

तत ऊर्ध्वं जघन्यस्थितिप्रतिपादनार्थमाह -

## परतः परतः पूर्वा पूर्वानन्तरा॥३४॥

परस्मिन् देशे परत; तस्य वीप्सायां द्वित्वम्। पूर्वशब्दस्यापि। किमुक्तं भवति – पूर्वा पूर्वा या स्थितिरुत्कृष्टोक्ता सा सोपर्युपरि देवानां जघन्येत्येतदुक्तं भवति। किमविशेषेण ? नेत्याह ।

**अधिकग्रहणानुवृत्तेः सातिरेकसंप्रत्ययः॥१॥** अधिकग्रहणमनुवर्तते? क्व प्रकृतम्? **'अपरा पल्योपममधिकम्'** इत्यत्र, सातिरेकसंप्रत्ययो भवति। सौधर्मैशानयोः परा स्थितिः द्वे सागरोपमे साधिके। ते सानत्कुमारमाहेन्द्रयोः सातिरेके जघन्या स्थितिः। सानत्कुमारमाहेन्द्रयोः परा स्थितिः सप्तसागरोपमाणि साधिकानि। तानि सातिरेकाणि ब्रह्मलोकब्रह्मोत्तरयोर्जघन्या स्थितिरित्यादि। आ कुतोऽयमधिकारः?

**आ विजयादिभ्योऽधिकारः॥२॥** आ विजयादिभ्योऽनुत्तरेभ्यः अयमधिकारो वेदितव्यः। कथं गम्यते? 'सर्वार्थसिद्धस्य पृथग् ग्रहणात् इत्युक्तं पुरस्तात्।

**अनन्तरेत्यवचनं पूर्वोक्तेरिति चेन्न; व्यवहिते पूर्वशब्दप्रयोगात्॥३॥** स्यान्मतम्, पूर्वेति वचनादानन्तर्यप्रतीतेरनन्तरेति वचनमनर्थकमिति; तन्न; किं कारणम्? व्यवहितेऽपि पूर्वशब्दप्रयोगात्। अयं हि पूर्वशब्दः व्यवहितेऽपि प्रयुज्यते। तद्यथा– पूर्वं मथुरायाः पाटलिपुत्रमिति। ततः सोधर्मैशानयोः या परा स्थितिः सा ब्रह्मलोकब्रह्मोत्तरलोकयोर्जघन्या स्थितिरित्येवमाद्यनिष्टं प्रतीयेत ततोऽनन्तरमुच्यते।

नारकाणामुत्कृष्टा स्थितिरुक्ता, जघन्या सूत्रेऽनुक्ता, तामप्रकृतामपि लघुनोपायेन प्रतिपादयितुमिच्छन्नाह –

## नारकाणां च द्वितीयादिषु ॥३५॥

चशब्दः किमर्थः?

**चशब्दः प्रकृतसमुच्चयार्थः॥१॥** चशब्दः क्रियते प्रकृतसमुच्चयार्थः। किं प्रकृतम्? परतः परतः पूर्वा पूर्वाऽनन्तरा अपरा स्थितिरिति। तेनायमर्थो लभ्यते – रत्नप्रभायां नारकाणां परा स्थितिरेकं सागरोपमं सा शर्कराप्रभायां जघन्या। शर्कराप्रभायामुत्कृष्टा स्थितिः त्रीणि सागरोपमाणि, सा बालुकाप्रभायां जघन्येत्येवमादि। तद्व्यासो व्याख्यातः पुरस्तात्।

अथ प्रथमायां पृथिव्यां का जघन्या स्थितिरिति? अत आह –

## दशवर्षसहस्राणि प्रथमायाम् ॥३६॥

अपरा स्थितिरित्यनुवर्तते।

अथ भवनवासिनां का जघन्या स्थितिरिति? अत आह –

## भवनेषु च॥३७॥

चशब्दः किमर्थः? प्रकृतसमुच्चयार्थ इति। एवं तेन भवनवासिनामपरा स्थितिर्दशवर्षसहस्राणि इत्यभिसंबध्यते।

व्यन्तराणां तर्हि का जघन्या स्थितिरिति? अत आह –

## व्यन्तराणाञ्च ॥३८॥

चशब्दः प्रकृतसमुच्चयार्थ इति, एवं तेन व्यन्तराणामपरा स्थितिः दशवर्षसहस्राणि इत्यवगम्यते।

**परा व्यन्तराणां प्रागभिधातव्येति चेन्न; लाघवार्थत्वात्॥१॥** स्यादेतत् – यथा अन्येषां देवनिकायानां परा स्थितिः प्रागुक्ता तथा व्यन्तराणामपि परा प्रागभिधातव्या इति? तन्न; किं कारणम्? लाघवार्थत्वात्। यदि परा स्थितिः प्रागुच्येत पुनः दशवर्षसहस्रग्रहणं क्रियेत, तथा सति गौरवं स्यात्।

यद्येवम्, अमीषां का परा स्थितिरिति? अत आह –

## परा पल्योपममधिकम्॥३९॥

**स्थित्यभिसंबन्धात् स्त्रीलिङ्गनिर्देशः॥१॥** स्थितिरित्यनुवर्तते। तेनाभिसंबन्धात् परेति स्त्रीलिङ्गनिर्देशो द्रष्टव्यः।

इदानीं ज्योतिष्काणां परा स्थितिर्वक्तव्येति, अत आह –

## ज्योतिष्काणाञ्च॥४०॥

चशब्दः प्रकृतसमुच्चयार्थ इति। एवं तेनैवमभिसंबध्यते – ज्योतिष्काणाञ्च परा स्थितिः पल्योपममधिकमिति।

अथापरा ज्योतिष्काणां कियती स्थितिरिति? अत आह –

## तदष्टभागोऽपरा॥४१॥

तस्या पल्योपमस्याष्टभागो ज्योतिष्काणामपरा स्थितिरित्यर्थः। अत्राह – 'ज्योतिष्काणां पल्योपममधिकं परा स्थितिः' इत्यविशेषाभिधाने च ज्ञायते चन्द्रादीनां किं स्थितिविशेष इति? अत्रोच्यते –

**चन्द्राणां वर्षशतसहस्राधिकम् ॥१॥** चन्द्राणां वर्षशतसहस्राधिकं पल्योपमं परा स्थितिः।

**सूर्याणां वर्षसहस्राधिकम् ॥२॥** वर्षसहस्राधिकं पल्योपमं परा स्थितिः।

**शुक्राणां शताधिकम् ॥३॥** शुक्राणां वर्षशताधिकं पल्योपमं परा स्थितिः।

**बृहस्पतीनां पूर्णम् ॥४॥** बृहस्पतीनां पूर्णपल्योपमं परा स्थिति; नाधिकम्।

**शेषाणामर्धम् ॥५॥** शेषाणां ग्रहाणां बुधादीनां पल्योपमस्यार्धं परा स्थितिः।

**नक्षत्राणाञ्च॥६॥** किम्? अर्धपल्योपमं परा स्थितिः।

**तारकाणां चतुर्भागः॥७॥** पल्योपमस्य चतुर्भागस्तारकाणां परा स्थितिः।

**तदष्टभागो जघन्योभयेषाम् ॥८॥** तस्य पल्योपमस्याष्टभागः जघन्या स्थिति-रूभयेषां तारकाणां नक्षत्राणाञ्च भवति।

**शेषाणां चतुर्भागः॥९॥** शेषाणां सूर्यादीनां पल्योपमस्य चतुर्भागो जघन्या स्थितिर्वेदितव्या।

अथ लौकान्तिकदेवानां का स्थितिरिति? अत्रोच्यते –

## लौकान्तिकानामष्टौ सागरोपमाणि सर्वेषाम् ॥४२॥

**अष्टसागरोपमस्थितयो लौकान्तिकाः॥१॥** एकैव लोकान्तिकानां स्थितिः। काऽसौ? अष्टौ सागरोपमाणि। सर्वे ते शुक्ललेश्याः पञ्चहस्तोत्सेधशरीराः।

**व्याख्यातो जीवः॥२॥** सम्यग्दर्शनस्य विषयप्रदर्शनमुखेनोपन्यस्तेषु जीवादिष्वाद्यो जीवपदार्थो व्याख्यातः।

**स च एकोऽनेकात्मकः॥३॥** स जीव एकोऽनेकात्मको भवति। कुत एकस्याने-कात्मकत्वमिति चेत्? अत्रोच्यते–

**अभावविलक्षणत्वात्॥४॥** अभूतं नास्तीत्येकरूपोऽभावः। न ह्यभावोऽभावात्मना भिद्यते। तद्विसदृशस्तु नानारूपो भावः, इतरथा हि तयोरविशेष एव स्यात्।

**स तु षोढा भिद्यते जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते विनश्यतीति॥५॥** तत्र उभयनिमित्तवशादात्मलाभमापद्यमानो भावो जायत इत्यस्य विषयः। यथा मनुष्य-गत्यादिनामकर्मोदयापेक्षयाऽऽत्मा मनुष्यादित्वेन जायत इत्युच्यते। तस्यायुरादिनिमित्त-वशादवस्थानमस्तित्वम्। सत एवावस्थान्तरावाप्तिर्विपरिणामः। अनिवृत्तपूर्वस्वभावस्य भावान्तरेणाऽऽधिक्यं वृद्धिः। क्रमेण पूर्वभावैकदेशनिवृत्तिरपक्षयः। तत्पर्यायसामान्यवि निवृत्तिर्विनाशः। एवं प्रतिक्षणं वृत्तिभेदादनन्तरूपा जायन्ते इति नानात्मता भावस्य अथवा सज्ज्ञेयद्रव्यामूर्तातिसूक्ष्मावगाहनासंख्येयप्रदेशाऽनादिनिधनचेतनत्वादिना। किञ्च,

**अनेकवाग्विज्ञानविषयत्वात्॥६॥** इह लोके एकोऽर्थोऽनेकशब्दवाच्यो भवति तथाभिधेयपरिणामे सति तेषां शब्दानां तत्र प्रयोगात्। प्रयोगो हि प्रतिपादनक्रिया, तस्याः शब्दार्थावुभावपि साधकौ। शब्दस्तावद् व्यञ्जकत्वात् साधकः। अर्थोऽपि व्यङ्ग्यत्वात् कर्मभावमापद्यमानः तत्समकालमेव स्वातन्त्र्यमनुभवति, तस्मिन् सति क्रियाप्रवृत्तेः। यथा पचौ तण्डुला कर्मरूपापन्ना एव कर्तृतामास्कन्दन्ति येनोच्यते कर्मकारकमिति, अतस्तस्मिन् स्त्यनेकः शब्दः प्रयुज्यते यथा घटः पार्थिवः मार्तिकः सन् ज्ञेयो नवो

महानित्यादि, एवमात्मकानाञ्च विज्ञानानामालम्बनं भवति तैर्विना तस्याभावात्। सर्वे ते घटस्याऽऽत्मानः। यथाऽऽत्मन्यप्यनेकवाग्विज्ञानालम्बनदर्शनादेकस्यानेकात्मकत्व-मवसेयम्। अपि च

**अनेकशक्तिप्रचितत्वात् ॥७॥** यथा घृतं स्नेहयति तर्पयत्युपबृंहयतीत्यनेकशक्ति। घटो वा जलधारणाहरणादिलक्षणयाऽनेकया शक्त्या प्रचितः। तथाऽऽत्मनोऽपि द्रव्यक्षेत्र-कालभावनिमित्तवशादनेकविकारप्राप्तियोग्यबहुशक्तियोगादनेकात्मकत्वम्। इतश्च

**वस्त्वन्तरसम्बन्धाविर्भूतानेकसम्बन्धिरूपत्वात् ॥८॥** यथैको घटः पूर्वापरान्त-रितानन्तरितदूरासन्ननवपुराणसमर्थासमर्थदेवदत्तकृतचैत्रस्वामिकत्वसंख्यापरिमाणपृथ क्त्वसंयोगविभागादिभेदादनेकव्यपदेशभाग्भवति, सम्बन्धानामानन्त्यात्, तत्तत्सम्बन्धि-नमवेक्ष्य तस्य तस्य पर्यायस्य भावात्। अथवा

**पुद्गलानामानन्त्यात्तत्तत्पुद्गलद्रव्यमपेक्ष्यैकपुद्गलस्थस्य तस्यैकस्यैव पर्यायस्या-ऽन्यत्वभावात्॥९॥** यथा प्रदेशिन्याः मध्यमाभेदात् यदन्यत्वं न तदेवानामिकाभेदात्। मा भूत् मध्यमाऽनामिकयोरेकत्वं मध्यमाप्रदेशिन्यन्यत्वहेतुत्वेनाऽविशेषादिति। न चैतत्परा-वधिकमेवार्थसत्त्वम्। यदि मध्यमासामर्थ्यात् प्रदेशिन्याः ह्रस्वत्वं जायेत शशविषाणेऽपि स्याच्छक्रयष्टौ वा। नापि स्वत एव, परापेक्षाभावे तद्व्यक्त्यभावात्। तस्मात्तस्यानन्तपरिणामस्य द्रव्यस्य तत्तत्सहकारिकारणं प्रतीत्य तत्तद्रूपं वक्ष्यते। न तत् स्वत एव नापि परकृतमेव। एवं जीवोऽपि कर्मनोकर्मविषयवस्तूपकरणसम्बन्धभेदादाविर्भूतजीव स्थानगुणस्थानमार्गणास्थानविकल्पाऽनन्तपर्यायरूपः प्रत्येतव्यः। इतश्च,

**अन्यापेक्षाभिव्यङ्ग्याऽनेकरूपोत्कर्षापकर्षपरिणतगुणसम्बन्धित्वात् ॥१०॥** यथा एको घट एकद्वित्रिचतुःसंख्येयाऽसंख्येयानन्तावस्थोत्कर्षापकर्षात्मकरूपादिपरिणतिप्रति-

योगिद्रव्यापेक्षासहकारिकारणाभिव्यञ्जनीयात्मीयानन्तनीलनीलतरादिपरिणामः, तथा जीवोऽपि परद्रव्यसंबन्धापेक्षाभिव्यक्ततीव्राद्यवस्थाविशेषक्रोधाद्यविभागपरिच्छेदाऽनन्तरूप-त्वादनेकः। इतश्च,

**अतीतानागतवर्तमानकालसंबन्धित्वात् ॥११॥** इह समुदायावयवप्रध्वंसविषयेणा-तीतेन कालेनोत्पत्तिनिर्ज्ञातसंभावनविषयेण चानागतेन कालेन, साधनप्रवृत्त्यविरामगोचरेण च वर्तमानेन कालेन संबन्धात् मृदादिद्रव्यं तस्मिन् तस्मिन् कालेऽनेकभेदमापद्यमानं दृष्टम्। वर्तमानमात्रत्वेऽपूर्वत्वादपरत्वाच्चावध्यभावे वर्तमानस्याप्यभावो बन्ध्यापुत्रयु-वत्ववत्। तथा जीवस्याप्यनाद्यतीतकालसम्बन्धपरिणतैरनागतानन्तकालवशवर्तिभिः वर्तमानकालोद्भूतवृत्तिभिश्च पर्यायैरर्थव्यञ्जनभेदाद् द्वैविध्यमास्कन्दद्भिरभिसम्बन्धादनन्त-रूपता। इतश्च,

**उत्पादव्ययध्रौव्ययुक्तत्वात् ॥१२॥** उत्पादादीनामानन्त्यमनन्तकाले एकस्मिंश्च काले। यथा घट एकस्मिन्नेव काले द्रव्यतः पार्थिवत्वेनोत्पद्यते न जलत्वेन, देशत इहत्यत्वेन न पाटलिपुत्रकत्वेन, कालतो वर्तमानकालतया नातीतानागताभ्याम्, भावतो महत्त्वेन नाल्पत्वेन, एतेषां चैकैक उत्पादः सजातीयान्यपार्थिवानेकघटान्तरगतेभ्यः सौवर्णादीषद्विजातीयघटान्तरगतेभ्यो वाऽत्यन्तविजातीयपटाद्यनन्तमूर्तामूर्तद्रव्यान्तरा-पन्नेभ्यो वोत्पादेभ्यो भिद्यमानः तावद्धा भेदमुपयात्यन्यथा तैरविशिष्टः स्यात्। तथा तदैवानुत्पद्यमानद्रव्यसंबन्धकृतोर्ध्वाधस्तिर्यगन्तरितानन्तरितैकान्तरादिदिग्भेदमहदल्प-त्वादिगुणभेदरूपाद्युत्कर्षापकर्षानन्तभेदत्रैलोक्यत्रिकालविषयसंबन्धिवशभिद्यमानरूपो वोत्पादोऽनेको भवति। तथाऽनेकावयवात्मकस्कन्धप्रदेशभेददृष्टविषमोत्पादनानारूपतया वाऽनेक उत्पादः। उदकादिधारणाहरणप्रदानाधिकरणभयहर्षशोकपरितापभेदजननादि-

स्वकार्यप्रसाधनेन वाऽनेक उत्पादः। तदैव तावन्त एव तत्प्रतिपक्षभूता विनाशाः, पूर्वेणाविनष्टस्योत्तरेणानुत्पादात्। उभयविपक्षभूताः स्थितयोऽपि तदैव तावत्यः तदाधारभूताः, अनवस्थितस्य वन्ध्यापुत्रवदुत्पादविनाशासंभवद्भावप्रसङ्गाच्च। घट उत्पद्यत इति यदा वर्तमानकालता; तदाऽनभिनिर्वृत्तत्वात् पूर्वापरीभूतसाध्यमान भावाभिधानाच्चासत्त्वम्। उत्पत्त्यनन्तरं तु विनाशेऽभ्युपगम्यमाने सत्त्वभूतावस्थाभिधाय-कोत्पन्नशब्दवाच्यत्वाभावादुत्पादेऽप्यभावो विनाशेप्यभाव इति भावाभावात्तदाश्रयो व्यवहारो विरोधमुपगच्छेत्, बीजशक्त्यभावाच्चोत्पादविनाशशब्दवाच्यताभ्रेषश्च। तत उत्पद्यमानता उत्पन्नता विनाशश्चेति तिस्रोऽवस्था अभ्युपगन्तव्याः। तथा जीवस्याप्येकस्य द्रव्यार्थिकपर्यायार्थिकनयगोचरसामान्यविशेषानन्तशक्त्यपेक्षार्पितस्थि-त्युत्पत्तिनिरोधानन्तरूपत्वादनेकत्वं प्रत्येतव्यम्। इतश्च,

**अन्वयव्यतिरेकात्मकत्वाच्च॥१३॥** इह घट एकोऽप्यन्वयव्यतिरेकात्मकतयाऽ-नेको दृष्टः सदचेतननवपुराणत्वादिभिः, तथाऽऽत्माप्येकोऽन्वयव्यतिरेकात्मतयाऽनेकः प्रत्येतव्यः। के पुनरन्वयाः? बुद्ध्यभिधानानुवृत्तिलिङ्गेनमुमीयमानाविच्छेदाः स्वात्म-भूताऽस्तित्वाऽऽत्मत्वज्ञातृत्वदृष्टृत्वकर्तृत्वभोक्तृत्वाऽमूर्तत्वाऽसंख्यातप्रदेशत्वावगाहनाति-सूक्ष्मत्वागुरुलघुत्वाहेतुकत्वाऽनादिसंबन्धित्वोर्ध्वगतिस्वभावादयः। अथ के व्यतिरेका? वाग्विज्ञानव्यावृत्तिलिङ्गसमधिगम्यपरस्परविलक्षणा उत्पत्तिस्थितिविपरिणामवृद्धिक्षय विनाशधर्माणः गतीन्द्रियकाययोगवेदकषायज्ञानसंयमदर्शनलेश्यासम्यक्त्वादयः।

**तस्य शब्देनाभिधानं क्रमयौगपद्याभ्याम्॥१४॥** तस्यैकस्य जीवस्यानेकात्मकस्य प्रत्यायने शब्दः प्रवर्तमानो द्वेधा व्यवतिष्ठते क्रमेण यौगपद्येन वा, न तृतीयो वाक्पथोऽस्ति।

**ते च कालादिभिर्भेदाभेदार्पणात् ॥१५॥** ते च क्रमयौगपद्ये कालादिभिः भेदाभेदार्पणाद्भवतः। यदा वक्ष्यमाणैः कालादिभिरस्तित्वादीनां धर्माणां भेदेन विवक्षा तदैकस्य शब्दस्यानेकार्थप्रत्यायनशक्त्यभावात् क्रमः। यदा तु तेषामेव धर्माणां कालादिभिरभेदेन वृत्तमात्मरूपमुच्यते तदैकेनापि शब्देनैकधर्मप्रत्यायनमुखेन तदात्मकत्वमापन्नस्यानेकाशेषरूपस्य प्रतिपादनसंभवात् यौगपद्यम्।

**तत्र यदा यौगपद्यं तदा सकलादेशः॥१६॥** स एव प्रमाणमित्युच्यते। "सकलादेशः प्रमाणाधीनः" इति वचनात्।

**यदा तु क्रमः तदा विकलादेशः॥१७॥** स एव नय इति व्यपदिश्यते। "विकलादेशो नयाधीनः" इति वचनात्। कथं सकलादेश?

**एकगुणमुखेनाऽशेषवस्तुरूपसंग्रहात् सकलादेशः॥१८॥** यदाऽभिन्नमेकं वस्तु एकगुणरूपेणोच्यते गुणिनां गुणरूपमन्तरेण विशेषप्रतिपत्तेरसंभवात्। एको हि जीवोऽस्तित्वादिष्वेकस्य गुणस्य रूपेणाऽभेदवृत्त्याऽभेदोपचारेण वा निरंशः समस्तो वक्तुमिष्यते, विभागनिमित्तस्य प्रतियोगिनो गुणान्तरस्य तत्रानाश्रयणात्, तदा सकलादेशः। कथमभेदवृत्तिः कथं वाऽभेदोपचारः? द्रव्यार्थत्वेनाश्रयणे तदव्यतिरेकादभेदवृत्तिः। पर्यायार्थत्वेनाश्रयणे परस्परव्यतिरेकेऽप्येकत्वाध्यारोपः, ततश्चाऽभेदोपचारः।

**तत्राऽऽदेशवशात् सप्तभङ्गी प्रतिपदम् ॥१९॥** तत्रैतस्मिन् सकलादेश आदेशवशात् सप्तभङ्गो प्रतिपदं वेदितव्या। तद्यथा– (1) स्यादस्त्येव जीवः, (2) स्यान्नास्त्येव जीवः, (3) स्यादवक्तव्य एव जीवः, (4) स्यादस्ति च नास्ति च, (5) स्यादस्ति चाऽवक्तव्यश्च, (6) स्यान्नास्ति चावक्तव्यश्च, (7) स्यादस्ति च नास्ति चावक्तव्यश्चेत्यादि। उक्तं च –

**“पुच्छावसेण भंगा सत्तेव दु संभवंति जस्स जथा।**

**वत्थु त्ति तं पउच्चदि सामण्णविसेसदो णियदा॥१॥” इति।**

तत्र स्यादस्त्येव जीव इत्येतस्मिन् वाक्ये जीवशब्दो द्रव्यवचनः विशेष्यत्वात् अस्तीति गुणवचनो विशेषणत्वात्। तयोस्सामान्यार्थाविच्छेदेन विशेषणविशेष्यसंबन्धा-वद्योतनार्थ एवकारः। तेनेतरनिवृत्तिप्रसङ्गे तत्संभवप्रदर्शनार्थः स्याच्छब्दप्रयोगः, स च तिङन्तप्रतिरूपको निपातः। तस्यानेकान्तविधिविचारादिषु बहुष्वर्थेषु संभवत्स्विह विवक्षावशादनेकान्तार्थो गृह्यते। यद्ययमनेकान्तार्थस्तेनैव सर्वस्योपादानादितरेषां पदानामानर्थक्यं प्रसज्यते; नैष दोषः; सामान्येनोपादानेऽपि विशेषार्थिना विशेषोऽनु-प्रयोक्तव्यः। वृक्षशब्दस्य सामान्यशब्दत्वात् धवादिविशेषप्रतिपादने धवाद्युपादानवत्। अथवा, स्याच्छब्दोऽयमनेकान्तार्थस्य द्योतकः। द्योतकश्च वाचकप्रयोगसन्निधिमन्तरेणा-ऽभिप्रेतार्थावद्योतनाय नालमिति तद्द्योत्यधर्माधारार्थाभिधानायेतरपदप्रयोगः क्रियते। अथ केनोपात्तोऽनेकान्तार्थोऽनेन द्योत्यते? उक्तमेतत् – अभेदवृत्त्याऽभेदोपचारेण वा प्रयुक्तशब्दवाच्यतामेवास्कन्दन्तीतरे धर्मा इति। एवमितरेष्वपि वाक्येष्वर्थप्रकल्पनं प्रत्येतव्यम्।

यद्येवं स्यादस्त्येव जीव इत्यनेनैव सकलादेशेन जीवद्रव्यगतानां सर्वेषां धर्माणां संग्रहादितरेषां भङ्गानामानर्थक्यमासजति; नैष दोषः; गुणप्राधान्यव्यवस्थाविशेष-प्रतिपादनार्थत्वात् सर्वेषां भङ्गानां प्रयोगोऽर्थवान्। तद्यथा द्रव्यार्थिकस्य प्राधान्ये पर्यायगुणभावे च प्रथमः। पर्यायार्थिकस्य प्राधान्ये द्रव्यगुणभावे च द्वितीयः। तत्र प्राधान्यं शब्देन विवक्षितत्वाच्छब्दाधीनम्, शब्देनानुपात्तस्यार्थतो गम्यमानस्या-प्राधान्यम्। तृतीये तु युगपद्भावे उभयस्याप्राधान्यं शब्देनानुपात्तस्यार्थतो गम्यमानस्या ऽप्राधान्यम्। तृतीये तु युगपद्भावे उभयस्याप्राधान्यं शब्देनाभिधेयतयाऽनुपात्तत्वात्।

चतुर्थस्तूभयप्रधानः क्रमेणोभयस्यास्त्यादिशब्देनोपात्तत्वात्। तथोत्तरे च भङ्गा वक्ष्यन्ते।

तत्रास्तित्वैकान्तवादिनः 'जीव एवास्ति' इत्यवधारणेऽजीवनास्तित्वप्रसङ्ग-भयादिष्टतोऽवधारणविधिः 'अस्त्येव जीवः' इति नियच्छन्ति, तथा चावधारणसामर्थ्यात् शब्दप्रापितादभिप्रायवशवर्तिनः सर्वथा जीवस्याऽस्तित्वं प्राप्नोति। सर्वेणाऽस्तित्वेन व्याप्त इति पुद्गलाद्यस्तित्वेनापि जीवस्यास्तित्वं प्राप्तम्, शब्देन तथा प्रापितत्वात्, शब्दप्रमाणकाश्च वयमर्थाधिगमे। स्यान्मतम् – अस्तित्वसामान्येन व्याप्तिर्न त्वस्तित्वविशेषैः यथाऽनित्यमेव कृतकमित्यनित्यत्वस्याभावे कृतकत्वस्याप्यभाव एवेत्यवधारणात्, यत्कृतकं तत्सर्वमनित्यमिति, न हि सर्वप्रकारेणानित्यत्वेन सर्वप्रकारं कृतकत्वं व्याप्यते किन्त्वनित्यत्वसामान्येन, नाऽनित्यत्वव्यक्त्या घटपटरथादि-गतयेति। एवं तर्हि त्वयैवाभ्युपगतमवधारणनिष्फलत्वं सामान्याऽनित्यत्वेनाऽनित्यत्वं न विशेषाऽनित्यत्वेनेति। स्वगतेनापि विशेषेणानित्यं भवत्येवेति चेन्न; स्वगतेनेति विशेषणात्, परगतेन विशेषेणाऽनित्यत्वं न भवतीत्यापद्यते, अनवधारणकं वा वाक्यं प्रयोक्तव्यम् – अनित्यं कृतकमिति। तथा चाऽनित्यस्याऽनवधृतत्वान्नित्यत्व-प्रसङ्गोऽपि। एवं यद्यस्तित्वसामान्येनास्ति जीवो न तु पुद्गलादिगतयाऽस्तित्वव्यक्त्या, अतो न पुद्गलाद्यस्तित्वेनास्तितत्वं जीवस्येति ब्रुवता त्वयैवाभ्युपगतं सामान्यरूपं विशेषरूपञ्चेति प्रकारवदस्तित्वमिति। तथा सति सामान्यास्तित्वेनास्ति विशेषास्तित्वेन नास्तीति स्यादस्ति स्यान्नास्तीति प्राप्तमवधारणनिष्फलत्वम्। सर्वेण हि प्रकारेणाऽस्तित्वाभ्युपगमेनाऽस्तित्वनिरासेनाऽवधारणं फलवत्स्यात्। अनियमे त्वव्यावृत्तत्वात् पुद्गलाद्यस्तित्वेनापि प्राप्तिरित्यवश्यमेकान्तवादिनाऽवधारणमभ्युपगमनीयम्। तथा च सति पूर्वोक्तो दोषः।

स्यादेतत् – यदस्ति तत् स्वायत्तद्रव्यक्षेत्रकालभावरूपेण भवति नेतरेण तस्याऽप्रस्तुतत्वात्। यथा घटो द्रव्यतः पार्थिवत्वेन, क्षेत्रत इहत्यतया, कालतो वर्तमानकालसंबन्धितया, भावतो रक्तत्वादिना, न परायत्तैर्द्रव्यादिभिस्तेषामप्रसक्तत्वादि-ति। एवं चेत् द्रव्यक्षेत्रकालभावान्तरसंबन्धितया नास्तीत्यतः स्यादस्ति स्यान्नास्तीति सिद्धम्। नियमानभ्युपगमे तु स घटो न स्यादेवाऽसामान्यत्वे सति नियतद्रव्य-क्षेत्रकालभावसंबन्धित्वेनाऽभूतत्वात् शशविषाणवत्। अनियतद्रव्यादिरूपत्वे वा सर्वथा-भावात् सामान्यमेव स्यान्नासौ घटः, अनियतद्रव्यादिरूपत्वान्महासामान्यवत्। कथम्? यदि ह्यसौ द्रव्यतः पार्थिवत्वेन तथोदकादित्वेनापि भवेत्, ततोऽसौ घट एव न स्यात् पृथिव्युदकदहनपवनादिषु वृत्तत्वात् द्रव्यत्ववत्। तथा यथेहत्यतयाऽस्ति तथाविरोधि-दिगन्तानियतदेशस्थतयापि यदि स्यात्तथा चासौ घट एव न स्यात् विरोधिदिगन्ताऽनियतसर्वदेशस्थत्वादाकाशवत्। तथा, यथा वर्तमानघटकालतयाऽस्ति तथाऽतीतशिवकाद्यनागतकपालादिकालतयापि स्यात् तथा चाऽसौ घट एव न स्यात् सर्वकालसंबन्धित्वान्मृद्द्रव्यवत्। यथा चेह देशकालविशेषसंबन्धितयाऽस्मत्प्रत्यक्षत्वं तथाऽतीतानागतकालान्यदेशसम्बन्धित्वेनाप्यस्मत्प्रत्यक्षत्वं स्यात्, उदकाद्यानयनादि-संव्यवहारपातित्वं वा। तथा, यथा नवत्वेन तथा पुराणत्वेन, सर्वरूपरसगन्धस्पर्श-संख्यासंस्थानादित्वेन वा स्यात्; तथा चासौ घट एव न स्यात् सर्वथाभावित्वात् भवनवत्। यथा हि भवनं रूपं रसो गन्धः स्पर्शश्च भवति पृथुः महान् ह्रस्वः पूर्णः रिक्तो वा भवतीति न कुतश्चित् वस्तुनो वस्तुधर्माद्वा व्यावर्तते तच्च न घटः एवं घटोऽपि स्यात्। एवं जीवस्यापि मनुष्यत्वेनाऽर्प्यमाणस्य स्वद्रव्यादिरूपतयैवास्तित्वं नेतरथा। यदीतरथाऽपि स्यान्मनुष्य एव न स्यान्नियतद्रव्यक्षेत्रकालभावसम्बन्धित्वेनाऽभूतत्वात् खरविषाणवत्। अनियतद्रव्यादिरूपत्वे वा सर्वथाभावात् सामान्यमेव स्यान्नासौ

मनुष्योऽनियतद्रव्यादिरूपत्वान्महासामान्यवत्। कथम्? यदि ह्यसौ यथा जीवद्रव्यत्वेनाऽस्ति एवं पुद्गलादित्वेनापि स्यात् ततोऽसौ मनुष्य एव न स्यात् पुद्गलादिष्वपि दृष्टत्वात् द्रव्यत्ववत्। तथा यथेहत्यतयाऽस्ति तथा विरोधिदिगन्तानियतदेशस्थतयापि यदि स्यात्; तथा चासौ मनुष्य एव न स्यात् विरोधिदिगन्तानियतसर्वदेशस्थत्वादाकाशवत्। तथा यथा वर्तमानकालतयाऽस्ति तथाऽतीतनारकाद्यनागतदेवादिकालतयापि स्यात्, तथा चासौ मनुष्य एव न स्यात् सर्वकालसंबन्धित्वाज्जीवत्ववत्। यथा चेह देशकालविशेषसंबन्धितयाऽस्मत्प्रत्यक्षत्वं तथाऽतीतानागतकालान्यदेशसंबन्धित्वेनाप्यस्मत्प्रत्यक्षत्वं स्यात्, यथा यौवनेन तथा वृद्धत्वेनान्यद्रव्यगतरूपरसादिभिर्वा यदि स्यात् तथा चासौ मनुष्य एव न स्यात् सर्वथाभावित्वात् भवनवत्। तस्मात् स्यादस्ति स्यान्नास्ति।

इतश्च स्यादस्ति स्यान्नास्ति च स्वपरसत्ताभावाभावोभयाधीनत्वाज्जीवस्य। यदि परसत्ताया अभावं स जीवः स्वात्मनि नापेक्षते, अतः स जीव एव न स्यात् सन्मात्रं स्यात्, नासौ जीवः सत्त्वे सति विशेषरूपेणानवस्थितत्वात् सामान्यवत्। तथा स्वपरसत्ताभावापेक्षायामपि जीवत्वे यदि स्वसत्तापरिणतिं नापेक्षते तथापि तस्य वस्तुत्वमेव न स्याज्जीवत्वं वा। सद्भावापरिणतत्वे वा पराभावमात्रत्वात् खपुष्पवत्। अतः पराभावोऽपि स्वसत्तापरिणत्यपेक्ष एवास्तित्वस्वात्मवत्। यथाऽस्तित्वस्वात्मा अस्तित्वस्वात्मनाऽस्ति नास्ति च नास्तित्वस्वात्मनेति स्यादस्ति, स्यान्नास्ति इतरथा हि वस्त्वभावः स्यात्। कथम्? अभावो हि भावनिरपेक्षोऽत्यन्तशून्यं च वस्तु प्रतिपादयेदन्वयाप्रतिलम्भात्। भावोऽपि वाऽभावनिरपेक्षः सर्वरूपं वस्तु प्रतिपादयेत् व्यतिरेकाप्रतिलम्भात्। न च सर्वथा सत्ता सर्वाभावरूपेण वा शक्यं भवितुम्। किं हि वस्तु सर्वात्मकं सर्वाभावरूपं वा दृष्टमिति? तद्धि वस्त्वेव न स्यात् सर्वाभावरूपत्वात् खपुष्पवत्। न च वस्तुत्वं सर्वात्मकत्वात् शक्यं प्रतिपत्तुमसाधारणत्वात्, वस्तुत्वे चाऽवस्तुत्वे चाऽदर्शनात् श्रावणत्ववत्। अभावता हि भावस्वरूपवैलक्षण्यात्

क्रियागुणव्यपदेशाभावादवतिष्ठते। भावताप्यभाववैलक्षण्यात् क्रियागुणव्यपदेशवत्त्वात् सिध्यतीति परस्परापेक्षे भावाभावरूपत्वेऽपि चाभावः स्वसद्भावं भावाभावं चापेक्षमाणः सिध्यति। भावोऽपि स्वसद्भावमभावाभावं चाऽपेक्ष्य सिद्धिमुपयाति। यदि त्वभाव एकान्तेनाऽस्तीत्यभ्युपगम्येत ततः सर्वात्मनाऽस्तित्वात् स्वरूपसद्भावात्मनापि स्यात्, तथा च भावाभावरूपसङ्करादस्थितरूपत्वादुभयोरप्यभावः। अथैकान्तेन नास्तीत्यभ्युपगम्येत ततोऽयं यथा भावात्मना नास्ति तथाऽभावात्मनापि न स्यात्, ततश्चाभावस्याऽभावात् भावस्याऽप्रतिपक्षत्वात् भावमात्रमेव न स्यात् तथा खपुष्पादयोऽपि भावा एवाभावाभावरूपत्वात् घटवदिति सर्वाभावप्रसङ्गः। एवं भावास्तित्वैकान्तेऽपि योज्यम्। तस्माद्भावः स्यादस्ति स्यान्नास्ति तथाऽभावोऽप्येवम्। जीवोऽपि स्यादस्ति स्यान्नास्तीत्यवसेयम्।

एवं स्वात्मनि घटादिवस्तुसिद्धौ च भावाभावयोः परस्परापेक्षत्वात् यदुच्यते "अर्थात् प्रकरणाद्वा घटेऽप्रसक्तायाः पटादिसत्तायाः किमिति निषेधः क्रियते" इति; तदयुक्तम्। किञ्च घटेऽर्थत्वादर्थसामान्यात् पटादिसर्वार्थप्रसङ्गः संभवत्येव। तत्र विशिष्टं घटार्थत्वमभ्युपगम्यमानं पटादिसत्तारूपस्यार्थसामर्थ्यात् प्रापितस्यार्थतत्त्वस्य निरासेनै-वाऽऽत्मानं शक्नोति लब्धुम्। इतरथा ह्यसौ घटार्थ एव न स्यात् पटाद्यर्थरूपेणाऽनिवृत्तत्वात् पटाद्यर्थस्वरूपवद्विपरीतो वा। यश्चास्य पटादिरूपेणाभावः सोऽपि घटधर्म एव तदधीनत्वात् भाववत् अतोऽसौ स्वपर्याय एव, परेण तु विशेष्यमाणत्वात् परपर्याय इत्युपचर्यते। स्वपरविशेषणायत्तं हि वस्तुस्वरूपप्रकाशनमिति।

अथ 'अस्त्येव जीवः' इत्यत्राऽस्तिशब्दवाच्यादर्थात् भिन्नस्वभावो जीवशब्द वाच्योऽर्थः स्यादभिन्नस्वभावो वा? यद्यभिन्नस्वभावः, ततो यत् सदर्थस्य रूपं जीव शब्दार्थस्यापि तदेव रूपमिति ततोऽन्यधर्मानवकाशत्वादविशिष्टार्थता स्यात्। ततश्च

सामानाधिकरण्याभावात् विशेषणविशेष्यत्वाभावो घटकुटशब्दवदन्यतराप्रयोगश्च स्यात्। किञ्च, सत्त्वस्य सर्वद्रव्यपर्यायविषयत्वात् तदभिन्नस्वभावस्य जीवस्यपि तादात्म्य-मिति सर्वस्य तत्त्वस्याऽविशिष्टैकजीवत्वप्रसङ्गः। सत्स्वभावत्वाच्च जीवस्वरूप-चैतन्यतद्विकल्पज्ञानादिक्रोधादिनारकत्वादिसर्वविशेषणत्वाभावत्वप्रसङ्गश्च स्यात्। जीव स्वभावत्वाद्वाऽस्तित्वस्य स्वात्मनि पुद्गलादिषु च सत्प्रत्ययाभिधानहेतुत्वाभावो जीव-त्ववत्।

अथायं दोषो माभूदित्यस्तिशब्दवाच्यादर्थात् भिन्नस्वभावो जीवशब्दार्थः प्रतिज्ञायेत। एवमपि स्वतो जीवस्याऽसद्रूपत्वप्रसङ्गः। ततश्च नास्ति जीवोऽस्तिशब्द-वाच्यार्थविविक्तत्वात् खरविषाणवत् विपर्ययो वा। ततश्च तदधीनबन्धमोक्षादिव्य-वहाराभावः। अस्तित्वस्य च जीवादर्थान्तरत्ववदितरेभ्योपि भिन्नत्वात् निराश्रयत्वात्तदभाव एवेति तदाश्रयव्यवहाराभावः। किञ्चास्तित्वाद्भिन्नस्वभावस्य जीवस्य कः स्वभाव इति वक्तव्यम्? यश्चास्य स्वभाव इत्युच्यते स सर्वो न स्यादसत्स्वभावत्वात् खपुष्पवत्। तस्मात् स्याद्भिन्नार्थत्वं स्यादभिन्नार्थत्वं चाभ्युपगन्तव्यम्। पर्यायार्थादेशात् भवनजीवनभेदादस्तिजीवशब्दौ तद्व्यतिरेकेण तदग्रहणेनाग्रहणात् स्याद्भिन्नार्थौ द्रव्यार्थादेशात् तदव्यतिरेकात् तद्ग्रहणेन ग्रहणात् स्यादभिन्नार्थौ। तस्मात् स्यादस्ति स्यान्नास्तीति सिद्धम्। इतश्च, स्यादस्ति स्यान्नास्ति अर्थाभिधानप्रत्ययानां तथाप्रसिद्धेः।

कश्चिदाह – जीवार्थो जीवशब्दो जीवप्रत्ययः इत्येतत्त्रितयं लोकेऽविचारसिद्धम्– तथाहि वर्णाश्रमिणोऽस्तित्वमेवाश्रित्य तासु तासु क्रियासु प्रवृत्ताः तस्मादस्त्येवेति। तमितरः प्रत्याह – नास्त्येवैतत्त्रितयमर्थस्तावन्नास्त्यनुपलब्धेः, विज्ञानमेव तथा परिणतं स्वप्नवत् कल्पयति। प्रत्ययजीवोऽपि नास्त्येव विज्ञानस्य ज्ञेयरूपेणा-ऽनाख्येयत्वात्। स्वतस्तु विज्ञानं न जीवो नाप्यजीवः प्रकाशमात्रं केनचिदपि

रूपेणानिरूप्यत्वात्। यद्यपि निरूप्येत स्वप्नज्ञानवदसदाकारेणैव निरूप्येत। नास्ति ज्ञानमसदाकारनिरूप्यत्वात् खरविषाणवत्। अभिधानमपि नास्ति। तद्धि पदरूपं वा स्यात्, वाक्यरूपं वा ? तन्नास्त्येव वायुगपत्कालावयवत्वात्। यत्पुनरेजीवशब्दग्रहणं तत्परिकल्पितैर्वर्णभागैरनुक्रमेणाऽऽहितशक्तिकासु बुद्धिषु शक्तिपरिपाकप्राप्तौ प्रत्यस्त-मितसकलवर्णभागविषयविज्ञानं जीवशब्दत्वेनाध्यवसीयते नत्वभिधानजीवः कश्चिदस्ति। तदपि विज्ञानं क्षणिकत्वात् प्रत्यर्थवशवर्तित्वाच्चैकस्य पूर्वापरीभूतार्थप्रत्यवभासना-संभवान्नास्त्येवेति। यद्येवं वाच्यवाचकसंबन्धो लोके रूढः प्रत्याख्यातः स्यात् ततश्च लोकविरोधः, तन्नास्तित्वे परीक्षाप्रयासश्च विफलः स्यादित्यभ्युपगन्तव्यं जीवः स्यादस्ति स्यान्नास्तीति। अतः द्रव्यार्थिकः पर्यायार्थिकमात्मसात्कुर्वन् व्याह्रियते पर्यायार्थिकोऽपि द्रव्यार्थिकमित्युभावपीमौ सकलादेशौ तृतीयो विकल्पः उच्यते द्वाभ्यां गुणाभ्यामेकस्यैवाभिन्नस्याभेदरूपेण युगपद्वक्तुमिष्टत्वात्। तत्र तथा प्रथमद्वितीय योर्विकल्पयोरेकस्मिन् काले एकेन शब्देनैकस्यार्थस्य समस्तस्यैवैकेन गुणरूपेणाभिधानं क्रमादेव यदा द्वाभ्यां प्रतियोगिभ्यां गुणाभ्यामवधारणात्काभ्यां युगपदेकस्मिन् काले एकेन शब्देनैकस्यार्थस्य कृत्स्नस्यैवाभेदरूपेणाभिधित्सा तदाऽवाच्यः तद्विधार्थस्य शब्दस्य चाऽभावात्। तत्र युगपद्भावो गुणानां कालादिभिरभेदेन विवक्षितानां वृत्तिःन च तैरभेदोऽत्र सम्भवति।

के पुनस्ते कालादयः?

**काल आत्मरूपमर्थसम्बन्धः उपकारो गुणिदेशः संसर्गः शब्दः ॥२०॥** इति तत्र येन कारणेन विरुद्धा भवन्ति गुणास्तेषामेकस्मिन् काले क्वचिदेकवस्तुनि वृत्तिर्न दृष्टा अतस्तयोर्नास्ति वाचकः शब्दः तथावृत्त्यभावात्। अत एकस्मिन्नात्मनि सदसत्त्वे प्रविभक्तेऽसंसर्गात्मरूपेऽनेकान्तरूपे न स्तः। एककाले येनात्मा तथोच्येत ताभ्यां विविक्तं च परस्परत आत्मरूपं गुणानां नान्योन्यात्मनि वर्तते, यत उभाभ्यां

युगपदभेदेनोच्येत। न च विरुद्धत्वात् सदसत्त्वादीनामेकान्तपक्षे गुणानामेकद्रव्याधारा वृत्तिरस्ति यतोऽभिन्नाधारत्वेनाऽभेदो युगपद्भावः स्यात्, येन केनचित् शब्देन वा सदसत्त्व उच्येयाताम्। न च सम्बन्धतोऽभिन्नता गुणानां संभवति भिन्नत्वात् संबन्धस्य। यथा छत्रदेवदत्तसम्बन्धोऽन्यः दण्डदेवदत्तसंबन्धात् कारणयोः संबन्धिनोर्भिन्नत्वात् न तावेकेन संबन्धेनाभिन्नौ। एवं सदसत्त्वयोरात्मना सह संबन्धस्य भिन्नत्वात् न संबन्धेनापि युगपद्वृत्तिसंभवः यतः शब्देनोच्यते। समवाय इति चेन्न; तेनापि भिन्नेन भवितव्यं भिन्नाभिधानप्रत्ययहेतुत्वात् संयोगवत्। न च गुणा उपकारेणाऽभिन्नाः; यतो द्रव्यस्य गुणाधीन उपकारो नीलरक्ताद्युपरञ्जनम्, ते च स्वरूपतो भिन्नाः। यच्च तेषामात्मनि नीलरक्तत्वाद्यस्ति रूपं यावच्च नीलनीलतरादि तावता द्रव्यं रञ्जयति अतस्तेषामुपकारोऽपि भिद्यत एव। एवं सदसत्त्वयोर्भिन्नत्वात् सत्त्वेनोपरक्तं सदसत्त्वेनोपरक्तमसन्नोपकारसारूप्यम्, यतः तदभेदेन शब्दो वाचकः स्यात्। न चैकदेशेन गुणिन उपकारः संभवति येनैकदेशोपकारेण सहभावो भवेत् नीलादेर्गुणस्य। कृत्स्नस्य हि गुणस्योपकारकत्वं द्रव्यस्य च पटादेः समस्तस्योपकार्यत्वम्। गुण उपकारको गुणी उपकार्य इति। न चैकदेशो गुणगुणिनोः। अतः कृत्स्नयोरूपकार्योपकारकरूपसिद्धिर्न भवेदेव यतो देशतः सहभावात् कश्चिच्छब्दो वाचकः कल्प्येत। न चैकान्तपक्षे गुणानां संसृष्टमनेकात्मकं रूपमस्त्यवधृतैकान्तरूपत्वात् सत्त्वासत्त्वादेर्गुणस्य। यथा शवलरूपव्यतिरिक्तौ परस्परविविक्तौ शुक्लकृष्णौ गुणावसंसृष्टौ नैकस्मिन्नर्थे सह्वर्तितुं समर्थाववधृतरूपत्वात्। अतस्ताभ्यां संसर्गाभावादेकान्तपक्षेन युगपदभिधानमत्यर्थस्य तथा वर्त्तितुं शक्त्यभावात्। तद्विधस्य चार्थसंबन्धस्याऽभावात्। न चैकः शब्दो द्वयोर्गुणयोः सहवाचकोऽस्ति। यदि स्यात् सच्छब्दः स्वार्थवदसदपि सत्कुर्यादसच्छब्दोऽपि स्वार्थवत् सदप्यसत्कुर्यात्, न च तथा लोके संप्रत्ययोऽस्ति

तयोर्विशेषशब्दत्वादेव मुक्तात् कालादियुगपद्भावासंभवात्। शब्दस्य चैकस्योभयार्थवाचिनोऽनुपलब्धेरवक्तव्य आत्मा।

अथवा वस्तुनि मुख्यप्रवृत्त्या तुल्यबलयोः परस्पराभिधानप्रतिबन्धे सति दृष्टविपरीतनिर्गुणत्वापत्तेः विवक्षितोभयगुणत्वेनाऽनभिधानादवक्तव्यः। अयमपि सकलादेशः परस्परावधारितविविधरूपैकात्मकाभ्यां गुणाभ्यां गुणविशेषणत्वेन युगपदुपक्षिप्ताभ्याम् विवक्षितांशभेदस्य वस्तुनः समस्तस्यैकेन गुणरूपेणाभेदवृत्त्याऽभेदोपचारेण वाऽभिधातुं प्रक्रान्तत्वात्। स चाऽवक्तव्यशब्देनाऽन्यैश्च षड्भिर्वचनैः पर्यायान्तरविवक्षया च वक्तव्यत्वात् स्यादवक्तव्यः। यदि सर्वथाऽवक्तव्यः स्यादवक्तव्य इत्यपि वा वक्तव्यः स्यात् कुतो बन्धमोक्षादिप्रक्रियाप्ररूपणविधिः?

ताभ्यामेव क्रमेणाभिधित्सायां तथैव वस्तुसकलस्वरूपसंग्रहाच्चतुर्थोऽपि विकल्पः सकलादेशः। अयमपि स्यादित्येवार्पयितव्यः, सर्वथोभयात्मकत्वे परस्परविरोधादुभयदोषप्रसङ्गाच्च। कथमेते निरूप्यन्ते (1) सर्वसामान्येन तदभावेन च (2) विशिष्टसामान्येन तदभावेन च (3) विशिष्टसामान्येन तदभावसामान्येन च (4) विशिष्टसामान्येन तद्विशेषेण च (5) सामान्येन च विशिष्टसामान्येन च (6) द्रव्यसामान्येन गुणसामान्येन च (7) धर्मसमुदायेन तद्व्यतिरेकेण च (8) धर्मसामान्यसम्बन्धेन तदभावेन च (9) धर्मविशेषसंबन्धेन तदभावेन च।

तद्यथा सर्वसामान्येन तदभावेन चेह द्विविधोऽर्थः श्रुतिगम्योऽर्थाधिगम्यश्च। तत्रानपेक्षितवृत्तिनिमित्तः श्रुतिमात्रप्रापितः श्रुतिगम्यः। अर्थप्रकरणसंभवाभिप्रायादिशब्द न्यायात् कल्पितोऽर्थाधिगम्यः। तत्राऽऽत्माऽऽस्तीति सर्वप्रकारानाश्रयणादिच्छावशात् कल्पितेन सर्वसामान्येन वस्तुत्वेनास्तीति प्रथमः। तत्प्रतिपक्षेणाऽभावसामान्येनाऽवस्तुत्वेन नास्त्यात्मेति द्वितीयः। आभ्यामेव युगपदभेदविवक्षायां वाचकाभावान्नाभिधीयत इति तृतीयः। आभ्यामेव क्रमेणार्पिताभ्यामुभयरूपं वस्तूच्यते इति

चतुर्थः। विशिष्टसामान्येन तदभावेन च – यथाश्रुतत्वात् श्रुत्युपात्तेनाऽऽत्मनैवाभिसंबन्धः, ततश्चात्मत्वेनैवास्त्यात्मेति प्रथमः। यथाश्रुतप्रतियोगित्वादनात्मत्वेनैव नास्त्यात्मा इति द्वितीयः। युगपदुभाभ्यामात्मानात्मत्वसदसत्त्वाभ्यामवक्तव्यः। आभ्यामेव क्रमेणार्पिताभ्यामुभयरूपं वस्तूच्यते इति चतुर्थः। विशिष्टसामान्येन तदभावसामान्येन च - यथाश्रुतत्वादात्मत्वेनैवास्तीति प्रथमः। अभ्युपगमविरोधभयात् वस्त्वन्तरात्मना क्षित्युदकज्वलनघटपटगुणकर्मादिना सर्वेण प्रकारेण सामान्यतो नास्तीति द्वितीयः। आभ्यामेव युगपदात्मघटादिसदसत्त्वाभ्यामवक्तव्यः। क्रमेण तु वाच्यत्त्वाच्चतुर्थः। विशिष्टसामान्येन तद्विशेषेण चात्मसामान्येनास्त्यात्मा। क्रमेण तु वाच्यत्वात् चतुर्थः। विशिष्टसामान्येन तद्विशेषेण चात्मसामान्येनास्त्यात्मा। आत्म-विशेषेण मनुष्यत्वेन नास्त्यात्मा। आत्मत्वमनुष्यत्वापेक्षाभ्यां सदसत्त्वाभ्यामेकत्वे युगपदवक्तव्यः। पर्यायेणाभिधेयत्वाच्चतुर्थः। सामान्येन विशिष्टसामान्येन चाविशेषरूपेण द्रव्यत्वेनास्त्यात्मा। विशिष्टेन सामान्येन प्रतियोगिनाऽनात्मत्वेन नास्त्यात्मा। ताभ्यां तु द्रव्यत्वानात्मत्वसदसत्त्वाभ्यां युगपदवक्तव्यः। क्रमेण ताभ्यां वक्तव्यत्वाच्चतुर्थः। द्रव्यसामान्येन गुणसामान्येन च वस्तुनस्तथा तथा संभवात् तां तां विवक्षामाश्रित्याविशेषरूपेण द्रव्यत्वेनास्त्यात्मा, तत्प्रतियोगिना विशेषरूपेण गुणत्वेन नास्त्यात्मा। ताभ्यां तु द्रव्यत्वगुणत्वसदसत्त्वाभ्यां युगपदवक्तव्यः। क्रमेण तदुभय वाग्गोचरत्वाच्चतुर्थः। धर्मसमुदायेन तद्व्यतिरेकेण च त्रिकालगोचरानेकशक्तिज्ञानादि-धर्मसमुदायरूपेणाऽऽत्मास्ति। तद्व्यतिरेकेण नास्त्यनुपलब्धेः। ताभ्यां युगपदवक्तव्यः। क्रमेणाभिधेयतामनुभवतीति चतुर्थः। धर्मसामान्यसंबन्धेन तदभावेन च गुणरूपगत-सामान्यसंबन्धविवक्षायां यस्य कस्यचित् धर्मस्याश्रयत्वेनास्त्यात्मा। न तु कस्यचिदपि धर्मस्याश्रयो न भवतीति धर्मसामान्यानाश्रयत्वेन नास्त्यात्मा। आभ्यां युगपदवक्तव्यः। पर्यायेण तु तदुभयविशेष्यत्वात् चतुर्थः। धर्मविशेषसंबन्धेन तदभावेन चानेकधर्म-

णोऽन्यतमधर्मसंबन्धेन तद्विपक्षेण वा विवक्षायाम्, यथास्त्यात्मा नित्यत्वेन निरवयवत्वेन चेतनत्वेन वा तेषामेवान्यतमधर्मप्रतिपक्षेण नास्त्यात्मा। युगपत्ताभ्यामवक्तव्यः। क्रमेण तदभिधानविषयत्वाच्चतुर्थः।

पञ्चमो भङ्ग उच्यते–त्रिभिरात्मभिर्द्व्यंशः। जीवस्यानेकद्रव्यात्मकस्याऽनेकपर्यायात्मकस्य च किञ्चिद् द्रव्यार्थविशेषं पर्यायार्थविशेषं वाऽऽश्रित्यास्तीत्युच्यते एक आत्मा, तस्यैवाऽन्य आत्मा द्रव्यसामान्यं पर्यायसामान्यं तद्विशेषद्वयं वाऽङ्गीकृत्य युगपदविभागविवक्षायां वचनगोचरातीतः। यथा स्यादस्त्यात्मा द्रव्यत्वेन द्रव्यविशेषेण वा जीवत्वेन मनुष्यत्वादिना वा। द्रव्यपर्यायसामान्यमुररीकृत्य वस्तुत्वसत्त्वम-वस्तुत्वासत्त्वं च युगपदभेदविवक्षायामवाच्यः। विशेषद्वयं वा मनुष्यत्वामनुष्यत्वादि, यतः सर्वेऽपि तस्यैकस्यैव ते आत्मानो विद्यन्ते तदैवेति। ततः स्यादस्ति चाऽवक्तव्यश्च जीवः। अयमपि सकलादेशः, अंशाभेदविवक्षायामेकांशमुखेन सकलसंग्रहात्।

तथा षष्ठः त्रिभिरात्मभिर्द्व्यंशः। यतो वस्तुगतं नास्तित्वमवक्तव्यरूपानुविद्धं नान्तरेणात्मभेदं शक्यं कल्पयितुं वस्तुनस्तथापि भावात्। तत्र नास्तित्वं पर्यायाश्रयम्। स च पर्यायो युगपद्वृत्तः क्रमवृत्तो वा सहवृत्तो वा जीवस्य पर्यायोऽविरोधात्। सहावस्थायी सहवृत्तेः गतीन्द्रियकाययोगवेदकषायज्ञानसंयमादिः। क्रमवर्ती तु क्रोधादिदेवादिबाल्याद्य-वस्थालक्षणः। तत्र गत्यादिव्यतिरिक्तः क्रोधादिक्रमवृत्तधर्मरूपनैरन्तर्यमात्रादर्थान्तरभूत एकोऽवस्थितो द्रव्यार्थो जीवो नाम नास्ति, किन्तु त एव धर्मास्तथा सन्निविष्टा जीवव्यपदेशभाजः इत्यस्यां कल्पनायां नास्तित्वम्। यश्च वस्तुत्वेन सन्निति द्रव्यार्थांशः यश्च तत्प्रतियोगिनाऽवस्तुत्वेनाऽसन्निति पर्यायांशः, ताभ्यां युगपदभेदविवक्षायामवक्तव्य इति

द्वितीयोंऽशः। तस्मान्नास्ति चावक्तव्यश्चाऽऽत्मा। अयमपि सकलादेशः शेषवाग्गोचरस्वरूपसमूहस्याऽविनाभावात् तत्रैवान्तर्भूतस्य स्याच्छब्देन द्योतितत्वात्।

तथा सप्तमो विकल्पः चतुर्भिरात्मभिः त्र्यंशः। द्रव्यार्थविशेषं कञ्चिदाश्रित्या-ऽस्तित्वं पर्यायविशेषं च कञ्चिदाश्रित्य नास्तित्वमिति समुच्चितरूपं भवति, द्वयोरपि प्राधान्येन विवक्षितत्वात्। द्रव्यपर्यायविशेषेण च केनचित् द्रव्यपर्यायसामान्येन च केनचित् युगपदवक्तव्यः इति तृतीयोंऽशः। ततः स्यादस्ति च नास्ति चाऽवक्तव्यश्च आत्मा। अयमपि सकलादेशः, यतः सर्वान् द्रव्यार्थान् द्रव्यमित्यभेदादेकं द्रव्यार्थं मन्यते। सर्वान् पर्यायार्थांश्च पर्यायजात्यभेदादेकं पर्यायार्थम्। अतो विवक्षितवस्तुजात्यभेदात् कृत्स्नं वस्त्वेकद्रव्यार्थाभिन्नमेकपर्यायाभेदोपचरितं वैकमिति सकलसंग्रहात्। अथ कथं विकलादेशः?

**निरंशस्यापि गुणभेदादंशकल्पना विकलादेशः॥२१॥** स्वेन तत्त्वेनाप्रविभागस्यापि वस्तुनो विविक्तं गुणरूपं स्वरूपोपरञ्जकमपेक्ष्य प्रकल्पितमंशभेदं कृत्वाऽनेकात्मकै-कत्वव्यवस्थायां नरसिंहसिंहत्ववत् समुदायात्मकमात्मरूपमभ्युपगम्य कालादिभिर न्योन्यविषयानुप्रवेशरहितांशकल्पनं विकलादेशः। न तु केवलसिंहे सिंहत्ववदेकात्म-कैकत्वपरिग्रहात्। यथा वा पानकमनेकखण्डदाडिमकर्पूरादिरसानुविद्धमास्वाद्यानेकर-सात्मकत्वमस्यावसाय पुनः स्वशक्तिविशेषादिदमप्यस्तीदमप्यस्तीति विशेषनिरूपणं क्रियते, तथा नैरात्म्यैकवस्त्वभ्युपगमपूर्वकं हेतुविशेषसामर्थ्यादर्पितसाध्यविशेषावधारणं विकलादेशः। कथं पुनरर्थस्याऽभिन्नस्य गुणो भेदकः? दृष्टो ह्यभिन्नस्याप्यर्थस्य गुणस्तत्त्वभेदं कल्पयन् यथापरात् भवान् पटुरासीत् पटुतर एषम इति गुणविविक्तरूपस्य द्रव्यस्याऽसंभवात् गुणभेदेन गुणिनोऽपि भेदः।

**तत्रापि तथा सप्तभङ्गी॥२२॥** तत्रापि विकलादेशे तथाऽऽदेशवशेन सप्तभङ्गी वेदितव्या। कथम्? गुणभेदकेष्वंशेषु क्रमेण यौगपद्येन क्रमयौगपद्याभ्यां वा

विवक्षावशात् विकलादेशा भवन्ति। तत्र प्रथमद्वितीययोरप्रचितः क्रम; तृतीये यौगपद्यम्, चतुर्थे प्रचितः क्रमः, पञ्चमे षष्ठे वाऽप्रचितक्रमयौगपद्ये, सप्तमे प्रचितक्रमयौगपद्ये। तद्यथा सर्वसा-मान्यादिषु द्रव्यार्थादेशेषु केनचिदुपलभ्यमानत्वात् स्यादस्त्येवात्मेति प्रथमो विकलादेशः। अत्रेतरेषां वस्तुनि सतामपि कालादिभिर्भेदविवक्षातः शब्दवाच्यत्वेनान्तर्भावाभावान्नि-रासाभावाच्च न विधिर्न प्रतिषेधः। एवं शेषभङ्गेष्वपि विवक्षितांशमात्रप्ररूपणाया- मितरेष्वौदासीन्येन विकलादेशकल्पना योज्या। ननु च सामान्यार्थाविच्छेदेन विशेषण-विशेष्यसंबन्धावद्योतनार्थे एवकारे सति तदवधारणादितरेषां निवृत्तिः प्राप्नोति? नैष दोषः; अत्राप्यत एव स्याच्छब्दप्रयोगः कर्तव्यः 'स्यादस्त्येव जीवः' इत्यादि। कोऽर्थः? एवकारेणेतरनिवृत्तिप्रसङ्गे स्वात्मलोपात् सकलो लोपो मा विज्ञायीति वस्तुनि यथावस्थितं विवक्षितधर्मस्वरूपं तथैव द्योतयति स्याच्छब्दः। **"विवक्षितार्थवागङ्गम्"** इति वचनात्। एवमादेशवशात् सप्तवचनप्रकारा भवन्तीति त्रिविकल्पान्तरप्रवृत्ति-निमित्ताभावात्।

अयं च मार्गः द्रव्यार्थिकपर्यायार्थिकनयद्वयाश्रयः। तौ च संग्रहाद्यात्मकौ। ते चार्थनयरूपेण शब्दनयरूपेण च प्रवृत्ताः। तत्र संग्रहव्यवहारर्जुसूत्रा अर्थनयाः। शेषाः शब्दनयाः। तत्र संग्रहः सत्त्वविषयः, सकलं वस्तुतत्त्वं सत्त्वेऽन्तर्भाव्य संग्रहात्। व्यवहारोऽसत्त्वविषयो विविक्तसत्त्वाऽपरिग्रहादन्यापेक्षासत्त्वाप्रतिपत्तेः। ऋजुसूत्रो वर्तमान-विषयोऽतीतानागतयोः विनष्टानुत्पन्नत्वेन व्यवहाराभावात्। एते त्रयोऽर्थनया एकैकात्मकाः संयुक्ताश्च सप्त वाक्प्रकारान् जनयन्ति। तत्राद्यः संग्रह एक; द्वितीयो व्यवहार एकः, तृतीयः संग्रहव्यवहाराववविभक्तौ, चतुर्थः संग्रहव्यवहारौ समुच्चित्तौ, पञ्चमः संग्रहः संग्रहव्यवहारौ चाविभक्तौ। षष्ठो व्यवहारः संग्रहव्यवहारौ चाविभक्तौ। सप्तमः संग्रहव्यवहारौ प्रचितौ तौ चाविभक्तौ। एष ऋजुसूत्रेऽपि योज्यः।

व्यञ्जनपर्यायास्तु शब्दनयाः द्विविधं वचनं प्रकल्पयन्ति – अभेदेनाभिधानं भेदेन च। यथा शब्दे पर्यायशब्दान्तरप्रयोगेऽपि तस्यैवार्थस्याभिधानादभेदः। समभिरुढे वा प्रवृत्तिनिमित्तस्याप्रवृत्तिनिमित्तस्य च घटस्याभिन्नस्य सामान्येनाभिधानात्। एवंभूतेषु प्रवृत्तिनिमित्तस्य भिन्नस्यैकस्यैवार्थस्याभिधानात् भेदेनाभिधानम्।

अथवा, अन्यथा द्वैविध्यम् – एकस्मिन्नर्थेऽनेकशब्दप्रवृत्तिः, प्रत्यर्थं वा शब्दविनिवेश इति। यथा शब्दे अनेकपर्यायशब्दवाच्य एकः। समभिरूढे वा नैमित्तिकत्वात् शब्दस्यैकशब्दवाच्य एकः। एवंभूते वर्तमाननिमित्तशब्द एकवाच्य एकः। अत्र चोद्यते कथमेतेऽस्तित्वनास्तित्वादयो धर्माः विरुद्धरूपा एकस्मिन् वस्तुन्यविरोध-मुपयान्तीति? उच्यते –

**विरोधाभावस्तल्लक्षणाभावात्** ॥२३॥ नास्त्येषामादेशवशादर्प्यमाणानां विरोधः। कुतः? तल्लक्षणाभावात्। इह विरोधः कल्प्यमानः त्रिधा व्यवतिष्ठते – वध्यघातकभावेन वा सहानवस्थात्मना वा प्रतिबन्ध्यप्रतिबन्धकरूपेण वा। तत्र वध्यघातकभावः अहिनकुलाग्न्युदकादिविषयः। स त्वेकस्मिन् काले विद्यमानयोः सति संयोगे भवति, संयोगस्यानेकाश्रयत्वात् द्वित्ववत्। नासंयुक्तमुदकमग्निं विध्यापयति सर्वत्राग्न्यभाव-प्रसङ्गात्। ततः सति संयोगे बलीयसोत्तरकालमितरद्बाध्यते। न चैवमस्तित्वनास्तित्वयोः क्षणमात्रमप्येकस्मिन् वृत्तिरस्ति इति भवताऽभ्युपगम्यते बाध्यते, यतो वध्यघातकभावरूपो विरोधस्तयोः कल्प्येत। अथैकस्मिन् वृत्तिरभ्युपगम्येत तत्तुल्यबलहेतुसाध्यत्वात् तयोरन्यतरस्य बलीयस्त्वाभावात् वध्यघातकत्वाभावः। अतस्तल्लक्षणा-भावान्नासौ विरोधः संभवति।

नापि सहानवस्थानलक्षणो विरोधः तल्लक्षणाभावात्। स ह्ययुगपत्कालयोर्भवति यथा आम्रफले श्यामतापीततयोः। पीततोत्पद्यमाना पूर्वकालभाविनीं श्यामतां निरुणद्धि। न च तथा जीवस्यास्तित्वनास्तित्वे पूर्वोत्तरकालभाविनी। यदि स्यातामस्तित्वकाले

नास्तित्वाभावाज्जीवसत्तामात्रं सर्वं प्राप्नुवीत। नास्तित्वकाले वाऽस्तित्वाभावात्तदाश्रयो बन्धमोक्षादिव्यवहारो विरोधमुपगच्छेत्। सर्वथैवासतः पुन आत्मलाभाभावात् सर्वथा च सतः पुनरभावप्राप्त्यनुपपत्तेः नैतयोः सहानवस्थानं युज्यते।

तथा जीवादिषु प्रतिबन्ध्यप्रतिबन्धकभावोऽपि न विरोधः संभवति। यथा सति फलवृन्तसंयोगे प्रतिबन्धके गौरवं पतनकर्म नारभते प्रतिबन्धात्; तदभावे तु पतनकर्म दृश्यते "संयोगाभावे गुरुत्वात् पतनम्" इति वचनात्। न च तथाऽस्तित्वं नास्तित्वस्य प्रयोजनं प्रतिबध्नाति तस्मिन्नेव काले परद्रव्यादिरूपेणानुपलब्धिबुद्ध्युत्पत्तिदर्शनात्। नास्तित्वं वा सदस्तित्वप्रयोजनं प्रतिबध्नाति तदैव स्वरूपाद्यपेक्षयोपलब्धिबुद्धिदर्शनात्। तस्मात् वाङ्मात्रमेव विरोधः। एवमर्पणाभेदादविरुद्धोऽनेकात्मको जीव इति स्थितमेतत्।

**इति तत्त्वार्थवार्तिके व्याख्यानालङ्कारे चतुर्थोऽध्यायः।**

## पञ्चमोऽध्यायः

इदानीं सम्यग्दर्शनस्य विषयभावेनोपक्षिप्तेषु जीवादिष्वजीवपदार्थो विचारप्राप्तः, तस्य भेदसंज्ञासंकीर्तनार्थमिदमुच्यते तत्पूर्वकत्वदितरस्येति –

## अजीवकाया धर्माधर्माकाशपुद्गलाः॥१॥

**अजीवकाया इति समानाधिकरणा वृत्तिः॥१॥** अजीवाश्च ते कायाश्च तेऽजीवकाया इति समानाधिकरणलक्षणा वृत्तिरियं वेदितव्या। कथं वृत्ति? "विशेषणं विशेष्येण" इति सति व्यभिचारे नीलोत्पलादिषु वृत्तिः? इहाप्यस्ति व्यभिचारः, कायशब्दस्य जीवेष्वपि वृत्तेः; अजीवशब्दस्यापि काले। भिन्नाधिकरणवृत्तौ को दोषः?

**भिन्नाधिकरणत्वे ह्यर्थान्तरभावप्रसङ्गः॥२॥** यथा राज्ञः पुरुषः राजपुरुष इति। अर्थान्तरभावे भिन्नाधिकरणत्वं भवति, तथाऽजीवानां कायः अजीवकायः इति भिन्नाधिकरणत्वे गृह्यमाणेऽर्थान्तरभावः प्रसज्येत।

**दृष्टत्वात् सुवर्णाङ्गुलीयकवदिति चेन्न; तत्रान्यविशेषनिवृत्त्यर्थत्वात् ॥३॥** स्यान्मतम् – भिन्नाधिकरणत्वेऽपि नार्थान्तरभावः। कुतः? दृष्टत्वात्। कथम् ? सुवर्णाङ्गुलीयकवत्। यथा सुवर्णस्याङ्गुलीयकं सुवर्णाङ्गुलीयकमिति भिन्नाधिकरणत्वेऽपि नार्थभेदः, तथेहापि न दोष इति। तन्न; किं कारणम्? तत्रान्यविशेषनिवृत्त्यर्थत्वात्। तत्र हि सुवर्णशब्दप्रयोगः रूप्यादेः प्रमाणान्तरस्य च निवृत्त्यर्थम् सुवर्णस्येदमङ्गुलीयकं न रूप्यादेर्न माषादेर्वेति, न तथेहाजीवस्य काया अजीवकाया इति विशेषणेन कदाचिदर्थान्तरनिवृत्तिरस्ति।

**अस्तु वाऽविरोधात् ॥४॥** अथवाऽस्तु भिन्नाधिकरणा वृत्तिः। कुतः? अविरोधात्। यस्माज्जीवोऽपि कायः पञ्चास्तिकायोपदेशादतस्तन्निवृत्त्यर्थोऽत्राजीवशब्दप्रयोगः। अजीवस्य कायो न जीवस्येति। किञ्च,

**कथञ्चिद्भेदोपपत्तेः॥५॥** केनचित्प्रकारेण संज्ञालक्षणप्रयोजनादिना भेद उपपद्यते। यथा सुवर्णस्याङ्गुलीयकमित्यत्र सुवर्णं सामान्यं तद्विशेषोऽङ्गुलीयकं तयोः सामान्यविशेषयोः संज्ञालक्षणादिभिः कथञ्चिन्नानात्वम्। यदि सर्वथैकत्वं स्यात् सुवर्णसामान्यस्याङ्गुलीयकवत् कुण्डलादिषु वृत्तिर्न स्यात्। सुवर्णसामान्यवदङ्गुलीयकत्वस्य कुण्डलादिषु वृत्तिः स्यात्। तत एवाऽन्यनिवृत्त्यर्थः प्रयोगो युक्तः; सुवर्णस्येदमङ्गुलीयकं न रूप्यादेरिति। यदि सर्वथैकत्वं स्यात् व्यपदेश एव न स्यात्। तथाऽजीवानां काया इत्यत्रापि कायशब्दः प्रदेशवाची। प्रदेशाश्च धर्मादीनां वक्ष्यन्ते। ते च तेभ्यः संज्ञालक्षणादिभिः कथञ्चिद्भिन्नाः। अन्यथैकान्तिकैकत्वे धर्मादीनामेकत्ववत् प्रदेशानाम-प्येकत्वं स्यात्, प्रदेशानां बहुत्ववत् धर्मादीनां बहुत्वं प्रसज्येत। तत एवाऽन्यनिवृत्त्यर्थः प्रयोगो युक्तोऽजीवानां काया न जीवस्येति। यदि सर्वथैकत्वं स्यात्; व्यपदेश एव न स्यात्। ततो भेदोपपत्तेः युक्ता भिन्नाधिकरणा वृत्तिः। ननु चाभेदेऽपि लोके व्यपदेशो दृष्टः यथा शिलापुत्रकस्य शरीरं, राहोः शिर इति। न हि शिलापुत्रकादन्यच्छरीरमस्ति, नापि राहोरन्यच्छिरः, शिरोमात्रत्वादिति। तत्राप्यस्ति भेदः। कुतः? शक्तितः। योऽनेकक्रिया-निष्पादनशक्तिभेदेन भिन्नरूपः शिलापुत्रकः तस्येदं शरीरमेकक्रियाविषयमिति शब्दप्रकल्पिताद् बुद्धिभेदाद्वा कथञ्चित्पृथक्त्वमध्यवसेयम्। कुतश्चैतदेवं तदन्यनिवृत्त्यर्थं विशेषणमुपादीयते – शिलापुत्रकस्येदं शरीरं न मनुष्यादेः, राहोरिदं शिरः नान्यस्येत्यै-कान्तिकैकत्वे ह्यन्यनिवृत्तिर्न स्यात् यथा सुवर्णस्य सुवर्णं घटस्य घट इति।

**अजीव इत्यभावमात्रप्रसङ्ग इति चेन्न; भावान्तरप्रतिपत्तेरनश्ववत् ॥६॥** स्यान्मतं न जीवोऽजीव इत्युक्तेऽभावमात्रं प्रसज्येत यथा न भावोऽभाव इति; तन्न; किं कारणम्? भावान्तरप्रतिपत्तेः। कथम्? अनश्ववत्। यथा नायमश्वः अनश्व इत्युक्ते नाभावसंप्रत्ययः किन्तु "नञिव युक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः इत्यन्यस्मिन् भाव एव तुल्योदरैकशफादिलक्षणे गर्दभे संप्रत्ययो भवति। एवमिहापि नायं जीव इति प्रतिषेधान्नाभावे संप्रत्ययः, किन्त्वन्यस्मिन् भाव एवऽनुपयोगलक्षणे धर्मादौ प्रतिपत्तिर्भवति। सादृश्याभावादप्रतिपतिरिति चेन्न; सत्त्वद्रव्यत्वादिभिः सादृश्योपपत्तेः। यच्चोक्तम् - यथा 'न भावः अभावः' इत्युक्तेऽभावमात्रसंप्रत्यय इति; तदप्ययुक्तम्; सत एव पररूपत्वादिभिरभावशब्दगोचरत्वोपपत्तेः।

**अभ्यन्तरीकृतेवार्थः कायशब्दः ॥७॥** इवार्थमभ्यन्तरीकृत्यात्र कायशब्दः प्रयुक्तः काया इव काया इति। क उपमार्थः? यथौदारिकादिशरीरनामकर्मोदयवशात् पुद्गलैश्चीयन्ते कायाः तथा धर्मादीनामनादिपारिणामिकप्रदेशचयनात् कायत्वम्।

**तद्ग्रहणं प्रदेशावयवबहुत्वज्ञापनार्थम् ॥८॥** तस्य कायशब्दस्य ग्रहणं क्रियते। किमर्थम्? प्रदेशावयवबहुत्वज्ञापनार्थम्। मुख्यरूपेणाऽविद्यमानत्वेऽपि श्रोतृणां सुखाव बोधार्थं प्रज्ञया द्रव्यपरमाण्ववगाहमात्रत्वेन प्रदिश्यन्त इति प्रदेशाः, प्रदेशा एवावयवाः प्रदेशावयवाः तेषां बहुत्वस्य ज्ञापनार्थम्।

**नासंख्येयाः प्रदेशाः धर्माधर्मैकजीवानामिति शास्त्रप्रवृत्तेः ॥९॥** न तत्प्रयोजनमुपपद्यते कुतः? अन्यत एव तत्सिद्धेः। वक्ष्यते हि -"असंख्येयाः प्रदेशाः धर्माधर्मैक-जीवानाम्" इति। अत एवैषां प्रदेशबहुत्वं सिद्धम्।

**नार्थः कायग्रहणेन प्रदेशसंख्यावधारणार्थमिति चेन्न; अतोऽप्यनिश्चयात् ॥१०॥** स्यादेतत् "असंख्येयाः प्रदेशाः धर्माधर्मैकजीवानामित्यनेन न प्रदेशसंख्यावधारणं क्रियते। कुतः?

त्रयाणां संभूय प्रदेशासंख्येयत्वप्रतिपत्तेः। ततः एकैकस्याऽसंख्येय प्रदेशख्यापनार्थं कायग्रहणमिति; तन्न; किं कारणम् ? अतोऽप्यनिश्चयात्। कायग्रहणादपि नास्ति निश्चयः, प्रदेशप्रचयमात्रप्रतिपत्तेः। कुतस्तर्हि तन्निश्चयः?

**"लोकाकाशेऽवगाहः" इत्यादि वचनात् तन्निश्चयः॥११॥** यदयं "लोकाकाशेऽ-वगाहः" इत्युक्त्वा "धर्माधर्मयोः कृत्स्ने" इत्यादि वक्ष्यते, तेन तस्य प्रदेशपरिमाणस्य निश्चयो भवति।

**अप्रदेशैकद्रव्यत्वप्रसङ्ग इति चेन्न; उक्तत्वात्॥१२॥** स्यादेतत् – कायग्रहणादृते तेऽप्रदेशैकद्रव्यता प्राप्नोति, अतस्तन्निवृत्त्यर्थं कायग्रहणमिति तन्न; किं कारणम्? उक्तत्वात्। उक्तमेतत्- 'असंख्येयाः प्रदेशाः धर्माधर्मैकजीवानामिति वक्ष्यते'।

**आर्षानुवादार्थमिति चेन्न तदवस्थत्वात् ॥१३॥** स्यादेतत् कायग्रहणादृतेऽ प्रदेशैकिद्रव्यता प्राप्नोति। अतस्तन्निवृत्त्यर्थं कायग्रहणमिति। तन्न, किं कारणम्? उक्तत्वात्। उक्तमेतत्–

असंख्येयाः प्रदेशा इत्यनेनैवाऽर्षानुवादस्य कृतत्वात्।

**स्वभावाऽपरित्यागार्थमिति चेन्न नित्यावस्थितवचनात् सिद्धेः॥१४॥** स्यान्मतं कायस्वभावापरित्यागार्थं कायग्रहणमिति; तन्न; किं कारणम्? नित्यावस्थितवचनात् सिद्धेः वक्ष्यते हि "नित्यावस्थितान्यरूपाणि" इति, तत एव स्वभावापरित्यागः सिद्धः। तत्तर्हि कायग्रहणं न कर्तव्यम्? कर्तव्यं च। किं प्रयोजनम्?

**तत्सिद्धावसंख्येयप्रदेशावधारणसिद्धेः॥१५॥** तस्य कायशब्दस्य पञ्चस्वप्यस्ति-कायेषु प्रदेशावयवबहुत्वार्थस्य सिद्धौ सत्यामुत्तरवचनमवधारणार्थं युज्यते – असंख्येयाः प्रदेशाः न संख्येयाः नाप्यनन्ताः इति, विधिपूर्वकत्वादवधारणस्य।

**अद्धाप्रदेशप्रतिषेधार्थं च।॥१६॥** अद्धाशब्दो निपातः कालवाची, स वक्ष्यमाणलक्षणः, तस्य प्रदेशप्रतिषेधार्थमिह कायग्रहणं क्रियते। यथाऽणोः प्रदेशमात्रत्वात् द्वितीयादयोऽस्य प्रदेशो न सन्तीत्यप्रदेशोऽणुः, तथा कालपरमाणुरपि एकप्रदेशत्वादप्रदेश इति।

**धर्मादयः संज्ञाः सामायिक्यः॥१७॥** धर्मादयः संज्ञाः सामायिक्यो द्रष्टव्याः। आर्हते हि प्रवचनेऽनादिनिधनेऽर्हदादिभिः यथाकालमभिव्यक्तज्ञानदर्शनातिशयप्रकाशैरवद्योतितार्थ-सारे रूढा एताः संज्ञा ज्ञेयाः।

**क्रियानिमित्ता वा॥१८॥** अथवा क्रियानिमित्ता एताः संज्ञाः वेदितव्याः। कथमिति चेत्? उच्यते –

**स्वयं क्रियापरिणामिनां साचिव्यावधानाद्धर्मः॥१९॥** स्वयं क्रियापरिणामिनां जीवपुद्गलानां यस्मात्साचिव्यं दधाति तस्माद्धर्म इत्याख्याते।

**तद्विपरीतोऽधर्मः॥२०॥** तस्य विपरीतलक्षणोऽधर्म इत्याम्नायते।

**आकाशन्तेऽस्मिन् द्रव्याणि स्वयं वाकाशत इत्याकाशम् ॥२१॥** जीवादीनि द्रव्याणि स्वैः स्वैः पर्यायैरव्यतिरेकेण यस्मिन्नाकाशन्ते प्रकाशन्ते तदाकाशम्, स्वयं चाऽऽत्मीय-पर्यायमर्यादयाऽऽकाशत इत्याकाशम् ।

**अवकाशदानाद्वा॥२२॥** अथवेतरेषां द्रव्याणामवकाशदानाकाशमिति पृषोदरादिषु निपातितः शब्दः।

**अलोकाकाशस्यावकाशदानाभावात्तदभाव इति चेन्न; तत्सामर्थ्याऽविरहात् ॥२३॥** स्यान्मतम् – यद्यवकाशदानादाकाशमित्युच्यतेऽलोकाकाशे जीवाद्यवकाशदानाभावा-दाकाशव्यपदेशो नोपपद्यते इति; तन्न, किं कारणम्? तत्सामर्थ्याऽविरहात् । यथैष्यत्का

लस्यातिदूरस्यापि वर्तमानप्राप्त्यर्हत्वात् तत्प्राप्त्यभावेऽपि भविष्यद्व्यपदेशो भवति। एवमलोकाकाशस्याव गाहिद्रव्याभावेऽप्यवगाहनशक्तिरविरुद्धा इत्यवकाशदानादाकाशत्वं युज्यते। अथवा, क्रियानिमित्तत्वेऽपि रूढिविशेषबललाभात् गोशब्दवत् तदभावेऽपि प्रवर्तते।

**पूरणगलनान्वर्थसंज्ञत्वात् पुद्गलाः॥२४॥** यथा भासं करोति भास्कर इति भासनार्थमन्तर्नीय भास्करसंज्ञाऽन्वर्था प्रवर्तते तथा भेदात् संघातात् भेदसंघाताभ्याञ्च पूर्यन्ते गलन्ते चेति पूरणगलनात्मिकां क्रियामन्तर्भाव्य पुद्गलशब्दोऽन्वर्थः पृषोदरादिषु निपातितः, यथा शवशायनं श्मशानमिति।

**परमाणुषु तदभावात् पुद्गलत्वाभाव इति चेन्न; गुणापेक्षया तत्सिद्धेः॥२५॥** स्यान्मतम् – अणूनां निरवयवत्वात् पूरणगलनक्रियाभावात् पुद्गलव्यपदेशाभावप्रसङ्गः इति; तन्न; किं कारणम्? गुणापेक्षया तत्सिद्धेः। रूपरसगन्धस्पर्शयुक्ता हि परमाणवः एकगुणरूपादिपरिणताः द्वित्रिचतुःसंख्येयाऽसंख्येयाऽनन्तगुणत्वेन वर्धन्ते तथैव हानिमप्युपयान्तीति गुणापेक्षया पूरणगलनक्रियोपपत्तेः परमाणुष्वपि पुद्गलत्वमविरुद्धम्। अथवा गुण उपचारकल्पनं पूरणगलनयोः भावित्वात् भूतत्वाच्च शक्त्यपेक्षया परमाणुषु पुद्गलत्वोपचारः।

**पुङ्गिलानाद्वा॥२६॥** अथवा पुमांसो जीवाः, तैः शरीराहारविषयकरणोपकरणादिभावेन गिल्यन्त इति पुद्गगलाः। अण्वादिषु तदभावादपुद्गलत्वमिति चेदुक्तोत्तरमेतत्।

**बहुवचनं स्वातन्त्र्यप्रतिपत्त्यर्थम्॥२७॥** धर्माधर्माकाशपुद्गला इति बहुवचनं स्वातन्त्र्यप्रतिपत्त्यर्थं द्रष्टव्यम्। किं पुनः स्वातन्त्र्यम्? धर्मादयो गत्याद्युपग्रहान् प्रति वर्तमानाः स्वयमेव तथा परिणमन्ते न परप्रत्ययाधीना तेषां प्रवृत्तिरित्येतदत्र विवक्षितं स्वातन्त्र्यम्। ननु च बाह्यद्रव्यादिनिमित्तवशात् परिणामिनां परिणाम उपलभ्यते स च

स्वातन्त्र्ये सति विरुध्यत इति; नैष दोषः ; बाह्यस्य निमित्तमात्रत्वात्। न हि गत्यादि-परिणामिनो जीवपुद्गलाः गत्याद्युपग्रहे धर्मादीनां प्रेरकाः। नन्वितरेतरयोगलक्षणे द्वन्द्वे न्यायप्राप्तं बहुवचनं तेन कथं स्वातन्त्र्यं प्रतीयते? समाहारे समुदायप्रधाने एकवचनेन सिद्धे बहुवचनं ज्ञापकं स्वातन्त्र्यस्य। यथा "हृतः" इत्यत्रैकवचनेन सिद्धे बहुवचनं ज्ञापकम्मुक्तस्यापि हृत उत्पत्तिर्यथा स्यादिति, तेन सिद्धोऽन्ते भवोऽन्तिमः, यमेन प्रोक्तं याम्यं धर्मशास्त्रमित्यादि।

**प्रशस्ताभिधानाद्धर्मग्रहणमादौ॥२८॥** धर्मशब्दोऽयं लोके प्रशस्तार्थः ततोऽस्य ग्रहणमादौ क्रियते।

**तदनन्तरमधर्मग्रहणं लोकव्यवस्थाहेतुत्वात्॥२९॥** तदनन्तरमधर्मग्रहणं क्रियते। कुतः? लोकव्यवस्था हेतुत्वात्। पञ्चास्तिकायाः कालश्च लोकः, अवतिष्ठन्ते पदार्था अनया आकृत्येत्यवस्थाविविधसन्निवेशा वेत्रासनाद्याकारा इत्यर्थः, लोकस्य व्यवस्था लोकव्यवस्था तस्या हेतुत्वात् लोकव्यवस्थाहेतुत्वात्। असति ह्यधर्मास्तिकाये गतिमतां द्रव्याणां गतिविषयनियमाभावात्। विष्वग्भावे सति लोकव्यवस्था विशिष्टा न स्यादतोऽस्य धर्मानन्तरं ग्रहणं न्याय्यम्।

**तत्प्रतिपक्षत्वाच्च॥३०॥** तस्य धर्मास्तिकायस्य प्रतिपक्षोऽधर्मास्तिकायः स्थिति-कारणत्वात्। ततश्चान्तरं ग्रहणं क्रियते।

**तत्परिच्छेद्यत्वात्तदनन्तरमाकाशग्रहणम्॥३१॥** ताभ्यां धर्माधर्माभ्यामाकाशं परिच्छिद्यते – यत्र धर्माधर्मौ तल्लोकाकाशमितरदलोकाकाशमिति। अतः तदनन्तरमा-काशग्रहणं क्रियते।

**अमूर्तत्वसाधर्म्याच्च॥३२॥** यथा धर्माधर्मावमूर्तौ रूपादिविरहादेवमाकाशमप्य-मूर्तमतश्चानन्तरमुक्तम्।

**तदवगाहित्वात् तत्समीपे पुद्गलवचनम्॥३३॥** तदाकाशमवगाह्य पुद्गला वर्तन्ते इति तत्समीपे तेषां वचनं क्रियते।

**आकाशग्रहणमादौ धर्मादीनामाधारत्वादिति चेन्न; लोकविनिवेशस्यानादित्वात्॥३४॥** स्यान्मतम् – धर्मादीनां पञ्चानामपि द्रव्याणामाकाशमाधारः साधारणः, ततस्तस्य ग्रहणं सर्वेषामादौ न्याय्यमिति; तन्न; किं कारणम्? लोकविनिवेशस्यानादित्वात्। नाऽयं नियमोऽस्ति लोकविनिवेशे आकाशमाधारः इतराणि द्रव्याणि आधेयानि इति। किन्तु लोकविनिवेशक्रमः एवायमनादिसिद्ध इति नाकाशमाधारः। आदिमतां हि कुण्डबदरादीनां दृष्ट आधाराधेयभावः।

**आर्षविरोध इति चेन्न; आदेशवचनात्॥३५॥** स्यादेतत् – यद्याधाराधेयभावो नेष्यते यदुक्तमार्षे–"स्वप्रतिष्ठमाकाशमाकाशप्रतिष्ठं तनुवातवलयं तनुवातवलयप्रतिष्ठं घनवातवलयं तत्प्रतिष्ठं घनोदधिवलयम्" इत्यादि, तद्विरोधः इति; तन्न; किं कारणम्? आदेशवचनात्? यदि एकान्तेनाधाराधेयभावो न स्यात् स्यादार्षविरोध; यदा तु 'स्यादाधाराधेयभाव इति स्यान्नाधाराधेयभावः' इत्यादेशवचनादिष्यते ततो नास्त्यार्षविरोधः। कथमिति चेत्? उच्यते – आकाशादीनां द्रव्यार्थादेशात् स्यादाधाराधेयत्वाभावो यतः पर्यायार्थिकगुणभावे द्रव्यार्थिकप्राधान्यात् प्रतिनियतानादिपारिणामिक द्रव्यार्थेनाधिष्ठानानामाकाशादीनां षण्णामाधाराधेयपर्यायाभावः। द्रव्यार्थिकगुणभावे च पर्यायार्थिकप्राधान्यात् षण्णामपि द्रव्याणामदिमत्त्वोपपत्तेराधाराधेयभावो युज्यते। ततस्तदपेक्षया आधाराधेयभाव आर्षे प्रणीत इति नास्ति विरोधः। अथवा व्यवहारनयादेशात् स्यादाधाराधेयता, यतोऽनादिपारिणामिकलोकविनिवेशेऽपि व्यवहार एवं प्रवृत्तः 'आकाशमाधारोऽन्यानि द्रव्याण्याधेयानि' इति। एवम्भूतनयादेशात् स्यादनाधाराधेयता, यतोऽनादिपारिणामिकलोकविनिवेशस्यैवंभूतत्वात् 'स्वात्मप्रतिष्ठान्येव सर्वद्रव्याणि' इति। ननु च व्यवहारनयापेक्षया आधाराधेयभावाभ्युपगमेऽनवस्थाप्रसङ्गः

घनोदधिवलयस्य घनवातवलयमाधारः, घनवातवलयस्य तनुवातवलयमाधारः, तनुवातवलयस्याऽऽकाशम्, आकाशस्याऽन्यत्, तस्यान्यत्, तस्याप्यन्यदिति; नैषः दोषः; आकाशस्य सर्वगतत्वादनन्तत्वाच्च। यद्धि सर्वगतमनन्तञ्च तस्य सर्वत्र सान्निध्यात् 'तस्याप्यन्यत् तस्याप्यन्यत्' इति व्यवहाराभावादनवस्था नास्ति। परिशेषादसर्वगतस्यान्तवतो मूर्तिमतः सावयवस्यैन्द्रियकस्य स्यादनवस्था, तद्विपरीतलक्षणञ्चाकाशमतो नास्त्यनवस्था। यदि सर्वगतत्वादस्यानवस्था दृष्टा सोच्यताम्, नैषोच्यते ततो विमुच्यतामनवस्थादोषकल्पना। तस्मान्निःप्रतिद्वन्द्वः पूर्वोक्त एवास्तु क्रमहेतुः।

**कालोपसंख्यानमिति चेन्न; वक्ष्यमाणलक्षणत्वात् ॥३६॥** स्यादेतत् – कालोऽपि कश्चिदजीवपदार्थोऽस्ति। अतश्चास्ति यद्भाष्ये बहुकृत्वः "षड्द्रव्याणि" इत्युक्तम्, अतोऽस्योपसंख्यानं कर्तव्यमिति? तन्न; किं कारणम्; वक्ष्यमाणलक्षणत्वात्। वक्ष्यते हि तस्य लक्षणमुपरिष्टात्।

अत्राह 'सर्वद्रव्यपर्यायेषु केवलस्य' इत्येवमादिषु द्रव्याण्युक्तानि कानि तानीति? अत्रोच्यते –

## द्रव्याणि॥2॥

**स्वपरप्रत्ययोत्पादविगमपर्यायैः द्रूयन्ते द्रवन्ति वा तानीति द्रव्याणि॥१॥** स्वश्च परश्च स्वपरौ, स्वपरौ प्रत्ययौ ययोः तौ स्वपरप्रत्ययौ। उत्पादश्च विगमश्चोत्पादविगमौ स्वपरप्रत्ययौ उत्पादविगमौ येषां ते स्वपरप्रत्ययोत्पादविगमाः। के पुनस्ते? पर्यायाः। द्रव्यक्षेत्रकालभावलक्षणो बाह्यः प्रत्ययः परः प्रत्ययः तस्मिन् सत्यपि स्वयमतत्परिणामोऽर्थो न पर्यायान्तरमास्कन्दतीति। तत्समर्थः स्वश्च प्रत्ययः। तावुभौ संभूय भावानामुत्पादविगमयोः हेतू भवतः नान्यतरापाये कुशूलस्थमाषपच्यमानोदकस्थघोटकमाषवत्। एवमुभयहेतुकोत्पादविगमैः तैस्तैः स्वपर्यायैः द्रूयन्ते

गम्यन्ते द्रवन्ति गच्छन्ति तान् पर्यायानिति द्रव्याणीति व्यपदिश्यन्ते। भेदनयवशात् कर्तृकर्मणोर्भेदं कृत्वा निर्देशः क्रियते स्वजात्यपरित्यागेनावस्थितिरन्वयैरुपलब्धस्वरूपाणां मुहुर्मुहुरुत्पादाविगमवतां च भेदोपपत्तेः। यदा द्रव्याणां कर्मविवक्षा तदा न्यायप्राप्तः कर्मणि यः। यदा कर्तृविवक्षा तदा बहुलापेक्षया कर्तरि यः। अथवा, उत्पादकविनश्वरनानापर्यायोत्पादविनाशाविच्छेदेऽपि सान्ततिकद्रव्यार्थादेशवशेन द्रवणात् गमनात् संप्रत्ययाद् द्रव्याणि। कुत एतत्? गत्यर्थानां ज्ञानार्थत्वात्।

द्रव्यार्**थे वा निपातितो द्रव्यशब्दः॥२॥** अथवा द्रव्यं भव्य इत्यनेन निपातितो द्रव्यशब्दो वेदितव्यः। द्रु इव भवतीति द्रव्यम्। क उपमार्थः? द्रु इति दारु नाम यथाऽग्रन्थि अजिह्मं दारु तक्ष्णोपकल्प्यमानं तेन तेनाभिलषितेनाकारेणाऽऽविर्भवति, तथा द्रव्यमप्यात्मपरिणामगमनसमर्थं पाषाणखननोदकवदविभक्तकर्तृकरणमुभयनिमित्तवशोपनीतात्मना तेन तेन पर्यायेण द्रु इव भवतीति द्रव्यमित्युपमीयते।

**द्रव्यत्वादिति चेन्न; तदभावात्॥३॥** स्यान्मतम् – यथा दण्डसम्बन्धात् दण्डीत्यभिधानं प्रत्ययश्च देवदत्ते भवति तथा द्रव्यत्वं नाम सामान्यविशेषोऽस्ति पृथिव्यादिषु द्रव्यमिति प्रत्ययाभिधानानुप्रवृत्तिदर्शनात् गुणकर्मभ्यो व्यावृत्त्युपलब्धेश्चानुमीयमानान्वयव्यतिरेकः तेन योगाद् द्रव्यं न पर्यायद्रवणादिति; तन्न; किं कारणम्? तदभावात्। यथा दण्डसम्बन्धात् प्राक् देवदत्तो जात्यादिभिः सिद्धः। देवदत्तसंबन्धाच्च प्राग्दण्डो वृत्तत्वद्राघिमादिभिः प्रसिद्धः, ततस्तयोः संबन्धो युक्तः। न च तथा द्रव्यत्वयोगात् प्राक् द्रव्यमुपलभ्यते। यद्युपलभ्येत संबन्धकल्पनमनर्थकं स्यात्। द्रव्यत्वमपि द्रव्यसंबन्धात् प्राङ् नोपलब्धस्वरूपमस्ति। अतः तयोरसतोर्नयुक्तः संबन्धः। अस्तित्वे चाभ्युपगम्यमाने पृथगनुपलभ्यमानशक्तिकयोः संबन्धेऽपि न तच्छक्तिप्रादुर्भावोऽस्ति, यथा जात्यन्धयोः पृथग्दर्शनशक्तिविरहान्न

योगेऽपि रूपालोकनशक्तिसंभवः। तथा द्रव्यद्रव्यत्वयोरपि द्रव्यप्रत्ययाभिधानोत्पत्त्यसामर्थ्यात् तत्संबन्धेऽपि न सामर्थ्यम्। तत्र द्रव्यं तावत् प्राक् द्रव्यत्वसमवायात् द्रव्यात्मनैव नात्मनि द्रव्यप्रत्ययाभिधानयोरुत्पादकम्। यदि स्यात् द्रव्यत्वसंबन्धस्य वैयर्थ्यं स्यात्। तथा द्रव्यत्वमपि प्राग्द्रव्यसमवायात् द्रव्यत्वात्मन्येव न द्रव्यप्रत्ययाभिधाननिमित्तमस्ति। माभूद् द्रव्यत्वस्य द्रव्येण समवायस्य वैयर्थ्यमित्यतस्तयोः पृथगनुपलभ्यमानसामर्थ्ययोः संबन्धेऽपि न तत्सामर्थ्यमस्तीत्यवेमः न द्रव्यत्वयोगाद् द्रव्यमिति। ननु च द्रव्यत्वसंबन्धात् प्राक् द्रव्यव्यपदेशो नास्ति, अस्ति तु तत्, ततः सतो द्रव्यत्वस्य युक्तः संबन्धः; नैषो दोषोऽस्ति परिहारः। कुतः? सतोऽसत्त्वात्। नहि तद्द्रव्यं स्वतोऽस्ति सत्तायोगादेव सत्स्यात् सच्चनास्तीत्युक्तम्। अथासतामपि संबन्धः स्यात् खरविषाणादीनामपि स्यात्। किञ्च द्रव्यत्वं नाम सर्वगतः पदार्थः, स यद्यतदात्मकेन संबध्यते गुणकर्मभिः खरविषाणादिभिश्च संबध्येत, न चेष्यते संबन्धः। अथ तदात्मकेनैव संबध्यते द्रव्यत्वसंबन्धो व्यर्थः प्रागपि तदात्मकत्वात्, ततः स्वतो द्रव्यसिद्धिः।

आह – समवायिकारणत्वाद् द्रव्यत्वेन द्रव्यमेव सम्बध्यते न गुणकर्माणि नापि खरविषाणादीनि, द्रव्यत्वस्य हि द्रव्यमेव समवायिकारणमिष्टं नेतराणीति। उच्यते –

**न, स्वतोऽसिद्धत्वात् ॥४॥** यदि द्रव्यत्वादन्य व्यं स्वतःसिद्धं स्यात् अतस्तत्समवायिकारणमिति व्यपदेशार्हं स्यात्, न च तत्स्वतःसिद्धं किञ्चिदस्ति, अतः स्वतोऽसिद्धत्वात् न तत्समवायिकारणम्। अथ तत्स्वतोऽसिद्धमपि समवायिकारणं खरविषाणादिषु को मत्सरः? अथाऽसत्त्वान्न समवायिकारणं तानि; नन्वसत्त्वाद् द्रव्यमपि द्रव्यत्वस्य न समवायिकारणम्। किञ्च,

**अतस्तत्सिद्धेः॥५॥** यत एव द्रव्यत्वस्य समवायिकारणं द्रव्यं न गुणकर्माणि अतस्तद्द्रव्यत्वं द्रव्य एव समवैति न गुणकर्मादिष्विति विवक्षितम्, नन्वत एव

द्रव्यात्मैव द्रव्यत्वम्, आभ्यन्तरोऽर्थोऽनादिपारिणामिकः द्रव्यापरित्यागी न द्रव्याद् बहिरन्यः सामान्यविशेषाख्यः इत्येतत्सिद्ध्यति।

आहविशेषोपलब्धेर्द्रव्यमेव समवायिकारणं द्रव्यत्वस्य। को विशेषः? आश्रयभावः, यस्माद् द्रव्यमितरेषां पदार्थानामाधारः उच्यते –

**न द्रव्यमाश्रयः स्वतोऽसिद्धत्वात् ॥६॥** लोके स्वतःसिद्धे आधेयानामाश्रयो भवति यथा घटो जलादीनां न तथा द्रव्यत्वात् पृथक् द्रव्यं स्वतःसिद्धमस्ति यदाधारो द्रव्यत्वस्येति व्यपदिश्येत। किञ्च,

**द्रव्याभिधानानुपपत्तिश्च॥७॥** यस्य वादिना द्रव्यत्वयोगात् द्रव्यमित्यभिमतं तस्य द्रव्यमित्यभिधानं नोपपद्यते। कथमिति चेत्? उच्यते – इहाऽभेदेन वा व्यपदेशः स्यात्, भेदेन वा? यद्यभेदेन व्यपदेशः; यथा यष्टिसहचरितः पुरुषो यष्टिरित्युच्यते तथा द्रव्यत्वसहचरितं द्रव्यत्वमिति व्यपदिश्येत न द्रव्यमिति। अथ मतं द्रव्यत्वस्य द्रव्यत्वमित्यभिधानमस्ति द्रव्यमिति च, तेन द्रव्यत्वेन द्रव्यमित्यमिधीयमानेन योगाद् द्रव्यमिति; तदिदमसिद्धमसिद्धेन साध्यते। द्रव्यत्वस्य द्रव्यमित्यभिधानं कुतः? स्वत एवेति चेत्; द्रव्ये कोऽपरितोषः? अर्थान्तरादिति चेत्; तत्रापि स एव दोषः, द्रव्यत्वाभिधानप्रसङ्गश्च। कुतो ह्येतत् – उभयशब्दवाच्यत्वे द्रव्यत्वस्य तद्योगात् द्रव्ये द्रव्यमित्यभिधानं भवति न द्रव्यत्वमिति। अथ भेदेन व्यपदेशः; यथा यष्टिरस्यास्तीति यष्टिमानिति व्यपदिश्यते, एवं द्रव्यत्वमस्यास्तीति द्रव्यत्ववद्द्रव्यमित्यभिधानं प्रसज्यते, न द्रव्यमित्यभिधानं प्रसज्येत। अथ मतमेतत् यथा शुक्लगुणयोगात् शुक्लः पटः इति मत्वर्थीयस्य निवृत्तिः; एवमिहापि मत्वर्थीयस्याभाव इति विषम उपन्यासः। युज्यते तत्र मत्वर्थीयस्याभावः गुणवचनेभ्यो निवृत्तेरन्वाख्यातत्वात् ।अनन्वाख्याने वा 'उभयवचनाः शुक्लादयः'। इति व्याकरणाभ्युपगम्यमानेऽयं तु द्रव्यत्वशब्दो न गुणवचनः

तेन चास्मान्मतोर्निवृत्तिर्दुरुपपादा। किञ्च, मत्वर्थस्यापि निवृत्तिर्नान्वाख्याता ततो द्रव्यमित्यभिधानं नोपपद्यते।

**त्वोत्पत्त्यभावश्चोभयथा दोषात्॥८॥** द्रव्यस्य भावो द्रव्यत्वमिति त्वस्य चोत्पत्तिर्न प्राप्नोति। कुतः? उभयथा दोषात्। इदमिह संप्रधार्यम्-असौ भावः द्रव्यस्याऽऽत्मभूतो वा स्यादनात्मभूतो वा? यद्यात्मभूतः; अनादिपारिणामिकद्रव्यस्याऽऽत्मभवने त्वस्य विधानात्, नान्यद् द्रव्याद् द्रव्यत्वमिति संसर्गवादहानिः। अथ अर्थान्तरभूतः; द्रव्यस्य भावो द्रव्यत्वमिति विग्रहो नोपपद्यते, द्रव्यानात्मभूतत्वात् द्रव्यत्वस्य। न हि घटस्य भाव इति पटे वृत्तिरुपपद्यते।

किञ्च, द्रव्यस्य भावो द्रव्यत्वमिति यथाऽन्यो भावः तथा द्रव्यत्वस्यान्यो भावः स्याद्वा, न वा? यदि नास्ति; तस्य स्वभावाभावादभावः स्यात्। अथास्ति तस्मिन्नभिधेये त्वत्तोत्पत्तेः द्रव्यत्वत्वमिति प्राप्नोति, तथा सत्यनवस्था। अथ मतमेतत् यथाऽवेर्मांसमिति विगृह्य अविकशब्दादुत्पत्तिर्भवति आविकमिति, तथा द्रव्यत्वस्य भाव इति विगृह्य द्रव्यशब्दादेव त्वोत्पत्तिर्भवतीति; नैतद्युक्तम्; अर्थान्तरविषयत्वात्। युज्यते अवेर्मांसमविकस्य मांसमिति केवलो विग्रहभेदो नार्थभेद इत्येकेन विग्रहोऽपर-स्मादुत्पत्तिरिति। इह तु द्रव्यद्रव्यत्वशब्दयोः पदार्थान्तरविषयत्वात् विग्रहभेदेऽर्थभेद इति नासौ न्यायः कल्पयितुं शक्यः।

**एकस्यानेकत्र वृत्त्यभावो बहुत्वप्रसङ्गो वा॥९॥** तद्द्रव्यत्वमेकमित्यभ्युपगम्यते तद्वादिभिः। तत्कथमेकं निरवयवमनेकत्र पृथिव्यादौ वर्तितुमुत्सहते? अथ वर्तेत; बहुत्वमेवास्य स्यादनेकत्र वृत्तेः रूपादिवत्। आकाशवदेकं सदनेकमवगाहत इति चेन्न; वैषम्यात्। युज्यते महापरिमाणं वियदवगाहते सकलमिति गुणानां तु द्रव्य-पदार्थविषयत्वात् कथममहद्द्रव्यत्वं कृत्स्नं वेवेष्टि। एकत्वसंख्यागुणवदुपचारतो महत्त्वमस्येति चेत्; तदिदमसिद्धेन साध्यते। सिद्धसाध्यव्यवस्थाश्रया हि कथामार्गाः।

उपचरितस्य मुख्यकार्यसाधनाशक्तेश्च। अस्यापि च द्रव्यत्वेनैकमाकाशं प्रदेशभेदेन त्वनन्तमितीष्टत्वात् दृष्टान्ताभावः।

**नीलद्रव्यवदिति चेन्न; असिद्धत्वात् ॥१०॥** स्यान्मतम् – यथा नीलीद्रव्यमेक-मनेकशाटीपटकम्बलसंबन्धि दृष्टं तथैकं द्रव्यत्वमप्यनेकद्रव्यसंबन्धीति। तन्न; किं कारणम्? असिद्धत्वात्। नैतत् सिद्धं शाटीपटकम्बलेष्वेकमेव नीलीद्रव्यमिति। यथा शाट्यादिभेदः तथा तद्रञ्जकस्य नीलीद्रव्यस्यापि भेदोपपत्तेः। एकस्मिन्नपि पटे यन्मध्ये नीलीद्रव्यं न तत्प्रान्तयोः, यच्च प्रान्तयोः न तन्मध्ये इति भेदोऽभ्युपगन्तव्यः किमुत भिन्नेषु द्रव्येषु। नीलत्ववदिति चेन्न; तदपि साध्यसमम्। अथ मतमेतत् –

**दृष्टान्ताभावेऽप्येकत्वमस्य सिद्धमग्निवदिति चेन्न; प्रतिज्ञाहानेः॥११॥** यथाऽग्ने-रन्यस्मिन्नुष्णे दृष्टान्तेऽसत्यप्यौष्ण्यम्। एवमसत्यप्येकस्मिन्ननेकसंबन्धिनि दृष्टान्ते द्रव्यत्वस्य द्रव्येषु वृत्तिः सिद्ध्यतीति तदपि नोपपद्यते; प्रतिज्ञाहानेः। ननु दृष्टान्तो नास्तीति प्रतिज्ञाय दृष्टान्तं ब्रुवतस्ते प्रतिज्ञा हीयते। किञ्च, युक्त्यभावेऽपि यदि द्रव्यत्वमेकमनेकसंबन्धीति मन्यते स्वत एव द्रव्यं द्रव्यत्वमिति कस्मान्न प्रतिपद्यते? समवायदिति चेन्न; तस्य प्रत्युक्तत्वात्।

**गुणसंद्रावो द्रव्यमिति चेन्न; एकान्ते दोषोपपत्तेः॥१२॥** स्यादेतद् – गुणसंद्रावो द्रव्यमित्येतल्लक्षणमनवद्यम्। गुणैः संद्रूयते प्राप्यते गुणान्वा संद्रवति प्राप्नोतीति द्रव्यमिति; तन्न; किं कारणम्? एकान्ते दोषोपपत्तेः। कथमिति चेत्? उच्यते – गुणेभ्यो द्रव्यमन्यद्वा स्यादनन्यद्वा? यद्यनन्यत् कर्तृकर्मभेदाभावात् निर्देशो नोपपद्यते। अपि चैकान्तानन्यत्वे हि गुणा एव वा स्युः, द्रव्यमेव वा। यदि गुणा एव; द्रव्याभावे तदविनाभाविनां गुणानामपि निराधारत्वादभावः स्यात्। अथ द्रव्यमेव एवमप्यलक्षणत्वात् खरविषाणत्वकल्पना द्रव्यस्य स्यात्। अथान्यत्वं गृह्येत एवमप्येकान्तेन पृथग्भावे स्वरूपशून्यत्वं स्यात्। यस्मादभ्युपगम्योच्यते गुणैः संद्रूयते

द्रव्यमिति लक्षणं नोपपद्यते; गुणानां निष्क्रियत्वे द्रव्यं प्रत्याभिमुख्येन द्रवणाभावात्। दिक्कालावाकाशं च क्रियावद्भ्यो वैधर्म्यान्निष्क्रियाणि। एतेन कर्माणि गुणाश्च व्याख्याताः। निःक्रियाः इति वचनात्। गुणान् संद्रवतीति च लक्षणं नोपपद्यते निःक्रियद्रव्याणां गुणान् प्रति द्रवणाभावात्। किञ्च,

**स्वतोऽसिद्धत्वात्॥१३॥** यथा वाद्रिपरिक्षेपादिलक्षणान् ग्रामादीन् स्वतःसिद्धान् देवदत्तः सिद्धः प्राप्नोति न तथा गुणाः स्वतः सिद्धाः सन्ति यान् प्राप्नुयाद् द्रव्यम्। आह –

**पाकजदर्शनात् तत्सिद्धिः॥१४॥** पार्थिवेषु परमाणुष्वग्निसंयोगादौष्ण्यापेक्षात् श्यामाद्युच्छेदेन रक्ताद्यारम्भे च ननु प्राप्यते गुणैर्द्रव्यम्। उच्यते-

**ननु युतसिद्धत्वप्रसङ्गात्॥१५॥** यदि द्रव्यमवतिष्ठते रूपादयो विनश्यन्ति प्रादुर्भवन्ति। ननु युतसिद्धा द्रव्यरूपादय इत्यासक्तम्। अथ अयुतसिद्धाः समवायसंबन्धादिति मतम्? ननु द्रव्यवत्तन्नित्यत्वप्रसङ्गः। एवं सत्ययुतसिद्धिर्भवति – यदा रूपादयस्तदा द्रव्यं यदा द्रव्यं तदा रूपादय इति, नन्वेवं सति यथा द्रव्यं नित्यं तथा रूपादयोऽपि नित्याः यथा रूपादीनामनित्यत्वं तथा द्रव्यस्येति प्राप्तं तुल्यवृत्तित्वम्।

**किञ्च, विरोधात् पण्डितमूर्खवत्॥१६॥** यदि पण्डितो न मूर्खः अथ मूर्खो न पण्डितः तथा यदि समवायसंबन्धात् द्रव्यादयुतसिद्धाः रूपादयो न विनक्ष्यन्ति न वोत्पत्स्यन्ते। अथ विनश्यन्त्युत्पद्यन्ते च द्रव्यं नावतिष्ठत इति कुतस्त्योऽयं न्यायः। न च गुणैर्द्रूयते गम्यते उपलभ्यते तदिति द्रव्यम्, कस्मात्? अर्थान्तरत्वात्। न हि घटेन पट उपलभ्यतेऽन्यत्वात्। अथोपलभ्यते द्रव्यगुणलक्षणभेदेन कल्पनाविरोधः।

आह भेदे एव उपलभ्योपलम्भकभावो दृष्टोऽग्निधूमादिषु, नाऽभेदे स्वात्मनि वृत्तिविरोधात्। न ह्यङ्गुल्यग्रमात्मानं स्पृशतीति? उच्यते – युज्यतेऽग्निधूमादिषु भिन्नेष्वेव लक्ष्यलक्षणभावः पृथक्सिद्धरूपत्वात्। न च द्रव्यगुणानां पृथक् प्रसिद्धरूपता व्यतिरेकेणानुपलब्धेः।

यच्चोक्तम् – स्वात्मनि वृत्तिविरोध इति, तदप्येकान्तग्रहणात् सूक्तं न भवति। दृश्यते हि स्वात्मन्यपि वृत्तिः यथा प्रदीपः स्वात्मानं प्रकाशयति, न तस्य स्वरूपप्रकाशने प्रदीपान्तरमपेक्षते। यद्यपेक्षेत; पटादिवदप्रकाशकत्वमेवाऽस्य स्यात्।

किञ्च, तस्य तत्त्वस्योपदेष्टा स्वात्मानं वेत्ति वा, न वा? यदि न वेत्ति; स्ववचनविरोधः – ''आत्मन्यात्ममनसोः संयोगविशेषादात्मप्रत्यक्षम्।' इति वचनात्।

**असर्वज्ञत्वप्रसङ्गश्च॥१७॥** यद्यात्मानमेवासौ न वेत्ति कथमितरद्विजानीयात् ततोऽस्य स्वपरविशेषानभिज्ञत्वादसर्वज्ञत्वं प्रसज्यते। अथ वेत्ति; ननु स्वात्मनि वृत्तिविरोधात् इति प्रतिज्ञातं हीयते। तस्मात् स्वात्मनिवृत्त्यविरोधात् द्रव्यात्मका एव पर्यायाः द्रव्यं लक्षयन्तीति साधूक्तम्।

यो हि मन्यते – गुणसमुदायमात्रं द्रव्यं नातोऽन्यत् किञ्चिदिति तस्यापि गुणसंद्रावो द्रव्यमित्येतल्लक्षणं नोपपद्यते। कुतः? कर्तृकर्मभेदाभावादेव। गुणसमुदायमात्रद्रव्यवादिनो हि वादिनः; न गुणाः पृथक् सन्ति नापि समुदायः ततोऽन्योऽस्ति येषां कुतश्चित् भेदात् कर्तृकर्मभावो भवेत्। ननु चाऽभेदेऽपि कर्तृकर्मभावो दृष्टः यथाऽऽत्मानं प्रदीपः प्रकाशयतीति, तत्रापि कथञ्चिद् भेदेन भवितव्यम्, भासुरस्य रूपस्य द्रव्यस्य च स्याद् भेददर्शनात्। यदि सर्वथैवाऽभेदः स्यात्; सर्वं द्रव्यं भासुररूपं स्याद् भासुरस्य च द्रव्यस्य सर्वदैव ताद्रूप्यं प्रसज्यते। दृश्यते च माषादिभावः।

न च समुदायकल्पना युज्यते गुणानां पृथक्स्वरूपानुपलब्धेः। दृश्यते माषादीनां पृथगुपलभ्यमानरूपाणां समुदायः। नापि गुणकल्पनोपपद्यते, गुण्यते विशेष्यते यैरर्थास्ते गुणाः विशेषणानीत्यर्थः। न च गुणिनं विशेष्यं कञ्चिदन्तरेण गुणानां गुणत्वं भवति।

किञ्च, समुदायो गुणेभ्योऽन्यो वा स्यादनन्यो वाऽवक्तव्यो वा? अन्यत्वानन्यत्वयोः विहिता दोषाः। यद्यवक्तव्यः; स्ववचनविरोधः प्रसज्यते. यदि समुदायोऽस्ति नावक्तव्यः, अथावक्तव्यो न समुदायोऽस्ति, सतः संज्ञोपपत्तेः, अवक्तव्यस्य च सर्ववाग्गोचरात्यये निरात्मकत्वप्रसङ्गादिति शिष्टेतरवचनवदन्यत्वोपपत्तेश्च। यदि वक्तव्यलक्षणा गुणाः समुदायो न वक्तव्यलक्षणः; ननु च लक्षणभेदादन्यत्वं सिद्धम् ।

किञ्च, रूपादिपरमाणुसमुदायमात्रत्वे गुर्वादेः धर्मान्तरस्याऽप्रादुर्भावात्, अणूनामतीन्द्रियस्वभावव्यतिक्रमाभावात् दृश्यमिदं भ्रान्तिरूपं स्यात् । सत्यमेवेदमिति चेत्, प्रत्यक्षानुमानयोः तदाभासयोश्चाविशेषप्रसङ्गः स्यात् ।

'द्रव्यं भव्य' इत्ययमपि द्रव्यशब्दः एकान्तवादिनां न संभवति; स्वतोऽसिद्धस्य द्रव्यस्य भव्यार्थासंभवात् । संसर्गवादिनस्तावत् गुणकर्मसत्ताद्रव्यत्वादिसामान्यविशेषेभ्यो द्रव्यस्यात्यन्तमन्यत्वे खरविषाणकल्पस्य स्वतोऽसिद्धत्वात् । न भवनक्रियायाः कर्तृत्वं युज्यते। परतः सिद्धिरपि स्वतोऽसिद्धस्य न संभवति खरविषाणवत् गुणसमुदायमात्रत्वेऽपि समुदायस्य संवृत्या कल्पितस्याऽसत्त्वात् गुणानां च प्रत्येकमनुपलभ्यत्वात् तदव्यतिरेकाच्चाऽसत्त्वमिति भवनक्रियायाः कर्तृता दुरुपपादा। अनेकान्तवादिनस्तु गुणसंद्रावो द्रव्यम्, द्रव्यं भव्य इति चोपपद्यते, पर्यायिपर्याययोः कथञ्चिद्भेदोपपत्तेरित्युक्तं पुरस्तात् ।

**धर्मादिसामानाधिकरण्याद्बहुवचनम् ॥८॥** प्रकृताः धर्मादयो बहवः तत्सामानाधिकरण्याद्बहुवचनेन निर्देशः क्रियते।

**धर्मादीन्येव द्रव्याणि नान्यानीति पुल्लिङ्गप्रसङ्ग इति चेन्न, आविष्टलिङ्गत्वात् ॥९॥** स्यादेतत् - यदि तत्सामानाधिकरण्याद्वहुवचनं क्रियते तत एव पुल्लिङ्गमपि प्राप्नोतीति। ते ह्यजीवकाया उक्ताः पुल्लिङ्गा इति; तन्न; किं कारणम्? आविष्टलिङ्गत्वात्। आविष्टो ह्ययं द्रव्यशब्दः वचनादिवत् स्वलिङ्गं न जहाति।

अनन्तरत्वाच्चतुर्णामेव द्रव्यव्यपदेशप्रसङ्ग अन्योपादार्थमिदमुच्यते –

## जीवाश्च॥३॥

जीवशब्दो व्याख्यातार्थः।

**जीवत्वादिति चेन्न; प्रतिषिद्धत्वात् ॥१॥** स्यादेतत् – जीवत्वं नाम सामान्यविशेषोऽस्ति तेन योगाज्जीवा इति; तन्न; किं कारणम्? प्रतिषिद्धत्वात्। द्रव्यत्ववदस्य प्रतिषेधो वेदितव्यः। किञ्च,

**अनवस्थाप्रतिज्ञाहानिदोषप्रसङ्गात् ॥२॥** यो जीवत्वसंयोगाज्जीव इति प्रत्ययाभिधाने कल्पयति स प्रष्टव्यः – जीवत्वे केन योगात् प्रत्ययाभिधानवृत्तिरिति? तत्राप्यन्यत एवेति चेदनवस्थाप्रसङ्गः। अथाऽनवस्थादोषो माऽक्लृपदिति जीवत्वे स्वत एव वृत्तिरभ्युपगम्यते, ननु प्रतिज्ञाहानिस्तेऽर्थान्तरसंसर्गात् सर्वत्र वृत्तिरिति तद्वज्जीवेऽपि स्यात्।

अथ मतमेतत् – जीवत्वे प्रदीपवत् स्वत एव वृत्तिरिति, जीवे कोऽपरितोषः। आह – पदार्थान्तरत्वादेव जीवजीवत्वयोः न जीवत्ववत् जीवे स्वतः प्रत्ययाभिधानसिद्धिः, यस्मान्न पदार्थान्तरधर्मः पदार्थान्तरे भवितुमर्हति पदार्थान्तरत्वादेव,

अन्यथा पदार्थसंकरप्रसङ्गः, स च नास्ति, अतो नानवस्थाप्रतिज्ञाहानिदोषौ स्त इति। उच्यते –

**न पदार्थान्तरत्वासिद्धेः॥३॥** यदि जीवजीवत्वयोः पदार्थान्तरत्वमभविष्यदपि तर्हि धर्मसंकराभावोऽसेत्स्यत्। न तु पदार्थान्तरत्वमस्तीत्युक्तं पुरस्तात् 'स्वतोऽसिद्धत्वात्' इति।

किञ्च, प्रतिज्ञाहानिस्ते प्रसजति यदि पदार्थान्तरधर्मः पदार्थान्तरे न भवेत्; सत्तायाः सदिति प्रत्ययाभिधानहेतुत्वलक्षणो धर्मः द्रव्यगुणकर्मसु न स्यात्। अथ योगेऽपि सत्प्रत्ययाभिधानहेतुत्वं सत्ताया एवेति चेन्न सन्ति द्रव्यगुणकर्माणि सत्प्रत्ययाभिधानहेतुत्वविरहात् खरविषाणवत् इत्युक्तम्। ततः सिद्धमेतत् – जीवनक्रियोपलक्षितद्रव्यविशेषविषयाऽनादिपारिणामिकी जीवसंज्ञेति।

**द्रव्यलक्षणयोगादद्रव्याणीति चेन्न; नियमार्थत्वात्॥४॥** स्यान्मतम् ''उत्पाद-व्ययध्रौव्ययुक्तं सत्'' इति द्रव्यलक्षणं वक्ष्यते, तेन योगाद् धर्मादीनां द्रव्यत्वं सिद्धं नार्थोऽनेन द्रव्यसंख्यानेन इति; तन्न; किं कारणम्? नियमार्थत्वात्। नियमार्थोऽयमारम्भः। धर्माऽधर्माऽऽकाशपुद्गला जीवाश्च वक्ष्यमाणलक्षणेन कालेन सह षडेव द्रव्याणीति। तेनान्यवादिपरिकल्पितानां दिगादीनां निवृत्तिः सिद्धा। कथमिति चेत्? उच्यते – पृथिव्यप्तेजोवायुमनांसि पुद्गलद्रव्येऽन्तर्भवन्ति रूपरसगन्धस्पर्शवत्त्वात्। वायोर्मनसश्च रूपादियोगाभाव इति चेन्न; रूपादिमत्त्वात्। वायुस्तावत् रूपादिमान् स्पर्शवत्त्वात् घटादिवत्। चक्षुरादिकरणग्राह्यत्वाभावात् रूपाद्यभाव इति चेन्न; परमाण्वादिष्वतिप्रसङ्गात्।

मनोऽपि द्विविधं द्रव्यमनो भावमनश्चेति। तत्र भावमनो ज्ञानं तस्य जीवगुणत्वादात्मन्यन्तर्भावः। द्रव्यमनश्च रूपादियोगात् पुद्गलद्रव्यविकारः।

तद्योगाभावोऽनुपलभ्यमानत्वादिति चेत्; परमाण्वादिषु विधर्मस्वपि वृत्तेः संशयहेतुत्वम्।

रूपादिमन्मनो ज्ञानोपयोगकरणत्वात् चक्षुरिन्द्रियवत्। अमूर्तेऽपि शब्दे ज्ञानोपयोगकरणत्वदर्शनात् व्यभिचारी हेतुरिति चेन्न; तस्य पौद्गलिकत्वात् मूर्तिमत्त्वो पपत्तेः। परमाण्वादीनामतीन्द्रियत्वेऽपि रूपादिमत्कार्यदर्शनाद्रूपादिमत्त्वमनुमीयते न तथा वायूनां मनसाञ्च रूपादिमत्कार्यमुपलभ्यते यतोऽवसीयते रूपादिमत्त्वमेषामिति चेन्न; तेषामपि तदुपपत्तेः। सर्वेषां परमाणूनां सर्वरूपादिमत्कार्यत्वप्राप्तियोग्यताभ्युपगमात्। न च केचित् पार्थिवादिजातिविशेषयुक्ताः परमाणवः सन्ति; जातिसंकरेणाऽऽरम्भदर्शनात्। दिशोऽप्याकाशेऽन्तर्भावः आदित्योदयाद्यपेक्षयाऽऽकाशप्रदेशपङ्क्तिष्वित इदमिति व्यवहारो-पपत्तेः।

**जीवा इति बहुवचनं वैविध्यख्यापनार्थम्॥३॥** जीवा इति बहुवचनं क्रियते वैविध्यख्यापनार्थम्। विविधा हि जीवाः संसारिणो मुक्ताश्चेति। संसारिणोऽपि गतीन्द्रियादिचतुर्दशमार्गणास्थानविकल्पान्मिथ्यादृष्ट्यादिचतुर्दशगुणस्थानभेदात् सूक्ष्म बादरादिचतुर्दशजीवस्थानविकल्पाच्च विविधाः। मुक्ताश्च एकद्वित्रिःचतुःसंख्येयासंख्येया-नन्तसमयसिद्धपर्यायभेदाश्रयात् मुक्तिहेतुशरीराकारानुविधायिस्वक्षेत्रपरक्षेत्रावगाहनादि भेदाच्च विविधाः।

**एकयोग इति चेन्न; जीवानामेव प्रसङ्गात्॥४॥** स्यान्मतम् – एक एव योगः कर्तव्यः द्रव्याणि जीवा इति। एवं च सति चशब्दाकरणात् लघ्विति; तन्न; किं कारणम्? जीवानामेव प्रसङ्गात्। तथा सति जीवा एव द्रव्याणि न धर्मादीनी-त्यनिष्टमासज्यते।

**बहुवचनादिति चेन्न; उक्तत्वात्॥७॥** स्यादेतद् – द्रव्याणीति बहुवचनात् धर्मादीनां जीवानां च द्रव्यसंज्ञा सिद्ध्यतीति; तन्न, किं कारणम्? उक्तत्वात्। उक्तमेतत् 'जीवा इति बहुवचनं वैविध्यख्यापनार्थम् इति। तत्सामानाधिकरण्यात् द्रव्याणीति बहुवचनं न्यायप्राप्तमिति न ततो धर्मादिगतिः।

**अधिकारादिति चेन्न; उक्तत्वात्॥८॥** स्यादेतत् – ''अजीवकायाः धर्माधर्माकाशपुद्गलाः'' इत्यजीवाधिकारादेकयोगेऽपि जीवाजीवयोर्द्रव्यसंज्ञा सेत्स्यति इति; तन्न; किं कारणम्? जीवावबद्धत्वात्। द्रव्यशब्दोऽयं जीवावबद्ध इति जीवानामेव द्रव्यसंज्ञा प्राप्नोति।

**सत्यप्यधिकारे यत्नाभावाच्च॥९॥** अनुवर्तमाना अपि विधयो न चानुवर्तनादेव भवन्ति। किं तर्हि? यत्नाद्भवन्तीति। जीवानामेव द्रव्यसंज्ञा स्यादजीवानां न स्यात् यत्नाभावात्। ततः पृथक्योगग्रहणं न्याय्यम्। एवं च कृत्वा चशब्दोऽप्यर्थवान् भवति।

उक्तानां द्रव्याणां विशेषप्रतिपत्त्यर्थमाह -

## नित्यावस्थितान्यरूपाणि॥४॥

**नित्यशब्दो ध्रौव्यवचनः॥१॥** अयं नित्यशब्दः ध्रौव्यवचनो वेदितव्यः। नेर्ध्रुवे त्योऽन्वाख्यातः। किं पुनरिह नित्यत्वम्?

**तद्भावाव्ययो नित्यत्वम्॥२॥** येन भावेनोपलक्षितं द्रव्यं तस्य भावस्याऽव्ययो नित्यत्वमुच्यते। वक्ष्यते ''तद्भावाव्ययं नित्यम्'' इति। धर्मादीनि द्रव्याणि गतिहेतुत्वादिविशेषलक्षणद्रव्यार्थादेशादस्तित्वादिसामान्यलक्षणद्रव्यार्थादेशाच्च कदाचिदपि न व्ययन्तीति नित्यानि।

**इयत्तानतिवृत्तेरवस्थितानि ॥३॥** धर्मादीनि षडपि द्रव्याणि कदाचिदपि षडिति इयत्त्वान्नातिवर्तन्ते, ततोऽवस्थितानीत्युच्यन्ते। अथवा, धर्माधर्मलोकाकाशैकजीवानां तुल्यासंख्येयप्रदेशत्वमलोकाकाशस्य पुद्गलानां चाऽनन्तप्रदेशत्वमित्येतदियत्त्वम्, तस्यान-तिवृत्तेरवस्थितानीति व्यपदिश्यन्ते।

**गतार्थत्वादवक्तव्यमिति चेन्न; परिणामानेकत्वात् ॥४॥** स्यान्मतं नित्यवचनेनैव गतार्थत्वादवस्थितानीति न वक्तव्यम्, न हि नित्यत्वमतिक्रम्यावस्थित्वमस्तीति; तन्न; किं कारणम्? परिणामानेकत्वात्। धर्मादीनामनेकगतिपरिणामोऽस्ति गतिस्थित्युप-ग्रहादिपर्यायोत्पादव्ययव्यवस्थितिलक्षणः। अतः किम्? अमुष्मिन् परिणामानेकत्वेऽपि न मूर्तिमत्त्वोपयोगपरिणामो भवति धर्माधर्मकालाकाशानाम्, नापि जीवानामचेतनत्वम्, पुद्गलानां चामूर्तत्वमवस्थितवचनात्।

**विरोधादयुक्तमिति चेन्न; उभयनयसद्भावात् ॥५॥** स्यादेतत् – परिणामानेकत्वं येषामिष्टमवस्थिततत्वं चेत्येतद्विरुद्धमिति; तन्न; किं कारणम्? उभयनयसद्भावात्। धर्मादीनां सर्वेषां द्रव्याणां द्रव्यार्थिकपर्यायार्थिकाऽन्यतरगुणप्रधानभावार्पणाभेदात् स्थित्यु त्पत्तिनिरोधात्मकमविरुद्धम्।

**अवस्थितविशेषणं वा नित्यग्रहणम् ॥६॥** अथवा, नित्यग्रहणमिदमवस्थिविशेषणं विज्ञायते। यथा गमनागमनाद्यनेकपर्यायसद्भावेऽप्यभीक्ष्णप्रजल्पनसद्भावात् 'नित्यप्रज-ल्पितो देवदत्तः' इत्युच्यते, तथोभयकारणवशोपनीतोत्पादनिरोधसंभवेऽप्यमूर्तत्वादिस्व-भावं कदाचिदपि धर्माधर्मादीनि न जहतीति नित्यावस्थितानीत्युच्यते।

**क्रियावत्त्वनिवृत्त्यर्थमवस्थितवचनमिति चेन्न; निःक्रियाणीत्याम्नातत्वात् ॥७॥** स्यादेतत् – परिस्पन्दात्मिकायाः क्रियायाः निवृत्त्यर्थमवस्थितवचनमिति; तन्न; किं कारणम्? निष्क्रियाणीत्याम्नातत्वात्।

**अरूपग्रहणं द्रव्यस्वतत्त्वनिर्ज्ञानार्थम् ॥४॥** अरूपग्रहणं क्रियते द्रव्यस्वतत्त्वनिर्ज्ञाना-र्थम्। न विद्यते रूपं येषां तान्यरूपाणि। रूपव्युदासात्तदविनाभाविनां रसादीनामपि व्युदासो वेदितव्यः। अरूपाण्यमूर्तानीति यावत्।

**वृत्तौ पञ्चत्ववचनात् षड्द्रव्योपदेशव्याघात इति चेन्न; अभिप्रायाऽपरिज्ञानात् ॥५॥** स्यान्मतम् – वृत्तावुक्तमवस्थितानीति; तन्न; किं कारणम्? अभिप्रायापरिज्ञानात्। अयमभिप्रायो वृत्तिकारस्य - "कालश्च" इति पृथग् द्रव्यलक्षणं कालस्य वक्ष्यते, तदनपेक्षादिकृतानि पञ्चैव द्रव्याणीति षड्द्रव्योपदेशाविरोधः।

यथा सर्वेषां द्रव्याणां नित्यावस्थितानीत्येतत् साधारणं लक्षणं तथाऽरूपत्वमपि प्राप्तमतस्तदपवादार्थमाह –

## रूपिणः पुद्गलाः ॥५॥

**रूपशब्दस्याऽनेकार्थत्वे मूर्तिपर्यायग्रहणं शास्त्रसामर्थ्यात् ॥१॥** रूपशब्दोऽनेकार्थः। क्वचिद् द्रव्ये वर्तते – गोरूपाणि गोद्रव्याणीत्यर्थः। क्वचित् स्वभावे वर्तते "चैतन्यं पुरुषस्य स्वरूपम्" स्वभाव इत्यर्थः। क्वचिदभ्यासे वर्तते, दशरूपमध्ययनं कार्यम् – दशवारानभ्यासः कार्य इत्यर्थः। क्वचिच्छ्रुतौ वर्तते – स्वरूपं शब्दस्य स्वा श्रुतिरित्यर्थः। क्वचिन्महाभूतेषु वर्तते – "रूपं चत्वारि महाभूतान्युपादाय रूपं चेति।" क्वचित् गुणविशेषे वर्तते – चक्षुर्ग्रहणयोग्यो योऽर्थस्तद्रूपमिति। क्वचिन्मूर्तिपर्यायवचनः – रूपिद्रव्यं मूर्तिमद्द्रव्यमित्यर्थः। तत्रेह मूर्तिपर्यायवचनो रूपशब्दो ग्रहीतव्यः। कुतः? शास्त्रसामर्थ्यात्। अर्हत्प्रोक्ते हि गणधरावधारिते श्रौते शास्त्रेऽभिहितम् – "रूपिद्रव्यं मूर्तिद्रव्यम्" इति। तस्माद्रूपिणः पुद्गला मूर्तिमन्तः पुद्गला इत्यर्थः। का पुनः मूर्तिः?

**रूपादिसंस्थानपरिणामो मूर्तिः॥२॥** रूपमादिर्येषां त इमे रूपादयः। के पुनस्ते? रूपरसगन्धस्पर्शाः, परिमण्डलत्रिकोणचतुरस्रायतचतुरस्रादिराकृतिः संस्थानम्, तैः रूपादिभिः संस्थानैश्च परिणामो मूर्तिरित्याख्यायते।

**गुणविशेषवचनग्रहणं वा॥३॥** अथवा रूपमित्यनेन गुणविशेषो गृह्यते चक्षुर्ग्रहण्म योग्यः।

**रसाद्यग्रहणमिति चेन्न; तदविनभावात् तदन्तर्भावसिद्धेः॥४॥** स्यादेतत्-गुणविशेषग्रहणे सति रसादीनामग्रहणं प्रसक्तमिति; तन्न; किं कारणम्? तदविनाभावात् तदन्तर्भावसिद्धेः। रूपाविनाभाविनो हि रसादयो रूपग्रहणेन गृह्यन्ते।

**इनोऽनुत्पत्तिरभेदादिति चेन्न; कथञ्चिद् व्यतिरेकसिद्धेः॥५॥** स्यादाकूतम् – सति भेदे इन उत्पत्तिर्दृष्टा यथा दण्डोऽस्यास्तीति दण्डीति। न च तथा रूपं द्रव्याद्भिन्नमस्ति तस्यैव रूपादिपर्यायपरिणामात्। तत इन उत्पत्तिर्नोपपद्यते 'रूपमेषामस्ति ते रूपिणः' इति; तन्न; किं कारणम्? कथञ्चिद्व्यतिरेकसिद्धेः। यद्यपि पुद्गलद्रव्यादनन्यद्रूपं तत्परिणामात्, द्रव्यार्थादेशाद् व्यतिरेकेणाऽनुपलब्धेः। तथापि पर्यायार्थिकनयविवक्षाविजृम्भितैः रूपविनाशे पुद्गलावस्थानादुत्पादानुत्पाद्यत्वादादिमद-नादिमत्त्वादन्वयव्यतिरेकरूपवाग्विज्ञानवृत्तिहेतुत्वादित्येवमादिभिः हेतुभिः कथञ्चिद् व्यतिरेकः सिद्ध्यतीति तदपेक्ष इनः प्रादुर्भावः सिद्धः।

**तेनैव व्यपदेशाच्च॥६॥** अनन्यत्वेऽपि लोके व्यपदेशो दृष्टः 'आत्मवान् आत्मा, सारवान् वृक्षः' इति। न ह्यात्मनोऽन्य आत्मास्ति, नापि वृक्षादन्यः सारः, तथापि व्यपदेशो दृश्यते। एवमिहानन्यत्वेऽपि व्यपदेशो वेदितव्यः।

**पुद्गला इति बहुवचनं भेदप्रतिपादनार्थम्॥६॥** पुद्गला इति बहुवचनं क्रियते। किं प्रयोजनम्? भेदप्रतिपादनार्थम्। भिन्ना हि पुद्गलाः परमाणुभेदात् स्कन्धभेदाच्च। तद्विकल्पा उपरिष्टाद्वक्ष्यन्ते।

अत्राह - किं पुद्गलवद्धर्मादीन्यपि द्रव्याणि प्रत्येकं भिन्नानीति? अत्रोच्यते –

## आ आकाशादेकद्रव्याणि॥६॥

**अभिविधावाङ्प्रयोगः॥१॥** अभिविधिरभिव्याप्तिः, तस्मिन्नर्थे अयमाङ् प्रयुज्यते तेनाऽऽकाशस्याप्येकद्रव्यत्वं संकीर्तितं भवति। यदि हि मर्यादायां गृह्यते आकाशस्यान्तर्भावो न स्यात्। सौत्रीमानुपूर्वीमाश्रित्येदमुक्तं तेन धर्माधर्माकाशानि गृह्यन्ते।

**एकशब्दः संख्यावचनः॥२॥** अन्याऽसहायाद्यनेकार्थसंभवेऽप्ययमेकशब्दः संख्यावचनो द्रष्टव्यः।

**तत्संबन्धाद् द्रव्यशब्दस्यैकवचनप्रसङ्ग इति चेन्न; धर्माद्यपेक्षया बहुत्वसिद्धेः॥३॥** स्यान्मतम् – यद्ययमेकशब्दः संख्यावचनः तेन सामानाधिकरण्याद् द्रव्यशब्दस्याप्येकवचनमेव प्राप्नोतीति; तन्न; किं कारणम्? धर्माद्यपेक्षया बहुत्वसिद्धेः। धर्मादीनि बहूनि द्रव्याणि तदपेक्षया बहुवचनं युज्यते, एकस्यानेकार्थप्रत्यायनशक्तियोगात्।

**एकैकमित्यस्तु लघुत्वात्॥४॥** अत्र कश्चिदाह – 'आ आकाशादेकैकम्' इत्येव तावदस्तु सूत्रं कुतः? लघुत्वात्। कथं द्रव्यगति?

**प्रसिद्धत्वाद् द्रव्यगतिः॥५॥** धर्मादीनि षड्द्रव्याणीति प्रसिद्धमतो द्रव्यगतिर्भवति, तस्मादनर्थकं द्रव्यग्रहणमिति।

**न वा द्रव्यापेक्षयैकत्वख्यापनार्थत्वात् ॥६॥** न वानर्थकम्। किं कारणम्? द्रव्यापेक्षयैकत्वख्यापनार्थत्वात्। एकैकमित्युक्ते न ज्ञायते किं द्रव्यतः क्षेत्रतःकालतो भावत इति? अतोऽसन्देहार्थं द्रव्यग्रहणं क्रियते। तेनाऽयमर्थो गृह्यते – गतिस्थितिपरिणामिविविधजीवपुद्गलद्रव्यानेकपरिणामनिमित्तत्वेन सत्यपि भाववतो बहुत्वे, सति च प्रदेशभेदादसंख्येयक्षेत्रत्वे धर्मद्रव्यमधर्मद्रव्यं च द्रव्यत एकैकमेव। अवगाह्यनेकद्रव्यविविधावगाहननिमित्तत्वेनानन्तभावत्वेऽपि प्रदेशभेदात् सति चानन्तक्षेत्रत्वे द्रव्यत एकमेवाकाशमिति न जीवपुद्गलवदेषां बहुत्वम् नापि धर्मादिवत् जीवपुद्गलानामेकद्रव्यत्वम्। यदि हि स्यात् दृष्टस्य क्रियाकारकभेदस्येष्टस्य च संसारमोक्षक्रियाविस्तरस्य विरोधः स्यात्।

आह कालद्रव्यं किमेकमनेकमिति? उत्तरत्राऽस्य निर्णयो वक्ष्यते।

अधिकृतानामेवैकद्रव्याणां विशेषप्रतिपत्त्यर्थमिदमुच्यते –

## निष्क्रियाणि च ॥७॥

**उभयनिमित्तापेक्षः पर्यायविशेषो द्रव्यस्य देशान्तरप्राप्तिहेतुः क्रिया॥१॥** अभ्यन्तरं क्रियापरिणामशक्तियुक्तं द्रव्यं बाह्यं च नोदनाभिघाताद्यपेक्ष्योत्पद्यमानः पर्यायविशेषः द्रव्यस्य देशान्तरप्राप्तिहेतुक्रियेत्युपदिश्यते। उभयनिमित्त इति विशेषणं द्रव्यस्वभाव-निवृत्त्यर्थम्। यदि हि द्रव्यस्वभावः स्यात् क्रियापरिणामिनो द्रव्यस्याऽनुपरतक्रियत्वप्रसङ्गः। द्रव्यस्य पर्यायविशेष इति विशेषणमर्थान्तरभावनिवृत्त्यर्थम्। यदि हि क्रिया द्रव्यादर्थान्तरभूता स्यात् द्रव्यस्य निश्चलत्वप्रसङ्गः। देशान्तरप्राप्तिहेतुरिति विशेषणं ज्ञानादिरूपादिनिवृत्त्यर्थम्।

**तस्याः प्रादिवृत्त्याऽन्यपदार्थगतिः॥२॥** तस्याः क्रियायाः प्रादिवृत्त्याऽन्यपदार्थगतिर्भवति – निष्क्रान्तानि क्रियायाः निष्क्रयाणीति।

नि:क्रियत्वादुत्पादाभाव इति चेन्न, अन्यथोपपत्ते:॥३॥ स्यादेतद्धर्मादीनि द्रव्याणि यदि निष्क्रियाणि ततस्तेषामुत्पादो न भवेत्। क्रियापूर्वको हि घटादीनामुत्पादो दृष्टः उत्पादाभावाच्च व्ययाभाव इति सर्वद्रव्याणामुत्पादादित्रितयरूपकल्पनाव्याघात इति; तन्न; किं कारणम्? अन्यथोपपत्तेः। क्रियानिमित्तोत्पादाभावेऽप्येषां धर्मादीनामन्यथोत्पादः कल्प्यते। तद्यथा, द्विविध उत्पादः – स्वनिमित्तः, परप्रत्ययश्च। स्वनिमित्तस्ता-वदनन्तानामगुरुलघुगुणानामागमप्रामाण्यादभ्युपगम्यमानानां षट्स्थानपतितया वृद्ध्या हान्या च वर्तममानानां स्वभावादेषामुत्पादो व्ययश्च। परप्रत्ययोऽप्यश्वादेर्गतिस्थित्य-वगाहनहेतुत्वात्, क्षणे क्षणे तेषां भेदात् तद्धेतुत्वमपि भिन्नमिति परप्रत्ययापेक्ष उत्पादो विनाशश्च व्यवह्रियते।

**निष्क्रियत्वात् गतिस्थित्यवगाहनक्रियाहेतुत्वाभाव इति चेन्न; बलाधानमात्रत्वादिन्द्रियवत् ॥४॥** स्यादेतत् – यद्येतानि निष्क्रियाणि गतिस्थित्यवगाहनक्रियाहेतुत्वमेषां नोपपद्यते। क्रियावन्ति हि जलादीनि मत्स्यादीनां गत्यादिनिमित्तानि दृष्टानीति; तन्न; किं कारणम्? बलाधानमात्रत्वादिन्द्रियवत्। यथा दिदृक्षोश्चक्षुरिन्द्रियं रूपोपलब्धौ बलाधानमात्रमिष्टं न तु चक्षुषः तत्सामर्थ्यमिन्द्रियान्तरोपयुक्तस्य तदभावात्। यथा वाऽऽयुःसंक्षयादात्मनि शरीरान्निष्क्रान्ते सदपीन्द्रियम् रूपाद्युपलब्धौ समर्थं न भवति, ततो ज्ञायते आत्मन एवैतत्सामर्थ्यमिन्द्रियाणां तु बलाधानमात्रत्वमिति, तथा स्वयमेव गतिस्थित्यवगाहनपर्यायपरिणामिनां जीवपुद्गलानां धर्माधर्माकाशद्रव्याणि गत्यादिनिर्वृत्तौ बलाधानमात्रत्वेन विवक्षितानि न तु स्वयं क्रियापरिणामीनि। कुतः पुनरेतदेवमिति चेत्? उच्यते –

**द्रव्यसामर्थ्यात् ॥५॥** यथाऽऽकाशमगच्छत् सर्वद्रव्यैः संबद्धम् न चास्य सामर्थ्यमन्यस्यास्ति। तथा च निष्क्रियत्वेऽप्येषां गत्यादिक्रियानिर्वृत्तिं प्रति बलाधानमात्रत्वमसाधारणमवसेयम्।

**चशब्दोऽभिहितसंबन्धार्थः॥६॥** चशब्दः क्रियतेऽभिहितानामेकद्रव्याणां संबन्धार्थः अतो धर्माऽधर्माकाशानां निष्क्रियत्वनियमाज्जीवपुद्गलानां स्वतः परतश्च क्रियापरिणामित्वं सिद्धम्।

अत्र कश्चिदाह – आत्मा सर्वतगत्वान्निष्क्रियः क्रियाहेतुगुणसमवायात् परत्र क्रियाहेतुरिति; तत्प्रतिविधानार्थमाह –

**द्रव्यस्य क्रियापरिणामिनोऽर्थान्तरे तत्परिणामसामर्थ्यं वायुवत् ॥७॥** यथा वायुः स्वयं क्रियापरिणतत्वाद्ववनस्पतौ क्रियानिमित्तं तथाऽऽत्मनः क्रियापर्यायस्वभावस्य वीर्यान्तरायज्ञानावरणक्षयक्षयोपशमाङ्गोपाङ्गनामलाभावष्टम्भे सति विहायोगतिनामोदया-पादितशक्तिविशेषे च सति व्रज्यामनुतिष्ठतो हस्तादिषु क्रियोत्पत्तिर्युक्ता, न तु निष्क्रियस्यात्मनः परत्र क्रियाहेतुत्वं युक्तम्। तत्र यदुक्तम् "आत्मसंयोगप्रयत्नाभ्यां हस्ते कर्म" इत्येतदपाकीर्णम्। कथमिति चेत्? उच्यते –

**अतत्परिणामस्य तदभावो व्योमवत् ॥८॥** यथा व्योम्नो निष्क्रियस्य घटादिषु सत्यपि संयोगे न क्रियाहेतुत्वम्, तथाऽऽत्मनो निष्क्रियस्य सत्यपि संयोगे हस्तादिषु न क्रियाहेतुत्वं युक्तम्। किञ्च

**उभयोः निष्क्रियत्वात् ॥९॥** यथोभयोर्जात्यन्धयोः सम्बन्धे न दर्शनशक्ति-प्रादुर्भावोऽस्ति तथाऽऽत्मसंयोगप्रयत्नयोः निष्क्रयत्वात् क्रियाहेतुत्वमयुक्तम्। कथं निःक्रियत्वमिति चेत्? उच्यते -"दिक्कालावाकाशं च क्रियावद्भ्यो वैधर्म्यान्निष्क्रियाणि। एतेन कर्माणि गुणाश्च व्याख्याताः" निष्क्रिया इति वचनात्।

**संयोगप्रयत्नयोः गुणत्वातन्निष्क्रियत्वमग्निसंयोगवदिति चेन्न; अस्मदिष्ट-सिद्धेः॥१०॥** स्यान्मतम् – यथाऽग्निसंयोगः औष्ण्यापेक्षः परत्र घटादौ पाकजान् रूपादीनारभते नात्माधारेऽग्नौ तथाऽऽत्मसंयोगप्रयत्नयोरदृष्टापेक्षयोः हस्तादौ क्रियाहेतुत्वं

युक्तं नात्मनीति; तन्न; किं कारणम्? अस्मदिष्टसिद्धेः। यथाऽग्निसंयोगो रूपादिमद्द्रव्यगुणः परत्र घटादौ रूपादिमति रूपाद्यन्तरोत्पत्तिहेतुर्भवति, तथाऽऽत्मसंयोगप्रयत्नावपि परत्र हस्तादौ क्रियामारभमाणौ क्रियावद्द्रव्यगुणाविति क्रियावत्त्वमात्मनोऽस्मदिष्टं सिद्धम्।

**तत्सामर्थ्याभावाच्च॥११॥** य उक्तोऽग्निसंयोगो दृष्टान्तः न तस्य तत्सामर्थ्यमस्ति। कुतः? अनुष्णाशीतस्याऽप्रेरकस्यानुपघातिनोऽप्राप्तस्य संयोगस्य रूपाद्युच्छेदोत्पत्त्योर्हेतुत्वासंभवात्। तस्माद्असावसिद्धो दृष्टान्तो दार्ष्टान्तिकार्थसिद्धये नालम्।

**गुरुत्ववदिति चेन्न; तुल्यत्वात्॥१२॥** स्यादेतत् – यथा निष्क्रियं गुरुत्वं लोष्टे वर्तमानं तृणादौ क्रियाया हेतुः तथाऽऽत्मसंयोगप्रयत्नौ निष्क्रियावपि सन्तौ हस्तादौ क्रियाहेत्विति; तन्न; किं कारणम्? तुल्यत्वात्। अग्निसंयोगेन तुल्यमेतत्। यथा क्रियापरिणामिनो लोष्टस्य गुणो गुरुत्वं परत्र क्रियाहेतुः तथाऽऽत्मसंयोगप्रयत्नावपि क्रियापरिणामिद्रव्यगुणाविति क्रियावत्त्वमात्मनः सिद्धम्। किञ्च निष्क्रियस्य गुरुत्वस्याऽस्पर्शकस्याऽप्रेरकस्यानुपघातिनोऽन्यत्र क्रियाहेतुत्वं नोपपद्यते इति दृष्टान्तोऽसिद्धः।

**द्रव्यमेव तथापरिणतं क्रियाहेतुरिति धर्मास्तिकायवदिति चेन्न; वैषम्यात्॥१३॥** स्यान्मतम् – यथा धर्मास्तिकायो निष्क्रियः जीवपुद्गलानां गतिहेतुः तथाऽऽत्मसंयोगादिः निष्क्रियोऽपि परत्र क्रियाहेतुरिति; तन्न; किं कारणम्? वैषम्यात्। युज्यते धर्मास्तिकायस्य जीवपुद्गलगतिं प्रत्यप्रेरकत्वम्, निष्क्रियस्यापि बलाधानमात्रत्वदर्शना-दात्मगुणस्त्वपरत्र क्रियारम्भे प्रेरको हेतुरिष्यते तद्वादिभिः। न च निष्क्रियो द्रव्यगुणः प्रेरको भवितुमर्हतीति वैषम्यम्। किञ्च धर्मास्तिकायाख्यं द्रव्यमाश्रयकारणं भवतु, न तु निष्क्रियात्मद्रव्यगुणस्य ततो

व्यतिरेकेणाऽनुपलभ्यमानस्य क्रियाया आश्रयकारणत्वं युक्तम्। अर्थान्तरभावे चासत्त्वमिति वैषम्यम्। किञ्च,

**शरीरे क्रियाभावो जीवस्य निष्क्रियत्वादाकाशप्रदेशवत्॥१४॥** यथाऽऽकाशप्रदेशो निष्क्रियः शरीरे क्रियारम्भहेतुर्न भवति तथाऽऽत्मा तद्गुणश्च निष्क्रियत्वात् क्रियाहेतुर्न भवेत्। किञ्चैकान्तेनाऽमूर्तस्य निष्क्रियस्य शरीरेण सह सम्बन्धाभावात् परस्परोपकारो नोपपद्यते आकाशवदेव।

**शरीरवियोगे निष्क्रियत्वप्रसङ्ग इति चेन्न; अभ्युपगमात्॥१५॥** स्यान्मतम् – यस्य कार्मणशरीरसम्बन्धे सति तत्प्रणालिकापादिता क्रियाऽऽत्मनोऽभिप्रेता तस्याष्टविधकर्मसंक्षये शरीरवियोगादशरीरस्यात्मनो निष्क्रियत्वं प्रसक्तमिति; तन्न; किं कारणम्? अभ्युपगमात्, कारणाभावात् कार्याभाव इति। कर्मनोकर्मनिमित्ता या क्रिया सा तदभावे नास्तीति निष्क्रियत्वं मुक्तस्याभ्युपगम्यतेऽस्माभिः। अथवा, परनिमित्त-क्रियानिवृत्तावपि स्वाभाविकी मुक्तस्योर्ध्वगतिरभ्युपगम्यते प्रदीपवत्। अथवा, स्याच्छरीरवियोगे मुक्तस्य निष्क्रियत्वं यद्यनन्तवीर्यज्ञानदर्शनाचिन्त्यसुखानुभवनादयः क्रिया नाऽभ्युपगम्येरन्। अभ्युपगम्यन्ते तु, तस्मादयमदोषः शरीरवियोगादात्मनो निष्क्रियत्वप्रसङ्ग इति।

**वक्ष्यमाणत्वाच्च पूर्वप्रयोगादिभिः॥१६॥** वक्ष्यते चोत्तरत्र मुक्तानां क्रिया। कथम्? पूर्वप्रयोगादिभिः।

**पुद्गलानामपि द्विविधा क्रिया विस्रसा प्रयोगनिमित्ता च॥१७॥** पुद्गलानां द्विविधा क्रिया वक्ष्यते। सा द्वितयी भवति विस्रसा प्रयोगनिमित्ता चेति।

**साऽनन्या स्वात्मविशेषभावात्॥१८॥** सा क्रिया तद्धेतोरनन्या वेदितव्या। कुतः? स्वात्मविशेषभावात्। यथाऽग्नेर्नान्यदौष्ण्यं स्वात्मविशेषभावात्। यद्यन्यत् स्यात्

अग्नेरभावप्रसङ्गः स्यादलक्षणत्वात्। तथा क्रियापि क्रियावतो नान्या स्वात्मविशेष भावात्। यद्यन्या स्यात् द्रव्यस्यास्पन्दत्वं स्यात् क्रियायाश्चाऽभाव; तस्मादनन्या क्रिया।

**अर्थान्तरत्वेऽपि योगात् व्यपदेशो दण्डदण्डिवदिति चेन्न; स्वतोऽसिद्धत्वात्॥१९॥** अर्थान्तरत्वेऽपि क्रियायाः तद्योगाद् द्रव्यस्य क्रियावद्व्यपदेशः दण्डदण्डिवदिति च यदि मतम्, तदपि नोपपद्यते; कुतः? स्वतोऽसिद्धत्वात्। युज्यते स्वतःसिद्धेन दण्डेन योगात् देवदत्तस्य दण्डिव्यपदेशः, न च तथा क्रिया स्वतःसिद्धा व्यतिरेकेणानुपलब्धेः। तस्मात्तद्वद्व्यपदेशो न युक्तः।

**समवायादिति चेन्न; अविशेषप्रसङ्गात्॥२०॥** स्यान्मतम्, सत्यमेतन्न दण्डदण्डिवद्योगः, स्वतःसिद्ध्यभावात्। कथं तर्हि? समवायो नामाऽयुतसिद्धिलक्षणः संबन्धोऽस्ति, तेनैकत्वमिव नीतस्य द्रव्यस्य क्रियावद्व्यपदेशो भवतीति; तन्न; किं कारणम्? अविशेषप्रसङ्गात्। अयुतसिद्धिलक्षणश्चेत् संबन्धः क्रियाक्रियावतोरविशिष्टः यद्द्रव्यं सैव क्रिया, या च क्रिया, तदेव द्रव्यमित्यविशेषः प्राप्नोति, यथा च सति पदार्थान्तरकल्पनाव्याघातः। पदार्थान्तरत्वं चेदभ्युपगम्यते; न नामाऽयुतसिद्धिलक्षणः संबन्धः।

**अनन्यत्वे द्वयोरैकात्म्यमिति चेन्न; कथञ्चिद्व्यतिरेकसिद्धेः॥२१॥** स्यादेतत्, यदि क्रियाक्रियावतोरनन्यत्वमभ्युपगम्यते तयोरैकात्म्यं प्रसज्येत। दृष्टा च नानात्मता द्रव्यमवस्थितं क्रिया क्षणिकात्मिका, द्रव्यमकारणं क्रिया कारणवतीति। यद्यैकात्म्यं स्यात् द्रव्यस्यावस्थानवद्कारणवच्च क्रियाया अप्यवस्थानमकारणत्वं च स्यात्, विपर्ययो वेति; तन्न; किं कारणम्? कथंञ्चिद् व्यतिरेकसिद्धेः। अत एवाऽस्माभिः कथञ्चिदन्यत्वमवसीयते एकात्म्यं मा विज्ञायीति।

**क्रियावत्त्वे सत्यनित्यत्वमिति चेन्न; व्यभिचारात् ॥२२॥** स्यादेतत्, यदि क्रियावत्त्वमभ्युपगम्यते जीवस्यानित्यत्वं प्राप्नोति। दृष्टा हि क्रियावतां प्रदीपादीनामनित्यतेति; तन्न; किं कारणम्? व्यभिचारात्। महदहङ्कारादीनां परमाण्वादीनां च क्रियावतामपि नित्यत्वदर्शनात् व्यभिचारी हेतुः।

अथ सर्वानित्यत्ववादी आत्मनित्यत्वे हेतुं ब्रूयादसिद्धो हेतुः "सर्वे प्रत्ययजाश्चैव सर्वे चैव निरीहकाः" इति क्रियावत्त्वनिह्नवात्। किञ्च

**अभ्युपगमात् ॥२३॥** अभ्युपगम्यतेऽस्माभिः क्रियावतां जीवादीनां पर्यायार्थिकनयादेशादनित्यत्वं ततो न बाधाकरोऽयं हेतुः।

**असिद्धेश्च॥२४॥** नेदं क्रियावत्त्वमस्मान् प्रति सिद्धं द्रव्यार्थिकनयादेशात् निष्क्रियत्वोपपत्तेः। एतेन प्रदीपादिदृष्टान्तासिद्धिश्च योज्या। किञ्च,

**अनुत्पादाव्ययोत्पादव्ययदर्शनात् ॥२५॥** पर्यायार्थिकगुणभावे द्रव्यार्थिकप्राधान्यात् सर्वे भावा अनुत्पादाव्ययदर्शनान्निष्क्रिया नित्याश्च। द्रव्यार्थिकगुणभावे पर्यायार्थिकप्राधान्यात् सर्वे भावा उत्पादव्ययदर्शनात् सक्रिया अनित्याश्चेति

**अनेकान्तोपपत्तेः॥२५॥** एकान्तवादिविहिता दोषा नानेकान्तवादेऽवकाशं लभन्ते।

अजीवकाया इत्यत्र कायग्रहणे प्रदेशास्तित्वमात्रत्वं निर्ज्ञातं न त्वियत्ताऽवधारिता प्रदेशानामतस्तन्निर्धारणार्थमिदमुच्यते –

## असंख्येयाः प्रदेशा धर्माऽधर्मैकजीवानाम् ॥८॥

**संख्याविशेषातीतत्वादसंख्येयाः॥१॥** संख्यानं संख्या गणनेत्यर्थः। स्वलक्षणेन परस्परतो विशेष्यत इति विशेषः। संख्यायाः संख्यैव वा विशेषः संख्याविशेषः तमतिक्रान्ता ये तेऽसंख्येयाः। न केनचित् संख्यातुं शक्यन्त इति यावत्।

**तदनुपलब्धेरसर्वज्ञत्वप्रसङ्ग इति चेन्न; तेनात्मनाऽवसितत्वात् ॥२॥** स्यान्मतम्, यदि ते न केनचिदपि संख्यातुं शक्यन्ते, प्राप्तं तर्हि तदनुपलब्धेरसर्वज्ञत्वमिति; तन्न; किं कारणम्? तेनात्मनाऽवसितत्वात्। यथाऽनन्तमनन्तात्मनोपलभमानस्य न सर्वज्ञत्वं हीयते तथाऽसंख्येयमसंख्येयात्मनाऽवबुध्यमानस्य नास्ति सर्वज्ञत्वहानिः। न ह्यन्यथाऽवस्थितमर्थमन्यथा वेत्ति सर्वज्ञो यथार्थज्ञत्वात्। अर्थस्य चाधिगमे त्रिविधं मानं व्याख्यातं संख्येयमसंख्येयमनन्तमिति। तत्रेहाऽजघन्योत्कृष्टासंख्येयं परिगृह्यते।

**प्रदिश्यन्त इति प्रदेशाः॥३॥** प्रदिश्यन्ते प्रतिपाद्यन्त इति प्रदेशाः। कथं प्रदिश्यन्ते?

**परमाण्ववस्थानपरिच्छेदात् ॥४॥** वक्ष्यमाणलक्षणो द्रव्यपरमाणुः। स यावति क्षेत्रेऽवतिष्ठते स प्रदेश व्यवह्रियते। ते धर्माधर्मैकजीवाः तुल्याऽसंख्येयप्रदेशाः। तत्र धर्माधर्मौ निष्क्रियौ व्याप्य स्थितौ। जीवः तावत्प्रदेशोऽपि संहरणविसर्पणस्वभावत्वात् कर्मनिर्वर्तितं शरीरमणुमहद्वाऽधितिष्ठंस्तावदवगाह्य वर्तते। यदा तु लोकपूरणं भवति तदा मन्दरस्याधश्चित्रवज्रपटलयोर्मध्ये जीवस्याष्टौ मध्यप्रदेशाः व्यवतिष्ठन्ते, इतरे प्रदेशाः ऊर्ध्वमधस्तिर्यक् च कृत्स्नं लोकाकाशं व्यश्नुवते।

**एकद्रव्यस्य प्रदेशकल्पनोपचार इति चेन्न; मुख्यक्षेत्रविभागात् ॥५॥** स्यान्मतम् – एकद्रव्यस्य प्रदेशकल्पनोपचारतः स्यात्। उपचारश्च मिथ्योक्तिर्न तत्त्वपरीक्षाया-मधिक्रियते प्रयोजनाभावात्। न हि मृगतृष्णिकया स्नानार्थात्मिकया जलकृत्यं क्रियते इति; तन्न; किं कारणम्? मुख्यक्षेत्रविभागात्? मुख्य एव क्षेत्रविभागः, अन्यो हि

घटावगाह्यः आकाशप्रदेशः इतरावगाह्यश्चान्य इति। यद्यन्यत्वं न स्यात्; व्याप्तित्वं व्याहन्यते।

**निरवयवत्वानुपपत्तिरिति चेन्न; द्रव्यविभागाभावात् ॥६॥** स्यादेतत्, यदि मुख्य एव विभागोऽभ्युपगम्यते निरवयवत्वं तर्हि नोपपद्यते इति तन्न; किं कारणम्? द्रव्यविभागाभावात्। यथा घटो द्रव्यतो विभागवान् सावयवः न च तथैषां द्रव्यविभागोऽस्तीति निरवयवत्वं प्रयुज्यते।

**भेद्यत्वादात्मनामेकग्रहणम् ॥७॥** भेद्या आत्मानो बहव इत्यर्थः, तेनैकग्रहणं क्रियते, नानाजीवापेक्षया ह्यनन्तप्रदेशत्वं स्यात्।

**कथञ्चित्प्रदेशभेदोपपत्तेः संबन्धनिर्देशः॥८॥** एकश्चासौ जीवश्चैकजीवः, धर्मश्चाऽ-धर्मश्चैकजीवश्च धर्माधर्मैकजीवाः तेषां धर्माधर्मैकजीवानाम्। प्रदेशा इति संबन्धनिर्देशः क्रियते। कुतः? कथञ्चित्प्रदेशभेदोपपत्तेः।

**असंख्येयप्रदेशा इत्यस्तु लघुत्वादिति चेन्न; उत्तरार्थत्वात् भेदकरणस्य॥९॥** स्यान्मतम् – 'असंख्येयप्रदेशाः धर्माधर्मैकजीवाः' इत्यस्तु सूत्रम्, कुतः? लघुत्वादिति; तन्न; किं कारणम्? उत्तरार्थत्वात् भेदकरणस्य। प्रदेशा इति भेदकरणमुत्तरार्थम्। द्रव्यप्रधाने हि निर्देशे सति प्रदेशानामुपसर्जनत्वादुत्तरत्राभिसंबन्धो न स्यात्। ततः प्रतिसूत्रं प्रदेशग्रहणे क्रियमाणे गौरवं स्यात्। कश्चिदाह–

**प्रदेशकल्पना निरवयवत्वादौपचारिकी सिंहवत् ॥१०॥** धर्मादीनां या प्रदेशकल्पना सौपचारिकी। कुतः? निरवयवत्वात्। कथम्? सिंहवत्। यथा विशिष्टपञ्चेन्द्रिय तिर्यङ्नामकर्मोदयापादिताविशेषे कौर्यशौर्यादिगुणप्रकर्षाधिष्ठाने खरनखोग्रदंष्ट्राभासुरकेसरक-पिलनयनतारकाद्यवयवविशिष्टे केसरिणि

सिंहशब्दोऽध्यवसितः माणवकेऽतद्नुणे भक्त्याऽ-ध्यारोप्यते, तथा पुद्गलेषु मुख्यः प्रदेशशब्दो धर्मादिषु भक्त्योपचर्यते इति।

**न वा प्रत्ययाभेदात् ॥११॥** न वौपचारिकी। कुतः? प्रत्ययाभेदात्। इह मुख्य प्रत्ययात् सिंहविशेषद्ध्यवसानरूपात् माणवके सिंह इति गौणप्रत्ययोऽध्यारोपरूपो भिन्न उपलभ्यते, न च तथा पुद्गलेषु धर्मादिषु च प्रदेशप्रत्ययो भिन्नोऽस्ति उभयत्रावगाह-भेदतुल्यत्वात्। इतश्च

**उभयत्र सोपपदत्वात् ॥१२॥** सिंहत्वात् सिंहशब्दो निरुपपदो मुख्यं गमयति सोपपदो गौणम्- 'सिंहो माणवक' इति, न तथा प्रदेशशब्दे विशेषोऽस्ति पुद्गलेषु धर्मादिषु च सोपपदत्वात् - 'घटस्य प्रदेशाः धर्मादीनां प्रदेशाः' इति। ततो नास्त्यत्र विशेषः। इतश्च।

**हेत्वपेक्षाभावात् ॥१३॥** सिंहे प्रसिद्धः क्रौर्यादिधर्मः तदेकदेशसादृश्यं माणवके गौणव्यवहारस्य हेतुरस्ति, न तथा पुद्गलेषु प्रसिद्धं हेतुमवेक्ष्य धर्मादिषु प्रदेशोपचारः क्रियते तेषामपि स्वाधीनप्रदेशत्वात्। तस्मादुपचारकल्पना न युक्ता।

**स्वतोऽवधारणाभावात् नाञ्जसा इति चेन्न; अत्यन्तपरोक्षत्वात् ॥१४॥** स्यान्मतम्; यदि घटादिवत् धर्मादीनामञ्जसाः प्रदेशा भवेयुर्ननु घटादिवदेव स्वतः प्रदिश्येरन्। घटादीनां हि प्रदेशा ग्रीवादय आञ्जसाः स्वत एव प्रदिश्यन्ते न द्रव्यान्तरतः, न त्वेवं धर्मादीनां प्रदेशाः स्वतः प्रदिश्यन्ते परमाण्ववगाहपरिच्छेद्यत्वा– दतो न मुख्या इति; तन्न; किं कारणम्? अत्यन्तपरोक्षत्वात्। युज्यते घटादीनां प्रत्यक्षत्वात् स्वत एव प्रदेशावधारणम्। अत्यन्तपरोक्षास्तु धर्मादय; तत एषां मुख्या अपि प्रदेशा न शक्याः स्वात्मन्येवावधारयितुं न गौणप्रदेशत्वात्।

**अर्हदागमप्रामाण्यात् ॥५॥** युगपत् सकलपदार्थत्वावभासनज्ञानातिशयेनार्हताऽऽ-विष्कृत आगमो गणधरैरनुस्मृतवचनरचनः श्रुताख्यः तच्छिष्यप्रशिष्यप्रज्ञावीचिपरम्परा-समुपनीतोऽस्ति। तस्य प्रामाण्याद्धर्मादीनां क्षेत्रप्रदेशाः मुख्याः इत्येतदभ्युपगन्तव्यम् । तद्यथा, एकैकस्मिन्नात्मप्रदेशेऽनन्तानन्ता ज्ञानावरणादिकर्मप्रदेशा अवतिष्ठन्ते। एकैक-स्मिन् कर्मप्रदेशेऽनन्तानन्ता औदारिकादिशरीरप्रदेशाः, एकैकस्मिन् शरीरप्रदेशे अनन्ताऽ-नन्ता वैस्रसोपचयप्रदेशाः क्लिन्नगुडरेण्वाद्युपचयवदवतिष्ठन्ते तथा धर्मादिप्रदेशेष्वपि। किञ्च,

**स्थितास्थितवचनात् ॥६॥** भावान्तरपरिणामे सुखदुःखानुभवने क्रोधादिपरिणामे वा जीवप्रदेशानामुद्भवनिधनपरिस्पन्दस्याप्रवृत्तिः स्थितिः; प्रवृत्तिरस्थितिरित्युच्यते। तत्र "सर्वकालं जीवाष्टमध्यमप्रदेशा निरपवादाः सर्वजीवानां स्थिता एव, केवलिनामप्ययोगिनां सिद्धानां च सर्वे प्रदेशा स्थिता एव। व्यायामदुःखपरितापोद्रेकपरिणतानां जीवानां यथोक्ताष्टमध्यप्रदेशवर्जितानामितरे प्रदेशास्थिता एव, शेषाणां प्राणिनां स्थिताश्चाऽ-स्थिताश्च" इति वचनान्मुख्या एव प्रदेशाः। किञ्च,

**इन्द्रियपरिणामवचनात् ॥७॥** इह वीर्यान्तरायमतिश्रुतज्ञानावरणक्षयोपशमाङ्गो-पाङ्गनामलाभोपष्टम्भादुत्सेधाङ्गुलस्यासंख्येयभागप्रमितानां विशुद्धानामात्मप्रदेशानां चक्षुरादीन्द्रियपर्यायपरिणाम उक्तः प्रतिविशिष्टप्रदेशत्वात् परस्परस्थानासंक्रमेण साक्षाच्च दृश्यते तस्मान्मुख्या एवाऽऽत्मप्रदेशाः। किञ्च,

**द्रव्याणां प्रतिनियतप्रदेशावस्थानात् ॥८॥** इहान्येष्वाकाशप्रदेशेषु पाटलिपुत्रं स्थितमन्येषु च मथुरा, अतो नानाऽऽकाशप्रदेशाः। यस्यैकान्तेनाप्रदेशमाकाशं तस्य यद्देशं पाटलिपुत्रं तद्देशभाविन्येव मथुरापि स्यात् । किञ्च

**उभयदोषप्रसङ्गात् ॥१९॥** संसरतोऽप्यस्य पिण्डस्य कर्णशष्कुल्यन्तरेऽदृष्टविशेष-संस्कृतमाकाशं श्रोत्रमिति यदाख्यायते; तत्कृत्स्नं वाऽऽकाशं स्यात्, न वा? यदि कृत्स्नं; ननूर्ध्वाधस्तिर्यगवस्थितस्पर्शवदद्रव्याभिघातोत्पन्नाः सर्वे शब्दाः सदा सर्वैः जीवैरूपलभ्या इत्यासक्तम्। अथैषो भा प्रापदिति प्रतिनियताकाशप्रदेशाः श्रौत्रमितीष्यते। नन्वाकाशप्रदेशानां बहुत्वात् यत्प्रतिज्ञातम् - 'न सन्त्याकाशप्रदेशा मुख्याः' इति तद्धीनम्। अथवा, परमाणुराकाशेन कृत्स्नेन वा संयुज्येत, न वा ? यदि कृत्स्नेन; नन्वेवमणुमात्रमाकाशमाकाशमात्रो वाऽणुः प्राप्नोति। अथैकप्रदेशेन संयुज्यते; ननु निरपवादमेतत् सिद्धं मुख्या एवाऽऽकाशप्रदेशा इति। किञ्च,

**कर्माभावप्रसङ्गात् ॥२०॥** इहोत्पन्नं कर्म स्वाश्रयमाश्रयान्तराद्वियोज्य आश्रया-न्तरेण संयोजयतीत्येषः कर्मणः स्वभावः, सत्येवं प्रदेशवत्त्वमाकाशस्य सिद्धम्, इतरथा कर्माभावप्रसङ्गः प्रदेशान्तरसङ्क्रमाभावात्। किञ्च,

**एकानेकप्रदेशत्वं प्रत्यनेकान्तात् पुरुषवत् ॥२१॥** यथा पुंसः सामान्यपौरुषेयशरीर-द्रव्यार्थादेशात् स्यादेकत्वम्, तस्यैव शिरःपृष्ठोरूदरपाणिपादाङ्गुलिपर्वाद्यङ्गोपाङ्ग-पर्यायार्थादेशात् स्यादनेकत्वम्। अथवा, पुरुषद्रव्यार्थादेशात्स्यादेकत्वम्। स्वजात्य-परित्यागेन पावकलावकादिपर्यायार्थादेशात् स्यादनेकत्वम्, पितृपुत्रभ्रातृभागिनेयभ्रातृव्य-मातुलादिपर्यायार्थादेशात् वा स्यादनेकत्वम्, पञ्चेन्द्रियारोग्यमेधाविपटुदुःकुशल-सुशीलत्वादिपर्यायार्थादेशाद्वा स्यादनेकत्वम्, तथा धर्माधर्माकाशजीवानामात्मीयद्रव्यार्था-देशात् स्यादेकप्रदेशत्वं प्रतिनियतप्रदेशपर्यायार्थादेशात् स्यान्नानात्वमित्यनेकान्तः।

**संसारिणश्च व्यवहारतः सावयवत्वात् ॥२२॥** व्यवहाराद् व्यवहारतः व्यवहार-नयार्पणादित्यर्थः। कः पुनर्व्यवहारः? अनादिकर्मबन्धनबद्धत्वमतस्तदावेशात् तदनु-विधायित्वे सति सावयवत्वोपपत्तेः संसारिणो जीवस्य प्रदेशवत्त्वम्। शुद्धनयादेशात्तूपयोगस्वभावस्याऽऽत्मनोऽप्रदेशत्वम्।

अथाकाशस्य कति प्रदेशा इति? अत आह –

## आकाशस्यानन्ताः॥९॥

**अनन्ता इत्यन्यपदार्थनिर्देशः॥१॥** अन्तोऽवसानमित्यर्थः, अविद्यमानोऽन्तो येषां त इमेऽनन्ताः। अन्यपदार्थनिर्देशोऽयम्। के पुनस्ते? प्रदेशाः। कुतः? प्रत्यासत्तेस्तद-भिसंबन्धोपपत्तेः।

**असंख्येयानन्तयोरविशेष इति चेन्न; उक्तत्वात्॥२॥** स्यान्मतम् – असंख्येयानन्तयोर्नास्ति विशेषः। कुतः? इयत्तापरिच्छेदाभावतुल्यत्वादिति; तन्न; किं कारणम्? उक्तत्वात्। उक्तोऽनयोर्भेदः "नृस्थिती परावरे" इत्यत्र।

**अनन्तत्वादपरिज्ञानमिति चेन्न; अतिशयज्ञानदृष्टत्वात्॥३॥** स्यादेतत् – सर्वज्ञेनानन्तं परिच्छिन्नं वाऽपरिच्छिन्नं वा ? यदि परिच्छिन्नम्; उपलब्धावसानत्वा-दनन्तत्वमस्य हीयते। अथापरिच्छिन्नम्; तत्स्वरूपानवबोधादसर्वज्ञत्वं स्यादिति। तन्न; किं कारणम्? अतिशयज्ञानदृष्टत्वात्। यत्तत्केवलिनां ज्ञानं क्षायिक – मतिशयवदन-न्तानन्तपरिमाणं तेन तदनन्तमवबुध्यते साक्षात्। तदुपदेशादितरैरनुमानेनेति न सर्वज्ञत्वहानिः। न च तेन परिच्छन्नमित्यतः सान्तमनन्तेनाऽनन्तमिति ज्ञातत्वात्। किञ्च,

**सर्वेषामविप्रतिपत्तेः॥४॥** नात्र सर्वे प्रवादिनो विप्रतिपद्यन्ते। केचित्तावदाहुः "अनन्त लोकधातवः" इति। अपरे मन्यन्ते दिक्कालात्माकाशानां सर्वगतत्वादनन्तत्वमिति। इतरे ब्रुवते – प्रकृतिपुरुषयोरनन्तत्वं सर्वगतत्वादिति। न चैतेषामनन्तत्वादपरिज्ञानम्, नापि परिज्ञानत्वमात्रादेव तेषामन्तवत्त्वम्। तस्मात् नैतद्युक्तमनन्तत्वादपरिज्ञानमिति।

**सर्वज्ञाभावप्रसङ्गाच्च॥५॥** यस्यार्थानामानन्त्यमपरिज्ञानकारणं तस्य सर्वज्ञाभावः प्रसजति। अनन्तो हि ज्ञेयः, तस्यानन्त्यादेव न च कश्चित् परिच्छेत्ताऽस्तीति। अथान्तवत्त्वं स्यात्; संसारो मोक्षश्च नोपपद्यते। कथमिति चेत्? उच्यते – जीवाश्चेत्सान्ताः; सर्वेषां हि मोक्षप्राप्तौ संसारोच्छेदः प्राप्नोति। तद्भयान्मुक्तानां पुनरावृत्त्यभ्युपगमे स मोक्ष एव न स्यादनात्यन्तिकत्वात्। एकैकस्मिन्नपि जीवे कर्मादिभावेन व्यवस्थिताः पुद्गला अनन्ताः, तेषामन्तवत्त्वे सति कर्मनोकर्मविषय-विकल्पाभावात् संसाराभावः तदभावान्मोक्षश्च न स्यात्। तथातीतानागतकाल-योरन्तवत्त्वे प्राक् पश्चाच्च कालव्यवहाराभावः स्यात्। न चासौ युक्त; असतः प्रादुर्भावाभावात् सतश्चात्यन्तविनाशानुपपत्तेरिति। तथाऽऽकाशस्यान्तवत्त्वाभ्युपगमे ततो बहिर्घनत्वप्रसङ्गः। नास्ति चेद्घनत्वमाकाशेनापि भवितव्यमित्यन्तवत्त्वाभावः।

उक्तममूर्तानां प्रदेशपरिमाणमिदानीं मूर्तानां पुद्गलानां प्रदेशपरिमाणं निर्ज्ञातव्यमित्यत आह –

## संख्येयाऽसंख्येयाश्च पुद्गलानाम् ॥१०॥

**चशब्दोऽनन्तसमुच्चयार्थः॥१॥** अनन्ताः पुद्गलास्तेषां समुच्चयार्थश्चशब्दः क्रियते संख्येयासंख्येया अनन्ताश्चेति। के पुनस्ते? 'प्रदेशाः' इत्यनुवर्तते। कस्यचित्पुद्गलद्रव्यस्य द्व्यणुकादेः संख्येयाः प्रदेशाः कस्यचिदसंख्येया अनन्ताश्च।

**अनन्तानन्तोपसंख्यानमिति चेन्न; अनन्तसामान्यात्॥२॥** स्यादेतत् – अनन्तानन्तप्रदेशाश्च पुद्गलाः सन्ति तदुपसंग्रहार्थं तदुपसंख्यानं कर्तव्यमिति; तन्न; किं कारणम्? अनन्तसामान्यात्। अनन्तप्रमाणं त्रिविधमुक्तम् – परीतानान्तं युक्तानन्त-मनन्तानन्तं चेति। तत्सर्वमनन्तसामान्येऽन्तर्भावादनन्तग्रहणेन गृह्यत इति नोपसंख्यातव्यम्।

**अधिकरणविरोधादानन्त्याभाव इति चेन्न; सूक्ष्मपरिणामावगाहनसामर्थ्यात् ॥३॥** स्यान्मतम् – असंख्यातप्रदेशो लोकः, अनन्तप्रदेशस्यानन्तानन्तप्रदेशस्य च स्कन्धस्याधिकरणमिति विरोधः, ततो नानन्त्यमिति; तन्न; किं कारणम्? सूक्ष्मपरिणामावगाहनसामर्थ्यात्। परमाण्वादयो हि सूक्ष्मभावेन परिणता एकैकस्मिन्नप्याकाशप्रदेशेऽनन्तानन्ता अवतिष्ठन्ते। अवगाहनसमामर्थ्यमप्येषामव्याहत-मस्ति येनैकैकस्मिन्नपि प्रदेशेऽनन्ताऽनन्तानामवस्थानं न विरुध्यते। किञ्च,

**अनेकान्तात् ॥४॥** नायमेकान्तः – अल्पेऽधिकरणे महदद्रव्यं नावतिष्ठते इति। कुतः?

**प्रचयविशेषात् ॥५॥** प्रचयविशेषः संघातविशेषः इत्यर्थः। पुद्गलानां हि प्रचयविशषादल्पे क्षेत्रे बहूनामवस्थानं दृष्टम्। कथम्?

**संहृतविसर्पितचम्पकादिगन्धादिवत् ॥६॥** यथाऽल्पे कुड्मलावस्थे चम्पके सूक्ष्म-प्रचयपरिणामात् संहृताश्चम्पकपुष्पगन्धावयवाः तद्व्यापिनो बहवोऽवतिष्ठमाना दृष्टाः। तस्मिन्नेव विसर्पिते स्थूलप्रचयपरिणामाद्विनिर्गताश्चम्पकगन्धावयवाः सर्वदिग्व्यापिनो दृष्टाः। यथा विल्वे करीषपटले दारुपिण्डे च प्रचयविशेषावगाढाः सन्तः पुद्गला अग्निना दह्यमानाः प्रचयविशेषेण धूमभावेन दिङ्मण्डलव्यापिनो दृष्टाः, तथाऽल्पेऽपि लोकाकाशेऽ- नन्तानन्तानां च जीवपुद्गलानामवस्थानमिति नास्ति विरोधः।

पुद्गलानामित्यविशेषवचनात् परमाणोरपि प्रदेशवत्त्वप्रसङ्गे तत्प्रतिषेधार्थमाह–

## नाणोः॥११॥

अणोः प्रदेशाः न, सन्तीति वाक्यशेषः कुतो न सन्तीति चेत्? उच्यते –

**प्रदेशमात्रत्वात् ॥१॥** यथाऽऽकाशप्रदेशस्यैकस्य प्रदेशभेदाभावादप्रदेशवत्त्वम्, एवमणोरपि प्रदेशमात्रत्वात् प्रदेशभेदाभावः। किञ्च

**ततोऽल्पपरिमाणाभावात् ॥२॥** न हि अणोरल्पीयानस्ति यतोऽस्य प्रदेशाः भिद्येरन्। अतः स्वयमेवाद्यन्तपरिमाणत्वादप्रदेशोऽणुः। किञ्च

**अन्वर्थसंज्ञत्वात् ॥३॥** यथा प्रदीपनात् प्रदीप इत्यन्वर्थसंज्ञा तथाऽणुरितीयमप्यन्वर्थसंज्ञाऽणुत्वात् सूक्ष्मत्वादणुरिति। यदि ह्यणोरपि प्रदेशाः स्युः; अणुत्वमस्य न स्यात् प्रदेशप्रचयरूपत्वात् तत्प्रदेशानामेवाणुत्वं प्रसज्येत।

**अप्रदेशत्वादभावः खरविषाणवदिति चेन्न; उक्तत्वात् ॥४॥** स्यादेतत् – यथा खरविषाणमप्रदेशत्वान्नास्ति तथाणुरपि भवेदिति; तन्न; किं कारणम्? उक्तत्वात्। उक्तमेतत् – प्रदेशमात्रोऽणुः, न खरविषाणवदप्रदेश इति।

**आदिमध्यान्तव्यपदेशाभावादिति चेन्न; विज्ञानवत् ॥५॥** स्यान्मतम् – आदिमध्यान्तव्यपदेशः परमाणोः स्याद्वा, न वा? यद्यस्ति; प्रदेशवत्त्वं प्राप्नोति। अथ नास्ति; खरविषाणवदस्याभावः स्यादिति। तन्न; किं कारणम्? विज्ञानवत्। यथा विज्ञानमादिमध्यान्तव्यपदेशाभावेऽप्यस्ति तथाऽणुरपीति। उत्तरत्र च तस्यास्तित्वं वक्ष्यते।

एषामवधृतप्रदेशानां धर्मादीनामाधारप्रतिपत्त्यर्थमाह –

## लोकाकाशेऽवगाहः॥१२॥

**अनन्तरत्वात् पुद्गलानामवगाहप्रसङ्ग इति चेन्न, समुदायापेक्षत्वात् ॥१॥** स्यादेतदनन्तराः पुद्गलाः ततस्तेषामेव लोकाकाशेऽवगाहः इत्ययमर्थ आसक्त इति तन्न;

किं कारणम्? समुदायापेक्षत्वात्। धर्मादीनि द्रव्याणि समुदितान्यत्रापेक्ष्यन्ते तत्रानन्तरमिदमव्यवहितमिति विवेको नास्ति ततः सर्वद्रव्याणामाधारगतिः सिद्धा भवति।

**आकाशस्याप्याधारकल्पनेति चेन्न स्वप्रतिष्ठत्वात् ॥२॥** स्यान्मतं यथा धर्मादीनां लोकाकाशमाधारस्तथाऽऽकाशस्याप्यन्येनाधारेण भवितव्यमिति तन्न। किं कारणम्? स्वप्रतिष्ठत्वात्। स्वस्मिन् प्रतिष्ठाऽस्येति स्वप्रतिष्ठमाकाशम्। स्वात्मैवास्याधेय आधारश्चेत्यर्थः। कुतः?

**ततोऽधिकप्रमाणद्रव्यान्तराधाराभावात् ॥३॥** न ह्याकाशादधिकप्रमाणं द्रव्यान्तर-मस्ति यत्राकाशमाधेयं स्यात्, ततः सर्वतो विरहितान्तस्यास्याधिकरणान्तरस्याऽभावात् स्वप्रतिष्ठमवसेयम्।

**तथा चानवस्थानिवृत्तिः ॥४॥** एवं च कृत्वाऽनवस्थादोषनिवृत्तिर्भवति। यतः स्वप्रतिष्ठमाकाशं न तस्यान्यदधिकरणं द्रव्यान्तरमस्ति। अन्याधिकरणत्वे हि तस्याप्यन्यत् तस्याप्यन्यदित्यनवस्था प्रसज्येत। किञ्च

**परमार्थतयाऽऽत्मवृत्तित्वात् ॥५॥** एवंभूतनयादेशात् सर्वद्रव्याणि परमार्थतया आत्मप्रतिष्ठानीत्याधाराधेयाभावात् कुतोऽनवस्था?

**अन्योन्याधारताव्याघात इति चेन्न; व्यवहारतस्तत्सिद्धेः ॥६॥** स्यान्मतम् यदि सर्वाणि द्रव्याणि परमार्थतया स्वात्मप्रतिष्ठानि ननु यदुक्तम् "वायोराकाशमधिकरणम्, उदकस्य वायुः, पृथिव्या उदकम्, सर्वजीवानां पृथिवी, अजीवा जीवाधाराः, जीवाश्चाऽजीवाधाराः, कर्मणामधिकरणं जीवाः, जीवानां कर्माणि, धर्माधर्मकाला आकाशधिकरणाः" इत्येतस्या अन्योन्याधारतायाः व्याघात इति; तन्न; किं कारणम्? व्यवहारतस्तत्सिद्धेः। सर्वमिदमुक्तमन्योन्याधारत्वं व्यवहारनयवक्तव्यबललाभादेशात् सिद्ध्यति। व्यावहारिकमेतदाकाशे वातादीनामवगाह इति। आधारान्तरकल्पनाया-

मनवस्थाप्रसङ्ग इति। परमार्थतस्त्वाकाशवत् वातादीन्यपि स्वात्माधिष्ठानानि। तत्कथमिति चेत्? उच्यते –

**क्रियाविष्टकर्तृकर्माधारवत् ॥७॥** क्रिया द्विविधा – कर्तृसमवायिनी कर्मसमवायिनी चेति। तत्र कर्तृसमवायिनी आस्ते गच्छतीति। कर्मसमवायिनी ओदनं पचति कुशूलं भिनत्तीति। तदाऽऽविष्टस्य कर्तुः कर्मणश्चाधार आसनादिः स्थाल्यादिश्च। तत्र व्यवहारनयवशात् क्रियायाः द्रव्यमधिकरणम् तदाविष्टस्य द्रव्यस्य द्रव्यान्तरम्। परमार्थतस्त्वेवंभूतनयवशात् क्रिया क्रियात्मन्येव, द्रव्यमपि स्वात्मन्येव। तथा लोकाकाशेऽवगाहो धर्मादीनामिति व्यवहारनयादेशादुक्तम्, परमार्थतस्तु सर्वद्रव्याणि स्वात्माधिकरणानि।

**आकाशधर्मादीनामाधाराधेयत्वात् कुण्डबदरवत् प्रसङ्ग इति चेन्न; अयुतसिद्धेऽपि तद्दर्शनात् शरीरे हस्तवत् ॥८॥** स्यादेतत् – यथा कुण्डे बदराणि इत्याधारः कुण्डम्, आधेयानि बदराणीति पूर्वापरकालत्वं युतसिद्धिश्च तेषाम्, तथाऽऽधारत्वात् पूर्वमाकाशं पश्चाद्धर्मादीन्याधेयत्वादिति युतसिद्धि; अतोऽनादित्वव्याघात इति; तन्न; किं कारणम्? अयुतसिद्धेऽपि तद्दर्शनात्। कथम्? शरीरे हस्तवत्। यथा हस्तशरीरयोर्युगपदुत्पत्तौ पूर्वापरत्वेऽसत्ययुतसिद्धस्य हस्तस्य शरीरमाधारः, तथाऽऽकाशधर्मादीनामनादि-पारिणामिकयौगपद्यसिद्धावसति पूर्वापरीभावे भवत्याधाराधेयत्वम्। किञ्च,

**अनेकान्तात् ॥९॥** नैतदैकान्तिकं युतसिद्धस्यैवाधाराधेयत्वं नायुतसिद्धस्येति। स्तम्भसारादिषु कुण्डबदरादिषु च दर्शनात्। तस्मादनेकान्तान्नायमुपालम्भः।

अथ लोकाकाश इत्युच्यते, को लोको नाम?

**यत्र पुण्यपापफललोकनं स लोकः॥१०॥** पुण्यपापयोः कर्मणोः फलं सुखदुःखलक्षणं यत्रालोक्यते स लोकः। कः पुनरसौ? आत्मा।

**लोकतीति वा लोकः॥११॥** लोकति पश्यत्युपलभते अर्थानिति लोकः।

**इतरदद्रव्यालोकप्रसङ्ग इति चेन्न; रूढौ क्रियाया व्युत्पत्तिमात्रनिमित्तत्वात् ॥१२॥** स्यादेतत् – द्विधाप्युक्तेन क्रमेण जीवस्यैव लोकत्वं प्राप्तमितरेषां द्रव्याणामलोकत्वं ततश्च "षड्द्रव्यसमूहो लोकः" इत्यार्षस्य विरोध इति; तन्न; किं कारणम्? रूढौ क्रियाया व्युत्पत्तिमात्रनिमित्तत्वात्। यथा गच्छतीति गौरिति व्युत्पत्तौ स्थितादीनां न गोत्वनिवृत्तिः; तथा लोकनाल्लोक इति व्युत्पत्तावपि धर्मादीनामपि न लोकत्वं हीयते।

**लोक्यत इति वा लोकः॥१३॥** सर्वज्ञेनाऽनन्ताऽप्रतिहतकेवलदर्शनेन लोक्यते यः स लोकः। तेन धर्मादीनामपि लोकत्वं सिद्धम्।

**आत्मनोऽलोकत्वप्रसङ्ग इति चेन्न; स्वात्मलोकनात् ॥१४॥** यो लोकते आत्मा तस्याऽलोकत्वं प्राप्नोति लोक्यत्वाभावादिति; तन्न; किं कारणम्? स्वात्मलोकनात्। योऽसौ सर्वज्ञो बाह्यं लोकमानः स आत्मानमपि लोकते इति लोकत्वमस्य सिद्धम्, इतरथा हि तस्य सर्वदर्शित्वाभावः आत्मानवलोकनात्। आत्मानमनवलोकमानस्य बाह्यलोकनासंभवश्च घटादिवत्। यथा घटादिरात्मानमपश्यन्नपरान् न पश्यति।

**अलोकस्यापि लोकत्वप्रसङ्ग इत चेन्न; उक्तत्वात् ॥१५॥** स्यान्मतं यदि लोक्यत इति लोकः, अलोकस्यापि लोकत्वं प्राप्नोति सर्वदर्शिना लोक्यत्वात्। अथालोकं न लोकते; सर्वदर्शित्वमस्य हीयते, न चैतदिष्टम्, तस्माल्लोकत्वप्रसङ्ग इति; तन्न; किं कारणम्? उक्तत्वात् – रूढिविशेषबललाभात् विशेषे वृत्तिरिति।

**उभयविशेषणभावाद्वा॥१६॥** अथवा, उभयविशेषणमिहोपादीयते। यत्रस्थेन सर्वज्ञेन लोक्यते यः स लोक इति। न चाऽलोकस्थेनाऽलोको लोक्यते ततो नालोकस्य लोकत्वप्रसङ्गः।

**तस्याऽऽकाशं लोकाकाशं जलाशयवत् ॥१७॥** यथा जलस्य आशय स्थानं जलाशय इत्युच्यते, तथा लोकस्याकाशं लोकाकाशमिति स्थानापेक्षः संबन्धोऽवसेयः।

**धर्माधर्मपुद्गलकालजीवा यत्र लोक्यन्ते स लोक इति वा॥१८॥** अथवा, धर्माधर्मपुद्गलकालजीवा यत्र लोक्यन्ते स लोक इत्यधिकरणसाधनो घञ्। किं पुनरधिकरणम्? आकाशम्। लोक एवाकाशं लोकाकाशमिति समानाधिकरणलक्षणा वृत्तिः, तस्मिन्नवस्थानं धर्मादीनां द्रव्याणामत आकाशं परप्रत्ययवशात् द्वेधा विभज्यते – लोकाकाशमलोकाकाशं चेति। लोकाकाशं धर्माधर्मतुल्याऽसंख्येयप्रदेशम्। बहिः समन्तादनन्तमलोकाकाशम्।

तत्रावध्रियमाणानामवस्थानभेदसंभवात् विशेषप्रतिपत्त्यर्थमाह –

## धर्माधर्मयोः कृत्स्ने॥१३॥

**निरवशेषव्याप्तिप्रदर्शनार्थं कृत्स्नवचनम् ॥१॥** यथाऽगारैकदेशे घटस्यावस्थानं न तथा धर्माधर्मयोः लोकाकाशेऽवगाहः। किं तर्हि? तिलेषु तैलवदिति निरवशेषव्याप्ति-प्रदर्शनार्थं कृत्स्नवचनं क्रियते। धर्माधर्मौ हि लोकाकाशमशेषं नैरन्तर्येण व्याप्य स्थितौ। कथमेषां परस्परप्रदेशाविरोधः?

**अमूर्तित्वात् त्रयाणां परस्परप्रदेशाविरोधः॥२॥** मूर्तिमन्तोऽपि केचित् जलभस्म सिकतादयः एकत्राविरोधेनाऽवतिष्ठन्ते किमुताऽमूर्तीनि धर्माधर्माकाशानि। तस्माद मूर्तित्वादेषां परस्परप्रदेशाविरोधो वेदितव्यः।

**अनादिसंबन्धपरिणामाच्च॥३॥** भेदसंघातगतिपरिणामपूर्वकादिमत्संबन्धानां स्थविष्ठानां स्कन्धानां केषाञ्चित् प्रदेशविरोधः स्यान्न तु धर्मादीनां तद्वदादिमान् संबन्धः, पारिणामिकाऽनादिसंबन्धात्तेषाम्, ततश्चान्योऽन्यप्रदेशाविरोधः सिद्धः।

ततो विपरीतानां मूर्तिमत्तामप्रदेशसंख्येयाऽनन्तप्रदेशानां पुद्गलानामवगाहनविशेष-प्रतिपत्त्यर्थमाह-

## एकप्रदेशादिषु भाज्यः पुद्गलानाम् ॥१४॥

**एकप्रदेशादिष्वित्यवयवेन विग्रहः समुदायो वृत्त्यर्थः॥१॥** एकश्चासौ प्रदेशश्चैकप्रदेशः, एकप्रदेश आदिर्येषां त इमे एकप्रदेशादयः। के पुनस्ते? प्रदेशाः। कुत एतत्? तुल्यजातीयत्वादुपलक्ष्योपलक्षणयोः सोमशर्मादिवत्। प्रदेशग्रहणानुवृत्तेर्वा तेष्वेकप्रदेशा-दिष्विति विग्रहे समुदायो वृत्त्यर्थः सर्वादिवत्। तेनैकप्रदेश उपलक्षणभूतोऽप्यन्तर्भवति।

**भाज्यो विकल्प्यः॥२॥** भजनीयो भाज्यः पृथक्कर्तव्यः विकल्प्यो विभाज्य इत्यनर्थान्तरम्। कः पुनरसौ? अवगाह इत्यनुवर्तते। तद्यथैकस्य परमाणोरेकत्रै-वाकाशप्रदेशेऽवगाहः, द्वयोरेकत्रोभयत्र च बद्धयोरबद्धयोश्च, त्रयाणामेकत्र द्वयोस्त्रिषु च बद्धानामबद्धानाञ्च। एवं संख्येयासंख्येयाऽनन्तप्रदेशानां स्कन्धनामेकसंख्येयासंख्येय-प्रदेशेषु लोकाकाशेऽवस्थानं प्रत्येतव्यम्।

**एकप्रदेशेनैकस्यावस्थानमयुक्तमिति चेन्न; उक्तत्वात्॥३॥** स्यान्मतं भवतु तावद्धर्मादीनामेकप्रदेशेऽवस्थानममूर्तिस्वभावत्वात्, मूर्तिमतां तु पुद्गलानामेकप्रदेशे ऽवस्थानमयुक्तं भवति। युक्तं चेत् प्रदेशस्य विभागवत्त्वं प्रसक्तमवगाहिनां चैकत्वमिति; तन्न; किं कारणम्? उक्तत्वात्। उक्तमेतत् – प्रचयविशेषादिभिरैकत्रावस्थानमिति। किञ्च,

**एकापवरकेऽनेकप्रकाशावस्थानदर्शनादविरोधः॥४॥** यथैकस्मिन्नपवरके बहवः प्रकाशाः वर्तन्ते न च क्षेत्रविभागः, नाप्येकक्षेत्रावगाहित्वात् तेषां प्रकाशानामेकत्वम्

तथैकस्मिन् प्रदेश अनन्ता अपि सम्बद्धाः सूक्ष्मपरिणामादसङ्करेण व्यवतिष्ठन्त इति नास्ति विरोधः। किञ्च,

**द्रव्यस्वभावस्याऽचोदनार्हत्वात् ॥३॥** द्रव्याणां हि स्वभावाः प्रतिनियताः सन्ति, न ते चोदनार्हाः – एवं भवतु मैवं भूदिति। यथा अग्न्यादीनां दहनादयः तृणादीनां च दाह्यत्वादयस्तथा मूर्तिमत्त्वेऽप्यवगाहनस्वभावत्वादेकस्मिन्नपि प्रदेशे बहूनां स्कन्धानामवरोधो न विरोधाय कल्प्यते। किञ्च,

**आर्षोक्तत्वात् सूक्ष्मनिगोतावस्थानवत् ॥४॥** सर्वज्ञज्ञानद्योतितार्थसारं गणधरानुस्मृतवचनरचनं शिष्यप्रशिष्यप्रबन्धाऽव्युपरमादव्युच्छिन्नसन्तानमार्षमवितथमस्ति –

**“ओगाढगाढणिचिदो पोग्गलकाएहि सव्वदो लोगो।**

**सुहुमेहिं बादरेहिं अणंताणंतेहि विविधेहिं॥”**

इत्येवमादि। अतस्तत्प्रामाण्यादप्युक्तोऽवगाहोऽवसेयः। यथैकनिगोतजीवशरीरेऽनन्ता निगोतजीवाः तिष्ठन्ति साधारणाऽऽहारप्राणापानजीवितमरणत्वात् साधारणा इत्यन्वर्थसंज्ञा इत्येतदागमप्रमाण्यादवसीयते तथैवेदमपीति।

अथ जीवानामवगाहः कथमित्यत इदमुच्यते -

## असंख्येयभागादिषु जीवानाम् ॥१५॥

असंख्येयभागादिष्विति चोक्तम् । किमुक्तम्?

**अवयवेन विग्रहः समुदायो वृत्त्यर्थ इति॥१॥** असंख्येयानां भागानामेको भागोऽसंख्येयभागः, असंख्येयभाग आदिर्येषां तेऽसंख्येयभागादयस्तेष्वसंख्येयभागादिषु। किं भाज्यः? अवगाह इत्यनुवर्तते। अत्राह – कस्याऽसंख्येयभागादिष्विति?

**लोकाकाशप्रकरणात्तदभिसंबन्धः॥२॥** लोकाकाश इत्यनुवर्तते, अतस्तदभिसंबन्धोऽत्र वेदितव्यः। ननु चासावधिकरणनिर्देशः, संबन्धनिर्देशेन चेहार्थः।

**अर्थवशाद्विभक्तिपरिणामः॥३॥** यथा – उच्चानि देवदत्तस्य गृहाणि। आमन्त्रयस्वैनम्' 'देवदत्तम्' इति गम्यते, एवमसंख्येयभागादिष्वित्यनेनाभिसंबन्धात् लोकाकाश इत्येष निर्देशः। लोकाकाशस्येत्यर्थवशात् विभक्तिः परिणम्यते। तद्यथा – लोकस्य प्रदेशा असंख्येया भागाः कृताः, तत्रैकस्मिन्नसंख्येयभागे एको जीवोऽवतिष्ठते। तथा द्वित्रिचतुरादिष्वप्यसंख्येयभागेषु आ सर्वलोकादवगाहः प्रत्येतव्यः। नानाजीवानां तु सर्वलोक एव।

**असंख्येयत्वाविशेषादवगाहाविशेष इति चेन्न; असंख्येयस्याऽसंख्येयविकल्पत्वात्॥४॥** स्यान्मतमेकस्मिन्नप्यसंख्येयभागे प्रदेशा असंख्येयाः, द्वित्रिचतुरादिष्वप्यसंख्येया एव ततो नास्ति जीवानामवगाहविशेष इति; तन्न; किं कारणम्? असंख्येयस्यासंख्येयविकल्पत्वात्। अजघन्योत्कृष्टासंख्येयस्य ह्यसंख्येया विकल्पाः। अतोऽवगाहविकल्पो जीवानां सिद्धः।

**प्रमाणविरोधादवगाहायुक्तिरिति चेन्न; जीवद्वैविध्यात्॥५॥** स्यादेतत् – यदैकस्मिन् लोकस्यासंख्येयभागे एको जीवोऽवतिष्ठते द्रव्यप्रमाणेनानन्तानन्तो जीवराशिः लोकाकाशे प्रमाणविरोधान्न स्थातुमर्हतीति; तन्न; किं कारणम्? जीवद्वैविध्यात्। द्विविधा जीवाः बादराः सूक्ष्माश्चेति। तत्र बादराः सप्रतिघातशरीराः। सूक्ष्मा जीवाः सूक्ष्मपरिणामादेव सशरीरत्वेऽपि परस्परेण बादरैश्च न प्रतिहन्यन्त इत्यप्रतिघातशरीराः। ततो यत्रैकसूक्ष्मनिगोतजीवस्तिष्ठति तत्रानन्तानन्ताः साधारणशरीराः वसन्ति। बादराणां च मनुष्यादीनां शरीरेषु संस्वेदजसंमूर्च्छनजादीनां जीवानां प्रतिशरीरं बहूनामवस्थानमिति नास्त्यवगाहविरोधः। यदि बादरा एव जीवा अभविष्यन्नपि तर्ह्यवगाहविरोधोऽजनिष्यत्।

**कथं सशरीरस्यात्मनोऽप्रतिघातत्वमिति चेत्? दृष्टत्वात्॥६॥** दृश्यते हि बालाग्रकोटिमात्रछिद्ररहिते घनबहलायसभित्तितले वज्रमयकपाटे बहिः समन्तात् वज्रलेपलिप्तेऽपवरके देवदत्तस्य मृतस्य मूर्तिमज्ज्ञानावरणादिकर्मतैजसकार्मणशरीर संबन्धित्वेऽपि गृहमभित्त्वैव निर्गमनम्, तथा सूक्ष्मनिगोतानामप्यप्रतिघातित्वं वेदितव्यम्।

अत्राह – लोकाकाशतुल्यप्रदेशः एको जीव इत्युक्तम्, तस्य कथं लोकस्या-संख्येयभागादिषु वृत्तिः? ननु सर्वलोकव्याप्त्यैव भवितव्यमित्यत्रोच्यते –

## प्रदेशसंहारविसर्पाभ्यां प्रदीपवत् ॥१६॥

**कार्मणशरीरवशादुपात्तसूक्ष्मबादरशरीरानुवर्तनं प्रदेशसंहारविसर्पः॥१॥** अमूर्त-स्वभावस्याप्यात्मनोऽनादिसंबन्धं प्रत्येकत्वात् कथञ्चिन्मूर्ततां बिभ्रतः लोकाकाशतुल्य प्रदेशस्यापि कार्मणशरीरवशादुपात्तसूक्ष्मशरीरमधितिष्ठतः शुष्कचर्मवत् संकोचनं प्रदेशसंहारः। बादरशरीरमधितिष्ठतो जले तैलवत् विसर्पणं विसर्पः।

**ताभ्यामसंख्येयभागादिषु वृत्तिः प्रदीपवत् ॥२॥** यथा निरावरणव्योमप्रदेशा-वधृतप्रकाशपरिमाणः प्रदीपः शरावमानिकापवरकाद्यावरणवशात् तत्परिमाणप्रकाश उपलभ्यते, तथा ताभ्यां प्रदेशसंहारविसर्पाभ्यामसंख्येयभागादिषु परिच्छिन्ना वृत्तिरात्मनोऽवगन्तव्या।

**तद्वदनित्यत्वप्रसङ्ग इति चेन्न; इष्टत्वात् ॥३॥** स्यादेतत् – यदि संहारविसर्पण-स्वभाव आत्मा प्रदीपादिवदेवास्यानित्यत्वं प्रसजतीति; तन्न; किं कारणम्? इष्टत्वात्। इष्टमेवैतदात्मनः कार्माणशरीरापादितप्रदेशसंहारविसर्पपर्यायादेशादनित्यत्वम्। अथवा इष्टत्वदिष्टमेवैतत्,

प्रदीपादेः संकोचविकासस्वभावत्वेऽपि रूपिद्रव्यसामान्यादेशान्नित्यत्वं तथात्मनोऽपीति न बाधाकरो दृष्टान्तः।

**सावयवत्वात् प्रदेशविशरणप्रसङ्ग इति चेन्न; अमूर्तस्वभावापरित्यागात् ॥४॥** स्यान्मतम् – प्रदीपादिवत् यदि प्रदेशसंहारविसर्पवानात्मा, अतः संसारिणः घटादिवत् छेदभेदादिभिः प्रदेशविशरणप्रसङ्गः, ततश्च शून्यता प्राप्नोतीति; तन्न; किं कारणम्? अमूर्तस्वभावापरित्यागात्। बन्धं प्रत्येकत्वे सत्यपि लक्षणभेदादन्यत्वमापद्यमानः नामूर्तस्वभावं जहातीति घटादिवत् न प्रदेशविशरणमस्ति। किञ्च,

**अनेकान्तात् ॥५॥** यो ह्येकान्तेन संहारविसर्पवानेवात्मा सावयवश्चेति ब्रूयात् तं प्रत्ययमुपालम्भो घटामुपेयात्। यस्य त्वनादिपारिणामिकचैतन्यजीवद्रव्योपयोगादि द्रव्यार्थादेशात् स्यान्न प्रदेशसंहारविसर्पवान् द्रव्यार्थादेशाच्च स्यान्निरवयवः। प्रतिनियत-सूक्ष्मबादरशरीरापेक्षनिर्माणनामोदयपर्यायार्थादेशात् स्यात् प्रदेशसंहाराविसर्पवान् अनादि-कर्मबन्धपर्यायार्थादेशाच्च स्यात् सावयव; तं प्रत्यनुपालम्भः। किञ्च,

**तत्प्रदेशानामकारणपूर्वकत्वादणुवत् ॥६॥** यस्यावयवाः कारणपूर्वका भवन्ति तस्यावयवविशरणं भवति। अवयूयन्ते विश्लिष्यन्ते इत्यवयवाः। यथा पटादेरनेक-तन्त्वादिसंघातकारणत्वात् तन्त्वादिविश्लेषे विशरणं भवति न तथाऽऽत्मनः अन्यद्रव्यसंघातपूर्वकाः प्रदेशाः। कुतः? तत्प्रदेशानामकारणपूर्वकत्वात्। यथाणोः प्रदेशः नान्यद्रव्यसंघातपूर्वकः ततो नासाववयवविश्लेषपूर्वकमनित्यत्वमास्कन्दति किन्तु संघातेनाऽनित्यः, तथाऽऽत्मप्रदेशानामपि नान्यद्रव्यसंघातपूर्वकत्वमतः प्रदेशवत्त्वादात्मा सावयवोऽपि नावयवविश्लेषादनित्यः, किन्तु गत्यादिपर्यायादेशादनित्यः।

**तत एव प्रतिप्रदेशं गुणविशेषाभावो घटवत् ॥७॥** कुत एव? प्रदेशानामकारण-पूर्वकत्वादेव। यथा घटस्य प्रदेशा अन्यद्रव्यसंघातपूर्वका इति तेषु प्रतिप्रदेशं

रूपादिगुणविशेषो दृष्टः, न तथाऽऽत्मप्रदेशा अन्यद्रव्यसंघातपूर्वका इति न तेषु प्रतिप्रदेशं सुखादिगुणविशेषो भवति। यद्यन्यद्रव्यसंघातपूर्वकाः स्युरात्मप्रदेशाः तेषु घटवत् सुखादिविशेषवृत्तिः स्यात् ततश्चात्मनो बहुत्वं प्रसज्येत। यथाऽणौ निरवयवे एकजातीयो गुणः शुक्लादिरेककाले भवति। एक एव न भिन्नजातीयस्तथाऽऽत्मनि निरवयवे एकजातीयो गुणः सुखादिरेककाले भवत्येक एव। अत्र कश्चिदाह –

**"वर्षातपाभ्यां किं व्योम्नश्चर्मण्यस्ति तयोः फलम् ।**

**चर्मोपमश्चेत् सोऽनित्यः खतुल्यश्चेदसत्फलम्"॥ इति।**

अत्रोच्यते – पिष्टपेषणमेतत्, मूर्ताऽमूर्तत्वं प्रति नित्यानित्यत्वं च प्रत्यनैकान्तिकत्वादुपालम्भाभाव इति।

**पुद्गलवदेकप्रदेशादिषु वृत्तिप्रसङ्ग इति चेन्न; शरीरप्रमाणानुविधानात् ॥८॥** स्यान्मतम् – प्रदेशसंहारविसर्पाभ्यामेव पुद्गलवदेकप्रदेशादिषु जीवस्य वृत्तिः प्राप्नोतीति; तन्न; किं कारणम्? शरीरप्रमाणानुविधानात्। कार्मणशरीरवशादुपात्तं महदल्पं वा शरीरमधितिष्ठति संसारी जीव इत्युक्तम्। न चैकप्रदेशादिकं शरीरमस्ति जघन्येनाऽङ्गुलस्याऽसंख्येयभागप्रमाणत्वात्। अतो नास्यैकप्रदेशादिषु वृत्तिरस्ति।

**मुक्तानां तत्प्रसङ्ग इति चेन्न; देशोनान्त्यविग्रहप्रमाणावस्थानात् ॥९॥** स्यादेतत् – यदि शरीरप्रमाणानुविधानादात्मनो नैकप्रदेशादिषु वृत्तिः मुक्तानां तर्हि तदभावात्तत्प्रसङ्ग इति; तन्न; किं कारणम्? देशोनान्त्यविग्रहप्रमाणावस्थानात्। येन शरीरेण मुक्तिमवाप्तवान् जीवस्तत्प्रमाणमेव देशोनमवलम्ब्यावतिष्ठते, न ततो वृद्धिर्नापि हानिः; पुनः प्रदेशसंहारविसर्पकारणाभावात्। अत्राह–

**न धर्मादीनां नानात्वं कुतः? देशसंस्थानकालदर्शनस्पर्शनावगाहनाद्यभेदात् ॥१०॥** देशस्तावदेषामभिन्नः; यस्मिन् देशे धर्मोऽवस्थितः तस्मिन्नेवेतरेषामवस्थानात्।

संस्थानमप्यभिन्नम्; यदेव धर्मस्य संस्थानमाकारः तदेवेतरेषाम्। कालश्चाभिन्न; त्रिषु कालेषु धर्मादीनां तुल्यवृत्तित्वात्। दर्शनमप्यविशिष्टम् येषु यत्रैको धर्मः प्रत्यक्षज्ञानिभिर्दृष्टः तत्रैवेतरेषामपि दर्शनम्। स्पर्शनमप्यविशिष्टम्।धर्मादीनि द्रव्याणि सर्वात्मनाऽन्योन्यं स्पृशन्तीत्यवगाहनं चाऽभिन्नमेषां सर्वगतत्वात्। तथाऽरूपत्वद्रव्यत्व-ज्ञेयत्वादिभिरप्यविशेषोऽवसेयः। अत्रोच्यते –

**न; अतस्तत्सिद्धेः॥११॥** यत एव धर्मादीनां देशादिभिरविशेषस्त्वया चोद्यते। अत एव नानात्वसिद्धिः, यतो नासति नानात्वेऽविशेषसिद्धिः। न ह्येकस्याविशेषोऽस्ति। किञ्च, यथा रूपरसादीनां तुल्यदेशाधिष्ठानत्वे नैकत्वं तथा धर्मादीनामपि नानात्वमिति।

आह – रूपादीनां तुल्यदेशत्वेऽपि चाक्षुषत्वादिविशिष्टलक्षणोपेतत्वान्नानात्वं युक्तं न तथा धर्मादीनां विशेषकरं किञ्चिल्लक्षणमुक्तम्। स्यादेतत् यदि न लक्षणभेदः। अस्ति तु भिन्नं लक्षणम्। कि पुनस्तदिति? अत उत्तरं पठति-

## गतिस्थित्युपग्रहौ धर्माधर्मयोरुपकारः॥१७॥

अथवा, अणुस्कन्धभेदात् पुद्गलानामसंख्येयप्रदेशत्वाच्चाऽऽत्मनामवगाहिनामेक-प्रदेशादिषु पुद्गलानामसंख्येयभागादिषु च जीवानामवस्थानं युक्तमुक्तम्। तुये पुनरसंख्येयप्रदेशत्वे कृत्स्नलोकव्यापित्वमेव धर्माधर्मयोः न पुनरसंख्येयभागादिवृत्ति रित्येतत्कथमनुपदिष्टहेतुकमवसातुं शक्यमित्यत्र ब्रूमः – अवसेयमसंशयम्। यथा मत्स्यगमनस्य जलमुपग्रहकारणमिति नासति जले मत्स्यगमनं भवति, तथा जीवपुद्गलानां प्रयोगविस्रसा परिणामनिमित्ताहितप्रकारां गतिस्थितिलक्षणां क्रियां स्वत एवाऽऽरभमाणानां सर्वत्र भावात् तदुपग्रहकारणाभ्यामपि धर्माधर्माभ्यां सर्वगताभ्यां भवितव्यम्, नासतोस्तयोर्गतिस्थितिवृत्तिरिति व्यापित्वदर्शनार्थमिदमुच्यते।

**द्रव्यस्य देशान्तरप्राप्तिहेतुः परिणामो गतिः॥१॥** द्रव्यस्य बाह्याभ्यन्तर-हेतुसन्निधाने सति परिणममानस्य देशान्तरप्राप्तिहेतुः परिणामो गतिरित्युच्यते।

**तद्विपरीता स्थितिः॥२॥** द्रव्यस्य स्वदेशादप्रच्यवनहेतुर्गतिनिवृत्तिरूपा स्थितिरव-गन्तव्या।

**उपग्रहोऽनुग्रहः॥३॥** द्रव्याणां शक्त्यन्तराविर्भावे कारणभावोऽनुग्रह उपग्रह इत्याख्यायते।

**गतिस्थित्युपग्रहावित्यनेकविग्रहसंभवादर्थानिश्चयः॥४॥** विग्रहपूर्वको हि लोके वृत्तिपदस्यार्थनिश्चयो भवति। गतिस्थित्युपग्रहावित्यत्र त्वनेकविग्रहसंभवात् नास्त्यर्थ-निश्चयः। तद्यथा – गतिश्च स्थितिश्च गतिस्थिती, गतिस्थिती उपग्रहौ ययोस्तौ गतिस्थित्युपग्रहौ। गतिस्थित्योरुपग्रहौ गतिस्थित्युपग्रहौ। गतिस्थिती एव वोपग्रहौ गतिस्थित्युपग्रहाविति? नैष दोषः।

**अन्यपदार्थवृत्त्यभावो गतिस्थित्युपग्रहौ धर्माधर्मावित्यवचनात्॥५॥** नात्राऽन्य-पदार्था वृत्तिः संभवति। कुतः? गतिस्थित्युपग्रहौ धर्माधर्मावित्यवचनात्।

**न षष्ठीवृत्तिर्द्विवचननिर्देशात्॥६॥** नेयं षष्ठी वृत्तिः गतिस्थित्योरुपग्रहौ गतिस्थित्यु-पग्रहाविति। कुतः? द्विवचननिर्देशात्। यदि ह्यत्र षष्ठीवृत्तिः स्यादुत्तरपदार्थस्य भावस्यैकस्य प्राधान्याल्लघ्वर्थं एकवचननिर्देशः क्रियेत, भेदेन च प्रयोजनाभावात्।

**परिशेषात् समानाधिकरणा वृत्तिः॥७॥** परिशेषात् समानाधिकरणलक्षणा वृत्तिर्वेदितव्या गतिस्थिती एवोपग्रहौ गतिस्थित्युपग्रहाविति।

**तथा च द्वित्वोपपत्तिः॥८॥** एवं च कृत्वा द्वित्वमुपपन्नं भवति, गतिस्थित्योर्भेदात् तत्सामानाधिकरण्यात् भेदसिद्धेः। कथं सामानाधिकरण्यम्? कर्मसाधनत्वादुपगृह्येते इत्युपग्रहौ गतिस्थिती इति।

**धर्माधर्मयोरिति कर्तृनिर्देशः॥९॥** धर्माधर्मयोरित्ययं कर्तृनिर्देशो द्रष्टव्यः। कथम् ? कर्तरि षष्ठीविधानात्। कां क्रियामपेक्ष्य कर्तृत्वं विवक्षितम्? उपकार इत्युच्यते – उपकरोति क्रियायाः कर्तृत्वमुपकार इति। किंसाधनोऽयं शब्दः? भावसाधनः।

**उपकार इति भावसाधनश्चेत्; पूर्वेण सामानाधिकरण्यानुपपत्तिरर्थान्तरवृत्तेः॥१०॥** यद्युपकरणमुपकार इति भावसाधनशब्दः, गतिस्थित्युपग्रहावित्यनेन सामानाधिकरण्यं नोपपद्यते धर्माधर्मयोरुपकारो गतिस्थित्युपग्रहाविति। कुतः? अर्थान्तरवृत्तेः। उपकारो हि धर्माधर्मयोर्वर्तते कर्तृस्थक्रियात्वात् करोतेः उपगृह्यमाणे तु गतिस्थिती जीवपुद्गलेष्विति। एवं तर्हि कर्मसाधनः?

**कर्मसाधनश्चेद्वचनभेदानुपपत्तिः॥११॥** यदि कर्मसाधनः; वचनभेदो नोपपद्यते, सामानाधिकरण्यात् द्विवचनं प्राप्नोति।

**न वा सामान्योपादानात्॥१२॥** न वैष दोषः, किं कारणम्? सामान्योपादानात्। यथा 'साधोः कार्यं तपःश्रुते' इति प्राक्सामान्यमपेक्ष्य लब्धैकवचनः कार्यशब्दः पश्चाद्विशेषसन्निधानेऽपि नोपात्तं वचनं जहाति, तदिहाप्युपकारशब्दः उपात्तान्तरङ्गैकवचनो भिन्नवचनपदान्तरापेक्षायामपि न वचनान्तरसंक्रमं करोति।

**षष्ठीवृत्तिर्वा भावसाधनत्वोपपत्तेः॥१३॥** अथवा, गतिस्थित्योरुपग्रहौ गतिस्थित्यु-पग्रहाविति षष्ठीवृत्तिरियम्। कुतः? भावसाधनत्वोपपत्तेरूपग्रहणमुपग्रह इति भावसाधनोऽयं शब्दः। तथोपकारशब्दश्च भावसाधनः – उपकरणमुपकारः इति।

ननु चोक्तं भावस्यैकत्वात् द्विवचननिर्देशो नोपपद्यते इति; नैष दोषः;

**यथासंख्यप्रतिपत्त्यर्थो द्विवचनप्रयोगः॥१४॥** धर्माधर्मौ द्वौ गतिस्थित्युपग्रहौ द्वौ, तयोः सामान्यात् यथासंख्यं स्यादिति द्विवचनप्रयोगः क्रियते। एकवचने हि सति यथा भूमिरेकैवाऽश्वादीनां गतिस्थित्योरुपग्रहे वर्तते, तथा धर्म एक एव जीवपुद्गलानां गतिस्थित्योरुपग्रहं कुर्यात्, तथाऽधर्मोऽपीत्ययमर्थो गम्येत। अन्यतरस्य वैयर्थ्यमिति चेन्न; अनेकसहायकारणदर्शनात्। तेनैतदुक्तं भवति – जीवपुद्गलानां स्वयमेव गतिपरिणामिनां तदुपग्रहकारणत्वेनानुमीयमानो धर्मास्तिकायः। तेषामेव स्वत एव स्थितिमास्कन्दतां बाह्योपग्रहकारणत्वेनानुमीयमानोऽधर्मास्तिकायः। सर्वत्र च तत्प्रयोजनदर्शनात् सर्वगतौ चैताविति।

**उपग्रहावचनमुपकारेण कृतत्वात्॥१५॥** उपग्रहवचनमनर्थकम्। कुतः? उपकारेण कृतत्वात्। उपग्रह उपकार इत्यनर्थान्तरम्। तेन गतिस्थिती धर्माधर्मयोरुपकार इत्यस्तु लघुत्वात्।

**तयोः कर्तृत्वप्रसङ्ग इति चेन्न; उपकारवचनात् यष्ट्यादिवत्॥१६॥** स्यादेतत्-गतिस्थित्योः धर्माधर्मौ कर्तारौ इत्ययमर्थः प्रसक्त इति; तन्न; किं कारणम्? उपकारवचनात्। उपकारो बलाधानमवलम्बनमित्यनर्थान्तरम्। तेन धर्माधर्मयोः गतिस्थितिनिर्वर्तने प्रधानकर्तृत्वमपोदितं भवति। यथा अन्धस्येतरस्य वा स्वजङ्घाबलाद्गच्छतः यष्ट्याद्युपकारकं भवति न तु प्रेरकं तथा जीवपुद्गलानां स्वशक्त्यैव गच्छतां तिष्ठतां च धर्माधर्मावुपकारकौ न प्रेरकावित्युक्तं भवति।

**गतिस्थिती धर्माधर्मकृते इत्यनुपदेशाच्च॥१७॥** यदि धर्माधर्मौ गतिस्थित्योः प्रधानकर्तारौ स्याताम् 'गतिस्थिती धर्माधर्मकृते' इत्युच्येत, न त्वेवमुक्तम्। ततश्च मन्यामहे न प्रधानकर्तारौ इति।

**न वा, यथासंख्यनिवृत्त्यर्थत्वात् ॥१८॥** न वैष दोषः। किं कारणम्? यथासंख्यनिवृत्त्यर्थत्वात्। 'गतिस्थिती धर्माधर्मयोरुपकारः' इत्युच्यमाने आत्मनां गतिपरिणामोपकारो धर्मस्य न पुद्गलानाम्, स्थितिपरिणामोपकार इतरस्य नात्मनामिति याथासंख्यं प्रतीयेत, तन्निवृत्त्यर्थमुपग्रहवचनं क्रियते।

**व्याख्यानादिष्टसंप्रत्यय इति चेन्न; प्रतिपत्तेर्गौरवात् ॥१९॥** स्यादेतत्, सर्वसन्देहेष्विदमुपतिष्ठते– "व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्" इति। तत इष्टस्य संप्रत्ययो भवतीति; तन्न; किं कारणम्? प्रतिपत्तेर्गौरवात्। व्याख्यानादिष्टसंप्रत्यये क्रियमाणे बुद्धिखेदो माभूत् इत्युपग्रहवचनं कृतम्।

**सौषिर्यादाकाशस्योपग्रह इति चेन्न; धर्माधर्मकालात्मपुद्गलाधिकरणत्वात् नगरान्तर्गतवेश्मवत् ॥२०॥** स्यादेतत्-आकाशं सर्वगतमस्ति, तच्च सौषिर्यगुणोपेतमतस्तस्यैव गतिस्थित्युपग्रहो युक्तः, किमन्याभ्यां वृथाकल्पिताभ्यां धर्माधर्माभ्यामिति? तन्न; किं कारणम्? धर्माधर्मकालात्मपुद्गलाधिकरणत्वान्नभसः। कथम्? नगरान्तर्गतवेश्मवत्। यथा नगरान्तर्गतानां वेश्मनां नगरमधिकरणं तथा धर्मादीनां पञ्चानामाकाशमधिकरणम्। न चान्यस्य धर्मोऽन्यस्य भवितुमर्हति। यदि स्यात्, अप्तेजोगुणा द्रवदहनादयः पृथिव्या एव कल्प्यन्ताम्। किञ्च

**आकाशास्तित्वेऽप्यनुगृहीतृद्रव्यसंबन्धेन सामर्थ्याविर्भावदर्शनादनिमिषव्रज्यावत् ॥२१॥** यथा अनिमिषस्य व्रज्या जलोपग्रहाद्भवति, जलाभावे च भुवि न भवति सत्यप्याकाशे। यद्याकाशोपग्रहान्मीनस्य गतिर्भवेत् भुव्यपि भवेत्। तथा गतिस्थितिपरिणामिनामात्मपुद्गलानां धर्माधर्मोपग्रहात् गतिस्थिती भवतो नाकाशोपग्रहात्। यद्याकाशोपग्रहात् गतिस्थिती स्यातामलोकाकाशेऽपि भवेताम्। ततश्च लोकालोकविभागाभावः स्यात्। लोकव्यतिरिक्तेन चाऽलोकेन भवितव्यं नञ्पदोपहितस्यार्थवत्त्वदर्शनादब्राह्मणाभिधानवत्।

**स्वबाह्यकारणभावाऽभावयोस्तद्भावाभावदर्शनात् तदभाव इति चेन्न; साधारण-कारणत्वादाकाशवत् ॥२२॥** स्यान्मतमिह गतिमतां स्थितिमतां च द्रव्याणां प्रतिनियतस्वबाह्यकारणसन्निधाने सति नियतगतिस्थित्योर्भावो दृष्टः, यथा मत्स्यादीनां जलादिसद्भावे भावः तदभावे चाभावो दृष्टः। तेषामेव जलाद्यभावे धर्माधर्मयोः सतोरपि गतिस्थित्यभावः, तस्मात्तदधीने गतिस्थितीति धर्माधर्मयोरभावः इति; तन्न; किं कारणम्? साधारणकारणत्वादाकाशवत्। यथा सत्यपि भूम्यादावधिकरणे सर्वेषां साधारणमधिकरणमाकाशमिष्यते तथा मत्स्यादीनां सत्स्वपि जलादिषु कारणेषु सर्वेषां गतिस्थित्योः साधारणकारणौ धर्माधर्मावभ्युपगन्तव्यौ।

**आकाशमेव पर्याप्तमिति चेन्न; सर्वतन्त्रविरोधात् ॥२३॥** स्यादेतदाकाशमेव विभुत्वात् सर्वद्रव्याणां गतिस्थित्योः साधारणकारणत्वेन पर्याप्तमिति तन्न; किं कारणम्? सर्वतन्त्रविरोधात्। आकाशमेव पर्याप्तं नान्यदिति नियच्छतः सर्वतन्त्रविरोधो भवति। तद्यथा – केचित्तावदाहुः – आकाशकालदिगात्मानः सर्वगता अपि सन्तः प्रतिनियतस्वलक्षणाः इति। तत्र हि दिङ्निमित्तो यो व्यवहारः इत इदमिति, कालनिमित्तश्च परोऽयमपरोऽयमिति नासावाकाशादृतेऽस्ति इत्याकाशस्यैवादः सामर्थ्यं न दिक्कालयोरिति दिक्कालाभावः प्रसक्तः। तथा च सर्वात्मनां चैकत्वप्रसङ्गः। यदि व्यापित्वादाकाशस्यैव गतिस्थित्युपग्रहः कल्प्यते, ननु यत्प्रत्यर्थनियतबुद्धिसुख दुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारगुणोपपत्तेः व्यवस्थातः शास्त्रसामर्थ्याच्च नाना आत्मान इति व्यवस्थितं तद्विरुध्यते। अपर आहुः – त्रयो गुणाः सत्त्वरजस्तमोऽभिधानाः प्रसादलाघवशोषतापावरणसादनादिभिन्नस्वभावा इति। यदि व्यापित्वादाकाशस्यैव गतिस्थित्युपग्रहाविष्टौ; ननु सत्त्वस्य व्यापित्वात् शोषतापादयो रजोधर्माः सादनावरणादयश्च तमोधर्माः सत्त्वस्यैवैषितव्याः। तथेतरयोरपि प्रतिपक्षधर्मा इति सङ्करप्रसङ्गः। तथा सर्वक्षेत्रज्ञानां चैकत्वसङ्गः चैतन्यस्वरूपाविशेषादाद्यन्तभोगा-विशेषाच्च। अन्ये मन्यन्ते – रूपणानुभवननिमित्तग्रहणसंस्कृताभिसंस्करणा-

लम्बनप्रज्ञप्तिस्वभावलक्षणा रूपवेदनासंज्ञासंस्कारविज्ञानाभिधानाः पञ्च स्कन्धाः इति। तत्र यद्येकस्यैव सर्वधर्माः कल्प्यन्ते; नासति विज्ञानेऽनुभवादयः संभवन्तीत्यनुभवादयो विज्ञानस्यैव कल्प्येरन्। तथा सति शेषस्कन्धनिवृत्तौ स्वनिवृत्तिरपि स्यात् न चैतत् सर्वमिष्टम्। तस्मादभ्युपगम्यतामाकाशस्य विभुत्वेऽपि न धर्माधर्मयोः प्रयोजनं नास्तीति सिद्धौ धर्माधर्मास्तिकायौ।

**उभयानुग्रहात् परस्परप्रतिबन्ध इति चेन्न; स्वतः परिणामसामर्थ्यस्याऽनुग्रहाकाङ्क्षित्वात् कुण्टनयनयष्टिप्रदीपवत्॥१४॥** स्यान्मतम्, यथा तुल्यबलाभ्यां शकुन्ताभ्यामाकृष्यमाणो मांसपिण्डो यावत्क्षेत्रमेकेनाऽऽकृष्यते तावदितरेणापकृष्येतेति नास्योत्कर्षापकर्षगतिविधिः संभवति, तथा जगद्व्यापित्वात् धर्माधर्मयोर्यदा धर्मोपग्रहादात्मपुद्गलानां गतिस्तदैवाधर्मोपग्रहात् स्थितिरिति गतेः प्रतिबन्धः। यदा वाऽधर्मानुग्रहात्स्थितिस्तदैव धर्मानुग्रहाद्गतिरिति स्थितेः प्रतिबन्धः। एवं तेषां न गतिर्न स्थितिरित्युभयाभावः इति; तन्न; किं कारणम्? स्वतः परिणामसामर्थ्यस्यानुग्रहाकाङ्क्षित्वात्। कथम्? कुण्टनयनयष्टिप्रदीपवत्। यथा कुण्टस्य गतिपरिणामसमर्थस्य यष्टिरुपग्राहिका न तु सा तस्य गतेः कर्त्री। यद्यसमर्थस्यापि कर्त्री भवेत्; मूर्च्छितसुषुप्तादीनामपि यष्टिसंबन्धाद्गतिः स्यात्। यथा वा नयनस्य स्वतो दर्शनसमर्थस्य प्रदीप उपग्राहकः न तु प्रदीपो नेत्रस्य दर्शनशक्तेः कर्ता॥ यद्यसमर्थस्यापि कर्ता स्यात्, मूर्च्छितसुषुप्तजात्यन्धानामपि दर्शनं कुर्यात्। तथाऽऽत्मपुद्गालानामपि स्वयमेव गतिस्थितिपरिणामिनां धर्माधर्मावुपग्राहकौ गतिस्थित्योर्न कर्तारौ। यदि कर्तारौ स्यातां स्याद् गतिस्थितिविरोधः। अतोऽनुग्राहकत्वान्नास्ति दोषः। किञ्च,

**क्वचिदुपग्राहकाभावेऽपि गतिस्थितिदर्शनात् पतत्रिवत्॥१५॥** यथा पतत्रिणः प्रकृष्टगतिस्थितिक्रियापरिणामसामर्थ्यात् जलतुल्यबाह्योपग्राहकाभावेऽपि धर्माधर्मद्रव्य

सद्भावात् गतिस्थिती दृष्टे तथेतरेषामपि द्रव्याणां धर्माधर्मोपष्टम्भात् गतिस्थिति सिद्धिरिति तदुपपत्तिः।

**तत्राप्याकाशं निमित्तमिति चेदुक्तम् ॥२६॥** यदि तत्रापि पतत्र्यादिष्वा-काशमुपग्राहकमस्तीति कल्प्यते उक्तमेतन्नाकाशं गतिस्थित्युपग्रहकारणम-वगाहनलक्षणत्वात्तस्येति।

**अनेकान्ताच्च समग्रविकलेन्द्रियवत् ॥२७॥** यथा नायमेकान्तः – सर्वश्चक्षुष्मान् बाह्यप्रकाशोपग्रहात् रूपं गृह्णातीति। यस्मात् द्वीपिमार्जारादयः स्वजातिविशेषोपात्तन यनबलादेव विनापि बाह्यप्रदीपाद्युपग्रहात् रूपग्रहणसमर्थाः मनुष्यादयस्तु तथादर्शन शक्त्यभावात् प्रदीपाद्युपग्रहमपेक्ष्यन्त इत्यनेकान्तः। यथा वा नायमेकान्तः - सर्व एव गतिमन्तो यष्ट्याद्युपग्रहात् गतिमारभन्ते नवेति यस्मात् समग्रपञ्चेन्द्रियो बाह्ययष्ट्याद्युपग्रहाद्विनापि धर्मोपग्रहाद्गतिमारभते नैवं चक्षुर्विकलः, स तु समविषमादिभूप्रदेशादर्शनात् तद्विशेषाविष्करणसमर्थां यष्टिमवष्टभ्य गतिमारभते इत्यनेकान्तः। तथा नायमेकान्तः – सर्वेषामात्मपुद्गलानां सर्वे बाह्योपग्रहहेतवः सन्तीति, किन्तु केषाञ्चित् पतत्रिप्रभृतीनां धर्माधर्मावेवाऽपरेषां जलादयोऽपीत्यनेकान्तः।

**अनुपलब्धेरभाव इति चेन्न; स्वतीर्थकराद्यभावप्रसङ्गात् ॥२८॥** स्यान्मतम्, न च धर्माधर्मौ स्तोऽनुपलब्धेः खरविषाणवत्। सतां हि यष्ट्यादीनामुपलब्धिरस्ति, तदुपकारश्च निम्नोन्नतादिभूप्रदेशे भेददर्शनं दृष्टम्। न च तथा धर्माधर्मावुपलभ्येते नापि तदुपकार इत्यसत्त्वमिति; तन्न; किं कारणम् ? स्वतीर्थकराद्यभावप्रसङ्गात् खरविषाणवत्। यथा खरविषाणममनुपलब्धेरसत् तथा स्वतीर्थकरपुण्यापुण्यपरलोकादीनामप्यसत्त्वमाक्षिप्तं न चाऽसत्त्वमिष्टं ततो हेतोर्व्यभिचारः। किञ्च,

**अनुपलब्ध्यसिद्धेः ॥२९॥** भगवदर्हत्सर्वज्ञप्रत्यक्षज्ञानगोचरत्वात् तत्प्रणीतपरमागम प्रमाणगम्यत्वात् तदनुसारिस्वकार्यदर्शनाद्यनुमानविषयत्वाच्च धर्माधर्मयोरुपलब्धेरनुपलब्धिलक्षणो हेतुरस्मान् प्रत्यसिद्धः। न च हेतुः स्वयमसिद्धः साध्यमर्थं साधयितुमलम्।

**अत एव विवादात् ॥३०॥** यत एव यष्ट्यादिवत् न प्रत्यक्षौ धर्माधर्मावत एव विवादः – किमनुपलब्धेः खरविषाणवदभावोऽनयोरूत एवाऽऽकाशमूलोदकादिवदभाव इति? न हि यत एव विवादस्तत एव निर्णयो भवितुमर्हति। किञ्च,

**कार्यस्यानेकोपकरणसाध्यत्वात् तत्सिद्धेः ॥३१॥** इह लोके कार्यमनेकोपकरणसाध्यं दृष्टम्, यथा मृत्पिण्डो घटकार्यपरिणामप्राप्तिं प्रति गृहीताभ्यन्तरसामर्थ्यः बाह्यकुलाल दण्डचक्रसूत्रोदककालाकाशाद्यनेकोपकरणापेक्षः घटपर्यायेणाऽऽविर्भवति, नैक एव मृत्पिण्डः कुलालादिबाह्यसाधनसन्निधानेन विना घटात्मनाविर्भवितुं समर्थः; तथा पतत्त्रिप्रभृतिद्रव्यं गतिस्थितिपरिणामप्राप्तिं प्रत्यभिमुखं नान्तरेण बाह्यानेककारणसन्निधिं गतिं स्थितिं चावाप्तुमलमिति तदुपग्रहकारणधर्माऽधर्मास्तिकायसिद्धिः। ततः किम्? अनुमानविरोधो वेदितव्यः।

**संसर्ग एव हेतुरिति चेन्न; कारणनियमाभावप्रसङ्गात् ॥३२॥** स्यान्मतं नानेककारणसाध्यं कार्यम्। किं तर्हि? संसर्ग एव हेतुः कार्यात्मलाभस्य, विवक्तानां तन्त्वादीनां कार्यारम्भसामर्थ्याभावादिति; तन्न; किं कारणम्? कारणनियमाभाव-प्रसङ्गात् – यस्मात्कस्माच्चित्कारणसंसर्गात् पटनिष्पत्तिरस्तु। नो चेदेवं प्रतिविशिष्ट-तन्त्वादिकारणविषयसंसर्गापेक्षत्वादनेककारणत्वसिद्धिः। किञ्च,

**एकस्य कारणस्य संसर्गाभावात् ॥३३॥** अनेककारणसाध्यत्वात् संसर्गस्य। संसर्गकारणत्वे प्रतिज्ञाहानिः। अपि च, संसर्गकारणानां संयोगाविशेषः संयोगिनां बहुत्वादनेकः तत्साध्यत्वात् कार्यस्यानेककारणत्वसिद्धिः। किञ्च,

**स्वसमयविरोधात् ॥३४॥** न च वयमेवंपक्षाः- यन्नोपलभ्यते प्रत्यक्षेण तन्नास्तीति। यस्य तु वादिन एषोऽभिप्रायस्तस्य स्वसमयविरोधः। तद्यथा – सर्वे हि वादिनः प्रत्यक्षाऽप्रत्यक्षार्थवादिनः। केचित्तावदाहुः – प्रत्येकं रूपपरमाणवोऽतीन्द्रियास्त-त्समुदायोऽनेकपरमाणुक इन्द्रियग्राह्यो नाम चित्तचैतसिकविकल्पमतीन्द्रियमिति। अपर आहुः – व्यक्तस्य पृथिव्यादेः प्रधानपरिणामस्य प्रत्यक्षत्वं सत्त्वादीनां गुणानां परमात्मनां चाऽप्रत्यक्षमिति। अन्ये तु मन्यन्ते – "महदनेकद्रव्यत्वात् रूपाच्चोप लब्धिः" इत्येवमादिनाऽनेकपरमाणुसमुदयभावेन निष्पन्नाः पृथिव्यादयस्तद्विषयाश्च रूपादयस्तत्समवायिनः संख्यापरिमाणपृथक्त्वसंयोगविभागादयश्च प्रत्यक्षाः, अण्वाका-शादयोऽप्रत्यक्षा इति। यदि यष्ट्यादिवदनुपलब्धेः धर्माधर्मयोरभावः प्रतिज्ञायेत; ननु विज्ञानादीनां सत्त्वादीनामण्वादीनां चाऽप्रत्यक्षत्वादभावः स्यादिति स्वसमयविरोधः। अथैषां कार्यदर्शनादस्तित्वमनुमीयते; धर्माधर्मयोः को मत्सरः? किञ्च,

**त्वदीयजीवितमरणादिवत्तत्सिद्धिः॥३५॥** यथा त्वदीयजीवितमरणसुखदुःखलाभा-लाभादीनां मनुष्यमात्राप्रत्यक्षाणामतिशयज्ञानिभिरुपलभ्यमानस्वरूपाणामस्तित्वम्। तथा तावकीनप्रमाणगोचरातीतयोरपि परमर्षिसर्वज्ञदृष्टयोः धर्माधर्मयोरस्तित्वमिति को विरोधः? किञ्च,

**ज्ञानादिवदिति चेन्न; उक्तत्वात् ॥३६॥** स्यादेतत् – यथा ज्ञानादीनामात्म-परिणामानां पुद्गलपरिणामानां च दध्यादिद्रव्यानां निर्वृत्तिः परस्पराश्रया न धर्माधर्मास्तिकायस्थानीयद्रव्यान्तराश्रयात्। तथा जीवपुद्गलेषु गतिस्थितिपरिणामा अपि अन्योन्याश्रया इति धर्माधर्माभाव इति। तन्न; किं कारणम्? उक्तत्वात्। उक्तमेतत् पतत्त्रिप्रभृतीनां गतिस्थितिकारणेन साधारणेन बाह्येन भवितव्यमिति। किञ्च, ज्ञानादिदध्यादिविकाराणामपि निर्वृत्तेः कालो हेतुः बाह्योऽस्तीत्यभ्युपगमादसमस्समाधिः।

**अदृष्टहेतुके गतिस्थितीति चेन्न; पुद्गलेष्वभावात् ॥३७॥** स्यान्मतमदृष्टो नामात्मगुणोऽस्ति यद्धेतुकः सुखदुःखविपाकः तत्साधनसन्निधानं च। एवं च कृत्वोक्तम् – "अग्नेरूर्ध्वज्वलनं वायोश्च तिर्यग्गमनमणुमनसोश्चाद्यं कर्मेत्ये-तान्यदृष्टकारितान्युपसर्पणमपसर्पणमसितपीतसंयोगाः कायान्तरसंयोगाश्चेत्यदृष्टकारि-तानि" इत्यादि, तद्धेतुके गतिस्थितीति; तन्न; किं कारणम्? पुद्गलेष्वभावात्। अचेतनत्वात् पुद्गलानां पुण्यापुण्यकरणाभावात् तत्कृतगतिस्थित्यभावदोषः।

**यस्योपकारस्तादर्थ्यात् क्रियाप्रवृत्तिरिति चेन्न; अन्यधर्मस्याऽन्यत्र क्रियारम्भे सामर्थ्याभावात् ॥३८॥** स्यादेतत् – यस्य घटादय उपकरिष्यन्ति तस्य पुंसोऽदृष्टाद् घटादिषु गतिस्थिती भवत इति; तन्न; किं कारणम्? अन्यधर्मस्याऽन्यत्र क्रियारम्भे सामर्थ्याभावात्। न हि स्वाश्रये क्रियामनारभमाणोऽन्यत्र क्रियाहेतुरस्तीत्युक्तं पुरस्तात्। किञ्च,

**पुण्यापुण्यात्ययेऽपि गतिस्थितिदर्शनात् ॥३९॥** विनिर्मुक्तापुण्यापुण्यबन्धानां सिद्धानां गतिस्थितीष्येते। ततो नादृष्टहेतुके गतिस्थिती।

**अमूर्तत्वादनतिस्थितिनिमित्तत्वानुपपत्तिरिति चेन्न; दृष्टान्ताभावात् ॥४०॥** स्यान्म-तम् - रूपादिगुणविरहितत्वादमूर्तौ धर्माधर्मावभ्युपगम्येते, ततस्तयोर्गतिस्थितिहेतुत्वं नोपपद्यते इति; तन्न; किं कारणम्? दृष्टान्ताभावात्। न हि दृष्टान्तोऽस्ति येनामूर्तत्वात् गतिस्थितिहेतुत्वं व्यावर्तेत। किञ्च,

**आकाशप्रधानविज्ञानादिवत्तत्सिद्धेः ॥४१॥** यथाऽऽकाशममूर्तमपि सत् सर्वपदार्थानामवगाहनप्रयोजनमुपपादयति। यथा वा, प्रधानममूर्तमपि पुरुषार्थप्रवृत्त्या महदादिविकारमापद्यमानं पुरुषस्योपकरोति। यथा वा, विज्ञानममूर्तमपि सन्नामरूपोत्पत्तौ निमित्तं "विज्ञानप्रत्ययं नामरूपम्" इति वचनात्। यथा वा अपूर्वाख्यो धर्मः

क्रिययाऽभिव्यक्तः सन्नमूर्तोऽपि पुरुषस्योपकारी वर्तते तथा धर्माधर्मयोरपि गतिस्थित्युपग्रहोऽवसेयः।

अत्राह – यद्यतीन्द्रिययोर्धर्माधर्मयोरुपकारसंबन्धेनास्तित्वमवध्रियते तदनन्तरमुद्दिष्टस्य नभसोऽतीन्द्रियस्याधिगमे क उपकार इति? अत्रोच्यते –

## आकाशस्यावगाहः॥१८॥

आकाशशब्दो व्याख्यातार्थः।

**अवगाहशब्दो भावसाधनः॥१॥** अवगाहनमवगाह इति भावसाधनोऽवगाहशब्दो वेदितव्यः। अवगाहोऽनुप्रवेश इत्यर्थः।

**धर्माधर्मयोरवगाहं प्रति कर्तृत्वादनादिसंबन्धनिवृत्तिरिति चेन्न; औपचारिकत्वात् व्याप्तिसद्भावात्॥२॥** स्यान्मतं - यथा जलमवगाहते हंस इति न जलहंसयोरनादिसंबन्धः, तथाऽऽकाशं धर्माधर्माववगाहेते इत्यभ्युपगमादनादिसंबन्धो निवर्तत इति; तन्न; किं कारणम्? औपचारिकत्वात्। औपचारिकोऽयमवगाहः। कुतः? क्रियाऽभावात्। कुतस्तर्हि उपचारः? व्याप्तिसद्भावात्। यथा गमनाभावेऽपि सर्वगतमाकाशमित्युच्यते व्याप्तिसद्भावात्, तथा मुख्यावगाहक्रियाऽभावेपि लोकाकाशेऽपि सर्वत्र व्याप्तिदर्शनात् व्यवह्रियते– धर्माधर्मयोर्लोकाकाशेऽवगाह इति।

**अयुतसिद्धानामाधाराधेयत्वानुपपत्तिरिति चेन्न; तत्रापि दर्शनात् पाणिरेखावत्॥३॥** स्यादेतत् – युतसिद्धानां लोके दृष्ट आधाराधेयभावः यथा कुण्डबदरादीनाम्। अयुतसिद्धाश्चैते आकाशधर्माधर्माः अप्राप्तिपूर्वकप्राप्त्यभावात् तत आधाराधेयभावो नोपपद्यत इति; तन्न; किं कारणम्? तत्रापि दर्शनात्। यथा युतसिद्ध्यभावे पाणौ रेखेत्याधाराधेयभावो दृष्टः तथा लोकाकाशे धर्माधर्मावित्याधेयाधारभावः सिद्धः।

**दृष्टत्वादीश्वरैश्वर्यवत् ॥४॥** यथेश्वरस्यैश्वर्यस्य वाऽयुतसिद्धेऽपि ईश्वरे ऐश्वर्यमिति व्यववहारो दृष्टस्तथा लोकाकाशे धर्माधर्माविति व्यपदेशो युक्तः।

**अनेकान्ताच्च तत्सिद्धिः॥५॥** नायमेकान्तोऽनादिसंबन्धौ धर्माधर्मावयुतसिद्धौ चेति। किं तर्हि? स्यादनादिसंबन्धौ स्यान्नाऽनादिसंबन्धौ, स्यादयुतसिद्धौ स्यान्नाऽयुतसिद्धावित्यादि। तद्यथा – पर्यायार्थिकगुणभावे द्रव्यार्थिकप्राधान्यात् व्ययोदयाभावात् स्यादनादिसंबन्धावयुतसिद्धौ च। द्रव्यार्थिकगुणभावे पर्यायार्थिकप्राधान्यात् पर्यायाणां व्ययोत्पादसद्भावात् स्यान्नाऽनादिसंबन्धौ नायुतसिद्धौ चेत्यादि योज्यम्। ततः किम्? कथञ्चिदवगाहः आधाराधेयभावश्च सिद्धो भवति।

**जीवपुद्गलानां मुख्योऽवगाहः क्रियापरिणामात् ॥६॥** जीवानां पुद्गलानां च मुख्योऽवगाहो वेदितव्यः। कुतः? क्रियापरिणामात्। यथा हंसो जलमवगाहते इति मुख्यो व्यपदेशः तथा जीवपुद्गला आकाशमवगाहन्ते क्रियापरिणामादिति मुख्यो व्यपदेशो-ऽवसेयः।

**आकाशस्यावकाशदानसामर्थ्यात् परस्परप्रतिघाताभाव इति चेन्न; स्थूलानामन्योन्यप्रतिघातात् ॥७॥** स्यान्मतम् – यद्यवकाशदानसमर्थमाकाशं तस्य च सर्वत्र सन्निधानात्, मूर्तानां परस्परप्रतिघातो न स्यात्। दृश्यते च वज्रादिभिर्लोष्टादीनां भित्त्यादिभिश्च गवादीनाम्, ततोऽस्याऽवकाशदानसामर्थ्यं हीयत इति; तन्न; किं कारणम्? स्थूलानामन्योन्यप्रतिघातात्। स्थूला हि परस्परतः प्रतिहन्यन्ते न सूक्ष्मास्तेषामन्योन्यप्रवेशशक्तियोगात्, न तस्य तावताऽवकाशदानसामर्थ्यं हीयते।

**असाधारणलक्षणत्वानुपपत्तेरिति चेन्न; सर्वावगाहविशेषलक्षणोपपत्तेः॥८॥** स्यादेतद्यदि सूक्ष्मभावादितरेऽपि पदार्थाः अन्योन्यावकाशदानं कुर्वन्ति नाकाशस्येदम-साधारणलक्षणम्। असाधारणेन हि लक्षणेनास्तित्वमनुमीयते, अतस्तदभावादाकाशाभाव

इति; तन्न; किं कारणम्? सर्वावगाहविशेषलक्षणोपपत्तेः। यथा भूम्यादिष्वश्वादिगतिस्थि-त्युपग्रहरूपेणासाधारणलक्षणेनानुमीयते धर्माधर्मौ, तथा सर्वद्रव्यावगाहनविशेष-लक्षणोपपत्तेराकाशस्यास्तित्वमनुमीयते।

**अलोकाकाशे तदभावादभाव इति चेन्न; स्वभावापरित्यागात् ॥९॥** स्यान्मतम् – यद्यवकाशदानलक्षणमाकाशमलोकाकाशेऽवगाहिनामभावात् तल्लक्षणाभावात् लक्ष्यानवधारणप्रसङ्ग इति; तन्न; किं कारणम्? स्वभावापरित्यागात्। यथा हंसस्यावगाहकस्याभावेऽप्यवगाह्यत्वं जलस्य न हीयते, तथाऽवगाहित्वाभावेऽपि नाऽलोकाकाशस्याऽवकाशदानसामर्थ्यहानिः।

**अज्ञातत्वादभाव इति चेन्न; असिद्धेः॥१०॥** स्यादेतत् – नास्त्याकाशमजातत्वात् खरविषाणवदिति; तन्न; किं कारणम्? असिद्धेः। द्रव्यार्थिकगुणभावे पर्यायार्थिकप्राधान्यात् स्वप्रत्ययाऽगुरुलघुगुणवृद्धिहानिविकल्पापेक्षयाऽवगाहकजीवपुद्लपरप्रत्ययावगाहभेदविवक्षया चाऽऽकाशस्य जातत्वोपपत्तेः हेतोरसिद्धिः। अथवा, व्ययोत्पादावाकाशस्य दृश्येते। यथा चरमसमयस्याऽसर्वज्ञस्य सर्वज्ञत्वेनोत्पादस्तथोपलब्धेः। असर्वज्ञत्वेन व्ययस्तथाऽनुपलब्धेः, एवं चरमसमयस्यासर्वज्ञस्य साक्षादनुपलभ्यमाकाशं सर्वज्ञत्वोपपत्तावुपलभ्यत इत्युपलभ्यत्वेनोत्पन्नमनुपलभ्यत्वेन च विनष्टम्। यदि तेनाऽविनष्टमनुत्पन्नं च स्यात्; सर्वज्ञत्वमेवास्य न स्यात्। अतो व्ययोत्पाददर्शनादसिद्धो हेतुः। बुद्धिशब्दलक्षणस्य खरविषाणस्य स्वकारणसन्निधाने सति जयत्वत्त्वादस्तित्वाच्च साध्यसाधनधर्मासिद्धता दृष्टान्तस्य। खरो मृतः गौर्जातः स एव जीव इत्येकजीवविवक्षायां खरव्यपदेशभाजो जीवस्य गोजातिसंक्रमे विषाणोपलब्धेः, अथ खरविषाणस्यापि जात्यस्तित्वसद्भावादुभयधर्मासिद्धता। निरन्वयविनश्वरत्वे तु स्मृत्यभावात् लोकसंव्यवहारलोपः स्यात्।

**अनावृतिराकाशमिति चेन्न; नामवत् तत्सिद्धेः ॥१॥** स्यादेतत् – नाकाशं नाम किञ्चिद्वस्त्वस्ति, आवरणाभावमात्रं हि तदिति; तन्न; किं कारणम्? नामवत्तत्सिद्धेः। यथा नामवचनाद्यमूर्तत्वादनावृत्यपि सदस्तीत्यभ्युपगम्यते, तथाऽऽकाशमपि वस्तुभूतमित्यवसेयम्।

**शब्दलिङ्गत्वादिति चेन्न; पौद्गलिकत्वात् ॥२॥** स्यान्मतम् – नावगाहेनाऽऽकाशमनुमीयते। कुतस्तर्हि? शब्दलिङ्गत्वात्। शब्दो ह्याकाशगुणः वाताभिघात-बाह्यनिमित्तवशात् सर्वतोत्पद्यमान इन्द्रियप्रत्यक्षोऽन्यद्रव्यासंभवी गुणिनमाकाशं सर्वगतं गमयति।

**गुणानामाधारपरतन्त्रत्वादिति; तन्न; किं कारणम्? पौद्गलिकत्वात् ॥३॥** पुद्गलद्रव्यविकारो हि शब्दः, नाकाशगुणः। तस्योपरिष्टात् युक्तिर्वक्ष्यते।

**प्रधानविकार आकाशमिति चेन्न; तत्परिणामाभावादात्मवत् ॥३॥** स्यान्मतम् – प्रधानं नाम सत्त्वरजस्तमसां साम्यरूपमस्ति प्रसवस्वभावकम्, तद्विकारा महदादयस्तद्विकारविशेषः कश्चिदाकाशमिति; तन्न; किं कारणम्? तत्परिणामाभावादात्मवत्। यथा परमात्मनां नित्यत्वात् निष्क्रियत्वादनन्तत्वाद्यविशेषादाविर्भावतिरोभावाऽभावात् परिणामाभावः; तथा प्रधानस्यापि नित्यत्वनिष्क्रियत्वानन्तत्वाद्यविशेषान्न स्यात्परिणामः, तदभावात् प्रधानविकाराकाशकल्पनाव्याघातः। किञ्च, यथा घटस्य प्रधानविकारस्याऽनित्यत्वं मूर्तत्वमसर्वगतत्वं च तथाऽऽकाशस्यापि स्यात् विपर्ययो वा।

उपकारप्रकरणाभिसंबन्धेनेदमुच्यते –

## शरीरवाङ्मनःप्राणापानाः पुद्गलानाम् ॥१९॥

**शरीरे सत्युत्तरेषां प्रवृत्तिरेषां प्रवृत्तिदर्शनादादौ तद्वचनम् ॥१॥** सति शरीरेऽधिष्ठानभूते उत्तरेषां वागादीनामाधेयानां प्रवृत्तिरिति कृत्वा शरीरं प्रधानमतस्तस्यादौ ग्रहणं क्रियते।

**तदनन्तरं वागुपादानं पुरुषहितावाप्तिमूलत्वात् ॥२॥** तदनन्तरं वागुपादानं क्रियते। कुतः? पुरुषहितावाप्तिमूलत्वात्। पुरुषस्य हि वाक् हिते प्रवर्तिका श्रोत्रेन्द्रियद्वारेण।

**अन्येन्द्रियोपसंख्यानमिति चेन्न; शब्दस्येष्टसमुच्चयार्थत्वात् ॥३॥** स्यान्मतम् – चक्षुरादीन्यपीन्द्रियाणि पुरुषस्योपकारकाणि सन्ति, तेषामुपसंख्यानं कर्तव्यमिति; तन्न; किं कारणम्? चशब्दस्येष्टसमुच्चयार्थत्वात्। उत्तरसूत्रे वक्ष्यते चशब्दः स इष्टसमुच्चयार्थो भवति।

**आत्मप्रदेशाच्चक्षुराद्यग्रहणमिति चेन्न; द्रव्येन्द्रियस्य पौद्गलिकत्वात् ॥४॥** स्यादेतदुत्सेधाङ्गुलासंख्येयभागप्रमिता आत्मप्रदेशा ज्ञानावरणवीर्यान्तरायक्षयोपशमनिमित्ताश्चक्षुरादिव्यपदेशभाजो न पौद्गलिका इत्यनुपसंख्यानमिति; तन्न; किं कारणम्? द्रव्येन्द्रियस्य पौद्गलिकत्वात्। अङ्गोपाङ्गनामलाभनिमित्ता हि द्रव्येन्द्रियपरिणामाः पौद्गलिका आत्मनामुपकारे वर्तन्ते।

**मनोऽग्रहणप्रसङ्गाच्च॥५॥** यदि ज्ञानावरणवीर्यान्तरायक्षयोपशमनिमित्तत्वाच्चक्षुराद्यग्रहणं न्याय्यं मन्यते मनसोऽप्यग्रहणं प्राप्नोति। मनोऽपि हि नोइन्द्रियावरणक्षयोपशमापेक्षम्।

**अनवस्थितत्वात् मनोग्रहणमिति चेन्न; अनवस्थानेऽपि तन्निमित्तत्वात् ॥६॥** स्यान्मतम् – यथा चक्षुरादिव्यपदशेभाज आत्मप्रदेशा अवस्थिता नियतदेशत्वान्न तथा मनोऽवस्थितमस्ति, अत एव तदनिन्द्रियमित्युच्यते, ततोऽस्य न पृथग्ग्रहणमिति;

तन्न; किं कारणम्? अनवस्थानेऽपि तन्निमित्तत्वात्। यत्र यत्र प्रणिधानं तत्र तत्रात्मप्रदेशा अङ्गुलासंख्येयभागप्रमिता मनोव्यपदेशभाजः।

**वाग्ग्रहणप्रसङ्गाच्च॥७॥** यद्यात्मपरिणामाच्चक्षुराद्यग्रहणं कल्प्यते वाचोऽप्य-ग्रहणम्, वागपि ज्ञानावरणवीर्यान्तरायक्षयोपशमोपष्टम्भजनितवृत्तिः।

**बहिर्विनिःसृतानामात्मपरिणामाभावात्तद्ग्रहणमिति चेन्न; उक्तत्वात्॥८॥** स्यादेतत् – बहिर्विनिःसृता वाक् पुद्गला आत्मपरिणामा न भवन्ति, तदर्थं पृथग्ग्रहणमिति; तन्न; किं कारणम्? उक्तत्वात्। उक्तमेतत् तदुत्पतद्भिरेवाऽस्माभिः– चक्षुरादीनि द्रव्येन्द्रियाणि पौद्गलिकानीति। तस्मात् सूक्तं चशब्दस्येष्टसमुच्चयार्थत्वादिति।

**ततो मनोग्रहणं तद्वतस्तत्सिद्धेः॥९॥** ततः पश्चात् मनोग्रहणं क्रियते। कुतः? तद्वतस्तत्सिद्धेः। यस्यात्मनः शरीरमस्ति वाङ्निर्वर्तनसामर्थ्यं च, तस्य हि तद्भवतीति।

**अन्ते प्राणापानोपादानं सर्वसंसारिकार्यत्वात्॥१०॥** अन्ते प्राणापानोपादानं क्रियते। कुतः? सर्वसंसारिकार्यत्वात्। सर्वेषां हि संसारिणां जीवानां प्राणापानलक्षणं कार्यमस्ति।

**पुद्गलद्रव्यलक्षणार्थमिति चेन्न; वक्ष्यमाणत्वात्॥११॥** स्यान्मतम् – शरीर-वाङ्मनःप्राणापानग्रहणमिदं पुद्गलद्रव्यस्य लक्षणार्थं नोपकारप्रतिपादनार्थमिति; तन्न; किं कारणम्? वक्ष्यमाणत्वात्। वक्ष्यते ह्युत्तरत्र पुद्गललक्षणं व्यापि, इदं त्वात्मोपकार-कत्वादुपग्रहप्रकरणे उच्यते।

**प्रत्यक्षत्वादनुपदेशः इति चेन्न; केषाञ्चिदप्रत्यक्षत्वात्॥१२॥** स्यादेतत् – धर्मादीनां गत्युपग्रहादिप्रयोजनमुक्तं युक्तं तेषामप्रत्यक्षाणामधिगमहेतुत्वात्। शरीरा-द्युपग्रहाभिधानं तु पुद्गलानामयुक्तं प्रत्यक्षत्वात्। यो हि ब्रूयात् – पुरस्तादादित्य उदेति पश्चादस्तं गच्छति, मधुरो गुडः, कटुकं शृङ्गिवेरमिति, किं तेन कृतं स्यादिति?

तन्न; किं कारणम्? केषाञ्चित् प्रत्यक्षत्वादौदारिकवैक्रियिकाहारकतैजसकार्मणशरीराणि सौक्ष्म्यादप्रत्यक्षाणि, तदुदयापादितवृत्तीन्युपचयशरीराणि कानिचित् प्रत्यक्षाणि कानिचिदप्रत्यक्षाणि। मनोऽप्रत्यक्षमेव। वाक्प्राणापानाः केचित् प्रत्यक्षा; केचिदप्रत्यक्षा इन्द्रियगोचरातीतत्वात्। अतः पुद्गलोपकारस्फुटीकरणार्थः शरीराद्युपदेशः क्रियते।

**शरीराण्युक्तानि॥१३॥** शरीराण्यौदारिकादीनि व्याख्यातानि पौद्गलिकानि।

**कार्मणमपौद्गलिकमिति चेन्न; तद्विपाकस्य मूर्तिमत्संबन्धनिमित्तत्वात्॥१४॥** स्यादेतत् – कार्मणं पौद्गलिकं न भवति। कुतः? अनाकारत्वात्। आकारवतां ह्यौदारिकादीनां पौद्गलिकत्वं युक्तं कार्मणं त्वनाकारमिति; तन्न; किं कारणम्? तद्विपाकस्य मूर्तिमत्संबन्धनिमित्तत्वात्। यथा व्रीह्यादीनामुदकादिद्रव्यसंबन्धप्रापितपाकानां पौद्गलिकत्वं दृष्टं तथा कार्मणमपि गुडकण्टकादिमूर्तिमद्द्रव्योपनिपाते सति विपच्यमानत्वात् पौद्गलिकमित्यवसेयम्। न ह्यमूर्तं किञ्चिन्मूर्तिमत्संबन्धे सति विपच्यमानं दृष्टमिति।

**वाग् द्विधाऽपि पौद्गलिकी तन्निमित्तत्वात्॥१५॥** द्विधा वाक् भाववाक् द्रव्यवागिति। सोभयी पौद्गलिकी। कुतः? तन्निमित्तत्वात् पुद्गलकार्यत्वादित्यर्थः। भाववाक् तावद्वीर्यान्तरायमतिश्रुतज्ञानावरणक्षयोपशमाङ्गोपाङ्गनामलाभनिमित्तत्वात् पौद्गलिकी, तदभावे तद्वृत्त्यभावात्। तत्सामर्थ्योपेतेन क्रियावतात्मना प्रेर्यमाणाः पुद्गला वाक्त्वेन विपरिणमन्त इति द्रव्यवागपि पौद्गलिकी श्रोत्रेन्द्रियविषयत्वात्। पुनः कुतो न गृह्यते इति चेत्? उच्यते –

**पुनरग्रहणं तडिद्द्रव्यवदसंहरत्वात्॥१६॥** यथा तडिद्द्रव्यं चक्षुषोपलब्धं विष्वग्विशीर्णत्वात् पुनर्न दृश्यते तथा श्रोत्रेणोपलब्धा वाक् विष्वग्विशीर्णा पुनर्न श्रूयते। अथ कथं चक्षुरादिभिरसौ न गृह्यते?

**चक्षुरादिग्रहणाभावो घ्राणग्राह्ये रसाद्यनुपलब्धिवत् ॥७॥** यथा घ्राणग्राह्ये गन्धद्रव्ये तदविनाभाविनः सन्तोऽपि रसादयो नोपलभ्यन्ते, तथा श्रोत्रेन्द्रियविषयोऽपि शेषेन्द्रियैर्न गृह्यते सूक्ष्मत्वात्।

**अमूर्तिरिति चेन्न; मूर्तिमद्ग्रहणप्रेरणावरोधदर्शनात् ॥८॥** स्यादेतदमूर्तः शब्दः अमूर्तगुणत्वादिति, तन्न; किं कारणम्? मूर्तिमद्ग्रहणप्रेरणावरोधदर्शनात्। मूर्तिमतेन्द्रियेण शब्दो गृह्यते। न चामूर्तः कश्चिदिन्द्रियग्राह्योऽस्ति। प्रेर्यते च मूर्तिमता पवनेनार्कतूलराशिवत् दिगन्तरस्थेन ग्राह्यत्वात्। न चाऽमूर्तस्य मूतिमता प्रेरणं प्रयुज्यते। अवरुध्यते च शब्दः नलविलादिभिः कुल्याजलवत्। न चाऽमूर्तं किञ्चिन्मूर्तिमताऽ-वरुध्यमानं दृष्टमिति।

अत्राह – नैते हेतवः। यस्तावदुच्यते – इन्द्रियग्राह्यत्वादिति; श्रोत्रमाकाशमय-ममूर्त्तममूर्त्तस्य ग्राहकमिति को विरोधः? यश्चोच्यते प्रेरणादिति; नासौ प्रेर्यते गुणस्य गमनाभावात्। देशान्तरस्थैन कथं गृह्यते इति चेन्न; "संयोगाद्बिभागात् शब्दाच्च शब्दनिष्पत्तिः" इति शब्दान्तरारम्भाद् ग्रहणम्। वेगवद्द्रव्याभिघातादेव दिगन्तरे शब्दान्तरानारम्भादेकदिक्कारम्भे सत्यवरोध इव लक्ष्यते न तु मुख्योऽस्तीति। अत्रोच्यते – नैते दोषाः। श्रोत्रं 'तावदाकाशमयम्' इति नोपपद्यते; आकाशस्यामूर्तस्य कार्यान्तरारम्भशक्तिविरहात्। अदृष्टवशादिति चेत् चिन्त्यमेतत् – किमसावदृष्ट आकाशं संस्करोत्युतात्मानमाहोस्वित् शरीरैकदेशमिति? न तावदाकाशे संस्कारो युज्यते; अमूर्तित्वादन्यगुणत्वादसंबन्धाच्च। आत्मन्यपि शरीरादत्यन्तमन्यत्वेन कल्पिते नित्ये निरवयवे संस्काराधानं न युज्यते, तदुपार्जनफलादानाऽसंभवात्। नापि शरीरैकदेशे युज्यते; अन्यगुणत्वादनभिसंबन्धाच्च। किञ्च, मूर्तिमत्संबन्धजनितविपत्संपत्तिदर्शनात् श्रोत्रं मूर्त्तमेवेत्यवसेयम्। यदप्युच्यते– स्पर्शवद्द्रव्याभिघातात् शब्दान्तरानारम्भ इति; खात्पतिता नो रत्नवृष्टिः; स्पर्शवद्द्रव्याभिघातादेव मूर्तत्वमस्य सिद्धम्। न ह्यमूर्तः

कश्चित् मूर्तिमता विहन्यते। तत एव च मुख्यावरोधसिद्धिः स्पर्शवदनभिघाताभ्युपगमात्।

**अभिभवादिदर्शनाच्च मूर्तः शब्दः इत्यवगन्तव्यम्॥१९॥** यथा तारकादयो भास्करप्रभाभिवान्मूर्तिमन्तः। तथा सिंहगजभेर्यादिशब्दैर्बृहद्भिः शकुनिरुतादयोऽभिभूयन्ते। तथा कंसादिषु पतिता ध्वन्यन्तरारम्भे हेतवो भवन्ति। गिरिगहृणरादिषु च प्रतिहताः प्रतिश्रुद्भावमास्कन्दन्ति। अत्राह – अमूर्तेरप्यभिभवा दृश्यन्ते यथा विज्ञानस्य सुरादिभिः मूर्तिमद्भिस्ततो नायं निश्चयहेतुरिति उच्यते – नायं व्यभिचारः, विज्ञानस्य क्षायोपशमिकस्य पौद्गलिकत्वाभ्युपगमात्। इतरथा हि आकाशवन्नाभिभूयते।

**मनश्च द्वितयं पौद्गलिकं तन्मयत्वात्॥२०॥** द्विप्रकारं मनो भावमनो द्रव्यमनश्चेति। तदुभयमपि पौद्गलिकम्। कुत? तन्मयत्वात्। भावमनस्तावत् लब्ध्युपयोगलक्षणं पुद्गलावलम्बनत्वात् पौद्गलिकम्। द्रव्यमनश्च ज्ञानावरणवीर्यान्तरायक्षयोपशमलाभप्रत्ययाः गुणदोषविचारस्मरणादिप्रणिधानाभिमुखस्याऽऽनुग्राहकाः पुद्गलाः वीर्यविशेषावर्जनसमर्थाः मनस्त्वेन परिणता इति कृत्वा पौद्गलिकं नाकाशमयम्।

**अर्थान्तरमिति चेन्न; अनेकान्तादिन्द्रियवत्॥२१॥** स्यादेतदर्थान्तरमात्मनो मन इति; तन्न; किं कारणम्? अनेकान्तादिन्द्रिवत्। यथा वीर्यान्तरायज्ञानावरणक्षयोपशमापेक्षस्याऽऽत्मन एवेन्द्रियपरिणामादेशात्स्यादनन्यदिन्द्रियम्, इन्द्रियनिवृत्तावप्यात्मनोऽवस्थानात् स्यादन्यत् तथाऽऽत्मन एव तत्क्षयोपशमापेक्षस्य मनःपरिणामादेशात् स्यादनन्यत् मनोनिवृत्तावात्मनोऽवस्थानात् स्यादन्यत्

**अवस्थायीति चेन्न; अनन्तरसमयप्रच्युतेः॥२२॥** स्यादेतदवस्थायि मनः, न तस्य निवृत्तिरिति; तन्न; किं कारणम्? अनन्तरसमयप्रच्युतेः। मनस्त्वेन हि परिणताः पुद्गला गुणदोषविचारस्मरणादि कार्यं कृत्वा तदनन्तरसमय एव मनस्त्वात् प्रच्यवन्ते।

**आदेशवचनाच्च॥२३॥** नायमेकान्तः – अवस्थाय्येव मन इति। कुतः? आदेश-वचनात्। द्रव्यार्थादेशान्मनः स्यादवस्थायि, पर्यायादेशात् स्यादनवस्थायि।

**एकद्रव्यमिति चेन्न; असामर्थ्यात्॥२४॥** स्यादेतदेकद्रव्यं मनः प्रत्यात्मं वर्तते इति। उक्तं च-"प्रयत्नायौगपद्यात् ज्ञानायौगपद्याच्चैकं मनः" इति; तन्न; किं कारणम्? असामर्थ्यात्। कथमसामर्थ्यम्? परमाणुमात्रत्वात्। परमाणुमात्रं हि मनः तदात्मने-न्द्रियेण च युक्तं सत् स्वप्रयोजनं प्रति व्याप्रियते इत्यभिमतम्। तत्रेदं विचार्यते तदात्मेन्द्रियाभ्यां सर्वात्मना वा संबन्ध्येत् तदेकदेशेन वा? यदि सर्वात्मना तयोरात्मेन्द्रिययोरर्थान्तरभावात् व्यतिरिक्तयोरन्यतरेण सर्वात्मना संबन्धः स्यात् अणोर्मनसः नोभाभ्यां युगपद्विरोधात्। अथान्येन देशेनाऽऽत्मना संबध्यतेऽन्येन देशेनेन्द्रियेणैवं सति प्रदेशवत्त्वं मनसः प्रसक्तम्। तच्चानिष्टमणुमात्रत्वान्मनसः। किञ्च, यद्यात्मा मनसा सर्वात्मना संबध्यते मनसोऽणुत्वादात्मनोऽप्यणुत्वम्, आत्मनो विभुत्वान्मनसो वा विभुत्वं प्रसज्यते। अथैकदेशेनाऽऽत्मा मनसा संयुज्यते ननु प्रदेशवत्त्वमात्मनः प्रसक्तम्। ततश्चतुष्टयत्रयद्वयसन्निकर्षज्ञानसुखदुःखादीनां प्रदेशवृत्तित्वा-दात्मनः कश्चित् प्रदेशो ज्ञानादियुक्तः कश्चित् प्रदेशो ज्ञानादिविरहित इति। यत्र ज्ञानादिविरहितस्तत्रात्मलिङ्गाभावात् तदभाव इति सर्वगतत्वाभावः स्यात्। तथेन्द्रियेण मनो यदि सर्वात्मना संयुज्यते; इन्द्रियस्याणुमात्रत्वं मनसो वेन्द्रियमात्रत्वान्नाणुत्वम्। अथैकदेशेन मन इन्द्रियेण संयुज्यते न तर्हि अणु तत्। किञ्च, गुणगुणिनोरन्यत्वान्नित्यत्वाच्च मनसः संयोगविभागपरिणामाभावात् नास्यात्मना न चेन्द्रियैः संयोगविभागौ स्तः। अथ संयोगविभागाभ्यां मनः परिणमते; न

तर्हि नित्यम्। न च गुणगुणिनोरन्यत्वम्। अचेतनत्वाच्च मनसोऽनेनैव इन्द्रियेणाऽनेनैव चात्मना संयोक्तव्यं नेन्द्रियान्तरैरिति विशेषज्ञानाभावात्। प्रतिनियतात्मेन्द्रियसंयोगाभावः कर्मवदिति चेन्न; पौरुषेयपरिणामानुरञ्जितत्वात् कर्मणः स्याच्चैतन्यम्, पुद्गलद्रव्या-देशाच्च स्यादचेतनत्वमिति विषमो दृष्टान्तः। सौक्ष्म्याच्च मनसश्चक्षुरादीनां रूपादिग्रहणयोग्यत्वाभावोऽणुना मनसा चक्षुरादेः कृत्स्नस्याऽनधिष्ठितत्वात्। यावान् देशश्चक्षुरादीनामणुना मनसाऽधिष्ठितस्तावता एव रूपादिग्रहणसामर्थ्यं भवेत् न कृत्स्नस्य। दृष्टं च कृत्स्नग्रहणं तस्मात् नाणु।

**आशुसंचारीति चेन्न; अचेतनत्वात् ॥२५॥** स्यान्मतमणुमात्रमपि सन्मनः आशुसंचारित्वात् कृत्स्नग्रहणहेतुरिति तन्न; किं कारणम्? अचेतनत्वात्। न ह्यचेतनस्य मनसः बुद्धिपूर्विका सर्वत्र व्यापृतिर्युक्ता।

**अदृष्टवशादिति चेन्न; क्रियापरिणामाभावात् ॥२६॥** स्यादेतत् – यथा पुरुषेण प्रेर्यमाणमलातचक्रमाशुसंचरणात् सर्वत्रोपलभ्यते तथाऽदृष्टवशान्मनसो भ्रमणमिति; तन्न; किं कारणम्? क्रियापरिणामाभावात्। क्रियावता हि पुरुषेण प्रेर्यमाणमलातचक्रं सर्वत्रोपलभ्यते इत्येतद्युक्तम्, अदृष्टः पुनरात्मगुणः स्वयमक्रियोऽन्यत्र क्रियाहेतुरित्येतदयुक्तमित्युक्तं पुरस्तात्।

**अनादिसंबन्धमिति चेन्न; संयोगित्वात् ॥२७॥** स्यादेतदनादिसंबन्धमात्मना मनः स्वभावत एवेति; तन्न; किं कारणम्? संयोगित्वात्। अप्राप्तिपूर्विका हि प्राप्तिः संयोगः इत्यणुमनोवादिनाऽभ्युपगम्यते इति न मनोद्रव्यस्याऽऽत्मनाऽनादिसंबन्धः। क्षायोपशमिकत्वाच्च नार्हतस्याऽऽत्मनाऽनादिसंबन्धं मन इति सिद्धमस्ति।

**तत्परित्यागविरोधाच्च ॥२८॥** यद्यनादिसंबन्धं मनो भवेदतोऽस्य परित्यागविरोधः स्यादस्ति च परित्यागः। अतो नानादिसंबन्धं मनः।

**कर्मवदिति चेन्न; अनेकान्तात् ॥२९॥** स्यादेतत् – यथा जीवकर्मणोरनादि-सम्बन्धेऽपि कर्मपरित्यागाविरोधः तथा मनसोऽपीति; तन्न; किं कारणम्? अनेकान्तात्। नायमेकान्तः – जीवकर्मणोरनादिसंबन्ध इति। किं तर्हि? कर्मबन्ध-सन्तत्यपेक्षया स्यादनादिसंबन्धः, मिथ्यादर्शनादिप्रत्ययापादितबन्धभेदापेक्षया स्यादादि-मान्। अतोऽस्य तत्प्रत्यनीकभावनाप्रकर्षसन्निधौ परित्याग इति नास्ति विरोधः।

**इन्द्रियसहकारिवेदनावगमादिति चेन्न; चेतनास्वभावत्वात् ॥३०॥** स्यादेतदि-न्द्रियाणां सहकारिकारणं मनः। कुतः? चक्षुरादिभिरिष्टानिष्टरूपरसादिविषयोपलब्धौ तत्सन्निधाने सुखदुःखवेदनावगमान्नान्योऽस्य व्यापारोऽस्तीति; तन्न; किं कारणम्? चेतनास्वभावत्वात्। निष्टप्तायःपिण्डवदिन्द्रियपरिणामादात्मैवेन्द्रियं मनश्चेतनास्वाभाव्या-दिन्द्रियाण्येव वेदनावगमं कुर्वन्ति। अतश्चैतदेवं यदि मनोऽन्तरेणेन्द्रियाणां वेदनावगमो न स्यादेकेन्द्रियविकलेन्द्रियाणामसंज्ञिपञ्चेन्द्रियाणाञ्च वेदनावगमो न स्यात्।

**पृथगुपकारानुपलम्भात् तदभाव इति चेन्न; गुणदोषविचारादिदर्शनात् ॥३१॥** स्यान्मतम् – नास्ति मनः पृथगुपकारानुपलम्भदिति; तन्न; किं कारणम्? गुणदोषविचारादिदर्शनान्मनसः। मनोलब्धिमताऽऽत्मना मनस्त्वेन परिणमिता पुद्गलाः तिमिरान्धकारादिबाह्याभ्यंतरेन्द्रियप्रतिघातहेतुसन्निधानेऽपि गुणदोषविचारस्मरणादिव्या-पारे साचिव्यमनुभवन्त्यतोऽस्त्यन्तःकरणं मनः।

**विज्ञानमिति चेन्न; तत्सामर्थ्याभावात् ॥३२॥** स्यान्मतम् – न मनो नामाऽन्य-दस्ति। किं तर्हि? विज्ञानमेव किञ्चिन्मनः इति व्यपदिश्यते। उक्तं च-

"षण्णामनन्तरातीतं विज्ञानं यद्धि तन्मनः" इति; तन्न; किं कारणम्? तत्सामर्थ्याभावात्। वर्तमानमेव विज्ञानं बाह्यमर्थं नावबोद्धुमलं किमङ्ग पुनरतीतम्?

वर्तमानं तावद्विज्ञानं क्षणिकं पूर्वोत्तरविज्ञानसंबन्धनिरुत्सुकं कथं गुणदोषविचार स्मरणादिव्यापारे साचिव्यं कुर्यात्? अनुस्मरणं हीदं स्वयमनुभूतस्यार्थस्य दृष्टं नानुभूतस्य नान्यानुभूतस्य। न च क्षणिकैकान्ते तत्संभवति। एकसन्तानपतितत्वात् तदुपपत्तिरिति चेन्न; तदवस्तुत्वात् तदतीतमत्यन्तमसत् कथमिव गुणदोषविचार स्मरणादौ सहायि भवेत्? आलयविज्ञानं बीजशक्तिरूपं सदवस्थितमालम्बनं भवतीति चेत्; तस्यैकस्य कालान्तरावस्थायित्वाभ्युपगमे क्षणिकत्वप्रतिज्ञाहानिः। न चेत्; तदालम्बनाभावः।

**प्रधानविकार इति चेन्न; अचेतनत्वात् ॥३३॥** स्यादेतत् – न पौद्गलिकं मनः। किं तर्हि? प्रधानविकारः। प्रधानस्य महदहङ्कारादिभावेन परिणामिनः कश्चिद्विकारविशेषो मनः इत्याख्यायते इति; तन्न; किं कारणम्? अचेतनत्वात्। प्रधानमचेतनं तद्विकाराश्च तदात्मका इति घटवदचेतनस्य तस्य गुणदोषविचारस्मरणादिव्यापारे साचिव्याभावः। किञ्च, मनः करणं विचारादेः, कर्ता पुरुषः, प्रधानं वा स्यात्? न तावत् पुरुषः; निर्गुणत्वात्, सात्त्विका हि गुणदोषविचारादयः। न च प्रधानम्; तस्याऽचेतनत्वात्। न हि लोके किञ्चिदचेतनं गुणदोषविचारादेः कर्तृ दृष्टम्। किञ्च

**तदव्यतिरेकात्तदभावः॥३४॥** प्रधानात् सत्त्वरजस्तमसां साम्यावस्थारूपात् महदहङ्कारादयः परिणामा वैषम्यरूपाः व्यतिरिक्ता वा स्युरव्यतिरिक्ता वा? यदि व्यतिरिक्ताः; कार्यकारणैकत्वैकान्तप्रतिज्ञाहानिः। अथाव्यतिरिक्ताः; प्रधानमेव न परिणामा नाम केचन सन्तीति मनसो निवृत्तिः।

**कोष्ठ्यो वायुरुच्छवासलक्षणः प्राणः॥३५॥** वीर्यान्तरायज्ञानावरणक्षयोपशमाङ्गोपाङ्गनामोदयापेक्षिणाऽऽत्मनोदस्यमानः कोष्ठ्यो वायुरुच्छवसलक्षणः प्राण इत्युच्यते।

**बाह्यो वायुरभ्यन्तरीक्रियमाणोऽपानः ॥३६॥** तेनैवाऽऽत्मना बाह्यो वायुरभ्यन्तरीक्रियमाणो निःश्वासलक्षणोऽपान इत्याख्यायते। एतावप्यात्मानुग्राहिणौ जीवितहेतुत्वात्।

**तन्मूर्तिमत्त्वं प्रतिघातादिदर्शनात् ॥३७॥** तयोः प्राणापानयोः तेषां वाङ्मनःप्राणापानानां वा मूर्तिमत्त्वमवगन्तव्यम्। कुतः? प्रतिघातादिदर्शनात्। प्रतिभयहेतुभिरशनिशब्दादिभिर्मनसः प्रतिघातो दृश्यते, सुरादिभिश्चाऽभिभवः। हस्तपुटादिभिरास्यसंवरणात् प्राणापानयोः प्रतिघात उपलभ्यते, श्लेष्मणा चाभिभवः। न चाऽमूर्तस्य मूर्तिमद्भिरभिरविघातादयः स्युः।

**अत आत्मास्तित्वसिद्धिः प्राणापानादिकर्मणः तत्कार्यत्वात् ॥३८॥** अत आत्मनोऽस्तित्वं प्रासिधत्। कुतः? प्राणापानादिकर्मणः तत्कार्यत्वात्। यथा यन्त्रप्रतिमाचेष्टितं प्रयोक्तुरस्तित्वं गमयति तथा प्राणापानादिकर्मापि क्रियावन्तमात्मानं साधयति, असति तस्मिन्नप्रवृत्तेः। नाकस्मान्नियमदर्शनात्। न विज्ञानादिकृतं तेषाममूर्तत्वे प्रेरणशक्तिविरहात्। न रूपस्कन्धकृतम् तस्याचेतनत्वात्। सर्वेषां निरीहकत्वात् कर्माभाव इति चेन्न; देशान्तरप्राप्त्यभावप्रसङ्गात्। वायुधातुविशेषात् देशान्तरे प्रादुर्भावः क्रियेत्युपचर्यते न मुख्या क्रियाऽस्ति। "भूतिर्यैषां क्रिया सैव" इति वचनादिति चेन्न; वायुधातुविशेषाऽसामर्थ्यात्। वायुधातुरपि निष्क्रियः स कथमिव देशान्तरप्रादुर्भूतिहेतुः स्यात्। क्षणिकत्वाभ्युपगमादनवस्थितानां कर्माभावः इति चेन्न; असिद्धत्वादयुक्तेश्च।

**प्राण्यङ्गत्वाद् द्वन्द्वैकवद्भावप्रसङ्ग इति चेन्न; अङ्गाङ्गिद्वन्द्वे तदभावात् ॥३९॥** स्यान्मतम् – शरीरं च वाक् च मनश्च प्राणश्चाऽपानश्च शरीरवाङ्मनःप्राणापाना इति द्वन्द्वे कृते एकवद्भावः प्राप्नोति। कुतः? प्राण्यङ्गत्वादिति; तन्न; किं कारणम्? अङ्गाङ्गिद्वन्द्वे तदभावात्। प्राण्यङ्गानामेव यो द्वन्द्वः तस्यैकवद्भावः उक्तः। अङ्गमवयव एकदेश इत्यनर्थान्तरम्। शरीरमत्राङ्गि चास्तीत्येकवद्भावो न भवति। अथवा, वागादीनि नाङ्गानि दन्तादिवदनवस्थितत्वात्।

अथवा, द्वन्द्वैकवद्भावः सर्वः समाहारविषयः। समाहारश्चैकप्राणिविषयाणां युक्तः। नानाप्राणिस्थाश्चैते विवक्षिताः, ततो नास्त्येकवद्भावः।

**पुद्गलशब्दो निर्दिष्टार्थः॥४०॥** पुद्गलशब्दस्यार्थो निर्दिष्टः पुंगिलनात् पूरणगलनाद्वा पुद्गल इति।

**उपग्रहप्रकरणात्कर्तरि षष्ठी॥४१॥** उपग्रहशब्दः प्रकृतः, स च भावसाधनः तेन कर्तुरनुक्तत्वात् पुद्गलानामिति कर्तरि षष्ठी द्रष्टव्या। तेन शरीरादिपरिणामैरात्मनां पुद्गला उपग्रहीतार इत्युक्तं भवति। ते चात्मानः सक्रियाः कर्ममलीमसाः सन्तः शरीरादि-कृतमुपकारं तद्बन्धपूर्वकमनुभवन्तीत्येतदुक्तम्। एकान्तनिष्क्रियत्वेऽत्यन्तशुद्धत्वे च शरीरादिभिः बन्धाभावात् तत्कृतोपकाराभावस्तत्क्रियाहेतुत्वाभावश्चेति संसाराभावस्त-दभावात् कुतो मोक्षः?

यथा चैतच्चतुष्टयं गमनव्याहरणचिन्तनप्राणनादिभावेन परिणामविशेषाहित-मनुग्राहकं पौद्गलिकत्वात् तथाऽयमपि तत्कृत एवोपकार इति प्रदर्शयन्नाह–

## सुखदुःखजीवितमरणोपग्रहाश्च॥२०॥

**बाह्यप्रत्ययवशात् सद्वेद्योदयादात्मनः प्रसादः सुखम्॥१॥** यदात्मस्थं सद्वेद्यं कर्म द्रव्यादिबाह्यप्रत्ययवशात् परिपाकमुपयाति तदात्मनः प्रसादः प्रीतिरूपः सुखमित्या-ख्यायते।

**तथाऽसद्वेद्योदयादात्मपरिणामः संक्लेशप्रायः स दुःखम्॥२॥** तथा तेन प्रकारेण बाह्यप्रत्ययवशेनेत्यर्थः, असद्वेद्योदयादात्मपरिणामो यः संक्लेशप्रायः स दुःखमिति कथ्यते।

**भवस्थितिनिमित्तायुर्द्रव्यसंबन्धिनो जीवस्य प्राणापानलक्षणक्रियाविशेषाव्युपरमो जीवितम् ॥३॥** भवधारणकारणमायुराख्यं कर्म, तदुदयापादितां भवस्थितिमादधानस्य जीवस्य पूर्वोक्तस्य प्राणापानलक्षणस्य क्रियाविशेषस्याविच्छेदो जीवितमिति प्रत्येतव्यम्।

**तदुच्छेदो मरणम् ॥४॥** तस्य जीवितस्योच्छेदो जीवस्य मरणमित्यवसेयम्।

**सुखग्रहणमादौ तदर्थत्वात्परिस्पन्दस्य॥५॥** सर्वेषां प्राणिनां परिस्पन्दः सुख-प्राप्त्यर्थः, ततोऽस्य ग्रहणमादौ क्रियते।

**तदनन्तरं दुःखवचनं तत्प्रतिपक्षत्वात् ॥६॥** सुखस्य हि प्रतिपक्षभूतं दुःखम प्रीतिहेतुत्वात्। ततोऽस्य वचनं तदनन्तरं क्रियते।

**जीवतस्तदुभयदर्शनात् तदनन्तरं जीवितग्रहणम्॥७॥** यतः तदुभयं सुखदुःखं जीवतो भवति, ततः तदनन्तरं जीवितग्रहणं क्रियते।

**अन्ते प्राप्यत्वान्मरणस्यान्ते वचनम् ॥८॥** आयुःक्षयनिमित्तं मरणमन्ते प्राणिभिरवाप्यत इति तदुपादानमन्ते क्रियते। सुखं च दुःखं च जीवितं च मरणं च सुखदुःखजीवितमरणानि तान्वेवोपग्रहः सुखदुःखजीवितमरणोपग्रहः। केषाम्? पुद्गलाना-मिति प्रकृतमभिसंबध्यते।

**प्रकृतत्वादुपग्रहावचनमिति चेन्न; स्वोपग्रहप्रदर्शनार्थत्वात् ॥९॥** स्यान्मतं प्रकृत-मुपग्रहवचनमस्ति तेन शरीरवाङ्मनःप्राणापानैः सुखदुःखजीवितमरणैश्च पुद्गला जीवानुपगृह्णन्तीत्यस्मिन्नर्थे प्रतिपादिते पुनरुपग्रहवचनमनर्थकमिति; तन्न; किं कारणम्? स्वोपग्रहप्रदर्शनार्थत्वात्। यथा धर्माधर्माकाशानि परेषामेवोपग्रहं कुर्वन्ति न तथा पुद्गलाः, स्वोपग्रहश्चैषामस्तीति प्रदर्शनार्थं पुनरुपग्रहवचनं क्रियते। तद्यथा – कंसादीनां भस्मादीनि जलादीनां कतकादीन्ययःप्रभृतीनामुदकादीन्युपकारं कुर्वन्ति।

**मरणमात्मोपग्रहो नेति चेन्न; निर्विण्णस्य तत्प्रियत्वात् ॥१०॥** स्यादेतत् – मरणमात्मोपग्रहो नोपपद्यते। कुतः? अनिष्टत्वात्। न हि कस्यचित् मरणमीप्सितमिति; तन्न; किं कारणम्? निर्विण्णस्य तत्प्रियत्वात्। व्याधिपीडाशोकादिभिर्जीवितान्नि-वृत्तादरस्य निर्विण्णस्य हि जनस्य मरणं प्रियं लोके दृश्यते।

**प्रयोजनप्रतिपादनार्थत्वाच्च दुःखवत् ॥११॥** यथा दुःखमनिष्टमपि जीवानां पुद्गलैः प्रतिपाद्यं प्रयोजनमिति गृह्यते तथा मरणमपीति नास्ति दोषः।

**लघ्वर्थमेकसूत्रीकरणमिति चेन्न; आशङ्कानिवृत्त्यर्थत्वात् ॥१२॥** स्यान्मतं 'शरीरवाङ्मनःप्राणापानाः सुखदुःखजीवितमरणोपग्रहाश्च पुद्गलानाम् इत्येकमेव सूत्रं कर्तव्यं लघ्वर्थमिति; तन्न; किं कारणम्? आशङ्कानिवृत्त्यर्थत्वात्। शरीरवाङ्मनःप्राणापाना हेतवश्चत्वारः सुखदुःखजीवितमरणानि च फलानि चत्वारि तेषां याथासंख्यमनिष्ट-माशङ्क्येत, तन्निवृत्त्यर्थं नानायोगकरणम्। उत्तरसूत्रे सुखादिसंबन्धनार्थं च।

**तदनुपपत्तिर्नित्यानित्यपक्षयोर्विकारावस्थानाभावात् ॥१३॥** तेषां सुखादीना-मनुपपत्तिः। क्व? नित्यपक्षेऽनित्यपक्षे च। कुतः? विकारावस्थानाभावात्। तद्यथा – नित्यपक्षे तावदात्मनां पूर्वापरकालतुल्यत्वात् परिणामान्तरसंक्रान्तिलक्षणस्य विकारस्याभावात् सुखादिकल्पनमयुक्तम्। अनित्यपक्षे चावस्थानाभावात् सुखादि संबन्धोऽनुपपन्नः। अवस्थितस्य हीष्टानिष्टशब्दस्पर्शादिसन्निपाते सति सुखादिप्रभवः स्यात्। स चाकस्मान्न भवति। किं तर्हि? कुशलाकुशलभावनापूर्वकः। कुशलाकुशलभावना च स्मृत्यभिसंबन्धिचेष्टाभिनिर्वृत्तिलक्षणा। स्मृत्यादयश्चानवस्थितस्य न संभवन्तीत्यतो नित्यानित्यात्मकस्यात्मनः सुखादिनिरूपणं निरवद्यम्।

आह – अजीवद्रव्यचतुष्टयस्य यथा परानुग्रहः सान्ततिकः किमेवमात्मनामप्युतान्यो विधिरस्तीति? अत्रोच्यते –

## परस्परोपग्रहो जीवानाम्॥२१॥

**कर्मव्यतिहारविषयः परस्परशब्दः॥१॥** कर्मव्यतिहारः क्रियाव्यतिहार इत्यर्थः। तद्विषयोऽयं परस्परशब्दः। परस्परस्योपग्रहः परस्परोपग्रहः। कः पुनरसौ?

**स्वामिभृत्यादिभावेन वृत्तिः परस्परोपग्रहः॥२॥** स्वामी भृत्य आचार्यः शिष्य इत्येवमादिभावेन वृत्तिः परस्परोपग्रह इत्युच्यते। स्वामी तावत् वित्तत्यागादिना भृत्यादीनामुपग्रहे वर्तते भृत्याश्च हितप्रतिपादनेनाहितप्रतिषेधेन च। आचार्य उभयलोकफलप्रदोपदेशदर्शनेन तदुपदेशविहितक्रियानुष्ठापनेन च शिष्याणामनुग्रहे वर्तते। शिष्या अपि तदानुकूल्यवृत्त्या।

**प्रकृतत्वादुपग्रहावचनमिति चेन्न; अनन्तरचतुष्टयप्रतिनिर्देशार्थत्वात्॥३॥** स्यादेतत् – प्रकृतमुपग्रहवचनमस्ति तदभिसंबन्धात् पुनरुपग्रहवचनमनर्थकमिति तन्न; किं कारणम्? अनन्तरचतुष्टयप्रतिनिर्देशार्थत्वात्। नाऽपूर्वः कश्चित् परस्परोपग्रहो जीवानामस्ति, अनन्तरसूत्रे निर्दिष्टः सुखादिचतुष्ट्योपग्रह एवेति प्रदर्शनार्थं पुनरुपग्रहवचनम्।

**स्त्रीपुंसरतिवदनियमप्रदर्शनार्थं च॥४॥** यथा स्त्रीपुंसौ यौगपद्येन रतिक्रियायां परस्परस्योपकुरुतः न तथा सुखाद्युपग्रहे नियम इति प्रदर्शनार्थं च पुनरुपग्रहवचनं क्रियते। जीवो हि कश्चित् स्वस्य सुखं कुर्वन् परस्यैकस्यसुखं करोति कश्चिद् द्वयोः कश्चिद्वहूनाम्। कश्चिद् दुःखमात्मनः कुर्वन् परस्यैकस्य द्वयोः बहूनां वा करोति। कदाचिद् द्वौ बहवो वाऽऽत्मानः सुखं दुःखं वा कुर्वन्तः परस्यैकस्य द्वयोर्बहूनां वा सुखं दुःखमुत्पादयन्ति। एवमितरत्रापि योज्यम्।

आह – यद्यवश्यं सतोपकारिणा भवितव्यम्, संश्च कालोऽभिमतः स किमुपकारः इति? अत्रोच्यते – तस्य खलु वक्ष्यमाणस्वतत्त्वस्याऽमूर्तेः –

## वर्तनापरिणामक्रियाः परत्वापरत्वे च कालस्य॥२२॥

अथवा, यथा धर्मादीनामस्तित्वस्याऽऽविर्भावक उपकार उक्तो गत्यादिः, तथा कालस्यापि प्रतिनियत उपकारोऽस्तित्वसंसूचकोऽस्ति, उत नास्ति? अस्त्युपकारः। यद्येवं स उच्यतामिति? अत आह – वर्तनादीनि।

**करणाधिकरणयोर्वर्त्तनेति चेत्; युटि सति ङीप्रसङ्गः॥१॥** स्यादेतत् – वर्ततेऽनयाऽस्यां वेति विगृह्य वर्तनाशब्दो निष्पाद्यत इति। एवं सति परत्वाद्युटि सति टित्त्वात् ङी प्राप्नोति कथं तर्हि सिद्धिः?

**णिजन्ताद्युचि वर्तना॥२॥** स्त्रीलिङ्गे कर्मणि भावे वा णिजन्ताद्युचि सति वर्तनेति भवति। वर्त्यते वर्तनमात्रं वा वर्तनेति।

**अनुदात्तेत्त्वात्ताच्छीलिको वा॥३॥** अथवा, वृत्तिरयमनुदात्तेत् ततस्ताच्छीलिको युच् वर्तनशीला वर्तनेति।वर्त्यते वर्तनमात्रं वा वर्तनेति।

**प्रतिद्रव्यपर्यायमन्तर्नीतैकसमया स्वसत्तानुभूतिर्वर्तना॥४॥** द्रव्यस्य पर्यायो द्रव्यपर्यायः, द्रव्यपर्यायं प्रति प्रतिद्रव्यपर्यायमन्तर्नीत एकः समयोऽनया साऽन्तर्नीतैकसमया, का पुनरसौ? स्वसत्तानुभूतिरुत्पादव्ययध्रौव्यैक्यवृत्तिः सत्ता, न ततोऽन्या काचिदस्ति। स्वा सत्ता स्वसत्ता, प्रतिनियताऽसाधारणीत्यर्थः, बुद्ध्यभिधानानु-प्रवृत्तिलिङ्गेनानुमीयमाना सादृश्योपचारादेकापि सती जीवाजीवतद्भेदप्रभेदैः संबन्ध-मापद्यमाना विशिष्टशक्तिभिरेव संबध्यते। तस्या अनुभूतिः

स्वसत्तानुभूतिर्वतनेत्युच्यते। एकस्मिन्नविभागिनि समये धर्मादीनि द्रव्याणि षडपि स्वपर्यायैरादिमदना-दिमद्भिरुत्पादव्ययध्रौव्यविकल्पैर्वर्तन्त इति कृत्वा तद्विषया वर्तना।

**साऽऽनुमानिकी व्यावहारिकदर्शनात् पाकवत्॥५॥** यथा व्यावहारिकस्य पाकस्य तण्डुलविक्लेदनलक्षणस्यौदनपरिणामस्य दर्शनादनुमीयते – अस्ति प्रथमसमयादारभ्य सूक्ष्मपाकाभिनिर्वृत्तिः प्रतिसमयमिति। यदि हि प्रथमसमयेऽग्न्युदकसन्निधाने कश्चित् पाकविशेषो न स्यात्, एवं द्वितीये तृतीये च न स्यादिति पाकाभाव एव स्यात्। तथा सर्वेषामपि द्रव्याणां स्वपर्यायाभिनिर्वृत्तौ प्रतिसमयं दुरधिगमा निष्पत्तिरभ्युपगन्तव्या।

**तल्लक्षणः कालः॥६॥** सा वर्तना लक्षणं यस्य स काल इत्यवसेयः। समयादीनां क्रियाविशेषाणां समयादिनिर्वृत्त्यानां च पर्यायाणां पाकादीनां स्वात्मसद्भावानुभवनेन स्वत एव वर्तमानानां निर्वृत्तेर्बहिरङ्गो हेतुः समयः पाक इत्येवमादिस्वसंज्ञारूढिसद्भावे काल इत्ययं व्यवहारोऽकस्मान्न भवतीति तद्व्यवहारहेतुनाऽन्येन भवितव्यमित्यनुमेयः।

**आदित्यगतेरिति चेन्न; तदनतावपि तत्सद्भावात्॥७॥** स्यादेतदादित्यगतिनिमित्ता द्रव्याणां वर्तनेति; तन्न; किं कारणम्? तदनतावपि तत्सद्भावात्। सवितुरपि व्रज्यायां भूतादिव्यवहारविषयभूतायां क्रियेत्येवं रूढायां वर्तनादर्शनात् तद्धेतुनाऽन्येन कालेन भवितव्यम्।

**आकाशप्रदेशनिमित्तेति चेन्न; तां प्रत्यधिकरणभावाद्भाजनवत्॥८॥** स्यादेतत् – आकाशप्रदेशनिमित्ता वर्तना नान्यस्तद्धेतुः कालोऽस्तीति; तन्न; किं कारणम्? तां प्रत्यधिकरणभावात् भाजनवत्। यथा भाजनं तण्डुलानामधिकरणं न तु तदेव पचति, तेजसो हि स व्यापारस्तथाऽऽकाशमप्यादित्यगत्यादिवर्तनायामधिकरणं न तु तदेव निर्वर्तयति। कालस्य हि स व्यापारः।

**सत्तात इति चेन्न; तस्या अप्यनुग्रहात् ॥९॥** स्यान्मतं – सत्ता नाम सर्वपदार्थानां साधारण्यस्ति तद्धेतुका वर्तनेति; तन्न; किं कारणम्? तस्या अप्यनुग्रहात्। कालानु-गृहीतवर्तना हि सत्तेति ततोऽप्यन्येन कालेन भवितव्यम्।

**द्रव्यस्य स्वजात्यपरित्यागेन प्रयोगविस्रसालक्षणो विकारः परिणामः॥१०॥** द्रव्यस्य चेतनस्येतरस्य वा द्रव्यार्थिकनयस्याविवक्षातो न्यग्भूतां स्वां द्रव्यजातिमजहतः पर्यायार्थिकनयार्पणात् प्राधान्यं विभ्रता केनचित् पर्यायेण प्रादुर्भावः पूर्वपर्यायनिवृत्तिपूर्वको विकारः प्रयोगविस्रसालक्षणः परिणाम इति प्रतिपत्तव्यः। तत्र प्रयोगः पुद्गलविकार-स्तदनपेक्षा विक्रिया विस्रसा। तत्र परिणामो द्विविधः - अनादिरादिमांश्च। अनादिर्लोक-संस्थानमन्दराकारादिः। आदिमान् प्रयोगजो वैस्रसिकश्च। तत्र चेतनस्य द्रव्यस्यौ-पशमिकादिर्भावः कर्मोपशमाद्यपेक्षोऽपौरुषेयत्वात् वैस्रसिक इत्युच्यते। ज्ञानशील-भावनादिलक्षणः आचार्यादिपुरुषप्रयोगनिमित्तत्वात् प्रयोगजः। अचेतनस्य च मृदादेः घटसंस्थानादिपरिणामः कुलालादिपुरुषप्रयोगनिमित्तत्वात् प्रयोगजः। इन्द्रधनुरादिनाना-परिणामो वैस्रसिकः। तथा धर्मादेरपि परिणामो योज्यः।

**परिणामाभावः सत्त्वासत्त्वयोर्दोषोपपत्तेरिति चेन्न; पक्षान्तरत्वात् ॥११॥** स्यान्मतं नास्ति परिणामः। कुतः? सत्त्वासत्त्वयोः दोषोपपत्तेः। बीजमङ्कुरे स्याद्वा, न वा? यदि सदङ्कुरे बीजमङ्कुराभावो बीजवत्। अथासत् न बीजमङ्कुरत्वेन परिणतमङ्कुरे तत्स्वभावाभावादतः परिणामाभावः इति; तन्न; किं कारणम्? पक्षान्तरत्वात्। यथा सत्पक्षदोषो नाऽसत्पक्षं स्पृशति पक्षान्तरत्वादसत्पक्षदोषोऽपि सत्पक्षं तत एव। तथा सदसदेकान्तपक्षदोषावप्यनेकान्तपक्षं न स्पृशतः पक्षान्तरत्वादेव, इतरथा हि पक्षसङ्करप्रसङ्गः। उभयदोषप्रसङ्ग इति चेन्न; जात्यन्तरत्वान्नरसिंहरूपवत्। शालिबीजादिद्रव्यार्थादेशादङ्कुरे स्याद्वीजमस्ति।

यद्यन्वयोच्छेदः स्यात्; फलविशेषाभावः प्रसज्येत। शालिबीजादिपर्यायार्थादेशात् स्यादङ्कुरे नास्ति बीजम्। यद्यविपरिणामः स्यद्दन्यथावृत्तिदर्शनमयुक्तं स्यात्।

**प्रतिषेधाभावाच्च॥१२॥** इदमसि त्वं प्रष्टव्यः? परिणामः सन्वा प्रतिषिध्येताऽ-सन्वेति? उभयथा च प्रतिषेधाभावः? यदि सन्; सत्त्वादेव न प्रतिषिध्येत। अथ सन्नपि प्रतिषिध्यते। ननु परिणामप्रतिषेधोऽपि सत्त्वात् प्रतिषिध्यत इति प्रतिषेधाभावः। तदभावादप्रतिषिद्धः परिणामः। अथ प्रतिषेधः सत्त्वादप्रतिषिद्धः; ननु परिणामोऽपि सत्त्वादप्रतिषिद्धः। अथाऽसन् परिणाम? असत्त्वादेव खरविषाणवत् न प्रतिषिध्यते इति प्रतिषेधाभावः। अथवा, यस्य परिणामो नास्ति स वक्तृत्वेनापरिणतः वाच्यस्याप्यर्थ-स्याभिधेयत्वेनापरिणामोऽभिधानस्य च वाचकत्वेनापरिणाम इति वक्तृवाच्यवचना-नामभावात् प्रतिषेधाभाव; तदभावादप्रतिषिद्धः परिणामः स्थितः।

**अन्यानन्यत्वदोषादिति चेन्न; उक्तत्वात्॥१३॥** स्यान्मतं नास्ति परिणामः। कुतः? अन्यानन्यत्वयोर्दोषात्। बीजादङ्कुरोऽन्यो वा स्यादनन्यो वा? यद्यन्यो बीजादङ्कुरः; न तर्हि बीजपरिणामोऽङ्कुरः। तदभावादप्रतिषिद्धः परिणामः स्थितः। अथानन्यो बीजादङ्कुरः; न तर्हि अङ्कुरोऽस्ति बीजादनन्यत्वात्। उक्तं च

> **"स्याच्चेद्बीजं परिणतं नान्यो बीजाच्च सोऽङ्कुरः।**
> **तच्च नैवं यदि ह्यन्यो न तस्माचेन्न सोऽङ्कुरः॥"**

तन्न; किं कारणम्? उक्तत्वात्। उक्तमेतत् – पक्षान्तरत्वात् दोषाभाव इति। स्याद्बीजादङ्कुरोऽन्यः स्यादनन्यः। यस्मात् प्रागङ्कुरोत्पादात् बीजेऽङ्कुरपर्यायो नासीत् पश्चाच्च जातस्तस्मात् बीजादङ्कुरः पर्यायार्थादेशात् स्यादन्यः। यस्माच्च शालिबीजजातिविशिष्टोऽन्योऽङ्कुरोऽसन्, तस्माच्छालिबीजजात्यात्मकद्रव्यार्थादेशात् बीजादङ्कुरः स्यादनन्यः।

**स न च व्यवस्थिताव्यवस्थितदोषादिति चेन्न; अनेकान्तात् ॥१४॥** स्यान्मतं- बीजेऽङ्कुरत्वेन परिणतेऽङ्कुरे बीजं व्यवस्थितं वा स्यादव्यवस्थितं वा? यदि व्यवस्थितम्; बीजस्य व्यवस्थानात् विरोधादङ्कुराभावः। अथाव्यवस्थितं न तर्हि बीजमङ्कुरत्वेन परिणतम्। तस्मादुभयत्र दोषान्नास्ति परिणाम इति? तन्न; किं कारणम्? अनेकान्तात्। यथा मनुष्यायुर्नामकर्मोदयादङ्गोपाङ्गपर्यायानास्कन्दन् निष्ठप्तायःपिण्डवदङ्गुल्युपाङ्गपरिणामादङ्गुलिरात्मा, अतो वीर्यान्तरायक्षयोपशमापेक्षोऽङ्गुल्यात्मा संकोचनप्रसारणपर्यायावास्कदन्ननादिपारिणामिकचैतन्यद्रव्यार्थादेशात् स्यात् सन्, पौद्गलिकपरिवृत्तावस्थितागुङ्ल्युपाङ्गपर्यायार्थादेशाच्च स्यात् सन् अत एव स्यादनन्यः स्यादवस्थितः। संकोचनप्रसारणपर्यायार्थादेशात् स्यादसन् अत एव स्यादन्यः स्यादनवस्थितः। तथैकेन्द्रियवनस्पतिनामायुरुदयाविष्कृतः आत्मैव बीजपर्यायमास्कन्दन् निष्टप्तायःपिण्डवत् बीजपरिणामात् बीजव्यपदेशभाक्। अतः किम्? अनादिपारिणामिकचैतन्यद्रव्यार्थादेशात् स्यात् सन् पौद्गलिकशालिजात्येकेन्द्रियरूपरसशब्दस्पर्शपर्यायार्थादेशाच्च स्यात् सन् तत एव स्यादनन्यः स्यादवस्थितः। पौद्गलिकशालिबीजपर्यायार्थादेशात् स्यादसन् तत एव स्यादन्यः स्यादनवस्थितः। इत्येवमनेकान्ताश्रयणादेकान्तपक्षदोषानुषङ्गाभावः।

**वृद्ध्यभावप्रसङ्ग इति चेन्न; अन्यहेतुत्वात् ॥१५॥** स्यादेतत् – नास्ति परिणामः। कुतः? वृद्ध्यभावप्रसङ्गात्। यदि बीजमङ्कुरत्वेन परिणमेत्, बीजमात्रः स एवाङ्कुरः स्यात् पयःपरिणामदधिवत् ततो वृद्ध्यभावः। उक्तं च –

**"किञ्चान्यद्यदि तद्बीजं गच्छेदङ्कुरतामिह।**
**विवृद्धिरङ्कुरस्य स्यात् कथं बीजादपुष्कलात्॥१॥"**

भौमोदकरससंबन्धाद्वृद्धिरिति चेन्न; बीजपरिणामाभावप्रसङ्गात्। उक्तं च

**"अथेष्टं तैः रसैर्भौमैरौदकैश्च विवर्धते।**

**नन्वेवं सति बीजस्य परिणामो न युज्यते॥१॥"**

भौमोदकरसद्रव्यान्तरसंचयात् वृद्धिरिति चेन्न; द्रव्यान्तरसंयोगेऽपि वृद्ध्यभावात्। यदि भौमोदकरसद्रव्यान्तराणि संयोगवृद्ध्या वर्तन्ते, ननु वृद्ध्यभावः जतुसंयोगे काष्ठवृद्ध्यभाववत्। उक्तं च

**"आलिप्तं जतुना काष्टं यथा स्थूलत्वमृच्छति।**

**तनु काष्टं तथैवास्ते जतु चात्र विवर्धते॥१॥**

**तथैवं यदि तद्बीजमास्ते येनात्मना स्थितम्।**

**रसाश्च वृद्धिं कुर्वन्ति बीजं तत्र करोति किम्॥२॥" इति;**

तन्न; किं कारणम्? अन्यहेतुत्वात्। 'बीजमात्रोऽङ्कुरो भवेत्' इति ब्रुवता त्वयैवाभ्युपगतः परिणामः। यस्तु भवता दोष उपन्यस्तः वृद्ध्यभावप्रसङ्ग इति, नासौ युक्तः; कुतः? अन्यहेतुत्वात्। यथा मनुष्यायुर्नामोदयाभ्यां जातो बालः बाह्यसावित्र्यकिरणादिसंबन्धापेक्षस्तन्यनवनीताद्याहारमनुभवन्नभ्यन्तरवीर्यान्तरायक्षयोपशमाविर्भावितआहारजरणसामर्थ्यकायाग्निबलोपेतः उपयुक्ताहाररसादिपरिणामान्निर्माणनामकर्मोदयापेक्षो वर्धते। तथा वनस्पतिविशेषायुर्नामोदयापेक्षो बीजाधिष्ठानो जीवोऽङ्कुरो जातः भौमोदकरसाहारं तप्तायःपिण्डवदात्मसात्कुर्वन् बाह्यसावित्रकिरणसंतापाभ्यन्तरवीर्यान्तरायक्षयोपशमाविर्भाविताङ्कुरकायाग्निबलात् भौमोदकरसान् जरयन् स्वानुरूपनिर्माण कर्मोदयापेक्षो वर्धते। अयं तु वृद्ध्यभावदोष एकान्तवादिनामेव भवति। नित्यत्वैकान्ते तावद्विपरिणामाभावात् वृद्ध्यभावः। क्षणिकैकान्तवादेऽपि प्रतीत्यसमुत्पादाभ्युपगमात् तावतोऽधिगमे तावत एवोपगमाद् वृद्ध्यभावः। किञ्च सर्वेषां क्षणिकत्वादङ्कुरस्य तत्कारणाभिमतानां च भौमोदकरसादीनां युगपद्भाविनाशः स्यात्, पौर्वापर्येण वा? यदि

युगपत्; नास्ति तत्कृता वृद्धिः। न हि वृद्धिहेतवो विनश्यन्तोऽन्यस्य विनश्यतोऽर्थस्य वृद्धिं कुर्वन्तो दृष्टाः। अथ पौर्वापर्येण, विनष्टस्याङ्कुरस्य भौमादयः किं कुर्वन्ति, विनष्टा वा किं कुर्युः? अनेकान्तवादिनां त्वङ्कुरो भौमादयश्च द्रव्यार्थादेशात् स्यान्नित्याः पर्यायार्थादेशाच्च स्यात्क्षणिका इति वृद्ध्युपपत्तिः।

**क्षणिकत्वे प्रबन्धभेदाभ्युपगमात् वृद्धिरिति चेन्न; तदभावात् ॥१६॥** स्यान्मतं भावानां क्षणिकत्वेऽपि वृद्धिर्युज्यते। कुतः? प्रबन्धभेदाभ्युपगमात्। त्रिविधो हि प्रबन्धः– सभागरूपः, क्रमापेक्षः, अनियतश्चेति। तत्र प्रदीपात् प्रदीप एकः प्रबध्यते स्रोतसः स्रोत एवेति सादृश्यात् सभागरूपः प्रबन्धः। स सन्ततिपरिणामक्रमोपलम्भात् बालकुमारबीजाङ्कुराद्यविच्छेदः क्रमापेक्षः। कृतलासानेकवर्णप्रबन्धानियमो मेघेन्द्रधनुरा-दिष्वनियतः। ततोऽस्ति वृद्धिरिति; तन्न; किं कारणम्? तदभावात्। इदमिह संप्रधार्यम् – सतोर्वा प्रबन्धः स्यात्, सदसतोः, असतोर्वा? न तावदसतोः प्रबन्धः वन्ध्यासुताकाशकुसुमयोः। नापि सदसतोः खरखरविषाणयोः। परिशेषात् सतोरेव। क्षणिकवादे तु पूर्वोत्तरस्कन्धयोर्नैकस्मिन् क्षणेऽस्तित्वमिति प्रबन्धाभावः। अस्तित्वे च क्षणिकप्रतिज्ञाहानिः। आह – क्षणिकत्वेऽपि तुलान्तनामोन्नामवत् युगपदुत्पादविनाश-भावादर्थप्रबन्ध इत्यस्ति वृद्धिरिति; उच्यते – यदि युगपदुत्पादविनाशयोः वृत्तिः; कार्यकारणभावाभावः सव्येतरगोविषाणवत्।

**ध्रौव्यैकान्ते परिणामाभावोऽनेकदोषप्रसङ्गात् ॥१७॥** ध्रौव्यैकान्ते य उक्तः परिणामः "व्यवस्थितस्य द्रव्यस्य धर्मान्तरनिवृत्तौ धर्मान्तरोपजनने च परिणामः।" अवस्थितस्य हि ध्रौव्यादिलक्षणस्य द्रव्यस्य क्षीरधर्ममात्रनिवृत्तौ दधिधर्ममात्रोत्पत्तौ परिणाम इति; स नोपपद्यते; कुतः? अनेकदोषप्रसङ्गात्। न हि तस्य द्रव्यमवस्थितमस्ति यस्य परिणामो भवेत्। अथास्ति समुदायव्यतिरिक्तं द्रव्यम् ननु गुणसमुदायमात्रद्रव्यप्रतिज्ञाहानिः। किञ्च,

**उभयदोषप्रसङ्गात् ॥१८॥** इदमिह मीमांस्यम् – यन्निवर्तते यच्चोत्पद्यते यच्च व्यवतिष्ठते तदेतत्त्रितयं गुणसमुदायमात्रं वा स्यात् ततोऽन्यद्वेति? यदि गुणसमुदायमात्रम्; ननु स एवासौ प्राक्पश्चाच्च गुणसमुदायः कोऽत्र कस्य वा परिणामः? अन्येन नाम निवृत्तेनान्येनावस्थितेनाऽन्येन चोत्पन्नेन भवितव्यमिति न्याय्यम्। अथान्यदिति गृह्यते एवमपि गुणसमुदायमात्रद्रव्यप्रतिज्ञाहानिः। किञ्च, ध्रौव्यैकान्तविरोधः, एकश्चेद्धर्मो निवर्तते एकश्चेदुत्पद्यते अनित्यताप्राप्तेरिति। किञ्च, समुदायः गुणेभ्योऽन्यो वा स्यात्, अनन्यो वा? यद्यनन्यः; गुणा एवेति समुदायकल्पनाव्याघातः, तदभावाच्च तदविनाभाविनां गुणानामप्यभावः। अथान्य समुदायः; पुनरत्र प्रतिज्ञाविरोधः परस्पराविनाभाविनोः स्वरूपशून्यत्वं च स्यात्, कुतः परिणामकल्पना ?

यच्चोक्तम् – पूर्वभावस्यान्यभावाप्तिः परिणाम इति; तदयुक्तम्; कस्मात्? उभयदोषप्रसङ्गात्। शब्दादीनां सुखादिसमन्वयभावानुपपत्तिः शब्दादिभावनिवृत्तिर्वेति। यदि पूर्वभावस्यान्यभावापत्तिः परिणामः; सुखदुःखमोहानां शब्दादिभावापत्तेः शब्दादिषु सुखादिसमन्वयभावानुपपत्तिः। किं कारणम्? पूर्वभावस्यान्यभावापत्तिः परिणामः इति प्रतिज्ञानात्। अथ पूर्वभावस्य नान्यभावापत्तिः सुखादिसमन्वयात् कथं तर्हि पूर्वभावस्यान्यभावापत्तिः परिणामः? तथैव सुखाद्यवस्थानात् शब्दादिभावानुपपत्तिः प्रसजति, सा चानिष्टा, तस्मान्न पूर्वभावस्यान्यभावापत्तिः परिणामः। किञ्च,

**अभावस्यापरिणामात्॥१९॥** यद्येनात्मना नास्ति न तस्य तद्भावापत्तिः विद्यते। यथाऽभावस्याभावात्मनाऽभावान्न तस्याभावापत्तिः। एवं गुणानां स्थूलत्वेनाभावात् तद्भावापत्तिरयुक्ता। अथास्ति तद्भावस्ततः परिणामानुपपत्तिः तद्भावात्। येनात्मना यद्विद्यते तस्य न पुनस्तद्भावापत्तिः। न ह्यभाव अभावात्मकत्वात् पुनरभावो भवति। एवमेकान्ते कारणस्योभयथा परिणामानुपपत्तेरनेकान्त आश्रयणीयः पर्यायार्थादेशात्

स्यादन्यभापत्तिः, द्रव्यार्थादेशात् स्यान्नान्यभावापत्तिः परिणाम इति। तथा द्रव्यार्थादेशात् स्यादवस्थितस्य द्रव्यस्य परिणाम; पर्यायार्थादेशात् स्यादनवस्थितस्येति। अथ का क्रियेति? अत्रोच्यते-

**क्रिया परिस्पन्दात्मिका द्विविधा॥२०॥** द्रव्यस्य द्वितयनिमित्तवशादुत्पद्यमाना परिस्पन्दात्मिका क्रियेत्यवसीयते। सा द्विविधा पूर्ववत् प्रयोगविस्रसानिमित्ता। प्रायोगिकी शकटादीनाम्। विस्रसानिमित्ता मेघादीनाम्।

**स्थित्यग्रहणमिति चेन्न; परिणामावरोधात्॥२१॥** स्यादेतत् – यदि परिस्पन्दात्मिका क्रिया इत्युच्यते स्थितेरग्रहणं प्राप्नोति। गतिनिवृत्तिर्हि स्थितिरिति; तन्न; किं कारणम्? परिणामावरोधात्। स्थितिर्हि परिणामेऽन्तर्भवति।

**परिणामग्रहणमेकमेवास्त्विति चेन्न; भावद्वैविध्यख्यापनार्थत्वात्॥२२॥** स्यान्मतं यथा स्थितिः परिणामेऽन्तर्भवति तथा क्रियापि तत्रैवावरुध्यते इति परिणामग्रहणमेवैकमस्त्विति; तन्न; किं कारणम्? भावद्वैविध्यख्यापनार्थत्वात्। द्रव्यस्य हि भावो द्विविधः परिस्पन्दात्मकोऽपरिस्पन्दात्मकश्च। तत्र परिस्पन्दात्मकः क्रियेत्याख्यायते, इतरः परिणामः, इत्येतत् ख्यापनार्थं पृथग्ग्रहणम्।

**क्षेत्रप्रशंसाकालनिमित्तात् परत्वापरत्वानवधारणमिति चेन्न; कालोपकारप्रकरणात्॥२३॥** स्यान्मतं क्षेत्रप्रशंसाकालनिमित्ते परत्वापरत्वे। तत्र क्षेत्रनिमित्ते परत्वापरत्वे तावदाकाशप्रदेशाल्पबहुत्वापेक्षे। एकस्यां दिशि बहूनाकाशप्रदेशानतीत्य स्थितः परः। ततः अल्पानतीत्य स्थितोऽपरः। प्रशंसाकृतेऽहिंसादिप्रशस्तगुणयोगात् परो धर्मः, तद्विपरीतोऽधर्मोऽपरः इति। कालहेतुके शतवर्षः परः, षोडशवर्षोऽपर इति। अतोऽर्थभेदात् परत्वापरत्वयोरनवधारणमिति; तन्न; किं कारणम्? कालोपकारप्रकरणात् कालकृतेऽत्र परत्वापरत्वे गृह्येते दूरासन्नदेशावस्थायिनोः कुमारस्थविरयोः;

तपस्विचाण्डालयोः सन्निकृष्टदेशे चाण्डाले पर इति व्यवहारो दृश्यते, विप्रकृष्टे च तपस्विनि अपर इति। ते एते परत्वापरत्वे कालकृते इह गृह्येते।

**वर्तनाद्युपकारलिङ्गः कालः॥२४॥** उक्ता वर्तनादयः उपकारा यस्याऽर्थस्य लिङ्गं स काल इत्यनुमीयते। तथा चोक्तम्-"येन मूर्तानामुपचयाश्चापचयाश्च लक्ष्यन्ते स कालः" इति।

**वर्तनाग्रहणमेवास्त्विति चेन्न; कालद्वैविध्यप्रदर्शनार्थत्वात् प्रपञ्चस्य॥२५॥** स्यान्मतम् – वर्तनाग्रहणमेवास्तु कालास्तित्वख्यापनं परिणामादीनामिति; तन्न; किं कारणम्? कालद्वैविध्यप्रदर्शनार्थत्वात् प्रपञ्चस्य। द्विविधः कालः – परमार्थकालः व्यवहाररूपश्चेति। तत्र परमार्थकालः वर्तनालिङ्गः गत्यादीनां धर्मादिवत् वर्तनाया उपकारकः। स किंस्वरूप इति चेत्? उच्यते – यावन्तो लोकाकाशे प्रदेशास्तावन्तः कालाणवः परस्परं प्रत्यबन्धाः एकैकस्मिन्नाकाशप्रदेशे एकैकवृत्त्या लोकव्यापिनः मुख्योपचारप्रदेशकल्पनाऽभावान्निरवयवाः। मुख्यप्रदेशकल्पना हि धर्माधर्मजीवाकाशेषु पुद्गलेषु च द्व्यणुकादिषु स्कन्धेषु। परमाणुषूपचारप्रदेशकल्पना, प्रचयशक्तियोगात्। उभयथा च कालाणूनां प्रदेशकल्पनाऽभावात्, धर्मास्तिकायादिवत् कायत्वाभावः। अत एव विनाशहेतुत्वाभावान्नित्याः। परप्रत्ययोत्पादविनाशसद्भावादनित्याः। सूचीसूत्रमार्गाकाशच्छिद्रवत् परिच्छिन्नमूर्तित्वेऽपि रूपादियोगाभावादमूर्ताः। निष्क्रियाश्च प्रदेशान्तरक्रमाभावात्। व्यवहारकालः परिणामादिलक्षणः। कालवर्तनया लब्धकालव्यपदेशः, कुतश्चित् परिच्छिन्नोऽपरिच्छिन्नस्य परिच्छेदहेतुः।

**कालत्रैविध्यसिद्धिः परस्परापेक्षत्वात्॥२६॥** भूतो वर्तमानो भविष्यन्निति त्रिविधः कालः सिद्धः। कुतः? परस्परापेक्षत्वात्। यथा वृक्षपङ्क्तिमनुसरतो देवदत्तस्यैकैकतरुं प्रति प्राप्तः प्राप्नुवन् प्राप्स्यन् व्यपदेशस्तथा तान् कालाणूननुसरतां द्रव्याणां क्रमेण वर्तनापर्यायमनुभवतां भूतवर्तमानभविष्यद्व्यवहारसद्भावः। तत्र परमार्थकाले भूतादिव्य

हारो गौणः, व्यवहारकाले मुख्यः। परस्परापेक्षश्चासौ – यद्द्रव्यं क्रियापरिणतं काल-रमाणुं प्राप्नोति तद्द्रव्यं तेन कालेन वर्तमानसमयस्थितिसंबन्धवर्तनया वर्तमानः काल; कालाणुरपि वर्तयंस्तद्द्रव्यमनतिक्रान्तसंबन्धवर्तनात्तदाख्यो भवति। तदेव कालवशादनु-भूतवर्तनासंबन्धं भूतम्, कालाणुरपि भूतः। तदेव वत्स्र्यत्स्थितिसंबन्धवर्तनापेक्षं भविष्यदिति व्यपदिश्यते, कालाणुश्च भविष्यन्निति। एवं सवितुरनुसमयगतिप्रचयापेक्ष-याऽऽवलिकोच्छ्वासप्राणस्तोकलवनालिकामुहूर्ताऽहोरात्रपक्षमासर्त्वयनादिसवितृगतिपरिव र्तनकालवर्तनया व्यवहारकालो मनुष्यक्षेत्रे संभवति इत्युच्यते, तत्र ज्योतिषां गतिपरिणामान्न बहिः निवृत्तगतिव्यापारत्वाज्ज्योतिषाम्। मनुष्यक्षेत्रसमुत्थेन ज्योति र्गतिसमयावलिकादिना परिच्छिन्नेन क्रियाकलापेन कालवर्तनया कालाख्येनो-र्ध्वमधस्तिर्यक् च प्राणिनां संख्येयाऽसंख्येयाऽनन्तानन्तकालगणनाप्रभेदेन कर्मभवकाय-स्थितिपरिच्छेदः सर्वत्र जघन्यमध्यमोत्कृष्टावस्थः क्रियते।

**क्रियामात्रमेव कालस्तद्व्यतिरेकेणानुपलब्धिरिति चेन्न; तदभावे कालाभि-धानलोपप्रसङ्गात् ॥२७॥** स्यान्मतं क्रियामात्रमेव कालः। कुतः? तद्व्यतिरेकेणानुपलब्धेः। सर्वोऽयं कालव्यवहारः क्रियाकृतः। क्रिया हि क्रियान्तरपरिच्छिन्नाऽन्यक्रियापरिच्छेदे वर्तमाना कालाख्या भवति। योऽपि समयो नाम भवद्भिरुच्यते स परमाणुपरिवर्तन-क्रियासमय एव कालसामान्यसामानाधिकरण्यात्। न समयपरिमाणरिच्छेदकोऽन्यस्ततः सूक्ष्मतरः कश्चिदस्ति कालः। तत्समयक्रियाकलाप आवलिका, तत्प्रचय उच्छ्वास इत्यादि समयक्रियाकलापपरिच्छिन्ना आवलिका उच्छ्वासपरिच्छेदे वर्तमाना कालाख्या। एवमुत्तरत्रापि योज्यम्। लोकेऽपि तथैव गोदोहेन्धनपाकादिरन्योन्यपरिच्छेदे वर्तमानः कालाख्यः इति क्रियैव काल इति; तन्न; किं कारणम्? तदभावे कालाभिधान-लोपप्रसङ्गात्। सत्यम् क्रियाकृत एवायं व्यवहारः सर्वः – उच्छ्वासमात्रेण कृतं मुहूर्तेन कृतमिति, किन्तु समय उच्छ्वासो निश्वासो मुहूर्तः इति स्वसंज्ञाभिर्निरूढानां काल इत्यभिधानमकस्मान्न भवति। यथा देवदत्तसंज्ञया निरूढे पिण्डे

दण्ड्यभिधानमकस्मान्न भवतीति दण्डसंबन्धसिद्धिः, तथा कालसिद्धिरपि। इतरथा कालव्यवहाराभावप्रसङ्गः स्यात्।

**वर्तमानाभावप्रसङ्गाच्च॥२८॥** यस्य क्रियामात्रमेव कालो नान्यः कश्चिदस्ति वर्तनालक्षणः, तस्य वर्तमानकालाभावः प्रसक्तः। कथम्? ऊयते पट इति यः प्रक्षिप्तस्तन्तुः सोऽतिक्रान्तः, यः प्रक्षेप्स्यते सोऽनागतः, न च तयोरन्तरे काचिदन्या-ऽनतिक्रान्ताऽनागामिनी च क्रियाऽस्ति या वर्तमानत्वेन परिगृह्येत। वर्तमानापेक्षे च पुनरतीतानागताविष्येते तदभावे तयोरप्यभावः स्यात्। यदप्युक्तमारम्भादिरपवर्गान्तः क्रियाकलापो वर्तमान इति।

**"आरम्भाय प्रसृता यस्मिन् काले भवन्ति कर्तारः।**

**कार्यस्यानिष्ठातस्तन्मध्यमकालमिच्छन्ति॥" इति;**

तदप्ययुक्तम्; कुतः? अभ्युपगमविरोधात्। पूर्वं क्रियाकाल इत्युक्तं पश्चात् क्रियासमूह इति। क्षणिकानां क्रियावयवानां समूहाभावाच्च। यस्य पुनरन्यो वर्तनालक्षणः कालः, तस्य प्रथमसमयक्रियावर्तनयाऽऽरम्भमुपादाय द्वितीयादिसमयक्रियाविशेषाणां द्रव्यार्थतयाऽवस्थानमनुभवतां समुदायमुपचर्य तत्समूहसाध्यस्य घटादेरापरिसमाप्तेर्वर्तते घटादिक्रियेति वर्तमानकालसिद्धिः कल्प्यते। यदि व्यतिरेकेणानुपलब्धेः कालो नास्तीतीत्युच्यते? ननु क्रियायाः क्रियासमूहस्य वाऽभावः। कारकाणां हि प्रवृत्तिविशेषः क्रिया, न तेभ्यः प्रवृत्तिर्व्यतिरिक्तोपलभ्यते। यथा सर्पात्मलाभ एव कौटिल्यं न तत्तस्माद् व्यतिरिक्तमुपलभ्यते एवं क्रियापीति। तथा क्रियावयवेभ्यो व्यतिरिक्तो न तत्समूह उपलभ्यते तदात्मकत्वादतस्तयोरभावप्रसङ्गः स्यात्। किञ्च क्रिया क्रियान्तरस्य परिच्छेदिका कालव्यपदेशभागित्यनुपपन्नमनवस्थानात्। स्थितो हि लोके प्रस्थादिः परिमाणविशेषः व्रीह्यादेरवस्थितस्य परिच्छेदको दृष्टः। न च तथा क्रियाऽवस्थिता स्थितिलक्षणमात्रावलम्बनाभ्युपगमात्। न हि स्वयमनवस्थितः

कश्चिदनवस्थितस्य परिच्छेदको दृष्टः। प्रदीपपरिस्पन्दवदिति चेद्यथा प्रदीपोऽनवस्थितः परिस्पन्दस्यान-वस्थितस्यैव परिच्छेदे वर्तते तथा क्रियापीति; एतच्चायुक्तमसिद्धत्वात्। प्रदीप: परिस्पन्दश्च क्षणिक इति नास्माभिरभ्युपगम्यते स्वकार्यस्य प्रकाशनादेरनेकक्षण-साध्यत्वात्। समूहस्य परिच्छेद्यपरिच्छेदकभावादिति चेन्न; क्षणिकानां समूहाभावात्। शब्दवदिति चेन्न; यथा क्षणिकानां वर्णध्वनीनां समुदायः पदवाक्यरूपस्तथा क्रियावयवानामित्येतदप्यसाम्प्रतमसिद्धत्वादेव। न हि वर्णध्वनयः क्षणिकाः; देशान्तरस्थश्रोतृविषयभावापत्तिदर्शनात्। शब्दान्तरारम्भात् तत्प्रतिसिद्धिरिति चेन्न; क्षणिकस्यारम्भशक्तिविरहात्। यस्मिन् क्षणे स्वयमात्मलाभमापद्यते न तदाऽन्यमुत्पादयत्यसत्त्वात्, उत्तरक्षणे च नारभते; उत्पत्त्यनन्तरापवर्तित्वात्। आसन्नसदवस्थाको हि क्षण उत्पत्तिकाल इति व्यपदिश्यते, उत्तरकालमस्य सत्त्वं नास्ति इत्युत्पत्तिव्यवहार एव न स्यात्।

पूर्वविज्ञानाहितसंस्कारबीजाधारभूतायां बुद्धौ समुदायकल्पनेति चेन्न; तस्या अपि तादात्म्यात्। यस्य तु द्रव्यार्थादेशात् स्यान्नित्या क्रिया पर्यायार्थादेशाच्च स्यादनित्या बुद्धिरपि; तस्य वस्तुनि बुद्धौ च क्रियावयवसमूहस्य शक्तिव्यक्तिस्वरूपेण व्यवस्थितस्य कालवर्तनया प्रतिलब्धकालव्यपदेशस्य परिच्छिन्नस्यान्यपरिच्छेदे वृत्तिरुपपद्यते इति व्यवहारकालसिद्धिः। तत्प्रसिद्धौ च मुख्यकालसिद्धिरित्युक्तम्। अथ किमर्थं परत्वापर त्वयोः पृथग्ग्रहणं वर्तनापरिणामक्रियापरत्वापरत्वानीत्येवं वक्तव्यम्?

**परत्वापरत्वयोः पृथग्ग्रहणं परस्परापेक्षत्वात् ॥२९॥** परत्वापरत्वे पृथग्गृह्येते। कुतः? परस्परापेक्षत्वात्। परत्वं ह्यपेक्ष्यापरत्वं भवत्यपरत्वं चापेक्ष्य परत्वमिति।

अथ किमर्थं वर्तनाग्रहणमादौ क्रियते?

**वर्तनाग्रहणमादावभ्यर्हितत्वात् ॥३०॥** वर्तनाग्रहणमादौ क्रियते। कुतः? अभ्यर्हितत्वात्। कथमभ्यर्हितत्वम्? वर्तनापूर्वकत्वात् परमार्थकालप्रतिपत्तेः। तन्निमित्त-त्वात् व्यवहारकाललिङ्गस्याप्राधान्यम्।

अत्राह – उक्तं भवता शरीरादीनि पुद्गलानामुपकार इति, तन्त्रान्तरीया जीवं परिभाषन्ते, तत्कथमिति? अत्रोच्यते –

## स्पर्शरसगन्धवर्णवन्तः पुद्गलाः॥२३॥

**स्पर्शग्रहणमादौ विषयबलदर्शनात् ॥१॥** स्पर्शग्रहणमादौ क्रियते। कुतः? विषयबलदर्शनात्। सर्वेषु हि विषयेषु स्पर्शस्य बलं दृश्यते। स्पृष्टग्राहिष्विन्द्रियेषु स्पर्शस्यादौ ग्रहणव्यक्तिः, सर्वसंसारिजीवग्रहणयोग्यत्वाच्च।

**रसप्रसङ्ग इति चेन्न; स्पर्शे सति तद्भावात् ॥२॥** स्यान्मतं यदि विषयबलादादौ स्पर्शोऽधीतः, ननु विषयबलत्वादादौ रस एवाध्येयः। स्पर्शसुखनिरुत्सुकेष्वपि रसव्यापार इति स्पर्शग्रहणमेवादौ ज्यायः। तत एवानन्तरं रसवचनं स्पर्शग्रहणानन्तरभावित-त्वाद्रसग्रहणस्य, तदनन्तरं तद्ग्रहणं क्रियते।

**वायौ तदभावात् व्यभिचार इति चेन्न; तत्राप्यभ्युपगमात् ॥३॥** स्यादेतद्वायुः स्पर्शवानिति तदनन्तरं रसग्रहणाभावात् व्यभिचार इति; तन्न; किं कारणम्? तत्राप्यभ्युपगमात्। रूपादयो हि स्पर्शाविनाभाविनः घटादिष्विव वायावप्यभ्युपगम्यन्ते। स्पर्शवत्तत्र सतां रूपादीनामपि ग्रहणं कस्मान्नेति चेत्? स्थूलविषयग्राहित्वाच्चक्षुरादीनां घ्राणेन्द्रियविषयवत् वायौ सतामपि रूपादीनामग्रहणम्।

**रूपात् प्राग् गन्धवचनमचाक्षुषत्वात् ॥४॥** रूपात् प्राक् गन्धवचनं क्रियते। किं कारणम्? अचाक्षुषत्वात्।

**अन्ते वर्णग्रहणं स्थौल्ये सति तदुपलब्धेः॥५॥** सर्वेषामन्ते वर्णग्रहणं क्रियते। कुतः? स्थौल्ये सति तदुपलब्धेः।

**नित्ययोगे मतुविधानम् ॥६॥** स्पर्शश्च रसश्च गन्धश्च वर्णश्च स्पर्शरसगन्धवर्णास्ते येषां सन्ति ते स्पर्शरसगन्धवर्णवन्तः इति नित्ययोगे मतुविधानं द्रष्टव्यम्। यथा क्षीरिणो न्यग्रोधा इति क्षीरेण नित्ययोगात् मत्वर्थीयविधानम्। तथाऽनादिपारिणामिक-स्पर्शादिगुणसामान्यनित्ययोगे मतुरिति स्पर्शादीनामनन्तपर्यायत्वेऽपि मौलभेद-प्रसिद्ध्यर्थमितः क्रियते।

**मृदुकठिनगुरुलघुशीतोष्णस्निग्धरूक्षस्पर्शभेदाः॥७॥** एते मृद्वादयोऽष्टौ स्पर्शस्य मूलभेदा द्रष्टव्याः।

**तिक्तकटुकाम्लमधुरकषाया रसप्रकाराः॥८॥** तिक्तादयः पञ्च रसप्रकाराः वेदितव्याः।

**गन्धः सुरभिरसुरभिश्च॥९॥** गन्धो द्विविधः – सुरभिरसुरभिश्चेति।

**वर्णाः पञ्चधा नीलपीतशुक्लकृष्णलोहितभेदात् ॥१०॥** नीलादिभिः पञ्चभिः प्रकारैः वर्णा भिद्यन्ते। एषां च स्पर्शनादीनामेकैकस्यैकद्वित्रिचतुःसंख्येयाऽसंख्येयानन्तगुण-परिणामोऽवसेयः।

सकलरूपादिद्रव्यधर्मनिर्देशादवशिष्टविशेषप्रतिपत्त्यर्थमाह –

**शब्दबन्धसौक्ष्म्यस्थौल्यसंस्थानभेदतमश्छायातपोद्योतवन्तश्च॥२४॥**

**शब्दादीनामभिहितनिर्वचनानां परिप्राप्तद्वन्द्वानां मतुनाऽभिसंबन्धः॥१॥** शब्दादीनां निर्वचनेन प्रतिलब्धार्थानां परस्परापेक्षायां सत्यां द्वन्द्वं कृत्वा मतुना संबन्धो योजयितव्यः। तद्यथा – शपत्यर्थमाह्वयति प्रत्याययति, शप्यते येन, शपनमात्रं वा शब्दः। बध्नाति, बध्यतेऽसौ, बध्यतेऽनेन, बन्धनमात्रं वा बन्धः। लिङ्गेनाऽऽत्मानं सूचयति, सूच्यतेऽसौ, सूच्यतेऽनेन, सूचनमात्रं वा सूक्ष्मः, सूक्ष्मस्य भावः कर्म वा सौक्ष्म्यम्। स्थूलयते परिबृंहयति, स्थूल्यतेऽसौ, स्थूल्यतेऽनेन, स्थूलनमात्रं वा स्थूलः। स्थूलस्य भावः कर्म वा स्थौल्यम्। संतिष्ठते संस्थीयतेऽनेनेति, संस्थितिर्वा संस्थानम्। भिनत्ति, भिद्यते, भेदनमात्रं वा भेदः। पूर्वोपात्ताशुभकर्मोदयात् ताम्यत्यात्मा, तम्यतेऽनेन, तमनमात्रं वा तमः। पृथिव्यादिघनपरिणाम्युपश्लेषात् देहादिप्रकाशावरणतुल्याकारेण छिद्यते, छिनत्त्यात्मानमिति वा छाया। असद्वेद्योदयादातपत्यात्मानम्, आतप्यतेऽनेन, आतपनमात्रं वा आतपः। निरावरणमुद्योतयति, उद्योत्यतेऽनेन, उद्योतनमात्रं वा उद्योतः। शब्दश्च बन्धश्च सौक्ष्म्यं च स्थौल्यं च संस्थानं च भेदश्च तमश्च छाया च आतपश्च उद्योतश्च शब्दबन्धसौक्ष्म्यस्थौल्यसंस्थानभेदतमश्छायातपोद्योताः, ते येषां सन्ति ते शब्दबन्धसौक्ष्म्यस्थौल्यसंस्थानभेदतमश्छायातपोद्योतवन्तश्च।

**शब्दो द्वेधा भाषालक्षणविपरीतत्वात्॥२॥** शब्दो द्वेधा व्यवतिष्ठते। कुतः? भाषालक्षणविपरीतत्वात् भाषालक्षणो विपरीतश्चेति।

**भाषात्मक उभयथाऽक्षरीकृतेतरविकल्पात्॥३॥** तत्र भाषात्मकः शब्दः उभयथा कल्प्यते। कुतः? अक्षरीकृतेतरविकल्पात्। अक्षरीकृतः शास्त्राभिव्यञ्जकः संस्कृत विपरीतभेदादार्यम्लेच्छव्यवहारहेतुः। अवर्णात्मको द्वीन्द्रियादीनाम्, अतिशयज्ञानस्वरूप-प्रतिपादनहेतुश्च। स एव सर्वः प्रायोगिकः।

**अभाषात्मको द्वेधा प्रयोगविस्रसानिमित्तत्वात् ॥४॥** अभाषात्मकः शब्दो द्वेधा विभज्यते। कुतः? प्रयोगविस्रसानिमित्तत्वात्।

**तत्र वैस्रसिको वलाहकादिप्रभवः॥५॥**

**प्रयोगश्चतुर्धा ततविततघनसौषिरभेदात् ॥६॥** प्रयोगजः शब्दः चतुर्धा भिद्यते। कुतः? ततविततघनसौषिरभेदात्। तत्र चर्मतननात्ततः पुष्करभेरीदर्दुरादिप्रभवः। विततः तन्त्रीकृतो वीणासुघोषादिसमुद्भवः। घनस्तालघण्टालालनाद्यभिघातजः। सौषिरो वंशशङ्खा-दिनिमित्तः। स शब्दः आकाशगुणः इति केषाञ्चिद्दर्शनम्; तदयुक्तमित्युक्तं पुरस्तात्।

अपरे मन्यन्ते – ध्वनयः क्षणिकाः क्रमजन्मानः स्वरूपप्रतिपादना-देवोपक्षीणशक्तिका नार्थान्तरमवबोधयितुमलम्। यदि समर्थाः स्युः पदेभ्य इव पदार्थेषु प्रतिवर्णं वर्णार्थेषु प्रत्ययः स्यादेकेन चार्थे कृते वर्णान्तरोपादानमनर्थकं स्यात्। नापि क्रमजन्मनां सहभावः संघातोऽस्ति योऽर्थेन युज्यते। अतस्तेभ्योऽर्थप्रतिपादने समर्थः शब्दात्माऽमूर्तो नित्योऽतीन्द्रियो निरवयवो निष्क्रियो ध्वनिभिरभिव्यङ्ग्य इत्यभ्युपगन्तव्य इति; एतच्चानुपपन्नम्; कुतः? व्यङ्ग्यव्यञ्जकभावानुपपत्तेः। व्यङ्ग्यस्तावत् शब्दात्मा स्वेन स्वरूपेणावस्थितो वा व्यज्येत, अनवस्थितो वा? यदि स्वरूपेणावस्थितो व्यज्येत तत्रापि द्वैतं भवति ध्वनिसन्निधेः प्राक् पश्चाच्चानुपलब्धेः सौक्ष्म्यं वा हेतुः स्यात्, प्रतिबन्धकं वा किञ्चित्? यदि सौक्ष्म्यान्नोपलभ्येत; सर्वकालमस्याग्रहणमेव स्यादाकाशादिवत्। अथ ध्वनिसन्निधाने स्थौल्यमस्य स्यात् विकारप्राप्तेः नित्यत्वं हीयते। न हि किञ्चित् प्रतिबन्धकमस्ति घटोपलब्धौ तमोवत्। प्रभाभावस्तमो न वस्त्वन्तरमिति चेन्न; अतिशयवत्त्वात् सम्पन्नरूपत्वाच्च नीलादिवर्णवत्। स्वरूपेणानवस्थितश्चेत् नासौ व्यङ्ग्यः कार्यः स्यात् ध्वनिसन्निधाने स्वरूपप्राप्तेस्तत एवैषां ध्वनीनां व्यञ्जकत्वमयुक्तम्।

किञ्च, आद्यो वर्णध्वनिः शब्दात्मा सकलस्य वा व्यञ्जकः स्यादेकदेशस्य वा? यदि सकलस्य; इतरेषां ध्वनीनामानर्थक्यं स्यात्। अथैकदेशस्य, निरवयवत्वमस्य हीयते। किञ्च, स ध्वनिर्व्यञ्जकः स्फोटस्य वोपकारं कुर्यात्, श्रोत्रस्योभयस्य वा? न तावत् पृथिवीगन्धस्य जलसेकवत् स्फोटस्योपग्रहे वर्तते तस्य नित्यत्वात् विकारप्राप्त्यनभ्युपगमात्। न चामूर्तस्याभिव्यङ्ग्यस्य विक्रियोपपद्यते। नापि चक्षुषोऽञ्जनवत् श्रोत्रस्योपकारे वर्तते बधिरस्य गुणान्तरोत्पादनशक्त्यभावात्। युज्यते नेत्रस्याञ्जनमुपकारमिति तिमिरादिदोषहननदर्शनात्, न तथोपहतश्रवणस्य ध्वनिकृतमुपकारं किञ्चिदप्युपलभामहे। अथ कल्पेन्द्रियस्योपग्रहे वर्तते; न तत्रार्थावबोधनादुपग्रहोऽन्योऽस्ति। तदभ्युपगमे तेनैव कृतकृत्यत्वात् स्फोटकल्पनाऽनर्थिका। नाप्युभयस्योपग्रहो युक्तः; प्रत्येकमयुक्तत्वादेव।

किञ्च, न ध्वनयः स्फोटाभिव्यक्तिहेतवो भवन्त्युत्पत्तिक्षणादूर्ध्वमनवस्थानादुत्पत्तिक्षणे चाऽसत्त्वात्। अथ क्षणिका अपि सन्तोऽभिव्यक्तिहेतवः; कश्चेदानीं भवतो मत्सरः? अर्थप्रत्यायने तदभ्युपगमे च स्फोटकल्पना व्यर्था।

**प्रदीपवदिति चेन्न; तस्यासिद्धत्वात्॥७॥** नोत्पत्त्यनन्तरापवर्गी प्रदीप आत्मलाभे देशान्तरसंबन्धनिमित्तक्रियापरिणामविप्रकृष्टदेशस्थघटादिप्रकाशदर्शनात्।

**कर्मवदिति चेत्; असिद्धत्वादेव॥८॥** कर्मव्यक्तयः क्षणिकाः सत्यः कर्मत्वजातिमभिव्यञ्जयन्तीत्यसिद्धमस्मान् प्रति द्रव्यगुणकर्मविषयसामान्यविशेषस्यार्थान्तरभूतस्यानभ्युपगमात्। कर्मणोऽपि द्रव्यादपृथग्भूतस्य द्रव्यार्थावस्थानाभ्युपगमात्। किञ्च, अभिव्यञ्जकाभिव्यङ्ग्यवैधर्म्यात्। यथा मूर्तः क्रियावान् प्रदीपोऽभिव्यञ्जकः तद्व्यङ्ग्याश्च घटादयः क्रियावन्तो मूर्तिमन्तो दृष्टाः, न च तथा ध्वनेर्मूर्तिः क्रियावांश्च, तद्व्यङ्ग्यः स्फोटोऽपि न तद्धर्मः ततोऽभिव्यक्त्यभावः। किञ्च, स्फोटः ध्वनेरन्यो वा स्यादनन्यो वा? यद्यनन्यः; तादात्म्यं प्राप्नोति,

व्यङ्ग्यत्वाभावश्च भेदाभावात् । अथान्य; तस्य श्रोत्रोपलभ्यत्वाभावः। किञ्च, व्यङ्ग्यत्वे सत्यनित्यत्वं स्यात् स्फोटस्य घटादिवत् विज्ञानेन व्यङ्ग्यत्वात् । आकाशादेर्व्यभिचार इति चेन्न; मूर्तिमता व्यङ्ग्यत्वादिति विशेष्यवचनात् । किञ्च यस्य व्यङ्ग्यत्वं तस्य कार्यत्वमपि दृष्टं यथा घटादेः। न तथा स्फोटस्य कार्यत्वमस्ति नित्यत्वाभ्युपगमादिति व्यङ्ग्यत्वाभावः।

**महदादिवदिति चेत्; साध्यसमत्वात् ॥९॥** यथा महदादि व्यङ्ग्यमेव न कार्यं तथा स्फोटोऽपीति; तन्न; साध्यसमत्वात् । यथेदं स्फोटस्य व्यङ्ग्यत्वं साध्यं तथा महदादेरपीति। किञ्च, दृष्टान्ताभावात् । न चामूर्तः कश्चिन्नित्यो निरवयवो मूर्तिमताऽनित्येन सावयवेन व्यङ्ग्यो दृष्ट; तदभावात् साध्यसिद्ध्यभावः। तस्मात् ध्वनिरूप एव शब्दो द्विशक्तिरभ्युपगन्तव्यः। स च पुद्गलद्रव्यार्थादेशात्ततोऽनन्यत्वात् स्यान्नित्यः श्रोत्रोपलभ्यपर्यायसामान्यस्थित्यपेक्षया कालान्तरस्थायी, प्रतिसमयस्थिति-भेदापेक्षया क्षणिक इति च जैनेश्वरदर्शनमनवद्यम् ।

**बन्धोऽपि द्विधा विस्रसाप्रयोगभेदात् ॥१०॥** बन्धश्च द्वैविध्यमश्नुते। कुतः? विस्रसा-प्रयोगभेदात् । वैस्रसिकः प्रायोगिकश्चेति।

**आद्यो द्वेधा आदिमदनादिविकल्पात् ॥११॥** आद्यो वैस्रसिको बन्धो द्विधा भिद्यते। कुतः? आदिमदनादिविकल्पात् । तत्रादिमान् स्निग्धरूक्षगुणनिमित्तः विद्युदुल्काजलधाराग्नीन्द्रधनुरादिविषयः। अनादिरपि वैस्रसिकबन्धो धर्माधर्माकाशानामेकशः त्रैविध्यान्नव-विधः। धर्मास्तिकायबन्धः धर्मास्तिकायदेशबन्धः धर्मास्तिकायप्रदेशबन्धः। अधर्मास्ति-कायबंधोऽधर्मास्तिकायदेशबंधोऽधर्मास्तिकायप्रदेशबंधः। आकाशास्तिकायबन्धः आकाशा-स्तिकायदेशबन्धः आकाशास्तिकायप्रदेशबन्धश्चेति। कृत्स्नो धर्मास्तिकायः, तदर्धं देशः, अर्धार्धं प्रदेशः। एवमधर्माकाशयोरपि। कालाणूनामपि सततं परस्परविश्लेषाभावादनादिः।

एकजीवप्रदेशानां च संहरणविसर्पणस्वभावत्वेऽपि परम्परवियोगाभावाददनादिर्बन्ध। धर्माधर्मकालाकाशानां परस्परवियोगाभावादनादिर्बन्धः। नानाजीवानामपि सामान्यापेक्षये-तरद्रव्यैः सह सम्बन्धोऽनादिः। पुद्गलद्रव्येष्वपि महास्कन्धादीनां सामान्यादनादिर्बन्धः। एवं सर्वद्रव्यविषये बन्धे सति पुद्गलप्रकरणात् तद्विषयो बन्धः परिगृह्यते।

**विस्रसा विधिविपर्यये निपातः॥१२॥** पौरुषेयपरिणामापेक्षो विधिः, तद्विपर्यये विस्रसाशब्दो निपातो द्रष्टव्यः। विस्रसा प्रयोजनो वैस्रसिको बन्धः।

**प्रयोगः पुरुषकायवाङ्मनःसंयोगलक्षणः॥१३॥** पुरुषस्य कायवाङ्मनःसंयोगः प्रयोग इत्युच्यते। प्रयोगप्रयोजनो बन्धः प्रायोगिकः। स द्वेधा अजीवविषयो जीवाजीवविषयश्चेति। तत्राजीवविषयो जतुकाष्ठादिलक्षणः। जीवाजीवविषयः कर्मनोकर्मबन्धः। कर्मबन्धो ज्ञानावरणादिरष्टधा वक्ष्यमाणः। नोकर्मबन्धः औदारिकादिविषयः। स पुनः पञ्चविधः-आलपनाऽऽलेपनसंश्लेषशरीरशरीरिभेदात्। रथशकटादीनां लोहरज्जुवस्त्रादिभिरालपनादा-कर्षणात् बन्धः आलपनबन्धः। अनेकार्थत्वात् धातूनां लपिः आकर्षणक्रियो ज्ञेयः। कुड्यप्रासादादीनां मृत्पिण्डेष्टकादिभिः प्रलेपदानेनान्योन्यालेपनादर्पणात् आलेपनबन्धः। धातूनामनेकार्थत्वादाङ्पूर्वस्य लिपोऽर्पणक्रियस्य ग्रहणम्। जतुकाष्ठादिसंश्लेषणात् संश्लेषबन्धः। शरीरबन्धः पञ्चधा-औदारिकवैक्रियिकाहारकतैजसकार्मणशरीरनोकर्म-बन्धभेदात्। स प्रत्येकं चतुश्चतुश्चतुर्द्विरेकभङ्गभेदात् पञ्चदशधा। तत्रौदारिकशरीर नोकर्मप्रदेशानामौदारिकशरीरनोकर्मप्रदेशैरन्योन्यानुप्रवेशादौदारिकौदारिकशरीरनोकर्मबन्धः प्रथमः। औदारिकतैजसशरीरनोकर्मप्रदेशानामन्योन्यानुप्रवेशादौदारिकतैजसशरीरनोकर्म-बन्धो द्वितीयः। औदारिककार्मणशरीरनोकर्मप्रदेशानामन्योन्यानुप्रवेशः औदारिककार्मण-शरीरनोकर्मबन्धस्तृतीयः। औदारिकतैजसकार्मणशरीरनोकर्मप्रदेशानामन्योन्यानुप्रवेशः औदारिकतैजसकार्मणशरीरनोकर्मबन्धश्चतुर्थः। अनेन विधिना वैक्रियिकवैक्रियिकशरीर

नोकर्मबन्धः वैक्रियिकतैजसशरीरनोकर्मबन्धः वैक्रियिककार्मणशरीरनोकर्मबन्धः वैक्रियिकतैजसकार्मणशरीरनोकर्मबन्धः। आहारकाहारकशरीर नोकर्मबन्धः आहारकतैजस-शरीरनोकर्मबन्धः आहारककार्मणशरीरनोकर्मबन्धः आहारकतैजसकार्मणशरीरनोकर्मबन्धः। तैजसतैजसशरीरनोकर्मबन्धः तैजसकार्मणशरीरनोकर्मबन्धः। कार्मणकार्मणशरीरनोकर्म-बन्धश्च योज्यः। शरीरिबन्धो द्वेधा – अनादिरादिमांश्च। अष्टजीवमध्यप्रदेशानामुपर्यध-श्चतुर्णां रुचकवदवस्थितानां सर्वकालमन्योन्यापरित्यागादनादिबन्धः। इतरेषां प्रदेशानां कर्मनिमित्तसंहरणविसर्पणस्वभावत्वादादिमान्। अथवा, यथा क्रोधपरिणत आत्मैव क्रोधः तथा तप्तायःपिण्डवत् शरीरेण सह बन्धं प्रत्यात्मनः एकत्वादात्मैव शरीरमिति व्यपदेशात् पूर्वोक्ताः पञ्चदश विकल्पाः शरीरिविषयत्वेन योज्याः। औदारिका-दिशरीरभेदार्पणात् प्रागुक्ता विकल्पाः।

अत्राह – कर्मनोकर्मणोः कः प्रतिविशेष इति? उच्यते – आत्मपरिणामेन योगभावलक्षणेन क्रियते इति कर्म। तदात्मनोऽस्वतन्त्रीकरणे मूलकारणम्। तदुदयापादितः पुद्गलपरिणाम आत्मनः सुखदुःखबलाधाने हेतुरौदारिकशरीरादिरीषत्कर्म नोकर्मेत्युच्यते। किञ्च, स्थितिभेदाद्भेदः। कर्मणां स्थितिरुत्तरत्र वक्ष्यते। नोकर्मणां स्थितिरुच्यते – औदारिकवैक्रियिकशरीरयोः स्वायुःप्रमाणस्थितिर्निषेकः। तत्रौदारिक-शरीरस्य त्रिपल्योपमा स्थितिः, यस्मादेकसमयादारभ्य आत्रिपल्योपमसमाप्तेरवस्थानम्। आहारकशरीरस्यान्तर्मुहूर्तपरिमाणा स्थितिः। तैजसशरीरस्य षट्षष्टिसागरोपमा स्थितिः। कार्मणशरीरस्य कर्मस्थितिः ज्ञानावरणाद्यनेककर्मस्थितिसंभवेऽप्यात्मीयैव कर्मस्थिति-र्ग्राह्या। औदारिकवैक्रियिकतैजसकार्मणशरीरकर्मणामेकैकस्य विंशतिसागरोपमकोटीकोट्यः स्थितिः। आहारकशरीरकर्मणोऽन्तःकोटीकोट्यः स्थितिः।

**सौक्ष्म्यं द्विविधमन्त्यमापेक्षिकं च॥१४॥** सौक्ष्म्यं द्विविधं वेदितव्यम्। कुतः? अन्त्यमापेक्षिकञ्चेति। तत्राऽन्त्यं परमाणूनामापेक्षिकं बिल्वामलकबदरादीनाम्।

**तथा स्थौल्यम् ॥१५॥** तेनैव प्रकारेणान्त्यमापेक्षिकं बदरामलकबिल्वतालादिषु।

**संस्थानं द्वेधेत्थंलक्षणमनित्थंलक्षणं च ॥१६॥** संस्थानमाकृतिर्द्वेधा भिद्यते - इत्थंलक्षणमनित्थंलक्षणं चेति।

**वृत्तत्र्यस्रचतुरस्रायतपरिमण्डलादित्थमतोऽन्यदनित्थम् ॥१७॥** वृत्तं त्र्यस्रं चतुरस्रमायतं परिमण्डलमित्येवमादि संस्थानमित्थंलक्षणम्। अतोऽन्यन्मेघादीनां संस्थानमनेकविधमित्थमिदमिति निरूपणाभावादनित्थंलक्षणम्।

**भेदः षोढोत्करचूर्णखण्डचूर्णिकाप्रतराणुचटनविकल्पात् ॥१८॥** भेदः षोढा भिद्यते। कुतः? उत्करादिविकल्पात्। तत्रोत्करः काष्ठादीनां करपत्रादिभिरुत्करणम्। चूर्णो यवगोधूमादीनां सक्तुकणिकादिः। खण्डो घटादीनां कपालशर्करादिः। चूर्णिका माषमुद्गरादीनाम्। प्रतरोऽभ्रपटलादीनाम्। अणुचटनं तप्तायःपिण्डादिष्वयोघनादिभिरभिहन्यमानेषु स्फुलिङ्गनिर्गमः।

**तमो दृष्टिप्रतिबन्धकारणम् ॥१९॥** दृष्टेः प्रतिबन्धकं वस्तु तम इति व्यपदिश्यते। यदपहरन् प्रदीपः प्रकाशको भवति।

**छाया प्रकाशावरणनिमित्ता॥२०॥** प्रकाशावरणं शरीरादि यस्या निमित्तं भवति सा छाया।

**सा द्वेधा तद्वर्णादिविकारप्रतिबिम्बमात्रग्रहणविकल्पात् ॥२१॥** सा छाया द्वेधा व्यवतिष्ठते। कुतः? तद्वर्णादिविकारात् प्रतिबिम्बमात्रग्रहणाच्च। आदर्शतलादिषु प्रसन्नद्रव्येषु मुखादिच्छाया तद्वर्णादिपरिणतोपलभ्यते। इतरत्र प्रतिबिम्बमात्रमेव।

अत्राह – विपरीतग्रहणं कुतः, प्राङ्मुखस्य प्रत्यङ्मुखा छाया दृश्यते इति प्रसन्नद्रव्यपरिणामविशेषाद्भवति। अत्र चोद्यते – नादर्शतलादिच्छायासद्भावः। किं तर्हि?

नयननिर्गतेन रश्मिना घनद्रव्यात् प्रतिहतनिवृत्तेन स्वमुखस्यैव ग्रहणमिति; तदयुक्तम्; विपर्यासग्रहणाभावप्रसङ्गात्, कुड्यादिष्वतिप्रसङ्गात्, ग्रहणशक्त्यभावाच्च। विपर्यास-ग्रहणाभावप्रसङ्गस्तावत् यदि प्रतिनिवृत्तेन नयनरश्मिना स्वशरीरस्यैव ग्रहणं प्राङ्मुखस्य प्राङ्मुखमित्येव ग्रहणं स्यात्, विपर्यासहेत्वभावात्। कुड्यादिषु चातिप्रसङ्गः स्यात्, नयनरश्मेः प्रतिघातस्य तत्रापि सद्भावात्। नाप्यसौ नयनरश्मिः शरीरान्निष्क्रान्तः मनसाऽनधिष्ठितो ग्रहीतुं शक्नोति।

**आतप उष्णप्रकाशलक्षणः॥२२॥** आतप आदित्यनिमित्त उष्णप्रकाशलक्षणः पुद्गलपरिणामः।

**उद्योतश्चन्द्रमणिखद्योतादिविषयः॥२३॥** चन्द्रमणिखद्योतादीनां प्रकाशः उद्योत उच्यते।

**क्रियोपसंख्यानं पुद्गलपरिणामादिति चेन्न; धर्माधर्माकाशानां क्रियया प्रतिषेधा-संबन्धेनोक्तत्वात्॥२४॥** स्यादेतत्क्रियोपसंख्यातव्या। कुतः? पुद्गलपरिणामादिति; तन्न; किं कारणम्? धर्माधर्माकाशानां क्रियाप्रतिषेधसंबन्धेनोक्तत्वात्।

**कालस्यापि क्रियावत्त्वप्रसङ्ग इति चेन्न; पूर्वत्रानभिधानात्॥२५॥** स्यान्मतं यदि धर्माधर्माकाशानां क्रियापरिणामप्रतिषेधात् सामर्थ्यात् पुद्गलानां क्रियावत्त्वमवसीयते ननु कालस्यापि क्रियावत्त्वं प्रसज्यत इति; तन्न; किं कारणम्? पूर्वत्रानभिधानात् "अजीवकाया धर्माधर्माकाशपुद्गलाः" इत्यत्र। तत्र हि पाठे "आ आकाशादेकद्रव्याणि, निष्क्रियाणि" इत्यतः कालस्य बहिर्भावान्न पुद्गलवत् क्रियावत्त्वं भवेत्। अथवा पूर्वत्रानभिधानात्। क्व? द्रव्याणि जीवाः कालश्चेति। यदि कालस्य क्रियावत्त्वमिष्टं भवेत्तत्र पठ्येत, तथा सति "जीवाश्च" इति चशब्दाकरणात् लघुसूत्रं स्यात् पुनः 'कालश्च' इत्यवचनाच्च। अनन्तसमयार्थं पुनः 'कालश्च' इति कर्तव्यमिति चेन्न;

आकाशस्यानन्ताः कालस्य चेति सिद्धत्वात्। एवं लघीयसा न्यायेन सिद्धे यदुत्तरत्र निर्देशे "कालश्च" इति वचनं तेन ज्ञायते नास्ति कालस्य क्रियावत्त्वमिति। तच्च निष्क्रियत्वं परिस्पन्दात्मिकां क्रियां प्रत्यवसेयम्, न चास्त्यादिक्रियां प्रति। तस्मादनादिपारिणा-मिकास्त्यादिक्रियाद्रव्यार्थादेशात् स्यात् क्रियावान् कालः। देशान्तरप्रापणसमर्थपरिस्पन्द-क्रियाविशेषपरिणामाभावादेशाच्च स्यान्निष्क्रियः।

**सा दशप्रकारा प्रयोगबन्धाभावच्छेदाभिघातावगाहनगुरुलघुसंचारसंयोगस्वभाव-निमित्तभेदात् ॥२६॥** सैषा क्रिया दशप्रकारा वेदितव्या। कुतः प्रयोगादिनिमित्तभेदात्, तद्यथा इक्ष्वेरण्डबीजमृदङ्गशब्दजतुगोलकनौद्रव्यपाषाणालाम्बुसुराजलदमारुतादीनाम्। इषुचक्रक-णयादीनां प्रयोगगतिः। एरण्डतिन्दुकबीजानां बन्धाभावगतिः। मृदङ्गभेरीशङ्खादिशब्द-पुद्गलानां छिन्नानां गतिः छेदगतिः। जतुगोलककन्दुदारुपिण्डादीनामभिघातगतिः। नौद्रव्यपोतकादीनामवगाहनगतिः। पाषाणायःस्फालानां गुरुगतिः। अलाबूद्गतार्कतूलादीनां लघुगतिः। सुरासौवीरकादीनां संचारगतिः। जलधरमुशलादीनां वायुवाजिहस्त्यादीनां संयोगनिमित्ता संयोगगतिः। मारुतपावकपरमाणुसिद्धज्योतिष्कादीनां स्वभावगतिः। वायोः केवलस्य तिर्यग्गतिः। भस्त्रादियोगादनियता गतिः। अग्नेरूर्ध्वगतिः कारणवशाद्दि-गन्तरगतिः। परमाणोरनियता। सिद्ध्यतामूर्ध्वगतिरेव। ज्योतिषां नित्यभ्रमणं नृलोके।

**मत्वर्थीयप्रयोगादन्यत्वं शब्दादीनां दण्डवदिति चेन्न; अनेकान्तात् ॥२७॥** स्यान्मतम् – यथाऽन्यत्वे सति संबन्धे मत्वर्थीयो दृश्यते दण्डी देवदत्त इति, तथाऽत्रापि मत्वर्थीयदर्शनात् शब्दादीनामन्यत्वं तद्वद्भ्योऽनुमीयत इति तन्न; किं कारणम्? अनेकान्तात्। अनन्यत्वेऽपि लोके मत्वर्थीयो दृश्यते – सारवान् स्तम्भः आत्मवान् पुरुषः इति।

**कथञ्चित् अन्यत्वोपपत्तेश्च॥२८॥** शब्दादीनां पुद्गलेभ्यः भेदार्थादेशात् स्यादन्यत्वम्। शब्दादिपरिणामे च तप्तायःपिण्डवत् तादात्म्यादेशात् स्यादनन्यत्वम्।

अत्राह – यदि स्पर्शादयश्च शब्दादयश्च पुद्गलपरिणामाः किमर्थमेषां पृथग्ग्रहणं ननु एक एव योगः कर्तव्यः इति? अत्रोच्यते –

**पृथग्ग्रहणं केषाञ्चिदुभयपर्यायज्ञापनार्थम्॥२९॥** स्पर्शादयः परमाणूनां स्कन्धानां च भवन्ति शब्दादयस्तु स्कन्धानामेव व्यक्तिरूपेण भवन्ति सौक्ष्म्यवर्ज्या इत्येतस्य विशेषस्य प्रतिपत्त्यर्थं पृथग्योगकरणम्। सौक्ष्म्यं त्वन्त्यमणुष्वेवाऽऽपेक्षिकं स्कन्धेषु। यद्येवं सौक्ष्म्यग्रहणं पूर्वसूत्र एव कर्तव्यम्? इह करणं स्थौल्यप्रतिपक्षप्रतिपत्त्यर्थम्।

**स्पर्शादीनामेकजातीयपरिणामख्यापनार्थं च ॥३०॥** स्पर्शादीनां गुणानां परिणाम एकजातीय इत्येतस्यार्थस्य ख्यापनार्थं च क्रियते पृथक्ग्रहणम्। तद्यथा– स्पर्श एको गुणः काठिन्यलक्षणः स्वजात्यपरित्यागेन पूर्वोत्तरस्वगतभेदनिरोधोपजननसन्तत्या वर्तनात्, द्वित्रिचतुःसंख्येयाऽसंख्येयानन्तगुणकठिनस्पर्शपर्यायैरेव परिणमते न मृदुगुरु लघ्वादिस्पर्शैः। एवं मृद्वादयोऽपि योज्याः। रसश्च तिक्त एक एव गुणः रसजातिमजहन् पूर्ववन्नाशोत्पादावनुभवन् द्वित्रिचतुःसंख्येयाऽसंख्येयानन्तगुणतिक्तरसैरेव परिणमते न कटुकादिरसैः। एवं कटुकादयो वेदितव्याः। गन्धश्च सुरभिरेको गुणः स्व जातिमजहत्पूर्ववद्द्व्यादिगुणसुरभिगन्धपर्यायैरेव परिणमते नासुरभिगन्धैः। एवम सुरभिगन्धो वाच्यः। वर्णश्च शुक्ल एको गुणः स्वजात्यपरित्यागेन पूर्ववद्द्व्यम दिशुक्लवर्णैरेव परिणमते न नीलादिभिः। एवं नीलादयोऽपि च नेतव्याः। अथ यदा कठिनस्पर्शो मृदुस्पर्शेन गुरुर्लघुना, स्निग्धो रूक्षेण, शीत उष्णेन परिणमते, तिक्तश्च कटुकादिभिः, सुरभिश्चेतरेण, शुक्लश्च कृष्णादिभिः, इतरे चेतरैः, संयोगे च

गुणान्तरैस्तदा कथम्? तत्रापि कठिनस्पर्शः स्पर्शजातिमजहन् मृदुस्पर्शेनैव विनाशोत्पादावाऽनुभवन् परिणमते नेतरैः एवमितरत्रापि योज्यम्।

**नोदनाभिघाताद्युपसंख्यानमिति चेन्न; चशब्दस्येष्टसमुच्चयार्थत्वात् ॥११॥** स्यान्मतं नोदनाभिघातादयः पुद्गलपरिणामाः सन्ति तेषामत्रोपसंख्यानं कर्तव्यमिति; तन्न; किं कारणम्? चशब्दस्येष्टसमुच्चयार्थत्वात्। ये पुद्गलपरिणामा आगमे इष्टाः तेषामिह चशब्देन समुच्चयः क्रियते।

अत्राह – यद्येवमर्थं पृथग्योगकरणमुच्यतां के स्पर्शादिपरिणामाः पुद्गलाः, के वा तदुभयभाजः इति? अत्रोच्यते –

## अणवः स्कन्धाश्च॥२५॥

**प्रदेशमात्रभाविस्पर्शादिपर्यायप्रसवसामर्थ्येनाण्यन्ते शब्द्यन्ते इत्यणवः॥१॥** प्रदेशमात्रभाविभिः स्पर्शादिभिः गुणैस्सततं परिणमन्त इत्येवमण्यन्ते शब्द्यन्ते य ते अणवः। सौक्ष्म्यादात्मादयः आत्ममध्याः आत्मान्ताश्च। उक्तं च-

**"अंतादि अंतमज्झं अंतंतं णेव इंदिए गेज्झं।**
**जं दव्वं अविभागी तं परमाणुं विजाणीहि॥१॥"**

**स्थौल्याद्ग्रहणनिक्षेपणादिव्यापारास्कन्दनात्स्कन्धाः॥२॥** स्थौल्यभावेन ग्रहण-निक्षेपणादिव्यापारास्कन्दनात् स्कन्धा इति संज्ञायन्ते। रूढौ क्रिया क्वचित् सत्युपलक्षणत्वेनाश्रितेति ग्रहणादिव्यापाराऽयोग्येष्वपि द्व्यणुकादिषु स्कन्धाख्या वर्तते।

**उभयत्र जात्यपेक्षं बहुवचनम् ॥३॥** अनन्तभेदा अपि पुद्गला अणुजात्या स्कन्धजात्या च द्वैविध्यमापद्यमानाः सर्वे गृह्यन्त इति तज्जात्याधारानन्तभेदसंसूचनार्थं बहुवचनं क्रियते।

**अणुस्कन्धा इत्यस्तु लघुत्वादिति चेन्न; उभयसूत्रसंबन्धार्थत्वात् भेद करणस्य॥४॥** स्यान्मतम् - 'अणवः स्कन्धा अणुस्कन्धाः' इति वृत्तिकरणमिह युक्तं लघुत्वादिति; तन्न; किं कारणम्? उभयसूत्रसंबन्धार्थत्वात् भेदकरणस्य स्पर्शरसगन्ध-वर्णवन्तोऽणवः, शब्दबन्धसौक्ष्म्यस्थौल्यसंस्थानभेदतमश्छायातपोद्योतवन्तश्च स्कन्धा इति। वृत्तौ पुनः सत्यां समुदायस्यार्थवत्त्वादवयवार्थाभावात् भेदेनाभिसंबन्धः कर्तुं न शक्यः।

**कारणमेव तदन्त्यमित्यसमीक्षिताभिधानम्; कथञ्चित् कार्यत्वात्॥५॥** "कारणमेव तदन्त्यम्" इति केचित् कथयन्ति परमाणुम् तदसमीक्षिताभिधानम्; कुतः? कथञ्चित् कार्यत्वात्। परमाणुर्हि केनचित् प्रकारेण कार्यः"भेदादणुः" इति वक्ष्यमाणत्वात्।

**अविरोध इति चेन्न; एवशब्देनाऽवधारणात्॥६॥** स्यादेतत् – कथञ्चित् कार्यत्वोपपत्तौ कारणस्याप्रतिपेधादविरोध इति; तन्न; किं कारणम्? एवशब्दे-नावधारणात्। यत एव कारणं ततोऽन्यत्रावधारणमिति कारणमेव परमाणुर्न कार्यमिति कार्यत्वनिषेधात्।

**नित्य इति चायुक्तं स्नेहादिभावेनानित्यत्वात्॥७॥** नित्यः परमाणुरिति एतच्च वचनमयुक्तम्। कुतः? स्नेहादिभावेनानित्यत्वात्। स्नेहादयो हि गुणाः परमाणौ प्रादुर्भवन्ति व्ययन्ति च, ततस्तत्पूर्वकमस्यानित्यत्वमिति।

**अनादिपरमाण्ववस्थमिति चेन्न; तत्कार्याभावात्॥८॥** स्यान्मतमनाद्यणुत्वावस्थः परमाणुरस्ति स द्व्यणुकादिकार्यहेतुत्वात् कारणमेव न कार्यम्। नह्यसौ भेदादुत्पद्यत इति; तन्न; किं कारणम्? तत्कार्याभावात्। न हि तस्यानादिपारिणामिकाण्ववस्थस्य कार्यमस्ति, तत्स्वभावाविनिवृत्तेः। सति च कार्ये तद्भेदादणुरिति कार्यत्वसिद्धिः। ततः कार्यस्याभावात् कारणमिति व्यपदेशश्च नोपपद्यते। नहि कार्ये तद्भेदादणुरिति

कार्यत्वसिद्धिः ततः कार्यस्याभावात् कारणमिति व्यपदेशश्च नोपपद्यते। न ह्यसति पुत्रेऽस्ति पितृव्यपदेश इति।

**छायादि तत्कार्यमिति चेन्न; चाक्षुषत्वात् ॥९॥** यदि छायादि कार्यमनादि-परमाणोरिति कल्प्यते; तदपि नोपपद्यते; कुतः? स्कन्धनिमित्तत्वात्। अनन्तानन्तप्रदेशस्कन्धारब्धं छायादि नानादिपरमाणुकार्यम्।

**प्रतिज्ञामात्रमिति चेन्न; चाक्षुषत्वात् ॥१०॥** अथ मतं प्रतिज्ञामात्रमेतत् स्कन्धकार्यं छायादि नाणुकार्यमिति; तच्चायुक्तम्; कुतः? चाक्षुषत्वात्। चाक्षुष हि छाया यद्यचाक्षुषमणुकार्यं न भवितुमर्हति। न चानादिपरमाणुर्नाम कश्चिदस्ति "भेदादणुः" इति वचनात्।

**नित्यवचनं तदर्थमिति चेन्न; तस्यापि स्नेहादिविपरिणामाभ्युपगमात् ॥११॥** स्यान्मतं नित्यवचनमादिपरमाण्वर्थमिति; तन्न; किं कारणम्? तस्यापि स्नेहादिविपरिणामाभ्युपगमात्। न हि निष्परिणामः कश्चिदर्थोऽस्ति।

**नयापेक्षमिति चेत्; युक्तम् ॥१२॥** अथ मतम् -"कारणमेव तदन्त्यं नित्यः" इति वचनं नयापेक्षम्। द्व्यणुकादिवत् संघातकार्याभावात् कारणमेव द्रव्यार्थतया व्ययोदयाभावान्नित्यः, इत्येवं सति युक्तम्, हेतुविशेषसामर्थ्यार्पणेऽवधारणाऽविरोधात्, द्रव्यार्थतयाऽवस्थानाच्च।

**एकरसवर्णगन्धोऽणुः निरवयवत्वात् ॥१३॥** एकरसः एकगन्धश्च परमाणुर्वेदितव्यः। कुतः? निरवयवत्वात्। सावयवानां हि मातुलिङ्गादीनामनेकरसत्वं दृश्यते। अनेकवर्णत्वं च मयूरादीनामनेकगन्धत्वं चानुलेपनादीनां च। निरवयवश्चाणुरत एकरसवर्णगन्धः।

**द्विस्पर्शो विरोधाभावात् ॥१४॥** द्विस्पर्शोऽणुरवगन्तव्यः। कुतः? विरोधाभावात्। कौ पुनः द्वौ स्पर्शौ? शीतोष्णस्पर्शयोरन्यतरः स्निग्धरूक्षयोरन्यतरश्च, एकप्रदेशत्वात्

विरोधिनोः युगपदनवस्थानम्। गुरुलघुमृदुकठिनस्पर्शानां परमाणुष्वभावःस्कन्धविषय-त्वात्। कथं पुनस्तेषामणूनामत्यन्तपरोक्षाणामस्तित्वमवसीयत इति चेत्? उच्यते-

**तदस्तित्वं कार्यलिङ्गत्वात्॥१५॥** तेषामणूनामस्तित्वं कार्यलिङ्गत्वादवगन्त-व्यम्। कार्यलिङ्गं हि कारणम्। नाऽसत्सु परमाणुषु शरीरेन्द्रियमहाभूतादिलक्षणस्य कार्यस्य प्रादुर्भाव इति।

**अनेकान्तः कारणत्वादिविकल्पः॥१६॥** अणोः कारणत्वादिविकल्पोऽनेकान्तो योज्यः – स्यात्कारणं स्यात्कार्यमित्यादि। द्व्यणुकादिकार्यप्रादुर्भावनिमित्तत्वात् स्यात्कारणमणुः, भेदादुपजायत इति स्यात्कार्यम्, स्निग्धरूक्षत्वादिकार्यगुणाधिकरणाद्वा। ततः पुनर्भेदाभावात् स्यादन्त्यः। प्रदेशभेदाभावेऽपि पुनरपि गुणभेदसद्भावात् स्यान्नान्त्यः। सूक्ष्मपरिणामसद्भावत्वात् स्यात्सूक्ष्मः, स्थूलकार्यप्रभवयोनित्वात् स्यात्स्थूलः। द्रव्यताऽपरित्यागात् स्यान्नित्यः बन्धभेदपर्यायादेशात् गुणान्तरसङ्क्रान्तिदर्शनाच्च स्यादनित्यः। निष्प्रदेशत्वपर्यायार्पणात् स्यादेकरसवर्णगन्धो द्विस्पर्शश्च, अनेकप्रदेशस्कन्धपरिणामशक्तियोगात् स्यादनेकरसादिः। कार्यलिङ्गेनानुमीयमानसद्भा-वादेशात् स्यात्कार्यलिङ्गः; प्रत्यक्षज्ञानगोचरत्वपर्यायादेशात् स्यान्न कार्यलिङ्गः। उक्तं च –

> **"कारणमेवं तदन्त्यं सूक्ष्मो सूक्ष्मो नित्यश्च भवति परमाणुः।**
> **एकरसगन्धवर्णो द्विस्पर्शः कार्यलिङ्गश्च॥१॥"**

के पुनः स्कन्धाः?

**परिप्राप्तबन्धपरिणामाः स्कन्धाः॥१७॥** बन्धो वक्ष्यते, तं परिप्राप्ताः येऽणवः ते स्कन्धा इति व्यपदेशमर्हन्ति। ते त्रिविधाः – स्कन्धाः स्कन्धदेशाः स्कन्धप्रदेशाश्चेति। अनन्तातनन्तपरमाणुबन्धविशेषः स्कन्धः। तदर्धं देशः। अर्धार्धं प्रदेशः। तद्भेदाः

पृथिव्यप्तेजोवायवः स्पर्शादिशब्दादिपर्यायाः। पृथिवी तावत् घटादिलक्षणा स्पर्शादिशब्दाद्यात्मिका सिद्धा। अम्भोऽपि तद्विकारत्वात् तदात्मकं साक्षात् गन्धोपलब्धेश्च। तत्संयोगिनां पार्थिवद्रव्याणां गन्धः तद्गुण इवोपलभ्यत इति चेन्न; साध्यत्वात्। तद्वियोगकालादर्शनात् तदविनाभावाच्च तद्गुण एवेति निश्चयः कर्तव्यः – गन्धवदम्भः रसवत्त्वादाम्रफलवत्। तथा तेजोऽपि स्पर्शादिस्वभावकं तद्वत्कार्यत्वात् घटवत्। स्पर्शादिमतां हि काष्ठादीनां कार्यं तेजः। किञ्च, तत्परिणामात्। उपयुक्तस्य ह्याहारस्य स्पर्शादिगुणस्य वातपित्तश्लेष्मविपरिणामः। पित्तं च जठराग्निः, तस्मात् स्पर्शादिमत्तेजः। तथा स्पर्शादिशब्दादिपरिणामो वायुः स्पर्शवत्त्वात् घटादिवत्। किञ्च तत्परिणामात्। उपयुक्तस्य ह्याहारस्य स्पर्शादिगुणस्य वातपित्तश्लेष्मविपरिणामः। वातश्च प्राणादिः। ततो वायुरपि स्पर्शादिमानित्यवसेयः।

एतेनान्ये च 'चतुस्त्रिद्व्येकगुणाः पृथिव्यादयः पार्थिवादिजातिभिन्ना' इति तद्दर्शनं प्रत्युक्तम्।आह – किमेषामणुस्कन्धलक्षणः परिणामोऽनादिरूताऽऽदिमान् इति? उच्यते – स खलूत्पत्तिमत्त्वादादिमान् प्रतिज्ञायते। यद्येवमभिधीयतां कस्मान्निमित्ता-दुत्पद्यन्त इति। तत्र स्कन्धानां तावदुत्पत्तिहेतुप्रतिपादनार्थमिदमुच्यते–

## भेदसंघातेभ्य उत्पद्यन्ते॥२६॥

**संहतानां द्वितयनिमित्तवशात् विदारणं भेदः॥१॥** बाह्याभ्यन्तरविपरिणामकारण-सन्निधाने सति संहतानां स्कन्धानां विदारणं नानात्वं भेद इत्युच्यते।

**विविक्तानामेकीभावः संघातः॥२॥** पृथग्भूतानामेकत्वापत्तिः संघात इति कथ्यते।

**द्वित्वाद् द्विवचनप्रसङ्ग इति चेन्न; बहुवचनस्यार्थविशेषज्ञापनार्थत्वात्॥३॥** स्यादेतद्भेदसंघातयोर्द्वित्वात् द्विवचनेन भवितव्यमिति तन्न; किं कारणम्?

बहुवचनस्यार्थविशेषज्ञापनार्थत्वाद्यतो भेदेन संघातः भेदसंघातः इत्यस्याप्यवरोधः कृतो भवति।

**उत्पूर्वः पदिर्जात्यर्थः॥४॥** उत्पूर्वः पदिर्जात्यर्थो द्रष्टव्यः – उत्पद्यन्ते जायन्त इति यावत्।

**तदपेक्षो हेतुनिर्देशः॥५॥** भेदसंघातेभ्य इत्ययं हेतुनिर्देशस्तदपेक्षो वेदितव्यः। "निमित्तकारणहेतुषु सर्वासां प्रदर्शनात्" इति भेदसंघातेभ्यः कारणेभ्यः उत्पद्यन्ते इति हेत्वर्थगतेः। तद्यथा – द्वयोः परमाण्वोः संघाताद् द्विप्रदेशस्कन्ध उत्पद्यते। द्विप्रदेशस्ययाणोश्च त्रयाणां वाऽणूनां संघातात्त्रिप्रदेशः। द्वयोः द्विप्रदेशयोः त्रिप्रदेशस्याणोश्चतुर्णां वाऽणूनां संघाताच्चतुष्प्रदेशः। एवं संख्येयानामसंख्येयानाम-नन्तानां च संघातात्तावत्प्रदेशः। एषामेव भेदात् द्विप्रदेशपर्यन्तात् स्कन्धाउत्पद्यन्ते। एवं भेदसंघाताभ्यामेकसामयिकाभ्यां द्विप्रदेशादयः स्कन्धा उत्पद्यन्तेऽन्यतो भेदेनान्यस्य संघातेनेति।

एवमुक्तानामणुस्कन्धानामविशेषेण भेदादिहेतुकोत्पत्तिप्रसङ्गे विशेषप्रतिपत्त्यर्थ-मिदमुच्यते –

## भेदादणुः॥२७॥

**सामर्थ्यादवधारणप्रतीतेरेवकारवचनमब्भक्ष्यवत्॥१॥** यथा न कश्चिदपो न भक्षयतीत्यब्भक्षणसिद्धेरब्भक्षणवचनादप एव भक्षयतीत्यवधारणं गम्यते। एवं भेदसंघातेभ्य उत्पद्यन्ते इत्यनेनैवाणोर्भेदादुत्पत्तौ सिद्धायां पुनर्वचनमवधारणार्थं भवति –भेदादेवाणुः न संघातान्नापि भेदसंघाताभ्यामिति।

अत्राह – संघातादेव स्कन्धानामात्मलाभसिद्धेर्भेदसंघातग्रहणमनर्थकमिति तद्ग्रहणप्रयोजनप्रतिपादनार्थमिदमुच्यते –

## भेदसंघाताभ्यां चाक्षुषः॥२८॥

अनन्तानन्तपरमाणुसमुदयनिष्पाद्योऽपि कश्चिच्चाक्षुषः कश्चिच्चाऽचाक्षुषः। तत्र योऽचाक्षुषः स कथं चाक्षुषो भवतीति चेत्? उच्यते – भेदसंघाताभ्यां चाक्षुषः न भेदादिति। काऽत्रोपपत्तिरिति चेत्? ब्रूमः – सूक्ष्मपरिणामस्य स्कन्धस्य भेदे सौक्ष्म्या-परित्यागादचाक्षुषत्वमेव। सूक्ष्मपरिणतः पुनरपरः सत्यपि तद्भेदेऽन्यसंघातान्तरसंयोगात् सौक्ष्म्यपरिणामोपरमे स्थौल्योत्पत्तौ चाक्षुषो भवति।

अत्राह – गतिस्थित्यवगाहनवर्तनाशरीरादिपरस्परोपकाराद्यनुमितास्तित्वं धर्मादि पुरस्ताद्द्रव्यमित्याख्यातम्, तत्कथं द्रव्यमित्यवध्रियते?

## सद्द्रव्यलक्षणम् ॥२९॥

सत्त्वात्, यत्सत्तद् द्रव्यम् ।

यद्येवं प्राप्तमिदं सतः किं लक्षणमिति? उच्यते – यदिन्द्रियग्राह्यमतीन्द्रियमपि बाह्याध्यात्मिकनिमित्तापेक्षमुत्पादव्ययध्रौव्ययुक्तं सत्तत् 'वेदितव्यम्' इति वाक्यशेषः।

अथवा, धर्मादि सत्त्वात् द्रव्यमित्यवधृतम् । तस्मादभिधीयतां किं तत्सदिति? तत इदमुपादिक्षत –

## उत्पादव्ययध्रौव्ययुक्तं सत् ॥३०॥ इति

अथवा, यद्युपकारसद्भावात् धर्मादिद्रव्यं सद्विवक्षितं यदा तर्हि नोपकरोति तदा तदसत्त्वप्रसङ्ग इति; उच्यते – असत्यप्युपकारविशेषे यस्मात् सामान्ये द्रव्यलक्षणत्रये सन्निहिते उत्पादव्ययध्रौव्ययुक्तं सद्द्रव्यं भविष्यतीत्यर्थः।

**स्वजात्यपरित्यागेन भावान्तरावाप्तिरुत्पादः॥१॥** चेतनस्याचेतनस्य वा द्रव्यस्य स्वजातिमजहतो निमित्तवशात् भावान्तरावाप्तिरुत्पादनमुत्पाद इत्युच्यते मृत्पिण्डस्य घटपर्यायवत्।

**तथा पूर्वभावविगमो व्ययनं व्ययः॥२॥** तेन प्रकारेण तथा स्वजात्यपरित्यागेन इत्यर्थः, पूर्वभावविगमो व्ययनं व्यय इति कथ्यते यथा घटोत्पत्तौ पिण्डाकृतेः।

**ध्रुवेः स्थैर्यकर्मणोर्ध्रुवतीति ध्रुवः॥३॥** अनादिपारिणामिकत्वभावत्वेन व्ययोदया-भावात् ध्रुवति स्थिरीभवति इति ध्रुवः, ध्रुवस्य भावः कर्म वा ध्रौव्यम् यथा पिण्डघटाद्यवस्थासु मृदाद्यन्वयात्।

**अन्येनान्यसंयोगे दण्डिवदिति चेन्न; अन्तर्नीतसत्ताक्रियस्य युजेराश्रितत्वात्॥४॥** स्यान्मतमुत्पादश्च व्ययश्च ध्रौव्यं चोत्पादव्ययध्रौव्याणि। उत्पादव्ययध्रौव्यैर्युक्त-मुत्पादव्ययध्रौव्ययुक्तमिति निर्देशो नोपपद्यते। कुतः? अन्येनान्यस्य योगात् दण्डिवदिति; तन्न; किं कारणम्? अन्तर्नीतसत्ताक्रियस्य युजेराश्रितत्वात्। कथं पुनः युजेः सत्ताक्रियत्वमिति चेत्? उच्यते – सर्वे धातवो भाववचनाः। भावश्च सत्ता क्रिया इत्यनर्थान्तरम्। तामेव सर्वे शब्दाः स्वार्थापनिधानेनावच्छिद्यावच्छिद्य विषयीकुर्वन्ति। उत्पादव्ययध्रौव्ययुक्तं सदिति यावत् तावदुत्पादव्ययध्रौव्ययुक्तमिति। सर्वधातूनां सत्तार्थत्वे एधादीनां वृद्ध्यादिप्रतिनियतार्थत्वाभाव इति चेन्न; सत्तार्थत्वे सत्येधादीनां वृद्ध्याद्यर्थप्रवृत्तेर्नह्यसतां खरविषाणादीनां वृद्ध्यादिरर्थोऽस्ति।

**उत्पादव्ययध्रौव्यवदिति न्याय्यमिति चेन्न; उपालम्भपरिहारतुल्यत्वात् ॥५॥** स्यादेतत् – यद्यन्तर्नीतसत्ताक्रियो युजिः परिगृह्यते उत्पादव्ययध्रौव्यवदित्येतदेव न्याय्यमिति; तन्न; किं कारणम्? उपालम्भपरिहारतुल्यत्वात्। यथा गोभ्योऽन्यत्वे देवदत्तस्य गोमानिति व्यपदेशो भवति न तथोत्पादव्ययध्रौव्येभ्योऽन्यत् द्रव्यमिति 'मत्वर्थीयो नोपपद्यते' इति उपालम्भो न निवर्तते।' 'अनन्यत्वेऽपि लोके मत्वर्थीयो दृश्यते – आत्मवान् आत्मा, सारवान् स्तम्भः' इति परिहारश्च तुल्यः।

**समाधिवचनत्वाद्वा॥६॥** अथवा समाधिवचनोऽयं युजिः परिगृह्यते। युक्तः समाहित इत्यर्थः। समाधानं च तात्पर्यं तादात्म्यमिति यावत्। उत्पादव्ययध्रौव्ययुक्त मुत्पादव्ययध्रौव्यात्मकमित्यर्थः।

**कथञ्चिदन्यत्वोपपत्तेर्वा॥७॥** यथा वा पर्यायेभ्यः पर्यायिणः कथञ्चिदन्यत्वोपपत्तेः योगवचन एव वा युक्तशब्दो न्याय्यः। यदि हि सर्वथाऽनन्यत्वं स्यादुभयाभावप्रसङ्ग स्यात्।

**सच्छब्दस्य प्रशंसाद्यनेकार्थसंभवे विवक्षातोऽस्तित्वसंप्रत्ययः॥८॥** सच्छब्दः प्रशंसादिषु वह्वर्थेषु दृष्टप्रयोगः। प्रशंसाया तावत् – सत्पुरुषः प्रशस्तः पुरुषः इत्यर्थः। क्वचिदादरे सत्करोत्यादरं करोतीत्यर्थः। क्वचिदस्तित्वे – सद्भूतसमयमाह विद्यमान-माहेत्यर्थः। क्वचित् प्रज्ञायमाने – प्रव्रजितः सन् कथमनृतं ब्रूयात्? प्रव्रजित इति प्रज्ञायमान इत्यर्थः। तत्रेह विवक्षातोऽस्तित्ववचनो वेदितव्यः।

**व्ययोत्पादाव्यतिरेकाद् द्रव्यस्य ध्रौव्यानुत्पत्तिरिति चेन्न; अभिहितानव-बोधात् ॥९॥** स्यादेतत् – व्ययोत्पादाभ्यामव्यतिरेकाद् द्रव्यस्य व्ययोत्पादात्मकत्वात् ध्रुवत्वं नोपपद्यते इति; तन्न; किं कारणम्? अभिहितानवबोधात्। द्रव्यार्थावस्थानात् ध्रौव्यमभिहितम्, न व्ययोत्पादाभ्यां व्यतिरेकात्। यदि च व्ययोत्पादाभ्यां व्यतिरेकात्

ध्रौव्यमभिहितं स्यात् तदव्यतिरेकाद्ध्रौव्यं भवेत्। यदि वा व्ययोदयाभ्यां व्यतिरेकात् द्रव्यं ध्रुवम्; द्रव्यादपि व्यतिरेकात् व्ययोदययोर्ध्रौव्यं प्रसज्येत।

अथवा, अभिहितानवबोधात्। नैकान्तेन व्ययोदयाभ्यामव्यतिरेको द्रव्यस्याभिहितः। यदि स्यात्, तदत्यन्ताव्यतिरेकात् तद्भावापत्तेर्ध्रौव्याभावः स्यात्। यतस्तु केनचित् प्रकारेण व्ययोत्पादाभ्यां व्यतिरेकः केनचिदव्यतिरेकः। व्ययोत्पादकाले द्रव्यार्थावस्थानात् स्याद् व्यतिरेकः। द्रव्यजात्यपरित्यागात् स्यादव्यतिरेकः। तत एकान्तपक्षोपालम्भाभावः। एकान्तव्यतिरेके हि द्रव्यं प्रत्याख्यायान्यत्र व्ययोदयावुपलभ्येयाताम्। ऐकान्तिकाऽव्यतिरेके चैकलक्षणत्वादन्यतराभावेऽवशिष्टस्याप्यभावः स्यात्।

**स्ववचनविरोधाच्च॥१०॥** यदि व्ययोत्पादाव्यतिरेकान्न द्रव्यस्य ध्रौव्यं यस्तेन स्वपक्षसिद्धये हेतुर्व्यपदिश्यते स साधकत्वादव्यतिरिक्त इति पक्षस्यापि साधकः स्यात्। परपक्षस्य वा यो दूषक इति ततोऽव्यतिरेकात् स्वपक्षस्यापि दूषक इति वचनविरोधस्ततश्च न युक्तमुक्तं व्ययोत्पादाव्यतिरेकाद् ध्रौव्यानुपपत्तिरिति।

**उत्पादादीनां द्रव्यस्य चोभयथा लक्ष्यलक्षणभावानुपपत्तिरिति चेन्न; अन्यत्वानन्यत्वं प्रत्यनेकान्तोपपत्तेः॥११॥** स्यान्मतमुत्पादव्ययध्रौव्याणि द्रव्यादर्थान्तरभूतानि वा स्युरनर्थान्तरभूतानि वा? यद्यर्थान्तरभावः कल्प्येत; तानि वः सत्त्वानि, ततोऽन्यत्वात् द्रव्यस्याभावः स्यात्। तदभावे च निराधारत्वादुत्पादादीनामभाव इति लक्ष्यलक्षणभावो नोपपद्यते। न ह्यसतां वन्ध्यापुत्राकाशकुसुमादीनां लक्ष्यलक्षणभावोऽस्ति। अथानर्थान्तरत्वमिष्यते; लक्ष्यमेव लक्षणमिति दृष्टविरोधः स्यादिति; तन्न; किं कारणम्? अन्यत्वानन्यत्वं प्रत्यनेकान्तोपपत्तेः। पर्यायिणः पर्यायाणां च स्यादिति; तन्न; किं कारणम्? अन्यत्वानन्यत्वं प्रत्यनेकान्तोपपत्तेः। पर्यायिणः पर्यायाणां च स्यादन्यत्वं स्यादनन्यत्वम्। यथैकस्य मनुष्यस्य जातिकुलरूपादिभिर्विशिष्टस्या-

नेकसंबन्धान्तराविर्भूतपितृपुत्रभ्रातृभागिनेयादयो धर्माः परस्परतो विशिष्टा उपलभ्यन्ते न तेषां भेदात्तस्य भेदः, नापि तस्याऽभेदात्तेषामभेदः। ततः पितृत्वादिशक्त्यपेक्षया नाना मनुष्यत्वापेक्षया न पृथक्। तथा द्रव्यस्यापि बाह्याभ्यन्तरहेतुविशेषापादिताः पर्यायाः कथञ्चिद्भिन्नाः द्रव्यार्पणात् कथञ्चिदभिन्ना इति नासत्त्वं न लक्ष्यलक्षणभावाभावः। तस्मादुत्पादादित्रयैक्यवृत्तिः सत्ता, तद्युक्तं द्रव्यमित्यवसेयम्।

अत्राह – यथा द्रव्यस्यात्मभूतोऽन्वयो धर्मः तथा पर्यायोऽप्यात्मभूतो द्रव्यस्येति तन्निवृत्तिवद् द्रव्यनिवृत्तिकल्पनायामुच्छेदप्रसङ्ग इति अत्र ब्रूमहे – स्यादेतदेवं यदि क्रमेण पिण्डघटकपालादिवद्रूपिद्रव्याजीवानुपयोगत्वादिलक्षणः परिणामः कादाचित्कः स्यात्। यतः सत्यपि व्ययोत्पादवत्त्वे पर्यायाणाम्–

## तद्भावाव्ययं नित्यम् ॥३१॥

किमध्यवस्यामः? द्रव्यमिति वाक्यशेषः। तद्भाव इत्युच्यते। कस्तद्भावः?

**प्रत्यभिज्ञानहेतुता तद्भावः॥१॥** तदेवेदमिति स्मरणं प्रत्यभिज्ञानम्, तदकस्मान्न भवतीति योऽस्य हेतुः स तद्भावः। भवनं भावः, तस्य भावस्तद्भावः, येनात्मना प्राग्दृष्टं वस्तु तेनैवात्मना पुनरपि भावात् तदेवेमिति प्रत्यभिज्ञायते। यद्यत्यन्तनिरोधाभिनव प्रादुर्भावमात्रमेव स्यात्; स्मरणानुपपत्तेः तदधीनो लोकसंव्यवहारो विरुध्यते। ततः तद्भावेनाव्ययं तद्भावाव्ययम् नित्यमिति निश्चीयते।

**विरोध इति चेत्; धर्मान्तराश्रयणात्॥२॥** स्यान्मतम् – वियदेव न व्येति, उत्पद्यमान एव नोत्पद्यते इति विरोधः, ततो न युक्तमिति; तन्न; किं कारणम्? धर्मान्तराश्रयणात्। यदि येन रूपेण व्ययोदयकल्पना तेनैव रूपेण नित्यता प्रतिज्ञायेत स्याद्विरोधः। जनकत्वापेक्षयैव पितापुत्रव्यपदेशवत्, न तु धर्मान्तरसंश्रयणात् पुनरपि मिथ्यादर्शनाकुलितचेताः निरूपितमपि त्रितयात्मकत्वमप्रतिपद्यमान आह – यद् व्येति

उत्पद्यते च तत्सन्नित्यं चेत्यतिसाहसमेतत् दुरुपपादत्वात् कथं श्रद्धीयत इति? अत्रोच्यते – श्रद्धेहि व्ययोत्पादवत्सु पर्यायेष्वव्यभिचारिणि सन्नित्यत्वे स्त इति। कुतः? यस्माद् द्रव्यार्थिकपर्यायार्थिकसंभवेऽन्यतरविवक्षावशात् यथोक्ते उभे अपि–

## अर्पितानर्पितसिद्धेः॥३२॥

**धर्मान्तरविवक्षाप्रापितप्राधान्यमर्पितम्॥१॥** अनेकात्मकस्य वस्तुनः प्रयोजनवशात् यस्य कस्यचिद्धर्मस्य विवक्षया प्रापितप्राधान्यमर्थरूपमर्पितमुपनीतमिति यावत्।

**तद्विपरीतमनर्पितम्॥२॥** प्रयोजनाभावात् सतोऽप्यविवक्षा भवतीत्युपसर्जनीभूतमनर्पितमित्युच्यते। अर्पितं चानर्पितं च अर्पितानर्पिते ताभ्यां सिद्धे सन्नित्यत्वे अर्पितानर्पिताभ्यां सिद्धे सन्नित्यत्वेऽर्पितानर्पितसिद्धिः। तद्यथा – मृत्पिण्डः रूपिद्रव्यमित्यर्पितः स्यान्नित्यः तदर्थापरित्यागात्। अनेकधर्मपरिणामिनोऽर्थस्य धर्मान्तरविवक्षाव्यापारात् रूपिद्रव्यात्मनाऽनर्पणात् मृत्पिण्ड इत्येवमर्पितं पुद्गलद्रव्यं स्यादनित्यं तस्य पर्यायस्याध्रुवत्वात्। तत्र यदि द्रव्यार्थिकनयविषयमात्रपरिग्रहः स्यात् व्यवहारलोपः तदात्मकवस्त्वभावात्। यदि पर्यायार्थिकनयगोचरमात्राभ्युपगमः स्यात् लोकयात्रा न सिद्ध्यति तथाविधस्य वस्तुनोऽसद्भावात्। तावेकत्रोपसंहृतौ लोकयात्रासमर्थौ भवतः तदुभयात्मकस्य वस्तुनः प्रसिद्धेः। इत्येवमर्पितानर्पितव्यवहारसिद्धे सन्नित्यत्वे।

आह – सतोऽनेकनयव्यवहारतन्त्रत्वादुपपन्ना भेदसंघातेभ्यः सतां स्कन्धात्मनोत्पत्तिः। इदं तु सन्दिह्यः किं संघातः संयोगादेव द्व्यणुकादिलक्षणो भवति, उत कश्चिद्विशेषोऽवध्रियते इति? उच्यते – सति संयोगे बन्धादेकत्वपरिणामकात् संघातो निष्पद्यते। यद्येवमिदमुच्यतां कुतो न खलु पुद्गलजात्यपरित्यागे संयोगे च भवति केषाञ्चित् बन्धोऽन्येषां च नेति? उच्चते –

यस्मात्तेषां पुद्गलात्माऽविशेषेऽप्य- नन्तपर्यायाणां परस्परविलक्षणपरिणामाहितसामर्थ्याद्भवन् बन्धः प्रतीतः –

## स्निग्धरूक्षत्वाद् बन्धः॥३३॥

**स्नेहपर्यायाविर्भावात् स्निह्यते स्मेति स्निग्धः॥१॥** बाह्याभ्यन्तरकारणवशात् स्नेहपर्यायाविर्भावात् स्निह्यते स्मेति स्निग्धः।

**रूक्षणाद् रूक्षः॥२॥** द्वितयनिमित्तवशात् रूक्षणात् रूक्ष इति व्यपदिश्यते। स्निग्धश्च रूक्षश्च स्निग्धरूक्षौ तयोर्भावः स्निग्धरूक्षत्वम्। स्निग्धत्वं चिक्कणत्वलक्षणः पर्यायः। तद्विपरीतः परिणामो रूक्षत्वम्। स्निग्धरूक्षत्वादिति हेतुर्निर्देशः। तत्कृतो बन्धो द्व्यणुकादिपरिणामः। द्वयोः स्निग्धरूक्षयोरण्वोः परस्पराश्लेषलक्षणे बन्धे सति द्व्यणुकः स्कन्धो भवति। एवं संख्येयाऽसंख्येयाऽनन्तप्रदेशस्कन्धो योज्यः।

**एकगुणादिसंख्येयाऽसंख्येयानन्तविकल्पः स्नेहः॥३॥** अविभागपरिच्छेदैकगुणः स्नेहः एवंगुणाश्च परमाणवः सन्ति।

**तोयाजागोमहिष्युष्ट्रीक्षीरघृतेषु पांशुकणिकाशर्करादिषु च प्रकर्षाप्रकर्षदर्शनात्तदनुमानम्॥४॥** यथा तोयादजाक्षीरघृते प्रकृष्टस्नेहे ततः प्रकृष्टस्नेहे गोक्षीरघृते ततश्चाधिकस्नेहे महिषीक्षीरघृते ततोऽप्युत्कृष्टस्नेहे उष्ट्रीक्षीरघृते। पांशुभ्यः प्रकृष्टरूक्षगुणाः तुषकणिकादयस्ततोऽपि प्रकृष्टरूक्षाः शर्कराः। तथा परमाणुष्वपि प्रकर्षाप्रकर्षवृत्त्या स्निग्धरूक्षगुणाः सन्तीत्यनुमानं क्रियते। स्निग्धरूक्षगुणनिमित्ते बन्धेऽविशेषेण प्रसक्तेऽ- निष्टगुणनिवृत्त्यर्थमाह –

## न जघन्यगुणानाम्॥३४॥

**शाखादित्वाद्देहाङ्गत्वाद्वा जघन्यशब्दसिद्धिः॥१॥** जघनमिव जघन्यमिति शाखादित्वात् सिद्ध्यति। क उपमार्थः? यथा शरीरावयवेषु जघनं निकृष्टं तथाऽन्योपि निकृष्टो जघन्य इत्युच्यते। अथवा देहाङ्गत्वात्सिद्धिः। जघने भवः जघन्यः। जघन्य इव जघन्यः। यथा जघने भवो निकृष्टस्तथाऽन्योऽपि निकृष्टो जघन्य इति व्यपदिश्यते।

**गुणशब्दस्यानेकार्थत्वे विवक्षावशाद्भागग्रहणम् ॥२॥** गुणशब्दोऽनेकस्मिन्नर्थे दृष्टप्रयोगः। कश्चिद्रूपादिषु वर्तते – रूपादयो गुणा इति। क्वचिद्भागे वर्तते – द्विगुणा यवास्त्रिगुणा यवा इति। क्वचिदुपकारे वर्तते – गुणज्ञः साधुरूपकारज्ञ इति यावत्। क्वचिद्द्रव्ये वर्तते – गुणवानयं देश इत्युच्यते यस्मिन् गावः शस्यानि च निष्पद्यन्ते। क्वचित्समेष्ववयवेषु – द्विगुणा रज्जुः त्रिगुणा रज्जुरिति। क्वचिदुपसर्जने – गुणभूता वयमस्मिन् ग्रामे उसर्जनभूता इत्यर्थः। तत्रेह भागे वर्तमानः परिगृह्यते। जघन्यो गुणो येषां ते जघन्यगुणास्तेषां जघन्यगुणानां नास्ति बन्धः। एतदुक्तं भवति – एकगुणस्निग्धस्यैकगुणस्निग्धेन द्वितीयादिसंख्येयाऽसंख्येयानन्तगुणस्निग्धेन वा नास्ति बन्धः। तस्यैवैकगुणस्निग्धस्यैकगुणरूक्षेण द्व्यादिसंख्येयाऽसंख्येयानन्तगुणरूक्षेण वा नास्ति बन्धः। तथा एकगुणरूक्षस्यापि योज्यमिति।

एतौ जघन्यगुणस्निग्धरूक्षौ वर्जयित्वाऽन्येषां स्निग्धरूक्षाणां परस्परेण संबन्धो भवतीत्यविशेषप्रसङ्गे तत्रापि प्रतिषेधविषयख्यापनार्थमाह –

## गुणसाम्ये सदृशानाम् ॥३५॥

**सदृशग्रहणं तुल्यजातीयसंप्रत्ययार्थम् ॥१॥** स्निग्धजात्या रूक्षजात्या च तुल्यानां संप्रत्ययः कथं स्यादिति सदृशग्रहणं क्रियते।

**गुणसाम्यग्रहणं तुल्यभागसंग्रहार्थम् ॥२॥** तुल्यभागा येषां तेषां ग्रहणार्थं गुणसाम्यग्रहणं क्रियते।

**सदृशग्रहणमनर्थकं गुणसाम्यवचनादिति चेन्न; समानगुणकारयोः स्निग्धरूक्षयोः प्रतिषेधप्रसङ्गात् ॥३॥** स्यादेतत् – सदृशग्रहणमनर्थकम्। कुतः? गुणसाम्यवचनात्सिद्धेरिति चेन्न; किं कारणम्? समानगुणकारयोः स्निग्धरूक्षयोः प्रतिषेधप्रसङ्गात्। सदृशग्रहणे ह्यसति द्विगुणस्निग्धानां द्विगुणरूक्षैः त्रिगुणस्निग्धानां त्रिगुणरूक्षैर्गुणकार-साम्याद्बन्धः प्रतिषिध्येत। सदृशग्रहणे पुनः सति द्विगुणस्निग्धानां द्विगुण-स्निग्धैर्द्विगुणरूक्षाणां द्विगुणरूक्षैरित्येवमादिषु बन्धप्रतिषेधः कृतो भवति।

**न वेष्टत्वात् ॥४॥** न वा एतत्प्रयोजनमस्ति। किं कारणम्? इष्टत्वात्। इष्यते द्विगुणस्निग्धानामपि द्विगुणरूक्षैर्बन्धप्रतिषेधः। किमर्थं तर्हि सदृशग्रहणम्?

**गुणवैषम्ये बन्धप्रतिपत्त्यर्थम् ॥५॥** गुणवैषम्ये सदृशानां बन्धो भवतीत्येतस्यार्थस्य प्रतिपत्त्यर्थं सदृशग्रहणं क्रियते।

अतो विषमगुणानां तुल्यजातीयानां चाविशेषेण प्रसक्ताविष्टार्थसंप्रत्ययार्थमिदमुच्यते –

## द्व्यधिकादिगुणानां तु ॥३६॥

**द्व्यधिकश्चतुर्गुणः॥१॥** द्वाभ्यां गुणाभ्यामधिको द्व्यधिकः। कः पुनरसौ? चतुर्गुणः?

**आदिशब्दस्य प्रकारार्थत्वात् पञ्चगुणादिसंप्रत्ययः॥२॥** द्व्यधिकादीत्ययमादिशब्दः प्रकारार्थः। कः पुनरसौ प्रकारः? द्वाभ्यामधिकता। तेन पञ्चगुणादीनां संप्रत्ययो भवति। 'अवयवेन विग्रहः समुदायो वृत्त्यर्थः' इति चतुर्गुणस्यापि ग्रहणं भवति। तेन

द्व्यधिकादिगुणानां तुल्यजातीयानामतुल्यजातीयानां च बन्ध उक्तो भवति नेतरेषाम्। तद्यथा – द्विगुणस्निग्धस्य परमाणोः एकगुणस्निग्धेन द्विगुणस्निग्धेन त्रिगुणस्निग्धेन वा नास्ति बन्धः, चतुर्गुणस्निग्धेन पुनरस्ति बन्धः। तस्यैव पुनर्द्विगुणस्निग्धस्य पञ्चगुणस्निग्धेन षट्सप्ताष्टनवदशसंख्येयाऽसंख्येयानन्तगुणस्निग्धेन बन्धो न विद्यते। एवं त्रिगुणस्निग्धस्य पञ्चगुणस्निग्धेन बन्धोऽस्ति, शेषैः पूर्वोत्तरैर्न भवति। चतुर्गुणस्निग्धस्य षड्गुणस्निग्धेनास्ति बन्धः; शेषैः पूर्वोत्तरैर्नास्ति। एवं शेषेष्वपि योज्यम्। तथा द्विगुणरूक्षस्यैकद्वित्रिगुणरूक्षैर्नास्ति बन्धः, चतुर्गुणरूक्षेण त्वस्ति बन्धः। तस्यैव द्विगुणरूक्षस्य पञ्चगुणरूक्षादिभिरुत्तरैर्नास्ति बन्धः। एवं त्रिगुणरूक्षादीनामपि द्विगुणाधिकैर्बन्धो योज्यः। एवं भिन्नजातीयेष्वपि द्विगुणस्निग्धस्यैकद्वित्रिगुणरूक्षैर्नास्ति बन्धः, चतुर्गुणरूक्षेण त्वस्ति बन्धः; उत्तरैः पञ्चगुणरूक्षादिभिर्नास्ति। एवं त्रिगुणस्निग्धादीनां पञ्चगुणरूक्षादिभिरस्ति, शेषैः पूर्वोत्तरैर्नास्ति बन्ध इति योज्यम्। उक्तं च –

**"णिद्धस्स णिद्धेण दुराहिएण लुक्खस्स लुक्खेण दुराहिएण।**

**णिद्धस्य लुक्खेण हवेदि बन्धो जहण्णवज्जे विसमे समे वा॥**

एवमुक्तेन विधिना बन्धे सत्यणूनां द्व्यणुकाद्यनन्तानन्तप्रदेशावसानस्कन्धोत्पत्तिर्वेदितव्या।

**तुशब्दो व्यावृत्तिविशेषप्रतिपत्त्यर्थः॥३॥** तुशब्दः क्रियमाणः प्रतिषेधं व्यावर्त्तयति बन्धं च विशेषयति।

अत्राह – किमर्थं संयोगजातीयः पुद्गलानां बन्धो नाम धर्मः कल्प्यते? न प्राप्त्याद्यात्मकत्वादनेनैव सर्वसामूहिकव्यवहारसिद्धिरित्युच्यते – संयोगेऽपि सति

प्राप्ति-मात्रेण कृतार्थत्वात् परस्परानुप्रवेशनिरुत्सुकौ स्निग्धरूक्षगुणौ स्कन्धौ परमाणूनां संयोगमात्रत्वात् पारिणामिकौ न स्याताम् शुक्लकृष्णतन्तुसंयोगावस्थानवत् ततोऽयमारम्भः –

## बन्धेऽधिकौ पारिणामिकौ च॥३७॥

**प्रकृतत्वाद् गुणसंप्रत्ययः॥१॥** प्रकृतं गुणग्रहणम्, तदभिसंबन्धाद् गुणसंप्रत्ययो भवतीत्यधिकगुणाविति।

**भावान्तरापादनं परिणामकत्वं क्लिन्नगुडवत्॥२॥** यथा क्लिन्नगुडोऽधिकमधुररसः पतितानां रेण्वादीनां स्वगुणापादनात् परिणामकः तथाऽन्योऽप्यधिकगुणः अल्पीयसः परिणामक इति कृत्वा द्विगुणादिस्निग्धरूक्षस्य चतुर्गुणादिस्निग्धरूक्षः परिणामको भवतीति। ततः पूर्वावस्थाप्रच्यवपूर्वकं तातीर्यकमवस्थान्तरं प्रादुर्भवतीत्येकस्कन्धत्वमुपपद्यते, इतरथा हि शुक्लकुष्णतन्तुवत्संयोगे सत्यप्यपरिणाम-कत्वात् सर्वं विविक्तरूपेणैवावतिष्ठेत। दृश्यते हि श्लेषे सति वर्णगन्धरसस्पर्शाना-मवस्थान्तरभावः शुक्लपीतादिसंयोगे शुक्लपत्रवर्णादिप्रादुर्भाववत्।

**समाधिकावित्यपरेषां पाठः॥३॥** "बन्धे समाधिकौ पारिणामिकौ" इत्यपरे सूत्रं पठन्ति, द्विगुणस्निग्धस्य द्विगुणरूक्षोऽपि परिणामक इति।

**तदनुपपत्तिरार्षविरोधात्॥४॥** स पाठो नोपपद्यते। कुतः? आर्षविरोधात्। एवं ह्युक्तमार्षे वर्गणायां बन्धविधाने – नोआगमद्रव्यबन्धविकल्पे सादिवैस्रसिकबन्धनिर्देशः प्रोक्तः 'विषमस्निग्धतायाम् विषमरूक्षतायां च बन्धः समस्निग्धतायां समरूक्षतायां च भेदः' इति। तदनुसारेण च सूत्रमुक्तम् "गुणसाम्ये सदृशानाम्" समगुणानां बन्धप्रतिषेधात् बन्धे समः परिणामक इत्यार्षविरोधिवचो न विद्वद्ग्राह्यम्।

**विषमे समे वास्ति बन्धः इति वचनान्न विरोध इति चेन्न; आर्षार्थाज्ञानात् ॥३॥**

स्यान्मतम् – 'जघन्यवर्जो विषमे समे वास्ति' इति वचनात् समगुणस्यापि बन्ध इत्यभ्युपगमान्नास्ति विरोधः इति तन्न; किं कारणम्? आर्षाज्ञानात्। नायमस्यार्थः – समगुणस्य बन्ध इति। कस्तर्हि? समस्तुल्यजातीयः, विषमोऽतुल्यजातीयः। समस्य चतुर्गुणस्निग्धस्य षड्गुणस्निग्धेनास्ति बन्धः विषमस्य चतुर्गुणरूक्षस्य षड्गुणस्निग्धेनास्ति बन्धः इत्ययमार्षार्थः। तत्रैतत् स्यात् – किमर्थोऽयमारम्भ इति? उच्यते – पौद्गलिकं कर्मात्मस्थानन्तानन्तप्रदेशं कायवाङ्मनोयोगनिमित्तं विस्रसोपचितानन्तप्रदेश-स्निग्धरूक्षपरिणतं बन्धमायातमात्मनः ज्ञानावरणादिभावेन त्रिंशत्सागरोपमकोटिको-ट्याद्यवस्थानभाक् तत्परिणामकापादितपरिणामात् घनादिवन्न विष्वग्भवतीति।

अत्राह – उक्तं भवता "द्रव्याणि, जीवाश्चेति" इति; तत्र किमुद्देशत एव द्रव्याणां प्रसिद्धिराहोस्विल्लक्षणतोऽपीति? अत्रोच्यते – लक्षणतोऽपि प्रसिद्धिः। तत्कथमिति चेत्? उच्यते –

## गुणपर्ययवद् द्रव्यम् ॥३८॥

गुणाश्च ते पर्यायाश्च गुणपर्यायास्ते यस्य सन्तीति तद् गुणपर्ययवदिति। मतुर्नोपपद्यतेऽनर्थान्तरभावादर्थान्तरभावे चाऽभावप्रसङ्गः इत उत्तरं पठति –

**अनन्यत्वेऽपि लोके सुवर्णाङ्गुलीयकवद् व्यपदेशदर्शनात् मत्वर्थीयसिद्धिः ॥१॥**

अनन्यत्वेऽपि लोके व्यपदेशो दृश्यते, यथा सुवर्णस्याङ्गुलीयकं सुवर्णाङ्गुलीयकमिति। तथा लक्षणतः कथञ्चिद्भेदोपपत्तेः गुणपर्ययेभ्योऽनन्यत्वे कथञ्चिद्भेदसिद्धेः मत्वर्थीयमुपपद्यते।

**गुणाभावादयुक्तिरिति चेन्न; अर्हत्प्रवचनहृदयादिषु गुणोपदेशात्॥२॥** गुण इति संज्ञा तन्त्रान्तराणाम्। आर्हतानां तु द्रव्यं पर्यायश्चेति द्वितयमेव तत्त्वम्। अतश्च द्वितयमेव तद्द्वयोपदेशात्, द्रव्यार्थिकः पर्यायार्थिक इति द्वावेव मूलनयौ। यदि गुणोऽपि कश्चित्स्यात्, तद्विषयेण मूलनयेन तृतीयेन भवितव्यम्। न चास्त्यसाविति। अतो गुणाभावात् गुणपर्ययवदिति निर्देशो न युज्यते तन्न; किं कारणम्? अर्हत्प्रवचन-हृदयादिषु गुणोपदेशात्। उक्तं हि अर्हत्प्रवचने – "द्रव्याश्रया निर्गुणा गुणाः" इति। अन्यत्र चोक्तम्-

**"गुण इति दव्वविधाणं दव्ववियारो य पज्जयो भणिदो।**

**तेहि अणूणं दव्वं अजुदवसिद्धं हवदि णिच्चं॥१॥" इति।**

यदि गुणोऽपि विद्यते, ननु चोक्तम् – तद्विषयस्तृतीयो मूलनयः प्राप्नोतीति नैष दोषः; द्रव्यस्य द्वावात्मानौ सामान्यं विशेषश्चेति। तत्र सामान्यमुत्सर्गोऽन्वयः गुण इत्यनर्थान्तरम्। विशेषो भेदः पर्याय इति पर्यायशब्दः। तत्र सामान्यविषयो नयो द्रव्यार्थिकः। विशेषविषयः पर्यायार्थिकः। तदुभयं समुदितमयुतसिद्धरूपं द्रव्यमित्युच्यते न तद्विषयस्तृतीयो नयो भवितुमर्हति विकलादेशत्वान्नयानाम्। तत्समुदयोऽपि प्रमाणगोचरः सकलादेशत्वात् प्रमाणस्य।

**गुणा एव पर्याया इति वा निर्देशः॥३॥** अथवा, उत्पादव्ययध्रौव्याणि पर्यायाः, न तेभ्योऽन्ये गुणाः सन्ति, ततो गुणा एव पर्याया इति सति सामानाधिकरण्ये मतौ सति गुणपर्यायवदिति निर्देशो युज्यते।

**विशेषणानुपपत्तिरर्थाभेदादिति चेन्न; मतान्तरनिवृत्त्यर्थत्वात्॥४॥** स्यादेतत् – यदि गुणा एव पर्यायाः; विशेषणमपार्थकम्; कुतः? अर्थाभेदात्। ततो गुणवदिति वा पर्यायवदिति वा वक्तव्यमिति; तन्न; किं कारणम्? मतान्तरनिवृत्त्यर्थत्वात्। मतान्तरे हि द्रव्यादन्ये गुणाः परिकल्पिताः, न ते सन्ति? अर्थान्तरभावे सत्यनुपलब्धिप्रसङ्गात्।

अतो द्रव्यस्य परिणमनं परिवर्तनं पर्यायः। तद्भेदा एव गुणाः न भिन्नजातीया इति मतान्तरनिवृत्त्यर्थत्वात् विशेषणमर्थवत्।

उक्तानां द्रव्याणां लक्षणनिर्देशात्तद्विषय एव द्रव्यव्यवसायप्रसक्तेऽनुक्तद्रव्यसं-सूचनार्थमिदमाह –

## कालश्च॥३९॥

**यथोक्तद्रव्यलक्षणोपेतत्वाद् द्रव्यम्॥१॥** यथोक्तं द्रव्यलक्षणम् – "उत्पादव्ययध्रौव्ययुक्तं सत्, गुणपर्ययवद् द्रव्यम्" इति च; तेन लक्षणेनोपेतत्वात् कालश्च द्रव्यमित्यवगम्यते। कथं लक्षणोपेतत्वमिति चेत्? उच्यते –

**आकाशादिवत्तत्सिद्धिः॥२॥** यथाऽऽकाशदीनां द्रव्यलक्षणं तथा कालस्यापि सिद्ध्यति। ध्रौव्यं तावत् कालस्य स्वप्रत्ययं स्वभावव्यवस्थानात् व्ययोदयौ परप्रत्ययौ, अगुरुलघुगुणवृद्धिहान्यपेक्षया स्वप्रत्ययौ च। तथा गुणा अपि कालस्य साधारणा-साधारणरूपाः सन्ति। तत्रासाधारणः वर्तनाहेतुत्वम्, साधारणाश्चाचेतनत्वामूर्तत्वसूक्ष्म-त्वागुरुलघुत्वादयः। पर्यायाश्च व्ययोत्पादलक्षणा योज्याः। तस्यास्तित्वलिङ्गं सन्निवेश-क्रमश्च व्याख्यातः।

आह – द्रव्यत्वे सति किमसौ कालः आकाशवदेक उत संख्येयोऽसंख्येयोऽनन्तो वेति? अत्रोच्यते –

## सोऽनन्तसमयः॥४०॥

**व्यवहारकालप्रमाणावधारणार्थं वचनम्॥१॥** मुख्याः परमार्थकालाणवः धर्मास्ति-कायप्रदेशतुल्या असंख्येया व्याख्याताः। इदं तु वचनं व्यवहारकालप्रमाणावधारणार्थं

क्रियते। साम्प्रतिकस्यैकसमयिकत्वेऽप्यतीतानागताश्च समया अन्तातीता इति कृत्वा अनन्ता इति व्यपदिश्यन्ते।

**मुख्यस्यैव वाऽनन्तपर्यायवर्तनाहेतुत्वात् ॥२॥** अथवा, मुख्यस्यैव कालस्य प्रमाणावधारणार्थमुच्यते। अनन्तपर्यायवर्तनाहेतुत्वादेकोऽपि कालाणुरनन्त इत्युपचर्यते। समयः पुनः परमनिरुद्धः कालांशः। तत्प्रचयविशेष आवलिकादिर्व्याख्यातः।

आह-"गुणपर्ययवद्द्रव्यम्" इत्युक्तम्, तत्र के गुणाः इति? अत्रोच्यते –

## द्रव्याश्रया निर्गुणा गुणाः॥४१॥

**आश्रयशब्दोऽधिकरणसाधनः कर्मसाधनो वा ॥१॥** अयमाश्रयशब्दः अधिकरण-साधनः। गुणा यत्राश्रयन्ते स आश्रय इति पुल्लिङ्गे घः। अथवा कर्मसाधनः गुणैराश्रियत इत्याश्रयः। द्रव्यशब्द उक्तार्थः, द्रव्यमाश्रयो येषां ते द्रव्याश्रयाः।

**निर्गुणा इति विशेषणं द्व्यणुकादिनिवृत्त्यर्थम् ॥२॥** द्रव्याश्रया गुणा इत्युच्यमाने द्व्यणुकादिष्वपि गुणसंप्रत्ययः स्यात् – कारणद्रव्याश्रयाणि कार्यद्रव्याणीति, ततस्त-न्निवृत्त्यर्थं निर्गुणा इति विशेषणमुपादीयते। द्व्यणुकादीनां हि रूपादयो गुणाः सन्तीति तन्निवृत्तिः कृता भवति।

**पर्यायाणां गुणत्वप्रसङ्ग इति चेन्न; द्रव्याश्रया इति विश्लेषणात्तन्निवृत्तेः॥३॥** स्यान्मतम् – यदि गुणा द्रव्याश्रया इत्येतत्तावल्लक्षणं गुणानाम्, पर्यायाणामपि घटसंस्थानादीनां तदुभयमस्तीति गुणत्वं प्राप्नोतीति तन्न; किं कारणम्? द्रव्याश्रया इति विशेषणात्तन्निवृत्तेः। ननु द्रव्याश्रया इति विशेषणं तदाश्रयत्वप्रतिपत्त्यर्थं तदन्तरेणापि सिद्ध्यति। कुतः? सामर्थ्यात् – निराश्रयगुणाभावादाश्रयान्तराभावाच्च,

ततस्तदनर्थकं पर्यायनिवृत्त्यर्थं भवति। किं शब्दाधिक्यादर्थाधिक्यमिति पर्याय-निवृत्तिर्गृह्यते? न; इत्याह –

**मत्वर्थे वा वृत्तिविधानादिति॥४॥** मत्वर्थेऽन्यपदार्थे वृत्तिः; मत्वर्थश्च नित्ययोगे विद्यत इति नित्ययोगोऽत्र वेदितव्यः। नित्यं द्रव्यमाश्रित्य ये वर्तन्ते ते गुणा इति। पर्यायाः पुनः कादाचित्का इति न तेषां ग्रहणम्। तेनान्वयिनो धर्मा गुणा इत्युक्तं भवति। तद्यथा जीवस्यास्तित्वादयः ज्ञानदर्शनादयश्च। पुद्गलस्याचेतनत्वादयः रूपादयश्चेति। पर्यायाः पुनः घटज्ञानादयः कपालादिविकाराश्च।

अत्राह – उक्तः परिणामशब्दोऽसकृन्न तु तस्यार्थो वर्णितः, तस्मादुच्यतां कः परिणामः इति –

## तद्भावः परिणामः॥४२॥

अथवा, गुणा द्रव्यादर्थान्तरभूता इति केषाञ्चिद्दर्शनम्, तत्किं भवतः सम्मतम्? नेत्याह – यद्यपि कथञ्चिद् व्यपदेशादिभेदहेत्वपेक्षया द्रव्यादन्ये तथापि तदव्यतिरेकात्त-त्परिणामाच्चानन्ये। यद्येवं स उच्यतां कः परिणाम इति? तन्निश्चयार्थमिदमुच्यते – तद्भावः परिणामः।

**धर्मादीनां येनात्मना भवनं स तद्भावः परिणामः॥१॥** धर्मादीनि द्रव्याणि येनात्मना भवन्ति स तद्भावः तत्त्वं परिणाम इत्याख्यायते।

**तत्स्वरूपं व्याख्यातम्॥२॥** तस्य परिणामस्य स्वरूपं व्याख्यातम्। क्व? "वर्तनापरिणामक्रियाः" इत्यत्र।

**स द्विविधोऽनादिरादिमांश्च॥३॥** स एष परिणामो द्विधा भिद्यते। अनादिरादिमांश्चेति। तत्रानादिर्धर्मादीनां गत्युपग्रहादिः। न ह्येतदस्ति धर्मादीनि द्रव्याणि

प्राक्, पश्चाद्गत्युपग्रहादिः, प्राग्वा गत्युपग्रहादिः पश्चाद्धर्मादीनि इति। किं तर्हि? अनादिरेषां संबन्धः। आदिमांश्च बाह्यप्रत्ययापादितोत्पादः।

अत्रान्ये धर्माधर्मकालाकाशेष्वनादिः परिणामः, आदिमान् जीवपुद्गलेष्विति वदन्ति; तदयुक्तम्; कुतः? सर्वद्रव्याणामनाद्यात्मकत्वे सत्त्वमन्यथा नित्याभावप्रसङ्गात्। कथं तर्हि ग्राह्यम्?

**नयद्वयवशात् सर्वत्र तदुभयसिद्धिः॥३॥** द्रव्यार्थिकपर्यायार्थिकनयद्वयविवक्षावशात् सर्वेषु धर्मादिद्रव्येषु स उभयः परिणामोऽवसेयः। अयं तु विशेषः धर्मादिषु चतुर्षु द्रव्येष्वत्यन्तपरोक्षेष्वनादिरादिमांश्च परिणामः आगमगम्यः, जीवपुद्गलेषु कथञ्चित्प्रत्यक्षगम्योऽपि।

इति तत्त्वार्थवार्तिके व्याख्यानालङ्कारे पञ्चमोध्यायः।

## षष्ठोऽध्यायः

आह – अजीवपदार्थो व्याख्यातः। इदानीं तदनन्तरोद्देशभागास्रवपदार्थो व्याख्येय इति ततस्तत्प्रसिद्ध्यर्थमिदमुच्यते –

### कायवाङ्मनःकर्म योगः॥१॥

**कायादीनामितरेतरयोगलक्षणो द्वन्द्वः॥१॥** कायश्च वाक् च मनश्च कायवाङ्मनांसि इतीतरेतरयोगे द्वन्द्वः।

**वाङ्मनसमिति प्रसङ्ग इति चेन्न; बहुषु तदभावात्॥२॥** स्यादेतत् – वाङ्मनसमिति प्राप्नोतीति; तन्न; किं कारणम्? बहुषु तदभावात्। द्वयोः हि सविधिः, तेन बहुषु न भवति। कायवाङ्मनसां कर्म कायवाङ्मनस्कर्मेति। "कृतमिकं सः" इति सत्वम्। कायादयः शब्दा व्याख्यातार्थाः।

**कर्मशब्दस्यानेकार्थत्वे क्रियावाचिनो ग्रहणम्, इहान्यस्यासंभवात् ॥३॥** कर्मशब्दोऽनेकार्थः। क्वचित्कुर्तुरीप्सिततमे वर्तते – यथा घटं करोतीति। क्वचित्पुण्यापुण्यवचनः – यथा "कुशलाऽकुशलं कर्म" इति। क्वचिच्च क्रियावचनः – यथा "उत्क्षेपणमवक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्माणि" इति। तत्रेह कियावाचिनो ग्रहणम्। कुत? अन्यस्यासंभवात्। तत्कथमिति चेत्? उच्यते –

**न कर्तुरीप्सिततममस्येतरस्योभयस्य च विवक्षाऽसंभवात् ॥४॥** कर्तुः क्रिययाऽऽ-प्तुमिष्टतमं कर्म। तत्त्रिविधं निर्वर्त्यं विकार्यं प्राप्यं चेति। तत् त्रितयमपि कर्तुरन्यत्। तत्र यदि कायादीनां कर्तृत्वम् कर्मान्यद्वाच्यम्। न चातोऽन्यत् सूत्रे गृहीतमस्ति। अथ कर्मत्वं कायादीनाम्; कर्ताऽन्यो वाच्यः। न चासौ संगृहीतोऽस्ति। अथ युगपत्कर्तृत्वं कर्मत्वञ्चेष्टम्; तच्चासंभवादसत्। तस्मात् कर्तुरीप्सिततमं नेह परिगृहीतम्।

**नापि पुण्यापुण्यलक्षणमुत्तरसूत्रस्य सामर्थ्यात् ॥५॥** नापीह पुण्यापुण्यलक्षणं कर्म गृह्यते। कुतः? उत्तरसूत्रसामर्थ्यात्। यदि पुण्यापुण्यलक्षणमिह गृह्येत "स आस्रवः," "शुभः पुण्यस्य" इत्युत्तरसूत्रारम्भोऽनर्थकः स्यात्।

**कर्तुरीप्सिततमं वाऽऽत्मनः कर्तृत्वात् ॥६॥** अथवा सामर्थ्यसन्निहित इहात्मा कर्ता, तस्य कर्तुरीप्सिततमत्वात् पारिभाषिकं कर्म गृह्यते।

**कर्त्रादिसाधनेष्विच्छातो विशेषाध्यवसायः॥७॥** कर्मशब्दस्य कर्त्रादिषु साधनेषु संभवत्स्विच्छातो विशेषोऽध्यवसेयः। वीर्यान्तरायज्ञानावरणक्षयक्षयोपशमापेक्षेष्वा-त्मनात्मपरिणामः पुद्गलेन च स्वपरिणामः व्यत्ययेन च निश्चयव्यहारनयापेक्षया क्रियत इति कर्मकरणप्रशंसाविवक्षायां कर्तृधर्माध्यारोपे सति स परिणामः कुशलमकुशलं वा द्रव्यभावरूपं करोतीति कर्म। आत्मनः प्राधान्यविवक्षायां कर्तृत्वे सति परिणामस्य करणत्वोपपत्तेः बहुलापेक्षया क्रियतेऽनेन कर्मेत्यपि भवति। साध्यसाधनभावानभि-

धित्सायां स्वरूपावस्थिततत्त्वकथनात् कृतिः कर्मेत्यपि भवति। एवं शेषकारकोपपत्तिश्च योज्या।

**योगशब्दस्यापि तथैव॥८॥** तेनैव प्रकारेण योगशब्दस्यापि कर्त्रादिसाधनसंभवो योज्यः।

**त्रैविध्यानुपपत्तिरात्मपरिणामाविशेषादिति चेन्न पर्यायविवक्षाव्यापाराद्रूपादिवत् ॥९॥** स्यान्मतं योगस्य त्रैविध्यं नोपपद्यते। कुतः? आत्मपरिणामाविशेषात्। आत्मा हि निरवयवद्रव्यम्, तत्परिणामो योगः, सोऽविशिष्ट इति; तन्न; किं कारणम्? पर्यायविवक्षाव्यापाराद्रूपादिवत्। यथा घटस्यैकत्वमजहतश्चक्षुरादिकरणसंबन्धवशाद्रूपादि परिणामभेदः, तथाऽऽत्मनः एकत्वेऽपि पर्यायभेदात् योगस्य भेदो ज्ञेयः।

**चक्षुरादिग्रहणनिमित्तत्वाद् रूपाध्यवसायस्येति चेन्न; आत्माभेदेऽपि कायादीनां पूर्वकृतकर्मापादितसामर्थ्योपलम्भात् ॥१०॥** स्यादेतत् – युज्यते घटस्य रूपादिभेदाध्यवसायः। कुतः? चक्षुरादिग्रहणनिमित्तत्वात्। ग्रहणभेदाद्धि लोके ग्राह्यभेदो दृष्टः, न तथाऽऽत्मन इति; तन्न; किं कारणम्? आत्माऽभेदेऽपि कायादीनां पूर्वकृतकर्मापादितसामर्थ्योपलम्भात्। तद्यथा पुद्गलविपाकिनः शरीरनामकर्मण उदयापादिते कायवाङ्मनोवर्गणान्यतमालम्बने सति वीर्यान्तरायमत्यक्षराद्यावरणक्षयोपशमा-पादिताभ्यन्तरवाग्लब्धिसान्निध्ये वाक्यपरिणामाभिमुख्यस्यात्मनः प्रदेशपरिस्पन्दो वाग्योगः। अभ्यन्तरवीर्यान्तरायनोइन्द्रियावरणक्षयोपशमात्मकमनोलब्धिसन्निधाने पूर्वोक्तबाह्यनिमित्तालम्बने च सति मनःपरिणामाभिमुख्यस्यात्मनः प्रदेशपरिस्पन्दो मनोयोगः। वीर्यान्तरायक्षयोपशमसद्भावे औदारिकादिसप्तविधकायवर्गणान्यतमालम्बना-पेक्षात्मप्रदेशपरिस्पन्दः काययोगः। यदि क्षयोपशमलब्धिरभ्यन्तरहेतुः क्षये कथम्? क्षयेऽपि हि सयोगकेवलिनः त्रिविधो योग इष्यते। अथ क्षयनिमित्तोऽपि योगः कल्प्यते,

अयोगकेवलिनां सिद्धानां च योगः प्राप्नोति; नैष दोषः; क्रियापरिणामिन आत्मनस्त्रिविधवर्गणालम्बनापेक्षः प्रदेशपरिस्पन्दः सयोगकेवलिनो योगविधिर्विधीयते, तदालम्बनाभावादुत्तरेषां योगविधिर्नास्ति।

**अनेकान्ताच्च लावकादिवत् ॥११॥** यथा देवदत्तस्य जातिकुलरूपसंज्ञालक्षण-सम्बन्धाद्यविशेषादेकत्वमजहतः बाह्योपकरणसंबन्धोपनीतभेदलावकपावकादिपर्याया-नास्कन्दतः स्यादेकत्वं स्यादनेकत्वमित्यनेकान्तः तथा प्रतिनियतक्षायोपशमिकशरीरादि-पर्यायार्थादेशात् स्यात्त्रैविध्यं योगस्यानादिपारिणामिकात्मद्रव्यार्थादेशात् स्यादैकविध्य मित्यनेकान्तस्ततो नायमुपालम्भः।

**ध्यानं योग इति चेन्न; तस्य वक्ष्यमाणत्वात् ॥१२॥** स्यादेतत् – ध्यानं योगशब्दार्थः न कायवाङ्मनस्कर्मेति; तन्न; किं कारणम्? तस्य वक्ष्यमाणत्वात्। युजेः समाधिवचनस्य योगः समाधिः ध्यानमित्यनर्थान्तरम्, स तु वक्ष्यते। इहास्रवप्रति-पादनार्थत्वात् त्रिविधक्रिया योग इत्युच्यते।

**समुदाये योगव्यपदेशप्रसङ्ग इति चेन्न; प्रत्येकं वाक्यपरिसमाप्तेः॥१३॥** स्यान्मतम् – यथा गर्गाः शतं दण्ड्यन्तामित्यर्थिनश्च राजानो हिरण्येन भवन्ति न च प्रत्येकं दण्डयन्ति। कुतः? समुदाये वाक्यपरिसमाप्तेः, तथा कायवाङ्मनस्कर्मसमुदाये योगव्यपदेशः प्रसक्त इति चेन्न; किं कारणम्? प्रत्येकं वाक्यपरिसमाप्तेः। यथा देवदत्तजिनदत्तगुरुदत्ता भोज्यन्तामिति भुजिः प्रत्येकं परिसमाप्यते, तथा योगव्य-पदेशोऽपि प्रत्येकं त्रिषु कर्मसु वेदितव्यः।

अत्राह – अभ्युपेमः आहितत्रैविध्या क्रिया योग इति। प्रकृत इदानीं निर्दिश्यताम् किंलक्षण आस्रव इति? अत्रोच्यते – योऽयं योगशब्दाभिधेयः संसारिणः पुरुषस्य प्रयोगस्त्रिविधः –

# स आस्रवः॥२॥

**‘कायवाङ्मनस्कर्मास्रवः’ इत्यस्तु लघुत्वादिति चेन्न; योगाप्रत्याख्यानात्॥१॥** स्यान्मतम् – कायवाङ्मनस्कर्मास्रव इत्यस्तु सूत्रम्, कुतः? लघुत्वादिति; तन्न; किं कारणम्? योगाप्रत्याख्यानात्। योगशब्दो ह्यागमे प्रसिद्धः, तस्यार्थोऽप्रत्याख्यातः स्यात्।

**कायवाङ्मनस्कर्म योग आस्रव इति चेन्न; सर्वयोगास्रवप्रसङ्गात्॥२॥** अथ मतमेतत् – ‘कायवाङ्मनस्कर्म योग आस्रवः’ इत्येकयोगः कर्तव्यस्तथा सति तच्छब्दस्यावचनात्, योगविभागस्य चाऽकरणात्, निर्देशश्च लघुर्भवति, योगशब्दार्थश्च प्रख्यातो भवति इति; तन्न; किं कारणम्? सर्वयोगास्रवप्रसङ्गात्। केवलिसमुद्घातकाले तत्रेष्यते, तन्निमितश्च बन्धोऽल्पः; तद्विपरीतता प्राप्नोति। अपि च, वर्गणालम्बननिमित्तो योग आस्रव इष्यते, न च दण्डादियोगस्तदालम्बनहेतुकः, तस्मादस्यास्रवत्वं नेष्यते। यद्येवं दण्डादिव्यापारकालेऽनास्रवत्वादबन्धकत्वं प्राप्नोति, इष्यते च बन्धः? नैष दोषः; न दण्डादियोगनिमित्तो बन्धः। किं तर्हि? कायवर्गणानिमित्तः आत्मप्रदेशपरिस्पन्दोऽस्ति, तन्निमित्तस्तत्र बन्धः।

**एकयोगेऽपि तत्प्रयोजनकारणात्तदप्रसङ्ग इति चेन्न; योगविभागकरण-सामर्थ्यात्तत्प्रतीतेः॥३॥** यथा केवलिनः सत्स्वपीन्द्रियेषु तदव्यापारादिन्द्रियज-कर्मबन्धाभावस्तथा दण्डादियोगे सत्यपि तत्पूर्वकबन्धाभावादस्रवत्वमस्य योगविभाग-वदेकयोगेऽपि व्यावर्तते इति; तन्न; किं कारणम्? योगविभागकरणसामर्थ्यात्तत्प्रतीतेः। सति हि योगविभागे य उद्दिष्टो योगः स आस्रवो भवति नान्य इत्ययमर्थोऽवगन्तुं शक्यते तेनान्योऽपि योगोऽस्तीति सूच्यते। एकयोगे पुनः सति तस्यार्थस्याप्रतीतेः सर्वस्य योगस्यास्रवत्वं प्रसज्यत एव। अथास्रवाभिधानं कुतो भवति?

**तत्प्रणालिकया कर्मास्रवणादास्रवाभिधानं सलिलवाहिद्वारवत् ॥४॥** यथा सरःसलिलवाहिद्वारं तदास्रवणकारणत्वादास्रव इत्याख्यायते, तथा योगप्रणालिकया आत्मनः कर्म आस्रवतीति योगः आस्रव इति व्यपदेशमर्हति।

**कषायक्लिन्नस्य तदुपश्लेष आद्रवस्त्ररेणुवत् ॥५॥** यथाऽऽद्रवासः समन्ताद्वातानीतं रेणुमुपादत्ते, तथा कषायतोयाद्र आत्मा योगानीतं कर्म सर्वप्रदेशैर्गृह्णाति। यथा वा, निष्टप्तायः पिण्डोऽम्भसि प्रक्षिप्तोऽम्भः समन्तादात्मसात्करोति, तथा कषायोष्णो जीवो योगानीतं कर्म समन्तादादत्ते।

आह – कर्म द्विविधं पुण्यं पापं चेति, तस्य किमविशेषेण योगः आस्रवणहेतुराहोस्विदस्ति कश्चित्प्रतिविशेष इति? अत्रोच्यते –

## शुभः पुण्यस्याऽशुभः पापस्य ॥३॥

**प्राणातिपातानृतभाषणवधचिन्तनादिरशुभः ॥१॥** प्राणातिपातादत्तादानमैथुनप्रयोगादिरशुभः काययोगः। अनृतभाषणपरुषासत्यवचनादिरशुभो वाग्योगः। वधचिन्तनेर्ष्यासूयादिरशुभो मनोयोगः।

**ततोऽनन्तविकल्पादन्यः शुभः ॥२॥** तस्मादनन्तविकल्पादशुभयोगादन्यः शुभयोग इत्युच्यते। तद्यथा – अहिंसाऽस्तेयब्रह्मचर्यादिः शुभः काययोगः। सत्यहितमितभाषणादिः शुभो वाग्योगः। अर्हदादिभक्तितपोरुचिश्रुतविनयादिः शुभो मनोयोगः। आह – असंख्येयलोकत्वादध्यवसायावस्थानानां कथमनन्तविकल्पत्वमिति? उच्यते – अनन्तानन्तपुद्गलप्रदेशप्रचितज्ञानावरणवीर्यान्तरायदेशसर्वघातिद्विविधस्पर्धकक्षयोपशमादेशात् योगत्रयस्यानन्त्यम्। अनन्तानन्तप्रदेशकर्मादानकारणत्वाद्वाऽनन्तः, अनन्तानन्तनानाजीवविषयभेदाद्वाऽनन्तः। कथं योगस्य शुभाशुभत्वम्?

**शुभाशुभपरिणामनिवृत्तत्वाच्छुभाशुभव्यपदेशः॥३॥** शुभपरिणामनिर्वृत्तो योगः शुभः। अशुभपरिणामनिर्वृत्तश्चाशुभ इति कथ्यते, न शुभाशुभकर्मकारणत्वेन। यद्येवमुच्यते; शुभयोग एव न स्यात्, शुभयोगस्यापि ज्ञानावरणादिबन्धहेतुत्वाभ्युपगमात्।

**पुनात्यात्मानं पूयतेऽनेनेति वा पुण्यम्॥४॥** कर्मणः स्वातन्त्र्यविवक्षायां पुनात्यात्मानं प्रीणयतीति पुण्यम्। पारतन्त्र्यविवक्षायां करणत्वोपपत्तेः पूयतेऽनेनेति वा पुण्यम्, तत्सद्वेद्याद्युत्तरत्र वक्ष्यते।

**तत्प्रतिद्वन्द्विरूपं पापम्॥५॥** तस्य पुण्यस्य प्रतिद्वन्द्विरूपं पापमिति विज्ञायते। पाति रक्षत्यात्मानमस्माच्छुभपरिणामादिति पापाभिधानम्। तदसद्वेद्याद्युत्तरत्र वक्ष्यते।

**उभयमपि पारतन्त्रहेतुत्वादविशिष्टमिति चेन्न; इष्टानिष्टनिमित्तभेदात्तद्भेदसिद्धेः॥६॥** स्यान्मतं यथा निगलस्य कनकमयस्यास्य चाऽस्वतन्त्रीकरणं फलं तुल्यमित्यविशेषः, तथा पुण्यं पापं चात्मनः पारतन्त्र्यनिमित्तमविशिष्टमिति नात्र संकल्पभेदो युक्त इति; तन्न; किं कारणम्? इष्टानिष्टनिमित्तभेदात्तद्भेदसिद्धेः। यदिष्टगतिजातिशरीरेन्द्रिय-विषयादिनिर्वर्तकं तत्पुण्यम्। अनिष्टगतिजातिशरीरेन्द्रियविषयादिनिर्वर्तकं यत्तत्पापमित्यनयोरयं भेदः। तत्र शुभो योगः पुण्यस्यास्रवः; अशुभः पापस्य।

**शुभपरिणामस्य घातिकर्मनिमित्तत्वात्तदनिर्देशः इति चेन्न; इतरपुण्यपापापेक्षत्वात्॥७॥** स्यादेतत् – शुभः पुण्यस्येत्यनिर्देशोऽगमको निर्देशोऽनिर्देशः। कुतः? घातिकर्मबन्धस्य शुभपरिणामहेतुत्वादिति; तन्न; किं कारणम्? इतरपुण्यपापापेक्षत्वादघातिकर्मसु पुण्यं पापं चापेक्ष्येदमुच्यते। कुतः? घातिकर्मबन्धस्य स्वविषये निमित्तत्वात्। अथवा, नैवमवधारणं क्रियते – शुभः पुण्यस्यैवेति। कथं तर्हि? शुभ एव

पुण्यस्येति तेनाशुभः पापस्यापि हेतुरित्यविरोधः। यद्येवं शुभः पापस्यापि भवत्यशुभः पुण्यस्यापि भवतीत्यभ्युपगमः कर्तव्यः; सर्वोत्कृष्टस्थितीनामुत्कृष्टक्लेशहेतुकत्वात् । उक्तं च –

**"सव्वट्ठिदीणमुक्कस्सगो दु उक्कस्स संकिलेसेण।**

**विवरीदे दु जघण्णो आउगतिगवज्जसेसाणं॥" इति,**

ततः सूत्रद्वयमनर्थकमिति; नानर्थकमनुभागबन्धं प्रत्येतदुक्तम् । अनुभागबन्धो हि प्रधानभूतः तन्निमित्तत्वात् सुखदुःखविपाकस्य। तत्रोत्कृष्टविशुद्धपरिणामनिमित्तः सर्वशुभप्रकृतीनामुत्कृष्टानुभागबन्धः। उत्कृष्टसंक्लेशपरिणामनिमित्तः सर्वाशुभप्रकृतीनामुत्कृष्टानुभागबन्धः। उत्कृष्टः शुभपरिणामोऽशुभजघन्यानुभागबन्धहेतुत्वेऽपि भूयसः शुभस्य हेतुरिति शुभः पुण्यस्येत्युच्यते यथाऽल्पापकारहेतुरपि बहूपकारसद्भावादुपकार इत्युच्यते। एवमशुभः पापस्येत्यपि। उक्तं च –

**"शुभपगदीण विसोधिए तिव्वमसुहाण संकिलेसेण।**

**विवरीदे दु जहण्णो अणुभागो सव्वपगदीणं॥" इति। आह –** किमयमास्रवः सर्वसंसारिसमानफलारम्भहेतुराहोस्वित् कश्चिदस्ति विशेष इति? अत्रोच्यते –

## सकषायाऽकषाययोः साम्परायिकेर्यापथयोः॥४॥

**आस्रवस्योभयस्वामिकत्वाद् द्वयीप्रसिद्धिः॥१॥** उभावास्रवस्य स्वामिनौ-सकषायोऽकषायश्चेति। तस्यास्रवस्यानन्त्येऽपि स्वामिनो द्वैविध्यकल्पनया द्वयी प्रसिद्धिर-वसेया कोऽत्र कषायः?

**कषत्यात्मानमिति कषायः॥२॥** क्रोधादिपरिणामः कषति हिनस्त्यात्मानं कुगतिप्रापणादिति कषायः।

**कषायवद्वा श्लेषहेतुत्वात् ॥३॥** अथवा, यथा कषायो नैयग्रोधादिः श्लेषहेतुस्तथा क्रोधादिरप्यात्मनः कर्मश्लेषहेतुत्वात्  कषाय इव कषाय इत्युच्यते। सह कषायेण वर्तते इति सकषायः। न विद्यते कषायोऽस्येत्यकषायः। सकषायश्चाकषायश्च सकषायाकषायौ तयोः सकषायाकषाययोः।

**समन्तात्पराभव आत्मनः सम्परायः॥४॥** कर्मभिः समन्तादात्मनः पराभवो-ऽभिभवः सम्पराय इत्युच्यते।

**तत्प्रयोजनं साम्परायिकम् ॥५॥** तत्प्रयोजनं कर्म साम्परायिकमित्युच्यते यथा ऐन्द्रमहिकमिति।

**ईरणमीर्या योगगतिः॥६॥** ईरेर्गत्यर्थाद्भावे ण्यः, ईरणमीर्या योगगतिरिति यावत्।

**तद्द्वारकमीर्यापथम् ॥७॥** सा ईर्या द्वारं पन्था यस्य तदीर्यापथं कर्म। साम्परायिकं चेर्यापथं च साम्परायिकेर्यापथे तयोः साम्परायिकेर्यापथयोः यथासंख्यमभिसंबन्धो भवति। सकषायस्यात्मनः साम्परायिकेर्यापथे तयोः साम्परायिकेर्यापथयोः यथासंख्य-मभिसंबन्धो भवति। सकषायस्यात्मनः साम्परायिकस्य कर्मण आस्रवो भवति, अकषायस्येर्यापथस्येति। तद्यथा – सम्परायः कषाय इत्यर्थः। मिथ्यादृष्ट्यादीनां सूक्ष्मसाम्परायान्तानां कषायोदयेऽपि तच्छीलपरिणामानां योगवशादानीतं कर्म भावेनोपश्लिष्यमामाद्रचर्माश्रितरेणुवत् स्थितिमापद्यमानं साम्परायिकमित्युच्यते। उपशान्तक्षीणकषाययोः योगिनश्च योगवशादुपात्तं कर्म कषायाभावाद् बन्धाभावे शुष्ककुड्यपतितलोष्ठवदनन्तरसमये निवर्तमानमीर्यापथमित्युच्यते।

**"अजाद्यत्" इत्युभयत्र पूर्वनिपातप्रसङ्ग इति चेन्न; अतिबहुवक्तव्यतया तयोरभ्यर्हितत्वात् ॥८॥** स्यादेतदकषायशब्दस्येर्यापथशब्दस्य च "अजाद्यत्" इति

पूर्वनिपातः प्राप्नोति; तन्न; किं कारणम्? अतिबहुवक्तव्यतया तयोरभ्यर्हितत्वात् सकषायशब्दस्य साम्परायिकशब्दस्य चाभ्यर्हितत्वमिति पूर्वनिपातो भवति।

यदि साम्परायिकास्रवो बहुवक्तव्यः तस्य के भेदाः इति? अत्रोच्यते –

## इन्द्रियकषायाऽव्रतक्रियाः पञ्चचतुःपञ्चपञ्चविंशतिसंख्याः पूर्वस्य भेदाः॥५॥

**इन्द्रियादय उक्तलक्षणा द्वन्द्वविषयाः॥१॥** इन्द्रियादीनामुक्तलक्षणानां द्वन्द्वो वेदितव्यः। इन्द्रियाणि च कषायाश्चाव्रतानि च क्रियाश्चेन्द्रियकषायाव्रतक्रिया इति। स चायं द्वन्द्व इतरेतरयोगलक्षण इति बहुवचनं भवति।

**पञ्चादीनां संख्याशब्दानां संख्यया वृत्तिः॥२॥** पञ्चादीनां संख्याशब्दानां संख्याशब्देन सह वृत्तिर्द्रष्टव्या पञ्चाधिका विंशतिः पञ्चविंशतिः। पञ्च च चत्वारश्च पञ्च च पञ्चविंशतिश्च पञ्चचतुःपञ्चपञ्चविंशतिः, सा संख्या येषां ते पञ्चचतुःपञ्चपञ्चविंशतिसंख्याः।

**पूर्वशब्दो व्यवस्थावचनः॥३॥** अयं पूर्वशब्दो व्यवस्थावचनः – अतीतसूत्रे यः प्राङ् निर्दिष्टस्तस्येति।

**भिद्यन्ते इति भेदाः॥४॥** परस्परतो भिद्यन्ते विशिष्यन्ते इति भेदाः प्रकारा इत्यर्थः।

**यथासंख्यमभिसंबन्धो व्याख्यानतः॥५॥** यथासंख्यमभिसंबन्धोऽत्र द्रष्टव्यः। कुतः? व्याख्यानतः। पञ्चेन्द्रियाणि, चत्वारः कषायाः, पञ्चाऽव्रतानि, पञ्चविंशतिः क्रिया इति।

**इन्द्रियादीनामात्मनोऽनन्यत्वान्यत्वं प्रत्यनेकान्तः॥६॥** इन्द्रियादीनामात्मनः अनन्यत्वान्यत्वं प्रत्यनेकान्तो वेदितव्यः। तद्यथाऽनादिपारिणामिकचैतन्यद्रव्यार्थादेशा-दिन्द्रियादीनां भेदाभावादनन्यत्वम्। कर्मोदयक्षयोपशमनिमित्तपर्यायार्थादेशाद्भेदोपपत्तेः स्यादन्यत्वम्। इन्द्रियादिनिवृत्तौ द्रव्यावस्थानाच्च स्यादन्यत्वम्। तत एव पर्यायभेदात् पञ्चादिसंख्यानिर्देश उपपन्नो भवति। तत्र पञ्चेन्द्रियाणि स्पर्शनादीन्युक्तानि। क्रोधादयः कषाया अनन्तानुबन्ध्यादिविकल्पा वक्ष्यन्ते। हिंसादीन्यव्रतानि ''प्रमत्तयोगात्प्राणव्य-परोपणं हिंसा'' इत्येवमादिलक्षणानि वक्ष्यन्ते। पञ्चविंशतिः क्रिया उच्यन्ते –

**सम्यक्त्वमिथ्यात्वप्रयोगसमादानेर्यापथक्रियाः पञ्च॥७॥** तत्र चैत्यगुरुप्रवचन-पूजादिलक्षणा सम्यक्त्ववर्धिनी क्रिया सम्यक्त्वक्रिया। अन्यदेवतास्तवनादिरूपा मिथ्यात्वहेतुका प्रवृत्तिर्मिथ्यात्वक्रिया। गमनागमनप्रवर्तनं कायादिभिः प्रयोगक्रिया, वीर्यान्तरायज्ञानावरणक्षयोपशमे सत्यङ्गोपाङ्गोपष्टम्भादात्मनः कायवाङ्मनोयोगनिर्वृत्ति-समर्थपुद्गलग्रहणं वा। संयतस्य सतोऽविरतिं प्रत्यभिमुखं समादानक्रिया। ईर्यापथकर्म-निमित्तेर्यापथक्रिया। एताः पञ्च क्रियाः।

**प्रदोषकायाधिकरणपरितापप्राणातिपातक्रियाः पञ्च॥८॥** क्रोधावेशात् प्रादोषिकी क्रिया। सा क्रोधस्वाभाविकेति क्रोधग्रहणेनैव गृहीतेः पौनरुक्त्यमिति चेन्न; क्रोधनिमित्तत्वात्। क्रोधो हि प्रदोषहेतुस्सः कार्यकारणभेदादपौनरुक्त्यम्। नैमित्तिक निमित्तभेदाच्चेष्टदारवित्तहरणादेर्निमित्ताद्विनापि पिशुनः स्वभावत एव क्रुध्यति, तथा दृष्टिविषादयश्च। उक्तं च –

**"अणिमित्तमेव कोई कम्सस्सव संगदो कसायाणं।**
**उदयं उवेदि जीवो चंद इव महग्गहं पव्वे॥"**

तथा-

**"मृगलोहितताम्रलोलजिह्वैर्हरिशार्दूलवृकैर्निसर्गहिंस्त्रैः।**

**भुजगैश्च सर्वैरजातरोषैः समरूपाण्यसतां विचेष्टितानि॥**

इत्यनिमित्तः क्रोधः, निमित्तवान् प्रदोषः। प्रदुष्टस्य सतोऽभ्युद्यमः कायिकी क्रिया। हिंसोपकरणादानादाधिकरणिकी क्रिया। दुःखोत्पत्तितन्त्रत्वात् पारितापिकी क्रिया। आयुरिन्द्रियबलप्राणानां वियोगकरणात् प्राणातिपातिकीक्रिया। एताः पञ्च क्रियाः।

**दर्शनस्पर्शनप्रत्ययसमन्तानुपाताऽनाभोगक्रियाः पञ्च॥९॥** रागार्द्रीकृतत्वात् प्रमादिनः रमणीयरूपालोकनाभिप्रायो दर्शनक्रिया। प्रमादवशात् स्पृष्टव्यसञ्चेतनानुबन्धः स्पर्शनक्रिया। नन्विन्द्रियग्रहणादेव सिद्धेर्दर्शनस्पर्शनग्रहणमनर्थकमिति; नैष दोषः; पूर्वत्रेन्द्रियविज्ञानग्रहणमिह तत्पूर्वपरिस्पन्दग्रहणम्। अपूर्वाधिकरणोत्पादनात् प्रात्यायिकी क्रिया। स्त्रीपुरुषपशुसंपातिदेशेऽन्तर्मलोत्सर्गकरणं समन्तानुपातक्रिया। अप्रमृष्टादृष्टभूमौ कायादिनिक्षेपोऽनाभोगक्रिया। एताः पञ्च क्रियाः।

**स्वहस्तनिसर्गविदारणाज्ञाव्यापादनानाकाङ्क्षाः क्रियाः पञ्च॥१०॥** यां परेण निर्वर्त्यां क्रियां स्वयं करोति सा स्वहस्तक्रिया। पापादानादिप्रवृत्तिविशेषाभ्यनुज्ञानं निसर्गक्रिया। आलस्याद्वा प्रशस्तक्रियाणामकरणं पराचरितसावद्यादिप्रकाशनं विदारण-क्रिया। यथोक्तामाज्ञामावश्यकादिषु चारित्रमोहोदयात् कर्तुमशक्नुवतोऽन्यथाप्ररूपणादा-ज्ञाव्यापादिका क्रिया। शाठ्यालस्याभ्यां प्रवचनापदिष्टविधिकर्तव्यतानादरोऽनाकाङ्क्ष-क्रिया। ता एताः पञ्च क्रियाः।

**आरम्भपरिग्रहमायामिथ्यादर्शनाप्रत्याख्यानक्रियाः पञ्च॥११॥** छेदनभेदन विस्रंसनादिक्रियापरत्वमन्येन चारम्भे क्रियमाणे प्रहर्ष आरम्भक्रिया। परिग्रहाविनाशार्था पारिग्राहिकी क्रिया। ज्ञानदर्शनादिषु निकृतिर्वञ्चनं मायाक्रिया। अन्यं मिथ्यादर्शनक्रिया-

करणकारणाविष्टं प्रशंसादिभिर्द्रढयति यथा साधु करोषीति सा मिथ्यादर्शनक्रिया। संयमघातिकर्मोदयवशादनिवृत्तिरप्रत्याख्यानक्रिया।

**इन्द्रियकषायाव्रतानां क्रियास्वभावानतिवृत्तेः क्रियावचनेनैव गतत्वात् प्रपञ्चमात्रप्रसङ्ग इति चेन्न; अनेकान्तात् ॥१२॥** स्यान्मतमिन्द्रियकषायाव्रतान्यपि क्रियास्वभावानि ततस्तेषां क्रियाग्रहणेन ग्रहणादनर्थकमुपादानम्, सति चोपादाने प्रपञ्चमात्रत्वं प्राप्नोतीति; तन्न; किं कारणम्? अनेकान्तात्। नायमेकान्तः इन्द्रियकषायाव्रतानि क्रियास्वभावान्येवेति। कुतः? नाम स्थापनाद्रव्येन्द्रियकषायाव्रतेषु परिस्पन्दाभावात्। यतो नामेन्द्रियादौ न क्रियाऽस्ति नाममात्रत्वात्। स्थापनायां च न मुख्यक्रियाऽस्ति तदेवेदमिति वाग्बुद्धिप्रवृत्तिमात्रनिमित्तत्वात्। द्रव्ये च प्रच्युतेन्द्रिय कषायाव्रतक्रियापरिणामेऽनागतेन्द्रियकषायाव्रतक्रियापरिणामाभिमुखे वा साम्प्रतिकेन्द्रिय-कषायाव्रतक्रियाणामभावान्न परिस्पन्दात्मिका क्रियाऽस्ति। अथवा, नायमेकान्तः, इन्द्रियकषायाव्रतानि क्रियास्वभावान्येवेति। कुतः? आदेशवचनात्। द्रव्यार्थिकगुणभावे पर्यायार्थिकप्राधान्यादिन्द्रियकषायाव्रतानां स्यात् क्रियास्वभावाऽनतिवृत्तिः पर्यायार्थिक-गुणभावे द्रव्यार्थिकप्राधान्यात् स्यात् क्रियास्वभावातिवृत्तिरिति। किञ्च

**शुभेतरास्रवपरिणामाभिमुखत्वादिन्द्रियकषायाव्रतानां द्रव्यास्रवत्वात् ॥१३॥** शुभेत-रास्रवपरिणामाभिमुखत्वादिन्द्रियकषायाव्रतानां द्रव्यास्रवत्वम्, भावास्रवः कर्मादानम्, तच्च पञ्चविंशतिक्रियाभिरास्रवति कर्मेत्येतदर्थमिन्द्रियकषायाव्रतवचनम्।

**न वा प्रतिज्ञातविरोधात् ॥१४॥** न वैतत्प्रयोजनमस्ति। किं कारणम्? प्रतिज्ञातविरोधात्। यत्प्रतिज्ञातं "कायवाङ्मनस्कर्म योगः, स आस्रवः" इति; तद्विरुध्यते, द्रव्यास्रव इत्यभ्युपगमात्।

**कार्यकारणक्रियाकलापविशेषज्ञापनार्थं वा॥१५॥** निमित्तनैमित्तिकविशेषज्ञापनार्थं तर्हि पृथगिन्द्रियादिग्रहणं क्रियते सत्यम्; स्पृशत्यादयः क्रुध्यत्यादयः हिनस्त्यादयश्च क्रिया आस्रवः; इमाः, पुनरतत्प्रभवाः पञ्चविंशतिक्रियाः सत्स्वेतेषु त्रिषु प्राच्येषु परिणामेषु भवन्ति – यथा मूर्च्छा कारणं परिग्रहः कार्यं तस्मिन्सति पारिग्राहिकी क्रिया न्यासरक्षणविनाशसंस्कारादिलक्षणा। तथा, क्रोधः कारणं प्रदोषश्च कार्यं तस्मिन् सति प्रादोषिकीक्रिया। मानः कारणं कार्यमप्रणतिः तस्यां सत्यामपूर्वाधिकरणोत्पादनत्वात् प्रात्यायिकी क्रिया। माया कारणं कार्यं कुटिलक्रिया तस्यां सत्यां ज्ञानदर्शनचारित्रेषु मायाप्रवृत्तिक्रिया। प्राणातिपातः कारणं कार्यं प्राणातिपातिकी क्रिया। मृषावादा-ऽदत्तादानाऽब्रह्मचर्याणि कारणं कार्यमसंयमोदयादाज्ञाव्यापादिकी क्रिया। एवमितरत्रापि योज्यम्।

**इन्द्रियग्रहणमेवास्त्विति चेन्न; तदभावेऽप्यास्रवसद्भावात्॥१६॥** स्यादेतदि-न्द्रियग्रहणमेवास्तु, कुतः? लघुत्वादिन्द्रियैर्हि उपलभ्य विचार्य च कषायाव्रतक्रियासु प्रवर्तन्ते प्रजाः। अतः इन्द्रियवचनेनैव गतत्वात् कषायाव्रतक्रियाणामग्रहणमस्त्विति; तन्न; किं कारणम्? तदभावेऽप्यास्रवसद्भावात्। यदि हीन्द्रियग्रहणमेव स्यात् प्रमत्तस्यैव आस्रव उक्तः स्यान्नाप्रमत्तस्य। प्रमत्तो हि चक्षुरादिभिः रूपादिविषयासेवनं प्रत्यादृतः रूपादीन् सेवमानोऽसेवमानो वाऽनन्तानुबन्ध्यप्रत्याख्यानक्रोधमानमायालोभहिंसा-दिकारणकषायाष्टकपरिणतः हिंसादीन् कुर्वन्नकुर्वन् वा सातत्येनाश्रितः प्रमत्तत्वात् कर्मादत्ते। अप्रमत्तस्तु पञ्चदशप्रमादातीतोऽपि योगकषायनिमित्तमास्रवमश्नुते। एकद्वित्रि-चतुरिन्द्रियाऽसंज्ञिपञ्चेन्द्रियेषु च यथासंभवं चक्षुरादीन्द्रियमनोविचाराभावेऽपि क्रोधादि-हिंसापूर्वककर्मादानं दृश्यते। तस्मात् सर्वसंग्रहार्थं कषायादिग्रहणं क्रियते।

**कषायाणां साम्परायिकभावेऽपि पर्याप्तत्वादग्रहणमिति चेन्न; सन्मात्रेऽपि तत्प्रसङ्गात्॥१७॥** स्यान्मतम् – नाऽरक्तद्विष्टो रूपादीनर्थान् चक्षुरादिभिरुपलभते, न

चाऽरक्तद्विष्टो जीवान् हिनस्ति मृषावादादिषु वा प्रवर्तते‌ऽङ्गः कषायग्रहणेनैव साम्परायिकास्रवस्य पर्याप्तत्वादिन्द्रियाव्रतक्रियाणामग्रहणमस्त्विति; तन्न; किं कारणम्? सन्मात्रेऽपि तत्प्रसङ्गात्। उपशान्तकषायस्य कषायसन्मात्रावस्थाने चक्षुरादिभी रूपादिग्रहणात् रागद्वेषहिंसाद्यात्मलाभप्रसङ्गः। किञ्च चक्षुरादिभी रूपादिग्रहणे वीतरागत्वादन्यथा यस्य चक्षुरादिभी रूपादिग्रहणमात्रत्वात् रक्तद्विष्टत्वम् तस्य वीतरागत्वाभावः। तस्मात् कषायग्रहणमात्रमयुक्तम्।

**अव्रतवचनमेवेति चेन्न; तत्प्रवृत्तिनिमित्तनिर्देशार्थत्वात्॥८॥** स्यादेतद-व्रतवचनमेव युक्तं तत्रैवेन्द्रियकषायक्रियापरिणामान्तर्भावादिति; तन्न; किं कारणम्? तत्प्रवृत्तिनिमित्तनिर्देशार्थत्वात्। तस्य ह्यव्रतस्येन्द्रियादिपरिणामाः प्रवृत्तिनिमित्तानि भवन्ति ततस्तद्ग्रहणं न्याय्यम्।

आह – योगत्रयस्य एकान्नचत्वारिंशत्प्रभेदाः सर्वात्मकार्यत्वात् संसारिणां सर्वेषां साधारणाः, ततः फलानुभवं प्रत्यविशेष इति? अत्रोच्यते – नैतदेवम्, यस्मात् सत्यपि प्रत्यात्मसंभवे तेषां परिणामेभ्योऽनन्तविकल्पेभ्यः विशेषोऽभ्यनुज्ञायते। कथमिति चेत्? उच्यते –

## तीव्रमन्दज्ञाताऽज्ञातभावाधिकरणवीर्यविशेषेभ्यस्तद्विशेषः॥६॥

**अतिप्रवृद्धक्रोधादिवशात् तीवनात्तीव्रः॥१॥** बाह्याभ्यन्तरहेतूदीरणवशादुद्रिक्तः परिणामः तीवनात् स्थूलभावात् तीव्र इत्युच्यते।

**तद्विपरीतो मन्दः॥२॥** अनुदीरणप्रत्ययसन्निधानादुत्पद्यमानोऽनुद्रिक्तः परिणामो मन्दनान्मन्द इत्युच्यते।

**ज्ञातमात्रं ज्ञात्वा वा प्रवृत्तेर्ज्ञातम् ॥३॥** हिनस्मि इत्यसति परिणामे प्राणव्यपरोपणे ज्ञानमात्रं, मया व्यापादित इति ज्ञातम्। अथवा 'अयं प्राणी हन्तव्यः' इति ज्ञात्वा ज्ञातमित्युच्यते।

**मदात्प्रमादाद्वाऽनववुध्य प्रवृत्तिरज्ञातम् ॥४॥** सुरादिपरिणामकृतात् करणव्यमोहकरात् मदाद्वा मनःप्रणिधानविरहलक्षणात् प्रमादाद्वा व्रज्यादिष्वनवबुध्य प्रवृत्तिरज्ञातमिति व्यवसीयते।

**अधिक्रियन्तेऽस्मिन्नर्था इत्यधिकरणम् ॥५॥** अर्थाः प्रयोजनानि पुरुषाणां यत्राधिक्रियन्ते प्रस्तूयन्ते तदधिकरणम् द्रव्यमित्यर्थः।

**द्रव्यस्यात्मसामर्थ्यं वीर्यम् ॥६॥** द्रव्यस्य शक्तिविशेषः सामर्थ्यं वीर्यमिति निश्चीयते।

**भावशब्दस्य प्रत्येकं परिसमाप्तिर्भुजिवत् ॥७॥** यथा देवदत्तजिनदत्तगुरुदत्ता भोज्यन्तामिति भुजिः प्रत्येकं परिसमाप्यते तथाऽयं भावशब्दः प्रत्येकं तीव्रादिभिरभिसंबध्यते – तीव्रभावो मन्दभावो ज्ञातभावोऽज्ञातभाव इति।

**युगपदसंभवात् भावशब्दस्यायुक्तं विशेषणमिति चेन्न; बुद्धिविशेषव्यापारात् ॥८॥** स्यान्मतम् – भावो नाम द्रव्यस्याहेयः परिणामः, तस्यैकत्वात् सदात्मख्यापनं युगपत्तीव्रादिविशेषणं चानुपपन्नम्, यथा गोत्वमेकं न खण्डमुण्डादीनां गोद्रव्याणां विशेषकं गोप्रत्ययाभिधानहेतुत्वात् तथा भावः सत्प्रत्ययाभिधानहेतुत्वान्न तीव्रादीनां विशेषक इति; तन्न; किं कारणम्? बुद्धिविशेषव्यापारात्। बौद्धोऽयं व्यापारः तीव्रादिपरिणामानां विशेषकः। कथम्?

**भावद्वैविध्यात् ॥९॥** द्विविधो हि नो द्रव्याणां भावः परिस्पन्दरूपः इतरश्च। तत्रापरिस्पन्दो द्रव्याणामस्तित्वभावोऽनादिः। परिस्पन्दरूपस्तु व्ययोत्पादात्मक

आदिमान्। तत्र योऽपरिस्पन्दः स सामान्यमात्रगतो भावो नासौ तीव्रादीनां विशेषकः। यस्तु कायादिक्रियालक्षणो भावः स कायादिमत्त्वस्य युगपत्तीव्रादीनां च विशेषकः कायवाङ्मनस्कर्मयोगाधिकारात्। सोऽयं विशेषः बौद्धाद् व्यापाराद् विभाव्यते। अथवा, भाववदात्मनोऽव्यतिरेकात्तीव्रादीनामपि भावसिद्धिः। किञ्च,

**भावभूयस्त्वात् ॥१०॥** असंख्येयलोकपरिमाणा हि भावाः एकैकस्मिन्नपि कषायादिपरिणामे, ततो भावबहुत्वोपपत्तेः युगपदसंभवदेकस्य भावस्यायुक्तः संबन्धः इत्यवबोध्यम्। योऽपि त्वन्मत्याऽयं भावः एकः तथापि बौद्धाद् व्यापारात्संबन्धः सिद्धः।

**वीर्यस्यात्मपरिणामत्वात् पृथग्ग्रहणमिति चेन्न; तद्विशेषवतो व्यपरोपणादिष्वास्रवफलभेदज्ञापनार्थत्वात् ॥११॥** स्यान्मतम् – पृथग्वीर्यग्रहणमनर्थकम्। कुतः? आत्मपरिणामत्वात्। जीवाधिकरणस्य हि परिणामो वीर्यमधिकरणग्रहणेनैव गृह्यत इति; तन्न; किं कारणम्? तद्विशेषवतो व्यपरोपणादिष्वास्रवादिज्ञापनार्थत्वात्। वीर्यवतो ह्यात्मन-स्तीव्रतीव्रतरादिपरिणामविशेषो जायते।

**तथा च तीव्रादिग्रहणसिद्धिः॥१२॥** तेन प्रकारेण तथाऽऽस्रवफलभेदज्ञापनेनेत्यर्थः, तीव्रादीनां पृथग्ग्रहणं सिद्धं भवति। इतरथा हि जीवाधिकरणस्वरूपत्वात्तीव्रादीनां पृथग्ग्रहणमनर्थकं स्यात्।

**तन्निमित्तत्वाच्छरीराद्यानन्त्यसिद्धिः॥१३॥** कार्यभेदेनावश्यं कारणभेदपूर्वकेण भवितव्यम्। उक्ताश्चानन्ता आस्रवभेदा अनुभागविकल्पात् ततस्तत्कार्यमात्मनः शरीराद्यानन्त्यं सिद्ध्यति। कार्यानन्त्यं च कारणानन्त्यस्यानुमानम्।

अत्राह – अधिकरणमुक्तं तत्स्वरूपमनिर्ज्ञातम्, अतस्तदुच्यतामिति? तत्र भेदप्रतिपादनद्वारेणाधिकरणस्वरूपनिर्ज्ञानार्थमिदमुच्यते –

## अधिकरणं जीवाजीवाः॥७॥

**उक्तलक्षणा जीवाजीवाः॥१॥** जीवानामजीवानां च लक्षणं व्याख्यातम्। पुनर्वचनमिदानीं किमर्थम्?

**पुनर्वचनमधिकरणविशेषज्ञापनार्थम्॥२॥** पुनर्वचनं क्रियतेऽधिकरणविशेषज्ञापनार्थम्। जीवाऽजीवानामधिकरणम्त्वियं विशेषो ज्ञापयितव्य इति। कः पुनरसौ? हिंसाद्युपकरणभावः।

**द्विवचनप्रसङ्ग इति चेन्न; पर्यायाणामधिकरणत्वात्॥३॥** स्यादेतत् – मूलपदार्थयोर्द्वित्वात् जीवश्चाजीवश्च जीवाजीवाविति द्विवचनं प्राप्नोतीति; तन्न; किं कारणम्? पर्यायाणामधिकरणत्वात्। न जीवाजीवसामान्यमधिकरणत्वं बिभर्ति। किं तर्हि? पर्यायाः येन केनचित् पर्यायेण विशिष्टं द्रव्यमधिकरणमित्याख्यायते। ततो बहुवचनं न्यायप्राप्तम्।

**जीवाजीवाधिकरणमित्यस्तु लघुत्वादिति चेन्न; वृत्तिद्वयेऽप्यभिप्रेतार्थगत्यभावात्॥४॥** स्यादेतत् – 'जीवाजीवाधिकरणम्' इत्येतत्सूत्रमस्तु, कुतः? लघुत्वादिति; तन्न; किं कारणम्? वृत्तिद्वयेऽप्यभिप्रेतार्थगत्यभावात्। अत्र द्वितयी वृत्तिः स्यात् – जीवाजीवावेवाधिकरणम्, जीवाजीवयोर्वाऽधिकरणं जीवाजीवाधिकरणमिति? न तावत् सामानाधिकरण्यलक्षणा वृत्तिरुपपद्यते; जीवाजीवत्वविशेषणविशिष्टाधिकरणमात्रप्रतिपत्तेरास्रवविशेषज्ञापनाभावादभिप्रेतार्थगत्यभावः। नापि भिन्नाधिकरणा वृत्तिर्युज्यते तयोराधारमात्रप्रतिपत्तेरमिप्रेतास्रव विशेषार्थगत्यव्यभावइति। न च तयोरधिकरणं व्यतिरिक्तमुपलभ्यते, तस्मादस्तु तयोराद्य एव पाठः। अथ

जीवाजीवाधिकरणं कस्य? आस्रवः प्रकृतः, तस्येत्यभिसंबध्येते। स तर्हि तथा निर्देशः कर्तव्यः? न कर्तव्यः।

**अर्थवशाद्विभक्तिपरिणामोपपत्तेरास्रवस्येत्यभिसंबन्धः॥५॥** यथा 'उच्चानि देवदत्तस्य गृहाणि आमन्त्रयस्वैनम्' 'देवदत्तम्' इति अर्थवशाद्विभक्तिपरिणामो भवति, एवमिहाप्यधिकरणं जीवाजीवौ कस्य? आस्रवस्येत्यभिसंबन्धोऽर्थवशाद्वेदितव्यः। तदुभयमधिकरणं दशप्रकारं विषलवणक्षारकटुकाम्लस्नेहाग्निदुष्प्रयुक्तकायवाङ्मनोयोगभेदात्।

किमेतावानेव भेदः, आहोस्वित् कश्चिदन्योऽप्यस्ति? अस्तीति। आह – यद्येवम्, आद्यस्यैव तावद्भेदः कथ्यतामिति? अत्रोच्यते –

## आद्यं संरम्भसमारम्भारम्भयोगकृतकारितानुमतकषायविशेषैस्त्रिस्त्रिस्त्रिश्चतुश्चैकशः॥८॥

**आद्याऽग्रहणं सामर्थ्यात् सिद्धेरिति चेन्न; विस्पष्टार्थत्वात्॥१॥** स्यान्मतम्-आद्यग्रहणमनर्थकम्। कुतः? सामर्थ्यात् सिद्धेः। किं पुनः सामर्थ्यम्? वक्ष्यमाणानन्तरसूत्रे 'पर' वचनम्, तेनाद्यमिदं विज्ञायत इति; तन्न; किं कारणम्? विस्पष्टार्थत्वात्। आनुमानिके हि सति संप्रत्ययेप्रतिपत्तेगौरवं स्यात्।

**प्रयत्नावेशः संरम्भः॥२॥** प्राणव्यपरोपणादिषु प्रमादवतः प्रयत्नावेशः संरम्भ इत्युच्यते।

**साधनसमभ्यासीकरणं समारम्भः॥३॥** साध्यायाः क्रियायाः साधनानां समभ्यासीकरणं समाहारः समारम्भ इत्याख्यायते।

**प्रक्रमः आरम्भः॥४॥** प्रशब्दस्यादिकर्मणि प्रवृत्तेरद्यौ क्रमः प्रक्रमः आरम्भ इति विज्ञायते। आङः आदिकर्मणो द्योतनत्वात्।

**तत्त्वकथनात् सर्वे भावसाधनाः॥५॥** संरम्भणं संरम्भः, समारम्भणं समारम्भः, आरम्भणमारम्भ इति।

**व्याख्यातार्थो योगशब्दः॥६॥** योगशब्दस्यार्थो व्याख्यातः "कायावाङ्मनस्कर्म योगः" इति।

**कृतवचनं स्वातन्त्र्यप्रतिपत्त्यर्थम्॥७॥** स्वातन्त्र्यविशिष्टेनात्मना यत्प्रादुर्भावितं तत्कृतमित्युच्यते।

**कारिताभिधानं परप्रयोगापेक्षम्॥८॥** परस्य प्रयोगमपेक्ष्य सिद्धिमापद्यमानं कारितमिति कथ्यते।

**अनुमतशब्दः प्रयोजकस्य मानसपरिणामप्रदर्शनार्थः॥९॥** यथा मौनव्रतिकश्चक्षुष्मान् पश्यन् क्रियमाणस्य कार्यस्याप्रतिषेधादभ्युपगमादनुमन्ता, तथा कारयिता प्रयोक्तृत्वात्, तत्समर्थाचरणावहितमनःपरिणामोऽनुमन्तेत्यवगम्यते।

**अभिहितलक्षणाः कषायाः॥१०॥** कषायाणां लक्षणमभिहितं कषन्त्यात्मानमतः कषाया इति।

**विशिष्यते विशिष्टिर्वा विशेषः॥११॥** विशिष्यतेऽर्थोन्तरादिति विशेषः। अथवा, विशिष्टिर्वा विशेषः।

**तस्य प्रत्येकमभिसंबन्धः॥१२॥** स विशेषशब्दः प्रत्येकमभिसंबध्यते – संरम्भविशेषः समारम्भविशेष इत्यादि।

**विशेषैरिति निर्देशानुपपत्तिः क्रियापदाभावात्॥१३॥** यथा देवदत्तेन भुक्तं पाणिना कृतमिति क्रियापदप्रयोगे सति कर्तृकरणनिर्देश उपपद्यते न तथेह क्रियापदमस्तीति विशेषैरिति निर्देशो नोपपद्यते?

**न वा, वाक्यशेषापेक्षत्वात्॥१४॥** न वैष दोषः। किं कारणम्? वाक्यशेषापेक्ष्यत्वात् क्रियापदमत्रोपस्क्रियते – संरम्भसमारम्भारम्भयोगकृतकारितानु-मतकषायाविशेषैर्भिद्यते इति। अप्रयुक्तक्रियापेक्षा हि कारकविवक्षा दृश्यते – शङ्कुलया खण्डः, प्रविशपिण्डीमिति यथा।

**अधिकृताभिसंबन्धाद्वा॥१५॥** अथवा, अधिकृतो भेदशब्दः 'पूर्वस्य भेदाः' इति, अतः स इहाभिसंबध्यत इति तदपेक्षः कारकनिर्देशो वेदितव्यः।

**त्रिस्त्रिस्त्रिश्चतुरिति सुजन्तानां यथाक्रममभिसंबन्धः॥१६॥** एते त्रयस्त्रिशब्दाश्चतु-शब्दश्च संरम्भादिभिर्यथाक्रममभिसंबध्यन्ते सुजन्ताः, संरम्भसमारम्भारम्भास्त्रयः कृतकारितानुमतास्त्रयः कषायाश्चत्वार इत्येतेषां गणनाभ्यावृत्तिः सुचा द्योत्यते।

**एकश इति वीप्सार्थनिर्देशः॥१७॥** एकशब्दः वीप्सार्थद्योतनः "संख्यैकाद्वीप्सायाम्" इति शस्। एकमेकं त्र्यादीन् भेदान्नयेदित्यर्थः।

**संरम्भादित्रयस्यादौ वचनं वस्तुत्वात्॥१८॥** संरम्भादित्रयमिदं वस्तु तद्भेदहेतु-त्वादितरेषामतोऽस्यादौ वचनं क्रियते।

**योगादीनामानुपूर्व्यवचनं पूर्वापरविशेषणत्वात्॥१९॥** योगादीनामानुपूर्व्यवचनं क्रियते। कुतः? पूर्वापरविशेषणत्वात्। तस्मात् क्रोधादिचतुष्टयकृतकारितानुमतभेदात् कायादियोगानां संरम्भसमारम्भारम्भाः विशेष्याः प्रत्येकं षट्त्रिंशद्विकल्पाः। तत्र संरम्भस्तावत् – क्रोधकृतकायसंरम्भः मानकृतकायसरम्भः मायाकृतकायसंरम्भः लोभकृतकायसंरम्भः। क्रोधकारितकायसंरम्भः मानकारितकायसंरम्भः मायाकारितकाय-

संरम्भः लोभकारितकायसंरम्भः। क्रोधानुमतकायसंरम्भः मानानुमतकायसंरम्भः मायानुमतकायसंरम्भः लोभानुमतकायसंरम्भश्चेति द्वादशधा संरम्भः। क्रोधकृतकाय-समारम्भः मानकृतकायसमारम्भः मायाकृतकायसमारम्भः लोभकृतकायसमारम्भः। क्रोधकारितकायसमारम्भो मानकारितसमारम्भो मायाकारितसमारम्भो लोभकारित-समारम्भः क्रोधानुमतसमारम्भो मानानुमतसमारम्भो मायानुमतसमारम्भो लोभानुमतसमारम्भश्चेत्येवं समारम्भोऽपि द्वादशधा। क्रोधकृतकायारम्भः मानकृत-कायारम्भः मायाकृतकायारम्भः लोभकृतकायारम्भः, क्रोधकारितकायारम्भः मानकारित-कायारम्भः मायाकारितकायारम्भः लोभकारितकायारम्भः, क्रोधानुमतकायारम्भः मानानु-मतकायारम्भः मायानुमतकायारम्भः लोभानुमतकायारम्भश्चेत्येवमारम्भोऽपि द्वादशधा। एते संपिण्डिताः कायविकल्पाः षट्त्रिंशत्। उक्तं च

**"संरम्भो द्वादशधा क्रोधादिकृतादिकायसंयोगात्।**

**आरम्भसमारम्भौ तथैव भेदास्तु षट्त्रिंशत्॥॥"(    ) इति।**

तथा वाङ्मानसयोरपि प्रत्येकं षट्त्रिंशत्। त एते सम्पिण्डिताः जीवाधिकरणा-स्रवभेदाः अष्टोत्तरशतसंख्या भवन्ति।

**चशब्दः क्रोधादिविशेषोपसंग्रहार्थः॥२०॥** चशब्दः क्रियते क्रोधादीनां विशेषाणामु-पसंग्रहार्थम्। तेनानन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानसञ्ज्वलनषोडशकषायभेदात् द्वात्रिंश-दुत्तरचतुःशतगणनाविकल्पा वेदितव्याः। कथमेषामास्रवत्वमिति चेत्? उच्यते –

**संरम्भादीनां क्रोधाद्याविष्टपुरुषकर्तृकाणां तदनुरञ्जनादधिकरणभावो नीली-पटवत्॥२१॥** यथा नील्यां प्रक्षिप्तः पटः नील्यनुरञ्जनान्नीली भवति तथा संरम्भादिक्रियाणामनन्तानुबन्ध्यादिकषायाविष्टानामनुरञ्जनाज्जीवाधिकरणत्वं सिद्धम्।

निरूपितविकल्पादाद्यादधिकरणाद्विलक्षणस्य साम्परायिकनिमित्तविरूढदोषस्य भेदप्रतिपत्त्यर्थमिदमुच्यते –

## निर्वर्तनानिक्षेपसंयोगनिसर्गा द्विचतुर्द्वित्रिभेदाः परम् ॥९॥

**निर्वर्त्तनादीनां कर्मसाधनं भावो वा ॥१॥** एते निर्वर्तनादयः शब्दाः कर्मसाधना वेदितव्याः – निर्वर्त्यते इति निर्वतना, निक्षिप्यत इति निक्षेपः, संयुज्यतेऽसौ संयोगः, निसृज्यतेऽसौ निसर्ग इति। अथवा भावसाधनाः – निर्वर्तनं निर्वर्तना, निक्षिप्तिर्निक्षेपः, संयुक्तिः संयोगः निसृष्टिर्निसर्ग इति।

**सामानाधिकरण्येन वैयधिकरण्येन वाऽधिकरणसंबन्धः॥२॥** अधिकरणशब्दोऽनुवर्तते, तस्येह सामानाधिकरण्येन वैयधिकरण्येन वाभिसंबन्धो द्रष्टव्यः। यदा कर्मसाधना एते शब्दास्तदा सामानाधिकरण्येन संबन्धः कर्त्तव्यो निर्वर्तनैवाधिकरणमित्यादि। यदा तु भावसाधनास्तदा वैयधिकरण्येन निर्वर्तनानिक्षेपसंयोगनिसर्गलक्षणा भावाः परमधिकरणं विशिष्यन्तीत्यध्याह्नियमाणक्रियापदापेक्षया कर्मनिर्देशः। निर्वर्तना निष्पादना, निक्षेपः स्थापना, संयोगो मिश्रीभावः, निसर्गः प्रवर्तनम्।

**द्विचतुर्द्वित्रिभेदा इति द्वन्द्वपूर्वोऽन्यपदार्थनिर्देशः॥३॥** द्वौ च चत्वारश्च द्वौ च त्रयश्च द्विचतुर्द्वित्रयः, ते भेदाः एषां ते द्विचतुर्द्वित्रिभेदाः इति द्वन्द्वगर्भोऽन्यपदार्थ निर्देशः प्रत्येतव्यः।

**परवचनमनर्थकं पूर्वत्राद्यवचनात् ॥४॥** परवचनमनर्थकम्। कुतः? पूर्वत्राद्यवचनात्।

**अस्मिन् सति पूर्वत्राद्यवचनमनर्थकम् अर्थापत्तिसिद्धेः॥५॥** अस्मिन् परवचने सति पूर्वस्मिन् सूत्रे आद्यवचनमनर्थकम्। कुतः? अर्थापत्तिसिद्धेः।

**अर्थापत्तिरनैकान्तिकीति चेन्न; प्रयासमात्रत्वात् ॥६॥** स्यादेतदर्थापत्तिरनैकान्तिकी दृष्टा, यथा ह्यसति मेघे वृष्टिर्नास्तीत्युक्तेऽर्थादापन्नं सति मेघे वृष्टिरस्तीति, सत्यपि मेघे कदाचिद्वृष्टिर्नास्तीत्यर्थापत्तिरनैकान्तिकीति; तन्न; किं कारणम्? प्रयासमात्रत्वात्। प्रयासमात्रमेतदर्थापत्तिरनैकान्तिकीति। 'अहिंसा धर्मः' इत्युक्तेऽर्थापत्त्या 'हिंसाऽधर्मः' इति न सिद्ध्यति? सिद्ध्यत्येव। असति मेघे च वृष्टिरित्युक्ते सति मेघे च वृष्टिरित्युक्ते वृष्टिरित्यत्रापि सत्येव मेघे इति नास्ति दोषः।

**असंबन्धार्थत्वादिति चेन्न; निवर्त्याभावात् ॥७॥** स्यादेतदसति परशब्देऽ-संबन्धार्थमिदं स्यात्, ततः संबन्धार्थं परशब्दोपादानमिति; तन्न; किं कारणम्? निवर्त्याभावात्। किमन्यन्निवर्त्यमस्ति येनेदमसंबन्धः स्यात्? ननु संरम्भादिकं जीवाधिकरणं निवर्त्यमस्ति; न; तस्य संबन्धत्वादादयं जीवाधिकरणं संरम्भादिविशिष्ट-मिति। ततः परिशेषादजीवाधिकरणमवेदमिति व्यर्थं परवचनम्।

**एतेन प्रकृष्टवाचित्वं प्रत्युक्तम् ॥८॥** केन? निवर्त्याभावादित्यनेन। न हि निकृष्टं जीवाधिकरणं यत्प्रकृष्टेन जीवाधिकरणेन निवर्त्येतेति।

**इष्टवाचित्वमिति चेन्न; अत एव ॥९॥** स्यादेतदिष्टवाची परशब्द इति, यथा परं धाम गत इतीष्टं धाम गत इति; तन्न; किं कारणम्? अत एव। कुत एव? निवर्त्याभावादित्येवं किमनिष्टं यस्मिन् सति निवर्त्ये इष्टवाची परशब्दोऽर्थवान् स्यात्?

**न वाऽन्यार्थत्वात् ॥१०॥** न वाऽनर्थकः। कुतः? अन्यार्थत्वात्। परशब्दोऽयमन्यार्थः, संरम्भादिभ्योऽन्यत् निर्वर्तनादीत्यर्थः। इतरथाहि निर्वर्तनादीनामप्यात्म परिणामसद्भावाज्जीवाधिकरणविकल्प एवेति विज्ञायेत। अथवा, उक्तमेतत् – विस्पष्टार्थत्वादिति।

**इष्टार्थसंप्रत्ययाद्वा॥११॥** अथवा इष्टार्थोऽनेन परशब्देन संप्रत्याय्यते। कः पुनरिष्टार्थ इति चेत्? उच्यते –

**निर्वर्तनाधिकरणं द्विविधं मूलोत्तरभेदात् ॥२॥** अजीवाधिकरणं निर्वर्तनालक्षणं द्वेधा व्यवतिष्ठते। कुतः? मूलोत्तरभेदात्। मूलगुणनिर्वर्तनाधिकरणमुत्तरगुणनिर्वर्तनाधिकरणं चेति। तत्र मूलं पञ्चविधानि शरीराणि वाङ्मनःप्राणापानाश्च। उत्तरं काष्ठपुस्तचित्रकर्मादि।

**निक्षेपश्चतुर्धाऽप्रत्यवेक्षादुष्प्रमार्जनसहसाऽनाभोगभेदात् ॥३॥** निक्षेपश्चतुर्धा भिद्यते। कुतः? अप्रत्यवेक्षितदुष्प्रमार्जनसहसाऽनाभोगभेदादप्रत्यवेक्षितनिक्षेपाधिकरणं दुष्प्रमृष्टनिक्षेपाधिकरणं सहसानिक्षेपाधिकरणमनाभोगनिक्षेपाधिकरणं चेति।

**संयोगो द्विधा भक्तपानोपकरणभेदात् ॥४॥** संयोगो द्विधा विभज्यते। कुतः? भक्तपानोपकरणभेदात् - भक्तपानसंयोगाधिकरणमुपकरणसंयोगाधिकरणं चेति।

**निसर्गस्त्रिधा कायादिभेदात् ॥५॥** निसर्गस्त्रिधा कल्प्यते। कुतः? कायादिभेदात्। कायनिसर्गाधिकरणं वाङ्निसर्गाधिकरणं मनोनिसर्गाधिकरणं चेति।

आह – योऽयमाहितत्रैविध्यानन्तपर्यायः कायवाङ्मनसां परिणामः आस्रवशब्दाभिलाप्यः, किमसौ सकलसाम्परायिकावर्जनहेतुरैकध्येन प्रणिधीयमानः? नेत्युच्यते, कश्चित् कस्यचित् कुतश्चित् कायिकादिव्यापाराविशेषे सति यस्मान्नियमेनैव

## तत्प्रदोषनिह्नवमात्सर्याऽन्तरायाऽऽसादनोपघाता ज्ञानदर्शनावरणयोः॥१०॥

**ज्ञानकीर्तनानन्तरमनभिव्याहरतोऽन्यः पैशुन्यं प्रदोषः॥१॥** मत्यादिज्ञानपञ्चकस्य मोक्षप्रापणं प्रति मूलसाधनस्य कीर्तने कृते कस्यचिदनभिव्याहरतोऽन्तः पैशुन्यपरिणामो यो भवति स प्रदोष इति कथ्यते।

**पराभिसन्धानतो ज्ञानव्यपलापो निह्नवः॥२॥** यत्किञ्चित् परनिमित्तमभिसन्धाय नास्ति न वेद्मीत्यादि ज्ञानस्य व्यपलपनं वञ्चनं निह्नव इत्युच्यते।

**यावद्यथावद्देयज्ञानाप्रदानं मात्सर्यम् ॥३॥** कुतश्चित् कारणाद्भावितात्मना भावितज्ञानं दानार्हमपि योग्याय यतो न दीयते तन्मात्सर्यम्।

**ज्ञानव्यवच्छेदकरणमन्तरायः॥४॥** कलुषेणात्मना ज्ञानस्य व्यवच्छेदकरण-मन्तराय इति भण्यते।

**वाक्कायाभ्यां ज्ञानवर्जनमासादनम् ॥५॥** कायेन वाचा च परप्रकाशज्ञानस्य वर्जनमासादनं वेदितव्यम्।

**प्रशस्तज्ञानदूषणमुपघातः॥६॥** स्वमतेः कलुषभावाद् युक्तस्याप्ययुक्तवत्प्रतीतेः दोषोद्भावनं दूषणमुपघात इति विज्ञायते।

**आसादनमेवेति चेन्न; सतो विनयाद्यननुष्ठानात् ॥७॥** स्यादेतदेवं सत्युपघात आसादनमेव प्राप्नोतीति; तन्न; किं कारणम्? सतो विनयाद्यननुष्ठानात्। सतो हि ज्ञानस्य विनयप्रकाशनादिगुणकीर्तनाननुष्ठानमासादनमुपघातस्तु ज्ञानमज्ञानमेवेति ज्ञाननाशाभिप्राय इत्ययमनयोर्भेदः। तदित्यनेन किं प्रतिनिर्दिश्यते?

**तदिति ज्ञानदर्शनप्रतिनिर्देशः॥८॥** तदित्यनेन ज्ञानदर्शने प्रतिनिर्दिश्येते, तयोः प्रदोषनिह्नवमात्सर्यान्तरायासादनोपघाताः तत्प्रदोषनिह्नवमात्सर्यान्तरायासादनोपघाता इति। कथं पुनरप्रकृतयोरशब्दितयोः तदित्यनेन परामर्शः स्यात्?

**सामर्थ्यात्तदभिसंबन्धः॥९॥** सामर्थ्यात्तयोर्ज्ञानदर्शनयोरभिसंबन्धो भवति। किं सामर्थ्यम्? ज्ञानदर्शनावरणयोरास्रव इति वचनसामर्थ्यात्तत्प्रदोषादय इति संबन्धः

क्रियते। अथ ज्ञानदर्शनवत्सु तत्साधनेषु च का प्रतिपत्ति? तद्वत्साधनप्रदोषादयश्च तत्प्रदोषादिग्रहणेनैव गृह्यन्ते तन्निमित्तत्वात्।

**तुल्यास्रवत्वादेकत्वमिति चेन्न; वचनविरोधात्॥१०॥** स्यान्मतम् – तुल्यास्रवत्वादनयोरेकत्वं प्राप्नोति, तुल्यकारणानां हि लोके एकत्वं दृष्टमिति; तन्न; किं कारणम्? वचनविरोधात्। यदि तुल्यास्रवत्वात् ज्ञानदर्शनावरणयोरेकत्वं ननु कण्ठादिसंयोगविभागतुल्यहेतुत्वात् वचनस्य साधकदूषकत्वाविशेषे यत्रापदिष्टस्तत्राऽ साधकत्वाद्वचनविरोधः। अथ तुल्यहेतुत्वेऽपि वचनं स्वपक्षस्य साधकमेव परपक्षस्य दूषकमेवेति न साधकदूषकधर्मयोरेकत्वमिति मतम् ननु यदुक्तं तुल्यहेतुत्वादेकत्वमिति तद्धि न।

**दृष्टागमव्याघातात्॥११॥** दृष्टागमव्याघाताच्च नैतद्युक्तम्। यस्य तुल्यहेतुकानामेकत्वं तस्य मृत्पिण्डादितुल्यहेतुकानां घटशरावादीनां नानात्वं व्याहन्यत इति दृष्टव्याघातः। प्रधानतुल्यनिमित्तानां महदहङ्कारादीनामविद्यातुल्यप्रत्ययानां पुण्यापुण्या-नेज्यसंस्काराणां चतुष्टयसन्निकर्षाऽविशिष्टकारणरूपादिज्ञानसुखदुःखादीनां चैकत्वमित्या-गमव्याघातः।

**आवरणाभावे साहचर्यात्॥१२॥** आवरणात्यन्तसंक्षये केवलिनि युगपत् केवलज्ञान दर्शनयोः साहचर्यं भास्करे प्रतापप्रकाशसाहचर्यवत्। ततश्चानयोस्तुल्यास्रवत्वं युक्तम्।

**इतरत्र क्रमवृत्तिर्जलसमवेताग्निप्रतापप्रदीपप्रकाशवत्॥१३॥** इतरस्मिन् सावरणे ज्ञानदर्शनयोः क्रमेण वृत्तिः, यथा जलसमवायिनोऽग्नेः प्रताप एव न प्रकाशः, प्रदीपप्रकाशस्य च प्रकाश एव न प्रतापः, तथा छद्मस्थस्य यदा ज्ञानोपयोगः न तदा दर्शनोपयोगः यदा दर्शनोपयोगः न तदा ज्ञानोपयोगः।

**अतीतानागतयोर्दर्शनाभावस्तल्लक्षणाभावादिति चेन्न; निरावरणत्वात् ॥१४॥** स्यान्मतं नास्त्यतीतेऽनागते च दर्शनम्, कुतः? तल्लक्षणाभावात्। अस्पृष्टेऽविषये च ज्ञानमुत्पद्यते स्पृष्टे विषये च दर्शनम् न ह्यतीतानागतयोः विनष्टानुत्पन्नत्वे सत्यसत्त्वात् स्पृष्टत्वविषयत्वे स्त इति तत्र ज्ञानमेव दर्शनमिति केवलिनोऽतीतानागतदर्शित्वमयुक्तम्? तन्न; किं कारणम्? निरावरणत्वात्। यथा भास्करस्य निरस्तघनपटलावरणस्य यत्र प्रकाशस्तत्र प्रतापः यत्र च प्रतापस्तत्र प्रकाशः, तथा निरावरणस्य केवलिभास्कर-स्याऽचिन्त्यमाहात्म्यविभूतिविशेषस्य यत्र ज्ञानं तत्रावश्यं दर्शनं यत्र च दर्शनं तत्र च ज्ञानम्। किञ्च,

**तद्वत्प्रवृत्तेः॥१५॥** यथा ह्यसद्भूतमनुपदिष्टं च जानाति तथा पश्यति किमत्र भवतो हीयते? किञ्च,

**विकल्पात् ॥१६॥** यथा ह्यस्पृष्टेऽविषये च सावरणस्योपदेशाभावे न ज्ञानमस्तीति केवलिनोऽपि किं तद्वद्भवति? तथा सावरणस्य विषये स्पृष्टे च दर्शनप्रवृत्तेः न केवलिनस्तद्वद्भविष्यतीति सिद्धं केवलिनस्त्रिकालगोचरं दर्शनम्। भवतु तावन्निरावरणत्वात् केवलिनोऽतीतानागतयोर्दर्शनप्रवृत्तिरवधिज्ञानिनः सावरणस्य कथं दर्शनमिति? अत्रोच्यते -

**करणनिरपेक्षक्षयोपशमशक्तिविशेषयोगादवधिज्ञानिनः॥१७॥** यद्यप्यवधिज्ञानिन आवरणमस्ति तथाप्यवधिदर्शनावरणक्षयोपशमविशेषस्य करणनिरपेक्षत्वात् केवलदर्शनवदनुपदेशपूर्वकप्रवृत्तेरतीतानागतयोरस्पृष्टाविषयत्वेऽप्यवधिदर्शनं प्रवर्तते।

**मनःपर्ययदर्शनमप्यस्त्विति चेन्न; कारणाभावात् ॥१८॥** यथाऽवधिज्ञानं दर्शनपूर्वकं तथा मनःपर्ययज्ञानेनापि दर्शनपुरस्सरेण भवितव्यमिति चेत्; तन्न; किं कारणम्?

कारणाभावात्। न मनःपर्ययदर्शनावरणमस्ति दर्शनावरणचतुष्टयोपदेशात् तदभावात् तत्क्षयोपशमाभावे तन्निमित्तमनःपर्ययदर्शनोपयोगाभावः। किञ्च,

**परकीयमनःप्रणालिकया तदधिगमात् ॥१९॥** मनःपर्ययज्ञानं स्वविषयेऽवधि-ज्ञानवन्न स्वमुखेन वर्तते। कथं तर्हि? परकीयमनःप्रणालिकया। ततो यथा मनोऽतीतानागतानर्थांश्चिन्तयति न तु पश्यति तथा मनःपर्ययज्ञान्यपि भूतभविष्यन्तौ वेत्ति न पश्यति। वर्तमानमपि मनो विषयविशेषाकारेणैव प्रतिपद्यते, ततः सामान्यपूर्वक-वृत्त्यभावात् मनःपर्ययदर्शनाभावः अलमतिप्रसङ्गिन्या कथया। प्रकृतं प्रस्तूयते –

**भिन्नास्रवत्वं वा प्रदोषादीनां विषयभेदाद्भेदसिद्धेः॥२०॥** अथवा, भिन्नास्रवत्वं ज्ञानदर्शनावरणयोर्वेदितव्यम्। कुत? प्रदोषादीनां विषयभेदाद्भेदसिद्धेः। ज्ञानविषया हि प्रदोषादयो ज्ञानावरणस्यास्रवाः, दर्शनविषयाश्च दर्शनावरणस्येति। अपि च, आचार्योपाध्यायप्रत्यनीकत्वाकालाध्ययनश्रद्धाऽभावाभ्यासालस्यानादरार्थश्रवणतीर्थोपरोध-बहुश्रुतगर्वमिथ्योपदेशबहुश्रुतावमानस्वपक्षपरिग्रहपण्डितत्वस्वपक्षपरित्यागाबद्धप्रलापोत्सू-त्रवादसाध्यपूर्वकज्ञानाधिगमशास्त्रविक्रयप्राणातिपातादयः ज्ञानावरणस्यास्रवाः। दर्शनमात्स-र्याऽन्तरायनेत्रोत्पाटनेन्द्रियप्रत्यनीकत्वदृष्टिगौरवायतस्वापितादिवाशयनालस्यनास्तिक्य-परिग्रहसम्यग्दृष्टिसंदूषणकुतीर्थप्रशंसाप्राणव्यपरोपणयतिजनजुगुप्सादयो दर्शनावरणस्या स्रवाः, इत्यस्त्यास्रवभेदः।

यथाऽनयोः कर्मप्रकृत्योरास्रवभेदस्तथा –

## दुःखशोकतापाक्रन्दनवधपरिदेवनान्यात्मपरोभयस्थान्यस-द्वेद्यस्य॥११॥

**पीडालक्षणः परिणामो दुःखम् ॥१॥** विरोधिद्रव्योपनिपाताभिलषितवियोगाऽनिष्टनिष्ठुरश्रवणादिबाह्यसाधनापेक्षादसद्वेद्योदयादुत्पद्यमानपीडालक्षणः परिणामो दुःखमित्याख्यायते।

**अनुग्राहकसम्बन्धविच्छेदे वैक्लव्यविशेषः शोकः॥२॥** अनुग्राहकस्य वान्धवादेः संबन्धविच्छेदे तद्गताशयस्य चिन्ताखेदलक्षणः परिणामो वैक्लव्यविशेषो मोहकर्मविशेषशोकोदयापेक्षः शोक इत्युच्यते।

**परिवादादिनिमित्तादाविलान्तःकरणस्य तीव्रानुशयस्तापः॥३॥** परिवादः परिभवः, परुषवचनश्रवणादिनिमित्तापेक्षया कलुषान्तःकरणस्य तीव्रानुशयः परिणामः ताप इत्यभिधीयते।

**परितापजाश्रुपातप्रचुरविलापाद्यभिव्यक्तं क्रन्दनमाक्रनदनम् ॥४॥** परितापनिमित्तेनाश्रुपातप्रचुरविलापेनाङ्गविकारादिना चाभिव्यक्तं क्रन्दनमाक्रन्दनं प्रत्येतव्यम्।

**आयुरिन्द्रियबलप्राणवियोगकरणं वधः॥५॥** भवधारणकारणस्यायुषः रूपादिग्रहणनिमित्तानामिन्द्रियाणां कायादिवर्गणालम्बनबलस्योच्छवासनिःश्वासनलक्षणस्य च प्राणस्य परस्परतो वियोगकरणं वध इत्यवधार्यते।

**संक्लेशप्रवणं स्वपरानुग्रहाभिलाषाविषयमनुकम्पाप्रायं परिदेवनम् ॥६॥** संक्लेशपरिणामालम्बनं स्वपरानुग्रहाभिलाषविषयमनुकम्पाप्रचुरं परिदेवनमिति परिभाष्यते।

**दुःखजातीयत्वात् सर्वेषां पृथगवचनमिति चेन्न; कतिपयविशेषसंबन्धेन तज्जात्याख्यानात् ॥७॥** स्यान्मतं शोकादयो हि सर्वे दुःखजातीयास्ततो दुःखग्रहणादेव सिद्धे पृथगेषां वचनमनर्थकमिति; तन्न; किं कारणम्? कतिपयविशेषसंबन्धेन तज्जात्याख्यानात्। यथा गौरित्युक्तेऽनिर्ज्ञातविशेषे तत्प्रतिपादनार्थं खण्डमुण्डशुक्लकृष्णाद्युपादानं क्रियते, तथा दुःखविषयास्रवाऽसंख्येयलोकभेदसंभवात् दुःखमित्युक्ते

विशेषानिर्ज्ञानात् कतिपयविशेषनिदर्शनेन तद्विवेकप्रतिपत्तिः कथं स्यादिति शोकाद्युपादानं क्रियते। एते खल्वपि विधयः सुपरिगृहीता भवन्ति येषु लक्षणं च प्रपञ्चश्चेति।

**कथञ्चिदन्यत्वोपपत्तेश्च॥८॥** यथा मृत्पिण्डघटकपालादीनां मूर्तिमद्रूपद्रव्यार्थादेशात् स्यादनन्यत्वम् प्रतिनियतसंस्थानादिपर्यायादेशात् स्यादन्यत्वम् तथा दुःखशोकतापा-क्रन्दनवधपरिदेवनानामप्रीतिसामान्यादेशात् स्याद्दुःखपरिणामादनन्यत्वम्, प्रत्यर्थनियत-हेतुभेदाहिताविशेषदुःखशोकतापाक्रन्दनवधपरिदेवनपर्यायादेशात् स्यादन्यत्वम्।

**दुःखादीनां कर्त्रादिसाधनभावः पर्यायिपर्याययोर्भेदाभेदविवक्षोपपत्तेः॥९॥** दुःखादीनां शब्दानां कर्त्रादिसाधनत्वमवसेयम्। कुतः? पर्यायिपर्याययोर्भेदाभेदविवक्षोपपत्तेः। यदा पर्यायिपर्याययोरभेदविवक्षा तदा तप्तायःपिण्डवत्तत्परिणामादात्मैव दुःखयतीति कर्तृसाधनत्वम्। यदा पर्यायिपर्याययोरभेदविवक्षा तदा दुःखयत्यनेनास्मिन्निति वा दुःखमिति करणादिसाधनत्वम्। वस्तुस्वरूपमात्रकथनात् दुःखनं दुःखमिति भावसाधनत्वं वा। एवं शोकादिष्वपि योज्यम्।

**तदेकान्तावधारणेऽनुपपन्नमन्यतरैकान्तसंग्रहात्॥१०॥** कर्त्रादिसाधनत्वं दुःखादीनामेकान्तावधारणेऽनुपपन्नम्? कुतोऽन्यतरैकान्तसंग्रहात्। पर्यायमात्रत्वे तावदसत्यात्मनि विज्ञानादीनां करणादिसाधनत्वमयुक्तं कर्तुरभावात्। स्वातन्त्र्यशक्तिविशिष्टस्वार्थापेक्षाणि हि शेषकारकाणि तदभावादभावमास्कन्देयुः। कर्तृसाधनत्वमपि चायुक्तम्, करणादिसाचिव्यव्यपेक्षाभावात्। न च तेषां विज्ञानादीनां परस्परं प्रति साचिव्यमस्ति युगपदुपजायमानत्वात् सव्येतरगोविषाणवत्। नाप्यतीतानागतानां वर्तमानं प्रति सहायभावोऽस्त्यसत्त्वाद् वन्ध्यापुत्रवत्।

**क्षणिकत्वाच्च पूर्वानुभूतस्मरणाभावात् शोकादिपरिणामाऽभावः॥११॥** पूर्वानुभूतं ह्यर्थं विनष्टं चिन्तयतः शोकादयो भवन्ति। न च क्षणिकवादे स्मरणमस्ति, तदभावाच्छोकाद्यभावः। सन्तानादिति चेन्न; तदभावादित्युक्तत्वात्। भावसाधनत्वमपि नोपपत्तिक्षमम्, भाववन्तमन्तरेण भावस्य वृत्त्यभावात्।

द्रव्यमात्रत्वे च क्रियागुणविरहात् पुरुषस्य निर्गुणत्वं निष्क्रियत्वं च दधानस्य सुखदुःखादिपरिणामप्राप्तिं प्रति कर्तृत्वाभावः। तदभावात् करणादीनामप्यभावः। अथ कर्त्रादिसाधनभावः कल्प्यतेः, न तर्हि निर्गुणत्वं निष्क्रियत्वं चात्मनोऽवतिष्ठते।

तथाऽचेतनस्यापि दुःखादिपरिणामं प्रति कर्तृभावोऽनुपपन्नः; दुःखादीनां घटादिष्वचेतनेष्वदर्शनात्। यद्यचेतनस्यापि दुःखादयोऽभ्युपगम्येरन् चेतनाचेतनयोर-विशेषः स्यात्। निष्क्रियत्वेऽप्यधर्मनिमित्ताः पुरुषस्य दुःखादय इति चेन्न; निष्क्रियस्य धर्माधर्मोपार्जनविध्यभावात् तत्फलानुभवनाभावाच्च।

**तान्यात्मपरोभयस्थानि क्रोधाद्यावेशात्॥१२॥** तानि दुःखादीनि क्रोधाद्यावेशादा-त्मपरोभयस्थानि भवन्ति। तद्यथा, यदा क्रोधाद्याविष्ट आत्मा स्वस्मिन् दुःखादीन्युत्पादयति तदाऽऽत्मस्थानि भवन्ति। तदा पुनरीश्वरः कषायवशात् परस्य दुःखादीनि जनयति तदा परस्थानि भवन्ति। यदा तूत्तमर्णादयोऽधमर्णादिनिरोधे वर्तमानाः तज्जनितानि क्षुत्पिपासादीनवाप्नुवन्ति तदोभयस्थानि।

**विद्यादीनामवगमनाद्यर्थत्वादनिर्देश इति चेन्न; विदेश्चेतनार्थस्य ग्रहणात्॥१३॥** स्यान्मतमिमे चत्वारो विदयः विदविद्लृविन्तिविद्यन्तयोऽवगमनलाभविचारसद्भावार्थाः, एतेषां कस्यचिदपि संग्रहेऽभिप्रेतस्यार्थस्याऽगतेरनिर्देश इति; तन्न; किं कारणम्? विदेश्चेतनार्थस्य ग्रहणात्। विदेः चुरादिण्यन्तस्य चेतनार्थस्येदं वेद्यमिति।

**तदसद्वेद्यमप्रशस्तत्वात् ॥१४॥** तद्वेद्यमसदिति विशेष्यते। कुतः? अप्रशस्तत्वात्। अनिष्टफलप्रादुर्भावकरणत्वादप्रशस्तमित्याख्यायते।

**दुःखाभिधानमादौ प्रधानत्वात् ॥१५॥** दुःखग्रहणमादौ क्रियते। कुतः? प्रधानत्वात्। कुतः पुनरस्य प्राधान्यम्? तद्विकल्पत्वादितरेषाम्। किमेतावन्त एव विकल्पाः? नेत्याह –

**शोकादिग्रहणस्य विकल्पोपलक्षणत्वादन्यसंग्रहः॥१६॥** इमे शोकादयः दुःख-विकल्पा दुःखविकल्पानामुपलक्षणार्थमुपादीयन्ते, ततोऽन्येषामपि संग्रहो भवति। के पुनस्ते? अशुभप्रयोगपरपरिवादपैशुन्यानुकम्पाऽभावपरपरितापनाऽङ्गोपाङ्गच्छेदन-भेदनताडनत्रासनतर्जनभर्त्सनतक्षणविशंसनबन्धनरोधनमर्दनदमनवाहनविहेडनह्रेपणकाय-रौक्ष्यपरनिन्दात्मप्रशंसासंक्लेशप्रादुर्भावनायुर्वहमानतानिर्दयत्वसत्त्वव्यपरोपणमहारम्भपरि-ग्रहविश्रम्भोपघातवक्रशीलतापापकर्मजीवित्वाऽनर्थदण्डविषमिश्रणशरजालपाशवागुरापञ्जर-यन्त्रोपायसर्जनबलाभियोगशस्त्रप्रदानपापमिश्रभावाः। एते दुःखादयः परिणामा आत्मपरोभ-यस्था असद्वेद्यस्यास्रवा वेदितव्याः।

**स्वतीर्थकरोपदेशविरोधादयुक्तिरिति चेन्न; सर्वथा प्रश्नविनिवृत्तेः॥१७॥** स्यादेतत्-यदि दुःखाधिकरणमसद्वेद्यहेतुः, ननु नाग्न्यलोचाऽनशनादितपःकरणं दुःखहेतुरिति तदनुष्ठानोपदेशनं स्वतीर्थकरस्य विरुद्धम्, तदविरोधे च दुःखादीनामसद्वेद्यास्र-वस्यायुक्तिरिति; तन्न; किं कारणम्? सर्वथा प्रश्नविनिवृत्तेः। न तावदार्हतस्य प्रश्न उपपद्यते – स्वतीर्थकरोपदेशव्याघातप्रसङ्गात्। यस्य क्षणिकवादः तस्यापि न युज्यते, सर्वदुःखशून्यानात्मकत्वाभ्युपगमे हिंसादिवद् दानादेरप्यकुशलत्वं दुःखहेतुतुल्यत्वादिति तथेतरेषामपि हिंसादीनां दुःखहेतुत्वेन पापास्रवहेतूनभ्युपगच्छता यमनियमपरिपालन-विविधवेषानुष्ठानदुश्चरोपवासब्रह्मचर्यादीनां दुःखहेतुत्वात् तदनुष्ठानविरोधप्रसङ्गान्नोपपद्यते प्रश्नः। किञ्च,

**द्वेषासंभवात् ॥१८॥** यथाऽनिष्टद्रव्यसम्पर्काद् द्वेषोत्पत्तौ दुःखोत्पत्तिः न तथा बाह्याभ्यन्तरतपःप्रवृत्तौ धर्मध्यानपरिणतस्य यतेरनशनकेशलुञ्चनादिकरणकारणापादित-कायक्लेशेऽस्ति द्वेषसंभवः। तस्मान्नासद्वेद्यबन्धोऽस्ति। क्रोधाद्यावेशे हि सति स्वपरोभयदुःखादीनां पापास्रवहेतुत्वमिष्टं न केवलानाम्। किञ्च

**आहितप्रसादत्वात् ॥१९॥** यथा यतिरहिंसादिकरणकारणोद्यतत्वादाहितप्रसादः तथाऽयमुपवासादिकरणकारणेऽप्याहितप्रसादोऽनशनादितपः करोतीति दुःखाद्यभावः। किञ्च,

**प्रायश्चित्तोपदेशात् ॥२०॥** कादाचित्कान्यकारणाविर्भूतक्रोधादिपरिणामे च सति तदुत्सिसृक्षार्थं प्रायश्चित्तविधानं क्रियते, ततः कथमिव यतेरनशनादितपश्चरणे क्रोधादिपरिणामो भवेत्? किञ्च,

**अनुग्रहबुद्ध्या तद्व्यापाराद् गण्डपाटनवत् ॥२१॥** यथा भिषक् करुणार्द्रीकृतचेताः संयतस्योपर्यनुग्रहबुद्ध्या गण्डं पाटयंस्तत्र क्रोधाद्यभावात् नापुण्यं बध्नाति तथाऽ-नादिसांसारिकजातिजरामरणवेदनाजिघांसं प्रत्यागूर्णो यतिः तदुपाये प्रवर्तमानः स्वपरस्थदुःखादिहेतुत्वे सत्यपि क्रोधाद्यभावात् पापस्याबन्धकः। किञ्च

**मनोरत्या सौख्याभिधानात् ॥२२॥** यथा दुःखाभिभूतानामपि संसारिणां यत्र मनोरतिस्तत्र सौख्यं तथाऽनशनादिकरणस्य यतेर्मनोरतिसौख्यसान्निध्याददोषः। उक्तञ्च-

> **"पुरे वने वा स्वजने जने वा प्रासादशृङ्गे द्रुमकोटरे वा।**
> **प्रियाङ्गनाऽङ्केऽथ शिलातले वा मनोरतिं सौख्यमुदाहरन्ति॥" इति।**

यद्यसद्वेद्यस्यामी प्रयोगाः यथा द्वितीयस्य क आस्रवा इति? उच्यन्ते –

## भूतव्रत्यनुकम्पादानसरागसंयमादियोगः क्षान्तिः शौचमिति सद्वेद्यस्य॥१२॥

**आयुर्नामकर्मोदयवशाद्भवनाद् भूतानि॥१॥** तासु तासु योनिष्वायुर्नामकर्मोदय-वशाद्भवनाद्भूतानि सर्वे प्राणिन इत्यर्थः।

**व्रताभिसंबन्धिनो व्रतिनः॥२॥** व्रतानि वक्ष्यन्तेऽहिंसादीनि, तदभिसंबन्धिनो ये ते व्रतिनः। ते द्वेधाऽगारं प्रति निवृत्तौत्सुक्याः संयता; गृहिणश्च संयतासंयताः।

**अनुकम्पनमनुकम्पा॥३॥** अनुग्रहार्द्रीकृतचेतसः परपीडामात्मस्थामिव कुर्वतोऽनु-कम्पनमनुकम्पा। भूतानि च व्रतिनश्च भूतव्रतिन; भूतव्रतिष्वनुकम्पा भूतव्रत्यनुकम्पा। ''साधनं कृता बहुलम्' इति वृत्तिः। यथा गलचोपक इति। मयूरव्यंसकादित्वाच्च।

**स्वस्य परानुग्रहबुद्ध्याऽतिसंर्जनं दानम्॥४॥** आत्मीयस्य वस्तुनः परानुग्रहबुद्ध्याऽतिसर्जनं दानमिति कथ्यते।

**सम्परायनिवारणप्रवणोऽक्षीणाशयः सरागः॥५॥** पूर्वोपात्तकर्मोदयवशादक्षीणाशयः सन् सम्परायनिवारणं प्रत्यागूर्णमनाः सराग इत्युच्यते।

**प्राणीन्द्रियेष्वशुभप्रवृत्तेर्विरतिः संयमः॥६॥** प्राणिष्वेकेन्द्रियादिषु चक्षुरादिष्विन्द्रियेषु चाशुभप्रवृत्तेर्विरतिः संयम इति निश्चीयते। सरागस्य संयमः सरागसंयमः, सरागो वा संयमः सरागसंयमः।

**आदिशब्देन संयमाऽसंयमाऽकामनिर्जराबालतपोऽनुरोधः॥७॥** संयमासंयमः अकामनिर्जरा बालतप इत्येतेषामादिशब्देनानुरोधः क्रियते। तत्र संयमासंयमो-ऽनात्यन्तिकी विरतिः। विषयाऽनर्थनिवृत्तिं चात्माभिप्रायेणाकुर्वतः पारतन्त्र्याद्भोगोपभोग-

निरोधोऽकामनिर्जरा। यथार्थप्रतिपत्त्यभावादज्ञानिनो बाला मिथ्यादृष्ट्यादयस्तेषां तपः बालतपोऽग्निप्रवेशकारीषसादनादिप्रतीतम् ।

**निरवद्यक्रियाविशेषानुष्ठानं योगः॥८॥** निरवद्यस्य क्रियाविशेषस्यानुष्ठानं योगः समाधिः, सम्यक् प्राणिधानमित्यर्थः। दण्डभावनिवृत्त्यर्थं च तस्य ग्रहणं क्रियते। भूतव्रत्यनुकम्पादानं च सरागसंयमादयश्च भूतव्रत्यनुकम्पादानसरागसंयमादयस्तेषां योगः भूतव्रत्यनुकम्पादानसरागसंयमादियोगः।

**धर्मप्रणिधानात्कोधादिनिवृत्तिः क्षान्तिः॥९॥** क्रोधादेः कषायस्य शुभपरिणाम-भावनापूर्विका निवृत्तिः क्षान्तिरित्युच्यते। ननु क्षमूषिति षित्त्वात् अङि क्षमेति भवितव्यम्; सत्यमेवमेतत्, यदि भुवादिषु पठितस्य ग्रहणं स्यात्। इदं दिवादिपठितस्य क्षमू सहने इत्यस्य रूपम्।

**लोभप्रकाराणामुपरमः शौचम् ॥१०॥** लोभप्रकारेभ्यः उपरतः शुचिरित्युच्यते, तस्य भावः कर्म वा शौचम्। के पुनर्लोभप्रकाराः? स्वद्रव्यात्यागपरद्रव्यापहरण सान्न्यासिकनिह्नवादयः।

**इतिकरणं प्रकारार्थः॥११॥** हेत्वेवंप्रकारादिव्यवच्छेदादिषु दृष्टप्रयोग इतिशब्दः, तत्रेह प्रकारार्थो गृह्यते। एवंप्रकाराः सद्वेद्यस्यास्रवा इति।

**वृत्तिप्रसङ्गो लघुत्वादिति चेन्न; अन्योपसंग्रहार्थत्वात् ॥१२॥** स्यान्मतं वृत्तिरत्र न्याय्या संयमादियोगक्षान्तिशौचानीति। कुतः? लघुत्वादिति; तन्न; किं कारणम्? अन्योपसंग्रहार्थत्वात्।

**इतिकरणानर्थक्यमिति चेन्न; उभयग्रहणस्य व्यक्त्यर्थत्वात् ॥१३॥** स्यादेतत् – यद्यवृत्तिकरणमन्योपसंग्रहार्थमितिशब्दोपादानस्यापि तदेव प्रयोजनमिति तस्यानर्थक्य-मिति; तन्न; किं कारणम्? उभयग्रहणस्य व्यक्त्यर्थत्वात्। व्यक्त्यर्थमुभयं गृह्यते। के

पुनस्ते गृह्यमाणाऽर्हत्पूजाकरणपरतापताबालवृद्धतपस्विवैय्यावृत्योद्योगार्जवविनयप्रधानतादयः।

**व्रतिग्रहणमनर्थकमिति चेन्न; प्राधान्यख्यापनार्थत्वात्॥१४॥** स्यान्मतम् - भूतग्रहणादेव सिद्धं व्रतिग्रहणमनर्थकं सामान्यनिर्देशस्य सर्वविशेषव्यापित्वाविरोधादिति; तन्न; किं कारणम्? प्राधान्यख्यापनार्थत्वात्। भूतेषु याऽनुकम्पातस्या व्रतिष्वनुकम्पा प्रधानभूतेत्ययमर्थः ख्याप्यते।

**नित्यानित्यात्मकत्वेऽनुकम्पादिसिद्धिर्नान्यथा॥१५॥** द्रव्यत्वाद्यन्वयादेशान्नित्यतामजहतः नैमित्तिकपरिणाममुखेनानित्यतामास्कन्दतः जीवस्यानुकम्पादयः परिणाम-विशेषा युज्यन्ते नान्यथा। यदि नित्यत्वमेव स्यात् विक्रियाऽभावादनुकम्पादि-परिणत्यभावः, तदभ्युपगमे च नित्यताव्याघातः। क्षणिकैकान्तेऽपि पूर्वोत्तरावग्राहकैकविज्ञानाभावादनुकम्पादिप्रच्यवः। संस्कारादिति चेन्न; तस्याप्यनित्यत्वात्। ज्ञानाऽज्ञानभावे चाऽनुपपत्तेः।

आह – उक्ता सदसत्प्रकारस्य वेदनीयस्योपादानहेतवः। अथानन्तरस्यानन्तप्रवा-हसंसारास्पदकारणस्य मोहस्यात्मलाभे को हेतुरिति? अत्रोच्यते –

## केवलिश्रुतसङ्घधर्मदेवाऽवर्णवादो दर्शनमोहस्य॥१३॥

**करणक्रमव्यवधानातिवर्ति ज्ञानोपेताः केवलिनः॥१॥** करणं चक्षुरादि, कालभेदेन वृत्तिः क्रमः कुड्यादिनाऽन्तर्धानं व्यवधानमेतान्यतीत्य वर्तते, ज्ञानावरणस्यात्यन्तसंक्षये आविर्भूतमात्मनः स्वाभाविकं ज्ञानम्, तद्वन्तोऽर्हन्तो भगवन्तः केवलिन इति व्यपदिश्यन्ते।

**तदुपदिष्टं बुद्ध्यतिशयर्द्धियुक्तगणधरावधारितं श्रुतम्॥२॥** तैर्व्यपगतरागद्वेष-मोहैरुपदिष्टं बुद्ध्यतिशयर्द्धियुक्तैः गणधरैरवधारितं श्रुतमित्युच्यते। तद्विस्तरतो व्याख्यातम्।

**रत्नत्रयोपेतः श्रमणगणः सङ्घः॥३॥** सम्यग्दर्शनादिरत्नत्रयभावनापराणां चतुर्विधानां श्रमणानां गणः सङ्घ इति कथ्यते।

**एकस्याऽसङ्घत्वमिति चेन्न; अनेकव्रतगुणसंहननादेकस्यापि सङ्घत्वसिद्धेः॥४॥** स्यादेतत् – सङ्घो गणो वृन्दमित्यनर्थान्तरं तस्य कथमेकस्मिन् वृत्तिरिति? तन्न; किं कारणम्? अनेकव्रतगुणसंहननादेकस्यापि सङ्घत्वसिद्धेः। उक्तं च –

**"संघो गुणसंघादो कम्माण विमोयदो हवदि संघो।**
**दंसणणाणचरित्ते संघादित्तो हवदि संघो॥१॥"**

**अहिंसादिलक्षणो धर्मः॥५॥** तस्मिन् जिनप्रवचने निर्दिष्टोऽहिंसादिलक्षणो धर्म इत्युच्यते।

**देवशब्दो व्याख्यातार्थः॥६॥** "देवाश्चतुर्णिकायाः" इत्यत्र देवशब्दो व्याख्यातार्थः।

**अन्तःकलुषदोषादसद्भूतमलोद्भावनमवर्णवादः॥७॥** गुणवत्सु महत्सु स्वमतिकलुष-दोषादसद्भूतमलोद्भावनमवर्णवाद इति वर्ण्यते। केवलिश्रुतसंघधर्मदेवानामवर्णवादः केवलिश्रुतसंघधर्मदेवाऽवर्णवादः।

**पिण्डाभ्यवहारजीवनादिवचनं केवलिषु॥८॥** पिण्डाभ्यवहारजीविनः केवलदशा-निर्हरणाः अलाबूपात्रपरिग्रहाः कालभेदवृत्तज्ञानदर्शनाः केवलिन इत्यादिवचनं केवलिष्ववर्णवादः।

**मांसभक्षणाद्यनवद्याभिधानं श्रुते॥९॥** मांसमत्स्यभक्षणं मधुसुरापानं वेदनार्दित-मैथुनोपसेवा रात्रिभोजनमित्येवमाद्यनवद्यमित्यनुज्ञानं श्रुतेऽवर्णवादः।

**शूद्रत्वाशुचित्वाद्याविर्भावनं सङ्घे॥१०॥** एते श्रमणाः शूद्राः अस्नानमलदिग्धाङ्गाः अशुचयो दिगम्बरा निरपत्रपा इहैवेति दुःखमनुभवन्ति परलोके कुतश्च सुखिनः इत्यादिवचनं सङ्घेऽवर्णवादः।

**निर्गुणत्वाद्यभिधानं धर्मे॥११॥** जिनोपदिष्टो दशविकल्पो धर्मो निर्गुणः, तदुपसेविनो ये ते चाऽसुरा भवन्तीत्येवमाद्यभिधानं धर्मावर्णवादः।

**सुरामांसोपसेवाद्याघोषणं देवावर्णवादः॥१२॥** सुरां मांसं चोपसेवन्ते देवा अहिल्यादिष्वासक्तचेतस इत्याद्याघोषणं देवावर्णवादः।

**दर्शनं मोहयति मोहनं वा दर्शनमोहः॥१३॥** दर्शनमुक्तलक्षणं ''तत्त्वार्थश्रद्धानम्'' इत्यत्र, दर्शनं मोहयतीति दर्शनमोहः, दर्शनस्य मोहनं वा दर्शनमोहः, तस्य दर्शनमोहस्यैते आस्रवा वेदितव्याः।

आह – यदेते दर्शनमोहस्यापादकाः परिणामा निश्चीयन्ते। क इदानीमनन्तरोद्दिष्टस्य चारित्रमोहस्यास्रव इति? अत्रोच्यते –

## कषायोदयात्तीव्रपरिणामश्चारित्रमोहस्य॥१४॥

**द्रव्यादिनिमित्तवशात् कर्मपरिपाक उदयः॥१॥** प्रागुपात्तस्य कर्मणः द्रव्यादिनिमित्तवशात् फलप्राप्तिः परिपाक उदय इति निश्चीयते। कषायो निरुक्तः। कषायस्य उदयः कषायोदयः तस्मात् कषायोदयात्।

**तीव्रपरिणामशब्दावुक्तार्थौ॥२॥** तीव्रमंद इत्यत्र तीव्रशब्दो व्याख्यातार्थः ''तद्भावः परिणामः'' इत्यत्र परिणामशब्दो वर्णितार्थः।

**चारित्रं मोहयति मोहनं वा चारित्रमोहः॥३॥** चारित्रमुक्तलक्षणम्, तन्मोहयति मोहनं वा तस्य चारित्रमोह इति निर्दिश्यते, तस्य चारित्रमोहस्य कषायोदयनिमित्तः तीव्रपरिणामो यः स आस्रव इति वेदितव्यः। स किंस्वरूप इति चेत्? उच्यते-

जगदनुग्रहतन्त्रशीलव्रतभावितात्मतपस्विजनगर्हणधर्मावध्वसंनतदन्तरायकरणशीलगुण-देशसंयतविरतिरतिप्रच्यावनमधुमद्यमांसविरतचित्तविभ्रमापादानवृत्तसंदूषणसंक्लिष्टलिङ्ग-व्रतधारणस्वपरकषायोत्पादनादिलक्षणः कषायवेदनीयस्यास्रवः। उत्प्रहासदीनाभिहासित्व-कन्दर्पोपहसनबहुप्रलापोपहासशीलता हास्यवेदनीयस्य। विचित्रपरक्रीडनपरतौचित्यावर्जन-बहुविधपीडाभावदेशाद्यनौत्सुक्यप्रीतिसंजननादिः रतिवेदनीयस्य। परारतिप्रादुर्भावन-रतिविनाशनपापशीलसंसर्गताऽकुशलक्रियाप्रोत्साहनादिररतिवेदनीयस्य। स्वशोकाऽमोद-शोचनपरदुःखाविष्करणशोकप्लुताभिनन्दनादिः शोकवेदनीयस्य। स्वयं भयपरिणाम-परभयोत्पादननिर्दयत्वत्रासनादिर्भयवेदनीयस्य। सद्धर्मापन्नचतुर्वर्णविशिष्टवर्गकुलक्रिया-चारप्रवणजुगुप्सापरिवादशीलत्वादिर्जुगुप्सावेदनीयस्य। प्रकृष्टक्रोधपरिणामातिमानितेर्ष्या-व्यापारालीकाभिधायिताऽतिसन्धानपरत्वप्रवृद्धरागपराङ्गनागमनादरवामलोचनाभावाभि-ष्वङ्गतादिः स्त्रीवेदस्य। स्तोकक्रोधजैह्मनिवृत्त्यनुत्सिक्तत्वाऽलोभभावाऽङ्गनासमवायाल्प-रागत्वस्वदारसन्तोषेर्ष्याविशेषोपरमस्नानगन्धमाल्याभरणानादरादिः पुंवेदनीयस्य। प्रचुर-क्रोधमानमायालोभपरिणामगुह्येन्द्रियव्यपरोपणस्त्रीपुंसानङ्गव्यसनित्वशीलव्रतगुणधारिप्र-व्रज्याश्रितप्रथमपराङ्गनावस्कन्दनरागतीव्रानाचारादिर्नपुंसकवेदनीयस्य।

आह – मोहनीयस्यानेकविकल्पस्यास्रवभेदो निर्दिष्टः। इदीनीमायुश्चतुष्टयस्या-स्रवभेदो वक्तव्य इति। तत्राद्यस्य नियतकालपरिपाकस्यायुषः कारणप्रदर्शनार्थमिद-मुच्यते –

**बह्वारम्भपरिग्रहत्वं नारकस्यायुषः॥१५॥**

**संख्यावैपुल्यवाचिनो बहुशब्दस्य ग्रहणमविशेषात्॥१॥** अयं बहुशब्दोऽस्त्येव संख्यापदमेकः द्वौ बहव इति। अस्ति वैपुल्यवाची बहुरोदनो बहुसूप इति। तस्य द्विप्रकारस्यापि ग्रहणमिह न विरुध्यते। कुतः? अविशेषात्।

**आरम्भो हैंस्रं कर्म॥२॥** हिंसनशीलाः हिंस्राः, तेषां कर्म हैंस्रमारम्भ इत्युच्यते। बहव आरम्भाः बह्वारम्भाः, बहुर्वाऽऽरम्भो बह्वारम्भः।

**ममेदमिति संकल्पः परिग्रहः॥३॥** ममेदं वस्तु, अहमस्य स्वामीत्यात्मात्मीयाभिमानः संकल्पः परिग्रह इत्युच्यते। बह्वारम्भाः परिग्रहा यस्य स बह्वारम्भपरिग्रहस्तस्य भावः बह्वारम्भपरिग्रहत्वं नारकस्यायुषः आस्रवो भवति। एतदुक्तं भवति – परिग्रहप्रणिधानप्रयुक्ताः तीव्रतरपरिणामा हिंसापरा बहुशो विज्ञाता ह्यनुमता भाविताश्च, तत्कृतकर्मात्मसात्करणात् तप्तायःपिण्डवदहितक्रौर्या नारकस्यायुषः आस्रव इति संक्षेपः। तद्विस्तरस्तु मिथ्यादर्शनाश्लिष्टाचारतोत्कृष्टमानताशैलभेदसदृशरोष-तीव्रलोभानुरागाऽनुकम्पाहीनभावपरपरितापान्तःप्रणिधानवधबन्धनाभिनिवेशप्राणभूतजीव-सत्त्वाजस्रोपघातपरिणामप्राणवधात्मकानृतवचनशीलत्वपरस्वहरणानिभृताभिष्वङ्ग-परिणाममैथुनोपसेवनाविरतिमहारम्भवशीकृतेन्द्रियताकामभोगाभिलाषप्रवृद्धतानैःशील्य-पापनिमित्ताहाराभिप्रायस्थिरवैरनृशंसासमीक्षितक्रन्दनकारितानिरनुग्रहस्वाभाव्ययतिसमय-भेदतीर्थकरासादनकृष्णलेश्याभिजातरौद्रध्यानमरणकालतादिलक्षणो विज्ञेयः।

आह – उक्तो नारकस्यायुष आस्रवः, तैर्यग्योनस्येदानीं वक्तव्य इति? अत्रोच्यते –

## माया तैर्यग्योनस्य॥१६॥

**चारित्रमोहोदयात् कुटिलभावो माया॥१॥** चारित्रमोहकर्मोदयाविर्भूत आत्मनः कुटिलस्वभावः मायेति व्यपदिश्यते। सा माया निकृतिस्तैर्यग्योनस्यायुष आस्रव इति संक्षेपः। प्रपञ्चस्तु – मिथ्यात्वोपष्टम्भाऽधर्मदेशनाऽनल्पारम्भपरिग्रहाऽतिनिकृतिकूट-कर्माऽवनिभेदसदृशरोषनिःशीलताशब्दलिङ्गवञ्चनाऽतिसन्धानप्रियताभेदकरणाऽनर्थोद्भावन-वर्णगन्धरसस्पर्शान्यत्वापादनजातिकुलशीलसंदूषणविसंवादनाभिसन्धिमिथ्याजीवित्वसद्गु-णव्यपलोपाऽसद्गुणख्यापननीलकपोतलेश्यापरिणामार्तध्यानमरणकालतादिलक्षणः प्रत्येतव्यः।

आह – व्याख्यातस्तैर्यग्योनस्यायुष आस्रवः। इदानीं मानुषस्यायुषः को हेतुरिति? अत्रोच्यते –

## अल्पारम्भपरिग्रहत्वं मानुषस्य॥१७॥

**नारकायुरास्रवविपरीतो मानुषस्य॥१॥** नारकायुरास्रवो व्याख्यातः, तद्विपरीतो मानुषस्यास्रव इति संक्षेपः। व्यासस्तु – मिथ्यादर्शनालिङ्गितमतिविनीतस्वभावता-प्रकृतिभद्रतामार्दवार्जवसमाचारसुखप्रज्ञापनीयतावालुकाराजिसदृशरोषप्रगुणव्यवहारप्रायता-ऽल्पारम्भपरिग्रहसन्तोषाभिरतिप्राण्युपघातविरमणप्रदोषविकर्मानिवृत्तिस्वागताभिभाषणा-ऽमौखर्यप्रकृतिमधुरतालोकयात्रानुग्रहौदासीन्याऽनुसूयाऽल्पसंक्लेशतागुरुदेवताऽतिथिपूजा-संविभागशीलताकपोतपीतलेश्योपश्लेषधर्मध्यानमरणकालतादिलक्षणः।

किमेतावानेवायुषो मानुषस्यास्रव इति? उच्यते –

## स्वभावमार्दवं च॥१८॥

**उपदेशानपेक्षं स्वभावमार्दवम् ॥१॥** मृदोर्भावः कर्म वा मार्दवम्, स्वभावेन मार्दवं स्वभावमार्दवम्। उपदेशानपेक्षमित्यर्थः। ननु पूर्वत्र व्याख्यातमिदं पुनर्ग्रहणमनर्थकं सूत्रेऽनुपात्तमिति कृत्वा पुनरिदमुच्यते –

**एकयोगीकरणमिति चेन्न; उत्तरापेक्षत्वात् ॥२॥** स्यान्मतमेको योगः कर्तव्यः – 'अल्पारम्भपरिग्रहत्वं स्वभावमार्दवं मानुषस्य' इति; तन्न; किं कारणम्? उत्तरापेक्षत्वात्। दैवस्यायुषः कथमयमास्रवः स्यादिति पृथक्करणम्।

किमेतदेव द्वितयं मानुषस्यास्रवः? नेत्युच्यते –

## निःशीलव्रतत्वं च सर्वेषाम् ॥१९॥

**चशब्दोऽधिकृतसमुच्चयार्थः॥१॥** अल्पारम्भपरिग्रहत्वं मानुषस्यायुषः निःशीलव्रतत्वं चेत्यधिकृतसमुच्चयार्थश्चशब्दः क्रियते। शीलानि च व्रतानि च शीलव्रतानि, निष्क्रान्तः शीलव्रतेभ्यः निःशीलव्रतः, तस्य भावः निःशीलव्रतत्वम्।

**सर्वेषां ग्रहणं सकलास्रवप्रतिपत्त्यर्थम् ॥२॥** सकलस्यायुषः आस्रवप्रतिपत्तिः कथं स्यादिति सर्वेषामित्युच्यते।

**देवायुषोऽपि प्रसङ्ग इति चेन्न; अतिक्रान्तापेक्षत्वात् ॥३॥** यदि सर्वेषां ग्रहणं सकलसंग्रहार्थं क्रियते, देवायुषोऽप्ययमास्रवः प्रसक्तः? नैष दोषः; अतिक्रान्तापेक्षत्वात्। अतिक्रान्तानामायुषां सर्वेषामास्रव इत्यपेक्ष्यते।

**पृथक्करणात् सिद्धेरानर्थक्यमिति चेन्न; भोगभूमिजार्थत्वात् ॥४॥** स्यादेतत् - पृथक्करणादेवातिक्रान्तायुस्त्रयापेक्षा सिद्ध्यति। यदि मानुषायुरास्रव एवेष्टः स्यात् तत्रैव क्रियेत, ततः सर्वेषां ग्रहणमनर्थकमिति; तन्न; किं कारणम्? भोगभूमिजार्थत्वात्।

भोगभूमिजापेक्षया निःशीलव्रतत्वं दैवस्यायुष आस्रव इत्येतस्य प्रदर्शनार्थं सर्वेषामित्युच्यते।

आह – त्रयाणामास्रवविधिरुक्तः। इदानीं दैवस्यायुषो विव्रियतामिति? अत्रोच्यते -

## सरागसंयमसंयमासंयमाऽकामनिर्जराबालतपांसि दैवस्य॥२०॥

**व्याख्याताः सरागसंयमादयः॥१॥** प्राक् शुभपरिणामाः सरागसंयमादयः व्याख्याताः ते दैवस्यायुष आस्रवहेतवो भवन्तीति संक्षेपः। विस्तरस्तु – कल्याण-मित्रसंबन्धायतनोपसेवासद्धर्मश्रवणगौरवदर्शनाऽनवद्यप्रोषधोपवासतपोभावनाबहुश्रुतागमपर-त्वकषायनिग्रहपात्रदानपीतपद्मलेश्यापरिणामधर्म्यध्यानमरणादिलक्षणः सौधर्माद्यायुष-रास्रवः। अव्यक्तसामायिकविराधितसम्यग्दर्शनता भवनाद्यायुषः महर्द्धिकमानुषस्य वा। पञ्चाणुव्रतधारिणोऽविराधितसम्यग्दर्शनाः तिर्यङ्मनुष्याः सौधर्मादिष्वच्युतावसानेषूत्प-द्यन्ते, विनिपतितसम्यकत्वा भवनादिषु। अनधिगतजीवाजीवा बालतपसोऽनुपलब्धतत्त्व-स्वभावा अज्ञानकृतसंयमासंक्लेशाभावविशेषात् केचिद्भवनव्यन्तरादिषु सहस्रारपर्यन्तेषु मनुष्यतिर्यक्ष्वपि चाकामनिर्जराक्षुत्तृष्णानिरोधब्रह्मचर्यभूशय्यामलधारणपरितापादिभिः परिखेदितमूर्तयः नारकाः निरोधकबन्धनबद्धाः दीर्घकालरोगिणोऽसंक्लिष्टा; तरुगिरिशिखर-पातिनोऽनशनज्वलनजलप्रवेशनविषभक्षणधर्मबुद्धयः व्यन्तरमानुषतिर्यक्षु। निःशीलव्रताः सानुकम्पहृदयाः जलराजितुल्यरोषा भोगभूमिसमुत्पन्नाश्च व्यन्तरादिषु जन्म प्रतिपद्यन्ते इति।

उक्तो दैवस्यायुष आक्रान्तभेद आस्रवः। किमेतावानेव देवायुरास्रवविधिः, आहोस्विदन्योऽप्यस्तीति? अत्रोच्यते –

## सम्यक्त्वञ्च॥२१॥

किम्? दैवस्यायुषः, 'आस्रवः' इत्यनुवर्तते। उक्तं सम्यक्त्वलक्षणम्।

**अविशेषाभिधानेऽपि सौधर्मादिविशेषगतिः पृथक्करणात्॥१॥** सम्यक्त्वं दैवस्यायुष आस्रव इत्यविशेषाभिधानेऽपि सौधर्मादिविशेषगतिर्भवति। कुतः? पृथक्करणात्। यद्यविशेषगतिरेवेष्टा स्यात् पृथक्करणमनर्थकं स्यात् पूर्वसूत्रे एवोच्येत। यद्येवं पूर्वसूत्र उक्त आस्रवविधिरविशेषेण प्रसक्तः, तेन सरागसंयमसंयमासंयमावपि भवनवास्याद्यायुष आस्रवौ प्रसक्तौ?

**न, अतस्तत्सिद्धेः॥२॥** नैष दोषः। कुतः? अतस्तत्सिद्धेः। यत एव सम्यक्त्वं सौधर्मादिष्विति नियम्यते तत एव तयोरपि नियमसिद्धिः, नासति सम्यक्त्वे सरागसंयमसंयमासंयमव्यपदेश इति।

आह-आयुषोऽनन्तरं यन्निर्दिष्टं नाम, तस्य क आस्रव इति? अत्रोच्यते – तन्नाम द्विविधमशुभं शुभं चेति। तत्राशुभनामास्रवप्रतिपत्त्यर्थमारभ्यते –

## योगवक्रता विसंवादनं चाऽशुभस्य नाम्नः॥२२॥

**कायवाङ्मनसां कौटिल्येन वृत्तिर्योगवक्रता॥१॥** कायवाङ्मनांसि व्याख्यातानि, तेषां कुटिलता योगवक्रतेत्युच्यते। अनार्जवं प्रणिधानमिति यावत्।

**विसंवादनमन्यथाप्रवर्तनम्॥२॥** अन्येन प्रकारेण प्रवर्तनं प्रतिपादनं विसंवादनमिति विज्ञायते।

**योगवक्रतैवेति चेत्; सत्यम्; आत्मान्तरेऽपि तद्भावप्रयोजकत्वात् पृथग्वचनम्॥३॥** स्यादेतदन्यथाप्रवर्तनं विसंवादनं तदेव योगवक्रताऽपीति पृथग्ग्रहणमनर्थकमिति;

सत्यमेवमेतत्; किन्त्वात्मान्तरेऽपि तद्भावप्रयोजकत्वात् पृथग्वचनम्। सम्यगभ्युदयनिःश्रेयसार्थासु क्रियासु प्रवर्तमानमन्यं कायवाङ्मनोभिर्विसंवादयति – मैवं कार्षीरेवं कुर्विति कुटिलतया प्रवर्तनं विसंवादनमात्मगता योगवक्रतेत्ययमनयोर्भेदः।

**चशब्दोऽनुक्तसमुच्चयार्थः॥४॥** चशब्दः क्रियतेऽनुक्तस्यास्रवस्य समुच्चयार्थः। कः पुनरसौ? मिथ्यादर्शनपिशुनताऽस्थिरचित्तस्वभावताकूटमानतुलाकरणसुवर्णमणिरत्नाद्य नुकृतिकुटिलसाक्षित्वाऽङ्गोपाङ्गच्यावनवर्णगन्धरस्पर्शान्यथाभावनयन्त्रपञ्जरक्रियाद्रव्या-न्तरविषयसंबन्धनिकृतिभूयिष्ठतापरनिन्दात्मप्रशंसाऽनृतवचनपरद्रव्यादानमहारम्भपरिग्रहो-ज्वलमेषरूपमदपरुषासत्यप्रलापाक्रोशमौखर्यसौभाग्योपयोगवशीकरणप्रयोगपरकुतूहलो-त्पादनाऽलङ्कारादरचैत्यप्रदेशगन्धमाल्यधूपादिमोषणविलम्बनोपहासेष्टिकापाकदवाग्नि-प्रयोगप्रतिमायतनप्रतिश्रयारामोद्यानविनाशनाशतीव्रक्रोधमानमायालोभपापकर्मोपजीवनादि-लक्षणः। स एव सर्वोऽशुभस्य नाम्न आस्रवः।

आह – अथ शुभनामकर्मणः क आस्रव इति? उच्यते –

## तद्विपरीतं शुभस्य॥२३॥

**ऋजुयोगोऽविसंवादनं च तद्विपरीतम्॥१॥** कायवाङ्मनसां ऋजुत्वमविसंवादनं च तद्विपरीतमित्युच्यते। चशब्देन धार्मिकदर्शनसंभ्रमसद्भावोपनयनसंसरणभीरुताप्रमाद-वर्जनाऽसंभेदचरिततादयो यथोक्ताऽशुभविपरीता परिणामाः शुभनाम्न आस्रवाः प्रत्येतव्याः।

आह – किमेतावानेवाशुभनामास्रवविधिरुत्त कश्चिदस्ति प्रतिविशेषः इति? उच्यते – यदिदं तीर्थकरनामकर्मानन्तानुपमप्रभावमचिन्त्यविभूतिविशेषकारणं त्रैलोक्य-विजयकरं तस्यास्रवविधिविशेषोऽस्तीति। यद्येवमुच्यतां तस्यास्रव इति? अत इदमारभ्यते –

**दर्शनविशुद्धिर्विनयसम्पन्नता शीलव्रतेष्वनतिचारोऽभीक्ष्णज्ञानो-पयोगसंवेगौ शक्तितस्त्यागतपसी साधुसमाधिर्वैयावृत्त्यकरण-मर्हदाचार्यबहुश्रुतप्रवचनभक्तिरावश्यकापरिहाणिर्मार्गप्रभावना-प्रवचनवत्सलत्वमिति तीर्थकरत्वस्य॥२४॥**

**जिनोपदिष्टे निर्ग्रन्थे मोक्षवर्त्मनि रुचिः निःशङ्कितत्वाद्यष्टाङ्गा दर्शनविशुद्धिः॥१॥** जिनेन भगवताऽर्हता परमेष्ठिनोपदिष्टे निर्ग्रन्थलक्षणे मोक्षवर्त्मनि रुचिर्दर्शनविशुद्धिः। तस्या अष्टावङ्गानि – निःशङ्कितत्वम्, निःकाङ्क्षता, विचिकित्साविरहः, अमूढदृष्टिता, उपवृंहणम्, स्थितिकरणम्, वात्सल्यम्, प्रभावनं चेति। तत्रेहलोकपरलोकव्याधि-मरणासंयमारक्षणाकस्मिकसप्तविधभयविनिर्मुक्तताऽर्हदुपदिष्टे वा प्रवचने किमिदं स्याद्वा नवेति शङ्कानिरासो निःशङ्कितत्वम्। उभयलोकविषयोपभोगाकाङ्क्षानिवृत्तिः कुदृष्ट्यन्तराकाङ्क्षानिरासो वा निःकाङ्क्षता। शरीराद्यशुचिस्वभावमवगम्य शुचीति मिथ्यासंकल्पापनयोऽर्हत्प्रवचने वेदमयुक्तं घोरं कष्टं न चेदिदं सर्वमुपपन्न-मित्यशुभभावनाविरहः निर्विचिकित्सता। बहुविधेषु दुर्नयदर्शनवर्त्मसु तत्त्ववदाभासमानेषु युक्त्यभावं परीक्षाचक्षुषा व्यवसाय्य विरहितमोहता अमूढदृष्टिता। उत्तमक्षमादि-भावनयाऽऽत्मनो धर्मपरिवृद्धिकरणमुपवृंहणम्। कषायोदयादिषु धर्मपरिभ्रंशकारणेषू-स्थितेष्वात्मनो धर्माऽप्रच्यवनं परिपालनं स्थितिकरणम्। जिनप्रणीतधर्मामृते नित्यानुरागता वात्सल्यम्। सम्यग्दर्शनज्ञानचारित्ररत्नत्रयप्रभावेनाऽऽत्मनः प्रकाशनं प्रभावनम्।

**ज्ञानादिषु तद्वत्सु चादरः कषायनिवृत्तिर्वा विनयसंपन्नता॥२॥** सम्यग्ज्ञानादिषु मोक्षसाधनेषु तत्साधनेषु गुर्वादिषु च स्वयोग्यवृत्त्या सत्कार आदरः कषायनिवृत्तिर्वा विनयसम्पन्नता।

**चारित्रविकल्पेषु शीलव्रतेषु निरवद्या वृत्तिः शीलव्रतेष्वनतिचारः॥३॥** अहिंसादिषु व्रतेषु तत्परिपालनार्थेषु च क्रोधवर्जनादिषु शीलेषु निरवद्या वृत्तिः कायवाङ्मनसां शीलव्रतेष्वनतिचार इति कथ्यते।

**ज्ञानभावनायां नित्ययुक्तता ज्ञानोपयोगः॥४॥** मत्यादिविकल्पं ज्ञानं जीवादिपदार्थस्वतत्त्वविषयं प्रत्यक्षपरोक्षलक्षणमज्ञाननिवृत्त्यव्यवहितफलं हिताहितानुभय-प्राप्तिपरिहारोपेक्षाव्यवहितफलं यत्, तस्य भावनायां नित्ययुक्तता ज्ञानोपयोगः।

**संसारदुःखान्नित्यभीरुता संवेगः॥५॥** शारीरं मानसं च बहुविकल्पप्रिय-विप्रयोगाऽप्रियसंयोगेप्सिताऽलाभादिजनितं संसारदुःखं यदतिकष्टं ततो नित्यभीरुता संवेगः।

**परप्रीतिकरणातिसर्जनं त्यागः॥६॥** आहारो दत्तः पात्राय तस्मिन्नहनि तत्प्रीतिहेतुर्भवत्यभयदानमुपपादितमेकभवव्यसननोदनकरम्। सम्यग्ज्ञानदानं पुनोऽनेकभवशतसहस्रदुःखोत्तरणकारणम्। अत एतत्त्रिविधं यथाविधि प्रतिपद्यमानं त्यागव्यपदेशभाग्भवति।

**अनिगूहितवीर्यस्य मार्गाविरोधिकायक्लेशस्तपः॥७॥** शरीरमिदं दुःखकारणम-नित्यमशुचि, नास्य यथेष्टभोगविधिना परिपोषो युक्तोऽशुच्यपीदं गुणरत्नसंचयोपकारीति विचिन्त्य विनिवृत्तविषयसुखाभिष्वङ्गस्य स्वकार्यं प्रत्येतद्दद्भृतकमिव नियुञ्जानस्य यथाशक्ति मार्गाविरोधि कायक्लेशानुष्ठानं तप इति निश्चीयते।

**मुनिगणतपःसंधारणं समाधिः भाण्डागाराग्निप्रशमनवत्॥८॥** यथा भाण्डागारे दहने समुत्थिते तत्प्रशमनमनुष्ठीयते बहूपकारत्वात् तथाऽनेकव्रतशीलसमृद्धस्य मुनिगणस्य तपसः कुतश्चित् प्रत्यूहे समुत्थिते तत्संधारणं समाधिरिति समाख्यायते।

**गुणवद्दुःखोपनिपाते निरवद्येन विधिना तदपहरणं वैय्यावृत्त्यम् ॥९॥** गुणवतः साधुजनस्य दुःखे सन्निहिते निरवद्येन विधिना तदपहरणं बहूपकारं वैयावृत्त्यमिति व्याख्यायते।

**अर्हदाचार्येषु बहुश्रुतेषु प्रवचनो च भावविशुद्धियुक्तोऽनुरागो भक्तिः॥१०॥** अर्हदाचार्येषु केवलश्रुतज्ञानादिदिव्यनयनेषु परहितकरप्रवृत्तेषु स्वपरसमयविस्तरनिश्चयज्ञेषु च बहुश्रुतेषु प्रवचने च श्रुतदेवतासन्निधिगुणयोगदुरासदे मोक्षपदभवनारोहणसुर-चितसोपानभूते भावविशुद्धियुक्तोऽनुरागो भक्तिः त्रिविधा कल्प्यते।

**षण्णामावश्यकक्रियाणां यथाकालप्रर्वतनमावश्यकाऽपरिहाणिः॥११॥** षडावश्यक-क्रियाः – सामायिकं चतुर्विंशतिस्तवः वन्दना प्रतिक्रमणं प्रत्याख्यानं कायोत्सर्गश्चेति। तत्र सामायिकं सर्वसावद्ययोगनिवृत्तिलक्षणं चित्तस्यैकत्वेन ज्ञाने प्रणिधानम्। चतुर्विंशतिस्तवः तीर्थकरगुणानुकीर्तनम्। वन्दना त्रिशुद्धिः द्व्यासना चतुःशिरोऽवनतिः द्वादशावर्तना। अतीतदोषनिवर्तनं प्रतिक्रमणम्। अनागतदोषापोहनं प्रत्याख्यानम्। परिमितकालविषया शरीरे ममत्वनिवृत्तिः कायोत्सर्गः इत्येतासां षण्णामावश्यकक्रियाणां यथाकालप्रवर्तनमनौत्सुक्यमावश्यकाऽपरिहाणिरिति परिभाष्यते।

**ज्ञानतपोजिनपूजाविधिना धर्मप्रकाशनं मार्गप्रभावनम् ॥१२॥** ज्ञानरविप्रभया परसमयखद्योतोद्योततिरस्कारिण्या सत्तपसा महोपवासादिलक्षणेन सुरपतिविष्टरप्रकम्पना-हेतुना, जिनपूजया वा भव्यजनकमलखण्डप्रबोधनप्रभया सद्धर्मप्रकाशनं मार्गप्रभावनमिति संभाव्यते।

**वत्से धेनुवत्सधर्मणि स्नेहः प्रवचनवत्सलत्वम् ॥१३॥** यथा धेनुर्वत्सेऽ-कृत्रिमस्नेहमुत्पादयति यथा सधर्माणमवलोक्य तद्गतस्नेहार्द्रीकृतचित्तता प्रवचनवत्स-

लत्वमित्युच्यते। यः सधर्मणि स्नेहः स एव प्रवचनस्नेह इति। तान्येतानि षोडशकारणानि सम्यग्भाव्यमानानि व्यस्तानि समस्तानि च तीर्थकरनामकर्मास्रव-कारणानि प्रत्येतव्यानि।

आह – नामानन्तरनिर्देशभाजो गोत्रस्योपादाने किं निबन्धनमिति प्रतिविधीयते। तद्द्वैविध्ये सत्याद्यस्य तावत् –

## परात्मनिन्दाप्रशंसे सदसद्गुणच्छादनोद्भावने च नीचैर्गोत्रस्य॥२५॥

**दोषोद्भावनेच्छा निन्दा॥१॥** तथ्यस्य वाऽतथ्यस्य वा दोषस्योद्भावनं प्रतीच्छा मनःपरिणामोऽवक्षेपो निन्देत्युच्यते।

**गुणोद्भावनाभिप्रायः प्रशंसा॥२॥** सद्भूतस्याऽसद्भूतस्य वा गुणस्योद्भावनं प्रत्यभिप्रायः प्रशंसेत्युपदिश्यते। परश्चाऽऽत्मा च परात्मानौ, निन्दा च प्रशंसा च निन्दाप्रशंसे, परात्मनोर्निन्दाप्रशंसे परात्मनिंदाप्रशंसे यथासंख्यमभिसंबन्धः। परनिन्दाऽऽ-त्मप्रशंसेति यावत्।

**अनुद्भूतवृत्तिता छादनम्॥३॥** प्रतिबन्धकहेतुसन्निधाने सति अनुद्भूतवृत्तिताऽनाविर्भावः छादनमित्यवसीयते।

**प्रतिबन्धकाऽभावे प्रकाशितवृत्तितोद्भावनम्॥४॥** प्रतिबन्धकस्य हेतोरभावे प्रकाशितवृत्तितोद्भावनमिति व्यपदेशमर्हति।

संश्चाऽसंश्च सदसन्तौ, सदसन्तौ च तौ गुणौ च सदसद्गुणौ, छादनञ्चोद्भावनञ्च छादनोद्भावने, सदसद्गुणयोः छादनोद्भावने सदसद्गुणच्छादनोद्भावने। अत्रापि यथासंख्य-मभिसंबन्धः, सद्गुणच्छादनमसद्गुणोद्भावनमिति।

**गूयते तदिति गोत्रम् ॥५॥** गूयते शब्द्यते तदिति गोत्रम् औणादिकेन त्रटा निष्पत्तिः।

**नीचैरित्यधिकरणप्रधानः शब्दः॥६॥** नीचैरित्ययं शब्दोऽधिकरणप्रधानो द्रष्टव्यः, नीचैः स्थाने येनात्मा क्रियते तन्नीचैर्गोत्रम्, तस्यास्रवकारणान्येतानि परनिन्दादीनि। तत्प्रपञ्च उच्यते – जातिकुलबलरूपश्रुताज्ञैश्वर्यतपोमदपरावज्ञानोत्प्रहसनपरपरिवाद-शीलताधार्मिकजननिन्दात्मोत्कर्षाऽन्ययशोविलोपाऽसत्कीर्त्युत्पादनगुरुपरिभवतदुद्घट्टन-दोषख्यापनविहेडनस्थानावमानभर्त्सनगुणावसादनाञ्जलिस्तुत्यभिवादनाभ्युत्थानाऽकरण-तीर्थकराधिक्षेपादिः।

आह – उपपादितो नीचैर्गोत्रस्यास्रवः, इदानीमुच्चैर्गोत्रस्यास्रवविधिः क इति? अत्रोच्यते –

## तद्विपर्ययो नीचैर्वृत्त्यनुत्सेकौ चोत्तरस्य॥२६॥

**नीचैर्गोत्रास्रवप्रतिनिर्देशनार्थस्तच्छब्दः॥१॥** प्रत्यासत्तेस्तदित्यनेन नीचैर्गोत्रास्रवः प्रतिनिर्दिश्यते।

**विपर्ययोऽन्यथावृत्तिः॥२॥** अन्येन प्रकारेण वृत्तिर्विपर्यय इति व्यपदिश्यते। तस्य विपर्ययः तद्विपर्ययः। कः पुनरसावात्मनिन्दापरप्रशंसे सद्गुणोद्भावनमसद्गुणच्छादनञ्च।

**गुरुष्ववनतिनीचैर्वृत्तिः॥३॥** गुणोत्कृष्टेषु विनयेनावनतिर्नीचैर्वृत्तिरित्याख्यायते।

**अनहङ्कारताऽनुत्सेकः॥४॥** विज्ञानादिभिरुत्कृष्टस्यापि सतः तत्कृतमदविरहोऽन-हङ्कारताऽनुत्सेक इत्युच्यते। तान्येतान्युत्तरस्योच्चैर्गोत्रस्यास्रवकारणानि भवन्ति। प्रपञ्चस्तु विव्रियते – जातिकुलबलरूपवीर्यपरिज्ञानैश्वर्यतपोविशेषवतः आत्मोत्कर्षा-

ऽप्रणिधानं परावज्ञानौद्धत्यनिन्दाऽसूयोपहासपरपरिवादनिवृत्तिः विनिहतमानता धर्म्यजन-पूजाऽभ्युत्थानाञ्जलिप्रणतिवन्दनैदंयुगीनान्यपुरुषदुर्लभगुणस्याप्यनुत्सिक्तता। अहङ्कारा-ऽत्यये नीचैर्वृत्तिता भस्मावृतस्येव हुतभुजः स्वमाहात्म्याप्रकाशनं धर्मसाधनेषु परमसम्भ्रम इत्यादि।

आह – उक्तः सप्तविधकर्म प्रत्यास्रवविकल्पः। इदानीमष्टमस्य कर्मणोऽन्तरा-यस्यास्रवविधिः क इति? अत्रोच्यते-

## विघ्नकरणमन्तरायस्य॥२७॥

**दानादिविहननं विघ्नः॥१॥** दानादीन्युक्तानि ''दानलाभभोगोपभोगवीर्याणि च'' इत्यत्र। तेषां विहननं विघ्न इत्युच्यते।

**घञर्थे कविधानं॥२॥** ''स्थास्नापाव्यधिहनियुध्यर्थम्' इति कविधिः। विघ्नस्य कारणं विघ्नकरणमन्तरायस्यास्रव इति संक्षेपः। तद्विस्तरस्तु विव्रियते – ज्ञानप्रतिषेधसत्कारोपघातदानलाभभोगोपभोगवीर्यस्नानानुलेपनगन्धमाल्याच्छादनविभूष-णशयनासनभक्ष्यभोज्यपेयलेह्यपरिभोगविघ्नकरणविभवसमृद्धिविस्मयद्रव्यापरित्यागद्रव्या-संप्रयोगसमर्थनाप्रमादाऽवर्णवाददेवतानिवेद्यानिवेद्यग्रहणनिरवद्योपकरणपरित्यागपरवीर्याप-ह-रणधर्मव्यवच्छेदनकरणकुशलाचरणतपस्विगुरुचैत्यपूजाव्याघातप्रव्रजितकृपणदीनानाथव-स्त्रपात्रप्रतिश्रयप्रतिषेधक्रियापरनिरोधबन्धनगुह्याङ्गछेदनकर्णनासिकौष्ठकर्तनप्राणिवधादिः। अत्र चोद्यते – सूत्रेऽनुपात्तः सर्वास्रवप्रपञ्चः कथमेवं गन्तुं शक्यते इति? अत्रोच्यते –

**इतिकरणानुवृत्तेः सर्वत्रानुक्तसंग्रहः॥३॥** इति करणोऽनुवर्तते। क्व प्रकृतः? "क्षान्तिः शौचमिति सद्वेद्यस्य" इत्यतः, तेनानुक्तार्थसंग्रहः सर्वत्र वेदितव्यः। प्रकारार्थो हि इतिकरण इति।

**स्वोपात्तकर्मवशादात्मनो विकारः शौण्डातुरवत् ॥४॥** एवमुक्तेनास्रवविधिनोपात्तं कर्माष्टविधं ज्ञानावरणादिसंज्ञकं वक्ष्यमाणमूलोत्तरप्रकृतिभेदं यत्तन्निमित्तमात्मा संसार-विकारमनुपरतमनुभवति। यथा शौण्डः स्वरुचिविशेषान्मदमोहविभ्रमकरीं मदिरां पीत्वा तत्परिपाकवशादनेकविकारमास्कन्दति, यथा वाऽऽतुरोऽपथ्यभोजनकृतं वातादिविकार-मवाप्नोति।

**अनपदिष्टहेतुकत्वादास्रवाऽनियम इति चेन्न; स्वभावाभिव्यञ्जकत्वाच्छा-स्त्रस्य॥५॥** स्यान्मतम् – य उक्त आस्रवनियमो ज्ञानावरणादीनां तत्प्रदोषनिह्नवादिः, स नोपपद्यते, कुतः? अनपदिष्टहेतुकत्वात्। नात्र हेतुरपदिष्टः येनास्रवनियमं प्रतिपद्येमहि। यच्च नाम सहेतुकं तद्विदुषां ग्राह्यमिति तन्न; किं कारणम्? स्वभावाभिव्यञ्जकत्वात् शास्त्रस्य। यथा प्रदीपो घटादीनां स्वभावमभिव्यनक्ति तथा शास्त्रमपि सतामेवार्थानां प्रकाशकम्, तत्रायं परिणाम इदं वीर्यं द्रव्यावर्जनसमर्थ इति स्वभाव-व्याख्यानादुपालम्भाभावः।

**तत्सिद्धिरतिशयज्ञानदृष्टत्वात् ॥६॥** तस्य शास्त्रस्य सतामर्थानामभिव्यञ्जकत्वं दृष्टम्। कुतः? अतिशयज्ञानदृष्टत्वात्, भगवतामर्हतामतिशयवज्ज्ञानं युगपत्सर्वार्थाव-भासनसमर्थं प्रत्यक्षम्, तेन दृष्टं तद्दृष्टं यच्छास्त्रं तद् यथार्थोपदेशकमतस्तत्प्रामाण्यात् ज्ञानावरणाद्यास्रवनियमप्रसिद्धिः।

**सर्वाविसंवादाच्चोपालम्भनिवृत्तिः॥७॥** नात्र प्रवादिनो विसंवदन्ते – पृथिव्यादीनां द्रव्याणां कठिनद्रवोष्णचलनादिस्वभावानां रूपादीनां च गुणानां चाक्षुषत्वादिप्रतिनियत-

स्वभावानामुत्क्षेपणादीनां च संयोगविभागनिरपेक्षकारणत्वादिस्वभावानामभ्युपगमात्। तथा सत्त्वरजस्तमसां गुणानां प्रकाशप्रवृत्तिनियमस्वभावानामभ्युपेतत्वात्। तथा- विद्यादीनां संस्कारादिप्रतिनियतकारणस्वभावानामिष्टत्वात् ततो नायमुपालम्भः आस्रवनियमाभाव इति।

**तत्प्रदोषादीनां सर्वास्रवत्वान्नियमाभाव इति चेन्न; अनुभागविशेष-नियमोपपत्तेः॥८॥** स्यादेतत् – ये तत्प्रदोषनिह्नवादयः ज्ञानावरणादीनामास्रवाः प्रति-नियता उक्तास्ते सर्वेषां कर्मणामास्रवा भवन्ति, ज्ञानावरणे वध्यमाने युगपदितरेषामपि बन्ध इष्यते आगमे, तस्मादास्रवनियमाभाव इति; तन्न; किं कारणम्? अनुभागविशेषनियमोपपत्तेः। यद्यपि तत्प्रदोषादिभिः ज्ञानावरणादीनां सर्वासां प्रकृतीनां प्रदेशादिबन्धनियमो नास्ति, तथाप्यनुभागविशेषनियमहेतुत्वेन तत्प्रदोषनिह्नवादयः प्रविभज्यन्ते।

**इति तत्त्वार्थवार्तिके व्याख्यानालङ्कारे षष्ठोऽध्यायः समाप्तः॥६॥**

## अथ सप्तमोऽध्यायः

आस्रवपदार्थव्याख्यां प्रतिज्ञायोक्तोऽष्टोत्तरशतभेदसंख्यो बहुविचारः। स द्वेधा पुण्यपापलक्षणसाम्परायिकनिमित्तत्वात्। तत्र पुण्यास्रवो व्याख्येयः प्रधानत्वात् तत्पूर्वकत्वात् मोक्षस्य। यद्येवमुच्यतां कैस्ते क्रियाविशेषाः प्रारभ्यमाणास्तस्यास्रवा भवन्तीति? अत्रोच्यते – व्रतिभिः। तत्रानिर्धारितेयत्ताविशेषलक्षणत्वात् व्रतस्य तत्प्रसिद्ध्यर्थमिदमुच्यते –

अथवा, "कायवाङ्मनस्कर्म योगः, स आस्रवः, शुभः पुण्यस्य" इति सामान्येनोक्तः, तद्विशेषप्रतिपत्त्यर्थमिदमुच्यते –

अथवा, उक्तमेतत् सद्वेद्यास्रवविधाने – "भूतव्रत्यनुकम्पा" इति; तत्रेदं न ज्ञायते किं व्रतम्, को व्रतीति? तन्निर्धारणार्थमिदमुच्यते –

### हिंसाऽनृतस्तेयाऽब्रह्मपरिग्रहेभ्यो विरतिर्व्रतम् ॥१॥

**हिंसादयो निर्देक्ष्यमाणलक्षणाः॥१॥** "प्रमत्तयोगात् प्राणव्यपरोपणं हिंसा (७।१३) इत्येवमादिभिः सूत्रैः हिंसादीनां लक्षणं निर्देक्ष्यते।

**विरमणं विरतिः॥२॥** चारित्रमोहोपशमक्षयक्षयोपशमनिमित्तौपशमिकादिचारित्राविर्भावात् विरमणं विरतिः।

**व्रतमभिसन्धिकृतो नियमः॥३॥** बुद्धिपूर्वकपरिणामोऽभिसन्धिः; इदमेवेत्थमेव वा कर्तव्यमित्यन्यनिवृत्तिः नियमः; अभिसन्धिना कृतः अभिसन्धिकृतः सर्वत्र व्रतव्यपदेशभाग् भवति।

**हिंसानृतस्तेयाब्रह्मपरिग्रहेभ्य इत्यपादाननिर्देशः॥४॥**

हिंसानृतस्तेयाब्रह्मपरिग्रहेभ्य इत्यपादाननिर्देशो दृष्टव्यः।

**ध्रुवत्वाभावात्तदनुपपत्तिरिति चेन्न; बुद्ध्यपाये ध्रुवत्वविवक्षोपपत्तेः॥५॥** स्यान्मतं नात्राऽपादानत्वमुपपद्यते। कुतः? ध्रुवत्वाभावात्। ध्रुवत्वेन हि प्रसिद्धोऽर्थोऽपादानसंज्ञो भवति यथा ग्रामादागच्छति इति, न तथा हिंसादयः परिणामा ध्रुवाः क्षणिकत्वात्, तदपायेऽपायाऽप्रतीतेः। अथ हिंसादिपरिणत आत्मैव हिंसादिव्यपदेशभागिति द्रव्यार्थादेशात् ध्रुवत्वं कल्प्यते। एवमपि ततो विरतिर्नोपपद्यते नित्यत्वात्, तस्मादपादानत्वमयुक्तमिति; तन्न; किं कारणम्? बुद्ध्यपाये ध्रुवत्वविक्षोपपत्तेः; यथा धर्माद्विरमतीत्यत्र य एष मनुष्यः सम्भिन्नबुद्धिः स पश्यति - 'दुष्करो धर्मः फलं चास्य श्रद्धामात्रगम्यम्' इति स्वबुद्ध्या संप्राप्य निवर्तते। एवमिहापि य एष मनुष्यः प्रेक्षापूर्वकारी स पश्यति य एते हिंसादयः परिणामाः पापहेतवः पापकर्मणि च प्रवर्तमानमिहैव राजानो दण्डयन्ति परत्र च बहुविधं दुःखमवाप्नोतीति स्वबुद्ध्या संप्राप्य निवर्तते। ततो बुद्ध्या ध्रुवत्वविवक्षोपपत्तेरपादानत्वं युक्तम्।

**अहिंसायाः प्रधानत्वादादौ तद्वचनमितरेषां तत्परिपालनार्थत्वात्॥६॥** अहिंसा सर्वेषु व्रतेषु प्रधानम्तस्तद्वचनमादौ क्रियते। कुतः पुनः प्राधान्यम्? इतरेषां तत्परिपालनार्थत्वात्। इतराणि हि सत्यादीनि व्रतानि शस्यस्य वृतिपरिक्षेपवद- हिंसापरिपालनार्थानि।

**विरतिशब्दः प्रत्येकं परिसमाप्यते॥७॥** हिंसाया विरतिः, अनृताद्विरतिः, स्तेयाद्विरतिः, अब्रह्मणो विरतिः, परिग्रहाद्विरतिरिति। यद्येवम् –

**विषयभेदाद्विरतिभेदे बहुत्वप्रसङ्गः ॥८॥** यथा गुडतिलौदनादीनां पक्तव्यानां भेदात् पाको भिद्यते – द्वौ पाकौ, त्रयः पाका इति। एवं वक्तव्यहिंसादिभेदात्त्यागस्यापि भेदोपपत्तेः विरतेर्बहुत्वं प्राप्नोतीति?

**न वा; तद्विषयविरमणसामान्योपादानात् ॥९॥** न वैष दोषः। किं कारणम्? तद्विषयविरमणसामान्योपादानात्। नात्र विषयभेदाद्भेदो विवक्षितः। यथा गुडतिलौदनादीनां पाक इति सामान्ये विवक्षिते एकवचनं तथा विरमणसामान्यस्य विवक्षितत्वादेकवचनं न्याय्यम्। तत एव सर्वसावद्यनिवृत्तिलक्षणसामायिकापेक्षयैकं व्रतम्, भेदपरतन्त्रछेदो-पस्थापनापेक्षया पञ्चविधं व्रतम्। अत्र कश्चिदाह –

**हिंसादिभ्यो निवृत्तिवचनमनर्थकं संवरेऽन्तर्भावात् ॥१०॥** हिंसादिभ्यो निवृत्तिर्व्रत मित्यास्रवप्रकरणे विधानमिदमनर्थकम्; कुतः? संवरेऽन्तर्भावात्।

**प्रतिज्ञामात्रमिति चेन्न; धर्माभ्यन्तरत्वात् ॥११॥** स्यान्मतं प्रतिज्ञामात्रमेतत् - संवरेऽन्तर्भाव इति; तन्न; किं कारणम्? धर्माभ्यन्तरत्वात्। दशविधो हि धर्मो वक्ष्यते, तत्र संयमे भावकायविनयेर्यापथभैक्ष्यशयनासनप्रतिष्ठापनवाक्याष्टविधविशुद्धिलक्षणेऽ-हिंसादीनामन्तर्भावः।

**सत्यादिषु च तत्प्रपञ्चार्थ उपन्यास इति चेन्न; तत्रैव करणात् ॥१२॥** स्यादेतत् - तस्य संयमस्यायं प्रपञ्चो यथा स्यादित्यहिंसादीनामुपन्यास इति; तन्न; किं कारणम्? तत्रैव करणात्। यदि तस्यैवायं प्रपञ्चः तत्रैव क्रियेत प्रकरणोत्कर्षकरणे प्रयोजनाभावात्।

**न संवरो व्रतानि परिस्पन्ददर्शनात् ॥१३॥** व्रतानि संवरव्यपदेशं नार्हन्ति। कुतः? परिस्पन्ददर्शनात्। परिस्पन्दो हि दृश्यतेऽनृताऽदत्तादानपरित्यागे सत्यवचन दत्तादानक्रियाप्रतीतेः।

**गुप्त्यादिसंवरपरिकर्मत्वाच्च॥१४॥** गुप्त्यादिलक्षणः संवरो वक्ष्यते, तस्येदं परिकर्म व्रतानि, कृतव्रतपरिकर्मा हि साधुः सुखेन संवरं करोतीति, ततश्च पृथक्त्वमवसेयम्।

**रात्रिभोजनविरत्युपसंख्यानमिति चेन्न; भावनान्तर्भावात्॥१५॥** स्यान्मतमिह रात्रिभोजनविरत्युपसंख्यानं कर्त्तव्यं तदपि षष्ठमणुव्रतमिति, तन्न; किं कारणम्? भावनान्तर्भावात्। भावनासु ह्यन्तर्भवति रात्रिभोजनविरमणम्।

**अनिर्देशादिति चेन्न; आलोकितपानभोजनवचनात्॥१६॥** अथ मतमेतत् भावनासु निर्देशाभावादयुक्तमिति; तन्न; किं कारणम्? आलोकितपानभोजनवचनात्। वक्ष्यते हि अहिंसाव्रतपरिपालनायाऽऽलोकितपानभोजनभावना कार्या इति।

**प्रदीपादिसंभवे सति रात्रावपि तत्प्रसङ्ग इति चेन्न; अनेकारम्भदोषात्॥१७॥** स्यान्मतं यद्यालोकनार्थं दिवाभोजनम्, प्रदीपचन्द्रादिप्रकाशाभिव्यक्तं रात्रौ भोजनं कार्यमिति; तन्न; किं कारणम्? अनेकारम्भदोषात्। अग्न्यादिसमारम्भकरणकारण-लक्षणो हि दोषः स्यात्।

**परकृतप्रदीपादिसंभवे तदभाव इति चेन्न; चङ्क्रमणाद्यसंभवात्॥१८॥** स्यादेतत् - परकृतप्रदीपादिसंभवे नारम्भदोषः इति; तन्न; किं कारणम्? चङ्क्रमणाद्यसंभवात्। 'ज्ञानादित्यस्वेन्द्रियप्रकाशपरीक्षितमार्गेण युगमात्रपूर्वापेक्षी देशकाले पर्यट्य यतिः भिक्षां शुद्धामुपाददीत' इत्याचारोपदेशः, न चायं विधिः रात्रौ भवतीति चङ्क्रमणाद्यसंभवः।

**दिवानीतस्य रात्रौ भोजनप्रसङ्गः इति चेन्न; उक्तोत्तरत्वात्॥१९॥** स्यान्मतं दिवा ग्रामं पर्यट्य केनचिद्भाजने भोजनाद्यानीय रात्रावुपयोगः प्रसक्त इति; तन्न; किं कारणम्? उक्तोत्तरत्वात्। उक्तोत्तरमेतत् प्रदीपादिसमारम्भप्रसङ्ग इति। नेदं संयमसाधनमानीय भोक्तव्यमिति। नापि निस्सङ्गस्य पाणिपात्रपुटाहारिणः आनयनं

संभवति। भाजनान्तरसंग्रहेऽनेकावद्यदर्शनादतिदीनचरितप्रसङ्गादचिरादेव निवृत्तिपरिणामासंभवाच्च। भाजनेनानीतस्य परीक्ष्य भोजनं संभवतीति चेन्न; योनिप्राभृतज्ञस्य संयोगविभागगुणदोषविचारस्य तदानीमेवोपपत्तेरानीतस्य पुनर्दोषदर्शनात् विसर्जनेऽनेकदोषोपपत्तेश्च।

**स्फुटार्थाभिव्यक्तेश्च दिवाभोजनं युक्तम् ॥२०॥** यथा रविप्रकाशस्य स्फुटार्थाभिव्य-ञ्जकत्वात् भूमिदेशदातृजनचङ्क्रमणाद्यन्नपानादिपतितमितरच्च स्पष्टमुपलभ्यते न तथा चन्द्रादिप्रकाशानामस्फुटार्थाभिव्यञ्जकत्वात् स्फुटा भूभ्याद्युपलब्धिरस्तीति दिवाभोजनमेव युक्तम् ।

तदेतदविशेषचोदितं पञ्चतयविषयव्रताभिधानं विरत्याश्रयविवक्षाद्व्यसंभवाद-भिधेयात्मभूतधर्मोपादानादभिधानानां व्यक्तिव्यपदेशवद् द्वैविध्यमनुभवतीत्याह –

## देशसर्वतोऽणुमहती ॥२॥

**कुतश्चिद्दिश्यते इति देशः ॥१॥** कुतश्चिदवयवात् दिश्यत इति देशः प्रदेश; एकदेश इत्यर्थः।

**सरत्यशेषानवयवानिति सर्वः ॥२॥** सरति गच्छत्यशेषानवयवानिति सर्व इत्युच्यते। देशश्च सर्वश्च देशसर्वौ, देशसर्वाभ्यां देशसर्वतः। विरतिरित्यनुवर्तते। हिंसादेर्देशतो विरतिरणुव्रतम्, सर्वतो विरतिर्महाव्रतम् । अणु च महच्च अणुमहती इति व्रतापेक्षया नपुंसकलिङ्गनिर्देशः।

आह – 'न हिनस्मि नानृतं वदामि नादत्तमाददे नाङ्गनां स्पृशामि न परिग्रहमुपाददे' इति। एषोऽभिसन्धिः, योऽत्राऽसमर्थभावनापरः कथं यथाप्रतिज्ञाता-भिघातभाक् स्यादिति? अत्रोच्यते - यस्मादवहितेनेमा भावयितव्याः परमार्थदित्सया –

## तत्स्थैर्यार्थं भावनाः पञ्च पञ्च॥३॥

**भावनाशब्दः कर्मसाधनः॥१॥** अयं भावनाशब्दः कर्मसाधनो द्रष्टव्यः। वीर्यान्तराय-क्षयोपशमचारित्रमोहोपशमक्षयोपशमाङ्गोपाङ्गनामलाभापेक्षेणाऽऽत्मना भाव्यन्ते ता इति भावनाः।

**पञ्च पञ्चेत्यत्र वीप्सायां शस् प्रसङ्गः इति चेन्न; कारकाधिकारात्॥२॥** स्यादेतत् – पञ्च पञ्चेत्यस्मिन् निर्देशे वीप्साविवक्षिते वीप्सायां शसा भवितव्यं पञ्चश इति, तथा सति लघुश्च निर्देशो भवतीति; तन्न; किं कारणम्? कारकाधिकारात्। कारकादिति तत्र वर्तते, न चाऽत्र कारकत्वमस्तीति शसा न भवितव्यम्।

**क्रियाध्याहारात् कारकत्वमिति चेन्न; विकल्पाधिकारात्॥३॥** स्यादेतत् - 'पञ्च पञ्च भावयेत्' इत्येवमादि क्रियापदाध्याहारे कारकत्वोपपत्तौ शसा भवितव्यमिति; तन्न; किं कारणम्? विकल्पाधिकारात् वेत्यनुवर्तते तेनात्र शस् न भवति। ननु लघुत्वात् शसा निर्देशः कर्तव्यः; प्रतिपत्तेः गौरवं मा भूदिति द्वित्वमेव कृतम्, वाक्याध्याहारे हि क्रियमाणे प्रतिपत्तेर्गौरवं स्यादिति। तस्य पञ्चविधस्य व्रतस्य स्थैर्यार्थमेकैकस्य पञ्च पञ्च भावना वेदितव्याः। यद्येवमाद्यस्याहिंसाव्रतस्य का इति? उच्यते –

## वाङ्मनोगुप्तीर्याऽऽदाननिक्षेपणसमित्यालोकितपानभोजनानि पञ्च॥४॥

वाग्गुप्तिर्मनोगुप्तिरीर्यासमितिरादाननिक्षेपणसमितिरालोकितपानभोजनमित्येताः पञ्चाहिंसाव्रतस्य भावनाः।

अथ द्वितीयस्य व्रतस्य काः?

## क्रोधलोभभीरुत्वहास्यप्रत्याख्यानान्यनुवीचिभाषणञ्च पञ्च॥५॥

क्रोधप्रत्याख्यानं लोभप्रत्याख्यानं भीरुत्वप्रत्याख्यानं हास्यप्रत्याख्यानमनुवीचिभाषणं चेत्येताः पञ्च भावनाः सत्यव्रतस्य ज्ञेयाः। अनुवीचिभाषणमनुलोमभाषणमित्यर्थः। नन्वप्रशस्तक्रियस्यापि वचसोऽनुवीचिभाषणमापन्नम्; नैष दोषः; पुण्यास्रवस्य प्रकृतत्वादप्रशस्तक्रियानुवीचिभाषणस्यानधिकारः। विचार्य भाषणमनुवीचिभाषणमिति वा।

इदानीं तृतीयस्य व्रतस्य भावना वक्तव्याः –

**शून्यागारविमोचितावासपरोपरोधाकरणभैक्ष्यशुद्धिसधर्माऽविसंवादाः पञ्च॥६॥**

शून्यागारेषु गिरिगुहातरुकोटरादिष्वावासः। परकीयेषु च मोचितेष्वावासः। परेषामुपरोधाकरणम्। आचारशास्त्रमार्गेण भैक्ष्यशुद्धिः। ममेदं तवेदमिति सधर्माभिरविसंवाद इत्येताः पञ्चादत्तादानविरमणव्रतस्य भावनाः प्रत्येतव्याः।

अथेदानीं ब्रह्मचर्यस्य भावना वक्तव्याः –

**स्त्रीरागकथाश्रवणतन्मनोहराङ्गनिरीक्षणपूर्वरतानुस्मरणवृष्येष्टरसस्वशरीरसंस्कारत्यागाः पञ्च॥७॥**

स्त्रीरागकथाश्रवणवर्जनं तन्मनोहराङ्गनिरीक्षणविरहः पूर्वरतानुस्मरणपरित्यागः वृष्येष्टरसानुभवननिरासः स्वशरीरसंस्कारत्यागश्चेति चतुर्थव्रतस्य भावनाः पञ्च विज्ञेयाः।

अतः परं पञ्चमव्रतस्य भावना निर्देष्टव्याः –

## मनोज्ञाऽमनोज्ञेन्द्रियविषयरागद्वेषवर्जनानि पञ्च॥८॥

पञ्चानामिन्द्रियाणां स्पर्शादीनामिष्टानिष्टेषु विषयेषूपनिपतितेषु स्पर्शादिषु रागद्वेष-वर्जनानि पञ्चाऽऽद्याऽऽकिञ्चन्यव्रतस्य भावनाः प्रत्येतव्याः।

किञ्चान्यत्, यथाऽमीषां व्रतानां द्रढिमार्थं भावनाः प्रतीयन्ते विपश्चिद्भिरिति भावनोपदेशः, तथा तदर्थं तद्विरोधिष्वपि, इत्याह –

## हिंसादिष्विहामुत्रापायावद्यदर्शनम् ॥९॥

**अभ्युदयनिःश्रेयसार्थानां नाशकोऽपायो भयं वा॥१॥** अभ्युदयनिःश्रेयसार्थानां क्रियासाधनानां नाशकोऽनर्थोऽपाय इत्युच्यते। अथवैहलौकिकादिसप्तविधं भयमपाय इति कथ्यते।

**अवद्यं गर्ह्यम्॥२॥** गर्ह्यमवद्यमिति यावत्। अपायश्चावद्यं च अपायावद्ये। अपायावद्ययोर्दर्शनं अपायावद्यदर्शनं भावयितव्यम्। क्व? इहाऽमुत्र च। केषु? हिंसादिषु। कथमिति चेत्? उच्यते – हिंसायां तावत् हिंस्रो हि नित्योद्वेजनीयः सततानुबद्धवैरश्च, इहैव च वधबन्धपरिक्लेशादीन् प्रतिलभते, प्रेत्य चाशुभां गतिम्, गर्हितश्च भवति इति हिंसाया व्युपरमः श्रेयान्। तथाऽनृतवादी श्रद्धेयो न भवति, इहैव च जिह्वाच्छेदनादीन् प्रतिलभते, मिथ्याभ्याख्यानदुःखितेभ्यश्च बद्धवैरेभ्यो बहूनि व्यसनान्यवाप्नोति, प्रेत्य चाशुभां गतिम्, गर्हितश्च भवतीत्यनृतवचनात् व्युपरमः श्रेयान्। तथा स्तेनः परद्रव्याहरणासक्तमतिः सर्वस्योद्वेजनीयो भवति, इहैव चाऽभिघातवधबन्धहस्तपादकर्ण-नासोत्तरौष्ठच्छेदनभेदनसर्वस्वहरणादीन् प्रतिलभते प्रेत्य चाशुभां गतिम्, गर्हितश्च भवतीति स्तेयात् व्युपरमः श्रेयान्। तथाऽब्रह्मचारी मदविभ्रमोद्ग्रथितचित्तो वनगज इव वनितावञ्चितो विवशो वधबन्धपरिक्लेशादीननुभवति, मोहाभिभूतत्वाच्च कार्याऽ-

कार्यानभिज्ञो न किञ्चिदविकुशलमाचरति, पराङ्गनालिङ्गनासङ्गकृतरतिश्चेहैव वैरानुबन्धिनो लिङ्गच्छेदनवधबन्धसर्वस्वहरणादीनपायान् प्राप्नोति प्रेत्य वाऽशुभां गतिमश्नुते, गर्हितश्च भवतीत्यतो विरतिरात्महिता। तथा परिग्रहवान् शकुनिरिव गृहीतमांसखण्डोऽन्येषां तदर्थिनां पतत्त्रिणामिहैव तस्करादीनामभिभवनीयो भवति, तदर्जनरक्षणप्रक्षयकृतांश्च दोषान् बहूनवाप्नोति, न चास्य तृप्तिर्भवतीन्धनैरिवाग्नेः, लोभाभिभूतत्वाच्च कार्याकार्यानपेक्षो भवति, प्रेत्य चाऽशुभां गतिमास्कन्दति, लुब्धोऽयमिति गर्हितश्च भवतीति तद्विरमणं श्रेयः। एवं हिंसादिष्वपायावद्यदर्शनं भावनीयम्।

हिंसादिषु भावनान्तरप्रतिपादनार्थमिदमुच्यते –

## दुःखमेव वा॥१०॥

अत्र चोद्यते – दुःखमसद्वेद्योदयकृत परितापः, हिंसादयः क्रियाविशेषाः, कथं दुःखमेव हिंसादयः इति? अत्रोच्यते –

**दुःखमेवेति कारणे कार्योपचारोऽन्नप्राणवत्॥१॥** यथा 'अन्नं वै प्राणाः' इति प्राणकारणेऽन्ने प्राणोपचारस्तथा दुःखकारणेषु हिंसादिषु दुःखमेवेत्युपचारो वेदितव्यः।

**कारणकारणे वा धनप्राणवत्॥२॥** अथवा, यथा द्रविणकारणमन्नपानमन्नपानकारणाः प्राणाः इति प्राणकारणे द्रविणे प्राणोपचारः। उक्तं च –

**"यदेतद् द्रविणं नाम प्राणा ह्येते बहिश्चराः।**
**स तस्य हरते प्राणान् यो यस्य हरते धनम्॥इति**

तथा हिंसादयोऽसद्वेद्यकर्मकारणमसद्वेद्यकर्म दुःखकारणमिति दुःखकारणकारणेषु हिंसादिषु दुःखमेवेत्युपचारः।

**तत्परत्र भावनमात्मसाक्षिकम् ॥३॥** तदेतद्दुखमेवेति भावनं परत्रात्मसाक्षिकम-वगन्तव्यम्। तद्यथा – ममाऽप्रियं यथा वधपरिपीडनं तथा सर्वसत्त्वानाम्। यथा मम मिथ्याख्यानकटुकपरुषादीनि वचांसि श्रृण्वतोऽतितीव्रदुःखमभूतपूर्वमुत्पद्यते एवं सर्वजीवानाम्। यथा च ममेष्टद्रव्यवियोगे व्यसनमभूतपूर्वमुपजायते एवं सर्वभूतानाम्। यथा च मम कान्ताजनपरिभवे परकृते सति मानसी पीडाऽतितीव्रा जायते तथेतरेषाम्। यथा च मम परिग्रहेष्वप्राप्तेषु प्राप्तेषु विनष्टेषु काङ्क्षारक्षाशोकोद्भवं दुःखं तथा सर्वप्राणिनामिति हिंसादिभ्यो व्युपरमः परमहितः।

**स्पर्शकृतं सुखमिति चेन्न; वेदनाप्रतीकारत्वात् ॥४॥** स्यादेतत्, न सर्वं दुःखमेव। किं तर्हि? स्पर्शकृतं सुखमप्यस्ति, वराङ्गनामृदुसुभगगात्रसंश्लेषणादतिसुखमुपजायत इति; तन्न; किं कारणम्? वेदनाप्रतीकारत्वात्। यथा त्वङ्मांसरुधिरकलुषभावोद्गीर्णया कण्ड्वा बाध्यमानः नखमुखशकलशर्करादिभिः छिन्नगात्रो रुधिरार्द्रोऽनुपरतकण्डूयो दुःखमपि तत्सुखमिति मन्यते, तथा मैथुनोपसेवी मोहादसुखमपि सुखमिति मन्यते। दुःखयोनित्वाच्च दुःखमेवेति भावनीयम्।

यथैते क्रियाविशेषाः तात्पर्येण भाव्यमाना व्रतपूर्णतां जनयन्ति तथाऽमूनि तादर्थ्यादैहिकप्रयोजनविनिवृत्तौत्सुक्येनावहितचेतसाऽजस्रं भाव्यमानानि व्रतसम्पदमा-पादयन्तीत्याह –

## मैत्रीप्रमोदकारुण्यमाध्यस्थ्यानि च सत्त्वगुणाधिकक्लिश्य-मानाविनेयेषु ॥११॥

**परेषां दुःखानुत्पत्त्यभिलाषो मैत्री ॥१॥** स्वकायवाङ्मनोभिः कृतकारितानुमतविशेषणैः परेषां दुःखानुत्पत्तावभिलाषः मित्रस्य भावः कर्म वा मैत्री।

**वदनप्रसादादिभिरभिव्यज्यमानान्तर्भक्तिरागः प्रमोदः॥२॥** वदनप्रसादेन नयन-प्रह्लादनेन रोमाञ्चोद्भवेन स्तुत्यभीक्ष्णसंज्ञासंकीर्तनादिभिश्चाऽभिव्यज्यमानाऽन्तर्भक्तिरागः प्रकर्षेण मोदः प्रमोद इत्युच्यते।

**दीनानुग्रहभावः कारुण्यम्॥३॥** शारीरमानसदुःखाभ्यर्दितानां दीनानां प्राणिनाम-नुग्रहात्मकः परिणामः करुणस्य भावः कर्म वा कारुण्यमिति कथ्यते।

**रागद्वेषपूर्वकपक्षपाताऽभावो माध्यस्थ्यम्॥४॥** रागात् द्वेषाच्च कस्यचित् पक्षे पतनं पक्षपातः तदभावात् मध्ये तिष्ठतीति मध्यस्थ; मध्यस्थस्य भावः कर्म वा माध्यस्थ्यम् ।

**अनादिकर्मबन्धवशात् सीदन्तीति सत्त्वाः॥५॥** अनादिनाऽष्टविधकर्मबन्धसन्तानेन तीव्रदुःखयोनिषु चतसृषु गतिषु सीदन्तीति सत्त्वाः।

**सम्यग्ज्ञानादिभिः प्रकृष्टा गुणाधिकाः॥६॥** सम्यग्ज्ञानदर्शनादयो गुणास्तैः प्रकृष्टा गुणाधिका इति विज्ञायन्ते।

**असद्वेद्योदयापादितक्लेशाः क्लिश्यमानाः॥७॥** असद्वेद्योदयापादितशारीरमानसदुःख-सन्तापात् क्लिश्यन्त इति क्लिश्यमानाः।

**तत्त्वार्थश्रवणग्रहणाभ्यासम्पादितगुणा अविनेयाः॥८॥** तत्त्वार्थोपदेशश्रवणग्रहणाभ्यां विनीयन्ते पात्रीक्रियन्ते इति विनेया; न विनेया अविनेयाः। एतेषु सत्त्वादिषु मैत्र्यादीनि यथाक्रमं भावयितव्यानि। तद्यथा, 'क्षमयामि सर्वजीवान् क्षाम्यामि सर्वजीवेभ्य; प्रीतिर्मे सर्वसत्त्वैः, वैरं मे न केनचित्' इति मैत्री सर्वसत्त्वेषु भावयितव्या। सम्यग्ज्ञानचारित्राधिकेषु वन्दनास्तुतिवैय्यावृत्त्यकरणादिभिर्प्रमोदो भावनीय। मोहाभिभूतेषु

मतिश्रुताज्ञानविभङ्गपरिगतेषु विषयतृष्णाग्निना दह्यमानमानसेषु हिताहितविपरीतप्रवृत्तिषु विविधदुःखाभिभूतेषु दीनकृपणाऽनाथबालवृद्धेषु क्लिश्यमानेषु कारुण्यं भाव्यम्। अविनेयेषु ग्रहणधारणविज्ञानोहापोहवियुक्तेषु महामोहाभिभूतेषु दुष्टव्युद्ग्राहितेषु च माध्यस्थ्यं भावनीयम्। न हि तत्र वक्तुर्हितोपदेशस्य फलवत्त्वं भवतीत्येवं भावयतः परिपूर्णान्यहिंसादीनि व्रतानि भवन्ति।

किमेतावानेवाभिनवाऽकुशलकर्मादाननिवृत्तिपरेण महाव्रतधारिणा क्रियाकलापः प्रणिधातव्यः? नेत्याह –

## जगत्कायस्वभावौ वा संवेगवैराग्यार्थम् ॥१२॥

**जगत्कायशब्दावुक्तार्थौ॥१॥** जगच्छब्दः कायशब्दश्चोक्तार्थौ द्रष्टव्यौ।

**स्वेनात्मना भवनं स्वभावः॥२॥** स्वेनात्मनाऽसाधारणेन धर्मेण भवनं स्वभाव इत्युच्यते। जगच्च कायश्च जगत्कायौ, जगत्काययोः स्वभावौ जगत्कायस्वभावौ।

**संसाराद् भीरुता संवेगः॥३॥** संसाराद् विविधवेदनाकराद् भीरुता संवेजनं संवेग इत्युच्यते।

**रागकारणाभावात् विषयेभ्यो विरञ्जनं विरागः॥४॥** चारित्रमोहोदयाभावे तस्योपशमात् क्षयात् क्षयोपशमाद्वा शब्दादिभ्यो विरञ्जनं विराग इति व्यवसीयते। विरागस्य भावः कर्म वा वैराग्यम्। संवेगश्च वैराग्यं च संवेगवैराग्ये, संवेगवैराग्याभ्यां संवेगवैराग्यार्थं जगत्कायस्वभावौ भावयितव्यौ। तद्यथा – जगत्स्वभावस्तावत् आदिमदनादिमत्परिणामद्रव्यसमुदायरूपः तालवृक्षसंस्थानोऽनादिनिधनः। अत्र जीवाः चतसृषु गतिषु नानाविधं दुःखं भोजं भोजं परिभ्रमन्ति न चात्र किञ्चिन्नियतमस्ति। जलबुद्बुदोपमं जीवितम्, विद्युन्मेघादिविकारचपला भोगसंपदः इत्येवमादिः।

कायस्वभावश्चानित्यता दुःखहेतुत्वं निःसारताऽशुचित्वमित्येवमादिः। एवं भावयतः संवेगः संजायते। तत आरम्भपरिग्रहदोषदर्शनाद्विरतिः धर्मे बहुमानो धार्मिकेषु च धर्मश्रवणे धार्मिकदर्शने च मनसः प्रसादः। उत्तरोत्तरगुणप्रतिपत्तौ च श्रद्धेति वैराग्यं च भवति शरीरभोगोपभोगसंसारनिर्वेदलक्षणम्। एवं भावनोपेतः सम्यग्व्रतानि परिपालयति।

ता एताः सर्वा व्रतभावनाः सर्वेषु पदार्थेषु सर्वथा नित्येषु सत्सु विक्रियाभावात् नोपपद्यन्ते। विक्रियाभ्युपगमे च नित्यताप्रतिज्ञाहानिः। सर्वथैवाऽनित्येषु चाऽनेकक्षणवृत्त्येकवस्त्वभावादनेकार्थविषयैकविज्ञानाभावाच्च स्मरणानुपपत्तेर्भावनाभावोऽनेकान्तवादिनः पुनः द्रव्यार्थिकनयादेशान्नित्यतामवलम्बमानस्योभयनिमित्तवशादुत्पत्ति-निरोधौ प्रत्याभिमुख्यमादधानस्य स्मरणोपपत्तेः विक्रियोपपत्तेश्च भावनासिद्धिः।

अत्राह – उक्तं भवता हिंसादिनिवृत्तिर्व्रतमिति। तत्र न जानीमः के हिंसादयः क्रियाविशेषा इति? अत्रोच्यते – युगपद्वक्तुमशक्यत्वात् तल्लक्षणनिर्देशस्य क्रमप्रसङ्गे यासावादौ चोदिता सैव तावत् –

## प्रमत्तयोगात् प्राणव्यपरोपणं हिंसा॥१३॥

**अनवगृहीतप्रचारविशेषः प्रमत्तः॥१॥** इन्द्रियाणां प्रचारविशेषमनवधार्य प्रवर्तते यः स प्रमत्तः।

**अभ्यन्तरीकृतेवार्थो वा॥२॥** अथवा, अभ्यन्तरीकृतेवार्थः प्रमत्त इत्युच्यते। कः पुनरिवार्थः? यथा सुरापः प्रवृद्धमदत्वात् कार्याऽकार्यवाच्याऽवाच्याद्यनभिज्ञ तथा जीवस्थानयोन्याश्रयविशेषानविद्वान् कषायोदयाविष्टो हिंसाकारणेषु स्थितोऽहिंसायां, सामान्येन यतत इति प्रमत्तः।

**पञ्चदशप्रमादपरिणतो वा॥३॥** अथवा चतसृभिः विकथाभिः कषायचतुष्टयेन पञ्चभिरिन्द्रियैः निद्राप्रणयाभ्याञ्च परिणतो यः स प्रमत्त इति कथ्यते।

**योगशब्दः संबन्धपर्यायवचनः॥४॥** अयं योगशब्दः संबन्धपर्यायवचनो द्रष्टव्यः, योजनं योगः संबन्ध इति यावत्। यद्येवं भावप्रधानो निर्देशः कर्तव्यः'प्रमत्तत्वयोगाद्' इति, द्रव्यप्रधाने हि सति संबन्धाऽप्रतीतेः; नैष दोषः; आत्मपरिणाम एव कर्तृत्वेन निर्देश्यते प्रमाद्यति स्म इति प्रमत्तः परिणामः, तेन योगात् प्रमत्तयोगादिति।

**कायवाङ्मनस्कर्म वा॥५॥** अथवा, कायवाङ्मनस्कर्म योग इत्युच्यते। प्रमत्तस्य योग प्रमत्तयोगः तस्मात् प्रमत्तयोगादिति हेतुनिर्देशः। प्रमत्तयोगाद्धेतोः प्राणव्यपरोपणं हिंसेति।

**व्यपरोपणं वियोगकरणम्॥६॥** वियोगकरणं व्यपरोपणमित्युच्यते। प्राणा उक्ताः, तेषां व्यपरोपणं प्राणव्यपरोपणम्।

**प्राणग्रहणं तत्पूर्वकत्वात् प्राणिव्यपरोणस्य॥७॥** प्राणग्रहणं क्रियते तत्पूर्वकत्वात् प्राणिव्यपरोपणस्य। प्राणवियोगपूर्वको हि प्राणिवियोगः, स्वतः प्राणिनो निरवयवत्वाद्वियोगाभावात्।

**अन्यत्वादधर्माभावः इति चेन्न; तद्दुःखोत्पादकत्वात्॥८॥** स्यान्मतं प्राणेभ्योऽन्य आत्मा, अतः प्राणवियोगे नात्मनः किञ्चिद्भवतीत्यधर्माभावः स्यादिति; तन्न; किं कारणम्? तद्दुःखोत्पादकत्वात्। प्राणव्यपरोपणे हि सति तत्संबन्धिनो जीवस्य दुःखमुत्पद्यत इत्यधर्मसिद्धिः।

**शरीरिणोऽन्यत्वात् दुःखाऽभाव इति चेन्न; पुत्रकलत्रादिवियोगे तापदर्शनात्॥९॥** स्यादेतदन्यः शरीरी प्राणेभ्यः, अतस्तत्पूर्वकदुःखमस्य न युज्यते इति तन्न; किं

कारणम्? पुत्रकलत्रादिवियोगे तापदर्शनात्। अन्यत्वेऽपि सति पुत्रकलत्रादिवियोगे तापो दृश्यते।

**बन्धं प्रत्येकत्वाच्च॥१०॥** यद्यपि शरीरिशरीरयोः लक्षणभेदान्नानात्वम्, तथापि बन्धं प्रत्येकत्वात् तद्वियोगपूर्वकदुःखोपपत्तेरधर्माऽभाव इत्यनुपालम्भः।

**एकान्तवादिनां तदनुपपत्तिर्बन्धाभावात् ॥११॥** ये निष्क्रियत्वनित्यत्वशुद्धत्वसर्व-गतत्वादिभिरेकान्तेनाऽऽत्मानं कल्पयन्ति तेषां शरीरेण सह बन्धाभावात् दुःखादीनम मनुपपत्तिर्भवति।

**उभयविशेषणोपादानमन्यतराभावे हिंसाऽभावज्ञापनार्थम् ॥१२॥** प्रमत्तयोगात् प्राणव्यपरोपणमित्येतदुभयं विशेषणमुपादीयते। किमर्थं प्रमत्तयोगात् प्राणव्य परोपणमित्येतदुभयं विशेषणमुपादीयते। किमर्थम्? अन्यतराभावे हिंसाऽभावज्ञापनार्थम्। यदा प्रमत्तयोगो नास्ति केवलं प्राणव्यपरोपणमेव न तदा हिंसा। उक्तं च –

**"वियोजयति चासुभिर्न च वधेन संयुज्यते।'**

**"उच्चालदम्मि पादे इरियासमिदस्स णिग्गमट्ठाणे।**

**आवादेज्ज कुलिंगो मरेज्ज तज्जोगमासेज्ज॥'**

**णहि तस्स तण्णिमित्तो बंधो सुहमोपि देसिदो समये।**

**मुच्छा परिग्गहोत्ति य अज्झप्पपमाणदो भणिदो॥"** इति।

ननु च प्राणव्यपरोपणाभावेऽपि प्रमत्तयोगमात्रादेव हिंसेष्यते। उक्तं च –

**"मरदु व जियदु व जीवो अयदाचारस्स णिच्छिदा हिंसा।**

**पयदस्स णत्थि बन्धो हिंसामेत्तेण समिदस्स॥"** इति।

नैष दोषः; तत्रापि प्राणव्यपरोपणमस्ति भावलक्षणम्। तथा चोक्तम्–

**"स्वयमेवात्मनात्मानं हिनस्त्यात्मा प्रमादवान्।**

**पूर्वं प्राण्यन्तराणां तु पश्चात्स्याद्वा न वा वधः॥"** इति।

एवं कृत्वा यैरुपालम्भः क्रियते –

**"जले जन्तुः स्थले जन्तुराकाशे जन्तुरेव च।**

**जन्तुमालाकुले लोके कथं भिक्षुरहिंसकः॥"** इति;

सोऽत्रावकाशं न लभते भिक्षोर्ज्ञानध्यानपरायणस्य प्रमत्तयोगाभावात्। किञ्च, सूक्ष्मस्थूल-जीवाभ्युपगमात्।

**"सूक्ष्मा न प्रतिपीड्यन्ते प्राणिनः स्थूलमूर्तयः।**

**ये शक्यास्ते विवर्ज्यन्ते का हिंसा संयतात्मनः॥"**

अत्र कश्चिदाह – साधूक्तं भवता प्राणव्यपरोपणं हिंसेति। प्राणानां हि परस्परतो वियोगो हिंसा, न कश्चित् प्राणी विद्यते इति। अत उत्तरं पठति –

**प्राण्यभावे प्राणाभावः कर्तुरभावात्॥३॥** यदि प्राणी न स्यात् प्राणानामभावः। कुतः? कर्तुरभावात्। इह कुशलाऽकुशलात्मककर्मपूर्वकाः प्राणाः तच्च कर्मासति कर्तरि न भवतीति प्राणाभावः स्यादतः प्राणसद्भाव एव प्राणिनोऽस्तित्वं गमयति। सन्दंशादिकरणसद्भावेऽयस्कारसंसिद्धिवत्।

किञ्च, असति प्राणिनि रूपणाऽनुभवनोपलम्भनिमित्तग्रहणसंस्करणभिन्नलक्षणाः रूपवेदनाविज्ञानसंज्ञासंस्काराः विविक्तशक्तित्वात् परस्परोपकारं प्रति विनिवृत्तौत्सुक्याः क्षणिकत्वात् स्वप्रयोजनं प्रत्यप्यसमर्थाः हिंसानिवृत्तिहेतवो न भवन्ति। स्मृत्यभिसन्धिक्रियाचित्तानां व्यधिकरणवदेकाधिकरणेऽप्यनुपपत्तेः। एकेनापि विकले प्राणातिपाताऽनभ्युपगमात्। अपि

च, उत्पत्त्यनन्तरं विनाशाभ्युपगमे निरोधस्याहेतु-कत्वात् प्राणातिपातलक्षणस्य विनाशस्य हिंसको हेतुर्न भवतीति तत्फलानभिसंबन्धः। अथाऽहेतोरपि तत्फलमिष्यते। अहिंसको नाम न कश्चिदस्ति। भिन्नसन्तानो-त्पत्तिहेतुर्हिंसक इति चेन्नासत उत्पत्तेर्हेत्वभावात्। अथाऽसत उत्पत्तेर्हेतुरिष्यते; सतो विनाशे हेतुः स्यादिति को विरोधः?

आह – अभिहितलक्षणहिंसानन्तरोद्दिष्टमनृतं किं लक्षणमिति? अत्रोच्यते –

## असदभिधानमनृतम् ॥१४॥

**असदिति नञा सत्प्रतिषेधाच्छून्यार्थसंप्रत्ययप्रसङ्गः॥१॥** न सदसदिति नञा सत्प्रतिषेधः क्रियते, तेन शून्यार्थसंप्रत्ययः प्रसज्यते, तेन नास्ति न किञ्चिदित्येवमाद्येवानृतं स्यात्, यदसत् सदिति ब्रूयात् न तदनृतं स्यात्।

**न वा, सच्छब्दस्य प्रशंसार्थवाचित्वात् ॥२॥** न वैष दोषः, किं कारणम्? सच्छब्दस्य प्रशंसार्थवाचित्वात्। न सदसदप्रशस्तमिति यावत्।

**अभिधानशब्दः करणादिसाधनः॥३॥** अयमभिधानशब्दः करणादिषु साधनेषु द्रष्टव्यः। अभिधीयतेऽनेन, अभिधा वा अभिधानमिति। असतोऽर्थस्याभिधानमसद-भिधानम्।

**ऋतं सत्यार्थे॥४॥** ऋतमित्येतत् पदं सत्यार्थे द्रष्टव्यम्। सत्सु साधु सत्यं प्रत्यवायकारणानिष्पादकत्वात्। न ऋतमनृतम्।

**मिथ्याऽनृतमित्यस्तु लघुत्वदिति चेन्न; विपरीतार्थमात्रसंप्रत्ययप्रसङ्गात् ॥५॥** स्यान्मतं मिथ्याऽनृतमित्येतत् सूत्रमस्तु। कुतः? लघुत्वात्। सूत्रं हि नाम यल्लघु गमकं च तत् कर्तव्यमिति; तन्न; किं कारणम्? विपरीतार्थमात्रसंप्रत्ययप्रसङ्गात्। अयं हि

मिथ्याशब्दः विपरीतार्थे वर्तते। तेन भूतनिह्नवेऽभूतोद्भावने च यदभिधानं तदेवानृतं स्यात् – नास्त्यात्मा नास्ति परलोक इति, श्यामाकतण्डुलमात्रमात्माऽङ्गुष्ठपर्वमात्रः सर्वगतो निष्क्रियः इति च, यत्तु विद्यमानार्थविषयं परप्राणिपीडाकरणं तन्न स्यात्। असदिति पुनरुच्यमानेऽप्रशस्तार्थं यत् तत्सर्वमनृतमुक्तं भवति। तेन विपरीतार्थस्य प्राणिपीडाकरस्य चानृतत्वमुपपन्नं भवति।

अथाऽनृतानन्तरमुद्दिष्टं यत्स्तेयं तस्य किं लक्षणमिति? अत आह –

## अदत्तादानं स्तेयम् ॥१५॥

आदानं ग्रहणमदत्तस्याऽऽदानमदत्तादानं स्तेयमित्युच्यते।

**सर्वमदत्तमाददानस्याऽकुशलकल्पनायां कर्मादेयमात्मसात्कुर्वतः स्तेयप्रसङ्गः॥१॥** यद्यविशेषेणादत्तस्याऽऽदानं स्तेयमित्युच्यते, कर्माष्टविधमन्येनाऽदत्तमाददानस्य स्तेयं प्राप्नोतीति। एतेन नोकर्मापि चोदितं भवति।

**न; दानादानयोर्यत्रैव प्रवृत्तिनिवृत्ती तत्रैवोपपत्तेः॥२॥** नैष दोषः, येषु मणिमुक्ताहिरण्यादिषु दानादानयोः प्रवृत्तिनिवृत्तिसंभवस्तेष्वेव स्तेयस्योपपत्तेस्तेन कर्मणि नास्ति प्रसङ्गः।

**इच्छामात्रमिति चेन्न; अदत्तादानग्रहणात्॥३॥** स्यादेतदिच्छामात्रमिदं यस्य दानादानसंभवस्तस्य ग्रहणमिति; तन्न; किं कारणम्? अदत्तादानग्रहणात्। यस्य हि दानादाने संभवतः तस्य ग्रहणमकुशलम्। यदि हि कर्मादानमपि स्तेयं स्यात् 'अदत्तादानम्' इत्येतत् विशेषणमयुक्तं स्यात् प्रसक्तस्यादत्तमिति प्रतिषेधोपपत्तेः।

**कर्मापि हि किमर्थं कस्मैचिन्न दीयत इति चेन्न; हस्तादि-करणग्रहणविसर्गासंभवात् सूक्ष्मत्वात्॥४॥** अथ मतमेतत् किमर्थं कर्म न कस्मैचिद्दीयत

इति गृह्यते? ननु लोकवादः प्रसिद्धः – आरामविहारादिपादपानां फलम- न्यस्मै जलसेकेन दीयते इति; तन्न; किं कारणम्? हस्तादिकरणविसर्गासंभवात्। यथा वस्त्रपात्रादिहस्तादिकरणैरादीयतेऽन्यस्मै च दीयते न तथा कर्म हस्तादिभिरादीयतेऽन्यस्मै च दीयते। कुतः? सूक्ष्मत्वात्। सूक्ष्मं हि कर्म हस्तादिग्रहणविसर्गयोग्यं न भवति। कथं तर्हि तदादीयते?

**शरीराहारविषयपरिणामतस्तद्बन्धः॥५॥** स्वपरकीयेषु शरीरेष्वाहारेषु शब्दादिविषयेषु च रागद्वेषरूपात्तीव्रादिविकल्पात् परिणामात् तस्य कर्मबन्धो भवति ततः स्वपरिणामवशीकृतत्वाच्च नान्यस्मै दीयते। यद्येवं नित्यकर्मबन्धः प्राप्नोति? नैष दोषः;

**आस्रवनिरोधे सति संवृतत्वाद् बन्धाभावः॥६॥** आस्रवनिरोधो वक्ष्यते गुप्त्यादिलक्षणः, तस्मिन् सति संवृतत्वात् नास्ति बन्धः इति नित्यबन्धाभावः। अतो यत्रैवैहलौकिकोपकारविशेषाद् दानाभिप्रायस्तत्रैवाऽदत्तादानप्रक्लृप्तिः।

**शब्दादिविषयरथ्याद्वाराद्यदत्तादानात् स्तेयप्रसङ्गे इति चेन्न; अप्रमत्तत्वात्॥७॥** स्यादेतत्शब्दादिविषयरथ्याद्वारादीन्यदत्तान्याददानस्य भिक्षोः स्तेयं प्राप्नोतीति; तन्न; किं कारणम्? अप्रमत्तत्वात्। यत्नवतो ह्यप्रमत्तस्य ज्ञानिनः शास्त्रदृष्ट्या शब्दादिविषयरथ्याद्वाराद्यादानेऽपि विरतस्याऽस्तेयप्रसिद्धेः, सामान्यतो मुक्तत्वात्। दत्तमेव वा तत्सर्वम् तथा ह्ययं पिहितद्वारादीन् न प्रविशति।

**वन्दनादिनिमित्तधर्मादानात् स्तेयप्रसङ्ग इति चेन्न; उक्तत्वात्॥८॥** स्यान्मतं वन्दनाक्रियासंबन्धेन धर्मोपचये सति प्रशस्तं स्तेयं प्राप्नोति; तन्न; किं कारणम्? उक्तत्वात्। उक्तमेतत्– दानादानसंभवो यत्र तत्र स्तेयप्रसङ्ग इति।

**प्रमत्ताधिकाराच्चान्यत्राऽप्रसङ्गः॥९॥** “प्रमत्तयोगात् प्राणव्यपरोपणं हिंसा” इत्यतः प्रमत्तयोगग्रहणमनुवर्तते। तेन प्रमत्तस्य स्तेयम् वन्दनादिषु योगत्रयेणाऽऽभि-मुख्यादात्मनः प्रमत्तत्वं नास्ति, अतः सत्यपि धर्मादानेऽस्य न स्तेयम्। परिशेषात् प्रमत्तस्य सत्यसति च परकीयद्रव्यादाने त्रेधाऽपि तदादानाद्यर्थोद्यतत्वात् स्तेयम् तदपि प्राणिपीडाकारणत्वात् पापास्रव इत्युच्यते।

अत्राह – व्याख्यातं हिंसादित्रयलक्षणम्। अथाऽब्रह्म किंलक्षणमिति? अत्रोच्यते –

## मैथुनमब्रह्म॥१६॥

मैथुनमिति किमिदम्? मिथुनस्य भावो मैथुनम्।

**मिथुनस्य भाव इति चेन्न; द्रव्यद्वयभवनमात्रप्रसङ्गात्॥१॥** यदि मिथुनस्य भावो मैथुनमित्युच्यते; नैतद्युक्तम्; कुतः? द्रव्यद्वयभवनमात्रप्रसङ्गात्। एवं स्त्र्यौ-दासीन्यावस्थितविनिवृत्तरागस्त्रीपुंसभवनेऽपि मैथुनप्रसङ्गः।

**मिथुनस्य कर्मेति चेन्न; पुरुषद्वयनिर्वर्त्यक्रियाविशेषप्रसङ्गात्॥२॥** यदि मिथुनस्य कर्म मैथुनमित्युच्यते; नैतदुपपन्नम्; कुतः? पुरुषद्वयनिर्वर्त्यक्रियाविशेषप्रसङ्गात्। द्वयोः पुरुषयोः निर्वर्त्यं यद्भारोद्वहनादि कर्म तत्रापि प्रसङ्गः स्यात्।

**स्त्रीपुंसयोः कर्म इति चेन्न; पच्यादिक्रियाप्रसङ्गात्॥३॥** स्यान्मतं न सर्वं मिथुनमिह परिगृह्यतेऽनिष्टप्रसङ्गात्, ततः स्त्रीपुंसमिथुनविषयकर्मसंग्रह इति; तन्न; किं कारणम्? पच्यादिक्रियाप्रसङ्गात्। ततश्च स्त्रीप्रव्रजितयोर्नमस्काराद्यासेवने मैथुन-प्रसङ्गदोषः। अत उत्तरं पठति –

**स्त्रीपुंसयोः परस्परगात्रोपश्लेषे रागपरिणामो मैथुनम् ॥४॥** चारित्रमोहोदये सति स्त्रीपुंसयोः परस्परगात्रोपश्लेषे सति सुखमुपलिप्समानयोः रागपरिणामो यः स मैथुनव्यपदेशभाक्। ननु नायं शब्दार्थ; सत्यमेवमेतत्; तथापि "प्रसिद्धिवशा-दर्थाध्यवसायः" इतीष्टार्थो गृह्यते।

**न वैकस्मिन्नप्रसङ्गात् ॥५॥** न वैतद्युक्तम्? कुतः? एकस्मिन्नप्रसङ्गात्। हस्तपादपुद्गलसंघट्टनादिभिरब्रह्म सेवमाने एकस्मिन्नपि मैथुनमिष्यते, तन्न सिद्ध्यति।

**उपचारादिति चेन्न; मुख्यफलाभावप्रसङ्गात् ॥६॥** स्यादेतत् – यथा स्त्रीपुंसयोः चारित्रमोहोदये वेदनापीडितयोः कर्म मैथुनं तथैकस्यापि चारित्रमोहोदयोद्रिक्तरागस्य हस्तादिसंघट्टनेऽस्ति मैथुनमिति; न; मुख्यफलाभावप्रसङ्गात्। यन्मुख्ये मैथुने कर्मास्रवफलं तदत्र न प्रसज्यते मुख्यसिंहगतक्रौर्यशौर्यादेर्माणवकेऽप्रवृत्तिवत्। इष्यते च मुख्यमतो नोपचारः।

**न वास्य स्पर्शवदद्रव्यसंयोगस्याविशेषाभिमानात् ॥७॥** यथा स्त्रीपुंसयो रत्यर्थे संयोगे परस्पररतिकृतस्पर्शाभिमानात् सुखं तथैकस्यापि हस्तादिसंघट्टनात् स्पर्शाभिमानस्तुल्यः। तस्मान्मुख्य एव तत्रापि मैथुनशब्दलाभः रागद्वेषमोहाविष्टत्वात्। किञ्च,

**एकस्य द्वितीयोपपत्तौ मैथुनत्वसिद्धेः॥८॥** यथैकस्यापि पिशाचवशीकृतत्वात् सद्वितीयत्वं तथैकस्य चारित्रमोहोदयाविष्कृतकामपिशाचवशीकृतत्वात् सद्वितीयत्वसिद्धेः मैथुनव्यवहारसिद्धिः।

**प्रसिद्धिवशाच्चार्थविशेषप्रतीतेः पूर्वोक्तानां चाऽनवद्यत्वम् ॥९॥** अयं मैथुनशब्दः लोके शास्त्रे च स्त्रीपुरुषसंयोगजरतिविशेषे प्रसिद्धः। लोके तावद् गोपालादयोऽपि

स्त्रीपुंसरतिकर्म मैथुनमित्याचक्षते। शास्त्रेऽपि "अश्ववृषभयोर्मैथुनेच्छायाम्" इत्येवमादौ तदेव कर्मा-ख्यायते। ततः प्रसिद्धिवशादर्थविशेषप्रतीतेः पूर्वोक्तानां च पक्षाणामनवद्यत्वमवसेयम्। तद्यथा –

यत्तावदुक्तम् – मिथुनस्य भाव इति चेन्न द्रव्यद्वयभवनमात्रप्रसङ्गादिति; तदसत्; अभ्यन्तरपरिणामाभावे बाह्यहेतोरफलत्वात्। यथा कंकडुकचणकादीनामभ्यन्तरपाककारणविक्लेदशक्त्यभावात् बाह्योदकाग्निसंबन्धस्याऽफलत्वं तथाऽभ्यन्तर-चारित्रमोहोदयापादितस्त्रैणपौंस्नात्मकरतिपरिणामाभावात् बाह्यद्रव्यद्वयभवनेऽपि न मैथुनम्।

यच्चोक्तम् – मिथुनस्य कर्मेति चेन्न पुरुषद्वयनिर्वर्त्यक्रियाविशेषप्रसङ्गादिति; तच्च वार्तम्; कुतः? कदाचित् पुरुषद्वयेऽपि दर्शनात्। चरित्रमोहोदयाविष्टानां हि पुरुषाणां तादृशेष्वेव पुरुषेषु मैथुनं दृश्यते। उक्तं च–

**"पुरुषाः पुरुषेष्वेव यदनिष्टप्रयोजनाः।**

**अत्यारूढस्य तत्सर्वं रागस्यैव विचेष्टितम्॥" इति।**

यदप्युक्तम् – स्त्रीपुंसयोः कर्मेति चेन्न पच्यादिक्रियाप्रसङ्गादिति; तदसाम्प्रतम्; कुतः तद्विषयस्यैव ग्रहणात्। तयोरेव यत्कर्म तदिह गृह्यते पच्यादिकर्म पुनोऽन्येनापि क्रियते। अपि च, प्रमत्तयोगादित्यनुवर्तते ततः चरित्रमोहोदयात् प्रमत्तस्य मिथुनस्य कर्म मैथुनमित्युक्तम्, नमस्काराद्युपयुक्तस्य चाऽप्रमत्तत्वात् चारित्रमोहोदयाभावाच्च सत्यपि वन्दनादिमिथुनकर्मणि न मैथुनम्।

**अहिंसादिगुणबृंहणाद् ब्रह्म॥१०॥** अहिंसादयो गुणाः यस्मिन् परिपाल्यमाने बृंहन्ति वृद्धिमुपयान्ति तद्ब्रह्मेत्युच्यते, न ब्रह्म अब्रह्म। किं तत्? मैथुनम्। तत्र

हिंसादयो दोषाः पुष्यन्ति। यस्मात् मैथुनसेवनप्रवणः स्थाष्णुचरिष्णून्प्राणिनो हिनस्ति मृषावादमाचष्टे- दत्तमादत्ते सचेतनमितरं च परिग्रहं गृह्णाति।

अत्राह – उक्तं भवता हिंसादिचतुष्टयस्य विशेषलक्षणम्। इदानीमिदमुच्यतां परिग्रहस्य किं लक्षणमिति? अत्रोच्यते –

## मूर्च्छा परिग्रहः॥१७॥

मूर्च्छेत्युच्यते। का मूर्च्छा?

**बाह्याभ्यन्तरोपधिसंरक्षणादिव्यापृतिर्मूर्च्छा॥१॥** बाह्यानां गोमहिषमणिमुक्तादीनां चेतनाचेतनानामभ्यन्तराणां च रागादीनामुपधीनां संरक्षणार्जनसंस्कारादिलक्षणव्यापृतिः मूर्च्छेति कथ्यते।

**वातपित्तश्लेष्मविकारप्रसङ्गः इति चेन्न; विशेषितत्वात्॥२॥** स्यान्मतं वातपित्तश्लेष्मणामन्यतमस्य दोषस्य प्रकोपादुपजायमानो विकारो मूर्च्छेति; तन्न; कारणम्? विशेषितत्वात्। मूर्च्छिरयं मोहसामान्ये वर्तमानो बाह्याभ्यन्तरोपधिसंरक्षणादिविषयः परिगृहीत इति विशेषितत्वादिष्टार्थसंप्रत्ययो भवति। सामान्यचोदनाश्च विशेषेष्ववतिष्ठन्त इति।

**बाह्यस्याऽप्रसङ्ग इति चेन्न; आध्यात्मिकप्रधानत्वात्॥३॥** स्यादेतत् - मूर्च्छेत्यनेन आध्यात्मिकः परिग्रहः परिगृह्यते तेन बाह्यस्य परिग्रहत्वं न प्राप्नोतीति; तन्न; किं कारणम्? आध्यात्मिकप्रधानत्वात्। ममेदमिति संकल्पः आध्यात्मिकः परिग्रहः, स प्रधानभूत इति तस्योपादानं क्रियते, तस्मिन् संगृहीते तत्कारणस्याप्यनुषङ्गेण प्रतीतेः। अथ यदा बाह्यः प्राधान्येन इष्यते कथं तस्य संग्रहः?

**मूर्च्छाकारणत्वात् बाह्यस्य मूर्च्छाव्यपदेशः॥४॥** यथा अन्नं वै प्राणा इति प्राणकारणेऽन्ने प्राणोपचारः, तथा मूर्च्छाकारणत्वात् बाह्यः परिग्रहो मूर्च्छेति व्यवह्रियते।

**ज्ञानदर्शनचारित्रेषु सङ्गः परिग्रहः इति चेन्न; प्रमत्तयोगाधिकारात् ॥५॥** स्यान्मतं यथाऽऽध्यात्मिकेऽपि रागादावात्मपरिणामे सङ्गः परिग्रह इत्युच्यते, ज्ञानदर्शन-चरित्रेष्वपि ममेति संकल्पः परिग्रहः प्राप्नोतीति; तन्न; किं कारणम्? प्रमत्तयोगा-धिकारात्। ततः ज्ञानादीनामहेयत्वादात्मस्वभावानतिवृत्तेरपरिग्रहत्वम्। रागादयः पुनः कर्मोदयतन्त्रा इत्यनात्मस्वभावत्वाद्धेयाः, ततस्तेषु संकल्पः परिग्रह युज्यते।

**तन्मूलाः सर्वदोषानुषङ्गाः॥६॥** सः परिग्रहो मूलमेषां ते तन्मूलाः। के पुनस्ते? सर्वे दोषानुषङ्गाः? ममेदमिति हि सति संकल्पे रक्षणादयः सञ्जायन्ते। तत्र च हिंसाऽवश्यंभाविनी, तदर्थमनृतं जल्पति, चौर्यं चाचरति, मैथुने च कर्मणि प्रतियतते, तत्प्रभवा: नरकादिषु दुःखप्रकाराः। इहाप्यनुपरतव्यसनमहार्णवावगाहनम्।

एवममूभिर्भावनाभिः स्थिरीकृतचेतसोऽपायावद्यदर्शिनो विचक्षणस्य सर्वसंसारि-क्रियाकलापात् दुःखबुद्ध्या निरुत्सुकीकृतविषयकुतूहलस्य मैत्रीप्रमोदकारुण्यमाध्यस्थ्य प्रणिधानापादितसौहार्दस्य जन्ममरणपरिखेदितमतेरवलोकितशरीरस्वभावस्य मोक्षं प्रत्यवहितस्य यस्य सन्ति व्रतानि स भवति –

## निःशल्यो व्रती॥१८॥

**अनेकधा प्राणिगणशरणाच्छल्यम् ॥१॥** विविधवेदनाशालाकाभिः प्राणिगणं श्रृणाति हिनस्ति इति शल्यम्।

**आबाधकत्वादुपचारसिद्धिः॥२॥** यथा शरीरानुप्रवेशात् काण्डादिप्रहरणं शरीरिणो बाधाकरं शल्यं तथा कर्मोदयविकारोऽपि शारीरमानसबाधाहेतुत्वात् शल्यमिव शल्यमित्युपचर्यते।

**तत्त्रिविधं मायानिदानमिथ्यादर्शनभेदात् ॥३॥** तदेतच्छल्यं त्रिविधं वेदितव्यम्। कुतः? मायानिदानमिथ्यादर्शनभेदात्। माया निकृतिर्वञ्चनेत्यनर्थान्तरम्, विषयभोगा-काङ्क्षा निदानम्, मिथ्यादर्शनमतत्त्वश्रद्धानम्। एतस्मात्त्रिविधाच्छल्यान्निष्क्रान्तो निःशल्यो व्रतीत्युच्यते। अत्र कश्चिदाह –

**विरोधाद्विशेषणानुपपत्तिः॥४॥** निःशल्यत्वं व्रतित्वमित्येतदुभयं विरुद्धम्, ततो न निःशल्यत्वाद् व्रती भवितुमर्हति। न हि दण्डसंबन्धाच्छत्री स्यात्, तस्मात् व्रताभि संबन्धादेव व्रतीति वक्तव्यम्, शल्याभावाच्च निःशल्य इति।

**आनर्थक्यं चाऽन्यतरेण गतार्थत्वात् ॥५॥** यदि व्रतित्वान्निःशल्यस्तस्मात् व्रतीत्येतावद्वाच्यम्, न निःशल्य इति। यदि च निःशल्यत्वात् व्रती, तस्मान्निःशल्य इत्येतावद्वाच्यम्, न व्रतीति।

**न व्रतीति विकल्प इति चेन्न; फलविशेषाभावात् ॥६॥** स्यादेतत् – विकल्पोऽत्र गृह्यते निशल्यो वा व्रती वेति, ततो न विशेषणविशेष्यसंबन्धाऽभावो दोष इति; तन्न; किं कारणम्? फलविशेषाभावात्। फलविशेषवतां हि लोके विकल्पो दृष्टः; यथा देवदत्तं घृतेन वा सूपेन वा दध्ना वा भोजयेदिति, न तथेह फलविशेषोऽस्ति निःशल्यो वा व्रती वेत्युभयविशेषणविशिष्टस्यैकस्येष्टत्वात्।

**न वाऽङ्गाङ्गिभावस्य विवक्षितत्वात् ॥७॥** न वैष दोषः, किं कारणम्? अङ्गाङ्गिभावस्य विवक्षितत्वात्। न हिंसाद्युपरतिमात्रव्रतसंबन्धात् व्रती भवत्यन्तरेण शल्याभावम्, सति शल्यापगमे व्रतसंबन्धात् व्रतीति विवक्षितः। यथा बहुक्षीरघृतो

'गोमान्' इति व्यपदिश्यते, बहुक्षीरघृताभावात् सतीष्वपि गोषु न गोमान् तथा सशल्यत्वात् सत्स्वपि व्रतेषु न व्रती, यस्तु निःशल्यः स व्रती। तत्रैतत् स्यात् – कथमेतदेवं भविष्यतीति? उच्यते –

**प्रधानानुविधानादप्रधानस्य॥८॥** यथा तीक्ष्णेन परशुना छिनत्तीति तीक्ष्णगुण-विशिष्टपरशुरप्रधानभूतः छेत्तुः प्रधानस्योपकारे वर्तते तथा निःशल्यत्वगुणविशिष्टानि व्रतानि गुणभूतानि तद्वतः प्रधानस्य विशेषकाणि।

आह – किमेष व्रती व्यपगतशल्यत्रयो हिंसाद्यभावात् यथोक्तक्रियासमूह विजृम्भितपरिणामः परिग्रहनिरपेक्षः सर्व एवागारसंबन्धं प्रति निवृत्तौत्सुक्यः प्रतिज्ञायते उत विरतोऽपि कश्चित् गृही निश्चीयत इति? अत्रोच्यते – अमीषामेव हिंसादीनां विरतिविशेषस्य भेदादधिकृतो व्रती द्वेधा –

## अगार्यनगारश्च॥१९॥

**प्रतिश्रयार्थितयाऽङ्गनादगारम्॥१॥** प्रतिश्रयार्थिभिः जनैरङ्ग्यते गम्यते तदित्यगारं वेश्म इत्यर्थः। अगारमस्यास्तीत्यगारी, न विद्यतेऽगारमस्येत्यनगारः।

**अनियमप्रसङ्ग इति चेन्न; भावागारस्य विवक्षितत्वात्॥२॥** स्यान्मतं शून्यागारदेवकुलाद्यावासस्य मुनेरगारित्वं प्राप्तमनिवृत्तविषयतृष्णस्य कुतश्चित्कारणात् विमुच्यागारं वने वसतोऽनगारत्वं चेत्यनियमप्रसङ्ग इति; तन्न; किं कारणम्? भावागारस्य विवक्षितत्वात्। चारित्रमोहोदये सत्यगारसंबन्धं प्रत्यनिवृत्तपरिणामोऽ-गारमित्युच्यते, स यस्यास्त्यसौ वने वसन्नप्यगारीति व्यपदेशमर्हति। तदभावादनगार इति च भवति।

**व्रतिकारणसाकल्यात् गृहस्थस्याव्रतित्वमिति चेन्न; नैगमसंग्रहव्यवहारव्यापारात् नगरावासवत् ॥३॥** यथा गृहापवरकादिनगरैकदेशे निवास्यपि नगरावास इति शब्द्यते, तथा असकलव्रतोऽपि नैगमसंग्रहव्यवहारनयविवक्षापेक्षया व्रतीति व्यपदिश्यते।

**राजवद्वा॥४॥** यथा द्वात्रिंशज्जनपदसहस्राधिपतिः सार्वभौमो राजेत्येकजनपदपतिः तदर्धेश्वरो वा न राजेति न भवति? भवत्येव। तथाऽष्टादशशीलसहस्रचतुरशीतिगुण-शतसहस्रधरत्वादनगारः सम्पूर्णव्रत इति संयतासंयतोऽणुव्रतधरत्वान्न व्रतीति न भवति? भवत्येव।

अत्राह – हिंसादीनामन्यतमस्मात् यः प्रतिनिवृत्तः स खल्वगारी व्रती नैवम्; किं तर्हि? पञ्चतय्याऽपि विरतेर्वैकल्येन विवक्षित इति, उच्यते –

## अणुव्रतोऽगारी॥२०॥

अणुशब्दः सूक्ष्मवचनो द्रष्टव्यः। अणूनि व्रतान्यस्य सोऽणुव्रतः। कथमणुत्वमिति चेत्? उच्यते – सर्वसावद्यनिवृत्त्यसंभवात्। कुतस्तर्हि असौ निवृत्तः?

**द्वीन्द्रियादिव्यपरोपणान्निवृत्तः॥१॥** द्वीन्द्रियादीनां जङ्गमानां प्राणिनां व्यपरोपणात् त्रिधा निवृत्तोऽगारीत्याद्यमणुव्रतम्।

**स्नेहद्वेषमोहावेशादसत्याभिधानवर्जनप्रवणः॥२॥** स्नेहस्य द्वेषस्य मोहस्य चोद्रेकात् यदसत्याभिधानं ततो निवृत्तादरो द्वितीयमणुव्रतम्।

**अन्यपीडाकरात् पार्थिवभयाद्युत्पादितनिमित्तादप्यदत्तात् प्रतिनिवृत्तः॥३॥** अन्यपी-डाकरपार्थिवभयादिवशादवश्यं परित्यक्तमपि यददत्तं ततः प्रतिनिवृत्तादरः श्रावक इति तृतीयमणुव्रतम्।

**उपाताऽनुपात्तान्याङ्गनासङ्गाद्विरतरतिः॥४॥** उपात्ताया: अनुपात्तायाश्चाऽन्याङ्ग-नायाः सङ्गाद्विरतरतिः विरताविरत इति चतुर्थमणुव्रतम्।

**परिच्छिन्नधनधान्यक्षेत्राद्यवधिर्गृही॥५॥** धनधान्यक्षेत्रादीनामिच्छावशात् कृतपरिच्छेदो गृहीति पञ्चममणुव्रतम्।

आह – किं स्थवीयसीं विरतिमभ्युपगतस्य श्रावकस्य किमेतावानेव विशेषः आहोस्विदस्ति कश्चिदन्योऽपीति? अत्रोच्यते –

## दिग्देशानर्थदण्डविरतिसामायिकप्रोषधोपवासोपभोगपरिभोगपरिमाणा -तिथिसंविभागव्रतसम्पन्नश्च॥२१॥

**आकाशप्रदेशश्रेणी दिक्॥१॥** आकाशस्य प्रदेशाः परमाणुपरिच्छेदात् प्रविभक्ताः श्रेणीकृता दिग्व्यपदेशमर्हन्ति।

**आदित्यादिगतिविभक्तस्तद्भेदः॥२॥** आदित्यादिगत्योदयास्तमयपरिच्छिन्नया विभक्तस्तद्भेदः – प्राची दिग् दक्षिणा प्रतीची उत्तरा ऊर्ध्वमधो विदिशश्चेति।

**ग्रामादीनामवधृतपरिमाणः प्रदेशो देशः॥३॥** ग्रामनगरगृहापवरकादीनामवधृतपरिमाणानां प्रदेशो देश इत्युच्यते।

**उपकारात्यये पापादाननिमित्तमनर्थदण्डः॥४॥** असत्युपकारे पापादानहेतुरनर्थदण्ड इत्यवधियते। विरमणं विरतिः निवृत्तिरिति यावत्। दिग्देशानर्थदण्डेभ्यो विरतिः दिग्देशानर्थदण्डविरतिः। साधनं कृतेति वृत्तिः।

**विरतिशब्दः प्रत्येकं परिसमाप्यते॥५॥** दिग्विरतिः देशविरतिरनर्थदण्डविरतिरिति।

**विरत्यग्रहणमधिकारादिति चेन्न; उपसर्जनानभिसंबन्धात् ॥६॥** स्यादेतत्- ''हिंसानृतस्तेयाब्रह्मपरिग्रहेभ्यो विरतिव्रतम्'' इत्यतः विरतिग्रहणमनुवर्तते, ततः पुनरिह विरतिग्रहणमनर्थकमिति; तन्न; किं कारणम्? उपसर्जनानभिसंबन्धात्। तदनुवर्तमानं विरतिग्रहणं दिग्देशानर्थदण्डग्रहणेनोपसर्जनेन नाभिसम्बध्यते, ततः पुनर्विरतिग्रहणं क्रियते।

**एकत्वेन गमनं समयः॥७॥** समेकीभावे वर्तते, तद्यथा 'संगतं घृतं संगतं तैलम्' इत्युक्ते एकीभूतमिति गम्यते। एकत्वेन गमनं समयः। प्रतिनियतकाय वाङ्मनस्कर्मपर्यायार्थं प्रतिनिवृत्तत्वादात्मनो द्रव्यार्थेनैकत्वगमनमित्यर्थः। समय एव सामायिकम्, समयः प्रयोजनमस्येति वा सामायिकम्।

**उपेत्य तस्मिन् वसन्तीन्द्रियाणीत्युपवासः॥८॥** शब्दादिग्रहणं प्रति निवृत्तौत्सुक्यानि पञ्चापीन्द्रियाण्युपेत्य तस्मिन् वसन्तीत्युपवासः। अशनपानभक्ष्य लेह्यलक्षणचतुर्विधाहारपरित्याग इत्यर्थः। प्रोषधशब्दः पर्वपर्यायवाची। प्रोषधे उपवासः प्रोषधोपवासः। साधनं कृतेति वृत्तिः संज्ञायामिति वा।

**उपेत्य भुज्यते इत्युपभोगः॥९॥** उपेत्यात्मसात्कृत्य भुज्यतेऽनुभूयत इत्युपभोगः। अशनपानगन्धमाल्यादिः।

**परित्यज्य भुज्यत इति परिभोगः॥१०॥** सकृद् भुक्त्वा परित्यज्य पुनरपि भुज्यते इति परिभोग इत्युच्यते। आच्छादनप्रावरणालङ्कारशयनासनगृहयानवाहनादिः। उपभोगश्च परिभोगश्च उपभोगपरिभोगौ, उपभोगपरिभोगयोः परिमाणमुपभोग-परिभोगपरिमाणम्।

**संयमविनाशयन्नततीत्यतिथिः॥११॥** चारित्रलाभबलोपेतत्वात् संयममविनाशयन्न ततीत्यतिथिः। अथवा नास्य तिथिरस्ति इत्यतिथिः, अनियतकालागमन इत्यर्थः।

**संविभजनं संविभागः॥१२॥** अतिथये संविभागोऽतिथिसंविभागः। अश्वघासादिवद् वृत्तिः।

**व्रतग्रहणमनर्थकमिति चेत्; उक्तम् ॥१३॥** व्रतमित्यनुवर्तते, पुनर्व्रतग्रहणमनर्थकमिति चेत्; उक्तम्; किमुक्तम्? उपसर्जनानभिसंबन्धादिति।

**व्रतसंपन्नशब्दः प्रत्येकमभिसंबध्यते॥१४॥** दिग्विरतिव्रतसंपन्नः देशविरतिव्रत-संपन्न इत्यादि। अथ किमर्था दिङ्निवृत्तिः?

**दुष्परिहरक्षुद्रजन्तुप्रायत्वाद्दिङ्निवृत्तिः॥१५॥** दुष्परिहरैः क्षुद्रजन्तुभिराकुला दिश अतस्तन्निवृत्तिः कर्तव्या।

**तत्परिमाणं च योजनादिभिरभिज्ञानवद्भिः॥१६॥** तासां परिमाणं योजनादिभिः पर्वतादिप्रसिद्धाभिज्ञानैः कर्तव्यम्।

**अगमनेऽपि प्राणिवधाभ्यनुज्ञानमिति चेन्न; निवृत्त्यर्थत्वात् ॥१७॥** स्यान्मतम्-दिक्परिमाणकरणादगमनेऽपि तदन्तरावस्थितप्राणिगणवधाभ्यनुज्ञानं प्रसक्तम्, अन्यथा वा दिक्परिमाणमनर्थकमिति; तन्न; किं कारणम्? निवृत्त्यर्थत्वात्। कात्स्न्र्येन निवृत्तिं कर्तुमशक्नुवतः शक्त्या प्राणिवधविरतिं प्रत्यागूर्णस्यात्र प्राणयात्रा भवतु वा मा वा भूत्। सत्यपि प्रयोजनभूयस्त्वे परिमितदिगवधेर्बहिर्नास्कन्त्स्यामिति प्रणिधानान्न दोषः।

**तृष्णाप्राकाम्यनिरोधतन्त्रत्वाच्च॥१८॥** प्रवृद्धेच्छस्याऽऽत्मनस्तस्यां दिशि विना यत्नात् मणिरत्नादिलाभोऽस्तीत्येवमन्येन प्रोत्साहितस्यापि मणिरत्नादिसम्प्राप्तितृष्णा-प्राकाम्यनिरोधः कथं तन्त्रितो भवेदिति दिग्विरतिः श्रेयसी।

**ततो बहिर्महाव्रतप्रसिद्धिः॥१९॥** अहिंसाद्यणुव्रतधारिणोऽप्यस्य परिमिता-द्दिगवधेबर्हिर्मनोवाक्काययोगैः कृतकारितानुमतविकल्पैः हिंसादिसर्वसावद्यनिवृत्तिरिति महाव्रतत्वमवसेयम् ।

**तथैव देशनिवृत्तिः॥२०॥** यथा दिङ्निवृत्तिः कृता तथैव देशनिवृत्तिः कार्या। मदीयस्य गृहान्तरस्य तटाकस्य वा मध्यं मुक्त्वा देशान्तरं नास्कन्त्स्यामीति तन्निवृत्तौ पूर्ववत् प्रयोजनं वेदितव्यम् । महाव्रतत्वं च बर्हिर्व्यवस्थाप्यम् । अयमनयोर्विशेषः – दिग्विरतिः सार्वकालिकी देशविरतिर्यथाशक्तिकालनियमेनेति।

**अनर्थदण्डः पञ्चधाऽपध्यानपापोपदेशप्रमादाचरितहिंसाप्रदानाशुभश्रुतिभेदात् ॥२१॥** अनर्थदण्डः पञ्चधा भिद्यते। कुतः? अपध्यानपापोपदेशप्रमादाचरितहिंसाप्रदाना-ऽशुभश्रुतिभेदात् ।

**तत्र परेषां जयपराजयवधबन्धाङ्गच्छेदस्वहरणादि कथं स्यादिति मनसा चिन्तनमपध्यानम् ॥२२॥**

**क्लेशतिर्यग्वणिज्यावधकारम्भादिषु पापसंयुतं वचनं पापोपदेशः॥२३॥** तद्यथा- अस्मिन् देशे दासा दास्यश्च सुलभास्तानमुं देशं नीत्वा विक्रये कृते महानर्थलाभो भवतीति क्लेशवणिज्या। गोमहिष्यादीनमुत्र गृहीत्वाऽन्यत्र देशे व्यवहारे कृते भूरिवित्तलाभ इति तिर्यग्वणिज्या। वागुरिकसौकरिकशाकुनिकादिभ्यो मृगवराहशकुन्त-प्रभृतयोऽमुस्मिन् देशे सन्तीति वचनं वधकोपदेशः। आरम्भकेभ्यः कृषीवलादिभ्यः क्षित्युदकज्वलनपवनवनस्पत्यारम्भोऽनेनोपायेन कर्तव्यः इत्याख्यान-मारम्भकोपदेशः। इत्येवं प्रकारं पापसंयुक्तं वचनं पापोपदेशः।

**प्रयोजनमन्तरेणापि वृक्षादिच्छेदनभूमिकुट्टनसलिलसेचनाद्यवद्यकर्म प्रमादाचरित-मिति कथ्यते॥२४॥**

**विषशस्त्राग्निरज्जुकशादण्डादिहिंसोपकरणप्रदानं हिंसाप्रदानमित्युच्यते ॥२५॥**

**हिंसारागादिप्रवर्धितदुष्टकथाश्रवणशिक्षणव्यापृतिरशुभश्रुतिरित्याख्यायते ॥२६॥** एतस्मादनर्थदण्डाद्विरतिः कार्या।

**मध्येऽनर्थदण्डग्रहणं पूर्वोत्तरातिरेकानर्थक्यज्ञापनार्थम् ॥२७॥** पूर्वयोः दिग्देशयोरुत्तरयोश्चोपभोगपरिभोगयोरवधृतपरिमाणयोरनर्थकं चङ्क्रमणादि विषयोपसेवनं च निष्प्रयोजनं कर्म न कर्तव्यमित्यतिरेकनिवृत्तिज्ञापनार्थं मध्येऽनर्थदण्डवचनं क्रियते।

**सामायिके नियतदेशकाले महाव्रतत्वं पूर्ववत् ॥२८॥** इयति देशे एतावति काल इत्यवधारिते सामायिके स्थितस्य महाव्रतत्वं पूर्ववद्वेदितव्यमणुस्थूलकृतहिंसादिनिवृत्तेः।

**संयमप्रसङ्ग इति चेन्न; तद्घातिकर्मोदयात् ॥२९॥** स्यान्मतं सामायिके सर्वसावद्यनिवृत्तिलक्षणे स्थितस्य तस्य संयमः प्राप्नोतीति; तन्न; किं कारणम्? तद्घातिकर्मोदयात्। तस्य हि संयमघातिकर्मोदयोऽस्तीति न संयतत्वम्।

**महाव्रतत्वाभाव इति चेन्नोपचारात्, राजकुले सर्वगतचैत्रवत् ॥३०॥** यद्यभ्यन्तरसंयमघातिकर्मोदयोऽस्ति तदुदयेनावश्यमनिवृत्तपरिणामेन भवितव्यं ततश्च महाव्रतत्वमस्य नोपपद्यत इति मतम्; तन्न; किं कारणम्? उपचारात्, राजकुले सर्वगतचैत्रवत्। यथा पौरजनपदकोष्ठागारादिषु बाह्येषु व्यापारेषु सर्वेषु व्यापृतः स्नानानु-लेपनशयनान्तःपुरादिव्यापारेष्वभ्यन्तरेषु केषुचित् व्यापृतिमननुगच्छन्नपि राजकुले सर्वगतश्चैत्र इत्युपचर्यते, तथा हिंसादिषु बाह्येषु सर्वेष्वनासक्तधिषणः अभ्यन्तरसंयमघातिकर्मोदयापादितमन्दाविरतिपरिणामे सत्यपि महाव्रत इत्युपचर्यते। एवं च कृत्वाऽभव्यस्यापि निर्ग्रन्थलिङ्गधारिणः एकादशाङ्गाध्यायिनो महाव्रतपरिपालनादसंयतभावनस्याप्युपरिग्रैवेयकविमानवासितोपपन्ना भवति।

**स्नानगन्धमाल्यादिविरहितोऽवकाशे शुचावुपवसेत् ॥११॥** स्वशरीरसंस्कारकारण-स्नानगन्धमाल्याभरणादिभिर्विरहितः शुचाववकाशे साधुनिवासे चैत्यालये स्वप्रोषधोप-वासगृहे वा धर्मकथाश्रवणश्रावणचिन्तनावहितान्तःकरणः सन्नुपवसेत् निरारम्भः श्रावकः।

**भोगपरिसंख्यानं पञ्चविधं त्रसघातप्रमादबहुवधानिष्टानुपसेव्यविषयभेदात् ॥१२॥** भोगपरिसंख्यानं पञ्चविधं प्रत्येतव्यम्। कुत? त्रसघातप्रमादबहुवधानिष्टानुप सेव्यविषयभेदात्। तत्र मधु मांसं सदा परिहर्तव्यं त्रसघातं प्रति निवृत्तचेतसा। मद्यमुपसेव्यमानं कार्याकार्यविवेकसंमोहकरमिति तद्वर्जनं प्रमादविरहायानुष्ठेयम्। केतक्यर्जुनपुष्पादीनि बहुजन्तुयोनिस्थानानि शृङ्गवेरमूलकार्द्रहरिद्रानिम्बकुसुमादीन्य नन्तकायव्यपदेशार्हाणि, एतेषामुपसेवने बहुघातोऽल्पफलमिति तत्परिहारः श्रेयान्। यानवाहनाभरणादिषु एतावदेवेष्टमतोऽन्यदनिष्टमित्यनिष्टान्निवर्तनं कर्तव्यम्। न ह्यसत्यभिसन्धिनियमे व्रतमिति। इष्टानामपि चित्रवस्त्रविकृतवेषाभरणादीनामनुपसेव्यानां परित्यागः कार्यः यावज्जीवम्। अथ न शक्तिरस्ति कालपरिच्छेदेन वस्तुपरिमाणेन च शक्त्यनुरूपं निवर्तनं कार्यम्।

**अतिथिसंविभागश्चतुर्विधो भिक्षोपकरणौषधप्रतिश्रयभेदात् ॥१३॥** अतिथिसंविभाग-श्चतुर्धा भिद्यते। कुतः? भिक्षोपकरणौषधप्रतिश्रयभेदात्। मोक्षार्थमभ्युद्यतायातिथये संयमपरायणाय शुद्धाय शुद्धचेतसा निरवद्या भिक्षा देया, धर्मोपकरणानि च सम्यग्दर्शनज्ञानचारित्रोपबृंहणानि दातव्यानि। औषधमपि योग्यमुपयोजनीयम्। प्रतिश्रयश्च परमधर्मश्रद्धया प्रतिपादयितव्य इति।

चशब्दो वक्ष्यमाणगृहस्थधर्मसमुच्चयार्थः। कः पुनरसौ?

## मारणान्तिकीं सल्लेखनां जोषिता॥२२॥

**स्वायुरिन्द्रियबलसंक्षयो मरणम् ॥१॥** स्वपरिणामोपात्तस्यायुषः इन्द्रियाणां बलानां च कारणवशात् संक्षयो मरणमिति मन्यन्ते मनीषिणः।

**अन्तग्रहणं तद्भवमरणप्रतिपत्त्यर्थम् ॥२॥** मरणं द्विविधम् – नित्यमरणं तद्भवमरणं चेति। तत्र नित्यमरणं समये समये स्वायुरादीनां निवृत्तिः। तद्भवमरणं भवान्तरप्राप्त्यनन्तरोपश्लिष्टं पूर्वभवविगमनम्। तत्रान्तग्रहणं क्रियते तद्भवमरण परिग्रहार्थम्। मरणमन्तो मरणान्त; मरणान्तः प्रयोजनमस्या इति मारणान्तिकी।

**सम्यक्कायकषायलेखना सल्लेखना॥३॥** लिखेर्ण्यन्तस्य लेखना तनूकरणमिति यावत्। कायस्य बाह्यस्याभ्यन्तराणां च कषायाणां तत्कारणहापनया क्रमेण सम्यक् लेखना सल्लेखना, तां मारणान्तिकीं सल्लेखनां जोषिता सेविता गृहीत्यभिसम्बन्धः।

**सेविताग्रहणं विस्पष्टार्थमिति चेन्न; अर्थविशेषोपत्तेः॥४॥** स्यान्मतमिह सेवितेत्येव विस्पष्टार्थं वक्तव्यमिति; तन्न; किं कारणम्? अर्थविशेषोपपत्तेः। न केवलमिह सेवनं गृह्यते। किं तर्हि? प्रीत्यर्थोऽपि, जुषि प्रीतिसेवनयोरिति। यस्मादसत्यां प्रीतौ बलान्न सल्लेखना कार्यते, सत्यां हि प्रीतौ स्वयमेव करोति।

**सल्लेखनाया जोषितेति प्राप्नोतीति चेन्न; तृनः प्रयोगात् ॥५॥** स्यान्मतं यथा कटस्य कर्तेति विभक्तिनिर्देशः तथा सल्लेखनाया जोषितेति प्राप्नोतीति; तन्न; किं कारणम्? तृनः प्रयोगात्।

**आत्मवधकत्वप्रसङ्ग इति चेन्न; अप्रमत्तत्वात् ॥६॥** स्यान्मतं सल्लेखनामास्थितस्य स्वाभिसन्धिपूर्वकायुरादिनिवृत्तेरात्मवधः प्राप्नोतीति? तन्न; कारणम्? अप्रमत्तत्वात्। प्रमत्तयोगाद्धि प्राणव्यपरोपणं हिंसेत्युक्तम्। न चास्य प्रमादयोगोऽस्ति। कुतः?

**रागाद्यभावात् ॥७॥** रागद्वेषमोहाविष्टस्य हि विषशस्त्राद्युपकरणप्रयोगवशादात्मानं घ्नतः स्वघातो भवति। न तथा सल्लेखनां प्रतिपन्नस्य रागादयः सन्ति ततो नात्मवधदोषसंस्पर्शः। उक्तञ्च –

**"रागादीणमणुप्पा अहिंसकत्तेति देसिदं समये।**
**तेसिं चेदुप्पत्ती हिंसेति जिणेहि णिद्दिट्ठा॥१॥"**

किञ्च,

**मरणस्याऽनिष्टत्वात् ॥८॥** यथा वणिजः विविधपण्यदानादानसंचयपरस्य गृहविनाशोऽनिष्टः तद्विनाशकरणे चोपस्थिते यथाशक्ति परिहरति दुष्परिहरे च पण्याविनाशो यथा भवति तथा यतते। एवं गृहस्थोऽपि व्रतशीलपुण्य संचयप्रवर्तमानस्तदाश्रयस्य शरीरस्य न पातमभिवाञ्छति, तदुपप्लवकारणे चोपस्थिते स्वगुणाऽविरोधेन परिहरति, दुष्परिहरे च यथा स्वगुणविनाशो न भवति तथा प्रयतत इति कथमात्मवधो भवेत्? किञ्च,

**उभयानभिसन्धानात् ॥९॥** यथा तपस्थः शीतोष्णजसुखदुःखानभिसन्धानादनभिसंहितसुखदुःखसंबन्धेऽपि सुखदुःखकृतरागद्वेषाभावान्न सुखदुःखकृतकर्मबन्धभाक् तथाऽर्हत्प्रणीतां सल्लेखनां कुर्वन् जीवितमरणानभिसन्धानादनभिसंहितात्मीयमरण-संबन्धेऽपि रागद्वेषाभावान्नात्मवधकः। किञ्च,

**स्वसमयविरोधात् ॥१०॥** यथा क्षणिकवादिनः 'क्षणिकाः सर्वे भावाः' इति ब्रुवतः स्वसमयविरोधस्तथा 'यदा सत्त्वश्च भवति सत्त्वसंज्ञा च भवति वधकश्च भवति वधचित्तं चास्योत्पन्नं भवतीत्येतां चतुर्विधां चेतनां प्राप्य हिंसा जायत इति ब्रुवतोऽसत्यात्मवधकत्वचित्ते सल्लेखनां कुर्वतः आत्मवधकत्वं जायत इत्याचक्षाणस्या-संचेतितकर्मबन्धाभावः समयविरोधः। अथ स्वसमयविरोधो माभूदिति चतुर्विधयैव

चेतनया कर्म बध्यते इतीष्टम्; ननु सल्लेखनायामात्मवधकचित्ताभावादात्माऽहिंसकत्वं सिद्धम् । अथवा, यथा सदा मौनव्रतिकस्य मौनव्रतिकोऽस्मीति वचनं स्ववचसा विरुध्यते, तथा सर्वानात्मकवादिनः आत्माभावादात्मनो वधकत्वमाचक्षाणस्य सर्वानात्मकाऽऽर्य-सत्यवचनविरोधः। अथ स्वसमयविरोधो माक्लृपदिति सर्वानात्मकमिष्टम्; नन्वात्मा-भावादात्मवधाभावः।

योऽपि ब्रूयात् निष्क्रिय आत्मेति, तस्य पुनः साधुजनसेवितां सल्लेखनामा-तिष्ठमानस्यात्मवधकत्वं भवतीत्यभिलपतः आत्मनो निष्क्रियत्वप्रतिज्ञाहानिः। निष्क्रिय-त्वाभ्युपगमे चात्मवधप्राप्त्युपालम्भनाभावः।

आह – कदाऽनेन सल्लेखनायां प्रयतितव्यमिति? अत्रोच्यते –

**जरारोगेन्द्रियहानिभिरावश्यकपरिक्षये॥११॥** जरसा शरीरदूषिण्या यदा प्रहतजङ्घाबलवीर्यो भवति रोगैश्च वातादिविकारजनितैरभिद्रुतः प्रक्षीणेन्द्रियबलश्च भवति तदाऽऽवश्यकपरिक्षयमपेक्षमाणः स्मृतिमान् प्रासुकाशनपानकोपवाससेवनादिना क्रमेण प्रक्षीयमाणशरीरबलः आमरणाद्भावनानुप्रेक्षासमाधिबहुलः शास्त्रोक्तेन विधिना सल्लेखनां जोषितोत्तमार्थस्याराधको भवति।

**एकयोगकरणं न्याय्यमिति चेन्न; कदाचित् कस्यचित्तां प्रत्याभिमुख्यज्ञापनार्थत्वात् ॥१२॥** स्यादेतत् – पूर्वसूत्रेणैवैक एव योगः कर्तव्यः लघ्वर्थ इति; तन्न; किं कारणम्? कदाचित् कस्यचित् तां प्रत्याभिमुख्यज्ञापनार्थत्वात् । सप्ततयशीलव्रतः कदाचित् कस्यचिदेव गृहिणः सल्लेखनाभिमुख्यं न सर्वस्येति। किञ्च

**वेश्मापरित्यागिनस्तदुपदेशात् ॥१३॥** वेश्मापरित्यागिनः दिग्विरत्यादिसप्ततयशीलो-पदेशः। वेश्मपरित्यागेन तु श्रावकत्वेनैव गृहिणः सल्लेखनेत्येवमर्थो भेदेनोपदेशः।

**अविशेषविधिप्रतिपादनार्थत्वाद्वा॥१४॥** अयं सल्लेखनाविधिः न श्रावकस्यैव दिग्विरत्यादिशीलवतः। किं तर्हि? संयतस्यापीत्यविशेषज्ञापनार्थत्वाद्वा पृथगुपदेशः कृतः।

अत्राह – उक्तं भवता निःशल्यो व्रतीति, तत्र चोक्तानि शल्यानि मायानिदानमिथ्यादर्शनसंज्ञकानि। ततः सम्यग्दृष्टिना व्रतिना भवितव्यम्। तत्सम्य ग्दर्शनं किं निरपवादमुत सापवादमिति? उच्यते – कस्यचिन्मोहनीयावस्थाविशेषात् कदाचिदिमे भवन्त्यपवादाः –

## शङ्काकाङ्क्षाविचिकित्साऽन्यदृष्टिप्रशंसासंस्तवाः सम्यग्दृष्टेरतीचाराः॥२३॥

निःशङ्कितत्वादयो व्याख्याताः दर्शनविशुद्धिरित्यत्र, तत्प्रतिपक्षभूताः शङ्कादयो वेदितव्याः। अथ प्रशंसासंस्तवयोः को विशेषः?

**वाङ्मानसविषयभेदात् प्रशंसासंस्तवभेदः॥१॥** मनसा मिथ्यादृष्टिज्ञानचारित्र-गुणोद्भावनं प्रशंसा। भूताऽभूतगुणोद्भावनवचनं संस्तव इत्ययमनयोर्भेदः।

**प्रकरणादगार्यवधारणमिति चेन्न; सम्यग्दृष्टिग्रहणस्योभयार्थत्वात्॥२॥** स्यान्म-तम् – अगारिव्रतशीलप्रकरणमिदमतः तस्यैव सम्यग्दृष्टेः शङ्कादयोऽतिचाराः प्रसक्ता नानगारस्येति; तन्न; किं कारणम्? सम्यग्दृष्टिग्रहणस्योभयार्थत्वात्। पुनः सम्यग्दृष्टिग्रहणमेवमर्थं सम्यग्दर्शनसामान्यस्येमेऽतिचारा इति। यद्येवमर्थं सम्य-ग्दृष्टिग्रहणं नार्थोऽनेनागारिग्रहणं निवृत्तमिति व्याख्येयम्? नैवं शङ्क्यम्; उत्तरत्राऽगारिग्रहणानुवर्तनस्येष्टत्वात्।

**दर्शनमोहोदयादतिचरणमतीचारः॥३॥** दर्शनमोहोदयात्तत्त्वार्थश्रद्धानादतिचरणमतीचारोऽतिक्रम इत्यनर्थान्तरम्। एते शङ्कादयः पञ्च सम्यग्दर्शनस्यातिचाराः।

**अष्टाङ्गत्वात् सम्यग्दर्शनस्यातिक्रमाणां तावत्त्वमेवेति चेन्न; अत्रैवान्तर्भावात् ॥४॥** स्यादेतत् – सम्यग्दर्शनमष्टाङ्गं निःशङ्कितत्वादिलक्षणमुक्तम्, तस्यातिचारैरपि तावद्भिरेव भवितव्यमित्यष्टावतिचारा उपदेष्टव्या इति; तन्न; किं कारणम्? अत्रैवान्तर्भावात्। व्रतशीलानां पञ्च पञ्चातिचारान् विवक्षुणाऽऽचार्येण प्रशंसासंस्तवयोरितरेतरानन्तर्भाव्य सम्यग्दृष्टेरपि पञ्चैवातिचारा उक्ता इति न दोषः।

आह – सम्यग्दर्शनस्याद्यस्य व्रतशीलपत्राञ्चितजिनधर्मकमलकर्णिकाकारस्यागार्यनगारयोः साधारणाः शङ्कादयोऽतिचारा व्याख्याताः। इदानीं व्रतशीलानामतिचारगणना कर्त्तव्येति। तत्र गृहीतव्रतशीलातिक्रमेयत्ताख्यापनार्थमिदमुच्यते –

## व्रतशीलेषु पञ्च पञ्च यथाक्रमम् ॥२४॥

व्रतान्यहिंसादीनि। शीलानि दिग्विरत्यादीनि। व्रतानि च शीलानि च व्रतशीलानि। तेषु व्रतशीलेषु।

**व्रतग्रहणमेवास्त्विति चेन्न; शीलविशेषद्योतनार्थत्वात् ॥१॥** स्यान्मतम् - व्रतग्रहणमेवास्तु, दिग्विरत्यादीन्यपि व्रतान्येवातश्चैतदेवं यदाह "अतिथिसंविभाग – व्रतसंपन्नश्चेति; तन्न; किं कारणम्? शीलविशेषद्योतनार्थत्वात्। अभिसन्धिपूर्वको नियमो व्रतमिति कृत्वा दिग्विरत्यादीन्यपि व्रतानि भवन्ति, किन्तु व्रतपरिरक्षणं शीलमित्यस्य विशेषस्य द्योतनार्थं शीलग्रहणम्। तेन दिग्विरत्यादीनि शीलग्रहणेन गृह्यन्ते।

**सामर्थ्याद् गृहिव्रतसंप्रत्ययः॥२॥** यद्यपीदं सूत्रमविशेषेणोक्तं तथापि सामर्थ्याद् गृहिव्रतग्रहणमवसेयम्। किं सामर्थ्यम्? वक्ष्यमाणवधबन्धच्छेदादिवचनम्। ते हि बन्धवधच्छेदादयो गृहस्थस्यैव नानगारस्येति।

**पञ्च पञ्चेति वीप्सायां द्वित्वम्॥३॥** पञ्च पञ्चेत्येतत् वीप्सायां द्वित्वमवसेयम्। ततोऽनवयवाभिधानं वीप्सार्थमित्यनवयवेन व्रतशीलानि पञ्चसंख्यया व्याप्यन्ते। ननु च लध्वर्थं पञ्चश इति शसा निर्देशः कर्तव्यः; सत्यमेवमेतत्; व्यक्त्यर्थं वाक्येन निर्देशः क्रियते।

**यथाक्रमवचनं वक्ष्यमाणातिचारक्रमसंबन्धनार्थम्॥४॥** वक्ष्यमाणा अतिचारा अहिंसादिभिः क्रमेणाभिसंबध्यन्तामित्येवमर्थं यथाक्रमवचनं क्रियते। यो यः क्रमो यथाक्रमं क्रमानतिवृत्त्येत्यर्थः।

आह – यद्येवं तस्मादुच्यतां तावदाद्यस्य प्राणव्यपरोपणनिवृत्तलक्षणस्याणुव्रतस्य केऽतिचारा; येभ्योऽयं निवृत्तौ निरपवादो भवतीति? अत्रोच्यते –

## बन्धवधच्छेदातिभारारोपणान्नपाननिरोधाः॥२५॥

**अभिमतदेशगतिनिरोधहेतुर्बन्धः॥१॥** अभिमतदेशगमनं प्रत्युत्सुकस्य तत्प्रतिबन्धहेतुः कीलादिषु रज्वादिभिर्व्यतिषङ्गो बन्ध इत्युच्यते।

**प्राणिपीडाहेतुर्वधः॥२॥** दण्डकशावेत्रादिभिरभिघातः प्राणिनां वध इति गृह्यते न प्राणव्यपरोपणम्, ततः प्रागेवास्य विनिवृत्तत्वात्।

**छेदोऽङ्गापनयनम्॥३॥** कर्णनासिकादीनामवयवानामपनयनं छेद इति कथ्यते।

**न्याय्यभारादतिरिक्तभारवाहनमतिभारारोपणम् ॥४॥**

न्यायादनपेताद्भारादतिरिक्तस्य भारस्य वाहनमतिलोभाद्गवादीनामतिभारारोपणमिति गण्यते।

**क्षुत्पिपासाबाधनमन्नपाननिरोधः॥५॥** तेषामेव गवादीनां कुतश्चित् कारणात् क्षुत्पिपासाबाधोत्पादनमन्नपाननिरोध इत्याख्यायते। एते पञ्चाहिंसाणुव्रतस्यातिचाराः।

## मिथ्योपदेशरहोऽभ्याख्यानकूटलेखक्रियान्यासापहार-साकारमन्त्रभेदाः॥२६॥

**मिथ्यान्यप्रवर्तनमतिसन्धापनं वा मिथ्योपदेशः॥१॥** अभ्युदयनिःश्रेयसार्थेषु क्रियाविशेषेष्वन्यस्यान्यथा प्रवर्तनमतिसन्धापनं वा मिथ्योपदेश इत्युच्यते।

**संवृतस्य प्रकाशनं रहोऽभ्याख्यानम् ॥२॥** स्त्रीपुंसाभ्यामेकान्तेऽनुष्ठितस्य क्रियाविशेषस्य प्रकाशनं यद्रहोऽभ्याख्यानं तद्वेदितव्यम्।

**परप्रयोगादन्यानुक्तपद्धतिकर्म कूटलेखक्रिया॥३॥** अन्येनानुक्तं किञ्चित् परप्रयोग-वशादेवं तेनोक्तमनुष्ठितमिति वञ्चनानिमित्तं लेखनं कूटलेखक्रिया।

**हिरण्यादिनिक्षेपेऽल्पसंख्यानुज्ञानवचनं न्यासापहारः॥४॥** हिरण्यादेर्द्रव्यस्य निक्षेप्तुर्विस्मृतसंख्यस्याल्पशः संख्यानमाददानस्यैवमित्यनुज्ञावचनं न्यासापहार इत्या ख्यायते।

**अर्थादिभिः परगुह्यप्रकाशनं साकारमन्त्रभेदः॥५॥** अर्थप्रकरणाङ्गविकारभ्रूविक्षेपा-दिभिः पराकूतमुपलभ्य तदाविष्करणमसूयादिनिमित्तं यत्तत्साकारमन्त्रभेद इति कथ्यते। त एते सत्यव्रतस्य पञ्चातिक्रमाः।

## स्तेनप्रयोगतदाहृतादानविरुद्धराज्यातिक्रमहीनाधिकमानोन्मान-प्रतिरूपकव्यवहाराः॥२७॥

**मोषकस्य त्रिधा प्रयोजनं स्तेनप्रयोगः॥१॥** मुष्णन्तं स्वयमेव वा प्रयुङ्क्ते, अन्येन वा प्रयोजयति, प्रयुक्तमनुमन्यते वा यतः स स्तेनप्रयोगो वेदितव्यः।

**चोरानीतग्रहणं तदाहृतादानम् ॥२॥** अप्रयुक्तेनाननुमतेन च चोरेणानीतस्य ग्रहणं तदाहृतादानं प्रत्येतव्यम्। तत्र को दोषः? परपीडाराजभयादयः प्रतीताः। एतेन विरुद्धराज्यातिक्रमादयो व्याख्याताः।

**उचितादन्यथा दानग्रहणमतिक्रमः॥३॥** उचितान्न्याय्यादन्येन प्रकारेण दानग्रहणमतिक्रम इत्युच्यते। विरुद्धं राज्यं विरुद्धराज्यं विरुद्धराज्येऽतिक्रमः विरुद्धराज्यातिक्रमः। तत्राल्पमूल्यलभ्यानि महार्घाणि द्रव्याणीति प्रयत्नः।

**कूटप्रस्थतुलादिभिः क्रयविक्रयप्रयोगो हीनाधिकमानोन्मानः॥४॥** प्रस्थादि मानं तुलाद्युन्मानम्। एतेन न्यूनेनान्यस्मै देयमधिकेनात्मनो ग्राह्यमित्येवमादिकूटप्रयोगः हीनाधिकमानोन्मानमित्याख्यायते।

**कृत्रिमहिरण्यादिकरणं प्रतिरूपकव्यवहारः॥५॥** कृत्रिमैः हिरण्यादिभिः वञ्चनापूर्वको व्यवहारः प्रतिरूपकव्यवहार इति व्यपदिश्यते। त एते पञ्चादत्तादानविरतेरतीचाराः।

## परविवाहकरणेत्वरिकाऽपरिगृहीतापरिगृहीतागमनानङ्गक्रीडाकामतीव्राभिनिवेशाः॥२८॥

**सद्वेद्यचारित्रमोहोदयाद्विवहनं विवाहः॥१॥** सद्वेद्यस्य चारित्रमोहस्य चोदयात् विवहनं कन्यावरणं विवाह इत्याख्यायते। परस्य विवाहः परविवाहः परविवाहस्य करणं परविवाहकरणम्।

**अयनशीलेत्वरी॥२॥** ज्ञानावरणक्षयोपशमापादितकलागुणज्ञतया चारित्रमोहस्त्रीवेदोदयप्रकर्षादङ्गोपाङ्गनामोदयावष्टम्भाच्च परपुरुषानेति गच्छतीत्येवंशीलेत्वरी। ततः कुत्सायां कः, इत्वरिका। अपरिगृहीता च परिगृहीता च अपरिगृहीतापरिगृहीते। या गणिकात्वेन पुंश्चलित्वेन वा परपुरुषगमनशीलाऽस्वामिका साऽपरिगृहीता। या पुनः एकपुरुषभर्तृका सा परिगृहीता। इत्वरिके च तेपरिगृहीतापरिगृहीते च इत्वारिकाऽपरि गृहीतापरिगृहीते तयोर्गमनं इत्वरिकापरिगृहीतापरिगृहीतागमनम्।

**अनङ्गेषु क्रीडाऽनङ्गक्रीडा॥३॥** अङ्गं प्रजननं योनिश्च ततोऽन्यत्र क्रीडा अनङ्गक्रीडा। अनेकविधप्रजननविकारेण जघनादन्यत्र चाङ्गे रतिरित्यर्थः।

**कामस्य प्रवृद्धः परिणामः कामतीव्राभिनिवेशः॥४॥** कामस्य प्रवृद्धः परिणामोऽनुपरतवृत्त्यादिः कामतीव्राभिनिवेश इत्युच्यते। एते पञ्च स्वदारसन्तोषव्रतस्यातिचाराः।

**दीक्षितातिबालातैर्यग्योन्यादीनामनुपसंग्रह इति चेन्न; कामतीव्राभिनिवेशग्रहणात् सिद्धेः॥५॥** स्यान्मतम् – दीक्षिताऽतिबालातैर्यग्योनीत्येवमादीनामनुपसंग्रह इति; तन्न; किं कारणम्? कामतीव्राभिनिवेशग्रहणात् सिद्धेः। दीक्षितादिषु हि परिहर्तव्यासु वृत्तिः कामतीव्राभिनिवेशाद्भवति। उक्तोऽत्र दोषः राजभयलोकापवादादिः।

## क्षेत्रवास्तुहिरण्यसुवर्णधनधान्यदासीदासकुप्यप्रमाणातिक्रमाः॥२९॥

**क्षेत्रवास्त्वादीनां द्वयोर्द्वयोर्द्वन्द्वः प्राक् कुप्यात्॥१॥** क्षेत्रवास्त्वादीनां द्वयोर्द्वयोः द्वन्द्वो भवति। किमविशेषेण? इत्याह – प्राक्कुप्यात्। क्षेत्रं च वास्तु च

क्षेत्रवास्तु, हिरण्यं च सुवर्णं च हिरण्यसुवर्णम्, धनं च धान्यं च धनधान्यम्, दासी च दासश्च दासीदासम्। क्षेत्रवास्तु च हिरण्यसुवर्णं च धनधान्यं च दासीदासं च कुप्यं च क्षेत्रवास्तुहिरण्यसुवर्णधनधान्यदासीदासकुप्यानि। दासीदासमिति गवाश्वादिषु निपातनादे-कशेषभावः। क्षेत्रं शस्याधिकरणम्। वास्त्वगारम्। हिरण्यं रूप्यादिव्यवहारतन्त्रं सुवर्णं प्रतीतम्। धनं गवादि। धान्यं ब्रीह्यादि। दासीदासं भृत्यस्त्रीपुंसवर्गः। कुप्यं क्षौमकार्पासकौशेयचन्दनादि।

**तीव्रलोभाभिनिवेशादतिरेकाः प्रमाणातिक्रमाः॥२॥** एतावानेव परिग्रहो मम नातोऽन्य इति परिच्छिन्नात् क्षेत्रवास्त्वादिविषयादतिरेकाः अतिलोभवशात् प्रमाणातिक्रमा इति प्रत्याख्यायते। त एते पञ्च परिग्रहविरमणस्यातिक्रमाः।

उक्ता व्रतानामतिचाराः, शीलानामतिचारा वक्ष्यन्ते। तद्यथा –

## ऊर्ध्वाधस्तिर्यग्व्यतिक्रमक्षेत्रवृद्धिस्मृत्यन्तराधानानि॥३०॥

**परिमितदिगवधिव्यतिलङ्घनमतिक्रमः॥१॥** परिमितस्य दिगवधेरतिलङ्घन-मतिक्रम इत्युच्यते। स समासतस्त्रिविधः – ऊर्ध्वातिक्रमः अधोऽतिक्रमः तिर्यगति-क्रमश्चेति।

**तत्र पर्वताद्यारोहणादूर्ध्वातिक्रमः॥२॥** पर्वतमरुभूम्यादीनामारोहणादूर्ध्वातिक्रमो भवति।

**कूपावतरणादेरधोऽतिवृत्तिः॥३॥** कूपावतरणादेरधो दिगवधेरतिवृत्तिर्वेदितव्या।

**विलप्रवेशादिस्तिर्यगतीचारः॥४॥** भूमिविलगिरिदरीप्रवेशादिस्तिर्यगतीचारो द्रष्टव्यः।

**अभिगृहीताया दिशो लोभावेशादाधिक्याभिसन्धिः क्षेत्रवृद्धिः ॥५॥** प्राग् दिशो योजनादिभिः परिच्छिद्य पुनर्लोभवशात्ततोऽधिकाकाङ्क्षणं क्षेत्रवृद्धिरित्यध्यवसीयते।

**इच्छापरिमाणेऽन्तर्भावात् पौनरुक्त्यमिति चेन्न; तस्यान्याधिकरणत्वात् ॥६॥** स्यादेतदिच्छापरिमाणे पञ्चमेऽणुव्रतेऽस्यान्तर्भावात् पुनर्ग्रहणं पुनरुक्तमिति तन्न; किं कारणम्? तस्यान्याधिकरणत्वात्। इच्छापरिमाणं क्षेत्रवास्त्वादिविषयमिदं पुनः दिग्विरमणमन्यार्थमस्यां दिशि लाभे जीवितमलाभे च मरणमतोऽन्यत्र लाभेऽपि न गमनमिति, न तु दिशि क्षेत्रादिष्विव परिग्रहबुद्ध्यात्मसात्करणात् परिमाणकरणमस्ति ततोऽर्थविशेषोऽस्यावसेयः।

**तदतिक्रमः प्रमादमोहव्यासङ्गादिभिः ॥७॥** तस्यैतस्य दिक्परिमाणस्यातिक्रमः प्रमादात् मोहाद् व्यासङ्गाद्वा भवतीत्यवसेयः।

**अननुस्मरणं स्मृत्यन्तराधानम् ॥८॥** अनुस्मरणम् परामर्शनं प्रत्यवेक्षणमित्यनर्थान्तरमिदमिदं मया योजनादिभिरभिज्ञानं कृतमिति, तदभावः स्मृत्यन्तराधानम्। त एते पञ्च दिग्विरमणस्यातिक्रमाः।

## आनयनप्रेष्यप्रयोगशब्दरूपानुपातपुद्गलक्षेपाः ॥३१॥

**तमानयेत्याज्ञापनमानयनम् ॥१॥** आत्मना संकल्पिते देशे स्थितस्य प्रयोजनवशात् यत्किञ्चिदानयेत्याज्ञापनमानयनमित्याख्यायते।

**एवं कुर्विति विनियोगः प्रेष्यप्रयोगः ॥२॥** परिच्छिन्नदेशाद्बहिः स्वयमगत्वाऽन्यमप्यनानीय प्रेष्यप्रयोगेणैवाभिप्रेतव्यापारसाधनं प्रेष्यप्रयोगः।

**अभ्युत्कासिकादिकरणं शब्दानुपातः ॥३॥** व्यापारकरान् पुरुषानुद्दिश्याभ्युत्कासिकादिकरणं शब्दानुपात इति शब्द्यते।

**स्वविग्रहप्ररूपणं रूपानुपातः॥४॥** मम रूपं निरीक्ष्य व्यापारमचिरान्निष्पादयन्तीति स्वविग्रहप्ररूपणं रूपानुपात इति निर्णीयते।

**लोष्ठादिनिपातः पुद्गलक्षेपः॥५॥** कर्मकरान् पुरुषानुद्दिश्य लोष्ठपाषाणनिपातः पुद्गलक्षेप इति कथ्यते। त एते देशविरमणस्य पञ्चातिक्रमाः। कथं पुनरतिक्रम इति? उच्यते –

**स्वयमनाक्रामन्नन्येनाक्रामयतीत्यतिक्रमः॥६॥** यस्मात् स्वयमनतिक्रमन्नन्येनातिक्रामयति ततोऽतिक्रम इति व्यपदिश्यते। यदि हि स्वयमतिक्रमेत् व्रतलोप एवास्य स्यात्।

## कन्दर्पकौत्कुच्यमौखर्याऽसमीक्ष्याधिकरणोपभोगपरिभोगानर्थक्यानि॥३२॥

**रागोद्रेकात् प्रहासमिश्रोऽशिष्टवाक्प्रयोगः कन्दर्पः॥१॥** चारित्रमोहोदयापादितादागोद्रेकात् प्रहाससंयुक्तो योऽशिष्टवाक्प्रयोगः स कन्दर्प इति निर्णीयते।

**तदेवोभयं परत्र दुष्टकायकर्मयुक्तं कौत्कुच्यम्॥२॥** रागस्य समावेशाद्धास्यवचनम- शिष्टवचनमित्येतदुभयं परत्र दुष्टेन कायकर्मणा युक्तं कौत्कुच्यमिच्युते।

**धार्ष्ट्यप्रायमबद्धबहुप्रलापित्वं मौखर्यम्॥३॥** अशालीनतया यत्किञ्चनानर्थकं बहुप्रलपनं मौखर्यमिति प्रत्येतव्यम्।

**असमीक्ष्य प्रयोजनमाधिक्येन करणमधिकरणम्॥४॥** अधिरुपरिभावे वर्तते, करोतिश्चापूर्वप्रादुर्भावे, प्रयोजनमसमीक्ष्याधिक्येन प्रवर्तनमधिकरणम्।

**तत्त्रेधा कायवाङ्मनोविषयभेदात् ॥५॥** तदधिकरणं त्रेधा व्यवतिष्ठते। कुतः? कायवाङ्मनोविषयभेदात्। तत्र मानसं परानर्थककाव्यादिचिन्तनम् वाग्गतं निष्प्रयोजनकथाख्यानं परपीडाप्रधानं यत्किञ्चनवक्तृत्वम् कायिकं च प्रयोजनमन्तरेण गच्छंस्तिष्ठन्नासीनो वा सचित्तेतरपत्रपुष्पफलच्छेदनभेदनकुट्टनक्षेपणादीनि कुर्यात्। अग्निविषक्षारादिप्रदानं चारभेत इत्येवमादि, तत्सर्वमसमीक्ष्याधिकरणम्।

**यावताऽर्थेनोपभोगपरिभोगौ सोऽर्थः ततोऽन्यस्याधिक्यमानर्थक्यम् ॥६॥** यस्य यावताऽर्थेनोपभोगपरिभोगौ प्रकल्प्येते तस्य तावानर्थ इत्युच्यते, ततोऽन्यस्याधिक्यमानर्थक्यं भवति।

**उपभोगपरिभोगव्रतेऽन्तर्भावात् पौनरुक्त्यप्रसङ्ग इति चेन्न; तदर्थानवधारणात् ॥७॥** स्यादेतदुपभोगपरिभोगव्रतेऽन्तर्भवतीति पौनरुक्त्यमासज्यत इति; तन्न; किं कारणम्? तदर्थानवधारणात्। इच्छावशादुपभोगपरिभोगपरिमाणावग्रहः सावद्यप्रत्याख्यानं चेति तदुक्तम्। इह पुनः कल्प्यस्यैवाधिक्यमित्यतिक्रम इत्युच्यते। नन्वेवमपि तद्व्रतातिचारान्तर्भावादिदं वचनमनर्थकम्? नानर्थकम्; सचित्ताद्यतिक्रमवचनादसमीक्ष्याधिकरणमित्यत्र सुप्सुपेति वृत्तिः; मयूरव्यंसकादित्वाद्वा। त एते पञ्चानर्थदण्डविरतेरतीचाराः।

## योगदुःप्रणिधानानादरस्मृत्यनुपस्थानानि ॥३३॥

**योगशब्दो व्याख्यातार्थः॥१॥** अयं योगशब्दो व्याख्यातार्थो द्रष्टव्यः। कं? "कायवाङ्मनस्कर्म योगः" इत्यत्र।

**दुष्ठु प्रणिधानमन्यथा वा दुःप्रणिधानम् ॥२॥** प्रणिधानं प्रयोगः परिणाम इत्यनर्थान्तरम्। दुष्ठुपापं प्रणिधानं दुःप्रणिधानमन्यथा वा प्रणिधानं दुःप्रणिधानम्। तत्र

क्रोधादिपरिणामवशात् दुष्ठु प्रणिधानं शरीरावयवानामनिभृतमवस्थानम्, वर्णसंस्कारा-भावाऽर्थागमकत्वचापलादि वाग्गतम्, मनसोऽनर्पितत्वञ्चेत्यन्यथा प्रणिधानम्।

**अनादरोऽनुत्साहः॥३॥** इति कर्तव्यं प्रत्यसाकल्यात् यथाकथञ्चित् प्रवृत्तिर नुत्साहः अनादर इत्युच्यते।

**अनैकाग्र्यं स्मृत्यनुपस्थानम्॥४॥** अनैकाग्र्यमसमाहितमनस्कता स्मृत्यनुपस्था-नमित्याख्यायते।

**मनोदुःप्रणिधानं तदिति चेन्न; तत्रान्याचिन्तनात्॥५॥** स्यादेतत्-स्मृत्यनुपस्थानं तन्मनोदुःप्रणिधानमेवेति तस्य ग्रहणमनर्थकमिति; तन्न; किं कारणम्? तत्रान्याचिन्तनात्। तत्र ह्यन्यत् किञ्चिदचिन्तयतश्चिन्तयत एव वा विषये क्रोधाद्यावेशः औदासीन्येन वाऽवस्थानं मनसः, इह पुनः परिस्पन्दनात् चिन्ताया एकाग्र्येणान-वस्थानमिति विस्पष्टमन्यत्वम्। रात्रिन्दिवीयस्य वा प्रमादाधिकस्य सञ्चित्यानुपस्थानं त एते पञ्च सामायिकस्यातिक्रमाः।

## अप्रत्यवेक्षिताऽप्रमार्जितोत्सर्गादानसंस्तरोपक्रमणा-ऽनादरस्मृत्यनुपस्थानानि॥३४॥

**प्रत्यवेक्षणं चाक्षुषो व्यापारः॥१॥** जन्तवः सन्ति न सन्ति चेति प्रत्यवेक्षणं चाक्षुषो व्यापारः प्रतीयते।

**प्रमार्जनमुपकरणोपकारः॥२॥** मृदुनोपकरणेन यत् क्रियते प्रयोजनं तत् प्रमार्जनं प्रत्येतव्यम्।

**तस्य प्रतिषेधविशिष्टस्योत्सर्गादिभिः संबन्धः॥३॥** तस्योभयस्य प्रतिषेधविशिष्टस्य प्रतिषेधविशिष्टस्योत्सर्गादिभिस्त्रिभिः प्रत्येकमभिसंबन्धो भवति – अप्रत्यवेक्षिता-प्रमार्जितोत्सर्ग इत्यादि। तत्राऽप्रत्यवेक्षितायां भुवि मूत्रपुरीषोत्सर्गः; अप्रत्यवेक्षिता-प्रमार्जितस्यार्हदाचार्यपूजोपकरणस्य गन्धमाल्यधूपादेरात्मपरिधानाद्यर्थस्य वस्त्रपात्रा-देश्चाऽऽदानमप्रत्यवेक्षिताप्रमार्जितस्य प्रावरणादेः संस्तरस्योपक्रमणम्।

**आवश्यकेष्वनादरः॥४॥** आवश्यकेष्वनादरोऽनुत्साहो भवति। कुतः? क्षुदभ्यर्दितत्वात्।

**स्मृत्यनुपस्थानं व्याख्यातम्॥५॥** त एते पञ्च प्रोषधोपवासस्यातिचाराः।

## सचित्तसंबन्धसंमिश्राभिषवदुःपक्वाहाराः॥३५॥

**सह चित्तेन वर्तत इति सचित्तः॥१॥** चित्तं विज्ञानं तेन सह वर्तत इति सचित्तः, चेतनावद्द्रव्यमित्यर्थः।

**तदुपश्लिष्टः संबन्धः॥२॥** तेन चित्तवता द्रव्येणोपश्लिष्टः संबन्ध इत्याख्यायते। संबध्यत इति संबन्धः।

**तद्व्यतिकीर्णः संमिश्रः॥३॥** तेन सचित्तेन द्रव्येण व्यतिकीर्णः संमिश्र इति कथ्यते। संमिश्रयत इति संमिश्रः।

**पूर्वेणाविशिष्ट इति चेन्न; तत्र संसर्गमात्रत्वात्॥४॥** स्यान्मतं संबन्धेनाविशिष्टः संमिश्र इति? तन्न; किं कारणम्? तत्र संसर्गमात्रत्वात्। सचित्तसंबन्धे हि संसर्गमात्रं विवक्षितमिह तु सूक्ष्मजन्तुव्याकुलत्वे विभागीकरणस्याशक्यत्वात् नानाजातीयद्रव्य समाहारः सूक्ष्मजन्तुप्राय आहारः संमिश्र इष्टः। कथं पुनरस्य सचित्तादिषु वृत्तिः?

प्रमादसंमोहाभ्यां सचित्तादिषु वृत्तिः। क्षुत्पिपासातुरत्वात् त्वरमाणस्य सचित्तादिष्वशनाय पानायानुलेपनाय परिधानाय वा वृत्तिर्भवति।

**द्रवो वृष्यं वाऽभिषवः॥५॥** द्रवः सौवीरादिकः वृष्यं वा द्रव्यमभिषवः इत्यभिधीयते।

**असम्यक्पक्वो दुष्पक्वः॥६॥** अन्तस्तण्डुलभावेनाऽतिविक्लेदनेन वा दुष्ठु पक्व आहारो दुष्पक्व इत्युच्यते। ननु दुष्पच इति प्राप्नोतीति; कृच्छ्रार्थविवक्षाभावान्न भवति। तस्याभ्यवहारे को दोषः? इन्द्रियमदवृद्धिः स्यात् सचित्तप्रयोगो वा वातादिप्रकोपो वा, तत्प्रतीकारविधाने स्यात् पापलेप; अतिथयश्चैनं परिहरेयुरिति। त एते पञ्च उपभोग-परिभोगसंख्यानमर्यादाभ्रेषाः।

## सचित्तनिक्षेपापिधानपरव्यपदेशमात्सर्यकालातिक्रमाः॥३६॥

**सचित्ते निक्षेपः सचित्तनिक्षेपः॥१॥** सचित्तो व्याख्यातः। सचित्ते पद्मपत्रादौ निधाने निक्षेप इत्युच्यते। "साधनं कृता" इति वा मयूरव्यंसकादित्वाद्वा वृत्तिः।

**प्रकरणात् सचित्तेनाऽपिधानम्॥२॥** अपिधानमावरणमित्यर्थः। प्रकरणवशात् सचित्तेनापिधानमिति विशेष्यते, इतरथा हि प्रागधिकरणत्वेन निर्दिष्टं सचित्तग्रहणं नाभिसंबध्येत।

**अन्यदातृदेयार्पणं परव्यपदेशः॥३॥** अन्यत्र दातारः सन्ति दीयमानोऽप्य-यमन्यस्येति वाऽर्पणं परव्यपदेश इति प्रतिपाद्यते।

**प्रयच्छतोऽप्यादराभावो मात्सर्यम्॥४॥** प्रयच्छतोऽपि सतः आदरमन्तरेण दानं मात्सर्यमिति प्रतीयते।

**अकाले भोजनं कालातिक्रमः॥५॥** अनगाराणामयोग्यकाले भोजनं कालातिक्रम इति कथ्यते। त एते पञ्चातिथिसंविभागशीलविशेषाः प्रणीताः।

सप्तानामपि शीलानामतीचारा उक्ता उच्चावचाः। अथ सल्लेखनाया मरणविशेषापादनसमर्थाया अनुपदिष्टचित्तेनाऽभ्यायाः केऽतीचाराः भवन्तीति? अत आह –

## जीवितमरणाशंसामित्रानुरागसुखानुबन्धनिदानानि॥३७॥

**आकाङ्क्षणमाशंसा॥१॥** आकाङ्क्षणमभिलाषः आशंसेत्युच्यते। जीवितं च मरणं च जीवितमरणम्, जीवितमरणस्याशंसा जीवितमरणाशंसा।

**अवश्यहेयत्वे शरीरस्यावस्थानादरो जीविताशंसा॥२॥** शरीरमिदमवश्यं हेयं जलबुद्बुदवदनित्यमस्यावस्थानं कथं स्यादित्यादरो जीविताशंसा प्रत्येतव्या।

**जीवितसंक्लेशान्मरणं प्रति चित्तानुरोधो मरणाशंसा॥३॥** रोगोपद्रवाकुलतया प्राप्तजीवितसंक्लेशस्य मरणं प्रति चित्तस्य प्रणिधानं मरणाशंसेति व्यपदेशमर्हति।

**पूर्वकृतसहपांशुक्रीडनाद्यनुस्मरणान्मित्रानुरागः॥४॥** व्यसने सहायत्वमुत्सवे संभ्रम इत्येवमादिषु कृतं बाल्ये युगपत् क्रीडनमित्येवमादीनामनुस्मरणान्मित्रेऽनुरागो भवति।

**अनुभूतप्रीतिविशेषस्मृतिसमन्वाहारः सुखानुबन्धः॥५॥** एवं मया भुक्तं शयितं क्रीडितमित्येवमादि प्रीतिविशेषं प्रति स्मृतिसमन्वाहारः सुखानुबन्ध इत्यभिधीयते।

**भोगाकाङ्क्षया नियतं दीयते चित्तं तस्मिंस्तेनेति वा निदानम्॥६॥** विषयसुखोत्कर्षाभिलाषो भोगाकाङ्क्षा तया नियतं चित्तं दीयते तस्मिंस्तेनेति वा निदानमिति व्यपदिश्यते। एते पञ्च सल्लेखनायाः व्यतिक्रमाः।

अत्राह – उक्तं भवता तीर्थकरत्वकारणकर्मास्रवनिर्देशे 'शक्तितस्त्यागतपसी' इति, पुनश्चोक्तं शीलव्रतविधाने 'अतिथिसंविभाग' इति, तस्य दानस्य लक्षणमनिर्ज्ञातं तदुच्यतामिति? अत आह –

## अनुग्रहार्थं स्वस्यातिसर्गो दानम् ॥३८॥

**स्वपरोपकारोऽनुग्रहः॥१॥** स्वस्य परस्य चोपकारोऽनुग्रह इत्याख्यायते। स्वोपकारः पुण्यसंचयः, परोपकारः सम्यग्ज्ञानादिवृद्धिः।

**स्वशब्दो धनपर्यायवचनः॥२॥** आत्मात्मीयज्ञातिधनपर्यायवाचित्वे स्वशब्दस्य धनपर्यायवाचिनो ग्रहणमिह दृष्टव्यम्। अनुग्रहार्थं स्वस्यातिसर्गः त्यागो दानं वेदितव्यम्।

अत्राह – उक्तं दानं तत्किमविशिष्टफलमाहोस्विदस्ति कश्चित् प्रतिविशेष इति? अत्रोच्यते –

## विधिद्रव्यदातृपात्रविशेषात्तद्विशेषः॥३९॥

**प्रतिग्रहादिक्रमो विधिः॥१॥** प्रतिग्रह उच्चदेशस्थापनं पादप्रक्षालनमर्चनं प्रणमनमित्येवमादिक्रियाविशेषाणां क्रमो विधिरित्याख्यायते।

**विशेषो गुणकृतस्तस्य प्रत्येकमभिसंबन्धः॥२॥** परस्परतो विशिष्यते विशिष्टिर्वा विशेषः, स गुणकृतः, तस्य प्रत्येकमभिसंबन्धो भवति – विधिविशेषो द्रव्यविशेषो दातृविशेषः पात्रविशेष इति। तत्र विधिविशेषः प्रतिग्रहादिष्वादरानादरकृतो भेदः।

**तपःस्वाध्यायपरिवृद्धिहेतुत्वादिर्द्रव्यविशेषः॥३॥** दीयमानेऽन्नादौ प्रतिगृहीतुस्तपःस्वाध्यायपरिणामविवृद्धिकारणत्वादिर्द्रव्यविशेष इति भाष्यते।

**अनसूयाऽविषादादिर्दातृविशेषः॥४॥** प्रतिग्रहीतर्यनसूया त्यागेऽविषादः दित्सतो ददतो दत्तवतश्च प्रीतियोगः कुशलाभिसन्धिता दृष्टफलानपेक्षिता निरुपरोधत्वमनिदानत्व-मित्येवमादिः दातृविशेषोऽवसेयः।

**मोक्षकारणगुणसंयोगः पात्रविशेषः॥५॥** मोक्षकारणैः सम्यग्दर्शनादिभिः गुणैः योगः पात्रविशेष इति प्रतीयते।

**ततश्च फलविशेषः क्षित्यादिविशेषाद् बीजफलविशेषवत्॥६॥** ततश्च विध्यादि-विशेषाद्दानफलविशेषो भवति, यथा क्षित्यादिकारणविशेषसन्निपाते सति नानाविधबीज-फलविशेष इति।

**निरात्मकत्वे सर्वभावानां विध्यादिस्वरूपाभावः॥७॥** निरात्मकाः सर्वे भावा इत्यस्मिन् दर्शने विध्यादिस्वरूपाभावः स्यात्। अस्ति चेद्विध्यादिस्वरूपम् 'निरात्मकाः सर्वे भावाः' इत्यमुष्य सङ्गरस्य व्याघातः।

**क्षणिकत्वाच्च विज्ञानस्य तदभिसन्धानाभावः॥८॥** क्षणमात्रावलम्बिनि विज्ञाने 'पात्रभूतोऽयमृषिस्तपःस्वाध्यायपरायणो मामनुगृहीष्यति। अस्मै च देयमिदं व्रतशीलभावनापरिबृंहणकरम् अयं चात्र विधिः' इत्यभिसन्धिर्न स्यात्, पूर्वोत्तरक्षणविषयसंस्कारावग्रहसमर्थैकज्ञानाभावात्।

**नित्यत्वाज्ञत्वनिष्क्रियत्वाच्च॥९॥** यस्यापि दर्शनं सत आत्मनोऽकारणत्वान्नि-त्यत्वम्, ज्ञानगुणादर्थान्तरभूतत्वादज्ञत्वं सर्वगतत्वान्निष्क्रियत्वं तस्य तत एव विद्याद्यनुपपत्तिः।

**क्रियागुणसमवायादुपपत्तिरिति चेन्न; तत्परिणामाभावात्॥१०॥** स्यादेत-दर्थान्तरत्वेऽपीहेदं बुद्धिलक्षणात् समवायादेकत्वापत्ताविव तद्व्यपदेशोपपत्तेः विद्याद्युप-पत्तिरिति; तन्न; किं कारणम्? तत्परिणामाभावात्। यथा देवदत्तस्य

दण्डयोगाद्दण्डि-व्यपदेशेऽपि न दण्डस्वभावापत्तिस्तथाऽऽत्मनोऽपि क्रियागुणवद्व्यपदेशेऽपि तत्स्वभाव-संक्रमाभावस्ततश्चाधिकृतविद्याद्यभाव एव।

**क्षेत्रस्य वाऽचेतनत्वात् ॥११॥** यस्यापि दर्शनम् – चतुर्विंशतिविधं क्षेत्रमचेतनम्, क्षेत्रज्ञश्चेतनः पुरुष इति; तस्यापि क्षेत्रस्याचेतनत्वाद्विद्याद्यभिसन्धानाभावो घटादिवत्। अथास्ति विद्याद्यभिसन्धिः; तर्ह्यचेतनं क्षेत्रम्। क्षेत्रज्ञस्य च नित्यत्वात् शुद्धत्वात् निष्क्रियत्वादेव विद्याद्यनुपपत्तिः।

**स्याद्वादिनस्तदुपपत्तिरनेकान्ताश्रयणात् ॥१२॥** स्याद्वादिनस्तु तेषां विद्यादीनामुपपत्तिः। कुतः? अनेकान्ताश्रयणात् – स्यान्नित्य आत्मा स्यादनित्य इत्येवमाद्यनेकान्ताश्रयणादेकान्तदृष्टिदोषाभावः।

**इति तत्त्वार्थवार्तिके व्याख्यानालङ्कारे सप्तमोऽध्यायः समाप्तः॥७॥**

## अष्टमोऽध्यायः

आस्रवपदार्थ उक्तः। अवसरप्राप्तं बन्धं व्याचक्ष्महे। स पुनश्चेतनेतरद्रव्यपरिणामः नामादिचतुष्टयधर्मभागपि द्रव्यभावबन्धविशेषाद् द्वयीमवस्थां बिभर्ति। तत्र जतुकाष्ठरज्जुनिगलादिलक्षणं द्रव्यबन्धं बहुप्रकारं हित्वा प्रकरणसामर्थ्याद्भावबन्धं ब्रूमः। स द्वेधा – कर्मनोकर्मबन्धभेदात्। मातापितृपुत्रस्नेहसंबन्ध नोकर्मबन्धः। यः पुनः अयमितरः कर्मबन्धः तं पौनर्भविककर्मबन्धसन्ततिसद्भावादादिमन्तमनादिमन्तं च प्रतिजानीमहे बीजाङ्कुरप्रादुर्भावसन्तानवत्। आह – आस्तां तावद् व्याख्यानमिदमेव तावदग्रे वक्तव्यम् – इमे बन्धहेतवो यैरयं बन्धः प्रवर्तत इति? इतरथा हि बन्धपदार्थप्रक्लृप्तये पुनस्तद्धेतवः प्रणेतव्याः स्युः।

स्यादेतत्कारणाभावाद् बन्धप्रसिद्धिसामर्थ्यमित्येतच्च वार्तमनिर्मोक्षप्रसङ्गात्। अकस्माच्च तदभावात्। यद्यकस्माद्बन्धः मोक्ष कस्मान्नाकस्मात्? न चाकस्मा-द्बन्धमोक्षौ; तदर्थप्रक्रियाविरोधप्रसङ्गात्। अतो बन्धमुक्त्वा मा पुनर्वोच इत्या- दावेव बन्धकारणनिर्देशोऽनुष्ठेयः। कार्यकारणयोश्च पूर्वापरभावात् पूर्वं कारणं वाच्यं पश्चात् कार्यम्; उच्यते – न वक्तव्याः पुनरिह, यस्मात् षष्ठसप्तमयोः विविधफलानु ग्रहतन्त्रास्रवप्रकरणवशात् सप्रपञ्चा आत्मनः कर्मबन्धहेतवो व्याख्याताः। के पुनस्ते?

### मिथ्यादर्शनाविरतिप्रमादकषाययोगा बन्धहेतवः॥१॥

क्व पुनरेते उक्ताः?

**मिथ्यादर्शनं क्रियास्वन्तर्भूतम्॥१॥** पञ्चविंशतिः क्रिया उक्ताः तास्वन्तर्भूतं मिथ्यादर्शनं द्रष्टव्यम्।

**विरतिप्रतिपक्षभूताऽप्यविरतिः॥२॥** विरतिर्व्याख्याता, तत्प्रतिपक्षभूताऽविरतिरपि तत्रैव वर्णिता "इन्द्रियकषायाव्रतक्रियाः" इत्यत्र।

**आज्ञाव्यापादनानाकाङ्क्षक्रिययोरन्तर्भावः प्रमादस्य॥३॥** आज्ञाव्यापादनक्रिया-ऽनाकाङ्क्षक्रियेत्यनयोः प्रमादस्यान्तर्भावो वेदितव्यः। स च प्रमादः कुशलेष्वनादरः मनसोऽप्रणिधानम्।

**कषायाः क्रोधादयः प्रोक्ताः॥४॥** क्रोधादयोऽनन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यान-संज्वलनविकल्पाः कषायाः प्रोक्ताः। क्व? "इन्द्रियकषायाव्रतक्रियाः" इत्यत्रैव।

**योगः कायादिविकल्पः प्रक्लृप्तः॥५॥** योगश्च कायादिविकल्पः प्रक्लृप्तः। क्व? "कायवाङ्मनस्कर्म योगः" इत्यत्र।

**मिथ्यादर्शनं द्वेधा – नैसर्गिकपरोपदेशनिमित्तभेदात्॥६॥** मिथ्यादर्शनं द्वेधा व्यवतिष्ठते। कुतः? नैसर्गिकपरोपदेशनिमित्तभेदात्।

**तत्रोपदेशनिरपेक्षं नैसर्गिकम्॥७॥** तत्र परोपदेशमन्तरेण मिथ्याकर्मोदयवशात् यदाविर्भवति तत्त्वार्थाश्रद्धानलक्षणं तन्नैसर्गिकमिति व्यवसीयते।

**परोपदेशनिमित्तं चतुर्विधं क्रियाऽक्रियावाद्याज्ञानिकवैनयिकमतविकल्पात्॥८॥** परोपदेशनिमित्तं मिथ्यादर्शनं चतुर्विधमवगन्तव्यम्। कुत? क्रियाऽक्रियावाद्याज्ञानिक-वैनयिकमतविकल्पात्।

**चतुरशीतिः क्रियावादाः इति कौक्वलकाण्डे विद्धिप्रभृतिमतविकल्पात्॥९॥** कौक्वलकाण्डे विद्धिकौशिकहरिश्मश्रुमान्कपिलरोमशहारिताश्वमुण्डाश्वलायनादिमतविक-ल्पात् क्रियावादाश्चतुरशीतिविधा द्रष्टव्याः।

**अशीतिशतमक्रियावादानां मरीचिकुमारोलूककपिलादिदर्शनभेदात् ॥१०॥** मरीचि-कुमारोलूककपिलगार्ग्यव्याघ्रभूतिवाद्वलिकमाठरमौद्गल्यायनप्रभृतिदर्शनभेदादक्रियावादा अशीतिशतसंख्याः प्रत्येतव्याः।

**आज्ञानिकवादाः सप्तषष्टिसंख्याः साकल्यवाष्कलप्रभृतिदृष्टिभेदात् ॥११॥** साकल्य-वाष्कलकुन्थुविसात्यमुग्रिचारायणकाठमाध्यन्दिनीमौदपैप्पल्यादबादरायणस्विष्ठिकृदैतिका-यनवसुजैमिनिप्रभृतिदृष्टिभेदात् सप्तषष्टिसंख्या आज्ञानिकवादा ज्ञेयाः।

**वैनयिकानां द्वात्रिंशद्वशिष्टपाराशरादिमार्गभेदात् ॥१२॥** वशिष्टपाराशरजतुकर्णवाल्मीकिरो-महर्षिणसत्यदत्तव्यासैलापुत्रौपमन्यवेन्द्रदत्तायस्थूलादिमार्गभेदात् वैनयिकाः द्वात्रिंशद्गणना भवन्ति। त एते मिथ्योपदेशभेदाः त्रीणि शतानि त्रिषष्ट्युत्तराणि।

अत्र चोद्यते – बादरायणवसुजैमिनिप्रभृतीनां श्रुतिविहितक्रियानुष्ठायिनां कथमाज्ञा-निकत्वमिति? उच्यते – प्राणिवधधर्मसाधनाभिप्रायात्। न हि प्राणिवधः पापहेतुर्धर्म-साधनत्वमापत्तुमर्हति।

**आगमप्रामण्यात् प्राणिवधो धर्महेतुरिति चेन्न; तस्यागमत्वाऽसिद्धेः॥१३॥** स्यादेतदपौरुषेयो वेदागमोऽस्ति, तस्य कर्तृदोषानुषङ्गाशङ्काभावात् प्रामाण्यम्; अतस्तत्र प्रणीतः प्राणिवधो धर्महेतुरिति; तन्न; किं कारणम्? तस्यागमत्वासिद्धेः। सर्वप्राणिहितानुशासने हि प्रवृत्त आगमः; न हिंसाविधायि वचः आगमो भवितुमर्हति दस्युजनवचनवत्। किञ्च

**अनवस्थानात् ॥१४॥** यथाऽऽद्य पुष्यः, अद्य पुनर्वसू' इति विसंवादिवचोऽनवस्थानादप्रमाणं तथा वेद एव क्वचित् प्रदेशे धर्महेतुः पशुवध उक्तः–

"पशुवधेन सर्वान् कामानवाप्नोति"; "यज्ञो हि भूत्यै सर्वस्य तस्माद्यज्ञे वधो वधः।" इति च, क्वचित् पुनरजैः त्रिवर्षपरमोषितैर्बीजैरजं पिष्टमयं कृत्वा यष्टव्यम्" इति हिंसा परिहृता। अतोऽनवस्थानाच्च वेदागमस्याप्रामाण्यम्। किञ्च,

**परमागमे प्रतिषिद्धत्वात् ॥१५॥** अर्हता भगवता प्रोक्ते परमागमे प्रतिषिद्धः प्राणिवधः, सर्वत्र हिंसाविरतिः श्रेयसीति। अतः परमागमे प्रतिषिद्धत्वान्न धर्महेतुः प्राणिवधः।

**तदसिद्धिरिति चेन्न अतिशयज्ञानाकरत्वात् ॥१६॥** स्यान्मतमार्हतस्य प्रवचनस्य तत्त्वमसिद्धं तस्य पुरुषकृतित्वे सत्ययुक्तेरिति; तन्न; किं कारणम्? अतिशय-ज्ञानाकरत्वात्। यदिदं जीवादिपदार्थस्वरूपनिरूपणं नयप्रमाणाद्यधिगमोपायप्रापितयुक्ति-बन्धमोक्षादिप्रतिपादनसमर्थमित्येवमादीनामतिशयज्ञानानामाकर आर्हत आगमः, रत्नाना-मिवोदधिरतोऽस्य परमागमत्वम्।

**अन्यत्राप्यतिशयज्ञानदर्शनादिति चेन्न; अत एव तेषां संभवात् ॥१७॥** स्यान्मतम-न्यत्राप्यतिशयज्ञानानि दृश्यन्ते कल्पव्याकरणछन्दोज्योतिषादीनि ततोऽनैकान्ति-कत्वान्नायं हेतुरिति; तन्न; किं कारणम्? अत एवैतेषां संभवात्। आर्हतमेव प्रवचनं तेषां प्रभवः। उक्तञ्च –

**"सुनिश्चितं नः परतन्त्रयुक्तिषु स्फुरन्ति याः काश्चन सूक्तसंपदः।**
**तवैव ताः पूर्वमहार्णवोत्थिता जगत्प्रमाणं जिनवाक्यविप्रुषः॥"** इति।

**श्रद्धामात्रमिति चेन्न; भूयसामुपलब्धेः रत्नाकरवत् ॥१८॥** स्यादेतदार्हतमेव प्रवचनं सर्वेषामतिशयज्ञानानां प्रभव इति श्रद्धामात्रमेतन्न युक्तिक्षममिति; तन्न; किं कारणम्? भूयसामुपलब्धेः रत्नाकरवत्। यथा ग्रामनगरपत्तनादिषु दृश्यमानानामपि रत्नानां

तत्प्रभवत्वमध्यवस्यति लोकः, भूयसामुपलब्धेः रत्नाकर एव तेषां प्रभव इत्यध्यवसीयते, तथा सर्वातिशयज्ञाननिधानत्वाज्जैनमेव प्रवचनमाकर इत्यवगम्यते।

**तदुद्भवत्वात्तेषामपि प्रामाण्यमिति चेन्न; निःसारत्वात् काचादिवत् ॥१९॥** अथ मतमेतत् – यदि वेदव्याकरणादीनामर्हत्प्रवचनोद्भवत्वमभ्युपगम्यते, तेषां प्रामाण्यात् तद्विहितहिंसाद्यनुष्ठानं दानादिवन्न दोषकरमिति; तन्न; किं कारणम्? निःसारत्वात्। यथा काचमणिक्षारशम्बूकादीनां रत्नाकरसमुद्भवत्वेऽपि निःसारत्वं तथा वेदादीनां जिनशासनसमुद्रसमुद्भवत्वेऽपि न प्रामाण्यमित्यवसेयम्। किञ्च

**सर्वेषामविशेषप्रसङ्गात् ॥२०॥** यदि हिंसा धर्मसाधनं मत्स्यबन्ध-शाकुनिकसौकरिकादीनां सर्वेषामविशिष्टा धर्मावाप्तिः स्यात्। ततश्चाऽहिंसालक्षणो धर्म इत्येवमादिवचनमयुक्तं स्यात्।

**यज्ञात्कर्मणोऽन्यत्र वधः पापायेति चेन्न; उभयत्र तुल्यत्वात् ॥२१॥** स्यादेतत् - यज्ञे पशुवधः प्रत्यवायहेतुर्न भवत्यन्यत्र पापहेतुरिति नाहिंसालक्षणधर्मविरोध इति; तन्न; किं कारणम्? उभयत्र तुल्यत्वात्। उभयत्र ह्यसौ दुःखहेतुत्वेन तुल्यश्चेतः फलेनापि समेन भवितव्यम्। अन्तर्वेदिगतः पशुवधः प्रत्यवायहेतुः प्राणवियोगहेतुत्वात् बहिर्वेदिपशुवधवत्।

**विपर्ययो वा तादर्थ्यात् सर्गस्येति चेन्न; साध्यत्वात् ॥२२॥** स्यादेतत् – "यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयंभुवा।' इत्यङ्गिसर्गस्य यज्ञार्थत्वात् न तस्य विनियोक्तुः पापमिति, तन्नः किं कारणम्? साध्यत्वात्। साध्यमेतत् – स्वयंभुवा यज्ञार्थं पशवः सृष्टा इति। किञ्च

**अन्यथोपयोगे दोषप्रङ्गात् ॥२३॥** यद्धि यदर्थं तस्यान्यथोपयोगे दोषो दृष्टः यथा श्लेष्मप्रशमनार्थमौषधमन्यथा प्रयुज्यमानं दोषकरं तथा यज्ञार्थः पशुसर्ग इति कृत्वा क्रयविक्रयादिषु क्रियमाणेषु कर्तुरनिष्टफलावाप्तिः प्रसज्येत।

**मन्त्रप्राधान्याददोष इति चेन्न; प्रत्यक्षविरोधात् ॥२४॥** स्यान्मतम् – यथा विषं मन्त्रप्राधान्यादुपयुज्यमानं न मरणकारणम् तथा पशुवधोऽपि मन्त्रसंस्कारपूर्वकः क्रियमाणो न पापहेतुरिति; तन्न; किं कारणम्? प्रत्यक्षविरोधात्। यथा मन्त्रेण संस्क्रियमाणं विषं गौरवहीनं प्रत्यक्षत उपलभ्यते, यथा वा विना रज्जुनिगलादिबन्धेभ्यो जलमनुष्यादिं स्तम्भयन्तः प्रत्यक्षतः प्रतीताः मन्त्रबलादेव केवलात्, तथा यदि मन्त्रेभ्य एव केवलेभ्यो याज्ञे कर्मणि पशून्निपातयन्तः दृश्येरन् मन्त्रबलं श्रद्धीयेत तथा यदि मन्त्रेभ्य एव केवलेभ्यो याज्ञे कर्मणि पशून्निपातयन्तः दृश्येरन् मन्त्रबलं श्रद्धीयेत। दृश्यते तु रज्वादिभिर्मारणम्। तस्मात् प्रत्यक्षविरोधात् मन्यामहे न मन्त्रसामर्थ्यमिति।

**हिंसादोषाविनिवृत्तेः ॥२५॥** अभ्युपगम्योच्यते – यथा शस्त्रादिभिः प्राणिनो व्यापादयन्नशुभाभिसन्धिः पापेन बध्यते तथा मन्त्रैरपि पशून् मारयन् दुष्कर्मबन्धो भवेदेवेति हिंसादोषो न निवर्तते।

**नियतपरिणामनिमित्तस्यान्यथाविधिनिषेधासंभवात् ॥२६॥** नियतं शुभाशुभलक्षणं परिणामं प्रतीत्य पुण्यपापकर्मबन्धो भवति। नासावन्यथा विधातुं निषेद्धुं वा शक्यते। यदि स्यादसञ्चेतितकर्मबन्धाभ्युपगमे बन्धमोक्षप्रक्रियाविरोधः स्यात्।

**कर्तुरसंभवाच्च॥२७॥** "अग्निहोत्रं जुहुयात् स्वर्गकामः" अग्निहवनादिक्रियायाः कर्ता पिण्डो वा स्यात् भौतिकः पुरुषो वा? यदि भौतिकः पिण्डः; तस्याचेतनत्वात् घटादिवत् पुण्यापुण्यलक्षणक्रियासंचेतनाभावात् कर्तृत्वाभावः। अथ पुरुषः स नित्यो वा स्यात्, क्षणिको वा? यदि क्षणिकः;

मन्त्रार्थानुस्मरणतत्प्रयोगानुविधानचिन्तनाद्यभावान्न कर्तृत्वमुपपन्नम्। अथ हि नित्यः स्यात्; पूर्वापरकालतुल्यत्वात् विक्रियाविरहे दूरादेव कर्तृत्वं व्यावृत्तं ततः कर्तुरभावात् क्रियाफलानभिसंबन्धः। "पुरुष एवेदं सर्वं यच्च भूतं यच्च भाव्यम्" इत्येवमाद्युपनिषद्वाक्यप्रामाण्याच्चैकपुरुषैकान्तकल्पनायां वध्यघातकादि-विवेकाभावः। चेतनाशक्तिपरिणाममात्राभ्युपगमे च दृश्यस्य विश्वरूपस्याभावात् प्रत्यक्षविरोधः; प्रमाणतदाभासाविशेषप्रसङ्गोऽस्तु। निर्विकल्पपुरुषतत्त्वकल्पनायां च निर्विकल्पत्वादिविकल्पभावाभावयोः सङ्गरवचनविरोधप्रसङ्गश्चेति विषयतृष्णातुरैः विकल्पितं वैदिकवचनं न प्रमाणिकं कर्तव्यम्।

एवं परोपदेशनिमित्तमिथ्यादर्शनविकल्पा अन्ये च संख्येया योज्याः ऊह्याः, परिणामविकल्पादसंख्येयाश्च भवन्त्यनन्ताश्चानुभागभेदात् यन्नैसर्गिकं मिथ्यादर्शनं तदप्येकद्वित्रिचतुरिन्द्रियासंज्ञिपञ्चेन्द्रियसंज्ञितिर्यङ्म्लेच्छशवरपुलिन्दादिपरिग्रहादनेक-विधम्।

**पञ्चविधं वा॥२८॥** अथवा पञ्चविधं मिथ्यादर्शनमवगन्तव्यम् – एकान्तमिथ्यादर्शनं विपरीतमिथ्यादर्शनं संशयमिथ्यादर्शनं वैनयिकमिथ्यादर्शनमाज्ञानि-कमिथ्यादर्शनं चेति। तत्रेदमेवेत्थमेवेति धर्मिधर्मयोरभिनिवेश एकान्तः, "पुरुष एवेदं सर्वम्" इति वा, नित्य एव वा अनित्य एवेति, सग्रन्थो निर्ग्रन्थः केवली कवलाहारी, स्त्री सिद्ध्यतीत्येवमादिर्विपर्ययः। सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः किं स्याद्वा नवेति मतिद्वैधं संशयः। सर्वदेवतानां सर्वसमयानां च समदर्शनं वैनयिकत्वम्। हिताहितपरीक्षाविरह आज्ञानिकत्वम्।

**अविरतिकषाययोगा द्वादशपञ्चविंशतित्रयोदशभेदाः॥२९॥** अविरतिः कषायः योगः इत्येते द्वादशपञ्चविंशतित्रयोदशभेदाः द्रष्टव्याः। तत्र पृथिव्यप्तेजोवायुवनस्पतित्रसकाय चक्षुःश्रोत्रघ्राणरसनस्पर्शननोइन्द्रियेषु हननासंयमनाविरतिभेदात् द्वादशविधाऽविरतिः।

षोडश कषायाः। चत्वारो मनोयोगाश्चत्वारो वाग्योगा: पञ्च काययोगाः इति त्रयोदशविकल्पो योगः। आहारककाययोगाऽऽहारकमिश्रयोगयोः प्रमत्तसंयते संभवात् पञ्चदशापि भवन्ति।

**प्रमादोऽनेकविधः॥३०॥** भावकायविनयेर्यापथभैक्ष्यशयनासनप्रतिष्ठापनवाक्यशुद्धि-लक्षणाष्टविधसंयमोत्तमक्षमामार्दवार्जवशौचसत्यतपस्त्यागाऽऽकिञ्चन्यब्रह्मचर्यादिविषया-नुत्साहभेदादनेकविधः प्रमादोऽवसेयः।

**समुदायावयवयोर्बन्धहेतुत्वं वाक्यपरिसमाप्तेर्वैचित्र्यात्॥३१॥** मिथ्यादर्शनादीनां बन्धहेतुत्वं समुदायेऽवयवे च वेदितव्यम्। कुतः? वाक्यपरिसमाप्तेर्वैचित्र्यात्। तत्र मिथ्यादृष्टेः पञ्चापि समुदिताः बन्धहेतवः। सासादनसम्यग्दृष्टिसम्यिङ्मथ्या-दृष्ट्यसंयतसम्यग्दृष्टीनामविरत्यादयश्चत्वारः। संयतासंयतस्याविरतिमिश्राः प्रमादकषाय-योगाश्च। प्रमत्तसंयतस्य प्रमादकषाययोगाः। अप्रमत्तादीनां चतुर्णां कषाययोगौ। उपशान्तक्षीणकषायसयोगकेवलिनामेक एव योगः। अयोगकेवली अबन्धहेतुः। तत्र च मिथ्यादर्शनादिविकल्पानां प्रत्येकं बन्धहेतुत्वमवगन्तव्यम्। न हि सर्वाणि मिथ्यादर्शनान्येकस्मिन्नात्मनि युगपत् संभवन्ति, नापि हिंसादयः सर्वे परिणामाः।

**अविरतेः प्रमादस्य चाऽविशेष इति चेन्न; विरतस्यापि प्रमाददर्शनात्॥३२॥** स्यादेतत् – प्रमादोऽप्यविरतिरेवेति पृथग्ग्रहणमनर्थकमिति, तन्न; किं कारणम्? विरतस्यापि प्रमाददर्शनात् विरतस्यपि पञ्चदशप्रमादा: संभवन्ति विकथाकषायेन्द्रिय-निद्राप्रणयलक्षणा:।

**कषायाविरत्योरभेद इति चेन्न कार्यकारणभेदोपपत्ते:॥३३॥** स्यादेतत् कषायाविरत्योर्नास्ति भेद उभयोरपि हिंसादिपरिणामरूपत्वादिति तन्न कारणं? कार्यकारण-भेदोपपत्तेः। कारणभूता हि कषायाः कार्यात्मिकाया हिंसाद्यविरतेरर्थान्तरभूता इति।

आह – प्रपञ्चेनोपपादितान् बन्धहेतून्निरज्ञेष्म, इदं तु सन्दिहमोऽमूर्तेरात्मनो हस्ताद्यसंभवे सत्यादानशक्तिविरहात् कथं बन्धो भवतीति? इमे ब्रूमहे –

**आत्मकर्मबन्धसन्ततेः पूर्वापरीभावानवधारणात् ॥४॥** नैवमवधार्यते - 'पूर्वमात्मा पश्चात् कर्माणि प्राक् वा कर्माण्यवर आत्मेत्येकान्तिकाऽमूर्तत्वनिवृत्तिः। ततः कर्मशरीरसंबन्धी तप्तायःपिण्डाऽऽभ इव –

## सकषायत्वाज्जीवः कर्मणो योग्यान् पुद्गलानादत्ते स बन्धः॥२॥

**पुनः कषायग्रहणमनुवाद इति चेन्न; कर्मविशेषाशयवाचित्वात् जठराग्निवत् ॥१॥** यथा जठराग्न्याशयानुरूपमभ्यवहरणं तथा कषायेषु सत्सु तीव्रमन्दमध्य मकषायाशयानुरूपे स्थित्यनुभवने भवत इत्येतस्य विशेषस्य प्रतिपत्त्यर्थं बन्धहेतुविधाने कषायग्रहणं निर्दिष्टं पुनरनूद्यते।

**जीवाभिधानं प्रचोदितत्वात् ॥२॥** यच्चोदितममूर्तिरहस्तो जीवः कथं कर्मादत्त इति तस्य प्रतिवचनार्थं जीव इत्यभिधीयते।

**जीवनाविनिर्मुक्तत्वाद्वा॥३॥** जीवनमायुस्तदविनिर्मुक्तोऽयं कर्मादत्ते न विनिर्मुक्त इति, अतश्च जीववचनम्।

**कर्मणो योग्यानिति पृथग्विभक्त्युच्चारणं वाक्यान्तरज्ञापनार्थम् ॥४॥** कर्मयोग्यानिति लघुनिर्देशात् सिद्धे कर्मणो योग्यानिति पृथग्विभक्त्युच्चारणं वाक्यान्तरज्ञापनार्थं क्रियते। किं पुनस्तद्वाक्यान्तरम्? 'कर्मणो जीवः सकषायो भवति' इत्येकं वाक्यम्। एतदुक्तं भवति– कर्मण इति हेतुनिर्देशः, कर्मणो हेतोर्जीवः सकषायो भवति, नाकर्मकस्य कषायलेपोऽस्ति, ततः जीवकर्मणोरनादिसंबन्ध इति। द्वितीयं वाक्यम् – 'कर्मणो योग्यान् पुद्गलानादत्ते इति। एतदुक्तं

भवत्यर्थवशाद्विभक्तिपरिणाम इति प्राक्कर्मण इति हेतुनिर्देश इह संबन्धनिर्देशः संपद्यते – सकषायत्वाज्जीवः कर्मणो योग्यान् पुद्गलानादत्त इति।

**पुद्गलवचनं कर्मणस्तादात्म्यख्यापनार्थम् ॥५॥** पुद्गलात्मकं कर्मेत्येतस्य विशेषस्य ख्यापनार्थं पुद्गलग्रहणं क्रियते।

**तदसिद्धमिति चेन्न; अमूर्तेरनुग्रहोपघाताभावात् ॥६॥** स्यादेतत् – पौद्गलिकं कर्मेत्येतदसिद्धमात्मगुणत्वात् तस्येति; तन्न; किं कारणम्? अमूर्तेरनुग्रहोपघाताभावात्। यथा आकाशममूर्ति दिगादीनाममूर्तानां नानुग्राहकमुपघातं च तथैवामूर्ति कर्माऽमूर्तेरात्मनोऽनुग्रहोपघातयोर्हेतुर्न स्यात्।

**आदत्त इति प्रतिज्ञातोपसंहारार्थम् ॥७॥** यत्प्रतिज्ञातं सकषायत्वाज्जीवो बन्धमनुभवति तस्योपसंहारार्थमिदमुच्यते आदत्त इति।

**अतस्तदुपश्लेषो बन्धः ॥८॥** अतो मिथ्यादर्शनाद्यावेशादार्द्रीकृतस्यात्मनः सर्वतो योगविशेषात् तेषां सूक्ष्मैकक्षेत्रावगाहिनामनन्तप्रदेशानां पुद्गलानां कर्मभावयोग्यानामविभागोपश्लेषो बन्ध इत्याख्यायते।

**तद्भावो मदिरापरिणामवत् ॥९॥** यथा भाजनविशेषे प्रक्षिप्तानां विविधरसबीजपुष्पफलानां मदिराभावेन परिणामस्तथा पुद्गलानामप्यात्मनि स्थितानां योगकषायवशात् कर्मभावेन परिणामो वेदितव्यः।

**'स' वचनमन्यनिवृत्त्यर्थम् ॥१०॥** स एष बन्धो नान्योऽस्तीत्यन्यनिवृत्त्यर्थं 'स' वचनं क्रियते, तेन गुणगुणिबन्धो निवर्त्तितो भवति। यदि हि गुणगुणिबन्धः स्यात् मुक्त्यभावः प्रसज्येत, गुणस्वभावापरित्यागाद् गुणिनः, स्वभावपरित्यागे च गुणिनोऽप्यभाव इति मुक्ताभावः।

**करणादिसाधनो बन्धशब्दः॥११॥** करणादिसाधनेष्वयं बन्धशब्दो द्रष्टव्यः। तत्र करणसाधनस्तावत् – बध्यतेऽनेनात्मेति बन्धः। "हलः" इति करणे घञ्। कः पुनरसौ? मिथ्यादर्शनादिः। ननु स बन्धहेतुरुक्तः कथं बन्धो भवितुमर्हति? सत्यमेवमेतदभिन-वद्रव्यकर्मादाननिमित्तत्वाद् बन्धहेतुरपि सन् पूर्वोपात्तकर्महेतुकत्वात् कार्यतामास्कन्दन् तदनुविधानादात्मनोऽस्वतन्त्रीकरणत्वात् करणव्यपदेशमर्हतीति। तद्रञ्जनेनाऽऽत्मना-ऽऽत्मसात्क्रियते इति कर्मसाधनत्वमपि च युक्तिमत्। ज्ञानदर्शनाऽव्याबाधाऽनामाऽगोत्रा-ऽनन्तरायत्वलक्षणं पुरुषसामर्थ्यं प्रतिबध्नाति बन्धः इति कर्तृसाधनत्वमपि चोपपत्तिमत्। एवं बन्धनं बन्ध इति भावसाधनो वाऽस्वतन्त्रीक्रियामात्रविवक्षायाम्। ननु भावसाधने सामानाधिकरणं नोपपद्यते ज्ञानावरणं बन्ध इत्यादि; नैष दोषः; तदव्यतिरेकात् भावस्य तद्वता सामानाधिकरण्यं भवति – यथा ज्ञानमेवात्मेति। एवमितरसाधनयोजना च कर्तव्या।

**तस्योपचयापचयसद्भावः कर्माऽऽयव्ययदर्शनाद् ब्रीहिकोष्ठागारवत्॥१२॥** यथा कोष्ठागारे ब्रीहीणामन्येषां निर्गमादपरेषां च प्रवेशनादुपचयापचयौ दृष्टौ तथाऽ-नादिकार्मणकोष्ठागारस्यान्येषां कर्मणां भोगादादानाच्चेतरेषामुपचयापचयौ स्तः।

आह – किमयं बन्ध एकरूप एवाऽऽहोस्वित् प्रकारा अप्यस्य सन्तीति? अत इदमाह –

## प्रकृतिस्थित्यनुभवप्रदेशास्तद्विधयः॥३॥

**अकर्तरीत्यनुवृत्तेरपादानसाधना प्रकृतिः॥१॥** "स्त्रियां क्तिः" इत्यत्राकर्तरीत्यनुवर्तते तस्मादपादाने प्रकृतिशब्दो व्युत्पाद्यते – प्रक्रियतेऽस्या ज्ञानावरणादेरर्थानवगमादिति प्रकृतिः।

**भावसाधनौ स्थित्यनुभवौ॥२॥** स्थानं स्थितिरनुभवनमनुभव इति भावसाधनत्व-मनयोरवगन्तव्यम्।

**कर्मसाधनः प्रदेशशब्दः॥३॥** प्रदिश्यतेऽसाविति प्रदेशः कर्मणि घञ्।

**प्रकृतिः स्वभाव इत्यनर्थान्तरम्॥४॥** यथा निम्बस्य का प्रकृतिः? तिक्ततास्वभावः। गुडस्य का प्रकृतिः? मधुरतास्वभावः। तथा ज्ञानावरणीयस्य का प्रकृतिः? अर्थानवगमः। प्रकृतिः स्वभाव इत्यनर्थान्तरम्। एवं दर्शनावरणस्या-र्थानालोचनम्, वेद्यस्य सदसल्लक्षणस्य सुखदुःखसंवेदनम्, दर्शनमोहस्य तत्त्वार्थाश्रद्धानम्, चारित्रमोहस्यासंयमः परिणामः, आयुषो भवधारणम्, नाम्नो नारकादिनामकरणम्, गोत्रस्योच्चैर्नीचैःस्थानसंशब्दनम्, अन्तरायस्य दानादिविघ्नकरणम्। तदेवं लक्षणं कार्यं प्रक्रियते प्रभवत्यस्या इति प्रकृतिः।

**तत्स्वभावाप्रच्युतिः स्थितिः॥५॥** तस्य स्वभावस्याप्रच्युतिः स्थितिरित्युच्यते। यथाऽजागोमहिष्यादिक्षीराणां माधुर्यस्वभावादप्रच्युतिः स्थितिः, तथा ज्ञानावरणादीना-मर्थानवगमादिस्वभावादप्रच्युतिः स्थितिः।

**तद्रसविशेषोऽनुभवः॥६॥** यथाऽजागोमहिष्यादिक्षीराणां तीव्रमन्दादिभावेन रस-विशेषस्तथा कर्मपुद्गलानां स्वगतसामर्थ्यविशेषोऽनुभव इति कथ्यते।

**इयत्ताऽवधारणं प्रदेशः॥७॥** कर्मभावपरिणतपुद्गलस्कन्धानां परमाणुपरिच्छेदेनाव-धारणं प्रदेश इति व्यपदिश्यते।

**विधिशब्दः प्रकारवचनः॥८॥** अयं विधिशब्दः प्रकारवचनो द्रष्टव्यः – विधयः प्रकारा इति यावत्। तस्य विधयस्तद्विधयो बन्धप्रकारा इत्यर्थः। त एते प्रकृत्यादय-श्चत्वारो बन्धप्रकाराः।

**तत्र योगनिमित्तौ प्रकृतिप्रदेशौ॥९॥** तेषु बंधविकल्पेषु प्रकृतिबन्धः प्रदेशबन्ध इत्येतौ द्वौ योगनिमित्तौ वेदितव्यौ।

**स्थित्यनुभवौ कषायहेतुकौ॥१०॥** स्थितिबन्धोऽनुभवबन्ध इत्येतौ द्वावपि कषायहेतुकौ प्रत्येतव्यौ। तत्प्रकर्षभेदात्तद्बन्धविचित्रभावः। कारणानुरूपं हि कार्यमिति।

**आद्यो द्वेधा मूलोत्तरप्रकृतिभेदात् ॥११॥** आद्यः प्रकृतिबन्धः द्वेधा विभज्यते। कुतः? मूलोत्तरप्रकृतिभेदात्।

यद्येवं कास्ता मूलप्रकृतय इति? अत्रोच्यते –

## आद्यो ज्ञानदर्शनावरणवेदनीयमोहनीयायुर्नामगोत्रान्तरायाः॥४॥

**सामानाधिकरण्ये सति पूर्वोत्तरवचनविरोध इति चेन्न; उभयनयधर्मविवक्षासद्भावात् ॥१॥** स्यादेतत् – ज्ञानावरणादयोऽन्तरायान्ताः प्रकृतिबन्धो नान्य इति ज्ञानावरणादिभिः सामानाधिकरण्यादाद्यशब्दस्य बहुवचनप्रसङ्ग इति; तन्न; किं कारणम्? उभयनयधर्मविवक्षासद्भावात्। द्रव्यार्थिकनयविषयस्य सामान्यस्य विवक्षातः प्रकृतिबन्ध एक इत्याद्यशब्दादेकवचनप्रयोगः। तस्य विशेषा ज्ञानावरणादयः पर्यायार्थिकनयविषयभूताः प्राधान्येन विवक्षिता इति तेभ्यो बहुवचनप्रयोगः कृतः। दृश्यते हि लोके सत्यपि सामानाधिकरण्ये वचनभेदः, यथा प्रमाणं श्रोतारः, गावो धनमिति।

**यथासंभवं कर्त्रादिसाधनत्वं ज्ञानावरणादिशब्दानाम् ॥२॥** ज्ञानावरणादयः शब्दाः कर्त्रादिषु यथासंभवं साधयितव्याः। तद्यथा – आवृणोति आव्रियतेऽनेन वा इत्यावरणम्। आवरणशब्दः प्रत्येकं परिसमाप्यते ज्ञानावरणं दर्शनावरणमिति। ननु "करणाधिकरणयोः" अनट्; कथं कर्तरि? बहुलापेक्षया। वेद्यत इति वेदनीयम् कर्मण्यनीयः। मोहयति मुह्यतेऽनेनेति वा मोहः। कथं ज्ञानावरणीयं दर्शनावरणीयं

मोहनीयमिति? बहुलापेक्षया कर्त्तर्यनीयः। एत्यनेन गच्छति नारकादिभवमित्यायु; ''जनेरुसिः'' इति प्रकृतेः, एतेर्णिच्चेत्युसिः। नमयत्यामानं नारकादिभावेन नम्यतेऽनेनेति नाम, उणादिषु निपातितः शब्दः। उच्चैर्नीचैश्च गूयते शब्द्यतेऽनेनेति गोत्रम्। अन्तरं मध्यं दातृदेयादीनामन्तरं मध्यमेति ईयते वाऽनेनेत्यन्तरायः।

**बहिर्योगे वा॥३॥** यस्मिन् मध्येऽवस्थिते दात्रादीनां दानादिक्रियाऽभाव; दानादीच्छाया बहिर्भावो वा सोऽन्तरायः।

**प्रयोगपरिणामादागच्छदेवाऽविशिष्टं कर्माऽऽवरणादिविशेषैर्विभज्यतेऽन्नादेर्वाता-दिविकारवत्॥४॥** यथाऽन्नादेरभ्यवह्रियमाणस्यानेकविकारसमर्थवातपित्तश्लेष्मखलरस-भावेन परिणामविभागस्तथा प्रयोगापेक्षयाऽनन्तरमेव कर्माण्यावरणाऽनुभवनमोहापादन-भवधारणनानाजातिनामगोत्रव्यवच्छेदकरणसामर्थ्यवैश्वरूप्येणाऽऽत्मनि सन्निधानं प्रति-पद्यन्ते।

**ज्ञानावरणमेव मोह इति चेन्न; अर्थान्तरभावात्॥५॥** स्यादेतत् – सति मोहे हिताहितपरीक्षणाभावात् ज्ञानावरणादविशेषो मोहस्येति तन्न; किं कारणम्? अर्थान्तरभावात्। याथात्म्यमर्थस्यावगम्यापीदमेवेति सद्भूतार्थाश्रद्धानं यतः स मोहः। ज्ञानावरणेन ज्ञानं तथाऽन्यथा वा न गृह्णाति।

**कार्यभेदे च कारणान्यत्वात्॥६॥** यथा भिन्नलक्षणाङ्कुरदर्शनात् बीजकारणान्यत्वं तथैवाऽज्ञानचारित्रमोहकार्यान्तरदर्शनात् ज्ञानावरणमोहनीयकारणभेदोऽध्यवसीयते।

**ज्ञानदर्शनयोरन्यत्वं प्रत्युक्तम्॥७॥** ज्ञानदर्शनयोरन्यत्वं पुरस्ताद्विहितम्। अतः किम्? ज्ञानदर्शनकार्यान्यत्वात् यत्क्षयक्षयोपशमकारणे ज्ञानदर्शने तयोरपि ज्ञानदर्शना-वरणयोरन्यत्वं सिद्धम्।

**ज्ञानावरणस्याविशेषेऽपि प्रत्यास्रवं मत्यादीनामविशेषो जलवत् ॥८॥** यथाऽम्भो नभसः पतदेकरसं भाजनविशेषात् विष्वग् रसत्वेन विपरिणमते तथा ज्ञानशक्त्युपरोधस्वभावाऽविशेषादुपनिपतत् कर्म प्रत्यास्रवं सामर्थ्यभेदात् मत्याद्या वरणभेदेन व्यवतिष्ठते।

**एतेनेतराणि व्याख्यातानि॥९॥** इतराणि दर्शनावरणादीनि मूलोत्तरप्रकृतिविकल्प वन्त्युक्तेनैव क्रमेण व्याख्यातानि भवन्ति। अत्र चोद्यते –

**पुद्गलद्रव्यस्यैकस्यावरणसुखदुःखादिनिमित्तत्वमुपपत्तिर्विरोधात् ॥१०॥** एकस्य पुद्गलद्रव्यस्याऽऽवरणसुखदुःखादिनिमित्तत्वं नोपपद्यते। कुतः? विरोधात्।

**न वा, तत्स्वाभाव्यादग्नेर्दाहपाकप्रतापप्रकाशसामर्थ्यवत् ॥११॥** न वैष दोषः। किं कारणम्? तत्स्वाभाव्यात्। यथाऽग्नेरेकस्यापि दाहपाकप्रकाशसामर्थ्यं न विरुध्यते, तथैकस्यापि पुद्गलद्रव्यस्यावरणसुखदुःखादिनिमित्तत्वं न विरुध्यते। किञ्च

**अनैकान्तिकत्वात् ॥१२॥** एकानेकलक्षणत्वात् द्रव्यस्य स्यादनेकत्वं स्यादेकत्वम्। द्रव्यार्थादेशात् स्यादेकं पुद्गलद्रव्यम्। अनेकपरमाणुस्निग्धरुक्षबन्धापादितानेकात्मक स्कन्धपर्यायार्थादेशात् स्यादनेकम्। ततश्च नास्ति विरोधः।

**पराभिप्रायेणेन्द्रियाणां भिन्नजातीयानां क्षीराद्युपयोगे वृद्धिवत् ॥१३॥** पराभिप्राये-णेदमुच्यते – यथा पृथिव्यप्तेजोवायुभिरारब्धानामिन्द्रियाणां भिन्नजातीयानां क्षीरघृता-दिष्वेकमप्युपयुज्यमानमनुग्राहकं दृष्टं तथेदमपीति।

**वृद्धिरेकैवेति चेन्न; प्रतीन्द्रियं वृद्धिभेदात् ॥१४॥** स्यादेतत् – वृद्धिरेकैव, तस्या घृताद्यनुग्राहकमिति न विरोध इति तन्न; किं कारणम्? प्रतीन्द्रियं वृद्धिभेदात्। यथैवेन्द्रियाणि भिन्नानि तथैवेन्द्रियवृद्धयोऽपि भिन्नाः।

**तथैवातुल्यजातीयेनानुग्रहसिद्धिः॥१५॥** यथा भिन्नजातीयेन क्षीरेण तेजोजातीयस्य चक्षुषोऽनुग्राहः, तथैवाऽऽत्मकर्मणोश्चेतनाऽचेतनत्वादतुल्यजातीयं कर्माऽऽत्मनोऽनुग्राहकमिति सिद्धम्। किमेतावानेव संख्याविकल्पः? नेत्युच्यते –

**एकादिसंख्येयविकल्पाश्च शब्दतः॥१६॥** एकादयः संख्येया विकल्पा भवन्ति शब्दतः। तत्रैकस्तावत् सामान्यादेकः कर्मबन्धः विशेषाणामविवक्षितत्वात् सेनावनवत्। यथा सैनिकानां तुरगादीनां भेदानामविवक्षायां समुदायादेशादेका सेना। यथा वाऽशोकतिलकवकुलादीनां भेदेनाविवक्षायां सामान्यादेशादेकं वनम्। स एव पुण्यपापभेदाद् द्विविधः, यथा स्वामिभृत्यादेशात् द्विविधा सेना। त्रिविधो बन्धः – अनादिः सान्तः; अनादिरनन्तः; सादिः सान्तश्चेति भुजाकाराऽल्पतरावस्थितभेदाद्वा। प्रकृतिस्थित्यनुभवप्रदेशाच्चतुर्विधः। द्रव्यक्षेत्रकालभवभावनिमित्तभेदात् पञ्चविधः। षड्जीवनिकाय विकल्पात् षोढा व्यपदिश्यते। रागद्वेषमोहक्रोधमानमायालोभहेतुभेदात् सप्ततयीं वृत्तिमनुभवति। ज्ञानावरणादिविकल्पादष्टधा। एवं संख्येया विकल्पाः शब्दतो योज्याः। चशब्देनाध्यवसायस्थानविकल्पादसंख्येयाः। अनन्तानन्तप्रदेशस्कन्धपरिणामविधिरनन्तः, ज्ञानावरणाद्यनुभवाविभागपरिच्छेदापेक्षया वाऽनन्तः।

**क्रमप्रयोजनं ज्ञानेनात्मनोऽधिगमात्॥१७॥** क्रमप्रयोजनमिदानीं वक्तव्यम्? तदुच्यते – ज्ञानावरणं सर्वेषामादावुक्तम्। कुतः? ज्ञानेनात्मनोऽधिगमात्। ज्ञानं हि स्वाधिगमनिमित्तत्वात् प्रधानम्।

**ततो दर्शनावरणमनाकारोपलब्धेः॥१८॥** ततः पश्चात् दर्शनावरणमुच्यते। कुतः? अनाकारोपलब्धेः। साकारोपयोगाद्धि अनाकारोपयोगो निकृष्टोऽनभिव्यक्तग्रहणात्। उत्तरेभ्यस्तु प्रकृष्यतेऽर्थोपलब्धितन्त्रत्वात्।

**तदनन्तरं वेदनावचनं तदव्यभिचारात् ॥१९॥** तदनन्तरं वेदनोच्यते। कुतः? तदव्यभिचारात्। ज्ञानदर्शनाऽव्यभिचारिणी हि वेदना घटादिष्वप्रवृत्तेः।

**ततो मोहाभिधानं तद्विरोधात् ॥२०॥** ततः पश्चात् मोहोऽभिधीयते। कुतः? तद्विरोधात्, तेषां ज्ञानदर्शनसुखदुःखानां विरोधात्। मूढो हि न जानाति न पश्यति न च सुखदुःखं वेदयते। ननु च मूढानामपि सुखदुःखज्ञानदर्शनान्युपलभ्यन्ते। यदि हि विरोधः स्यात् सुखदुःखज्ञानदर्शनानि मिथ्यादृष्ट्यसंयतानां न स्युः नैष दोषः; क्वचिदविरोधदर्शनात् 'विरोधात्' इत्युच्यते न सर्वत्र। मोहाभिभूतस्य हि कस्यचित् हिताहितविवेकादिर्नास्ति।

**आयुर्वचनं तत्समीपे तन्निबन्धनत्वात् ॥२१॥** तत्समीपे आयुर्वचनं क्रियते। कुतः? तन्निबन्धनत्वादायुर्निबन्धनानि हि प्राणिनां सुखादीनि।

**तदनन्तरं नामवचनं तदुदयापेक्षत्वात् प्रायो नामोदयस्य ॥२२॥** तदनन्तरं नामवचनं क्रियते। कुतः? तदुदयापेक्षत्वात् प्रायो नामोदयस्य। आयुरुदयापेक्षो हि प्रायेण गत्याद्युदयो लक्ष्यते।

**ततो गोत्रवचनं प्राप्तशरीरादिलाभस्य संशब्दनाभिव्यक्तेः॥२३॥** परिप्राप्तशरीरादिलाभस्य हि पुंसः गोत्रोदयनिमित्तं शुभाशुभं संशब्दनमभिव्यज्यते, ततो नाम्नोऽनन्तरं गोत्राभिधानं क्रियते।

**परिशेषादन्तेऽन्तरायवचनम् ॥२४॥** अन्यस्याभावात् परिशेषादन्तेऽन्तरायवचनं क्रियते।

आह – उक्तो मूलप्रकृतिबन्धोऽष्टविधः। अथ द्वितीयः पुनरुत्तरप्रकृतिबन्धः कतिविध इति? अत्रोच्यते –

## पञ्चनवद्व्यष्टाविंशतिचतुर्द्विचत्वारिंशद्विपञ्चभेदो यथाक्रमम् ॥५॥

**पञ्चादीनां पञ्चान्तानां द्वन्द्वपूर्वोऽन्यपदार्थनिर्देशः॥१॥** पञ्च च नव च द्वौ चा- ष्टाविंशतिश्च चत्वारश्च द्विचत्वारिंशच्च द्वौ च पञ्च च पञ्चनवद्व्यष्टा-विंशतिचतुर्द्विचत्वारिंशद्विपञ्च, ते भेदा यस्य स भवति पञ्चनवद्व्यष्टाविंशति-चतुर्द्विचत्वारिंशद्विपञ्चभेदः, इति द्वन्द्वगर्भोऽन्यपदार्थनिर्देशो वेदितव्यः।

**द्वितीयग्रहणमिति चेन्न; परिशेषात्सिद्धेः॥२॥** स्यादेतत् – द्वितीयग्रहणं कर्तव्यं द्वितीय उत्तरप्रकृतिबन्धः एवंभेद इति संप्रत्ययः कथं स्यात् इति? तन्न; किं कारणम्? परिशेषात् सिद्धेः। आद्यो मूलप्रकृतिबन्धो व्याख्यातः; ततः परिशेषादुत्तरप्रकृति-बन्धसंप्रत्ययः सिद्ध्यति।

**भेदशब्दः प्रत्येकं परिसमाप्यते॥३॥** अयं भेदशब्दः प्रत्येकं परिसमाप्यते पञ्चभेदो नवभेद इत्यादि।

**यथाक्रमं यथानुपूर्वम् ॥४॥** यो यः क्रमः यथाक्रमं यथानुपूर्वमित्यर्थः। पञ्चविधं ज्ञानावरणम्, नवविधं दर्शनावरणमित्यादि।

यद्येवमाद्यमावरणं केषां पञ्चानामिति? अत्रोच्यते –

## मतिश्रुतावधिमनःपर्ययकेवलानाम् ॥६॥

**मत्यादीन्युक्तलक्षणानि॥१॥** मत्यादीनि ज्ञानान्युक्तलक्षणानि वेदितव्यानि। क्व? आद्येऽध्याये।

**मत्यादीनामिति पाठो लघुत्वादिति चेन्न; प्रत्येकमभिसंबन्धार्थत्वात् ॥२॥** स्यान्मतम् – मत्यादीनि ज्ञानान्युक्तानि, तेषामिहादिशब्दोपलक्षितानां पाठो युक्तो लघुत्वादिति; तन्न; किं कारणम्? प्रत्येकमभिसंबन्धार्थत्वात्। प्रत्येकमभिसम्बन्धार्थमिह प्रतिपदं पाठः क्रियते – मतेरावरणं श्रुतस्यावरणमित्यादि। इतरथा हि मत्यादीनामित्युच्यमाने तेषामेकमावरणमिति संप्रत्ययः स्यात्।

**वचनात् पञ्चसंख्याप्रतीतिरिति चेन्न; प्रत्येकं पञ्चत्वप्रसङ्गात् ॥३॥** स्यादेतत् – पञ्च ज्ञानावरणस्योत्तरप्रकृतयः इत्युक्तम्, मत्यादीनि च ज्ञानानि पञ्चोक्तानि ततो वचनात् पञ्चसंख्यासंप्रत्यय इति तन्न; किं कारणम्? प्रत्येकं पञ्चत्वप्रसङ्गात्। वचनात् मत्यादीनां प्रत्येकं पञ्चावरणानीत्यनिष्टं प्रसज्येत। प्रतिपदग्रहणे पुनः सति सामर्थ्यादिष्टार्थसंप्रत्ययः शक्यते कर्तुम्।

अत्र कश्चिदाह –

**मत्यादीनां सत्त्वासत्त्वयोरावृत्यभावः॥४॥** इदमिह संप्रधार्यम् – सतां मत्यादीनां कर्माऽऽवरणं भवेदसतां वेति? किञ्चातो यदि सताम्; परिप्राप्तात्मलाभत्वात् सत्त्वादेवाऽऽवृतिर्नोपपद्यते। अथाऽसताम् नन्वावरणाभावः। नहि खरविषाणवदसदाव्रियते।

**न वा; आदेशवचनात् ॥५॥** न वैष दोषः। किं कारणम्? आदेशवचनात्। कथञ्चित् सतामावरणं कथञ्चिदसताम्। द्रव्यार्थादेशेन सतां मत्यादीनामावरणम् पर्यायार्थादेशेनाऽसताम्। यद्येकान्तेन सतामावरणं क्षायोपशमिकत्वमेषां न स्यात्। अथैकान्तेनाऽसताम्; एवमपि क्षायोपशमिकत्वं नोपपद्यतेऽसत्त्वात्। सतश्चावरणदर्शनात्। सतो हि नभसः मेघपटलादिनाऽऽवरणं दृश्यते, तथा सतां मत्यादीनामावरणमिति को विरोधः?

**अर्थान्तराभावाच्च प्रत्याख्यानावरणवत् ॥६॥** यथा न कुटीभूतं प्रत्याख्यानं नाम कश्चित् पर्यायोऽस्ति यस्यावरणात् प्रत्याख्यानावरणत्वं भवेत् किन्तु प्रत्याख्यानावरणसान्निध्यादात्मा प्रत्याख्यानपर्यायेण नोत्पद्यत इत्यतः प्रत्याख्याना-वरणस्याऽऽवरणत्वम्, तथा न कुटीभूतानि मत्यादीनि कानिचित् सन्ति येषामावरणात् मत्याद्यावरणानामावरणत्वं भवेत् किन्तु मत्याद्यावरणसन्निधाने आत्मा मत्यादिज्ञानपर्यायैर्नोत्पद्यते इत्यतो मत्याद्यावरणानामावरणत्वम्। अपर आह –

**अभव्यस्योत्तरावरणद्वयानुपपत्तिस्तदभावात् ॥७॥** इदमिह संप्रधार्यम् – मनःपर्ययज्ञानगमनशक्तिः केवलप्राप्तिसामर्थ्यं चाऽभव्यस्य स्याद्वा, न वेति? यदि स्यात्; तस्याऽभव्यत्वानुपपत्तिः। अथ नास्तिः, तदुभयसामर्थ्याभावात् तदावरणकल्पना व्यर्थेति उत्तरस्यावरणद्वयस्य नोपपत्तिः?

**नवा, उक्तत्वात् ॥८॥** न वैष दोषः। किं कारणम्? उक्तत्वात्। उक्तमेतत् 'आदेशवचनात्' इति। द्रव्यार्थादेशेन सतोर्मनःपर्ययकेवलज्ञानयोरावरणम्, पर्यायार्था-देशेनाऽसतोरपि चोक्तम् – 'अर्थान्तराभावाच्च प्रत्याख्यानावरणवत्' इति। यदि द्रव्यार्था-देशेन मनःपर्ययज्ञानं केवलज्ञानं चास्त्यभव्यस्य; भव्यत्वमस्य प्राप्नोति। न सम्यग्द-र्शनज्ञानचारित्रशक्तिभावाभावाभ्यां भव्याभव्यत्वं कल्प्यते। कथं तर्हि?

**सम्यक्त्वादिव्यक्तिभावाऽभावाभ्यां भव्याऽभव्यत्वमिति विकल्पः कनकेतर-पाषाणवत् ॥९॥** यथा कनकभावव्यक्तियोगमवाप्स्यतीति कनकपाषाण इत्युच्यते तदभावादन्धपाषाण इति तथा सम्यक्त्वादिपर्यायव्यक्तियोगार्हो यः स भव्यः तद्विपरीतोऽभव्यः इति चोच्यते।

**ज्ञानावरणादज्ञोऽतिदुःखितः॥१०॥** ज्ञानावरणोदयेनोपरतज्ञानसामर्थ्यः लुप्तस्मृति-धर्मश्रवणनिरुत्सुकः ज्ञानावमानकृतं च बहुदुःखमनुभवति।

आह – उक्तो ज्ञानावरणोत्तरप्रकृतिविकल्पः। इदानीं दर्शनावरणस्य वक्तव्य इति। अत आह –

## चक्षुरचक्षुरवधिकेवलानां निद्रानिद्रानिद्राप्रचला-प्रचलाप्रचलास्त्यानगृद्धयश्च॥७॥

**चक्षुरादीनां दर्शनावरणसंबन्धात् भेदनिर्देशः॥१॥** चक्षुश्चाचक्षुश्चावधिश्च केवलं च चक्षुरचक्षुरवधिकेवलानि तेषां चक्षुरचक्षुरवधिकेवलानाम् दर्शनावरणानीति भेदनिर्देशः दर्शनावरणसंबन्धाद्वेदितव्यः।

**मदखेदक्लमविनोदार्थः स्वापो निद्रा॥२॥** मदखेदक्लमानां विनोदाय यः स्वापः स निद्रेत्युच्यते। कथम्? निपूर्वस्य द्रातेः कुत्साक्रियस्याङि निद्राशब्दनिष्पत्तिः। यत्सन्निधानादात्मा निद्रायते कुत्स्यते सा निद्रा। यतेर्वा स्वप्नक्रियस्य निद्रा।

**उपर्युपरि तद्वृत्तिर्निद्रानिद्रा॥३॥** तस्या निद्राया उपर्युपरि पुनः पुनर्वृत्तिः निद्रानिद्रा इत्युच्यते।

**प्रचलयत्यात्मानमिति प्रचला॥४॥** या क्रियाऽऽत्मानं प्रचलयति सा प्रचलेत्युच्यते, पचादिलक्षणेऽचि। सा पुनः शोकश्रममदादिप्रभवा। विनिवृत्तेन्द्रियव्यापार-स्यान्तःप्रीतिलवमात्रहेतुरासीनस्यापि नेत्रगात्रक्रियासूचिता।

**पौनः पुन्येन सैवाहितावृत्तिः प्रचलाप्रचला॥५॥** सैव प्रचला पुनः पुनरावर्तमाना प्रचलाप्रचलेत्युच्यते।

**स्वप्ने यया वीर्यविशेषाविर्भावः सा स्त्यानगृद्धिः॥६॥** यत्सन्निधानाद्रौद्रकर्मकरणं बहुकर्मकरणं च भवति सा स्त्यानगृद्धिः। कथम्? स्त्यायतेरनेकार्थत्वात् स्वप्नार्थ इह गृह्यते। गृधेरपि दीप्तिः। स्त्याने स्वप्ने गृध्यति दीप्यते यदुदयादात्मा रौद्रं बहु च कर्म करोति सा स्त्यानगृद्धिः।

**नानादिकरणाभावात् वीप्सानुपपत्तिरिति चेन्न; कालादिभेदतस्तद्भेदसिद्धेः॥७॥** स्यान्मतम् – नानाधिकरणविषया वीप्सा, न चेह नानाधिकरणत्वमस्त्येकात्मगोचरत्वात्, ततो वीप्साऽभावादसति द्वित्वे निद्रानिद्राप्रचलाप्रचलेति निर्देशो नोपपद्यत इति; तन्न; किं कारणम्? कालादिभेदात् सद्भेदसिद्धेः। इहैकस्यापि वस्तुनः कालकृताद् गुणभेदाद् भेदो दृश्यते - पटुर्भवान् पटुरासीत् पटुतर ऐषम इति। तथा देशकृतादपि – मथुरायां दृष्टः, पुनः पाटलिपुत्रे दृश्यमान उच्यते – अन्योऽत्र त्वमसि संपन्न इति। एवमिहापि कालादिभेदात् भेदोपपत्तेः वीप्सा युज्यते।

**आभीक्ष्ण्ये वा द्वित्वप्रसिद्धिः॥८॥** अथवा मुहुर्मुहुर्वृत्तिराभीक्ष्ण्यं तस्य विवक्षायां द्वित्वं भवति यथा गेहमनुप्रवेशमास्त इति।

**निद्रादिकर्मसद्वेद्योदयात् निद्रादिपरिणामसिद्धि॥९॥** निद्रादिकर्मणः सद्वेद्यस्य चोदयात् निद्रादिपरिणामसिद्धिर्भवति। तत्र हि शोकक्लमादिविगमदर्शनात् सद्वेद्योदयः स्फुटोऽवगन्तव्यः, असद्वेद्यस्य च मन्दोदयः।

**निद्रादीनामभेदेनाभिसंबन्धः॥१०॥** निद्रा च निद्रानिद्रा च प्रचला च प्रचलाप्रचला च स्त्यानगृद्धिश्च निद्रानिद्रानिद्राप्रचलाप्रचलाप्रचलास्त्यानगृद्धयः। अनुवर्तमानेन दर्शनावरणेनाभेदेनाभिसंबन्धः क्रियते।

**निद्रादीनामभेदेनाभिसंबन्धो विरोध इति चेन्न; विवक्षातः संबन्धात्॥११॥** स्यादेतत् – चक्षुरादीनां भेदनिर्देशः निद्रादीनामभेदनिर्देशः एकमेव दर्शनावरणमपेक्ष्य क्रियमाणो विरुद्ध इति; तन्न; किं कारणम्? विवक्षातः संबन्धात्। विवक्षावशाद्धि भेदेनाभेदेन च संबन्धो न विरुध्यते।

अथ चक्षुरादिदर्शनावरणोदयादात्मा किमवस्थो भवति? अत्रोच्यते –

**चक्षुरचक्षुर्दर्शनावरणोदयाच्चक्षुरादीन्द्रियालोचनविकलः॥१२॥** चक्षुर्दर्शनावरणस्या-चक्षुर्दर्शनावरणस्य चोदयादात्मा चक्षुरादीन्द्रियलोचनविकलो भवत्येकेन्द्रियभावेन विकलेन्द्रियभावेन च, पञ्चेन्द्रियत्वेऽप्युपहतेन्द्रियालोचनसामर्थ्यश्च भवति।

**अवधिदर्शनावरणोदयादवधिदर्शनविप्रमुक्तः॥१३॥** अवधिदर्शनावरणोदयाद् व्यपेताव-धिदर्शनः संपद्यते।

**केवलदर्शनावरणोदयादनाविर्भूतकेवलदर्शनः॥१४॥** केवलदर्शनावरणस्य कर्मण उदयादनाविर्भूतकेवलदर्शनोऽप्रत्यवसितसंसारोऽवतिष्ठते।

**निद्रानिद्रानिद्रोदयात्तमोमहातमोऽवस्था॥१५॥** निद्राया उदयात् तमोऽवस्था निद्रानिद्राया उदयात् महातमोऽवस्था संजायते।

**प्रचलाप्रचलाप्रचलोदयाच्चलनातिचलनभावः॥१६॥** प्रचलोदयादासीनो घूर्णमानश्च-लन्नयनगात्रः पश्यन्नपि न पश्यति। प्रचलाप्रचलोदयादासीनोऽतिघूर्णमानः स्वन्यमान-मपि शरनाराचादिभिः शिरोऽङ्गप्रत्यङ्गादि यत्किञ्चिन्न पश्यति।

आह – यत्तत्कर्म तृतीयगणनामवाप्तं तस्योत्तरप्रकृतिविकल्पो न निर्ज्ञात इति? अत्रोच्यते –

## सदसद्वेद्ये॥८॥

**यस्योदयाद्देवादिगतिषु शारीरमानससुखप्राप्तिस्तत्सद्वेद्यम्॥१॥** देवादिषु गतिषु बहुप्रकारजातिविशिष्टासु यस्योदयाद्दनुगृहीतद्रव्यसंबन्धापेक्षात् प्राणिनां शारीरमानसानेक विधसुखपरिणामस्तत्सद्वेद्यम्। प्रशस्तं वेद्यं सद्वेद्यम्।

**यत्फलं दुःखमनेकविधं तदसद्वेद्यम्॥२॥** नारकादिषु गतिषु नानाप्रकारजाति-विशेषावकीर्णासु कायिकं बहुविधं मानसं वाऽतिदुःसहं जन्मजरामरणप्रियविप्रयोगा-

ऽप्रियसंयोगव्याधिवधबन्धादिजनितं दुःखं यस्य फलं प्राणिनां तदसद्वेद्यम्। अप्रशस्तं वेद्यम् असद्वेद्यम्।

आह – व्याख्यातो वेदनीयस्य प्रकृतिबन्धः। कथं खलु मोहनीयस्याष्टाविंशति-प्रभेदस्य किमाख्याः प्रकारा इति? अत्र ब्रूमः –

**दर्शनचारित्रमोहनीयाऽकषायकषायवेदनीयाख्यास्त्रिद्विनवषोडशभेदाः सम्यक्त्वमिथ्यात्वतदुभयान्यकषायकषायौ हास्यरत्यरतिशोकभय-जुगुप्सास्त्रीपुंनपुंसकवेदा अनन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यान-सञ्ज्वलनविकल्पाश्चैकशः क्रोधमानमायालोभाः॥९॥**

**दर्शनादिभिस्त्रिद्विनवषोडशभेदानां यथासंख्येन संबन्धः॥१॥** दर्शनादयश्चत्वारः त्र्यादयोऽपि, तेषां यथासंख्येन संबन्धो भवति - दर्शनमोहनीयं त्रिभेदम्, चारित्रमोहनीयं द्विभेदम्, अकषायवेदनीयं नवविधम्, कषायवेदनीयं षोडशविधमिति।

**तत्र दर्शनमोहनीयं त्रिभेदं सम्यक्त्वमिथ्यात्वतदुभयानीति॥२॥** तत्र दर्शनमोहनीयं त्रिभेदमवगन्तव्यम्। कुतः? सम्यक्त्वमिथ्यात्वतदुभयानीति। तद्बन्धं प्रत्येकं भूत्वा सत्कर्मापेक्षया त्रैविध्यमास्कन्दति। तत्र यस्योदयात् सर्वज्ञप्रणीतमार्गपराङ्मुखः तत्त्वार्थश्रद्धाननिरुत्सुको हिताहितविभागाऽसमर्थो मिथ्यादृष्टिर्भवति तन्मिथ्यात्वम्। तदेव सम्यक्त्वम्, शुभपरिणामनिरुद्धस्वरसं यदौदासीन्येनावस्थितमात्मानं श्रद्दधानं न निरुणद्धि। तद्वेदयमानः पुरुषः सम्यग्दृष्टिरित्यभिधीयते। तदेव मिथ्यात्वं प्रक्षालनविशेषात् क्षीणाक्षीणमदशक्तिकोद्रववत् सामिशुद्धस्वरसं तदुभयमित्याख्यायते सम्यङ्मिथ्यात्वमिति यावत्। यस्योदयादात्मनोर्ध्दशुद्धमदकोद्रवौदनोपयोगापादितमिश्र-परिणामवदुभयात्मको भवति परिणामः।

**चारित्रमोहनीयं द्वेधा कषायाकषायभेदात् ॥3॥** चारित्रमोहनीयं द्वेधा विभज्यते। कुतः? अकषायकषायभेदात्। कषायप्रतिषेधप्रसङ्ग इति चेन्न; ईषदर्थत्वान्नञः। यथा 'अलोमिका एलका' इति, नास्याः कच्छपवल्लोमाभावः किन्तु छेदयोग्यलोमाभावेऽपि ईषत्प्रतिषेधादलोमिकेत्युच्यते, तथा नेमे कषाया अकषायाः नोकषायाः हास्यादय इति, नैषां सर्वथैवाऽकषायत्वं किन्तु परोपष्टम्भात् श्ववत्प्रवृत्तेरीषत्प्रतिषेधः। यथाश्वा स्वाभ्युपष्टम्भात् प्रवृद्धबलः सत्वजिघांसां प्रति वर्तते स्वामिनिवर्तनाच्च निवर्तते। तथा क्रोधादिकषायावष्टम्भात् प्रवृद्धबलः सत्त्वजिघांसां प्रति वर्तते स्वामिनिवर्तनाच्च निवर्तते, तथा क्रोधादिकषायावष्टम्भादीषत्प्रतिषेधे सति हास्यादीनां प्रवृत्तेः; क्रोधाद्यप्रवृत्तौ च निवृत्तेरकषायत्वम्। कथमीषत्प्रतिषेधगतिरिति चेत्? व्याख्यानतः।

**अकषायवेदनीयं नवविधं हास्यादिभेदात् ॥4॥** अकषायवेदनीयं नवविधम्। कुतः? हास्यादिभेदात्। तत्र यस्योदयात् हास्याविर्भावस्तद्धास्यम्। यदुदयाद्देशादिष्वौत्सुक्यं सा रतिः। अरतिस्तद्विपरीता। यद्विपाकः शोचनं स शोकः। यदुदयादुद्वेगः तद्भयं सप्तविधम्। कुत्साप्रकारो जुगुप्सा। यद्येवं कुत्साग्रहणमेवास्तु लघुत्वात्; न; अर्थविशेषोपपत्तेः। आत्मीयदोषसंवरणं जुगुप्सा, परकीयकुलशीलादिदोषाविष्करणावक्षेपणभर्त्सनप्रवणा कुत्सा। यस्योदयात् स्त्रैणान् भावान्, मार्दवास्फुटत्वक्लैव्यमदनावेशनेत्रविभ्रमास्फालन-सुखपुंस्कामनादीन् प्रतिपद्यते स स्त्रीवेदः। तस्योद्भूतवृत्तित्वमितरयोः पुंनपुंसकयोः सत्कर्मद्रव्यावस्थानान्न्यग्भावः। ननु लोके प्रतीतं योनिमृदुस्तनादि स्त्रीवेदलिङ्गम्; न; तस्य नामकर्मोदयनिमित्तत्वात्, अतः पुंसोऽपि स्त्रीवेदोदयः। कदाचिद्योषितोऽपि पुंवेदोदयोऽप्याभ्यन्तरविशेषात्। शरीराकारस्तु नामकर्मनिर्वर्तितः। एतेनेतरौ व्याख्यातौ। यस्योदयात् पौंस्नान् भावानास्कन्दति स पुंवेदः। यत्कर्मोदयात् नपुंसकान् भावानुपव्रजति स नपुंसकवेदः।

**कषायवेदनीयं षोडशविधमनन्तानुबन्ध्यादिविकल्पात् ॥९॥** कषायवेदनीयं षोडशविधं द्रष्टव्यम्। कुतः? अनन्तानुबन्ध्यादिविकल्पात्। तद्यथा कषायाः क्रोधमानमायालोभाः। स्वपरोपघातनिरनुग्रहाहितक्रौर्यपरिणामोऽमर्षः क्रोधः। स च चतुःप्रकारः – पर्वतपृथ्वीवालुकोदकराजितुल्यः। जात्याद्युत्सेकावष्टम्भात् पराप्रणतिर्मानः शैलस्तम्भास्थिदारुलतासमानश्चतुर्विधः। परातिसन्धानतयोपहितकौटिल्यप्रायः प्रणिधिर्माया प्रत्यासन्नवंशपर्वोपचितमूलमेषशृङ्गगोमूत्रिकाऽवलेखनीसदृशी चतुर्विधा। अनुग्रहप्रवण्ष द्रव्याद्यभिकाङ्क्षावेशो लोभः कृमिरागकज्जलकर्दमहरिद्रारागसदृशश्चतुर्विधः। तेषां क्रोधमानमायालोभानां चतस्रोऽवस्थाः अनन्तानुबन्धिनोऽप्रत्याख्यानावरणाः प्रत्याख्यानावरणाः सञ्ज्वलनाश्चेति। अनन्तसंसारकारणत्वान्मिथ्यादर्शनमनन्तम् तदनुबन्धिनोऽनन्तानुबन्धिक्रोधमानमायालोभाः। यदुदयाद्देशविरतिं संयमासंयमाख्यामल्पामपि कर्तुं न शक्नोति ते देशप्रत्याख्यानमावृण्वन्तोऽप्रत्याख्यानावरणाः क्रोधमानमायालोभाः। यदुदयाद्विरतिं कृत्स्नां संयमाख्यां न शक्नोति कर्तुं ते कृत्स्नं प्रत्याख्यानमावृण्वन्तः प्रत्याख्यानावरणाः क्रोधमानमायालोभाः। समेकीभावे वर्तते, संयमेन सहावस्थानादेकीभूताः ज्वलन्ति, संयमो वा ज्वलत्येतेषु सत्स्वपीति सञ्ज्वलनाः क्रोधमानमायालोभाः। त एते समुदिताः षोडश कषाया भवन्ति।

आह – व्याख्यातमष्टाविंशत्युत्तरप्रकृतिभेदं मोहनीयमथायुषश्चतुर्विधस्य को नाम-निर्देश इति? अत्रोच्यते –

## नारकतैर्यग्योनमानुषदैवानि ॥१०॥

**नारकादिषु भवसंबन्धेनायुर्व्यपदेशः॥१॥** नारकादिषु भवसंबन्धेनायुषो व्यपदेशो भवति – नरकेषु भवं नारकं तिर्यग्योनौ भवं तैर्यग्योनं मनुष्येषु भवं मानुषं देवेषु भवं दैवमिति।

**यद्भावाभावयोर्जीवितमरणं तदायुः॥२॥** यस्य भावादात्मनो जीवितं भवति यस्य चाभावात् मृत इत्युच्यते तद्भवधारणमायुरित्युच्यते।

**अन्नादि तन्निमित्तमिति चेन्न; तस्योपग्राहकत्वात्॥३॥** स्यादेतदन्नादि तन्निमित्तं तल्लाभालाभयोर्जीवितमरणदर्शनादिति; तन्न; किं कारणम्? तस्यानु-ग्राहकत्वात्। यथा घटभवने मृत्पिण्डो मूलकारणं तस्योपग्राहकं दण्डादि तथाऽभ्यन्तरं भवधारणस्य कारणमायुः, अन्नादि तस्योपग्राहकमतश्चैतदेवं यत् क्षीणायुषोऽन्नादि-सन्निधानेऽपि मरणं दृश्यते।

**देवनारकेषु चान्नाद्यभावात्॥४॥** देवेषु नारकेषु चान्नाद्यभावात् भवधारणमायुर धीनमेवेत्यवसेयम्। तेषां हि कादाचित्क आहारोऽनाभोगो व्याख्यातः।

**नरकेषु तीव्रशीतोष्णवेदनेषु यन्निमित्तं दीर्घजीवनं तन्नारकायुः॥५॥** नरकेषु तीव्रशीतोष्णवेदनाकरेषु यन्निमित्तं दीर्घजीवनं भवधारणं भवति तन्नारकायुः।

**क्षुत्पिपासाशीतोष्णादिकृतोपद्रवप्रचुरेषु तिर्यक्षु यस्योदयाद्वसनं तत्तैर्यग्योनम्॥६॥** क्षुत्पिपासाशीतोष्णदंशमशकादिविविधव्यसनविधेयीकृतेषु तिर्यक्षु यस्योदयाद्वसनं भवति तत्तैर्यग्योनमायुरवगन्तव्यम्।

**शारीरमानससुखदुःखभूयिष्ठेषु मनुष्येषु जन्मोदयात् मनुष्यायुषः॥७॥** शारीरेण मानसेन च सुखदुःखेन समाकुलेषु मनुष्येषु यस्योदयाज्जन्म भवति तन्मानुषमायुर वसेयम्।

**शारीरमानससुखप्रायेषु देवेषु जन्मोदयात् देवायुषः॥८॥** शारीरेण मानसेन च सुखेन प्रायः समाविष्टेषु देवेषु यस्योदयाज्जन्म भवति तद्दैवमायुरवगन्तव्यम्। कदाचित् प्रियाविप्रयोगात् महर्द्धिदेवनिरीक्षणात् च्यवनलिङ्गाज्ञाहानिमालाभूषाम्लानदर्शनाच्च मानसं दुःखमाविर्भवतीति ज्ञापनार्थं प्रायग्रहणम्।

आह – व्याख्यातमायुश्चतुर्विधं तदनन्तरमुद्दिष्टं यन्नामकर्म तदुत्तरप्रकृति-समाख्याः का इति? अत्रोच्यते –

**गतिजातिशरीराङ्गोपाङ्गनिर्माणबन्धनसंघातसंस्थानसंहननस्पर्शरसगन्धवर्णानुपूर्व्यागुरुलघूपघातपरघातातपोद्योतोच्छ्वासविहायोगतयः प्रत्येकशरीरत्रससुभगसुस्वरशुभसूक्ष्मपर्याप्तिस्थिरादेययशस्कीर्तिसेतराणि तीर्थकरत्वञ्च॥११॥**

**यदुदयादात्मा भवान्तरं गच्छति सा गतिः॥१॥** यस्य कर्मण उदयवशादात्मा भवान्तरं प्रत्यभिमुखो व्रज्यामास्कन्दति सा गतिः। गम्यत इति गतिरित्युच्यमानेऽपि रूढिवशात् कश्मिंश्चिद्गतिविशेषे वर्तते गोशब्दप्रवृत्तिवत्? इतरथा हि यदाऽऽत्मा न गच्छति न तदा गतिर्भवेत्, सत्कर्मावस्थायां च गतिव्यपदेशो न स्यात्। सा चतुर्विधा नरकगतिस्तिर्यग्गतिर्मनुष्यगतिर्देवगतिश्चेति। यन्निमित्त आत्मनो नारकभावः तन्नरकगतिनाम। एवं शेषेष्वपि योज्यम्।

**तत्राव्यभिचारिसादृश्यैकीकृतोऽर्थात्मा जातिः॥२॥** तासु नारकादिगतिष्वव्यभिचारिणा सादृश्येन एकीकृतोऽर्थात्मा जातिरिति व्यपदेशमर्हति। तन्निमित्तं जातिनाम। तत्पञ्चविधमेकेन्द्रियजातिनाम द्वीन्द्रियजातिनाम त्रीन्द्रियजातिनाम चतुरिन्द्रियजातिनाम पञ्चेन्द्रियजातिनाम चेति। यदुदयादैकेन्द्रिय इति शब्द्यते तदेकेन्द्रियजातिनाम। एवं शेषेष्वपि योज्यम्।

**यदुदयादात्मनः शरीरनिर्वृत्तिस्तच्छरीरनाम॥३॥** यस्योदयादात्मनः शरीरनिर्वृत्तिर्भवति तच्छरीरनाम। तत्पञ्चविधमौदारिकशरीरनाम वैक्रियिकशरीरनामाऽऽहारकशरीरनाम तैजसशरीरनाम कार्मणशरीरनाम चेति। तेषां विशेषो व्याख्यातः।

**यदुदयादङ्गोपाङ्गविवेकस्तदङ्गोपाङ्गनाम ॥४॥**

यस्योदयाच्छिरःपृष्ठोरुबाहूदरनाल-कपाणिपादानामष्टानामङ्गानां तद्भेदानां च ललाटनासिकादीनामुपाङ्गानां विवेको भवति तदङ्गोपाङ्गनाम। तत्त्रिविधमौदारिकशरीराङ्गोपाङ्गनाम वैक्रियिकशरीराङ्गोपाङ्गनामा-हारकशरीराङ्गोपाङ्गनाम चेति।

**यन्निमित्ता परिनिष्पत्तिस्तन्निर्माणम् ॥५॥** अङ्गोपाङ्गानां यन्निमित्ता परिनिष्पत्तिस्तन्निर्माणमिति विज्ञायते। तद्द्विविधम् – स्थाननिर्माणं प्रमाणनिर्माणं चेति। जातिनामकर्मोदयापेक्षं चक्षुरादीनां स्थानं प्रमाणं च निर्वर्तयति। निर्मीयतेऽनेन इति हि निर्माणम्।

**शरीरनामकर्मोदयोपात्तानां यतोऽन्योन्यसंश्लेषणं तद्बन्धनम् ॥६॥** शरीरनामकर्मोदय-वशादुपात्तानां पुद्गलानामन्योन्यप्रदेशसंश्लेषणं यतो भवति तद्बन्धनमित्याख्यायते। तस्याभावे शरीरप्रदेशानां दारुनिचयवदसंपर्कः स्यात्।

**अविवरभावेनैकत्वकरणं संघातनामकर्म ॥७॥** यदुदयादौदारिकादिशरीराणां विवरविरहितान्योन्यप्रदेशानुप्रवेशेनैकत्वापादनं भवति तत् संघातनाम।

**यद्धेतुका शरीराकृतिनिर्वृत्तिस्तत्संस्थाननाम ॥८॥** यदुदयादौदारिकादिशरीराकृति-निर्वृत्तिर्भवति तत्संस्थाननाम प्रत्येतव्यम्। तत् षोढा प्रविभज्यते – समचतुरस्रसंस्थाननाम, न्यग्रोधपरिमण्डलसंस्थाननाम, स्वातिसंस्थाननाम, कुब्जक-संस्थाननाम, वामनसंस्थाननाम, हुण्डसंस्थाननाम चेति। तत्रोर्ध्वाधोमध्येषु समप्रविभागेन शरीरावयवसन्निवेशव्यवस्थापनं कुशलशिल्पिनिर्वर्तितसमस्थितिचक्रवद्-वस्थानकरं समचतुरस्रसंस्थाननाम। नाभेरुपरिष्टाद् भूयसो देहसन्निवेशस्याधस्ता-च्चाल्पीयसो जनकं न्यग्रोधपरिमण्डलसंस्थाननाम, न्यग्रोधाकारसमताप्रापितान्वर्थम्।

तद्विपरीतसन्निवेशकरं स्वातिसंस्थाननाम वल्मीकतुल्याकारम्। पृष्ठप्रदेशभाविबहुपुद्गलप्रचयविशेषलक्षणस्य निर्वर्तकं कुब्जकसंस्थाननाम। सर्वाङ्गोपाङ्गह्रस्वव्यवस्थाविशेष-कारणं वामनसंस्थाननाम। सर्वाङ्गोपाङ्गानां हुण्डसंस्थितत्वात् हुण्डकसंस्थाननाम।

**यदुदयादस्थिबन्धनविशेषस्तत्संहननम्॥९॥** यस्योदयादस्थिबन्धनविशेषो भवति तत्संहननम्। तत्षड्विधम् – वज्रर्षभनाराचसंहनननाम, वज्रनाराचसंहनननाम नाराच-संहनननाम, अर्धनाराचसंहनननाम, कीलिकासंहनननाम, असंप्राप्तसृपाटिकासंहनननाम चेति। तत्र वज्राकारोभयास्थिसन्धि प्रत्येकं मध्ये वलयबन्धनं सनाराचं सुसंहतं वज्रर्षभनाराचसंहननम्। तदेव वलयबन्धनविरहितं वज्रनाराचसंहननम्। तदेवोभयं वज्राकारबन्धनव्यपेतमवलयबन्धनं सनाराचं नाराचसंहननम्। तदेवैकपार्श्वे सनाराचमि तरात्रानाराचमर्धनाराचसंहननम्। तदुभयमन्ते सकीलकंकीलिकासंहननम्। अन्तरसंप्राप्त-परस्परास्थिसन्धि बहिःसिरास्नायुमांसघटितमसंप्राप्तसृपाटिकासंहननम्।

**यदुदयात् स्पर्शरसगन्धवर्णविकल्पा अष्टपञ्चद्विपञ्चसंख्यास्तानि स्पर्श नामादीनि॥१०॥** यस्योदयात् स्पर्शप्रादुर्भावस्तत् स्पर्शनाम। तदष्टविधम् – कर्कशनाम, मृदुनाम गुरुनाम, लघुनाम स्निग्धनाम, रूक्षनाम, शीतनाम, उष्णनाम चेति। यन्निमित्तो रसविकल्पः तद्रसनाम। तत्पञ्चविधम् – तिक्तनाम, कटुकनाम, कषायनाम, आम्लनाम, मधुरनाम चेति। यदुदयप्रभवो गन्धस्तद् गन्धनाम। तद्द्विविधम् – सुरभि-गन्धनाम, असुरभिगन्धनाम चेति। यद्धेतुको वर्णविभागस्तद्वर्णनाम चेति। अचेतनेषु स्पर्शादयः कथमिति चेत्? न कर्मोदयकृतास्ते, पुद्गलस्वभावपरिणामाः।

**यदुदयात् पूर्वशरीराकाराऽविनाशस्तदानुपूर्व्यं नाम॥११॥** यत्पूर्वशरीराकाराऽविनाशः यस्योदयाद्भवति तदानुपूर्व्यं नाम। तच्चतुर्विधम् – नरकगतिप्रायोग्यानुपूर्व्यं नाम

तिर्यग्गतिप्रायोग्यानुपूर्व्यं नाम मनुष्यगतिप्रायोग्यानुपूर्व्यं नाम देवगतिप्रायोग्यानुपूर्व्यं नाम चेति। यदा छिन्नायुर्मनुष्यस्तिर्यग्वा पूर्वेण शरीरेण वियुज्यते तदैव नरकभवं प्रत्यभिमुखस्य तस्य पूर्वशरीरसंस्थानानिवृत्तिकारणं विग्रहगतावुदेति तन्नरकगति प्रायोग्यानुपूर्व्यनाम। एवं शेषेष्वपि योज्यम्। ननु च तन्निर्माणनामकर्मसाध्यं फलं नानुपूर्व्यनामोदयकृतम्? नैष दोषः; पूर्वायुरुच्छेदसमकाल एव पूर्वशरीरनिवृत्तौ निर्माणनामोदयो निवर्तते, तस्मिन्निवृत्तेऽष्टविधकर्म तैजसकार्मणशरीरसंबन्धिन आत्मनः पूर्वशरीरसंस्थानाविनाशकारणमानुपूर्व्यनामोदयमुपैति। तस्य कालो विग्रहगतौ जघन्येनैकः समयः, उत्कर्षेण त्रयः समयाः। ऋजुगतौ तु पूर्वशरीराकारविनाशे सति उत्तरशरीरयोग्यपुद्गलग्रहणान्निर्माणनामकर्मोदयव्यापारः।

**यन्निमित्तमगुरुलघुत्वं तदगुरुलघुनाम॥१२॥** यस्योदयादयस्पिण्डवत् गुरुत्वान्नाधः पतति न वाऽर्कतूलवल्लघुत्वादूर्ध्वं गच्छति तदगुरुलघुनाम। धर्मादीनामजीवानां कथमगुरुलघुत्वमिति चेत्? अनादिपारिणामिकागुरुलघुत्वगुणयोगात्। मुक्तजीवानां कथमिति चेत्? अनादिकर्मनोकर्मसंबन्धानां कर्मोदयकृतमगुरुलघुत्वम्, तदत्यन्तवि-निवृत्तौ तु स्वाभाविकमाविर्भवति।

**यदुदयात् स्वयंकृतोद्बन्धनाद्युपघातस्तदुपघातनाम॥१३॥** यस्योदयात् स्वयंकृतो द्बन्धनमरुत्प्रपतनादिनिमित्त उपघातो भवति तदुपघातनाम।

**यन्निमित्तः परशस्त्राद्याघातस्तत्परघातनाम॥१४॥** परशब्दोऽन्यपर्यायवाची, फलका-द्यावरणसन्निधानेऽपि यस्योदयात् परप्रयुक्तशस्त्राद्याघातो भवति तत्परघातनाम।

**यदुदयान्निर्वृत्तमातपनं तदातपनाम॥१५॥** आतपति येनाऽऽतपनमातपतीति वातपः, तस्य निर्वर्तकं कर्माऽऽतपनाम। तदादित्ये वर्तते।

**यन्निमित्तमुद्योतनं तदुद्योतनाम॥१६॥** उद्योत्यते येनोद्योतनं वोद्योतः, तन्निमित्तं कर्मोद्योतनाम। तच्चन्द्रखद्योतादिषु वर्तते।

**यद्धेतुरुच्छ्वासस्तदुच्छ्वासनाम॥१७॥** उच्छ्वसनमुच्छ्वासः प्राणापानकर्म, तद्यद्धेतुकं तदुच्छ्वासनाम।

**विहाय आकाशं तत्र गतिनिर्वर्तकं विहायोगतिनाम॥१८॥** विहाय आकाशम्, तत्र गतिनिर्वर्तकं विहायोगतिनाम। तद्द्विविधम् – प्रशस्ताऽप्रशस्तविकल्पात्। वरवृषभ द्विरदादिप्रशस्तगतिकारणं प्रशस्तविहायोगतिनाम। उष्ट्रखराद्यप्रशस्तगतिनिमित्तमप्रशस्त-विहायोगतिनाम चेति। सिद्ध्यज्जीवपुद्गलानां विहायोगतिः कुत इति चेत्? सा स्वाभाविकी। ननु च विहायोगतिनामकर्मोदयः पक्ष्यादिष्वेव प्राप्नोति न मनुष्यादिषु। कुतः? विहायसि गत्यभावात्; नैष दोषः; सर्वेषां विहायस्येव गतिरवगाहनशक्तियोगात्।

**एकात्मोपभोगकारणशरीरता यतस्तत्प्रत्येकशरीरनाम॥१९॥** शरीरनामकर्मोदयात् निर्वर्त्यमानं शरीरमेकात्मोपभोगकारणं यतो भवति तत्प्रत्येकशरीरनामकर्म। एकमेकमात्मानं प्रति प्रत्येकम्, प्रत्येकं शरीरं प्रत्येकशरीरम्।

**यतो वह्वात्मसाधारणोपभोगशरीरं तत्साधारणशरीरनाम॥२०॥** बहूनामात्मनामुप भोगहेतुत्वेन साधारणं शरीरं यतो भवति तत्साधारणशरीरनाम। तदुदयवर्तिनो जीवाः कीदृशा इति चेत्? उच्यते – साधारणाऽऽहारादिपर्याप्तिचतुष्टयजन्ममरणप्राणा-पानानुग्रहोपघाताः साधारणजीवाः। यदैकस्याहारशरीरेन्द्रियप्राणापानपर्याप्तिनिर्वृत्तिस्तदैवान्नन्तानामाहारादिपर्याप्तिनिर्वृत्तिः। यदैको जायते तदैवानन्ता जायन्ते। यदैको म्रियते तदैवानन्तानां मरणम्। यदैकस्य प्राणापानग्रहणविसर्गौ तदैवानन्ताः प्राणापानग्रहणविसर्गौ कुर्वन्ति। यदैक

आहारादिनाऽनुगृह्यते तदैवानन्ताः तेनाहारेणानुगृह्यन्ते। यदैकोऽग्निविषादिनोपहन्यते तदैवानन्तानामुपघातः।

**यदुदयाद् द्वीन्द्रियादिषु जन्म तत्त्रसनाम॥२१॥** यस्योदयाद् द्वीन्द्रियादिषु प्राणिषु जङ्गमेषु जन्म लभते तत् त्रसनाम।

**यन्निमित्त एकेन्द्रियेषु प्रादुर्भावः तत् स्थावरनाम॥२२॥** एकेन्द्रियेषु पृथिव्यप्तेजोवायुवनस्पतिकायेषु प्रादुर्भावो यन्निमित्तो भवति तत् स्थावरनाम।

**यदुदयादन्यप्रीतिप्रभवस्तत्सुभगनाम॥२३॥** यदुदयात् रूपवानरूपो वाऽन्येषां प्रीतिं जनयति तत् सुभगनाम।

**यदुदयात् रूपादिगुणोपेतोऽप्यप्रीतिकरस्तद्दुर्भगनाम॥२४॥** रूपादिगुणोपेतोऽपि सन्न यस्योदयात् परेषामप्रीतिहेतुर्भवति तद् दुर्भगनाम।

**यन्निमित्तं मनोज्ञस्वरनिर्वर्तनं तत्सुस्वरनाम॥२५॥** मनोज्ञस्वरनिर्वर्तनं यन्निमित्तमुपजायते प्राणिनस्तत् सुस्वरनाम।

**तद्विपरीतं दुःस्वरनाम॥२६॥** तद्विपरीतफलत्वात् तद्विपरीतममनोज्ञस्वरनिर्वर्तन-करं दुःस्वरनाम।

**यदुदयाद्रमणीयत्वं तच्छुभनाम॥२७॥** यदुदयाद् दृष्टः श्रुतो वा रमणीयो भवत्यात्मा तच्छुभनाम।

**तद्विपरीतमशुभनाम॥२८॥** तद्विपरीतफलं द्रष्टुः श्रोतुश्चारमणीयकरमशुभनाम।

**सूक्ष्मशरीरनिर्वर्तकं सूक्ष्मनाम॥२९॥** यदुदयादन्यजीवानुपग्रहोपघाताऽयोग्यसूक्ष्म शरीरनिर्वृत्तिर्भवति तत्सूक्ष्मनाम।

**अन्यबाधाकरशरीरकारणं बादरनाम॥३०॥** अन्यबाधानिमित्तं स्थूलं शरीरं यतो भवति तद् बादरनाम।

**यदुदयादाहारादिपर्याप्तिनिर्वृत्तिस्तत्पर्याप्तिनाम॥३१॥** यस्योदयादाहारादिपर्याप्ति-भिरात्माऽन्तर्मुहूर्तं पर्याप्तिं प्राप्नोति तत्पर्याप्तिनाम। तत्षड्विधम् - आहारपर्याप्तिनाम, शरीरपर्याप्तिनाम, इन्द्रियपर्याप्तिनाम, प्राणापानपर्याप्तिनाम, भाषापर्याप्तिनाम, मनःपर्याप्ति-नाम चेति।

अत्राह – प्राणापानकर्मोदये वायोर्निष्क्रमणप्रवेशनात्मकं फलमुच्छ्वासकर्मोदयेऽपि तदेवेति नास्त्यनयोर्विशेष इति? उच्यते –

**ऐन्द्रियिकानिन्द्रियभेदात्तद्विशेषः॥३२॥** शीतोष्णसंबन्धजनितदुःखस्य पञ्चेन्द्रियस्य यावुच्छ्वासनिःश्वासौ दीर्घनादौ श्रोत्रस्पर्शनेन्द्रियप्रत्यक्षौ तावुच्छ्वासनामोदयजौ, यौ तु प्राणापानपर्याप्तिनामोदयकृतौ तौ सर्वसंसारिणां श्रोत्रस्पर्शानुपलभ्यत्वादतीन्द्रियौ।

**षड्विधपर्याप्त्यभावहेतुरपर्याप्तिनाम॥३३॥** यस्योदयात् षडपि पर्याप्तीः पर्यापयितु-मात्माऽसमर्थो भवति तदपर्याप्तिनाम।

**स्थिरभावस्य निर्वर्तकं स्थिरनाम॥३४॥** यदुदयात् दुष्करोपवासादितपस्करणेऽप्य-ङ्गोपाङ्गानां स्थिरत्वं जायते तत् स्थिरनाम।

**तद्विपरीतमस्थिरनाम॥३५॥** यदुदयादीषदुपवासादिकरणात् स्वल्पशीतोष्णादि संबन्धाच्चाङ्गोपाङ्गानि कृशीभवन्ति तदस्थिरनाम।

**प्रभोपेतशरीरताकरणमादेयनाम॥३६॥** यस्योदयात् प्रभोपेतशरीरं दृष्टेष्टमुपजायते तदादेय नाम।

**निष्प्रभशरीरकरणमनादेयनाम॥३७॥** निष्प्रभं शरीरं यस्योदयादापद्यते तदनादेयनाम।

अत्राह – तैजसं नाम सूक्ष्मशरीरमस्ति तन्निमित्ता शरीरप्रभा नादेयकर्म-निमित्तेति? उच्यते – सर्वसंसारिजीवशरीरप्रभाऽविशेषप्रसङ्गः स्यात् तैजसस्य सर्वेषां साधारणत्वात्, ततः आदेयकर्मोदयनिमित्ता प्रभेति युक्तम्।

**पुण्यगुणख्यापनकारणं यशस्कीर्त्तिनाम॥३८॥** पुण्यगुणानां ख्यापनं यदुदयाद्भवति तद्यशस्कीर्तिनाम प्रत्येतव्यम्। ननु यशःकीर्तिरित्यनयोर्नास्त्यर्थविशेष इति पुनरुक्तत्व-सङ्गः; नैष दोषः; यशो नाम गुणः, कीर्तनं संशब्दनं कीर्तिः; यशसः कीर्तिः यशस्कीर्त्तिरित्यस्त्यर्थभेदः।

**तत्प्रत्यनीकफलमयशस्कीर्ति नाम॥३९॥** पापगुणख्यापनकारणमयशस्कीर्तिनाम वेदितव्यम्।

**आर्हन्त्यकारणं तीर्थकरत्वं नाम॥४०॥** यस्योदयादार्हन्त्यमचिन्त्यविभूतिविशेष-युक्तमुपजायते तत्तीर्थकरत्वनाम कर्म प्रतिपत्तव्यम्।

**गणधरत्वादीनामुपसंख्यानमिति चेन्न; अन्यनिमित्तत्वात्॥४१॥** यथा तीर्थकरत्वनाम कर्मोच्यते तथा गणधरत्वादीनामुपसंख्यानं कर्तव्यम्, गणधरचक्रधर-वासुदेवबलदेवा अपि विशिष्टर्द्धियुक्तेति चेत्; तन्न; किं कारणम्? अन्यनिमित्तत्वात्। गणधरत्वं श्रुतज्ञानावरणक्षयोपशमप्रकर्षनिमित्तम्, चक्रधरत्वादीन्युच्चैर्गोत्रविशेषहेतुकानि।

**तदेव तीर्थकरत्वस्यापीति चेन्न; तीर्थप्रवर्तनफलत्वात्॥४२॥** स्यान्मतम् – तदेव उच्चैर्गोत्रं तीर्थकरत्वस्यापि निमित्तं भवतु किं तीर्थकरत्वनाम्नेति? तन्न; किं कारणम्? तीर्थप्रवर्तनफलत्वात्। तीर्थप्रवर्तनफलं हि तीर्थकरनामेष्यते न चोच्चैर्गोत्रोदयात् तदवाप्यते चक्रधरादीनां तदभावात्।

किमर्थं विहायोगत्यन्तानां प्रत्येकशरीरादिभिरेकवाक्यत्वं न कृतम्?

**पूर्वेषां प्रतिपक्षविरहादेकवाक्यत्वाभावः॥४३॥** पूर्वे गत्यादयो विहायोगत्यन्ताः प्रतिपक्षविरहिताः, प्रत्येकशरीरादयः सेतरग्रहणेन विशेषयितुमिष्टास्ततस्तेषामेकवाक्यभावो न कृतः।

अथ किमर्थं तीर्थकरत्वस्य पृथ हणम्?

**प्रधानत्वात्तीर्थकरत्वस्य॥४४॥** तीर्थकरत्वं हि प्रधानभूतं सर्वेषु शुभकर्मसु ततस्तस्य पृथग्ग्रहणं क्रियते।

**अन्त्यत्वाच्च॥४५॥** प्रत्यासन्ननिष्ठस्य तस्योदयो जायते ततश्चास्य पृथग्ग्रहणं क्रियते।

आह – उक्ताः सोत्तरप्रकृतिबन्धभेदा विविधभावनामनिर्वर्तनाहितान्वर्थसंज्ञा षष्ठी कर्मप्रकृतिः। अथ सप्तमी कियत्प्रकारेति? अत्रोच्यते –

## उच्चैर्नीचैश्च॥१२॥

**गोत्रं द्विविधमुच्चैर्नीचैरिति विशेषणात्॥१॥** गोत्रं द्विविधं द्रष्टव्यमुच्चैर्नीचैरिति विशेषणादुच्चैर्गोत्रं नीचैर्गोत्रमिति। तत्र कीदृशमुच्चैर्गोत्रं कीदृग्वा नीचैर्गोत्रम्?

**यस्योदयात् लोकपूजितेषु कुलेषु जन्म तदुच्चैर्गोत्रम्॥२॥** लोकपूजितेषु कुलेषु प्रथितमाहात्म्येष्विक्ष्वाकुयदुकुरुहरिज्ञातिप्रभृतिषु जन्म यस्योदयाद्भवति तदुच्चैर्गोत्र मवसेयम्।

**गर्हितेषु यत्कृतं तन्नीचैर्गोत्रम्॥३॥** गर्हितेषु दरिद्राप्रतिज्ञातदुःखाकुलेषु यत्कृतं प्राणिनां जन्म तन्नीचैर्गोत्रं प्रत्येतव्यम्।

आह – व्याख्यातौ गोत्रभेदौ, तदनन्तरमुद्दिष्टस्यान्तरायस्य किमाख्याः प्रकारा इति? अत्रोच्यते –

## दानलाभभोगोपभोगवीर्याणाम् ॥१३॥

**दानादीनामन्तरायापेक्षयाऽर्थव्यतिरेकनिर्देशः॥१॥** अन्तराय इति वर्तते तदपेक्षया दानादीनामर्थव्यतिरेकः क्रियते दानस्यान्तरायो लाभस्यान्तराय इत्यादि।

**दानादिपरिणामव्याघातहेतुत्वात् तद्व्यपदेशः॥२॥** यदुदयाद्दातुकामो न प्रयच्छति, लब्धुकामोऽपि न लभ्यते, भोक्तुमिच्छन्नपि न भुङ्क्ते, उपभोक्तुमिच्छन्नपि नोपभुङ्क्ते, उत्सहितुकामोऽपि नोत्सहते। त एते पञ्चान्तरायव्यपदेशा वेदितव्याः।

**भोगोपभोगयोरविशेष इति चेन्न; गन्धादिशयनादिभेदतस्तद्भेदसिद्धेः॥३॥** स्यान्मतम् – भोगोपभोगयोरविशेषः। कुतः? सुखानुभवननिमित्तत्वाभेदादिति; तन्न; किं कारणम्? गन्धादिशयनादिभेदतस्तद्भेदसिद्धेः। गन्धमाल्यशिरःस्नानवस्त्रान्नपानादिषु भोगव्यवहारः। शयनासनाङ्गनाहस्त्यश्वरथ्यादिषूपभोगव्यपदेशः। ता एता ज्ञानावरणादीनामुत्तरप्रकृतयः संख्येया उक्ताः। ज्ञानावरणस्य नाम्नश्चाऽसंख्येया अपि भवन्तीत्याप्तोपदेशः। व्याख्यातः प्रकृतबन्धविकल्पः, अतः परं स्थितिबन्धविकल्पं व्याख्यास्यामः।

आह – व्याख्यास्यति, भवान् स्थितिबन्धम्, इदं तु संशेमहे किमसावभिहितलक्षणात् पूर्वस्मात् प्रकृतिबन्धात् विशिष्टअर्थान्तरभूतकर्मविषय आहोस्वित् तस्यैव प्रथमकल्पिकस्य कर्मणः प्रकृतिबन्धव्यपदेशवत् पर्यायान्तरनिर्देश इति? अत्र ब्रूमहे – अस्थानेऽयं संशयः। कुतः? यस्मादेतासामेव प्रकृतीनामनेकभेदानां यथास्वमनिर्जीर्णानां यावन्तं कालमवस्थानमाश्रयविनाशाभावात् तस्मिन् स्थितिबन्ध विवक्षा, सा पुनः स्थितिरुभयथा परापरा च। प्रकृष्टात् प्रणिधानात् परा, निकृष्टात् प्रणिधानादपरा। यद्येवमुच्यतां कियत्कालेयं कर्मप्रकृतिरिति?

अत्रोच्यते सति वक्तव्ये –

## आदितस्तिसृणामन्तरायस्य च त्रिंशत्सागरोपमकोटीकोट्यः परा स्थितिः॥१४॥

**आदित इति वचनं मध्यान्तनिवृत्त्यर्थम्॥१॥** मध्येऽन्ते वा तिसृणां ग्रहणं माभूदित्येवमर्थमादित इत्युच्यते। आदावादितः तस् प्रकरणे-"आद्यादिभ्य उपसंख्यानम्" इति तस्।

**तिसृणामिति वचनमवधारणार्थम्॥२॥** आदित इत्युच्यमाने इयतीनां प्रकृतीनां ग्रहणमित्यवधारणं न स्यादतोऽवधारणार्थं तिसृणामित्युच्यते।

**अन्तरायस्य चेति क्रमभेदवचनं समानस्थितिप्रतिपत्त्यर्थम्॥३॥** मूलप्रकृतिक्रम-मुल्लङ्घ्यान्तरायस्य चेत्युच्यते समानस्थितिप्रतिपत्त्यर्थम्। का पुनरसौ समाना स्थितिः? त्रिंशत्सागरोपमकोटीकोट्यः। उक्तपरिमाणं सागरोपमम्।

**कोटीकोट्य इति द्वित्वे बहुत्वानुपपत्तिरिति चेन्न; राजपुरुषवत्तत्सिद्धेः॥४॥** स्यान्मतम् – यथा ग्रामो ग्रामो रमणीय इति वीप्सायां द्वित्वेनैव गतत्वात् बहुवचनं न प्रयुज्यते तथा कोटीकोट्य इत्यत्रापि वीप्सायां द्वित्वेन गतत्वात् बह्वर्थस्य बहुवचनं न प्राप्नोति? तन्न; किं कारणम्? राजपुरुषवत्तत्सिद्धेः। यथा राज्ञः पुरुषः राजपुरुष इति एवं कोटीनां कोट्यः कोटीकोट्यः इति वृत्तिर्द्रष्टव्या।

**पराभिधानं जघन्यस्थितिनिवृत्त्यर्थम्॥५॥** परेत्युच्यते। किमर्थम्? जघन्यस्थिति-निवृत्त्यर्थं परोत्कृष्टा इत्यर्थः। सा कस्येति चेत्? उच्यते-

**संज्ञिपञ्चेन्द्रियपर्याप्तकस्य परा स्थितिः॥६॥** संज्ञिनः पञ्चेन्द्रियस्य पर्याप्तकस्य ज्ञानदर्शनावरणवेदनीयान्तरायाणां त्रिंशत्सागरोपमकोटीकोट्यः परा स्थितिर्भवति।

**अन्येषामागमात् संप्रत्ययः॥७॥** अन्येषामेकेन्द्रियादीनामागमात् संप्रत्ययो भवति। तद्यथैकेन्द्रियपर्याप्तकस्यैकसागरोपमसप्तभागास्त्रयः। द्वीन्द्रियपर्याप्तकस्य पञ्चविंशति-सागरोपमसप्तभागाः त्रयः। त्रीन्द्रियपर्याप्तकस्य पञ्चाशत्सागरोपमसप्तभागास्त्रयः। चतुरि-न्द्रियपर्याप्तकस्य सागरोपमशतसप्तभागास्त्रयः। असंज्ञिपञ्चेन्द्रियापर्याप्तकस्य सागरोपम-सहस्रसप्तभागास्त्रयः। संज्ञिपञ्चेन्द्रियापर्याप्तकस्यान्तःसागरोपमकोटीकोट्यः। एकेन्द्रिया-पर्याप्तकस्य त एव भागाः पल्योपमस्यासंख्येयभागोनाः। द्वित्रिचतुःपञ्चेन्द्रियाऽपर्याप्त-संज्ञिनां त एव भागाः पल्योपमा संख्येयभागोनाः।

यस्य कर्मणः स्थितिमतिलङ्घ्यान्यकर्मस्थितिरभिहिता तस्य खलु वेदनीयानन्त-रोद्देशभाजः –

## सप्ततिर्मोहनीयस्य॥१५॥

सागरोपमकोटीकोट्यः परा स्थितिरित्यनुवर्तते। इयमपि परा स्थितिः संज्ञिपञ्चेन्द्रियपर्याप्तकस्यावसेया। इतरेषामेकेन्द्रियादीनां यथागमम्। तद्यथा पर्याप्तकैकद्वित्रिचतुरिन्द्रियाणामेकपञ्चविंशतिपञ्चाशच्छतसागरोपमाणि यथासंख्यम्। अपर्याप्तकैकेन्द्रियस्य पल्योममासंख्येयभागोना सैव स्थितिः। द्वीन्द्रियादीनामपि सैव पल्योपमासंख्येयभागोना। पर्याप्तकासञ्ज्ञिपञ्चेन्द्रियस्य सागरोपमसहस्रम्। तस्यैवापर्याप्त-कस्य सागरोपमसहस्रं पल्योपमसंख्येयभागोनम्। अपर्याप्तकसंज्ञिनोऽन्तःसागरोपम-कोटीकोट्यः।

आह – निर्दिष्टा पञ्चानां कर्मप्रकृतीनां स्थितिः, अथोपरिष्टयोः का परा स्थितिरिति? अत्रोच्यते –

## विंशतिर्नामगोत्रयोः॥१६॥

सागरोपमकोटीकोट्यः परा स्थितिरित्यनुवर्तते। इयमप्युत्कृष्टा संज्ञिपञ्चेन्द्रिय-पर्याप्तकस्य। एकेन्द्रियादीनां यथागमम्। तद्यथा – एकेन्द्रिपर्याप्तकस्यैकसागरो-पमसप्तभागौ द्वौ। द्वीन्द्रियपर्याप्तकस्य पञ्चविंशतिसागरोपमसप्तभागौ द्वौ। त्रीन्द्रिय-पर्याप्तकस्य पञ्चाशत्सागरोपमसप्तभागौ द्वौ। चतुरिन्द्रियपर्याप्तकस्य सागरोपमशत-सप्तभागौ द्वौ। असंज्ञिपञ्चेन्द्रियपर्याप्तकस्य सागरोपमसहस्रसप्तभागौ द्वौ। संज्ञिपञ्चे-न्द्रियापर्याप्तकस्यान्तःसागरोपमकोट्यः। एकेन्द्रियापर्याप्तकस्य तावेव भागौ पल्योपमा-संख्येयभागोनौ। द्वित्रिचतुःपञ्चेन्द्रियापर्याप्तकासंज्ञिनां सैव स्थितिः पल्योपमासंख्येय-भागोना।

आह – आयुषः कोत्कृष्टा स्थितिरिति? अत्रोच्यते –

## त्रयस्त्रिंशत्सागरोपमाण्यायुषः॥१७॥

**पुनः सागरोपमग्रहणात् कोटीकोटीनिवृत्तिः॥१॥** सागरोपमग्रहणेऽनुवर्तमाने पुनः सागरोपमग्रहणं कोटीकोटीनिवृत्त्यर्थम्। परा स्थितिरित्यनुवर्तते एव। अस्याप्युत्कृष्टा स्थितिः- संज्ञिपर्याप्तकस्यैव। इतरेषां यथागमम्। तद्यथा – असञ्ज्ञिपञ्चेद्रियपर्याप्तकस्य पल्योपमस्यासंख्येयभागः। शेषाणामुत्कृष्टा पूर्वकोटी।

आह – अष्टानामपि कर्मप्रकृतीनां व्याख्याता परा स्थितिः। अथ तासामेव का जघन्या स्थितिरित्युपदिश्यतेऽन्यकर्मस्थितिविशेषाधिकत्वात्। आनुपूर्व्योल्लङ्घनेनामुष्यैव तावत् स्वसंवेद्यफलस्य वेद्यस्य वेदितव्या स्थितिः–

## अपरा द्वादश मुहूर्ता वेदनीयस्य॥१८॥

सूक्ष्मसाम्पराय इति वाक्यशेषः।

अथानुपूर्व्यविशेषात्यये सति मोहायुर्व्यवहितयोरन्त्ययोः का जघन्या स्थितिरिति? उच्यते –

## नामगोत्रयोरष्टौ॥१९॥

अत्रापि सूक्ष्मसाम्पराय इति वाक्यशेषः। मुहूर्ता इत्यनुवर्तते अपरा स्थितिरिति च।

अथान्यासां कर्मप्रकृतीनां का जघन्या स्थितिरिति? उच्यते –

## शेषाणामन्तर्मुहूर्ता॥२०॥

अपरा स्थितिरित्यनुवर्तते। तत्र ज्ञानदर्शनावरणान्तरायाणां सूक्ष्मसाम्पराये मोहनीयस्यानिवृत्तिबादरसाम्पराये, आयुषः संख्येयवर्षायुष्षु तिर्यक्षु मनुष्येषु च।

आह – उभयी ज्ञानावरणादीनामभिहिता स्थितिः। अथानुभवः किंलक्षण इति? अत्रोच्यते –

## विपाकोऽनुभवः॥२१॥

**विशिष्टः पाको नानाविधो वा विपाकः॥१॥** ज्ञानावरणादीनां कर्मपृकृतीनामनुग्रहोपघातात्मिकानां पूर्वास्रवतीव्रमन्दभावनिमित्तो विशिष्टः पाको विपाकः। द्रव्यक्षेत्रकालभवभावलक्षणनिमित्तभेदजनितवैश्वरूप्यो नानाविधो वा पाको विपाकः। असावनुभव इत्याख्यायते। शुभपरिणामानां प्रकर्षभावात् शुभप्रकृतीनां प्रकृष्टोऽनुभवो

शुभप्रकृतीनां निकृष्टः। अशुभपरिणामानां प्रकर्षभावादशुभप्रकृतीनां प्रकृष्टोऽनुभवः शुभप्रकृतीनां निकृष्टः। स एवं प्रत्ययवशादुपात्तोऽनुभवो द्विधा प्रवर्तते – स्वमुखेन परमुखेन च। सर्वासां मूलप्रकृतीनां स्वमुखेनैवानुभवः। उत्तरप्रकृतीनां तु तुल्यजातीयानां परमुखेनापि भवत्यायुर्दर्शनचारित्रमोहवर्जानाम्। न हि नारकायुर्मुखेन तिर्यगायुर्मनुष्यायुर्वा विपच्यते, नापि दर्शनमोहः चारित्रमोहमुखेन, चारित्रमोहो वा दर्शनमोहमुखेन।

आह – अभ्युपेमः प्रागुपचितनानाप्रकारकर्मविपाकोऽनुभव इति। इदं तु न विजानीमः किमयं प्रसंख्यातोऽप्रसंख्यातः इति? अत्रोच्यते – प्रसंख्यातोऽनुभूयत इति ब्रूमहे। कुतः? यतः –

## स यथानाम॥२२॥

**ज्ञानावरणादीनां सविकल्पानां प्रत्येकमन्वर्थसञ्ज्ञानिर्देशादनुभवसंप्रत्ययः॥१॥** ज्ञानावरणस्य फलं ज्ञानाभावः, दर्शनावरणस्य फलं दर्शनशक्त्युपरोध इत्येवमाद्यन्वर्थ-सञ्ज्ञानिर्देशात् सर्वासां कर्मप्रकृतीनां सविकल्पानामनुभवसंप्रत्ययो जायते।

आह – यदि विपाकोऽनुभवः प्रतिज्ञायते, तत्कर्मानुभूतं सत् किमावरण वदवतिष्ठते, आहोस्विन्निष्पीडितसारं प्रच्यवते इति? अत्रोच्यते –

## ततश्च निर्जरा॥२३॥

**पूर्वार्जितकर्मपरित्यागो निर्जरा॥१॥** पीडानुग्रहावात्मने प्रदायाभ्यवहृतौदनादि-विकारवत् व्यप्रर्तते स्थितिक्षयादवस्थानाभावात्।

**सा द्विप्रकारा विपाकजेतरा च॥२॥** सा द्विप्रकारा वेदितव्याः। कुतः? विपाकजेतरा चेति। तत्र चतुर्गतावनेकजातिविशेषावघूर्णिते संसारमहार्णवे चिरं परिभ्रमतः

शुभाशुभस्य कर्मण औदयिकभावोदीरितस्य क्रमेण विपाककालप्राप्तस्य यस्य यथा। सदसद्वेद्यतान्यतरविकल्पबद्धस्य तस्य तेन प्रकारेण वेद्यमानस्य यथानुभवो-दयावलिस्रोतोऽनुप्रविष्टस्यारब्धफलस्य स्थितिक्षयादुदयागतपरिभुक्तस्य या निवृत्तिः सा विपाकजा निर्जरा। यत्कर्माप्राप्तविपाककालमौपक्रमिकक्रियाविशेषसामर्थ्यादनुदीर्णं बलादु-दीर्योदयावलिं प्रवेश्य वेद्यते आम्रपनसादिपाकवत् साऽविपाकनिर्जरा।

**निमित्तान्तरसमुच्चयार्थश्चशब्दः॥३॥** ''तपसा निर्जरा इति वक्ष्यते, तस्य समुच्चयार्थश्चशब्दः क्रियते। ततश्च भवत्यन्यतश्चेति।

**संवरात्परत्र पाठ इति चेन्न; अनुभवानुवादपरिहारार्थत्वात्॥४॥** स्यान्मतम् – संवरान्निर्जरा परत्र पठितव्या 'यथोद्देशः तथा निर्देशः' इति; तन्न; किं कारणम्? अनुभवानुवादपरिहारार्थत्वात्, तत्र हि पाठे क्रियमाणे विपाकोऽनुभव इति पुनरनुवादः कर्तव्यः स्यात्।

**पृथङ्निर्जरावचनमनर्थकं बन्धेऽन्तर्भावादिति चेन्न; अर्थाऽपरिज्ञानात्॥५॥** स्यान्मतं यथा पुण्यपापयोः पृथग्ग्रहणं न कृतं बन्धेऽन्तर्भावात्तथा निर्जराऽप्यु-क्तक्रमेणानुभवबन्धेऽन्तर्भवतीति पृथगस्या ग्रहणमनर्थकमिति। तन्न, किं कारणमर्था-परिज्ञानात्। फलदानसामर्थ्यमनुभव इत्युच्यते। ततोऽनुभूतानामात्तवीर्याणां पुद्गलानां निवृत्तिर्निर्जरेत्ययमर्थभेदः। एवञ्च कृत्वा ततश्चेत्यपादाननिर्देश उपपन्नो भवतीतरथा हि भेदाभावान्नोपपद्यते।

**लघ्वर्थमिहैव तपसेति वक्तव्यमिति चेन्न संवरानुग्रहतन्त्रत्वात्॥६॥** स्यादेतत् – लघ्वर्थमिहैव 'ततो निर्जरा तपसा च' इति वक्तव्यं पुनर्निर्जराग्रहणमाकर्षमिति, तन्न; किं कारणम्? संवरानुग्रहतन्त्रत्वात् - तपसा निर्जरा च भवति संवरश्चेति।

**धर्मेऽन्तर्भावात् संवरहेतुत्वमिति चेन्न; पृथग्ग्रहणस्य प्राधान्यख्यापनार्थत्वात् ॥७॥** स्यान्मतमुत्तमक्षमामार्दवार्जवादियोगे उत्तमं तपः संवरहेतुरिति वक्ष्यते ततस्तत्रान्तर्भावात् संवरहेतुत्वसिद्धेरिह वचनाच्च निर्जराहेतुत्वनिर्ज्ञानात् पृथक् तत्र तपोग्रहणमनर्थकमिति; तन्न; किं कारणम्? पृथग्ग्रहणस्य प्राधान्यख्यापनार्थत्वात्। सर्वेषु संवरनिर्जराहेतुषु तपः प्रधानभूतमित्येतस्य ज्ञापनार्थं पुनस्तपोग्रहणं क्रियते। उक्तं च –

**"कायमणोवचिगुत्तो तवसा च चेट्ठदे अणेयविहं।**
**सो कम्मणिज्जराए विपुलाए वट्टदे मणुस्सो त्ति॥"**

तत इह तपोवचनं गौरवं जनयतीति न कृतम्।

ताः पुनः कर्मप्रकृतयो द्विविधाः – घातिका अघातिकाश्चेति। तत्र ज्ञानदर्शनावरणमोहान्तरायाख्या घातिकाः। इतरा अघातिकाः। घातिकाश्चापि द्विविधाः सर्वघातिका देशघातिकाश्चेति। तत्र केवलज्ञानावरणनिद्रानिद्राप्रचलाप्रचलास्त्यानगृद्धिनिद्राप्रचलाकेवलदर्शनावरणद्वादशकषायदर्शनमोहाख्याः विंशतिप्रकृतयः सर्वघातिकाः। ज्ञानावरणचतुष्कदर्शनावरणत्रयान्तरायपञ्चकसञ्ज्वलननोकषायसंज्ञिकाः देशघातिकाः। अवशिष्टाः प्रकृतयोऽघातिकाः। तथेदमपरमवसेयम् – शरीरनामादयः स्पर्शान्ता अगुरुलघूपघातपरघातातपोद्योतप्रत्येकशरीरसाधारणशरीरस्थिरास्थिरशुभाशुभनिर्माणनामाख्याश्च पुद्गलविपाकप्रदाः। आनुपूर्व्यनाम क्षेत्रविपाककरम्। आयुर्भवधारणफलम्। अवशिष्टाः प्रकृतयो जीवविपाकहेतव इति। एवमनुभवबन्धो व्याख्यातः।

इदानीं प्रदेशबन्धो वक्तव्यः, तस्मिंश्च वक्तव्ये सतीमे निर्देष्टव्याः – किंहेतवः कदा, कुतः, किस्वभावाः, कस्मिन् किंपरिमाणाश्चेति? तदर्थमिदं यथासंख्यपरिगृहीततत्प्रश्नापेक्षा भेदं सूत्रं प्रणीयते –

## नामप्रत्ययाः सर्वतो योगविशेषात् सूक्ष्मैकक्षेत्रावगाहस्थिताः सर्वात्मप्रदेशेष्वनन्तानन्तप्रदेशाः॥२४॥

नाम्नः प्रत्यया नामप्रत्ययाः। नामेति सर्वाः कर्मप्रकृतयोऽभिधीयन्ते, ''स यथानाम'' इति वचनात्।

**नामासां प्रत्यय इति चेन्न; समयविरोधात् ॥१॥** अथ मतमेतत् – नाम प्रत्ययो यासां ताः नामप्रत्यया इति; तन्न; किं कारणम्? समयविरोधात्। एवं हि विग्रहे क्रियमाणे नामकर्मैव सर्वासां प्रकृतीनां प्रत्यय इति प्राप्तम्, तच्च समयविरुद्धम्। अनेन हेतुभाव उक्तः।

**सर्वेषु भवेषु सर्वतः॥२॥** ''दृश्यन्तेऽन्यतोऽपि'' इति तसि कृते सर्वेषु भवेषु सर्वत इति भवति। अनेन कालोपादानं कृतमेकैकस्य जीवस्यातिक्रान्ता अनन्ता भवा आगामिनः संख्येया असंख्येया अनन्ता वा भवा भवन्ति, तेषु सर्वेष्वेवेति।

**योगविशेषादिति वचनं निमित्तनिर्देशार्थम् ॥३॥** योगो व्याख्यातः कायवाङ्मन-स्कर्मलक्षणः। परस्परतो विशिष्यते इति विशेषः। ततो योगविशेषान्निमित्तात् कर्मभावेन पुद्गला आदीयन्त इति योगविशेषादित्यनेन निमित्तनिर्देशः कृतो भवति।

**सूक्ष्मग्रहणं ग्रहणयोग्यस्वभावप्रतिपादनार्थम् ॥४॥** ग्रहणयोग्याः पुद्गलाः सूक्ष्मा न स्थूला इति प्रतिपादनार्थं सूक्ष्मग्रहणं क्रियते।

**एकक्षेत्रावगाहवचनं क्षेत्रान्तरनिवृत्त्यर्थम् ॥५॥** आत्मप्रदेशकर्मपुद्गलैकाधिकरण-व्यतिरिक्तक्षेत्रान्तरनिवृत्त्यर्थमेकक्षेत्रावगाह इति वचनं क्रियते।

**स्थिता इति वचनं क्रियान्तरनिवृत्त्यर्थम् ॥६॥** स्थिताः कर्मभावमापद्यन्ते न गच्छन्त इति क्रियान्तरनिवृत्त्यर्थं स्थिता इत्युच्यते। एवं सूक्ष्मादिग्रहणेन कर्मयोग्यस्वभावानुवर्णनं कृतं भवति।

**सर्वात्मप्रदेशेष्विति वचनमेकप्रदेशाद्यपोहार्थम् ॥७॥** एकद्वित्रिचतुरादिप्रदेशेष्वात्मनः कर्मप्रदेशाः न प्रवर्तन्ते, क्व तर्हि? ऊर्ध्वमधस्तिर्यक्षु सर्वेष्वात्मप्रदेशेषु व्याप्य स्थिता इति प्रदर्शनार्थं सर्वात्मप्रदेशेष्वित्युच्यते।

**अनन्तानन्तप्रदेशवचनं प्रमाणान्तरव्यपोहार्थम् ॥८॥** न संख्येयाः नचाऽसंख्येयाः नाप्यनन्ताः इति प्रतिपादनार्थमनन्तानन्तप्रदेशा इत्युच्यन्ते। ते खलु पुद्गलस्कन्धा अभव्यानन्तगुणाः सिद्धानन्तभागप्रमितप्रदेशाः घनाङ्गुलासंख्येयभागक्षेत्रावगाहिनः एकद्वित्रिचतुःसंख्येयासंख्येयसमयस्थितिकाः पञ्चवर्णरसद्विगन्धचतुःस्पर्शभावाः अष्टविध-कर्मप्रकृतियोग्याः योगवशादात्मनाऽऽत्मसात्क्रियन्त इति प्रदेशबन्धः समासतो वेदितव्यः।

आह – बन्धपदार्थान्तरं पुण्यपापोपसंख्यानं चोदितम्, तद्बन्धेऽन्तर्भूतमिति प्रत्याख्यातम्। तत्रेदं वक्तव्यं कोऽत्र पुण्यबन्धः कः पापबन्ध इति? तत्र पुण्यप्रकृतिपरिगणनार्थमिदमुच्यते –

## सद्वेद्यशुभायुर्नामगोत्राणि पुण्यम् ॥२५॥

**शुभग्रहणमायुरादीनां विशेषणम् ॥१॥** शुभं प्रशस्तमित्यर्थः, तद्ग्रहणमायुरादीनां विशेषणं द्रष्टव्यम् – शुभायुः, शुभनाम शुभगोत्रमिति।

**शुभायुस्त्रिविधम् ॥२॥** तिर्यगायुर्मनुष्यायुर्देवायुरित्येतत्त्रितयं शुभायुरित्युच्यते।

**शुभनाम सप्तत्रिंशद्विकल्पम् ॥३॥** शुभनाम सप्तत्रिंशद्विकल्पमवगन्तव्यम्। तद्यथा – मनुष्यगतिः, देवगतिः पञ्चेन्द्रियजातिः, पञ्च शरीराणि, त्रीण्यङ्गोपाङ्गानि, समचतुरस्रसंस्थानम्, वज्रर्षभनाराचसंहननम्, प्रशस्तवर्णगन्धरसस्पर्शाः, मनुष्यगति-देवगत्यानुपूर्व्यद्वयम्, अगुरुलघुपरघातोच्छ्वासाऽतपोद्योतप्रशस्तविहायोगतयः, त्रसबादर-पर्याप्तिप्रत्येकशरीरस्थिरशुभसुभगसुस्वरादेययशस्कीर्तयः निर्माणं तीर्थकरनाम चेति। शुभमेकमुच्चैर्गोत्रम् सद्वेद्यमित्येता द्वाचत्वारिंशत्प्रकृतयः पुण्यसंज्ञा इति।

## अतोऽन्यत् पापम् ॥२६॥

अस्मात् पुण्यसंज्ञककर्मप्रकृतिसमूहादन्यत् कर्म पापमित्युच्यते। तद् द्व्यशीतिविधम्। तद्यथा – ज्ञानावरणप्रकृतयः पञ्च, दर्शनावरणस्य नव, मोहनीयस्य षड्विंशतिः, पञ्चान्तरायस्य, नरकगतिः, तिर्यग्गतिः, चतस्रो जातयः, पञ्च संस्थानानि, पञ्च संहननानि, अप्रशस्तवर्णगन्धरसस्पर्शाः, नरकगतितिर्यग्गत्यानुपूर्व्यद्वयम्, उपघाताऽप्रशस्तविहायोगतिस्थावरसूक्ष्माऽपर्याप्तसाधारणशरीराऽस्थिराऽशुभदुर्भगदुःस्वरा ऽनादेयाऽयशस्कीर्तयश्चेति नामप्रकृतयः चतुस्त्रिंशत्, असद्वेद्यम्, नरकायुः, नीचैर्गोत्रमिति।

एवं व्याख्यातः सप्रपञ्चो बन्धपदार्थोऽवधिमनःपर्ययकेवलज्ञानप्रत्यक्षप्रमाणगम्य-स्तदुपदिष्टागमानुमेयः।

इति तत्त्वार्थवार्तिके व्याख्यानालङ्कारेऽष्टमोऽध्यायः समाप्तः॥८॥

## अथ नवमोऽध्यायः

अत्राह – योऽयमनादिसन्ततिः पौनर्भविकसुखदुःखहेतुरष्टविधविशेषोपचितमूर्तिः नानाजातिविग्रहोत्पादनप्रवणः पौरुषेयः सर्वात्मप्रदेशावेष्टनसमर्थः कर्मबन्धः स केनचिदुपायेनापि नाम कस्यचिद्दिनात्यन्तिकः स्यादिति? अत्रोच्यते – भवति हि केषाञ्चिदात्यन्तिकस्तद्विनाशः यस्मात्तदर्थमेव भगवद्भिरर्हद्भिरुपदिष्टः –

## आस्रवनिरोधः संवरः॥१॥

अथवा, आह – कथं पुनरेतदाहितवैचित्र्यं नानास्रवापादितं ज्ञानावरणादिकर्म सम्बन्धं नोपयादिति? अत्रोच्यते – संवरात्। कोऽसौ संवर इति? अत आह – आस्रवनिरोधः संवर इति। अथवा, बन्धपदार्थो निर्दिष्टः। इदानीं तदनन्तरोद्देशभाजः संवरस्य निर्देशः प्राप्तकाल इति; अत इदमाह – आस्रवनिरोधः संवर इति।

अथ कोऽयमास्रवनिरोधः?

**कर्मागमनिमित्ताऽप्रादुर्भूतिरास्रवनिरोधः॥१॥** कर्मागमनिमित्तं बहुविकल्पं व्याख्या-तम्, तस्य कायवाङ्मनःप्रयोगस्य स्वात्मलाभहेत्वसन्निधानादप्रादुर्भूतिरास्रवनिरोध इत्युच्यते।

आह – यद्ययमास्रवनिरोधो व्याख्यायतामिदानीं संवर इति? अत्राभिधीयते – स न व्याख्यातव्यः। किं कारणम्? यस्मात् –

**तन्निरोधे सति तत्पूर्वककर्मादानाभावः संवरः॥२॥** कारणाभावात् कार्याभाव इति तस्मिन्नास्रवे निरुद्धे तत्पूर्वकस्यानेकदुःखबीजजननस्य कर्मणः उपनिपाताभावो यः स संवरः। 'अभिमतः' इति वाक्यशेषः।

**तथानिर्देशः कर्तव्य इति चेन्न; कार्ये कारणोपचारात्॥३॥** स्यादेतत् – यद्ययमर्थ इष्टस्तथा निर्देशः कर्तव्यः यथा गमको भवत्यास्रवनिरोधे सति संवरः, आस्रवनिरोधादिति वा? तन्न; किं कारणम्? कार्ये कारणोपचारात्। यथा अन्नं वै प्राणा इत्यन्नकार्येषु प्राणेषु अन्नोपचारस्तथाऽऽस्रवनिरोधकार्ये संवरे आस्रवनिरोधोपचारः कृतः।

**निरुध्यतेऽनेन निरोध इति वा॥४॥** अथवा, नायं भावसाधनः निरुद्धिर्निरोध इति। किं तर्हि? करणसाधनः – निरुध्यते येन स निरोध इति। तथा संवरशब्दोऽपि करणसाधनः – संव्रियतेऽनेनेति। कः पुनरसौ? गुप्त्यादिः वक्ष्यमाणः। तेन ह्युभयं क्रियते इति सामानाधिकरण्यमुपपद्यते।

**योगविभागो वा॥५॥** अथवा, योगविभागोऽत्र द्रष्टव्यः, आस्रवनिरोधो 'हितार्थिना कर्तव्यः' इति वाक्यशेषः। तस्य किं प्रयोजनमिति चेत्? अत आह – संवर इति। संवरः प्रयोजनमस्येत्यर्थः। कः पुनरसौ?

**मिथ्यादर्शनादिप्रत्ययकर्मसंवरणं संवरः॥६॥** मिथ्यादर्शनादयः प्रत्यया व्याख्याताः, तदुपादानस्य कर्मणः संवरणं संवर इति निर्ध्रियते।

**स द्वेधा द्रव्यभावभेदात्॥७॥** संवरो द्वेधा व्यवतिष्ठते। कुतः? द्रव्यभावभेदात्।

**संसारनिमित्तक्रियानिवृत्तिर्भावसंवरः॥८॥** आत्मनो द्रव्यादिहेतुकभवान्तरावाप्तिः संसारः, तन्निमित्तक्रियापरिणामस्य निवृत्तिर्भावसंवर इति व्यपदिश्यते।

**तन्निरोधे तत्पूर्वककर्मपुद्गलादानविच्छेदो द्रव्यसंवरः॥९॥** तस्य संसारकारणस्य भावबन्धस्य निरोधे तत्पूर्वकस्य कर्मपुद्गलस्य निरासो द्रव्यसंवर इति निश्चीयते।

**तद्विभावनार्थं गुणस्थानविभागवचनम्॥१०॥** तस्य संवरस्य विभावनार्थं गुणस्थानविभागवचनं क्रियते। तद्यथा –

**मिथ्यादृष्टिसासादनसम्यग्दृष्टिसम्यङ्मिथ्यादृष्ट्यसंयतसम्यग्दृष्टिसंयतासंयतप्रमत्त-संयताऽप्रमत्तसंयताऽपूर्वकरणाऽनिवृत्तिबादरसाम्परायसूक्ष्मसाम्परायोपशमकक्षपकोपाशान्त-क्षीणकषायवीतरागछद्मस्थसयोग्ययोगकेवलिभेदात् चतुर्दशगुणस्थानविकल्पः॥११॥** मिथ्या-दृष्टिः सासादनसम्यग्दृष्टिः सम्यङ्मिथ्यादृष्टिरसंयतसम्यग्दृष्टिः संयतासंयतः प्रमत्तसंयतोऽ-प्रमत्तसंयतोऽपूर्वकरणोपशमकक्षपकावनिवृत्तिबादरसाम्परायोपशमकक्षपकौ सूक्ष्मसाम्परायो-पशमकक्षपकावुपशान्तकषायवीतरागछद्मस्थः क्षीणकषायवीतरागछद्मस्थः सयोगकेवल्य-योगकेवली चैवं भेदात् चतुर्दशगुणस्थानविकल्पो वेदितव्यः।

**तत्र मिथ्यादर्शनोदयवशीकृतो मिथ्यादृष्टिः॥१२॥** तेषु मिथ्यादर्शनकर्मोदयेन वशीकृतो जीवो मिथ्यादृष्टिरित्यभिधीयते। यत्कृतं तत्त्वार्थानामश्रद्धानम्। तत्र ज्ञानावरणक्षयोपशमापादितानि त्रीण्यपि ज्ञानानि मिथ्याज्ञानव्यपदेशभाञ्जि भवन्ति। तस्य विकल्पाः प्राग्व्याख्याताः। ते सर्वे समासेन द्विधा व्यवतिष्ठन्ते – हिताहितपरीक्षाविरहिताः परीक्षकाश्चेति। तत्रैकेन्द्रियादयः सर्वे संज्ञिपर्याप्तकवर्जिताः हिताहितपरीक्षाविरहिताः, पर्याप्तका उभयेऽपि भवन्ति।

**यदुदयाभावेऽनन्तानुबन्धिकषायोदयविधेयीकृतः सासादनसम्यग्दृष्टिः॥१३॥** तस्य मिथ्यादर्शनस्योदये निवृत्तेऽनन्तानुबन्धिकषायोदयकलुषीकृतान्तरात्मा जीवः सासादन-सम्यग्दृष्टिरित्याख्यायते।

मिथ्यादर्शनोदयनिवृत्तिः कथमिति चेत्? उच्यते – अनादिमिथ्यादृष्टिर्भव्यः षड्विंशतिमोहप्रकृतिसत्कर्मकः सादिमिथ्यादृष्टिर्वा षड्विंशतिमोहप्रकृतिसत्कर्मकः सप्त-विंशतिमोहप्रकृतिसत्कर्मको वाऽष्टाविंशतिमोहप्रकृतिसत्कर्मको वा प्रथमसम्यक्त्वं गृहीतुमारभमाणः शुभपरिणामाभिमुखोऽन्तर्मुहूर्तमनन्तगुणवृद्ध्या वर्धमानविशुद्धिः चतुर्षु मनोयोगेष्वन्यतमेन मनोयोगेन, चतुर्षु वाग्योगेष्वन्यतमेन वाग्योगेनौ-

दारिकवैक्रियिककाययोगयोरन्यतरेण काययोगेन वा समाविष्टः हीयमानान्यतमकषायः साकारोपयोगः, त्रिषु वेदेष्वन्यतमेन वेदेन संक्लेशविरहितो वर्धमानशुभपरिणामप्रतापेन सर्वकर्मप्रकृतीनां स्थितिं ह्रासयन्नशुभप्रकृतीनामनुभागबन्धमपसारयन् शुभप्रकृतीनां रसमुद्वर्तयन् त्रीणि करणानि कर्तुमुपक्रमते अथाप्रवृत्तकरणमपूर्वकरणमनिवृत्तिकरणं चेति। तानि त्रीण्यपि करणानि प्रत्येकमन्तर्मुहूर्तकालानि। तत्र अन्तःकोटीकोटिस्थितिकानि कर्माणि कृत्वाऽथाप्रवृत्तकरणस्याऽऽदिसमयं कालादिलब्ध्युपेतः प्रविशति। इदं तु करणं प्राक् न कदाचिदपि प्रवृत्तमत एवास्यान्वर्थसंज्ञा – यथेदं करणं न तथा प्राक् प्रवृत्तमित्यथाप्रवृत्तिमिति। तत्राद्ये समये जघन्या विशुद्धिरल्पा द्वितीये समये जघन्याऽनन्तगुणा, तृतीये समये जघन्याऽनन्तानन्तगुणा एवमाद्यन्तर्मुहूर्त-परिसमाप्तेः, ततः प्रथमसमये उत्कृष्टा अनन्तगुणा द्वितीयसमये उत्कृष्टा अनन्तगुणा एवमादि। अथाप्रवृत्तकरणचरमसमयान्ते भव्या एवमेते नानाजीवानामसंख्येयलोकप्रमाणाः परिणामविकल्पाः समा विषमाश्च भवन्ति। तेषां समुदायरूपमथाप्रवृत्तकरणम्। अपूर्वकरणस्य प्रथमसमये जघन्या विशुद्धिरल्पा, तस्यैवोत्कृष्टा अनन्तगुणा। द्वितीयसमये जघन्या अनन्तगुणा एवमादि, अन्तर्मुहूर्तपरिसमाप्तेः। त एते प्रथम समये उत्कृष्टानन्तगुणा द्वितीये उत्कृष्टानन्तगुणा एवमन्तमुर्हूतपरिसमाप्तेस्त एते नानाजीवानामसंख्येयलोकप्रमाणाः परिणामविकल्पा नियमेन विषमा एव परस्परतः। तेषां समुदायरूपमपूर्वकरणमत एवास्यात्यन्तापूर्वत्वादन्वर्थसंज्ञा। अनिवृत्तिकरणकाले नानाजीवानां प्रथमसमये परिणामा एकरूपा एव, द्वितीयसमये ततोऽनन्तगुणा एकरूपा एव, एवमान्तर्मुहूर्तपरिसमाप्तेः। तेषां समुदायरूपमनिवृत्तिकरणम्। अत एवास्यान्वर्थनाम परस्परतो निवृत्त्यभावादनिवृत्तिकरणमिति।

अत्राथाप्रवृत्तकरणेऽपि स्थितिखण्डनमनुभागखण्डनं गुणश्रेणी गुणसंक्रमो वा नास्ति केवलमनन्तगुणवृद्ध्या विशुद्ध्यन्नप्रशस्तप्रकृतीरनन्तगुणानुभागहीना बध्नाति,

प्रशस्तप्रकृतीश्चानन्तगुणरसवृद्ध्या स्थितिमपि पल्योपमसंख्येयभागहीनाम्। अपूर्व करणाऽनिवृत्तिकरणयोः स्थितिखण्डादीनि संभवन्ति स्थितिबन्धश्च क्रमेण हीयते। अशुभप्रकृतीनामनुभवबन्धोऽनन्तगुणहान्या शुभप्रकृतीनां चानन्तगुणवृद्ध्या वर्तते। तत्रानिवृत्तिकरणकरणसंख्येयेषु भागेषु गतेष्वन्तरकरणमारभते, येन मिथ्यादर्शनकर्मण उदयघातः क्रियते। ततश्चरमसमये मिथ्यादर्शनं त्रिधा विभक्तं करोति सम्यक्त्वं मिथ्यात्वं सम्यङ्मिथ्यात्वं चेति। एतासां तिसृणां प्रकृतीनामनन्तानुबन्धिक्रोध-मानमायालोभानां चोदयाभावेऽन्तर्मुहूर्तकालं प्रथमसम्यक्त्वं भवति। तदन्ते जघन्येनैकसमये उत्कर्षेणावलिकाषट्केऽवशिष्टे यदाऽनन्तानुबन्धिक्रोधमानमायालोभाना-मन्यतमस्योदयो भवति तदा सासादनसम्यग्दृष्टिरित्युच्यते। अत एवास्यान्वर्थसंज्ञा॥ आसादनं विराधनम्, सहासादनेन वर्तत इति सासादना, सासादना सम्यग्दृष्टिर्यस्य सोऽयं सासादनसम्यग्दृष्टिरिति। तस्य मिथ्यादर्शनोदयाभावेऽप्यनन्तानुबन्ध्युदयात् त्रीणि ज्ञानान्यज्ञानान्येव भवन्ति। अत एवास्यान्वर्थसंज्ञा। अनन्तं मिथ्यादर्शनं तदनुबन्धनादनन्तानुबन्धीति। स हि मिथ्यादर्शनोदयफलमापादयन् मिथ्यादर्शनमेव प्रवेशयति।

**सम्यङ्मिथ्यात्वोदयात् सम्यङ्मिथ्यादृष्टिः॥१४॥** सम्यङ्मिथ्यात्वसंज्ञिकायाः प्रकृतेरुदयादात्मा क्षीणाक्षीणमदशक्तिकोद्रवोपयोगापादितेषत्कलुषपरिणामवत् तत्त्वार्थ श्रद्धानाश्रद्धानरूपः सम्यङ्मिथ्यादृष्टिरित्युच्यते। अत एवास्य त्रीणि ज्ञानान्य-ज्ञानमिश्राणीत्युच्यन्ते।

**सम्यक्त्वोपेतश्चारित्रमोहोदयादिपादिताऽविरतिरसंयतसम्यग्दृष्टिः॥१५॥** औपशमि-केन क्षायोपशमिकेन क्षायिकेण वा सम्यक्त्वेन समन्वितः चारित्रमोहोदयाद-त्यन्तमविरतिपरिणामप्रवणोऽसंयतसम्यग्दृष्टिरिति व्यपदिश्यते। तस्य त्रीण्यपि ज्ञानानि

सम्यग्ज्ञानव्यपदेशमर्हन्ति तत्त्वार्थश्रद्धानसमावेशात्। इत ऊर्ध्वं गुणस्थानेषु नियमेन सम्यक्त्वम्।

**द्विविषयविरत्यविरतिपरिणतः संयतासंयतः॥१६॥** एतदादीनि गुणस्थानानि चारित्रमोहस्य क्षयोपशमादुपशमात् क्षयाच्च भवन्ति। तत्रानन्तानुबन्धिकषायाः क्षीणाः स्युरक्षीणा वा, ते चाप्रत्याख्यानावरणकषायाश्च सर्वघातिन एव, तेषामुदयक्षयात् सदुपशमाच्च, प्रत्याख्यानावरणकषायाः सर्वघातिन एव तेषामुदये सति संयमलब्धावसत्याम्, सञ्ज्वलनकषायाः नव नोकषायाश्च देशघातिन एव, तेषामुदये सति संयमासंयमलब्धिर्भवति। तद्योग्यया प्राणीन्द्रियविषयया विरताविरतवृत्त्या परिणतः संयतासंयत इत्याख्यायते।

**परिप्राप्तसंयमः प्रमादवान् प्रमत्तसंयतः॥१७॥** अनन्तानुबन्धिकषायेषु क्षीणेष्वक्षीणेषु वा प्राप्तोदयक्षयेष्वष्टानां कषायाणामुदयक्षयात् तेषामेव सदुपशमात् सञ्ज्वलननोकषायाणामुदये संयमलब्धिर्भवति। तन्मूलसाधनोपपादितोपजननं बाह्यसाधनसन्निधानाविर्भावमापद्यमानं प्राणेन्द्रियविषयभेदात् द्वितयीं वृत्तिमास्कन्दन्तं संयमोपयोगमात्मसात्कुर्वन् पञ्चदशविधप्रमादवशात् किञ्चित्प्रस्खलितचारित्रपरिणामः प्रमत्तसंयत इत्याख्यायते।

**प्रमादविरहितोऽप्रमत्तसंयतः॥१८॥** पूर्ववत् संयममास्कन्दन् पूर्वोक्तप्रमादविरहादविचलितसंयमवृत्तिरप्रमत्तसंयतः समाख्यायते। इत ऊर्ध्वं गुणस्थानानां चतुर्णां द्वे श्रेण्यौ भवतः – उपशमकश्रेणी क्षपकश्रेणी चेति। यत्र मोहनीयं कर्मोपशमयन्नात्माऽऽरोहति सोपशमकश्रेणी। यत्र तत्क्षयमुपगमयन्नुद्गच्छति सा क्षपकश्रेणी।

**अपूर्वकरणपरिणाम उपशमकः क्षपकश्चोपचारात्॥१९॥** प्राग्व्याख्यातोऽपूर्वकरणपरिणामः, तद्विशुद्धिवशेन श्रेणीमारोहयन्नपूर्वकरण इति व्यपदेशमश्नुते। तत्र कर्मप्रकृतीनां नोपशमो नापि क्षयः किन्तु पूर्वत्रोत्तरत्र चोपशमं क्षयं वाऽपेक्ष्योपशमकः क्षपक इति च घृतघटवदुपचर्यते।

**अनिवृत्तिपरिणामवशात् स्थूलभावेनोपशमकः क्षपकश्चानिवृत्तिबादरसाम्परायौ॥२०॥** पूर्वोक्तोऽनिवृत्तिपरिणामः; तदवशात् कर्मप्रकृतीनां स्थूलभावेनोपशमकः क्षपकश्चानिवृत्तिबादरसाम्परायाविति भाष्येते। तत्रोपशमनीयाः क्षपणीयाश्च प्रकृतय उत्तरत्र वक्ष्यन्ते।

**सूक्ष्मभावेनोपशमात् क्षपणाच्च सूक्ष्मसाम्परायौ॥२१॥** साम्परायः कषायः, स यत्र सूक्ष्मभावेनोपशान्तिं क्षयं चाऽऽपद्यते तौ सूक्ष्मसाम्परायौ वेदितव्यौ।

**सर्वस्योपशमात् क्षपणाच्चोपशान्तकषायः क्षीणकषायश्च॥२२॥** सर्वस्य मोहस्योपशमात् क्षपणाच्चोपशान्तकषायः क्षीणकषाय इति च व्यपदेशमर्हतः।

**घातिकर्मक्षयादाविर्भूतज्ञानादयतिशयः केवली॥२३॥** घातिकर्मणामत्यन्तक्षयादाविर्भूतस्वभावाऽचिन्त्यकेवलज्ञानाद्यतिशयविभूतिर्भगवान् केवलीत्यभिलष्यते।

**स द्विविधो योगभावाभावभेदात्॥२४॥** स केवली द्विधा भिद्यते। कुतः? योगभावाभावभेदात् योगवान् सयोगीति गीयते तदभावादयोगीति च।

**तत्र मिथ्यात्वप्रत्ययस्य कर्मणः तदभावे संवरः शेषे॥२५॥** तत्र मिथ्यात्वप्राधान्येन यत्कर्मास्रवति तन्निरोधात् शेषे सासादनसम्यग्दृष्ट्यादौ तत्संवरो भवति। किं पुनस्तत्? मिथ्यात्वनपुंसकवेदनरकायुर्नरकगत्येकद्वित्रिचतुरिन्द्रियजातिहुण्डकसंस्थानाऽसंप्राप्तसृपाटिकासंहनननरकगतिप्रायोग्यानुपूर्व्याऽऽतपस्थावरसूक्ष्माऽपर्याप्तकसाधारणशरीरसंज्ञकषोडशप्रकृतिलक्षणम्।

**असंयमस्त्रिविधोऽनन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानोदयविकल्पात् ॥२६॥**

असंयमस्त्रिविधो वेदिव्यः। कुतः? अनन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानविकल्पात्।

**तत्प्रत्ययस्य तदभावे संवरः॥२७॥** तत्प्रत्ययस्य कर्मणः तदभावे संवरोऽवसेयः। तद्यथा – निद्रानिद्राप्रचलाप्रचलास्त्यानगृद्ध्यनन्तानुबन्धिक्रोधमानमायालोभस्त्रीवेदतिर्यगायुस्तिर्यग्गतिचतुःसंस्थानचतुःसंहननतिर्यग्गतिप्रायोग्यानुपूर्व्योद्योताऽप्रशस्तविहायोगति -दुर्भगदुःस्वरानादेयनीचैर्गोत्रसंज्ञकानां पञ्चविंशतिप्रकृतीनामनन्तानुबन्धिकषायोदयकृता-संयमप्रधानास्रवाणामेकेन्द्रियादयः सासादनसम्यग्दृष्ट्यन्ताः बन्धकाः, तदभावे तासामुत्त-रत्र संवरः। अप्रत्याख्यानावरणक्रोधमानमायालोभमनुष्यायुर्मनुष्यगत्यौदारिकशरीरत दङ्गोपाङ्गवज्रर्षभनाराचसंहननमनुष्यगतिप्रायोग्यानुपूर्व्यनामकानां दशानां प्रकृतीनाम-प्रत्याख्यानकषायोदयकृतासंयमहेतुकानामेकेन्द्रियादयोऽसंयतसम्यग्दृष्ट्यन्ता बन्धकाः, तदभावादूर्ध्वं तासां संवरः। सम्यङ्मिथ्यात्वगुणेनायुर्न बध्यते। प्रत्याख्यानावरण क्रोधमानमायालोभानां चतसृणां प्रकृतीनां प्रत्याख्यानकषायोदयकारणासंयमास्रवाणा-मेकेन्द्रियप्रभृतयः संयतासंयतावसाना बन्धकाः, तदभावादुपरिष्टात् तासां संवरः।

**प्रमादोपनीतस्य तदभावे निरोधः॥२८॥** प्रमादोपनीतस्य कर्मणः प्रमत्तसंयतादूर्ध्वं तदभावान्निरोधः प्रत्येतव्यः। किं पुनस्तत्? असद्वेद्याऽरतिशोकाऽस्थिराऽशुभाऽय-शस्कीर्तिविकल्पम्। देवायुर्बन्धारम्भस्य प्रमाद एव हेतुरप्रमादोऽपि तत्प्रत्यासन्नः, तत ऊर्ध्वं तस्य संवरः।

**कषायास्रवस्य तन्निरोधे निरासः॥२९॥** कषाय एवास्रवो यस्य कर्मणः न प्रमादादिस्तस्य तन्निरोधे तन्निरासोऽवसेयः। स एव कषायः प्रमादादिविरहितः तीव्रमध्यमजघन्यभावेन त्रिषु गुणस्थानेषु व्यवस्थितः। तत्राऽपूर्वकरणस्यादौ संख्येयभागे द्वे कर्मप्रकृती निद्राप्रचले बध्येते। तत ऊर्ध्वं संख्येयभागे त्रिंशत्प्रकृतयः

देवगतिपञ्चेन्द्रियजातिवैक्रियिकाहारकतैजसकार्मणशरीरसमचतुरस्रसंस्थानवैक्रियिकाहारकशरीराङ्गोपाङ्गवर्णगन्धरसस्पर्शदेवगतिप्रायोग्यानुपूर्व्यागुरुलघूपघातपरघातोच्छवासप्रशस्तविहायोगतित्रसबादरपर्याप्तकप्रत्येकशरीरस्थिरशुभसुभगसुस्वरादेयनिर्माणतीर्थकरनामाख्याः बध्यन्ते। तस्यैव चरमसमये बन्धकराः चतस्रः प्रकृतयः हास्यरतिभयजुगुप्सासंज्ञा बन्धमुपयान्ति। ता एताः तीव्रकषायास्रवाः तदभावान्निर्दिष्टाद्भागादूर्ध्वं संव्रियन्ते। अनिवृत्तिबादरसाम्परायस्यादिसमयादारभ्य संख्येयेषु भागेषु पुंवेदक्रोधसंज्वलनौ बध्येते। तत ऊर्ध्वं शेषेषु संख्येयेषु भागेषु मानसंज्वलनमायासंज्वलनौ बन्धमुपगच्छतः। तस्यैव चरमसमये लोभसञ्ज्वलनो बन्धमेति। ता एताः प्रकृतयः मध्यमकषायास्रवाः, तदभावे निर्दिष्टस्य भागस्योपरिष्टात् संवरमवाप्नुवन्ति। पञ्चानां ज्ञानावरणानां चतुर्णां दर्शनावरणानां यशस्कीर्तेरुच्चैर्गोत्रस्य पञ्चानामन्तरायाणां च मन्दकषायास्रवाणां सूक्ष्मसाम्परायो बन्धकः। तदभावादुत्तरत्र तेषां संवरः।

**केवलयोगनिमित्तं सद्वेद्यं तदभावात्तस्य निरोधः॥३०॥** केवलेनैव योगेन सद्वेद्यस्योपशान्तकषायक्षीणकषायसयोगिनां बन्धो भवति। तदभावादयोगकेवलिनस्तस्य संवरो भवति।

अत्राह – आस्रवनिरोधः संवर इत्याख्यातम्। तत्रेदमनिर्ज्ञातमस्मलाभहेतुसन्निधाने सत्यास्रवतां कर्मणां केन निरोधो भवतीति? तत्र वक्तव्यम् – अनेनास्रवनिरोधः इति? अत्रोच्यते –

## स गुप्तिसमितिधर्मानुप्रेक्षापरीषहजयचारित्रैः॥२॥

**संसारकारणगोपनाद् गुप्तिः॥१॥** यतः संसारकारणादात्मनो गोपनं भवति सा गुप्तिः। भावे क्तिः। अपादानसाधनो वा, यतो गोपनं सा गुप्तिरिति। कर्तृसाधनो वा क्तिन् गोपयतीति गुप्तिरिति।

**सम्यगयनं समितिः॥२॥** परप्राणिपीडापरिहारेच्छया सम्यगयनं समितिः। संपूर्वादिणो भावे क्तिः। कर्तरि वा क्तिन्।

**इष्टे स्थाने धत्त इति धर्मः॥३॥** आत्मानमिष्टे नरेन्द्रसुरेन्द्रमुनीन्द्रादिस्थाने धत्त इति धर्मः। उणादिषु निष्पादितः।

**स्वभावानुचिन्तनमनुप्रेक्षाः॥४॥** शरीरादीनां स्वभावानुचिन्तनमनुप्रेक्षा वेदितव्याः।

**अनुपूर्वादीक्षे भावादिसाधनोऽकारः॥५॥** अनुपूर्वादीक्षेर्भावसाधनोऽकारः।

**परिषह्यत इति परीषहः॥६॥** परिपूर्वात्सहेः कर्मण्यकारः, परिषह्यत इति परीषहः। कथमकारः? पचादिलक्षणोऽच्। ननु स कर्तरि विहितः। यस्तर्हि; स करणाधिकरणयोर्विहितो घञ् तर्हि कर्मण्येव। परीषाह इति प्राप्नोति, "अनुबन्धकृतमनित्यम्" यथा ज्योतिषमिति। अथवा बहुलवचनात् कर्मण्यकारः "अन्यस्यापि" इति दीर्घः। परीषहस्य जयः परीषहजयः।

**चारित्रशब्दो व्याख्यातः॥७॥** "सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः" इत्यत्र चारित्रशब्दो व्याख्यातः। चर्यते तच्चारित्रमिति।

**संवृण्वतो गुप्त्यादयः करणम्॥८॥** संवरितुः संवरणक्रियायाः साधकतमत्वविवक्षायां गुप्त्यादीनां करणभावः प्रत्येतव्यः। गुप्तिश्च समितिश्च धर्मश्चानुप्रेक्षा च परीषहजयश्च चारित्रं च गुप्तिसमितिधर्मानुप्रेक्षापरीषहजयचारित्राणि तैर्गुप्तिसमितिधर्मानुप्रेक्षापरीषह-जयचारित्रैरिति।

**संवर एव गुप्त्यादय इति चेन्न; आस्रवनिमित्तकर्मसंवरणात्॥९॥** स्यान्मतम् – संव्रियतेऽनेनेति संवरः, गुप्त्यादिभिश्च कर्म संव्रियते, ततो गुप्त्यादय एव संवर इति भेदेन निर्देशो नोपपद्यते इति; तन्न; किं कारणम्? आस्रवनिमित्तकर्मसंवरणात्।

संवरणमिह संवर इति भावसाधनः, तस्य गुप्त्यादयः करणत्वेन निर्दिश्यन्ते। संव्रियते संवर इति कर्मसाधनो वा, गुप्त्यादिभिर्हि कर्म संव्रियत इति।

**स इति वचनं गुप्त्यादिभिः साक्षात् संबन्धनार्थम्॥१०॥** संवरोऽधिकृतोऽपि पुनः स इति परामृश्यते। किमर्थम्? गुप्त्यादिभिः साक्षात् संबन्धनार्थम्। तेन किं लब्धम्? नियमः कृतो भवति – स एष संवरो गुप्त्यादिभिरेव नान्येनोपायेनेति। तेन तीर्थाभिषेकदीक्षाशीर्षोपहारदेवताराधनादयो निवर्तिता भवन्ति, रागद्वेषमोहोपात्तस्य कर्मणोऽन्यथा निवृत्त्यसंभवात्। यदि हि स्यात् मत्स्यादीनामप्यतिसुलभो मोक्षः स्यात्, रक्तद्विष्टमूढानां च। एषां तत्त्वभेदकथनमुत्तरत्र करिष्यते।

आह – किमेतैरेव गुप्त्यादिभिरयं संवरो निष्पाद्यते? न। किं तर्हि? अन्येन च। यद्येवमुच्यतां केन?

## तपसा निर्जरा च॥३॥

**धर्मेऽन्तर्भावात् पृथग्ग्रहणमनर्थकमिति चेन्न; निर्जराकारणत्वख्यापनार्थत्वात्॥१॥** स्यान्मतम् – धर्मविकल्पेषूत्तमक्षमादिषु तपो वक्ष्यते, ततः संवरहेतुत्वे सिद्धे पृथगस्य ग्रहणमनर्थकमिति; तन्न; किं कारणम्? निर्जराकारणत्वख्यापनार्थत्वात् तपो निर्जराकारणमपि भवतीति।

**प्राधान्यप्रतिपत्त्यर्थं च॥२॥** सर्वेषु संवरहेतुषु प्रधानं तप इत्यस्य प्रतिपत्त्यर्थं च पृथग्ग्रहणं क्रियते।

**संवरनिमित्तसमुच्चयार्थश्चशब्दः॥३॥** संवरहेतुरपि तपो भवतीत्येतस्य समुच्चयार्थश्चशब्दः क्रियते। तपसा ह्यभिनवकर्मसंबन्धाभावः पूर्वोपचितकर्मक्षयश्चाविपाकनिर्जराप्रतिज्ञानात्। तस्मात्तपोजातीयत्वात् ध्यानानां निर्जराकारणत्वप्रसिद्धिः।

**तपसोऽभ्युदयहेतुत्वान्निर्जराङ्गत्वाभाव इति चेन्न; एकस्यानेककार्यारम्भदर्शनात् ॥४॥** स्यादेतत् – तपोऽभ्युदयकारणमिष्टं देवेन्द्रादिस्थानप्राप्तिहेतुत्वाभ्युपगमात्, ततोऽस्य निर्जराङ्गत्वमनुपपन्नमिति; तन्न; किं कारणम्? एकस्यानेक-कार्यारम्भदर्शनात्। यथाऽग्निरेकोऽपि विक्लेदनभस्मसाद्भवनादिप्रयोजन उपलभ्यते, तथा तपोऽभ्युदयकर्मक्षयहेतुरित्यत्र को विरोधः?

**गुणप्रधानफलोपपत्तेर्वा कृषीबलवत् ॥५॥** अथवा, यथा कृषीबलस्य कृषिक्रियायाः पलालशस्यफलगुणप्रधानफलाभिसम्बन्धस्तथा मुनेरपि तपस्क्रियायां प्रधानोपसर्जनाभ्युदयनिःश्रेयसफलाभिसम्बन्धोऽभिसन्धिवशाद्वेदितव्यः।

आह – गुप्त्यादय उद्दिष्टाः संवरहेतवः। ते किंविषयाः कियत्प्रकाराः प्रत्येकं च किंसामर्थ्याः इति? अत्रोच्यते – सति बहुवक्तव्ये आदावुद्देशभाजो गुप्तेरेव तावन्निर्धारणं क्रियते –

## सम्यग्योगनिग्रहो गुप्तिः ॥४॥

**योगशब्दो व्याख्यातार्थः ॥१॥** अयं योगशब्दो व्याख्यातार्थो द्रष्टव्यः। क्व? "कायवाङ्मनस्कर्म योगः" इत्यत्र।

**प्राकाम्याऽभावो निग्रहः ॥२॥** प्राकाम्यं यथेष्टं चरित्रं तस्याभावो निग्रह इत्याख्यायते, योगस्य निग्रहो योगनिग्रहः।

**सम्यगिति विशेषणं सत्कारलोकपङ्क्त्याद्याकाङ्क्षानिवृत्त्यर्थम् ॥३॥** पूजापुरस्सरा क्रिया सत्कारः। संयतो महानिति लोके प्रकाशः लोकपङ्क्तिः। एवमाद्यैहलौकि-

कफलमनुद्दिश्य पारलौकिकं च विषयसुखमनपेक्ष्य क्रियमाणो निग्रहो गुप्तिरिह परिगृहीतेति प्रतिपत्त्यर्थं सम्यगिति विशेषणमुपादीयते।

**तस्मात् कायादिनिरोधात्तन्निमित्तकर्मानास्रवणे संवरप्रसिद्धिः॥४॥** तस्मात् सम्यग्विशेषणविशिष्टात् संक्लेशाप्रादुर्भावपरात् कायादियोगनिरोधे सति तन्निमित्तं कर्म नास्रवतीति कृत्वा संवरप्रसिद्धिरवगन्तव्या। तद्यथा तिस्रो गुप्तयः – कायगुप्तिः वाग्गुप्तिः मनोगुप्तिरिति। तत्र यत् कायिकमनिभृतस्याप्रत्यवेक्षिताप्रमार्जितधरणिप्रदेशचङ्क्रमण-द्रव्यान्तराधाननिक्षेपशयनासनादिनिमित्तं कर्म सम्मूर्च्छति न तन्निगृहीतकायप्रचारस्याप्रमत्तस्याऽऽस्रोतुमर्हति। यच्च वाचिकमसंवृतस्यासत्प्रलापिनोऽप्रियवचनादिहेतुकं कर्म निपतति न तद्विनिवृत्तवाक्प्रयोगस्यास्रवति। यदपि मानसैः प्रदोषैः रागद्वेषाभि-भूतस्यातीतानागतविषयाभिलाषिण आस्रवति न तदात्मीकृतमनसः कदाचिदप्यु-पनिपतति।

आह – यदि मूर्तिपरित्यागं कार्त्स्न्येन कर्तुमशक्नुवतः संक्लेशनिवृत्तये योगनिरोधः प्रतिज्ञायते स यावन्न भवति तावदनेनावश्यं प्राणयात्रानिमित्तं तत्प्रत्यनीकभावात् परिस्पन्दः कर्तव्य; वाक्प्रयोगो वा प्रश्नापेक्षः, शरीरमलनिर्हरणार्थश्च, तस्मिन् सति कथमस्य संवरः स्यादिति?

अत्रोच्यते –

## ईर्याभाषैषणादाननिक्षेपोत्सर्गाः समितयः॥५॥

**सम्यग्ग्रहणेनाधिकृतेन प्रत्येकमभिसम्बन्धः॥१॥** सम्यगित्यनुवर्तते। तेन प्रत्येकमिहाभिसंम्बन्धः क्रियते – सम्यगीर्या सम्यग्भाषा सम्यगेषणा सम्यगादान-निक्षेपौ सम्यगुत्सर्ग इति।

**समितिरित्यन्वर्थसंज्ञा तान्त्रिकी पञ्चानाम् ॥२॥** समितिरितीयमन्वर्थसंज्ञा सम्यगितिः समितिरिति। क्व प्रसिद्धा? तान्त्रिकी। केषाम्? पञ्चानामीर्यादीनाम् ।

**तत्र व्रज्यायां जीववधपरिहार ईर्यासमितिः॥३॥** विदितजीवस्थानादिविधेर्मुनेः धर्मार्थं प्रयतमानस्य सवितर्युदिते चक्षुषो विषयग्रहणसामर्थ्ये उपजाते मनुष्यादिचरणपातोपहृतावश्यायप्रायमार्गेऽनन्यमनसः शनैर्न्यस्तपादस्य सङ्कुचितावयवस्य युगमात्र-पूर्वनिरीक्षणावहितदृष्टेः पृथिव्यद्व्यारम्भाभावादीर्यासमितिरित्याख्यायते।

अत्राह – विदितजीवस्थानादिविधेरित्युक्तम्, तत्र न ज्ञायते कति जीवस्थानानि इति? अत्रोच्यते –

**सूक्ष्मबादरैकद्वित्रिचतुरिन्द्रियसंज्ञ्यसंज्ञिपञ्चेन्द्रियपर्याप्तकापर्याप्तकभेदाच्चतुर्दश जीवस्थानानि॥४॥** एकेन्द्रियादयः प्राग् व्याख्यातलक्षणाः। तत्रैकेन्द्रिया द्विविधाः – सूक्ष्मा बादराश्चेति। सूक्ष्मा द्विविधाः – पर्याप्तका अपर्याप्तकाः। बादरा द्विविधाः – पर्याप्तका अपर्याप्तका इति। द्वीन्द्रिया द्विविधाः – पर्याप्तका अपर्याप्तकाः। त्रीन्द्रिया द्विविधाः – पर्याप्तका अपर्याप्तका। चतुरिन्द्रिया द्विविधाः – पर्याप्तका अपर्याप्तकाः। पञ्चेन्द्रिया द्विविधाः – संज्ञिनोऽसंज्ञिनः। संज्ञिनो द्विविधाः – पर्याप्तका अपर्याप्तकाः। असंज्ञिनो द्विविधाः – पर्याप्तका अपर्याप्तकाश्चेति। एवं जीवस्थानानि वेदितव्यानि। तानि नामकर्मोदयापादितविशेषाण्येकेन्द्रियजातिसूक्ष्मबादरपर्याप्तकाऽपर्याप्तकनामोदयजनितानि चत्वारि जीवस्थानान्येकेन्द्रियेषु। द्वीन्द्रियादिषु बादरनामोदय एव। विकलेन्द्रियेषु द्वित्रिचतुरिन्द्रियजातिपर्याप्तकापर्याप्तकनामोदयनिर्वर्तितानि। पञ्चेन्द्रियेषु संज्ञ्यसंज्ञिपर्याप्तकापर्याप्तकनामोदयलब्धभेदानि चत्वारि जीवस्थानानि।

**हितमितासन्दिग्धाभिधानं भाषासमितिः॥५॥** मोक्षपदप्रापणप्रधानफलं हितम्। तद्द्विविधम् – स्वहितं परहितं चेति। मितमनर्थकबहुप्रलपनरहितम्। स्फुटार्थं व्यक्ताक्षरं चाऽसन्दिग्धम्। एवंविधमभिधानं भाषासमितिः। तत्प्रपञ्चः – मिथ्याभिधानासूयाप्रिय-संभेदाल्पसारशङ्कितसंभ्रान्तकषायपरिहासाऽयुक्ताऽसभ्यनिष्ठुराधर्मविध्यदेशकालालक्षणाति-संस्तवादिवाग्दोषविरहिताभिधानम्।

**अन्नादावुद्गमादिदोषवर्जनमेषणासमितिः॥६॥** अनगारस्य गुणरत्नसंचयसंवाहिशरीर-शकटिं समाधिपत्तनं निनीषतोऽक्षम्रक्षणमिव शरीरधारणमौषधमिव जाठराग्निदाहोपशम-निमित्तमन्नाद्यनास्वादयतो देशकालसामर्थ्यादिविष्टमगर्हितमभ्यवहरतः उद्गमोत्पादनैषणा-संयोजनप्रमाणकारणाङ्गारधूमप्रत्ययनवकोटिपरिवर्जनमेषणासमितिरिति समाख्यायते।

**धर्मोपकरणानां ग्रहणविसर्जनं प्रति प्रयतनमादाननिक्षेपणा समितिः॥७॥** धर्माविरोधिनां परानुपरोधिनां द्रव्याणां ज्ञानादिसाधनानां ग्रहणे विसर्जने च निरीक्ष्य प्रमृज्य प्रवर्तनमादाननिक्षेपणा समितिः।

**जीवाविरोधेनाङ्गमलनिर्हरणमुत्सर्गसमितिः॥८॥** स्थावराणां जङ्गमानां च जीवादीनामविरोधेनाङ्गमलनिर्हरणं शरीरस्य च स्थापनमुत्सर्गसमितिरवगन्तव्या।

**वाक्कायगुप्तिरियमपीति चेन्न; तत्र कालविशेषे सर्वानिग्रहोपपत्तेः॥९॥** स्यान्मतमीर्यासमित्यादिलक्षणा वृत्तिः वाक्कायगुप्तिरेव, गोपनं गुप्तिः रक्षणं प्राणिपीडापरिहार इत्यनर्थान्तरमिति; तन्न; किं कारणम्? तत्र कालविशेषे सर्वनिग्र-होपपत्तेः। परिमितकालविषयो हि सर्वयोगनिग्रहो गुप्तिः। तत्रासमर्थस्य कुशलेषु वृत्तिः समितिरतो गमनभाषणाभ्यवहरणग्रहणनिक्षेपोत्सर्गलक्षणसमितिविधावप्रमत्तानां तत्प्रणा-लिकाप्रसृतकर्माभावान्निभृतानां प्रासीदत् संवरः।

**पात्राभावात् पाणिपुटाहाराणां संवराभाव इति चेन्न; परिग्रहदोषात् ॥१०॥** स्यादेतदसति पात्रे पाणिपुटेन भुञ्जानस्य भिक्षोः पतिताहारनिमित्तप्राणातिपात-दर्शनादेषणासमित्यभावात् संवराभाव इति तन्न; किं कारणम्? परिग्रहदोषात्, नैस्सङ्गीं चर्यामातिष्ठमानस्य पात्रग्रहणे सति तत्संरक्षणाधिकृतो दोषः प्रसज्यते। तस्मात् स्वायत्तेन पाणिपुटेन निराबाधे देशे स्थित्वा परीक्ष्य भुञ्जानस्य निभृतस्य तद्नतदोषाभावः। किञ्च,

**दैन्यप्रसङ्गात् ॥११॥** कपालमन्यद्वा भाजनमादाय पर्यटतो भिक्षोर्दैन्यमासज्यते। गृहीजनानीतमपि भाजनं सर्वत्र सुलभम्, तत्प्रक्षालनादिविधौ च दुष्परिहारः पापलेपः, स्वभाजनेन देशान्तरं नीत्वा भोजने चाशानुबन्धनं स्यात्, स्वपूर्वविशिष्टभाजना-दिकगुणासंभवाच्च येन केनचित् भुञ्जानस्य दैन्यं स्यात्। ततः स्वकरपुटभाजना न्नान्यद्विशिष्टमस्ति भिक्षोः।

**अन्नवत्तत्प्रसङ्ग इति चेन्न; तेन विनाऽभावात् ॥१२॥** स्यादेतत् – यथा प्राच्यमन्नं संस्कृतं परमरसं परित्यज्य परगृहे यत्किञ्चिद्संस्कृतमन्नमरसमनुभूयते भिक्षुणा तथा कपालाद्यादानमपि स्यादिति; तन्न; किं कारणम्? तेन विनाऽभावात्। चिरकालं तपः संचिचीषतः संयतस्य शरीरयात्राऽऽहारमन्तरेण न संभवतीति यत्किञ्चित्प्रासुकं कादाचित्कमभ्युपगम्यते न तथा भाजनमित्यसमञ्जसो दृष्टान्तः।

आह – उक्तं गुप्तिसमित्योः संवरहेतुत्वम्दिानीं तदनन्तरमुद्दिष्टस्य धर्मस्य संवरहेतुत्वं संवर्णयितव्यमिति। अत्रेदमुच्यते –

## उत्तमक्षमामार्दवार्जवशौचसत्यसंयमतपस्त्यागा-
## किञ्चन्यब्रह्मचर्याणि धर्मः॥६॥

किमर्थमिदमुच्यते?

**प्रवर्तमानस्य प्रमादपरिहारार्थं धर्मवचनम् ॥१॥** आद्यं गुप्त्यादि प्रवृत्तिनिग्रहार्थम्। तत्रासमर्थानां प्रवृत्त्युपायप्रदर्शनार्थं द्वितीयमेषणादि। इदं पुनर्दशविधधर्माख्यानं प्रवर्तमानस्य प्रमादपरिहारार्थं वेदितव्यम्।

**क्रोधोत्पत्तिनिमित्ताविषह्याक्रोशादिसंभवे कालुष्योपरमः क्षमा॥२॥** शरीरस्थितिहेतु-मार्गणार्थं परकुलान्युपगच्छतो भिक्षोर्दुष्टजनाक्रोशोपसहनावज्ञानताडनशरीरव्यापादनादीनां क्रोधोत्पत्तिनिमित्तानां सन्निधाने कालुष्याभावः क्षमेत्युच्यते।

**जात्यादिमदावेशादभिमानाभावो मार्दवम् ॥३॥** उत्तमजातिकुलरूपविज्ञानैश्वर्य-श्रुतलाभवीर्यस्यापि सतस्तत्कृतमदावेशाभावात् परप्रयुक्तपरिभवनिमित्ताभिमानाभावो मार्दवं माननिर्हरणमवगन्तव्यम्।

**योगस्यावक्रताऽऽर्जवम् ॥४॥** योगस्य कायवाङ्मनोलक्षणस्यावक्रताऽऽर्जवमित्यु-च्यते।

**प्रकर्षप्राप्ता लोभनिवृत्तिः शौचम् ॥५॥** लोभस्य निवृत्तिः प्रकर्षप्राप्ता, शुचेर्भावः कर्म वा शौचमिति निश्चीयते।

**गुप्तावन्तर्भाव इति चेन्न; तत्र मानसपरिस्पन्दप्रतिषेधात् ॥६॥** स्यादेतत् – मनोगुप्तौ शौचमन्तर्भवतीति पृथगस्य ग्रहणमनर्थकमिति; तन्न; किं कारणम्? तत्र मानसपरिस्पन्दप्रतिषेधात्। मनोगुप्तौ हि मानसः परिस्पन्दः सकलः प्रतिषिध्यते, तत्राऽसमर्थेषु परकीयेषु वस्तुष्वनिष्टप्रणिधानोपरमार्थमिदमुच्यते।

**आकिञ्चन्येऽवरोध इति चेन्न; तस्य नैर्मम्यप्रधानत्वात् ॥७॥** स्यादेतदा-किञ्चन्यं वक्ष्यते, तत्रास्यावरोधात् शौचग्रहणं पुनरुक्तमिति तन्न; किं कारणम्? तस्य नैर्मम्यप्रधानत्वात्। स्वशरीरादिषु संस्काराद्यपोहार्थमाकिञ्चन्यमिष्यते।

**तच्चतुर्विधं जीवितारोग्येन्द्रियोपभोगभेदात् ॥८॥** लोभश्चतुःप्रकारः – जीवनलोभ आरोग्यलोभ इन्द्रियलोभ उपभोगलोभश्चेति, स प्रत्येकं द्विधा भिद्यते स्वपरविषयत्वात्, अतस्तन्निवृत्तिलक्षणं शौचं चतुर्विधमवसेयम्।

**सत्सु साधुवचनं सत्यम् ॥९॥** सत्सु प्रशस्तेषु जनेषु साधुवचनं सत्यमित्युच्यते। तद्दशप्रकारं व्याख्यातम्।

**भाषासमितावन्तर्भाव इति चेन्न; तत्र साध्वसाधुभाषाव्यवहारे हितमितार्थत्वात् ॥१०॥** स्यादेतत् – सत्यग्रहणमनर्थकम्, कुतः? भाषासमितावन्तर्भावादिति; तन्न; किं कारणम्? तत्र साध्वसाधुभाषाव्यवहारे हितमितार्थत्वात्। संयतो हि साधुष्वसाधुषु च भाषाव्यवहारं कुर्वन् हितं मितं च ब्रूयात् अन्यथा रागानर्थदण्डादिदोषानुषङ्ग स्यादिति समितिलक्षणमुक्तम्। इह पुनः सन्तः प्रव्रजितास्तद्भक्ता वा तेषु साधु सत्यं ज्ञानचारित्रशिक्षणादिषु वह्वपि वक्तव्यमित्यनुज्ञायते धर्मोपबृंहणार्थम्।

अथ कः संयमः? कश्चिदाह – भाषादिनिवृत्तिरिति।

**न भाषादिनिवृत्तिः संयमः गुप्त्यन्तर्भावात् ॥११॥** गुप्तिर्हि निवृत्तिप्रवणा, अतोऽत्रान्तर्भावात् संयमाभावः स्यात्।

अपर आह – कायादिप्रवृत्तिर्विशिष्टा संयम इति।

**नापि कायादिप्रवृत्तिर्विशिष्टा; समितिप्रसङ्गात् ॥१२॥** समितयो हि कायादिप्रवृत्तिदोषनिवृत्तयोऽतस्तत्रान्तर्भावः प्रसज्येत।

**त्रसस्थावरवधप्रतिषेध आत्यन्तिकः संयम इति चेन्न; परिहार-विशुद्धिचारित्रान्तर्भावात् ॥१३॥** अथ मतम् – द्वीन्द्रियादीनां त्रसानां पृथिवीकायिकादीनां स्थावराणां च प्राणिनां वधप्रतिषेध आत्यन्तिकः संयम इति; तदपि नोपपद्यते; कुतः? परिहारविशुद्धिचारित्रान्तर्भावात्। वक्ष्यते हि चारित्रभेदेषु परिहारविशुद्धिलक्षणं चारित्रमिति तत्रान्तर्भावात् पृथक् संयमग्रहणमनर्थकं स्यात्। कस्तर्हि संयमः?

**समितिषु प्रवर्तमानस्य प्राणीन्द्रियपरिहारः संयमः॥१४॥** ईर्यासमित्यादिषु वर्तमानस्य मुनेस्तत्प्रतिपालनार्थः प्राणीन्द्रियपरिहारः संयम इत्युच्यते। एकेन्द्रियादि प्राणिपीडापरिहारः प्राणिसंयमः। शब्दादिष्विन्द्रियार्थेषु रागानभिष्वङ्ग इन्द्रियसंयमः।

**अतोऽपहृतसंयमभेदसिद्धिः॥१५॥** एवं च कृत्वा अपहृतसंयमभेदसिद्धिर्भवति। संयमो हि द्विविधः – उपेक्षासंयमोऽपहृतसंयमश्चेति। देशकालविधानज्ञस्य परानुपरोधे-नोत्कृष्टकायस्य त्रिधा गुप्तस्य रागद्वेषानभिष्वङ्गलक्षण उपेक्षासंयमः। अपहृतसंयम-स्त्रिविधः – उत्कृष्टो मध्यमो जघन्यश्चेति। तत्र प्रासुकवसत्याहारमात्रबाह्यसाधनस्य स्वाधीनेतरज्ञानचरणकरणस्य बाह्यजन्तूपनिपाते आत्मानं ततोऽपहृत्य जीवान् परिपालयत उत्कृष्टः, मृदुना प्रमृज्य जन्तून् परिहरतो मध्यमः उपकरणान्तरेच्छया जघन्यः।

**तत्प्रतिपादनार्थः शुद्ध्यष्टकोपदेशः॥१६॥** तस्यापहृतसंयमस्य प्रतिपादनार्थः शुद्ध्यष्टकोपदेशो द्रष्टव्यः। तद्यथा, अष्टौ शुद्धयः – भावशुद्धिः, कायशुद्धिः, विनयशुद्धिः, ईर्यापथशुद्धिः, भिक्षाशुद्धिः, प्रतिष्ठापनशुद्धिः, शयनासनशुद्धिः, वाक्यशुद्धिश्चेति।

तत्र भावशुद्धिः कर्मक्षयोपशमजनिता मोक्षमार्गरुच्याहितप्रसादा रागाद्युपप्लव-रहिता। तस्यां सत्यामाचारः प्रकाशते परिशुद्धभित्तिगतचित्रकर्मवत्।

कायशुद्धिर्निरावरणाभरणा निरस्तसंस्कारा यथाजातमलधारिणी निराकृताङ्ग-विकारा सर्वत्र प्रयतवृत्तिः प्रशमसुखं मूर्तिमिव प्रदर्शयन्तीति। तस्यां सत्यां न स्वतोऽन्यस्य भयमुपजायते नाप्यन्यतस्तस्य।

विनयशुद्धिरर्हदादिषु परमगुरुषु यथार्हं पूजाप्रवणा, ज्ञानादिषु च यथाविधि भक्तियुक्ता, गुरोः सर्वत्रानुकूलवृत्तिः, प्रश्नस्वाध्यायवाचनाकथाविज्ञप्त्यादिषु प्रतिपत्तिकुशला, देशकालभावावबोधनिपुणा, आचार्यानुमतचारिणी तन्मूलाः सर्वसंपदः। सैषा भूषा पुरुषस्य, सैव नौः संसारसमुद्रतरणे।

ईर्यापथशुद्धिः नानाविधजीवस्थानयोन्याश्रयावबोधजनितप्रयत्नपरिहृतजन्तुपीडा ज्ञानादित्यस्वेन्द्रियप्रकाशनिरीक्षितदेशगामिनी द्रुतविलम्बितसंभ्रान्तविस्मितलीलाविकार-दिगन्तरावलोकनादिदोषविरहितगमना तस्यां सत्यां संयमः प्रतिष्ठितो भवति विभव इव सुनीतौ।

भिक्षाशुद्धिः परीक्षितोभयप्रचारा प्रमृष्टपूर्वापरस्वाङ्गदेशविधाना आचारसूत्रोक्तकाल-देशप्रकृतिप्रतिपत्तिकुशला लाभालाभमानापमानसमानमनोवृत्तिः लोकगर्हितकुलपरिवर्जनपरा चन्द्रगतिरिव हीनाधिकगृहा, विशिष्टोपस्थाना, दीनानाथदानशालाविवाहयजनगेहा-दिपरिवर्जनोपलक्षिता दीनवृत्तिविगमा प्रासुकाहारगवेषणप्रणिधाना आगमविहित-निरवद्याशनपरिप्राप्तप्राणयात्राफला। तत्प्रतिबद्धा हि चरणसंपत् गुणसंपदिव साधुजनसेवानिबन्धना। सा लाभालाभयोः सुरसविरसयोश्च समसन्तोषाद्भिक्षेति भाष्यते। यथा सलीलसालङ्कारवरयुवतिभिरुपनीयमानघासो गौर्न तदङ्गगतसौन्दर्यनिरीक्षणपरः तृणमेवात्ति, यथा वा तृणोल्लूपं नानादेशस्थं यथालाभमभ्यवहरति न योजनासंपदमवेक्षते तथा भिक्षुरपि भिक्षापरिवेषकजनमृदुललितरूपवेषविलासावलोकननिरुत्सुकः शुष्कद्रवाहारयोजनाविशेषं

चानवेक्षमाणः यथागतमश्नातीति गौरिव चारो गोचार इति व्यपदिश्यते तथा गवेषिणेति च यथा शकटं रत्नभारपरिपूर्णं येन केनचित् स्नेहेनाक्षलेपं कृत्वाऽभिलषितदेशान्तरं वणिगुपनयति तथा मुनिरपि गुणरत्नभरितान्ततनुशकटी-मनवद्यभिक्षायुरक्षम्रक्षणेनाभिप्रेतसमाधिपत्तनं प्रापयतीत्यक्षम्रक्षणमिति च नाम निरूढम्। यथा भाण्डागारे समुत्थितमनलमशुचिना शुचिना वा वारिणा शमयति गृही तथा यतिरप्युदराग्निं प्रशमयतीत्युदराग्निप्रशमनमिति च निरुच्यते। दातृजनबाधया विना कुशलो मुनिर्भ्रमरवदाहरतीति भ्रमराहार इत्यपि परिभाष्यते। येन केनचित्प्रकारेण स्वभ्रपूरणवदुदरगर्तमनगारः पूरयति स्वादुनेतरेण वेति स्वभ्रपूरणमिति च निरुच्यते।

प्रतिष्ठापनशुद्धिपरः संयतः नखरोमसिङ्घाणकनिष्ठीवनशुक्लोच्चारप्रस्रवणशोधने देहपरित्यागे च विदितदेशकालो जन्तूपरोधमन्तरेण प्रयतते।

संयतेन शयनासनशुद्धिपरेण स्त्रीक्षुद्रचौरपानाख्यशौण्डशाकुनिकादिपापजनवासा वर्ज्याः, श्रृङ्गारविकारभूषणोज्वलवेषवेश्याक्रीडाभिरामगीतनृत्यवादित्राकुलशालादयश्च परि-हर्तव्याः, अकृत्रिमगिरिगुहातरुकोटरादयः कृत्रिमाश्च शून्यागारादयो मुक्तमोचितावासा अनात्मोद्देशनिर्वर्तिता निरारम्भाः सेव्याः।

वाक्यशुद्धिः पृथिवीकायिकारम्भादिप्रेरणरहिताः परुषनिष्ठुरादिपरपीडाकरप्रयोग-निरुत्सुका व्रतशीलदेशनादिप्रधानफला हितमितमधुरमनोहरा संयतस्य योग्या। तदधिष्ठाना हि सर्वसंपदः।

**तपो वक्ष्यमाणभेदम्॥१७॥** कर्मक्षयार्थं तप्यत इति तपः। तदुत्तरत्र वक्ष्यमाणं द्वादशविकल्पमवसेयम्।

**परिग्रहनिवृत्तिस्त्यागः॥१८॥** परिग्रहस्य चेतनाचेतनलक्षणस्य निवृत्तिस्त्याग इति निश्चीयते।

**अभ्यन्तरतपोविशेषोत्सर्गग्रहणात्सिद्धिरिति चेन्न; तस्यान्वार्थत्वात् ॥१९॥** स्यान्मतम् – वक्ष्यते तपोऽभ्यन्तरं षड्विधम्, तत्रोत्सर्गलक्षणेन तपसा ग्रहणमस्य सिद्धमित्यनर्थकं त्यागग्रहणमिति; तन्न; किं कारणम्? तस्यान्यार्थत्वात्। तद्धि नियतकालं सर्वोत्सर्गलक्षणमयं पुनस्त्यागः यथाशक्त्यनियतकालः क्रियते इत्यस्ति भेदः।

**शौचवचनात्सिद्धिरिति चेन्न; तत्रासत्यपि गर्द्धोत्पत्तेः॥२०॥** अथ मतमेतत् – व्याख्यातं शौचम्, तत्रास्यान्तर्भावात् त्यागग्रहणमनर्थकमिति तन्न; किं कारणम्? तत्रासत्यपि गर्द्धोत्पत्तेः। असन्निहिते परिग्रहे कर्मोदयवशात् गर्द्ध उत्पद्यते तन्निवृत्त्यर्थं शौचमुक्तम्। त्यागः पुनः सन्निहितस्यापायः दानं वा स्वयोग्यमथवा संयतस्य योग्यं ज्ञानादिदानं त्याग इत्युच्यते।

**ममेदमित्यभिसन्धिनिवृत्तिराकिञ्चन्यम् ॥२१॥** उपात्तेष्वपि शरीरादिषु संस्कारापोहाय ममेदमित्यभिसन्धिनिवृत्तिराकिञ्चन्यमित्याख्यायते। नास्य किञ्चनास्ति इत्यकिञ्चनः, तस्य भाव: कर्म वाऽऽकिञ्चन्यम्।

**अनुभूताङ्गनास्मरणतत्कथाश्रवणस्त्रीसंसक्तशयनासनादिवर्जनाद् ब्रह्मचर्यम् ॥२२॥** मयाऽनुभूताङ्गना कलागुणविशारदा इति स्मरणं तत्कथाश्रवणं रतिपरिमलादिवासितं स्त्रीसंसक्तशयनासनमित्येवमादिवर्जनात् परिपूर्णं ब्रह्मचर्यमवतिष्ठते।

**अस्वातन्त्र्यार्थं गुरौ ब्रह्मणि चर्यमिति वा॥२३॥** अथवा ब्रह्मा गुरुस्तस्मिंश्चरणं तदनुविधानमस्यास्वातन्त्र्यप्रतिपत्त्यर्थं ब्रह्मचर्यमित्याचर्यते।

**अन्वर्थसंज्ञाप्रतिपादनार्थत्वाद्वाऽपौनरुक्त्यम् ॥२४॥** अथवा सर्वेषामेव परिहारः। यद्यपि गुप्तिसमित्यादिष्वन्तर्भूताः केचन इहोपदिश्यन्ते तथापि तेषां संवरणधारणसामर्थ्याद्धर्म इत्येषा संज्ञाऽन्वर्थेति प्रतिपादनार्थं पुनर्वचनमिति नास्ति पौनरुक्त्यम्।

**तद्भावनाप्रवणत्वाद्वा सप्तप्रकारप्रतिक्रमणवत्॥२५॥** अथवा, यथा ऐर्यापथिक-रात्रिन्दिवीयपाक्षिकचातुर्मासिकसांवत्सरिकोत्तमस्थानिकलक्षणं सप्तप्रकारं प्रतिक्रमणं गुप्त्यादिप्रतिष्ठानार्थं भाव्यते, तथोत्तमक्षमादिदशविधधर्मभावना गुप्त्यादिपरिपालनार्थैवेति तत्रान्तर्भूतानामपि पृथगुपदेशो युक्तः।

**उत्तमविशेषणं दृष्टप्रयोजनपरिवर्जनार्थम्॥२६॥** यत्किञ्चिद् दृष्टं प्रयोजनमनुद्दिश्य क्रियमाणानि क्षमादीनि संवरणकारणानि भवन्तीत्यस्य विशेषस्य प्रतिपत्त्यर्थमुत्तम-विशेषणमुपादीयते – उत्तमक्षमा, उत्तममार्दवमित्यादि। कथं पुनरेषां संवरहेतुत्वमिति चेत्? अत्रोच्यते –

**सर्वेषां स्वगुणप्रतिपक्षदोषभावनात् संवरहेतुत्वम्॥२७॥** सर्वेषामेवैषामुत्तम-क्षमादीनां स्वगुणस्य प्रतिपक्षदोषस्य च भावनात् संवरहेतुत्वमवसेयम्। तद्यथा उत्तमक्षमायास्तावत् – व्रतशीलपरिरक्षणमिहामुत्र च दुःखानभिष्वङ्ग; सर्वस्य जगतः सम्मानसत्कारभावपरिपङ्क्त्यादिगुणः, तत्प्रतिपक्षस्य क्रोधस्य धर्मार्थकाममोक्ष-प्राणनाशनं दोष इति विचिन्त्य क्षमितव्यम्। किञ्च –

**क्रोधनिमित्तस्य स्वात्मनि भावाभावानुचिन्तनात्॥२८॥** परैः प्रयुक्तस्य क्रोध-निमित्तस्याऽऽत्मनि भावचिन्तनं तावत् विद्यन्ते मय्येते दोषाः। किमत्रासौ मिथ्या ब्रवीतीति क्षमितव्यमभावचिन्तनादपि, नैते मयि विद्यन्ते दोषा; अज्ञानादसौ ब्रवीतीति क्षमा कार्या।

अपि च, बालस्वभावचिन्तनं परोक्षप्रत्यक्षाक्रोशताडनमारणधर्मभ्रंशनानामुत्त-रोत्तररक्षार्थम्। तद्यथा – परोक्षमाक्रोशति बाले क्षमितव्यम्। एवंस्वभावा हि बाला भवन्ति। दिष्ट्या च मां परोक्षमाक्रोशति न प्रत्यक्षमेतदपि विद्यत बालेष्विति लाभ एव मन्तव्य:। प्रत्यक्षमाक्रोशति षोढण्यं विद्यते एतत् बालेषु दिष्ट्या च मां

प्रत्यक्षमाक्रोशति न ताडयति। एतदपि विद्यते बालेष्विति लाभ एव मन्तव्यः। ताडयत्यपि च मर्षितव्यम्। दिष्ट्या च मां ताडयति न प्राणैर्वियोजयतीत्येतदपि विद्यते बालेष्विति लाभ एव मन्तव्यः। प्राणैर्वियोजयत्यपि तितिक्षा कर्तव्या दिष्ट्या च मां प्राणैर्वियोजयति न धर्माद्भ्रंशयतीति। किञ्चान्यत्, ममैवापराधोऽयम्। यत्पुराचरितं तन्महद् दुष्कर्म तत्फलमिदमाक्रोशवचनादि निमित्तमात्रं परोऽत्रेति सहितव्यम्।

मार्दवोपेतं गुरवोऽनुगृह्णन्ति साधवोऽपि साधुमामन्यन्ते। ततश्च सम्यग्ज्ञानादीनां पात्रीभवति। ततः स्वर्गापवर्गफलावाप्तिः। मलिने मनसि व्रतशीलानि नावतिष्ठन्ते। साधवश्चैनं परित्यजन्ति। तन्मूलाः सर्वा विपदः।

ऋजुहृदयमधिवसन्ति गुणाः, मायाचारं नाश्रयन्ते। गर्हिता च गतिर्भवति।

शुच्याचारमिहापि सन्मानयन्ति सर्वे। विश्रम्भादयश्च गुणाः तमधितिष्ठन्ति। लोभभावनाक्रान्तहृदये नावकाशं लभन्ते गुणाः। इह चामुत्र चाऽचिन्त्यं व्यसनमसावश्नुते।

सत्यवाचि प्रतिष्ठिताः सर्वा गुणसंपदः। अनृतभाषिणं बन्धवोऽप्यवमन्यन्ते मित्राणि च परित्यजन्ति, जिह्वाछेदनसर्वस्वहरणादिव्यसनभागपि भवति। संयमो ह्यात्महितः। तमनुतिष्ठन्निहैव पूज्यते परत्र किमस्ति वाच्यम्। असंयतः प्राणवधविषयरागेषु नित्यप्रवृत्तः कर्माशुभं संचिनुते।

तपः सर्वार्थसाधनम्। तत एव ऋद्धयः संजायन्ते। तपस्विभिरध्युषितान्येव क्षेत्राणि लोके तीर्थतामुपगतानि। तद्यस्य न विद्यते स तृणाल्लघुर्लक्ष्यते। मुञ्चन्ति तं सर्वे गुणाः। नासौ मुञ्चति संसारम्।

उपधित्यागः पुरुषहितः। यतो यतः परिग्रहादपेतस्ततस्ततोऽस्य खेदो व्यपगतो भवति। निरवद्ये मनःप्रणिधानं पुण्यविधानम्। परिग्रहाशा बलवती सर्वत्रदोषप्रसवयोनिः।

न तस्या उपधिभिस्तृप्तिरस्ति सलिलैरिव सलिलनिधेरिह बडवाया। अपि च कः पूरयति दुःपूरमाशागर्तं दिने दिने यत्रास्तमस्तमाधेयमाधारत्वाय कल्पते। शरीरादिषु निर्ममत्वः परमनिवृत्तिमवाप्नोति। शरीरादिषु कृतभिष्वङ्गस्य सर्वकालमभिष्वङ्ग एव संसारे।

ब्रह्मचर्यमनुपालयन्तं हिंसादयो दोषा न स्पृशन्ति। नित्याभिरत गुरुकुलावासमधिवसन्ति गुणसंपदः। वराङ्गनाविलासविभ्रमविधेयीकृतः पापैरपि विषयीक्रियते। अजितेन्द्रियता हि लोके प्राणिनाशधात्रीत्येवमुत्तमक्षमादिषु तत्प्रतिपक्षेषु च गुणदोषविचारपूर्विकायां क्रोधादिनिवृत्तौ सत्यां तन्निबन्धनकर्मास्रवाभावात् महान् संवरो भवति।

**व्यक्तिवचनभेदात् निर्देशवैलक्षण्यमिति चेन्न; सर्वेषां धर्मभावाव्यतिरेकस्यैकत्वादाविष्टलिङ्गत्वाच्च॥२९॥** स्यान्मतं यथा शुक्लः पटः शुक्ला शाटी शुक्लं वस्त्रं शुक्लौ कम्वलौ शुक्लाः कम्वला इति सति सामानाधिकरण्ये व्यक्तिवचनयोरभेदो दृश्यते, न च तथेहाभेदस्ततो निर्देशो विलक्षण इति; तन्न; किं कारणम्? सर्वेषां धर्मभावाव्यतिरेकैकत्वात्। सर्वेषूत्तमक्षमादिषु संवरणलक्षणो धर्मभावोस्ति, स चैकः, तस्य विवक्षितत्वादेकवचननिर्देशः। आविष्टलिङ्गश्च धर्मशब्दो नान्यसम्बन्धे स्वलिङ्गं जहाति।

आह – क्रोधाद्यनुत्पत्तिः क्षमादिविशेषप्रत्यनीकालम्बनादित्युक्तम्, तत्र कस्मात् क्षमादीनयमवलम्बते नान्यथा, वर्तते इति? उच्यते – यस्मात्तप्तायस्पिण्डवत् क्षमादि परिणतेनात्महितैषिणा कर्तव्याः –

## अनित्याशरणसंसारैकत्वान्यत्वाशुच्यास्रवसंवरनिर्जरालोकबोधि-दुर्लभधर्मस्वाख्याततत्वानुचिन्तनमनुप्रेक्षाः॥७॥

**उपात्तानुपात्तद्रव्यसंयोगव्यभिचारस्वभावोऽनित्यत्वम् ॥१॥** आत्मना रागादि-परिणामात्मना कर्मनोकर्मभावेन गृहीतान्युपात्तानि पुद्गलद्रव्याण्यनुपात्तानि परमाण्वादीनि, तेषां सर्वेषां द्रव्यात्मना नित्यत्वं पर्यायात्मना सततमनुपरतभेदसंसर्गवृत्तित्वादनित्यत्वम् । इमानि हि शरीरेन्द्रियविषयोपभोगपरिभोगद्रव्याणि समुदयरूपाणि जलबुद्बुद्वदनवस्थितस्वभावानि गर्भादिष्ववस्थाविशेषेषु सहोपलभ्यमानसंयोगविपर्ययाणि। मोहादत्राज्ञो नित्यतां मन्यते। न किञ्चित्संसारे समुदितं ध्रुवमस्त्यात्मनो ज्ञानदर्शनोपयोगस्वभावादन्यदिति चिन्तनमनित्यत्वानुप्रेक्षा। एवं ह्यस्य चिन्तय-तस्तेष्वभिष्वङ्गाभावात् भुक्तोज्झितगन्धमाल्यादिष्विव वियोगकालेऽपि विनिपातो नोत्पद्यते।

**क्षुधितव्याघ्राभिद्रुतमृगशावववज्जन्तोर्जरामृत्युरुजान्तरे परित्राणाभावोऽशरण्यत्वम् ॥२॥** शरणं द्विविधम् – लौकिकं लोकोत्तरं चेति। तत्प्रत्येकं त्रिधा जीवाजीव-मिश्रकभेदात् । तत्र राजा देवता लौकिकं जीवशरणं प्राकारादिकं लौकिकमजीवशरणं ग्रामनगरादिमिश्रकम् । पञ्च गुरवो लोकोत्तरं जीवशरणं तत्प्रतिबिम्बाद्यजीवशरणम्, सधर्मोपकरणसाधुवर्गो मिश्रकशरणम् । तत्र यथा मृगशावस्यैकान्ते बलवता क्षुधितेनाऽऽमिषैषिणा व्याघ्रेणाभिद्रुतस्य न किञ्चित् शरणमस्ति तथा जन्मजरामृत्यु व्याधिप्रियविप्रयोगाप्रियसंयोगेप्सितालाभदारिद्र्यदौर्मनस्यादिसमुत्थितेन दुःखेनाभिभूतस्य जन्तोः शरणं न विद्यते। परिपुष्टमपि शरीरं भोजनं प्रति सहायि भवति न व्यसनोपनिपाते। यत्नेन संचिता अर्था अपि न भवान्तरमनुगच्छन्ति। संविभक्तसुखदुःखाः सुहृदोऽपि न मरणकाले परित्रायन्ते। बन्धवः समुदिताश्च रुजा परीतं न परियान्ति। अस्ति चेत् सुचरितो धर्मो व्यसनमहार्णवे तरणोपायो भवति। मृत्युना नीयमानस्य सहस्रनयनादयोऽपि न शरणम् । तस्माद्भवव्यसनसंकटे धर्म एव शरणम् । सुहृदर्थोऽप्यनपायी, नान्यत्किञ्चिच्छरणमिति भावनमशरणानुप्रेक्षा। एवं

ह्यस्याध्य-वस्यतः नित्यमशरणोऽस्मीति भृशमुद्विग्नस्य सांसारिकेषु भावेषु ममत्वविगमो भवति। भगवदर्हत्सर्वज्ञप्रणीत एव वचसि प्रतियत्नो भवेत्।

**द्रव्यादिनिमित्ता आत्मनो भवान्तरावाप्तिः संसारः॥३॥** चतुर्विधा आत्मावस्थाः – संसारोऽसंसारो नोसंसारः तत्त्रितयव्यपायश्चेति। तत्र संसारश्चतसृषु गतिषु नानायोनिविकल्पासु परिभ्रमणम्। अनागतिरसंसारः शिवपदपरमामृतसुखप्रतिष्ठा। नोसंसारः सयोगकेवलिनः चतुर्गतिभ्रमणाभावादसंसारप्राप्त्यभावाच्चेषत्संसारो नोसंसारः इति। अयोगकेवलिनः तत्त्रितयव्यपायः, भवभ्रमणाभावात् सयोगकेवलिवत् प्रदेश परिस्पन्दविगमादसंसारावाप्त्यभावाच्च। देहपरिस्पन्दाभावेऽपि देहिनः सततं प्रदेशचलन-मस्ति ततः सदा संसार एव। सिद्धानामयोगकेवलिनां च नास्ति प्रदेशचलनमितरेषां त्रिधाऽवसीयते। स पुनः संसारः क्वचिदनादिनिधनोऽभव्यापेक्षया भव्यसामान्यार्पणया च, क्वचिदनादिरुच्छेदवान् भव्यविशेषापेक्षया। सादिः सनिधनो नोसंसारोऽनिधनः सादिरसंसारः। तत्त्रितयव्यपायोऽन्तर्मुहूर्तकालः।

तत्र द्रव्यनिमित्तः संसारश्चतुर्विधः कर्मनोकर्मवस्तुविषयाश्रयभेदात्। तत्र क्षेत्रहेतुको द्विविधः – स्वक्षेत्रपरक्षेत्रविकल्पात्। लोकाकाशतुल्यप्रदेशस्यात्मनः कर्मोदयवशात् संहरणविसर्पणधर्मणः हीनाधिकप्रदेशपरिणामावगाहित्वं स्वक्षेत्रसंसारः। सम्मूर्च्छन-गर्भोपपादजन्मनवयोनिविकल्पाद्यालम्वनः परक्षेत्रसंसारः। कालो द्विविधः – परमार्थरूपो व्यवहाररूपश्चेति। तयोर्लक्षणं प्राग्व्याख्यातम्। तत्र परमार्थकालवर्तितपरिस्पन्देतरपरिणामविकल्पः तत्पूर्वककालव्यपदेशौपचारिककालत्रयवृत्तिः कालसंसारः। भवनिमित्तः संसारः द्वात्रिंशद्विधः – पृथिव्यप्तेजोवायुकायिकाः प्रत्येकं चतुर्विधाः सूक्ष्मबादर पर्याप्तकाऽपर्याप्तकभेदात्। वनस्पतिकायिकाः द्वेधा – प्रत्येकशरीराः साधारणशरीराश्चेति। प्रत्येकशरीरा द्वेधा – पर्याप्तकापर्याप्तकभेदात्।

साधारणशरीराश्चतुर्धासूक्ष्मबादरपर्याप्तका-पर्याप्तकविकल्पात्। विकलेन्द्रियाः प्रत्येकं द्विधा पर्याप्तकापर्याप्तकविकल्पात्। पञ्चेन्द्रियाश्चतुर्धा संज्ञ्यसंज्ञिपर्याप्तकापर्याप्तकापेक्षयेति। भावनिमित्तः संसारो द्वेधा स्वभावपरभावाश्रयात्। स्वभावो मिथ्यादर्शनादि; परभावो ज्ञानावरणादिकर्मरसादिः। एवमेतस्मिन्ननेकयोनिकुलकोटिबहुशतसहस्रसंकटे संसारे परिभ्रमन् जीवः कर्मयन्त्रप्रेरितः पिता पितामहो भूत्वा भ्राता पुत्रः पौत्रश्च भवति, माता भूत्वा भगिनी भार्या दुहिता च भवति, किं बहुना स्वयमात्मनः पुत्रो भवतीत्येवमादि संसारत्वभावचिन्तनं संसारानुप्रेक्षा। एवं ह्यस्य भावयतः संसारदुःखभयादुद्विग्नस्य ततो निर्वेदो भवति निर्विण्णश्च संसारप्रहाणाय प्रतियतते।

**जन्मजरामरणावृत्तिमहादुःखानुभवनं प्रति सहायानपेक्षत्वमेकत्वम् ॥४॥** एकत्व-मनेकत्वमित्येतदुभयं द्रव्यक्षेत्रकालभावविकल्पम्। तत्र द्रव्यैकत्वं जीवा दिष्वन्यतमद्रव्यविषयत्वेनाऽभेदकल्पनम्। क्षेत्रैकत्वं परमाण्ववगाहप्रदेशः। कालैकत्वम भेदः समयः। भावैकत्वं मोक्षमार्गः। तथाऽनेकत्वमपि भेदविषयम्। नहि किञ्चिदेकमेव निश्चितमस्त्यनेकमेव वा। एकमपि सामान्यार्पणया विशेषार्पणयाऽनेकमपि। तत्र परिप्राप्तबाह्याभ्यन्तरोपधित्यागस्य सम्यग्ज्ञानादेकत्वनिश्चयमास्कन्दतः यथाख्यात-चारित्रैकवृत्तिः मोक्षमार्गो भावैकत्वम्। तत्प्राप्तये एक एवाहम्, न कश्चिन्मे स्वः परो वा विद्यते, एक एव जाये एक एव म्रिये, न कश्चिन्मे स्वजनः परजनो वा व्यधिजरामरणादीनि दुःखान्यपहरति। बन्धुमित्राणि श्मशानं नातिवर्तन्ते। धर्म एव मे सहायः सदानपायीति चिन्तनमेकत्वानुप्रेक्षा। एवं ह्यस्य भावयतः स्वजनेषु प्रीत्यनुबन्धो न भवति परजनेषु च द्वेषानुबन्धो नोपजायते, ततो निस्सङ्गतामभ्युपगतो मोक्षायैव घटते।

**शरीराद् व्यतिरेको लक्षणभेदादन्यत्वम् ॥५॥** अन्यत्वं चतुर्धा व्यवतिष्ठते - नामस्थापनाद्रव्यभावालम्बनेन। आत्मा जीव इति नामभेदः, काष्ठप्रतिमेति स्थापनाभेदः, जीवद्रव्यमजीवद्रव्यमिति द्रव्यभेदः, एकस्मिन्नपि द्रव्ये बालो युवा मनुष्यो देव इति भावभेदः। तत्र बन्धं प्रत्येकत्वे सत्यपि लक्षणभेदादन्यत्वम्। ततः कुशलपुरुषप्रयोगसन्निधौ शरीरादत्यन्तव्यतिरेकेणाऽऽत्मनो ज्ञानादिभिरनन्तैर-हेयैरवस्थानं मुक्तिरन्यत्वं शिवपदमिति चोच्यते। तदवाप्तये चैन्द्रियिकं शरीरम- तीन्द्रियोऽहमज्ञं शरीरं ज्ञोऽहमनित्यं शरीरं नित्योऽहमाद्यन्तवच्छरीरमनाद्यन्तोऽहम्, बहूनि मे शरीरशतसहस्राण्यतीतानि संसारे परिभ्रमतः स एवाहमन्यस्तेभ्यः इत्येवं शरीरादन्यत्वं मे, किमङ्ग पुनर्बाह्येभ्यः परिग्रहेभ्य इति चिन्तनमन्यत्वानुप्रेक्षा। एवं ह्यस्य मनस्समादधानस्य शरीरादिषु स्पृहा नोपपद्यते, ततश्च श्रेयसि वर्तते।

**शरीरस्याद्युत्तराशुभकारणत्वादिभिरशुचित्वम् ॥६॥** शुचित्वं द्विविधम् – लौकिकं लोकोत्तरं चेति। तत्रात्मनः प्रक्षालितकर्ममलकलङ्कस्य स्वात्मन्यवस्थानं लोकोत्तरं शुचित्वम्, तत्साधनं च सम्यग्दर्शनादि तद्वन्तश्च साधवः तदधिष्ठानानि च निर्वाणभूम्यादीनि तत्प्राप्त्युपायत्वाच्छुचिव्यपदेशमर्हन्ति। लौकिकं शुचित्वमष्टविधम् – कालाग्निभस्ममृत्तिकागोमयसलिलज्ञाननिर्विचिकित्सत्वभेदात्। तदिदं शरीरं शुचीकर्तुं नालम्। कुतः? अत्यन्ताशुचित्वात्। शरीरमिदमाद्युत्तराशुभकारणादिभिरशुचि लक्ष्यते। तद्यथा – आद्यं तावत्कारणं शरीरस्य शुक्रं शोणितं च, तदुभयमत्यन्ताशुचि। उत्तरकारणमाहारपरिणामादि, कवलाहारो हि ग्रस्तमात्रः श्लेष्माशयं प्राप्य श्लेष्मणा द्रवीकृतोऽधिकमशुचि भवति। ततः पित्ताशयं प्राप्य पच्यमान आम्लीकृतोऽशुचिरेव भवति। पक्वो वाताशयमवाप्य वायुना विभज्यमानः खलरसभावेन भिद्यते। खलभागो मूत्रपुरीषादिमलविकारेण विविच्यते। रसभागः शोणितमांसमेदोऽस्थिमज्जाशुक्रभावेन परिणमते। सर्वेषां चैषामशुचीनां भाजनं शरीरमवस्करवत्। अशक्यप्रतीकारं खल्विदं शरीरम्, स्नानानुलेपनधूपप्रघर्षवासमाल्यादिभिरपि न शक्यमशुचित्वमपहर्तुम्।

सम्यग्दर्शनादि पुनर्भाव्यमानं जीवस्यात्यन्तिकीं शुद्धिमाविर्भावयतीति तत्त्वतो भावनमशुचित्वानुप्रेक्षा। एवं ह्यस्य संस्मरतः शरीरनिर्वेदो भवति, निर्विण्णश्च जन्मोदधितरणाय चित्तं समाधत्ते।

**आस्रवसंवरनिर्जराग्रहणमनर्थकमुक्तत्वादिति चेन्न; तद्गुणदोषान्वेषणपरत्वात् ॥७॥** स्यान्मतमास्रवसंवरनिर्जरा वर्णिताः अतस्तासामिह पुनर्ग्रहणमनर्थकमिति; तन्न; किं कारणम्? तद्गुणदोषान्वेषणपरत्वात्। आस्रवदोषानुचिन्तनमुद्वेगार्थमास्रवोपाक्षेपः। आस्रवा हीहामुत्र चापाययुक्ताः सह महानदीस्रोतोवेगतीक्ष्णा इन्द्रियादयः। तद्यथा – प्रभूतयवकोशोदकप्रमाथावगाहनादिगुणसंपन्नसहचारिणः मदान्धाः बलवन्तोऽपि वारणाः हस्तिबन्धकीषु स्पर्शनेन्द्रियप्रसंसक्तचित्ताः मनुष्यविधेयतामुपगत्य वधबन्धनवाहनाङ्कुशताडनपार्ष्णिघातादिजनितं तीव्रदुःखमनुभवन्ति, नित्यमेव च स्वयूथस्य स्वच्छन्दप्रवीचारसुखस्य च वनवासस्यानुस्मरन्तो महान्तं खेदमवाप्नुवन्ति। तथैव च जिह्वेन्द्रियविषयलोलाः मृतहस्तिशरीरस्थस्रोतोवेगावगाहिवायसवत् व्यसनमुपनिपतन्ति। घ्राणेन्द्रियवशंगताश्चौषधगन्धलुब्धपन्नगवद्विनिपातमिच्छन्ति। चक्षुरिन्द्रियविषयीकृताश्च दीपालोकनलोलपतङ्गवद् व्यसनप्रपाताभिमुखा भवन्ति। श्रोत्रेन्द्रियविषयसङ्गा-कृष्टमनसोऽपि गीतध्वनिविषङ्गविस्मृततृणग्रसनहरिणवदनर्थोन्मुखा भवन्ति। परत्र च नानाजातिषु बहुविधदुःखप्रज्वालितासु पर्यटन्तीति। एवमाद्यास्रवदोषदर्शनमास्रवानुप्रेक्षा। एवं ह्यस्य चिन्तयतः क्षमादिधर्मश्रेयस्त्वबुद्धिर्न प्रच्यवते।

सर्व एते आस्रवदोषाः कूर्मवत् संवृतात्मनो न भवन्ति यथा महार्णवे नावौ विवरपिधानेऽसति क्रमाश्रितजलविप्लवे सति तदाश्रयाणां विनाशोऽवश्यंभावी, छिद्रपिधाने च निरुपद्रवमभिलषितदेशान्तरप्रापणं तथा –

**कर्मागमद्वारसंवरणे सति नास्ति श्रेयःप्रतिबन्ध इति संवरणगुणानुचिन्तनं संवरानुप्रेक्षा॥८॥** एवं ह्यस्य चिन्तयतः संवरे नित्योद्युक्तता भवति।

**निर्जरा वेदनाविपाक इत्युक्तम् ॥९॥** सा द्वेधा – अबुद्धिपूर्वा कुशलमूला चेति। तत्र नरकादिषु कर्मफलविपाकजाऽबुद्धिपूर्वा, साऽकुशलानुबन्धा। परीषहजये कृते कुशलमूला, सा शुभानुबन्धा निरनुबन्धा चेति। एवं निर्जराया गुणदोषभावनं निर्जरानुप्रेक्षा। एवं ह्यस्यानुस्मरतः कर्मनिर्जरायै वृत्तिर्भवति।

**लोकसंस्थानादिविधिर्व्याख्यातः॥१०॥** समन्तादनन्तस्यालोकाकाशस्य बहुमध्य-देशभाविनो लोकस्य संस्थानादिविधिर्व्याख्यातः, तत्स्वभावानुचिन्तनं लोकानुप्रेक्षा। एवं ह्यस्याध्यवस्यतः तत्त्वज्ञानादिविशुद्धिर्भवति।

**रत्नत्रयस्वभावादिलाभस्य कृच्छ्रात्प्रतिपत्तिः बोधिदुर्लभत्वम् ॥११॥** उक्तं च –

> **"एगणिगोदसरीरे जीवा दव्वप्पमाणदो दिट्ठा।**
> **सिद्धेहि अणंतगुणा सव्वेण वितीदकालेण॥"**

इत्यागमप्रामाण्यादेकस्मिन्निगोतशरीरे जीवाः सिद्धानामनन्तगुणाः। एवं सर्वलोको निरन्तरनिचितः स्थावरैरतस्तत्र त्रसता बालिका समुद्रे पतिता वज्रसिकताकणिकेव दुर्लभा। तत्र च विकलेन्द्रियाणां भूयिष्ठत्वात् पञ्चेन्द्रियता गुणेषु कृतज्ञतेव कृच्छ्रलभ्या। तत्र च तिर्यक्षु पशुमृगपक्षिसरीसृपादिषु बहुषु सत्सु मनुष्यभावश्चतुष्पथे रत्नराशिरिव दुरासदः। तत्प्रच्यवे पुनस्तदुपपत्तिर्दग्धतरुपुद्गलतद्भावापत्तिवत् दुर्लभा। तल्लाभे च कुदेशानां हिताहितविचारणाविरहितपशुसमानमानवाकीर्णानां बहुत्वात् सुदेशः पाषाणेषु मणिरिवासुलभः। लब्धेऽपि सुदेशे सुकुले जन्म कृच्छ्रलभ्यं पापकर्मजीवकुलाकुलत्वात् लोकस्य। कुले हि जातिः प्रायेण शीलविनयाचारसंपत्तिकरी भवति। सत्यामपि कुलसंपदि दीर्घायुरिन्द्रियबलरूपनीरोगत्वादीनि दुर्लभानि। सर्वेष्वपि तेषु लब्धेषु

सद्धर्मप्रतिलाभो यदि न स्यात् व्यर्थं जन्म वदनमिव दृष्टिविकलम्। तमेवं कृच्छ्रलभ्यं धर्ममवाप्य विषयसुखे रञ्जनं भस्मार्थं चन्दनदहनमिव विफलम्। विरक्तविषयसुखस्य तपोभावनाधर्ममवाप्य विषयसुखे रञ्जनं भस्मार्थं चन्दनदहनमिव विफलम्। विरक्तविषयसुखस्य तपोभावनाधर्मप्रभावनासुखमरणादिलक्षणः समाधिर्दुरवापः। तस्मिन् सति बोधिलाभः फलवान् भवतीति चिन्तनं बोधिदुर्लभत्वानुप्रेक्षा। एवंह्यस्य भावयतः बोधिं प्राप्य प्रमादो न कदाचिदपि भवति।

**जीवस्थानगुणस्थानानां गत्यादिषु मार्गणालक्षणो धर्मः स्वाख्यातः॥१२॥** उक्तानि जीवस्थानानि गुणस्थानानि च, तेषां गत्यादिषु मार्गस्थानेषु स्वतत्त्वविचारणलक्षणो धर्मः जिनशासने स्वाख्यातः। अत्राह – गत्यादय इत्युच्यन्ते, के पुनर्गत्यादय इति? अत्रोच्यते –

**गतीन्द्रियकाययोगवेदकषायज्ञानसंयमदर्शनलेश्याभव्यसम्यक्त्वसंज्ञाहारकेषु मार्गणाः॥१३॥** गम्यत इति गतिः। सा द्वेधा – कर्मोदयकृता क्षायिकी चेति। कर्मोदयकृता चतुर्विधा व्याख्याता – नरकगतिः तिर्यग्गतिः मनुष्यगतिः देवगतिश्चेति। क्षायिकी मोक्षगतिः। इन्द्रस्य लिङ्गमिन्द्रेण सृष्टमिति वेन्द्रियम्। तद् द्रव्यभावभेदेन द्विविधं सत् पञ्चधा वर्णितमेकेन्द्रियद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियपञ्चेन्द्रियभेदेन, तत्कर्मकृतम्। अतीन्द्रियत्वमात्मनः क्षायिकम्। आत्मप्रवृत्त्युपचितपुद्गलपिण्डः कायः। तत्संबन्धिजीवः षड्विधः – पृथिवीकायिकोऽप्कायिकः तेजस्कायिकः वायुकायिकः वनस्पतिकायिकः त्रसकायिकश्चेति। त्रसस्थावरनामकर्मविशेषोदयापादिता एते भावाः। नामकर्मात्यन्तोच्छेदादकायाः सिद्धाः। वीर्यान्तरायक्षयोपशमलब्धवृत्तिवीर्यलब्धिर्योगः। तद्वत आत्मनो मनोवाक्कायवर्गणालम्बनः प्रदेशपरिस्पन्दः उपयोगो योगः। स पञ्चदशप्रकारः – चत्वारो मनोयोगाः चत्वारो वाग्योगाः सप्त काययोगाश्चेति। योगसम्बन्धाऽभावः आत्मनः क्षायिकः। तत्र सत्यमनोयोगः मृषामनोयोगः

सत्यमृषामनोयोगोऽसत्यमृषामनोयोगश्चेति चतुर्विधो मनोयोगः। सत्यवाग्योग मृषावाग्योगः सत्यमृषावाग्योगोऽसत्यमृषावाग्योगश्चेति चतुर्विधो वाग्योगः। औदारिककाययोगः औदारिकमिश्रकाययोगो वैक्रियककाययोगो वैक्रियिकमिश्रकाययोगः आहारककाययोगः आहारकमिश्रकाययोगः कार्मणकाययोगश्चेति सप्तविधः काययोगः। आत्मप्रवृत्तिसंमोहोत्पादो वेदः। स नोकषायविशेषोदयनिमित्तः त्रिविधः – स्त्रीवेदः पुंवेदो नपुंसकवेदश्चेति। आत्मन औपशमिकं क्षायिकं वाऽपगतवेदत्वम्। चारित्रपरिणामकषणात् कषायः। स चतुर्विधः क्रोधमानमायालोभलक्षणो व्याख्यातः। अकषायत्वमात्मन औपशमिकं क्षायिकं वा। तत्त्वार्थावबोधो ज्ञानम्, तत्पञ्चविधमुद्दिष्टम्। मिथ्यादर्शनोदयापादितकालुष्यमज्ञानं त्रिविधम्। व्रतसमितिकषायदण्डेन्द्रियधारणानुवर्तननिग्रहत्यागजयलक्षणः संयमः पञ्चविधो वक्ष्यते। संयमः संममासंयमश्चोक्तौ। स च सर्वश्चारित्रमोहस्योदयोपशमात् क्षयोपशमात् क्षयाच्च भवति। तत्परिणामत्रयविरहितं सिद्धत्वं क्षायिकम्। दर्शनावरणक्षयक्षयोपशमाविर्भूतवृत्तिरालोचनं दर्शनम्। तच्चतुर्विधमुद्दिष्टं चक्षुरचक्षुरवधिकेवलदर्शनभेदात्। कषायश्लेषप्रकर्षाप्रकर्षयुक्ता योगवृत्तिर्लेश्या सा षड्विधा कृष्णनीलकपोततेजःपद्मशुक्लविकल्पात्। शरीरनामोदयापादिता द्रव्यलेश्या। अलेश्यत्वं क्षायिकम्। निर्वाणपुरस्कृतो भव्य; तद्विपरीतोऽभव्यः, तदुभयं पारिणामिकम्। विरहितभव्यत्वाभव्यत्वविकल्पो मुक्तः। तत्त्वार्थश्रद्धानलक्षणं सम्यक्त्वमुक्तम्। तत् दर्शनमोहस्योपशमात् क्षयोपशमात् क्षयाच्च भवति। सासादनसम्यक्त्वमनन्तानु-बन्धिकषायोदयाद्भवतीत्यौदयिकम्। सम्यङ्मिथ्यात्वं क्षायोपशमिकम्। मिथ्यात्वमौदयिकम्। शिक्षाक्रियालापग्राही संज्ञी तद्विपरीतोऽसंज्ञी। तत्र संज्ञित्वं क्षायोपशमिकम-संज्ञित्वमौदयिकम्। तदुभयाभावः क्षयिकः। उपभोगशरीरप्रायोग्यपुद्गलग्रहणमाहारः, तद्विपरीतोऽनाहारः। तत्राहारः शरीरनामोदयात् विग्रहगतिनामोदयाभावाच्च भवति। अनाहारः शरीरनामत्रयोदयाभावात् विग्रहगतिनामोदयाच्च भवति।

तान्येतानि चतुर्दशमार्गणास्थानानि। तेषु जीवस्थानानां सत्ता विचिन्त्यते। तिर्यग्गतौ चतुर्दशापि जीवस्थानानि सन्ति। इतरासु तिसृषु द्वे द्वे पर्याप्तकापर्याप्तकभेदात्। एकेन्द्रियेषु चत्वारि जीवस्थानानि। विकलेन्द्रियेषु द्वे द्वे। पञ्चेन्द्रियेषु चत्वारि। पृथिव्यप्तेजोवायुकायिकेषु प्रत्येकं चत्वारि। वनस्पतिकायिकेषु षट्। त्रसकायिकेषु दश। मनोयोग एकं जीवस्थानं संज्ञिपर्याप्तकः। वाग्योगे पञ्च जीवस्थानानि द्वित्रिचतुरिन्द्रियपर्याप्तकसंज्ञ्यसंज्ञिपर्याप्तकनामानि। काययोगे चतुर्दश सन्ति। स्त्रीवेदपुंवेदयोः प्रत्येकं चत्वारि जीवस्थानानि संज्ञ्यसंज्ञिपर्याप्तकापर्याप्तकाख्यानि। नपुंसकवेदे चतुर्दशापि सन्ति। अवेदे एकं जीवस्थानं संज्ञिपर्याप्तकसंज्ञम्। चतुर्ष्वपि कषायेषु चतुर्दशापि जीवस्थानानि सन्ति। अवेदे एकं जीवस्थानं संज्ञिपर्याप्तकसंज्ञम्। चतुर्ष्वपि कषायेषु चतुर्दशापि जीवस्थानानि सन्ति। अकषाये एकमेव संज्ञिपर्याप्तकाख्यम्। मत्यज्ञानश्रुताज्ञानयोश्चर्तुदशापि जीवस्थानानि सन्ति। अकषाये एकमेव संज्ञिपर्याप्तकाख्यम्। मत्यज्ञानश्रुताज्ञानयोश्चतुर्दशापि सन्ति। विभङ्ग-मनःपर्ययज्ञानयोरेकमेव जीवस्थानं संज्ञिपर्याप्तकाख्यम्। मतिश्रुतावधिज्ञानेषु द्वे जीवस्थाने संज्ञिपर्याप्तकापर्याप्तकाख्ये। केवलज्ञाने एकमेव जीवस्थानं संज्ञिपर्याप्तकाख्यम्। सामायिकछेदोपस्थापनपरिहारविशुद्धिसूक्ष्मसाम्पराययथाख्यातसंयमसंयमासंयमेष्वेकमेव जीवस्थानं संज्ञिपर्याप्तकनामकम्। असंयमे चतुर्दशापि सन्ति। अचक्षुर्दर्शने चतुर्दशापि जीवस्थानानि सन्ति। चक्षुर्दर्शने त्रीणि जीवस्थानानि चतुरिन्द्रियसंज्ञ्यसंज्ञि-पर्याप्तकाख्यानि। तेषामेवाऽपर्याप्तका लब्धौ सन्ति न निर्वृत्तौ। अवधिदर्शने द्वे जीवस्थाने संज्ञिपर्याप्तकापर्याप्तकसंज्ञे। केवलदर्शने संज्ञिपर्याप्तकाख्यम्। आद्यासु तिसृषु लेश्यासु चतुर्दशापि जीवस्थानानि सन्ति। तेजःपद्मशुक्ललेश्यासु द्वे जीवस्थाने संज्ञिपर्याप्तकापर्याप्तकनामनी। अलेश्यत्वे एकं जीवस्थानं संज्ञिपर्याप्तकाख्यम्। भव्येष्व- भव्येषु च चतुर्दशापि जीवस्थानानि सन्ति। औपशमिकक्षायिकक्षायो-

पशमिकसम्यक्त्वसासादनसम्यक्त्वेषु द्वे जीवस्थाने संज्ञिपर्याप्तकापर्याप्तकसंज्ञे। सम्यङ्मिथ्यात्वे एकमेव संज्ञिपर्याप्तकाख्यम्। मिथ्यात्वे चतुर्दशापि सन्ति। संज्ञिषु द्वे जीवस्थाने पर्याप्तकापर्याप्तकनामनी। असंज्ञिषु द्वादशावशिष्टानि। संज्ञ्यसंज्ञित्वाऽभावे एकं जीवस्थानमपर्याप्तकाख्यम्। कर्मोदयापेक्षयाऽऽहारे चतुर्दशापि सन्ति। अनाहारे सप्ताऽपर्याप्तकस्थानानि। पर्याप्तकं च केवलिसमुद्घातेऽयोगकेवलिन च कर्मोदयार्पणात्। सिद्धाः सर्वत्रातीतजीवस्थानाः।

गुणस्थानानामपि तेष्वेव सत्ता विचार्यते – नरकगतौ नारकेषु पर्याप्तकेषु चत्वारि गुणस्थानान्याद्यानि सप्तसु पृथिवीसु। प्रथमायां पृथिव्यामपर्याप्तकेषु द्वे गुणस्थाने मिथ्यादृष्ट्यसंयतसम्यग्दृष्टी। इतरासु पृथिवीष्वपर्याप्तके एकमेव मिथ्यात्वम्। तिर्यग्गतौ तिर्यक्षु पर्याप्तकेषु पञ्च गुणस्थानान्याद्यानि। तेषामपर्याप्तकेषु त्रीणि गुणस्थानानि मिथ्यादृष्टिसासादनसम्यग्दृष्ट्यसंयतसम्यग्दृष्टिसंज्ञानि। तिरश्चीषु पर्याप्तिकासु पञ्च गुणस्थानान्याद्यानि, अपर्याप्तिकासु द्वे आद्ये स्त्रीत्वेन प्रवेशाभावादसंयतसम्यग्दृष्ट्यभावः। मनुष्यगतौ मनुष्येषु पर्याप्तकेषु चतुर्दशापि गुणस्थानानि भवन्ति। अपर्याप्तकेषु त्रीणि गुणस्थानानि मिथ्यादृष्टिसासादनसम्यग्दृष्ट्यसंयतसम्यग्दृष्ट्याख्यानि। मानुषीषु पर्याप्तिकासु चतुर्दशापि गुणस्थानानि सन्ति भावलिङ्गापेक्षया न द्रव्यलिङ्गापेक्षया द्रव्यलिङ्गापेक्षया तु पञ्चाद्यानि। अपर्याप्तिकासु द्वे आद्ये, सम्यक्त्वेन सह स्त्रीजननाभावात्। तिर्यङ्मनुष्येषु भवापर्याप्तकेष्वेकमेव गुणस्थानमाद्यम्। देवगतौ भवनवासिव्यन्तरज्योतिष्कदेवेषु पर्याप्तकेषु चत्वारि गुणस्थानान्याद्यान्यपर्याप्तकेषु द्वे आद्ये। तद्देवीषु सौधर्मैशानकल्पवासिदेवीषु च स एव क्रमः। सौधर्मैशानादिषूपरिमग्रैवेयकान्तेषु चत्वारि गुणस्थानान्याद्यान्यपर्याप्तकेषु त्रीणि मिथ्यादृष्टिसासादनसम्यग्दृष्ट्यसंयतसम्यग्दृष्टिनामानि। अनुदिशानुत्तरविमानवासिषु पर्याप्तापर्याप्तकेषु चैकमेव गुणस्थानमसंयतसम्यग्दृष्टिसंज्ञम्।

एकद्वित्रिचतुरिन्द्रियाऽसंज्ञिपञ्चेन्द्रियेष्वेकमेव गुणस्थानमाद्यम्। पञ्चेन्द्रियेषु संज्ञिषु चतुर्दशापि सन्ति।

पृथिवीकायादिषु वनस्पत्यन्तेष्वेकमेव प्रथमम्। त्रसकायिकेषु चतुर्दशापि सन्ति।

सत्यमनोयोगेऽसत्यमृषामनोयोगे च संज्ञिमिथ्यादृष्टिप्रभृतयः सयोगिकेवल्यन्ताः। मृषामनोयोगे सत्यमृषामनोयोगे च संज्ञिमिथ्यादृष्ट्यादयः क्षीणकषायवीतराग छद्मस्थान्ताः। असत्यमृषावाग्योगे द्वीन्द्रियादयः सयोगकेवल्यन्ताः? सत्यवाग्योगे संज्ञिमिथ्यादृष्ट्यादयः सयोगिकेवल्यन्ताः। मृषावाग्योगे सत्यमृषावाग्योगे च संज्ञिमिथ्यादृष्टिप्रभृतयः क्षीणकषायवीतरागछद्मस्थान्ताः। औदारिककाययोगे त्रयोदश गुणस्थानानि सयोगिकेवल्यन्तानि। औदारिकमिश्रकाययोगे चत्वारि गुणस्थानानि मिथ्यादृष्टिसासादनसम्यग्दृष्ट्यसंयतसम्यग्दृष्टिसयोगिकेवलिसंज्ञानि। वैक्रियिककाययोगे चत्वारि गुणस्थानान्याद्यानि। वैक्रियिकमिश्रकाययोगे त्रीणि तान्येव सम्यङ्मिथ्या-त्ववर्जितानि। आहारककाययोगाहारकमिश्रकाययोगयोरेकमेव गुणस्थानं प्रमत्तसंयताख्यम्। कार्मणकाययोगे चत्वारि गुणस्थानानि मिथ्यादृष्टिसासादनसम्यग्दृष्ट्यसंयतसम्यग्दृष्टि-सयोगिकेवल्याख्यानि। अयोगे गुणस्थानमेकम्।

स्त्रीवेदपुंवेदयोरसंज्ञिपञ्चेन्द्रियादयोऽनिवृत्तिबादरसाम्परायिकान्ताः। नपुंसकवेदे एकेन्द्रियप्रभृतयोऽनिवृत्तिबादरसाम्परायिकान्ताः। नारकाश्चतुर्षु स्थानेषु शुद्धे नपुंसकवेदे। तिर्यञ्च एकेन्द्रियादयः चतुरिन्द्रियान्ताः शुद्धे नपुंसकवेदे। असंज्ञिपञ्चेन्द्रियादयः संयतासंयतान्ताः तिर्यञ्चस्त्रिषु वेदेषु। मनुष्याः त्रिषु वेदेषु मिथ्यादृष्ट्या-दयोऽनिवृत्तिबादरसाम्परायिकावसानाः। ततः परे मनुष्या अवेदाः। देवाश्चतुर्षु स्थानेषु स्त्रीपुंवेदयोः ज्ञेयाः।

क्रोधमानमायास्वेकेन्दियादयोऽनिवृत्तिबादरसाम्परायिकान्ताः। लोभकषाये त एव सूक्ष्मसाम्परायिकान्ताः। ततः परेऽकषायाः।

मत्यज्ञानश्रुताज्ञानयोरेकेन्द्रियादयः सासादनसम्यग्दृष्ट्यन्ताः, विभङ्गज्ञाने संज्ञिमिथ्यादृष्टयो वा सासादनसम्यग्दृष्टयो वा पर्याप्तका भवन्ति नाऽपर्याप्तकाः। सम्यङ्मिथ्यादृष्टयः त्रिषु ज्ञानेष्वज्ञानमिश्रेषु वर्तन्ते, कारणसदृशत्वात् कार्यस्य। मतिश्रुतावधिज्ञानेष्वसंयतसम्यग्दृष्टिप्रभृतयः क्षीणकषायवीतरागछद्मस्थान्ताः। मनःपर्ययज्ञाने प्रमत्तसंयतादयः क्षीणकषायवीतरागछद्मस्थान्ताः। केवलज्ञाने द्वे गुणस्थाने सयोगायोगिसंज्ञे।

सामायिकछेदोपस्थापनशुद्धिसंयमयोः प्रमत्तसंयतादयोऽनिवृत्तिबादरसाम्परायिकान्ताः।

परिहारविशुद्धिसंयमे द्वे गुणस्थाने प्रमत्ताप्रमत्तलक्षणे। सूक्ष्मसाम्परायसंयमे एकमेव गुणस्थानं सूक्ष्मसाम्परायशुद्धिसंयमाख्यम्। यथाख्यातविहारशुद्धिसंयमे चत्वारि गुणस्थानान्युपशान्तकषायक्षीणकषायसयोग्ययोगसंज्ञानि। संयमासंयमे एकमेव गुणस्थानं संयतासंयताख्यम्। असंयमे चत्वारि गुणस्थानान्याद्यानि।

चक्षुर्दर्शने चतुरिन्द्रियादयः क्षीणकषायवीतरागछद्मस्थान्ताः। अचक्षुर्दर्शने एकेन्द्रियादयः क्षीणकषायवीतरागछद्मस्थान्ताः। अवधिदर्शनेऽसंयतसम्यग्दृष्ट्यादयः क्षीणकषायान्ताः। केवलदर्शने द्वे गुणस्थानेऽन्ते।

आद्यासु तिसृषु लेश्यासु एकेन्द्रियादयोऽसंयतसम्यग्दृष्ट्यन्ताः। तेजःपद्मलेश्ययोः संज्ञिमिथ्यादृष्टिप्रभृतयोऽप्रमत्तावसानाः। शुक्ललेश्यायां संज्ञिमिथ्यादृष्टिप्रभृतयः सयोगिके-वल्यन्ताः। अलेश्या अयोगकेवलिनः।

भव्यत्वे चतुर्दशापि गुणस्थानानि सन्ति। अभव्यत्वे प्रथममेव।

क्षायिकसम्यक्त्वेऽसंयतसम्यग्दृष्ट्यादयोऽयोगकेवल्यन्ताः। वेदकसम्यक्त्वेऽ–संयतसम्यग्दृष्ट्यादयोऽप्रमत्तान्ताः। औपशमिकसम्यक्त्वेऽसंयतसम्यग्दृष्ट्यादयः उपशान्तकषायान्ताः। सासादनसम्यङ्मिथ्यात्वेष्वेकमेव प्रत्येकं। नारकेषु प्रथमायां पृथिव्यां क्षायिकवेदकौपशमिकसम्यक्त्वा असंयतसम्यग्दृष्टयः। इतरासु भूमिषु वेदकौपशमिकसम्यक्त्वाः। तिर्यक्ष्वसंयतसम्यग्दृष्टिस्थाने क्षायिकवेदकौपशमिकसम्यक्त्वानि सन्ति। संयतासंयतस्थाने क्षायिकसम्यक्त्वं नास्तीतरद् द्वयमस्ति भोगभूमावेवोत्पादात्। तिरश्चीषूभयोरपि स्थानयोः क्षायिकसम्यक्त्वं नास्ति। मनुष्यस्य क्षपणामारब्धवतः पुरुषलिङ्गेनैव वृत्तेरितरद् द्वितयमस्ति। मनुष्येष्वसंयतसम्यग्दृष्टिसंयतासंयतसंयतस्थानेषु क्षायिकवेदकौपशमिकसम्यक्त्वानि सन्ति। भवनवासिव्यन्तरज्योतिष्कदेवेषु तद्देवीषु सौधर्मैशानकल्पवासिनीषु देवीषु चाऽसंयतसम्यग्दृष्टिस्थाने क्षायिकसम्यक्त्वं नास्तीतरद् द्वितयमस्ति। सौधर्मादिषूपरिमग्रैवेयकान्तेषु क्षायिकवेदकौपशमिकसम्यक्त्वानि सन्ति। अनुदिशानुत्तरविमानवासिदेवेषु क्षायिकवेदकसम्यक्त्वे स्तः। औपशमिकं चास्त्युपशमश्रेण्यां मृतानां तत्संभवात्।

संज्ञित्वे संज्ञिमिथ्यादृष्ट्यादयः क्षीणकषायान्ताः। असंज्ञित्वे एकेन्द्रियादयोऽ–संज्ञिपञ्चेन्द्रियान्तास्तदुभयाभावे द्वे गुणस्थानेऽन्त्ये।

आहारे एकेन्द्रियादयः सयोगिकेवलिपर्यन्ताः। अनाहारे पञ्चगुणस्थानानि। विग्रहगतौ मिथ्यादृष्टिसासादनसम्यग्दृष्ट्यसंयतसम्यग्दृष्टयः। प्रतरलोकपूरणयोः सयोगकेवलिनोऽयोगकेवलिनश्च। सिद्धा व्यतीतगुणस्थाना इत्येवमादिलक्षणो धर्मो निःश्रेयसप्राप्तिहेतुरहो भगवद्भिरर्हद्भिः स्वाख्यात इति चिन्तनं धर्मस्वाख्याततत्वानुप्रेक्षा। एवं ह्यस्य चिन्तयतः धर्मानुरागात् सदा प्रतियत्नो भवति। एवमनित्यत्वाद्यनुप्रेक्षासन्निधाने उत्तमक्षमादिधारणात् महान् संवरो भवति।

**स्वाख्यात इति युच्प्रसङ्ग इति चेन्न; प्रादिवृत्तेः॥१४॥** स्यान्मतं सुना योगेऽ-कृच्छ्रार्थे युचा भवितव्यमिति; तन्न; किं कारणम्? प्रादिवृत्तेः। शोभन आख्यातः स्वाख्यातः इति प्रादिलक्षणा वृत्तिर्भवति।

**अनुप्रेक्षा इति भावसाधनत्वे बहुवचनविरोधः॥१५॥** अयमनुप्रेक्षाशब्दो यदि भावसाधनः, बहुवचनं नोपपद्यते तस्यैकत्वात्।

**कर्मसाधनत्वे सामानाधिकरण्याभावः॥१६॥** स्यात् कर्मसाधनत्वमेवमपि युज्यते बहुवचनं सामानाधिकरण्यं तु नोपपद्यते। अन्या ह्यनुप्रेक्षाऽन्यदनुचिन्तनमिति। अथानुचिन्तनमेवानुप्रेक्षा; एवमपि लिङ्गवचनभेदविरोधः।

**न वा; कृदभिहितस्य द्रव्यवद्भावात्॥१७॥** नैष दोषः। किं कारणम्? कृदभिहितस्य द्रव्यवद्भावात्। कृदभिहितो भावो हि द्रव्यवद्भवति यथा पाकः पाकौ पाका इति। तथाऽनुप्रेक्षितव्यार्थभेदात् भावस्य भेदे विवक्षिते बहुवचनं न्यायप्राप्तम्।

**सामानाधिकरण्यसिद्धिश्चोभयोः कर्मसाधनत्वात्॥१८॥** सामानाधिकरण्यं च सिद्ध्यति। कुतः? उभयोः कर्मसाधनत्वात्। अनुप्रेक्ष्यन्ते इत्यनुप्रेक्षाः, अनुचिन्त्यते इत्यनुचिन्तनम्। अनित्यादिस्वतत्त्वं ह्यनुचिन्त्यमानमनुप्रेक्षाव्यपदेशभाग् भवति। कथम्? कर्मण्यनः "युड्व्या बहुलम्" इति, यथा निरदनमवसेचनमिति। एवमपि लिङ्गसंख्या-भेदो नोपपद्यते, उपात्तलिङ्गसंख्यानां परस्पराभिसम्बन्धो युज्यते यथा गावो धनमिति। अथ धर्मोपदेशात् प्रागनुप्रेक्षाः किमर्थं नोक्ता?

**मध्येऽनुप्रेक्षावचनमुभयनिमित्तत्वात्॥१९॥** अनुप्रेक्षावचनं मध्ये क्रियते। कुतः? उभयनिमित्तत्वात्। अनुप्रेक्षां हि भावयन् उत्तमक्षमादींश्च परिपालयति परिषहांश्च जेतुमुत्सहते।

व्याख्याता अनुप्रेक्षाः। संवरहेतुः परीषहजय इत्युक्तम्, अतस्तान् व्याचक्ष्म्हे। आह – व्याख्यास्यति भवानिदमेव तावद्वक्तव्यं किमर्थमेते सहयन्ते? किञ्चैषां पारिभाषिकी संज्ञोतान्वर्था इति? अत्रोच्यते-

## मार्गाच्यवननिर्जरार्थं परिषोढव्याः परीषहाः॥८॥

**परीषहाऽमहत्त्वादन्वर्थसंज्ञा॥१॥** संज्ञा च नाम यतो न लघीयसी। कुत एतत्? लघ्वर्थं हि संज्ञाकरणमिति, तत्र महत्याः संज्ञायाः करणे एतत्प्रयोजनमन्वर्थसंज्ञाः परीषहा इति यथा विज्ञायते तद्विभाव्यते।

**प्रकरणात् संवरमार्गसंप्रतिपत्तिः॥२॥** संवरो हि प्रकृतः, अतस्तदभिसम्बन्धात् मोक्षपदप्रापकसंवरमार्गसंप्रतिपत्तिरिह वेदितव्या।

**तदच्यवनार्थो निर्जरार्थश्च परीषहजयः॥३॥** कर्मागमद्वाराणि संवृण्वतो जैनेन्द्रमार्गान्मा च्योष्महीति पूर्वमेव परीषहान् विजयन्ते। जितपरीषहाः सन्तः तैरनभिभूयमानाः प्रधानसंवरमाश्रित्याऽप्रतिबन्धेन क्षपकश्रेण्यारोहणसामर्थ्यं प्रतिपद्या-भिन्नोत्साहाः सकलसाम्परायिकप्रध्वंसनशक्तयो ज्ञानध्यानपरशुभिः छिन्नमूलानि कर्माणि विधूय प्रस्फोटितपक्षरेणव इव पतत्त्रिणः ऊर्ध्वं व्रजन्ति इत्येवमर्थं परिसोढव्याः परीषहाः। "सोढः" इति षत्वप्रतिषेधः।

यद्येवमुच्यतां के परीषहाः कियन्तो वेति? अत इदमाह –

## क्षुत्पिपासाशीतोष्णदंशमशकनाग्न्यारतिस्त्रीचर्यानिषद्याशय्याक्रोशव-धयाचनालाभरोगतृणस्पर्शमलसत्कारपुरस्कारप्रज्ञाज्ञानादर्शनानि॥९॥

**क्षुधादयो द्वाविंशतिः परीषहाः॥१॥** त एते बाह्याभ्यन्तरद्रव्यपरिणामाः शारीरमानसप्रकृष्टपीडाहेतवः क्षुधादयो द्वाविंशतिः परीषहाः प्रत्येतव्याः। तद्विजये विदुषा संयतेन मोक्षार्थिना प्रतियत्नः कार्यः। तद्यथा –

**प्रकृष्टक्षुदग्निप्रज्वलने धृत्यम्भसोपशमः क्षुज्जयः॥२॥** निवृत्तसर्वसंस्कारविशेषस्य शरीरमात्रोपकरणसन्तुष्टस्य तपःसंयमविलोपं परिहरतः कृतकारितानुमतसंकल्पितो-द्दिष्टसंक्लिष्टक्रयागतप्रत्यात्तपूर्वकर्मपश्चात्कर्मदशविधदोषविप्रमुक्तैषणस्य देशकालजनपदव्य-वस्थापेक्षस्यानशनाध्वरोगतपःस्वाध्यायश्रमवेलातिक्रमावमौदर्यासद्वेद्योदयादिभ्यः नाना-हारेन्धनोपरमे जठराग्निदाहिनी मारुतालोलिताग्निशिखेव समन्ताच्छरीरेन्द्रिय-हृदयसंक्षोभकरी क्षुदुत्पद्यते। तस्याः प्रतीकारं त्रिप्रकारमकाले संयमविरोधिभिर्वा द्रव्यैः स्वयमकुर्वतोऽन्येन क्रियमाणमसेवमानस्य मनसा चाऽनभिसन्दधतः दुस्तरेयं वेदना महाँश्च कालो दीर्घाह्न इति विषादमनापद्यमानस्य त्वगस्थिसिरावतानमात्रकलेवरस्यापि सतः आवश्यकक्रियादिषु नित्योद्यतस्य क्षुद्वशप्राप्तानर्थकाराबन्धनस्थमनुष्यान् पञ्जरगततिर्यक्प्राणिनः क्षुदभ्यर्दितान् परतन्त्रानपेक्षमाणस्य ज्ञानिनो धृत्यम्भसा संयमकुम्भधारितेन क्षुदग्निं शमयतः तत्कृतपीडां प्रत्यवगणयन् क्षुज्जय इत्युच्यते।

**उदन्योदीरणहेतूपनिपाते तद्वशाप्राप्तिः पिपासासहनम्॥३॥** स्नानावगाहनपरिषेक-त्यागिनः पतत्त्रिवदध्रुवासनावस्थस्यातिलवणस्निग्धरूक्षविरुद्धाहारग्रैष्मातपपित्तज्वरान-शनादिभिरुदीर्णां शरीरेन्द्रियोन्माथिनीं पिपासां प्रत्यनाद्रियमाणप्रतीकारमनसः निदाघे पटुतपनकिरणसंतापितेऽटव्यामासन्नेष्वपि ह्रदेष्वप्कायिकजीवपरिहारेच्छया जलमनाद-धानस्य सलिलसेकविवेकम्लानां लतामिव ग्लानिमुपगतां गात्रयष्टिमवगणय्य तपःपरिपालनपरस्य भिक्षाकालेऽपीङ्गिताऽऽकारादिभिः योग्यमपि पानमचोदयतो

धैर्यकुम्भावधारितशीलसुगन्धिप्रज्ञातोयेन विध्यापयतः तृष्णाग्निशिखां संयमपरत्वं पिपासासहनमित्यवसीयते।

**पृथगवचनमैकार्थ्यादिति चेन्न; सामर्थ्यभेदात्॥४॥** स्यादेतत् – क्षुत्पिपासयोः पृथग्वचनमनर्थकम्। कुतः? ऐकार्थ्यादिति; तन्न; किं कारणम्? सामर्थ्यभेदात्। अन्यद्धि क्षुधः सामर्थ्यमन्यत्पिपासायाः।

**अभ्यवहारसामान्यादिति चेन्न; अधिकरणभेदात्॥५॥** स्यान्मतम-भ्यवहारसामान्यादेकार्थमिति; तदपि न युक्तम्; कुतः? अधिकरणभेदात्। अन्यद्धि क्षुधः प्रतीकाराधिकरणमन्यत्पिपासायाः।

**शैत्यहेतुसन्निधाने तत्प्रतीकारानभिलाषात् संयमपरिपालनं शीतक्षमा॥६॥** परित्यक्तवाससः पक्षिवदनवधारितालयस्य शरीरमात्राधिकरणस्य शिशिरवसन्तजल-दागमादिवशात् वृक्षमूलपथिगुहादिषु पतितप्रालेयलेशतुषारलवव्यतिकरशिशिरपवनाभ्या-हतमूर्तेः तत्प्रतिक्रियासमर्थद्रव्यान्तराग्न्याद्यनभिसन्धानात् नारकदुःसहशीतवेदना-नुस्मरणात् तत्प्रतीकारचिकीर्षायां परमार्थविलोपभयात् विद्यामन्त्रौषधिपर्णवल्क-लत्वतृणाजिनादिसंबन्धाद् व्यावृत्तमनसः परकीयमिव देहं मन्यमानस्य धृतिविशेष-प्रावरणस्य गर्भागारेषु धूपप्रवेकप्रकरप्ररूपितप्रदीपप्रभवेषु वराङ्गनानवयौवनोष्णघनस्तन-नितम्बभुजान्तरतर्जितशीतेषु निवासं सुरतसुखरसाकरमनुभूतमसारत्वावबोधादस्मरतः विषादविरहितस्य संयमपरिपालनं शीतक्षमेति भाष्यते।

**दाहप्रतीकारकाङ्क्षाभावाच्चारित्ररक्षणमुष्णसहनम्॥७॥** ग्रैष्मेण पटीयसा भास्कर-किरणसमूहेन संतापितशरीरस्य तृष्णानशनपित्तरोगधर्मश्रमप्रादुर्भूतोष्णस्य स्वेदशोषदा-हाभ्यर्दितस्य जलभवनजलावगाहनानुलेपनपरिषेकार्द्रावनीतलनीलोत्पलकदलीपत्रोत्क्षेप-मारुतजलतूलिकाचन्दनचन्द्रपादकमलकल्हारमुक्ताहारादिपूर्वानुभूतशीतलद्रव्यप्रार्थनापेत-

चेतसः उष्णवेदना अतितीव्रा बहुकृत्वः परवशादवाप्ता। इदं पुनस्तपो मम कर्मक्षयकारणमिति तद्विरोधिनीं क्रियां प्रत्यनादराच्चारित्ररक्षणमुष्णसहनमिति समाम्नायते।

**दंशमशकादिबाधासहनमप्रतीकारम् ॥८॥** प्रत्याख्यातशरीराच्छादनस्य क्वचिदप्य-प्रतिबद्धचेतसः परकृतायतनगुहागह्वरादिषु रात्रौ दिवा वा दंशमशकमक्षिका-पिकशुकपुत्तिकायूकमत्कुणकीटपिपीलिकावृश्चिकादिभिः तीक्ष्णपातैर्भक्ष्यमाणस्यातितीव्र वेदनोत्पादकैरव्यथितमनसः स्वकर्मविपाकमनुचिन्तयतो विद्यामन्त्रौषधादिभिः तन्निवृत्तिं प्रति निरुत्सुकस्यशरीरपतनादपि निश्चितात्मनः परबलप्रमर्दनं प्रति प्रवर्तमानस्य मदान्धगन्धसिन्धुरस्य रिपुजनप्रेरितविविधशस्त्रप्रतिघातादपराङ्मुखस्य निःप्रत्यूहविजयो-पलम्भनमिव कर्मागतिपृतनापराभवं प्रत्यप्रयतनं दंशमशकादिबाधासहनमप्रतीकार-मित्याख्यायते।

**दंशमशकमात्रप्रसङ्ग इति चेन्न; उपलक्षणार्थत्वात् ॥९॥** स्यान्मतम् – दंशमशकस्यैव बाधाकारणस्य ग्रहणं प्राप्नोतीति; तन्न; किं कारणम्; उपलक्षणार्थत्वात्। दशनपरितापकारणस्य सर्वस्यैवेदमुपलक्षणं यथा 'काकेभ्यो रक्ष्यतां सर्पिः' इत्युपघातकोपलक्षणम् । यद्येवमन्यतरग्रहणमेव कर्तव्यम्, अन्यतरोपादाने स्वरूपग्रहण-प्रसङ्गात् द्वितीयवचनमुपलक्षणं संपद्यते।

**जातरूपधारणं नाग्न्यम् ॥१०॥** गुप्तिसमित्यविरोधिपरिग्रहनिवृत्तिपरिपूर्णब्रह्मचर्यमप्रार्थिकमोक्षसाधनचारित्रानुष्ठानं यथाजातरूपमसंस्कृतमविकारं मिथ्यादर्शनाविष्टविद्विष्टं परममाङ्गल्यं नाग्न्यमभ्युपगतस्य स्त्रीरूपाणि नित्याशुचिवीभत्सकुणपभावेन पश्यतो वैराग्यभावनावरुद्धमनोविक्रियस्याऽसंभावितमनुष्यत्वस्य नाग्न्यदोषासंस्पर्शनात् परीषहजयसिद्धिरिति जातरूपधारणमुत्तमं श्रेयःप्राप्तिकारणमित्युच्यते। इतरे पुनर्मनोविक्रियां

निरोद्धुमसमर्थास्तत्पूर्विकाङ्गविकृतिं निगूहितकामाः कौपीनफलकचीवराद्यावरणमातिष्ठन्ते-ऽङ्गसंवरणार्थमेव तन्न कर्मसंवरणकारणम् ।

**संयमे रतिभावादरतिपरीषहजयः॥११॥** संयतस्य क्षुधाद्याबाधासंयमपरिरक्षणेन्द्रिय-दुर्जयत्वव्रतपरिपालनभारगौरवसर्वदाप्रमत्तत्वदेशभाषान्तरानभिज्ञत्वविषमचपलसत्त्वप्रचुरभीमदुर्गनियतैकविहारत्वादिभिररतिं प्रादुष्यन्ती धृतिविशेषान्निवारयतः संयमरतिभावनात् विषयसुखरतिर्विषाहारसेवेव विपाककटुकेति चिन्तयतः रतिपरिबाधाभावादरतिपरीषहजय इति निश्चीयते।

**सर्वेषामरतिकारणत्वात् पृथगरतिग्रहणानर्थक्यमिति चेन्न; क्षुधाद्यभावेऽपि मोहोदयात्तत्प्रवृत्तेः॥१२॥** स्यादेतत् – क्षुधादीनां सर्वेषामरतिहेतुत्वात् पृथगरतिग्रहण मनर्थकमिति; तन्न; किं कारणम्? क्षुधाद्यभावेऽपि मोहोदयात्तत्प्रवृत्तेः। मोहोदया-कुलितचेतसो हि क्षुधादिवेदनाऽभावेऽपि संयमेऽरतिरुपजायते।

**वराङ्गनारूपदर्शनस्पर्शनादिविनिवृत्तिः स्त्रीपरीषहजयः॥१३॥** एकान्ते आराम-भवनादिप्रदेशे रागद्वेषयौवनदर्परूपमदविभ्रमोन्मादमद्यपानावेशादिभिः प्रमदासु बाधमानासु तदक्षिवक्त्रभ्रूविकारश्रृङ्गाराकारविहारहावविलासहासलीलाविजृम्भितकटाक्षविक्षेपसुकुमारस्निग्धमृदुपीनोन्नतस्तनकलशनितान्तताम्रोदरपृथुजघनरूपगुणाभरणगन्धवस्त्रमाल्यादि प्रतिनिगृहीतमनोविप्लुतेः दर्शनस्पर्शनाभिलाषनिवृत्सुकस्य स्निग्धमृदुविशदसुकुमास भिधानतन्त्रीवंशमिश्रातिमधुरगीतश्रवणनिवृत्तादरश्रोत्रस्य संसारार्णवव्यसनपातालावगाढ दुःखरौद्रावर्तकुटिलध्यायिनः स्त्रैणानर्थविनिवृत्तिः स्त्रीपरीषहजय इति कथ्यते। अन्यवादिपरिकल्पिता देवताविशेषाः ब्रह्मादयः तिलोत्तमादेवगणिकारूपसंदर्शनलोल-लोचनविकाराः स्त्रीपरीषहपङ्कान्नोद्वर्तुमात्मानं समर्थाः।

**व्रज्यादोषनिग्रहश्चर्याविजयः॥१४॥** दीर्घकालाभ्यस्तगुरुकुलब्रह्मचर्यस्याधिगतबन्ध-मोक्षपदार्थतत्त्वस्य कषायनिग्रहपरस्य भावनार्पितमतेः संयमायतनभक्तिहेतोर्देशान्तरातिथेः गुरुणाभ्यनुज्ञातस्य नानाजनपदव्याहारव्यवहाराभिज्ञस्य ग्रामे एकरात्रं नगरे पञ्चरात्रं प्रकर्षेणावस्थातव्यमित्येव संयतस्य वायोरिव निःसङ्गतामुपगतस्य देशकालप्रमाणोपेतमध्वगमनमनुभवतः क्लेशक्षमस्य भीमाटवीप्रदेशेषु निर्भयत्वात् सिंहस्येव सहायकृत्यमनपेक्षमाणस्य परुषशर्कराकण्टकादिव्यधनजातपादखेदस्यापि सतः पूर्वोचितयानवाहनादिगमनमस्मरतः सम्यग्व्रज्यादोषं परिहरतः चर्यापरीषहजयो वेदितव्यः।

**संकल्पितासनादविचलनं निषद्यातितिक्षा॥१५॥** श्मशानोद्यानशून्यायतन-गिरिगुहागह्वरादिष्वनभ्यस्तपूर्वेषु विदितसंयमक्रियस्य धैर्यसहायस्योत्साहवतो निषद्यामधिरूढस्य प्रादुर्भूतोपसर्गरोगविकारस्यापि सतः तत्प्रदेशादविचलतः मन्त्रविद्यादिलक्षणप्रतीकाराननपेक्षमाणस्य क्षुद्रजन्तुप्रायविषमदेशाश्रयात् काष्ठोपलवन्निश्चलस्यानुभूतमृदुकुप्यास्तरणादिस्पर्शसुखमविगणयतः प्राणिपीडापरिहारोद्यतस्य ज्ञानध्यानसाधना-धीनधियः संकल्पितवीरासनोत्कुटिकासनादिरतेरासनदोषजयान्निषद्यातितिक्षेत्याख्यायते।

**आगमोदितशयनादप्रच्यवः शय्यासहनम्॥१६॥** स्वाध्यायध्यानाध्वश्रमपरिखेदितस्य मौहूर्तिकीं खरविषमप्रचुरशर्कराकपालसङ्कटातिशीतोष्णेषु भूमिप्रदेशेषु निद्रामनुभवतः यथाकृतैकपार्श्वदण्डायतादिशायिनः सञ्जातबाधाविशेषस्य संयमार्थमस्पन्दमान-स्यानुतिष्ठतः व्यन्तरादिभिर्वा वित्रास्यमानस्य पलायनं प्रति निरुत्सुकस्य मरणभयनिर्विशङ्कस्य निपतितदारुवत् व्यपगतासुवच्चाऽपरिवर्तमानस्य द्वीपिशार्दूलमहोरगादिदुष्टसत्त्वप्रचरितोऽयं प्रदेशोऽचिरादतो निर्गमनं श्रेयः कदा नु रात्रीर्विवसतीति विषादमनादधानस्य सुखप्राप्तावप्यपरितुष्यतः पूर्वानुभूतनवनीतमृदुशयनरतिमनुस्मरतः सम्यगागमोदितशयनादप्रच्यवः शय्यासहनमिति प्रत्येतव्यम्।

**अनिष्टवचनसहनमाक्रोशपरीषहजयः॥१७॥**

तीव्रमोहाविष्टमिथ्यादृष्ट्यार्यम्लेच्छखल-पापाचारमत्तोदृप्तशङ्कितप्रयुक्तमाशब्दधिक्कारपरुषावज्ञानाक्रोशादीन् कर्णविरेचनान् हृदय-शूलोद्भावकान् क्रोधज्वलनशिखाप्रवर्धनकरानप्रियान् श्रृण्वतोऽपि दृढमनसः भस्मसात्कर्तु-मपि समर्थस्य परमार्थावगाहितचेतसः, शब्दमात्रश्राविणस्तदर्थान्वीक्षणविनिवृत्तव्यापारस्य स्वकृताशुभकर्मोदयो ममैष यतोऽमीषां मां प्रति द्वेष इत्येवमादिभिरुपायैरनिष्टवचन-सहनमाक्रोशपरीषहजय इति निर्णीयते।

**मारकेष्वमर्षापोहभावनं वधमर्षणम् ॥१८॥** ग्रामोद्यानाटवीनगरेषु नक्तं दिवा चैकाकिनो निरावरणमूर्तेः समन्तात्पर्यटद्भिश्चौराक्षिकम्लेच्छशवरपरुषवधिरपूर्वापकारिद्विष-त्परलिङ्गिभिराहितक्रोधैः ताडनाकर्षणबन्धनशस्त्राभिधातादिभिर्मार्यमाणस्याप्यनुत्पन्न-वैरस्यावश्यप्रपातुकमेवेदं शरीरं कुशलद्वारेणानेनापनीयते न मम व्रतशीलभावनाभ्रंशनमिति भावशुद्धस्य दह्यमानस्यापि सुगन्धमुत्सृजतश्चन्दनस्येव शुभपरिणामस्य स्वकर्म निर्जरामभिसन्दधानस्य दृढमतेः क्षमौषधिबलस्य मारकेषु सुहृत्स्विवामर्षापोहभावनं वधमर्षणमित्याम्नायते।

**प्राणात्ययेऽप्याहारादिषु दीनाभिधाननिवृत्तिर्याचनाविजयः॥१९॥** क्षुदध्वपरिश्रमत-पोरोगादिभिः प्रच्यावितवीर्यस्य शुष्कपादपस्येव निरार्द्रमूर्त्तेरुन्नतास्थिस्नायुजालस्य निम्नाक्षिपुटपरिशुष्काधरौष्ठक्षामपाण्डुकपोलस्य चर्मवत्सङ्कुचिताङ्गोपाङ्गत्वचः शिथिल-जानुगुल्फकटिबाहुयन्त्रस्य देशकालक्रमोपपन्नकल्पादायिनः वाचंयमस्य मौनिसमस्य वा शरीरसन्दर्शनमात्रव्यापारस्योज्झितमदस्य प्रज्ञाप्यायितमनसः प्राणात्ययेऽप्याहारवसति-भेषजानि दीनाभिधानमुखवैवर्ण्याङ्गसंज्ञादिभिरयाचमानस्य रत्नवणिजो मणिसंदर्शनमिव स्वशरीरप्रकाशनमकृपणं मन्यमानस्य वन्दमानं प्रति स्वकरविकसनमिव पाणिपुट-

धारणमदीनमिति गणयतः याचनासहनमवसीयते। अद्यत्वे पुनः कालदोषाद्दीनानाथ-पाखण्डिबहुले जगत्यमार्गज्ञैरनात्मविद्भिर्याचनमनुष्ठीयते।

**अलाभेऽपि लाभवत् सन्तुष्टस्यालाभविजयः॥२०॥** वायुवदनेकदेशचारिणोऽ-प्रकाशितवीर्यस्याभ्युपगतैककालभोजनस्य सकृन्मूर्तिसंदर्शनव्रतकालस्य देहीय-सभ्यवाक्प्रयोगादुपरतस्यानुपात्तविग्रहप्रतिक्रियस्याद्येदं श्वश्चेदमिति व्यपेतसंकल्पस्यैकस्मिन् ग्रामेऽलब्ध्वा ग्रामान्तरान्वेषणनिरुत्सुकस्य पाणिपुटमात्रपात्रस्य बहुषु दिवसेषु बहुषु च गृहेषु भिक्षामनवाप्याप्यसंक्लिष्टचेतसः नायं दाता तत्रान्यो वदान्योऽस्तीति व्यपगतपरीक्षस्य लाभादप्यलाभो मे परमं तपः इति सन्तुष्टस्यालाभविजयोऽवसेयः।

**नानाव्याधिप्रतीकारानपेक्षत्वं रोगसहनम् ॥२१॥** दुःखादिकरणमशुचिभाजनं जीर्णवस्त्रवत्परिहेयं पित्तमारुतकफसन्निपातनिमित्तानेकामयवेदनाभ्यर्दितमन्यदीयमिव विग्रहं मन्यमानस्योपेक्षिकत्वाप्रच्युतेश्चिकित्साव्यावृत्तचेष्टस्य शरीरयात्राप्रसिद्धये व्रणालेपनवद्यथोक्तमाहारमाचरतो जल्लौषधिप्राप्त्याद्यनेकतपोविशेषर्द्धियोगे सत्यपि शरीरनिःस्पृहत्वात् प्रतीकारानपेक्षिणः पूर्वकृतपापकर्मणः फलमिदमनेनोपायेनानृणी भवामीति चिन्तयो रोगसहनं संपद्यते।

**तृणादिनिमित्तवेदनायां मनसोऽप्रणिधानं तृणस्पर्शजयः॥२२॥** यथाभिनिर्वृत्ता-धिकरणशायिनः शुष्कतृणपत्रभूमिकण्टकफलकशिलातलादिषु प्रासुकेष्वसंस्कृतेषु व्याधि मार्गगमनशीतोष्णजनितश्रमविनोदार्थं शय्यां निषद्यां वा भजमानस्य तृणादिबाधितमूर्तेरुत्पन्नकण्डुविकारस्य दुःखमनभिचिन्तयतः तृणादिस्पर्शबाधाऽवशीकृतत्वात्तृणस्पर्श सहनमवगन्तव्यम् ।

**स्वपरमलापचयोपचयसंकल्पाभावो मलधारणम् ॥२३॥** जलजन्तुपीडापरिहारायाऽ-स्नानप्रतिज्ञस्य, स्वेदपङ्कदिग्धसर्वाङ्गस्य, सिध्मकच्छूदद्रूदीर्णकायस्य नखरोमश्म-

श्रुकेशविकृतसहजबाह्यमलसंपर्ककारणानेकत्वग्विकारस्य स्वगतमलापचये परमलापचये चाऽप्रणिहितमनसः कर्ममलपङ्कापनोदायैवोद्यतस्य पूर्वानुभूतस्नानानुपलेनादिस्मरण पराङ्मुखचित्तवृत्तेर्मलधारणमाख्यायते।

**केशलुञ्चनखेदसहनोपसंख्यानमिति चेन्न; मलपरीषहावरोधात् ॥२४॥** स्यादेतत् – केशलुञ्चने तत्संस्काराकरणे वा महान् खेदः संजायते, तत्सहनमपरमुपसंख्यातव्यमिति; तन्न; किं कारणम्? मलपरीषहावरोधात्। मलसामान्यसंग्रहे हि तदन्तर्भवति।

**मानापमानयोस्तुल्यमनसः सत्कारपुरस्कारानभिलाषः॥२५॥** चिरोषितब्रह्मचर्यस्य महातपस्विनः स्वपरसमयनिश्चयज्ञस्य हितोपदेशपरस्य कथामार्गकुशलस्य बहुकृत्वः परवादिविजयिनः प्रणामभक्तिसंभ्रमासनप्रदानादीनि मे न कश्चित्करोतीत्येवमविचिन्तयतः मानापमानयोस्तुल्यमनसः सत्कारपुरस्कारनिराकाङ्क्षस्य श्रेयोध्यायिनः सत्कारपुरस्कारपरीषहजयो वेदितव्यः। सत्कारः पूजाप्रशंसात्मकः। पुरस्कारो नाम क्रियारम्भादिष्वग्रतः करणमामन्त्रणं वा।

**प्रज्ञाप्रकर्षावलेपनिरासः प्रज्ञाविजयः॥२६॥** अङ्गपूर्वप्रकीर्णकविशारदस्य कृत्स्नग्रन्थार्थावधारिणोऽनुत्तरवादिनस्त्रिकालविषयार्थविदः शब्दन्यायाध्यात्मनिपुणस्य मम पुरस्तादितरे भास्करप्रभाभिभूतोद्योतखद्योतवत् नितरामवभासन्ते इति विज्ञानमदनिरासः प्रज्ञापरीषहजयः प्रत्येतव्यः।

**अज्ञानावमानज्ञानाभिलाषसहनमज्ञानपरीषहजयः॥२७॥** अज्ञोऽयं न किञ्चिदपि वेत्ति पशुसम इत्येवमाद्यधिक्षेपवचनं सहमानस्याध्ययनार्थग्रहणपराभिभवादिष्वसक्त-बुद्धेश्चिरप्रव्रजितस्य विविधतपोविशेषभाराक्रान्तमूर्त्तेः सकलसामर्थ्याप्रमत्तस्य विनिवृत्तानिष्ट-मनोवाक्कायचेष्टस्याद्यापि मे ज्ञानातिशयो नोत्पद्यत इत्यनभिसन्दधतोऽ ज्ञानपरीषह-जयोऽवगन्तव्यः।

**प्रव्रज्याद्यनर्थकत्वासमाधानमदर्शनसहनम् ॥२८॥** संयमप्रधानस्य दुःखकरतपोऽनुष्ठायिनः परमवैराग्यभावनाशुद्धहृदयस्य विदितसकलपदार्थतत्त्वस्याऽर्हदायतनसाधुधर्मपूजकस्य चिरन्तनस्याद्यापि मे ज्ञानातिशयो नोत्पद्यते, महोपवासाद्यनुष्ठायिनां प्रातिहार्यविशेषाः प्रादुरभूवन्निति प्रलापमात्रमिदमनर्थिकेयं प्रव्रज्या विफलं व्रतपरिपालनमित्येवमसमादधानस्य, दर्शनशुद्धियोगाददर्शनपरीषहसहनमवसातव्यम्। एवं परीषहानसंकल्पोपस्थितान् सहमानस्यासंक्लिष्टचेतसः रागादिपरिणामास्रवाभावात् महान् संवरो भवति।

**श्रद्धानालोचनग्रहणमविशेषादिति चेन्न; अव्यभिचारदर्शनार्थत्वात् ॥२९॥** स्यादेतत्-श्रद्धानमालोचनमिति द्विविधं दर्शनम्, तस्याविशेषेण ग्रहणमिह प्राप्नोति, कुतः? अविशेषात्। न हि किञ्चिद्विशेषलिङ्गमिहाश्रितमस्तीति तन्न; किं कारणम्? अव्यभिचारदर्शनार्थत्वात्। मत्यादिज्ञानपञ्चकाव्यभिचारिश्रद्धानं दर्शनम्। आलोचनं तु न श्रुतमनःपर्यययोरप्रवृत्तेरतोऽस्याव्यभिचारिणः श्रद्धानस्य ग्रहणमिहोपपद्यते।

**मनोरथपरिकल्पनामात्रमिति चेन्न; वक्ष्यमाणकारणसामर्थ्यात् ॥३०॥** स्यादेतत् – श्रद्धानदर्शनग्रहणमिदमिति स्वमनोरथपरिकल्पनामात्रमिति; तन्न; किं कारणम्? वक्ष्यमाणकारणसामर्थ्यात्। वक्ष्यते हि कारणम् ''दर्शनमोहान्तराययोरदर्शनालाभौ'' इति।

**अवध्यादिदर्शनपरीषहोपसंख्यानमिति चेन्न; अवधिज्ञानाद्यभावे सहचरितदर्शनाभावादज्ञानपरीषहावरोधात् ॥३१॥** स्यान्मतम्- ''अवध्यादिदर्शनोपेताः सुष्ठु पश्यन्ति नास्य किञ्चिदतिशयवदस्ति दर्शनम्, गुणप्रत्ययं च तत्'' इत्युक्तमागमे। नूनमस्मिंस्तद्योग्या गुणा न सन्तीत्येवमादिवचनसहनमवध्यादिदर्शनपरीषहजयः, तस्योपसंख्यानं कर्तव्य-मिति; तन्न; किं कारणम्? अज्ञानपरीषहावरोधात्। तत्कथमिति चेत्? उच्यते – अवध्यादिज्ञानाभावे तत्सहचरितदर्शनाभावः आदित्यस्य प्रकाशाभावे प्रतापाभाववत्, तस्मादज्ञानपरीषहेऽवरोधः। यद्येवं श्रद्धानदर्शनमपि ज्ञानाविनाभावीति

प्रज्ञापरीषहे तस्यान्तर्भावः प्राप्नोतीति; नैष दोषः; प्रज्ञायां सत्यामपि क्वचित्तत्त्वार्थश्रद्धानाभावाद् व्यभिचारोपलब्धेः।

आह – उपपादितं परीषहजयात् संवरो भवतीति। इदमुच्यतां किमेते सर्वे संसारमहार्णवादुत्तितीर्षन्तममुं प्रवज्यामभ्युपगतमभिद्रवन्त्युत कश्चित्प्रतिविशेष इति? अत्रोच्यते अमी व्याख्यातलक्षणाः क्षुधादयश्चारित्रान्तराणि प्रति भाज्याः, नियमेन पुनरनयोः प्रत्येतव्याः-

## सूक्ष्मसाम्परायच्छद्मस्थवीतरागयोश्चतुर्दश॥१०॥

**चतुर्दशवचनादन्याभावः॥१॥** चतुर्दशेति वचनादन्येषां परीषहाणामभावो वेदितव्यः। कुतः? संख्याविशेषपरिग्रहस्य नियमार्थत्वाच्चतुर्दशैव नान्ये इति।

**सूक्ष्मसाम्पराये नियमानुपपत्तिर्मोहोदयादिति चेन्न; सन्मात्रत्वात्॥२॥** स्यान्मतम् – युज्यते वीतरागछद्मस्थे निरवशेषमोहनीयस्योपशमात् क्षयाच्च तत्कृतवक्ष्यमाण-परीषहाष्टकाभावाच्चतुर्दशसंख्यानियमः सूक्ष्मसाम्पराये तु मोहोदयसद्भावाच्चतुर्दशेति नियमो नोपपद्यते इति; तन्न; किं कारणम्? सन्मात्रत्वात्। तत्र हि केवलो लोभसञ्ज्वलनकषायोदयः, स चात्यन्तसूक्ष्मस्ततो वीतरागछद्मस्थकल्पत्वाच्चतुर्दशेति नियमस्तत्रापि युज्यते।

**तत एव परीषहाभाव इति चेन्न; बाधाविशेषोपरमेऽपि तद्भावस्याचिख्यासितत्वात् सर्वार्थसिद्धस्य सप्तमीगमनसामर्थ्यवत्॥३॥** अथ मतम् – तत एव तयोः परीषहाभावः। कुत एव? मोहोदयाभावात्, मन्दोदयाच्च। यस्य हि क्षुधादिवेदनाप्रकर्षोदयस्तस्य तत्सहनात् भक्तिमात्रकृतमिति तन्न; किं कारणम्? तद्भावस्याचिख्यासितत्वात्। यथा सर्वार्थसिद्धिदेवस्यानुपरतसद्वेद्योदयप्रकर्षस्यापि सप्तमपृथिवीगमनसामर्थ्यं न हीयते तथा वीतरागच्छद्मस्थस्य कर्मोदयसद्भावकृतपरीषहव्यपदेशो युक्तिमवतरति।

आह – यदि शरीरवत्यात्मनि परीषहसन्निधानं प्रतिज्ञायते, अथ भगवत्युत्पन्नकेवलज्ञाने कर्मचतुष्टयफलानुभवनवशवर्तिनि कियन्त उपनिपतन्तीति?

अत्रोच्यते – तस्मिन्पुनः –

## एकादश जिने॥११॥

'कैश्चित्कल्प्यन्ते' इति वाक्यशेषः।

**वेदनीयोदयभावात् क्षुधादिप्रसङ्ग इति चेन्न; घातिकर्मोदयसहायाभावात् तत्सामर्थ्यविरहात्॥१॥** स्यान्मतम् – घातिकर्मप्रक्षयान्निमित्तोपरमे सति नाग्न्यारतिस्त्रीनिषद्याक्रोशयाचनालाभसत्कारपुरस्कारप्रज्ञाज्ञानदर्शनानि मा भूवन् अमी पुनर्वेदनीयाश्रयाः खलु परीषहाः प्राप्नुवन्ति भगवति जिने इति; तन्न; किं कारणम्? घातिकर्मोदयसहायाभावात् तत्सामर्थ्यविरहात्। यथा विषद्रव्यं मन्त्रौषधिबलादुपक्षीणमारणशक्तिकमुपयुज्यमानं न मरणाय कल्प्यते तथा ध्यानानलनिर्दग्धघातिकर्मेन्धनस्यानन्ताप्रतिहतज्ञानादिचतुष्टयस्यान्तरायाभावान्निरन्तरमुपचीयमानशुभपुद्गलसन्ततेर्वेदनीयाख्यं कर्म यदपि प्रक्षीणसहायबलं स्वयोग्यप्रयोजनोत्पादनं प्रत्यसमर्थमिति क्षुधाद्यभावः, तत्सद्भावोपचाराद् ध्यानकल्पनवत्। अथवा, नायं वाक्यशेषः 'एकादश जिने कैश्चित्कल्प्यन्ते' इति। किं तर्हि? एकादश सन्तीति। कथम्? उपचारात्। यथा निरवशेषनिरस्तज्ञानावरणे परिपूर्णज्ञाने एकाग्रचिन्तानिरोधाभावेऽपि कर्मरजोविधूननफलसंभवात् ध्यानोपचारस्तथा क्षुधादिवेदनाभावपरीषहाभावेऽपि वेदनीयकर्मोदयद्रव्यपरीषहसद्भावादेकादश जिने सन्तीति उपचारो युक्तः।

आह – यदि सूक्ष्मसाम्परायादिषु व्यस्ताः परीषहा अथ समस्ताः क्वेति?

## बादरसाम्पराये सर्वे॥१२॥

**बादरसाम्परायग्रहणात् प्रमत्तादिनिर्देशः॥१॥** बादरसाम्पराय इति नायं गुणस्थानविशेषपरिग्रहः। किं तर्हि? अर्थनिर्देशः, ततः प्रमत्तादीनां संयतानां सामान्यग्रहणम्। बादरः साम्परायो यस्य सोऽयं बादरसाम्पराय इति।

**तत्र निमित्तविशेषस्यानुपक्षीणत्वात् सर्वे॥२॥** ज्ञानावरणादिनिमित्तविशेषो वक्ष्यते। तस्यानुपक्षीणत्वात् सर्वे संभवन्ति। कस्मिन् पुनश्चारित्रे सर्वेषां संभवः?

**सामायिकच्छेदोपस्थापनापरिहारविशुद्धिसंयमेषु सर्वसंभवः॥३॥** एतेषां त्रयाणां चारित्राणामन्यतमे सर्वे क्षुत्परीषहादयो द्रष्टव्याः।

आह – गृहीतमेतत् परीषहाणां स्थानविशेषावधारणमिदं तु न विद्मः; कस्याः प्रकृतेः कः कार्य इति? अत्रोच्यते –

## ज्ञानावरणे प्रज्ञाऽज्ञाने॥१३॥

**ज्ञानावरणेऽज्ञानं न प्रज्ञेति चेन्न; अन्यज्ञानावरणसद्भावे तद्भावात्॥१॥** स्यादेतत्ज्ञानावरणे सत्यज्ञानमनवबोधो भवति न प्रज्ञा ज्ञानस्वभावत्वादात्मन इति; तन्न; किं कारणम्? अन्यज्ञानावरणसद्भावे तद्भावात्। प्रज्ञा हि क्षायोपशमिकी अन्यस्मिन् ज्ञानावरणे सति मदं जनयति न सकलावरणक्षय इति प्रज्ञाज्ञाते ज्ञानावरणे सति प्रादुःस्त इत्यभिसम्बध्यते।

**मोहादिति चेन्न; तद्भेदानां परिगणितत्वात्॥२॥** स्यान्मतम् – मोहोदयादहं महाप्राज्ञो नान्य इति मन्यते न ज्ञानावरणादिति; तन्न; किं कारणम्? तद्भेदानां परिगणितत्वात्। मोहभेदा हि परिगणिता दर्शनचारित्रव्याघातहेतुभावेन, तत्र नायमन्तर्भवति, चारित्रवतोऽपि प्रज्ञापरीषहसद्भावात्, ततो ज्ञानावरण एवेति निश्चयः कर्तव्यः।

आह – यद्यनयोरेककर्महेतुत्वमात्मलाभेऽवसीयतेऽदर्शनाऽलाभयोः को हेतुरिति?

## दर्शनमोहान्तराययोरदर्शनालाभौ॥१४॥

**विशिष्टकारणनिर्देशादवध्यादिदर्शनसन्देहाभावः॥१॥** दर्शनमोह इति विशिष्टमिह कारणं निर्दिश्यते ततोऽवध्यादिदर्शनविषयः सन्देहो न भवति।

**अन्तराय इति सामान्यनिर्देशेऽपि सामर्थ्याद्विशेषसंप्रत्ययः॥२॥** यद्यप्ययमन्तराय इति सामान्यनिर्देशस्तथापि सामर्थ्याल्लाभान्तरायविशेषसंप्रत्ययो भवति।

आह – यद्याद्ये मोहनीयभेदे सत्यदर्शनपरीषहो भवति, अथ द्वितीयस्मिन् केषां जन्मेति? अत्रोच्यते –

## चारित्रमोहे नाग्न्यारतिस्त्रीनिषद्याक्रोशयाचना-सत्कारपुरस्काराः॥१५॥

मोहोदयहेतुत्वं नाग्न्यादीनां प्रतिपद्यामहे पुंवेदोदयादिनिमित्तत्वात्, निषद्यापरीष-हस्तु कथमिति चेत्? उच्यते –

**निषद्यापरीषहस्य मोहोदयहेतुत्वं प्राणिपीडार्थत्वात् ॥१॥** मोहोदये सति प्राणिपीडापरिणामः संजायते, तत्परिपालनार्थत्वात् निषद्यापरीषहोदयहेतुरित्यवसीयते।

आह – अभ्युपेमः कर्मप्रकृतिविशेषत्रय अमी परीषहा उक्ता इति। अथान्ये कस्मिन् सति निमित्ते भवन्तीति? अत्राभिधीयते –

## वेदनीये शेषाः॥१६॥

**उक्तादन्यनिर्देशे शेषा इति॥१॥** उक्ताः प्रज्ञापरीषहादयः, तेभ्योऽन्ये शेषा इति निर्दिश्यन्ते। के पुनस्ते? क्षुत्पिपासाशीतोष्णदंशमशकचर्याशय्यावधरोगतृणस्पर्शमल-परीषहाः।

**निमित्तात् कर्मसंयोग इति चेन्न; तद्योगाभावात्॥२॥** स्यान्मतम् – यथा "चर्मणि द्वीपिनं हन्ति" निमित्तात्कर्मसंयोग इति विभक्तिविशेषविधानं तथा वेदनीये इत्येवमादिनिर्देशो भवतीति; तन्न; किं कारणम्? तद्योगाभावात्। कर्मसंयोगे हि तद्विभक्तिविधानम्। न चात्र कर्मसंयोगोऽस्तीति तदभावः। कथं तर्हि निर्देशः?

**सन्निर्देशस्तदुपलक्षणत्वात्॥३॥** यथा "गोषु दुह्यमानासु गतः, दुग्धास्वागतः" इति सन्निर्देशः तथा वेदनीये सतीत्येवमादिः सन्निर्देशोऽवसेयः। कुतः? तदुप-लक्षणत्वात्।

आह – व्याख्यातनिमित्तलक्षणविकल्पाः प्रत्यात्म प्रादुर्भवन्तः कति युगपदव तिष्ठन्त इति? अत्रोच्यते –

## एकादयो भाज्या युगपदेकस्मिन्नैकोनविंशतेः॥१७॥

**आङभिविध्यर्थः॥१॥** आङयमभिविध्यर्थो द्रष्टव्यः, तेन एकान्नविंशतिरपि क्वचिद्युगपद्भवन्तीत्यवगम्यते। तत्कथमिति चेत्? उच्यते –

**शीतोष्णशय्यानिषद्याचर्याणामसहभावादेकान्नविंशतिसंभवः॥२॥** शीतोष्णपरीष-हयोरेकः, शय्यानिषद्याचर्याणां चान्यतम एव भवत्येकस्मिन्नात्मनि। कुतः? सहानवस्थानात्। ततस्त्रयाणामपगमे युगपदेकात्मनीतरेषां संभवादेकान्नविंशतिविकल्पो बोद्धव्यः।

**प्रज्ञाऽज्ञानयोरविरोधादन्यतराभावेऽष्टादशप्रसङ्ग इति चेन्न; अपेक्षातो विरोधाभावात् ॥३॥** स्यान्मतम् – प्रज्ञाऽज्ञानेऽपि विरुद्धे तयोरन्यतराभावे-ऽष्टादशसंख्याप्रसङ्ग इति; तन्न; किं कारणम्? अपेक्षातो विरोधाभावात्। श्रुतज्ञानापेक्षया प्रज्ञाप्रकर्षे सत्यवध्याद्यभावापेक्षयाऽज्ञानोपपत्तेः।

**दंशमशकस्य युगपत्प्रवृत्तेरेकान्नविंशतिविकल्प इति चेन्न; प्रकारार्थत्वान्मशक-शब्दस्य॥४॥** स्यादेतत् प्रज्ञाऽज्ञानयोर्विरोधाद्युगपदसंभवे दंशमंशकस्य युगपत्प्रवृत्तेरे-कान्नाविंशतिविकल्प इति; तन्न; किं कारणम्? प्रकारार्थत्वान्मशकशब्दस्य, एक एव ह्ययं परीषहः।

**दंशग्रहणात्तुल्यजातीयसंप्रत्यय इति चेन्न; श्रुतिविरोधात् ॥५॥** अथ मतमेतत् – दंशग्रहणात्तुल्यजातीयसंप्रत्ययस्ततो मशकशब्दस्य न प्रकारार्थत्वमिति; तन्न; किं कारणम्? श्रुतिविरोधात्। यच्छब्द आह तन्न प्रमाणम्, न च दंशशब्दः प्रकारमभिधत्ते, ततोऽस्य विरोधः स्यात्।

**तत्तुल्यमिति चेन्न; अन्यतरेण परीषहस्य निरूपितत्वात् ॥६॥** यदि श्रुतिविरोधादन्यार्थकल्पनमयुक्तमित्युच्यते; ननु मशकशब्देऽपि तत्तुल्यमिति प्रकारार्थ-त्वमस्य नोपपद्यते इति; तन्न; किं कारणम्? अन्यतरेण परीषहस्य निरूपितत्वात्, दंशग्रहणेनैव परीषहे निरूपिते मशकग्रहणसामर्थ्यात्प्रकारार्थो विज्ञायते।

**चर्याद्यविशेषादेकान्नविंशतिवचनमिति चेन्न; अरतौ परीषहजयाभावात् ॥७॥** स्यान्मतम् – चर्यादीनां त्रयाणां परीषहाणामविशेषादेकत्र नियमाभावादेकत्वमित्ये-कान्नविंशतिवचनं क्रियते इति; तन्न; किं कारणम्? अरतौ परीषहजयाभावात्। यद्यत्र रतिर्नास्ति परीषहजय एवास्य व्युच्छिद्यते। तस्माद्यथोक्तप्रतिद्वन्द्विसान्निध्यात्

परीषहस्वभावाश्रयपरिणामात्मलाभनिमित्तविचक्षणस्य तत्परित्यागायापरप्रवृत्त्यर्थमौपोद्घातिकं प्रकरणमुक्तम्।

निर्दिष्टाः परीषहाः, यैरनाविष्टा विपश्चितोऽभिनवानि कर्माणि नोपचिन्वन्ति पूर्वप्रचितानि च निर्जरयन्ति। तदनन्तरं खलु कर्मनिर्हरणार्थमाहितसामर्थ्यं पुरुषसाध्यं यदवोचाम चारित्रम्, तच्चारित्रमोहोपशमक्षयक्षयोपशमलक्षणात्मविशुद्धिलब्धिसामान्यापेक्षयैकम्। प्राणिपीडापरिहारेन्द्रियदर्पनिग्रहशक्तिभेदाद् द्विविधम्। उत्कृष्टमध्यमजघन्यविशुद्धिप्रकर्षाप्रकर्षयोगात्तृतीयमवस्थानमनुभवति। विकलज्ञानविषयसरागवीतरागसकलावबोधगोचरसयोगायोगविकल्पाच्चातुर्विध्यमप्यश्नुते। पञ्चतयीं च वृत्तिमास्कन्दति। तद्यथा –

## सामायकच्छेदोपस्थापनापरिहारविशुद्धिसूक्ष्मसाम्पराय-
## यथाख्यातमिति चारित्रम् ॥१८॥

**सामायिकशब्दोऽतीतार्थः॥१॥** अयं सामायिकशब्दोऽतीतार्थो द्रष्टव्यः। क्व? "दिग्देशानर्थदण्डविरतिसामायिक" इत्यत्र। सामायिकमिति वा समासविषयत्वात्। अथवा आयन्तीत्यायाः अनर्थाः सत्त्वव्यपरोपणहेतवः, संगताः आयाः समायाः। सम्यग्वा आयाः समायास्तेषु भवं ते वा प्रयोजनमस्येति सामायिकमवस्थानम्।

**सर्वसावद्ययोगप्रत्याख्यानपरम् ॥२॥** सर्वस्य सावद्ययोगस्याऽभेदेन प्रत्याख्यानमवलम्ब्य प्रवृत्तमवधृतकालं वा सामायिकमित्याख्यायते।

**गुप्तिप्रसङ्ग इति चेन्न; इह मानसप्रवृत्तिभावात् ॥३॥** स्यादेतत् – निवृत्तिपरत्वात् सामायिकस्य गुप्तिप्रसङ्ग इति; तन्न; किं कारणम्? मानसप्रवृत्तिभावात्। अत्र मानसी प्रवृत्तिरस्ति निवृत्तिलक्षणत्वाद् गुप्तेरित्यस्ति भेदः।

**समितिप्रसङ्ग इति चेन्न; तत्र यतस्य प्रवृत्त्युपदेशात्॥४॥** स्यान्मतम् – यदि प्रवृत्तिरूपं सामायिकं समितिलक्षणं प्राप्तमिति; तन्न; किं कारणम्? तत्र यतस्य प्रवृत्त्युपदेशात्। सामायिके हि चारित्रे यतस्य समितिषु प्रवृत्तिरुपदिश्यते। अतः कार्यकारणभेदादस्ति विशेषः।

**धर्मप्रसङ्ग इति चेन्न; अन्ते वचनस्य कृत्स्नकर्मक्षयहेतुत्वज्ञापनार्थत्वात्॥५॥** स्यादेतत् – दशविधो धर्मो व्याख्यातः, तत्र संयमेऽन्तर्भावोऽस्य प्राप्नोतीति; तन्न; किं कारणम्? अन्ते वचनस्य कृत्स्नकर्मक्षयहेतुत्वज्ञापनार्थत्वात्। धर्मेऽन्तर्भूतमपि चारित्रमन्ते गृह्यते मोक्षप्राप्तेः साक्षात्कारणमिति ज्ञापनाय।

**प्रमादकृतानर्थप्रबन्धविलोपे सम्यक् प्रतिक्रिया छेदोपस्थापना॥६॥** त्रसस्थावर-जन्तुदेशकालप्रादुर्भावे विनिरोधाप्रत्यक्षत्वात् प्रमादवशादभ्युपगतनिरवद्यक्रियाप्रबन्ध विलोपे सति तदुपात्तस्य कर्मणः सम्यक् प्रतिक्रिया छेदोपस्थापना विज्ञेया।

**विकल्पनिवृत्तिर्वा॥७॥** अथवा, सावद्यं कर्म हिंसादिभेदेन विकल्पनिवृत्तिः छेदोपस्थापना।

**परिहारेण विशिष्टा शुद्धिर्यस्मिंस्तत्परिहारविशुद्धिचारित्रम्॥८॥** परिहरणं परिहारः प्राणिवधान्निवृत्तिस्तेन विशिष्टा शुद्धिर्यस्मिंस्तत्परिहारविशुद्धिचारित्रं प्रत्येतव्यम्। तत्पुनस्त्रिंशद्वर्षजातस्य संवत्सरपृथक्त्वं तीर्थकरपादमूलसेविनः प्रत्याख्याननामधेयपूर्व परगतस्य जन्तुनिरोधप्रादुर्भावकालपरिमाणजन्मयोनिदेशद्रव्यस्वभावविधानज्ञस्य प्रमाद रहितस्य महावीर्यस्य परमनिर्जरस्यातिदुष्करचर्यानुष्ठायिनः, तिस्रः संध्या वर्जयित्वा द्विगव्यूतगामिनः संपद्यते, नान्यस्य।

**अतिसूक्ष्मकषायत्वात् सूक्ष्मसाम्परायम्॥९॥** सूक्ष्मस्थूलसत्त्ववधपरिहारप्रमत्ततत्वा-दनुपहतोत्साहस्याखण्डितक्रियाविशेषस्य सम्यग्दर्शनज्ञानमहामारुतसन्धुक्षितप्रशस्ताध्य

वसायाग्निशिखोपश्लुष्टकर्मेन्धनस्य ध्यानविशेषविशिखीकृतकषायविषाङ्कुरस्यापचयाभि-मुखालीनस्तोकमोहबीजस्य तत एव परिप्राप्तान्वर्थसूक्ष्मसाम्परायशुद्धिसंयतस्य सूक्ष्म साम्परायचारित्रमाख्यायते।

**गुप्तिसमित्योरन्यतरत्रान्तर्भाव इति चेन्न; तद्भावेऽपि गुणविशेषनिमित्ता-श्रयणात् ॥१०॥** स्यान्मतम् – गुप्तिसमित्योरन्यतरत्रान्तर्भवतीदं चारित्रं प्रवृत्तिनिरोधात् सम्यगयनाच्चेति; तन्न; किं कारणम्? तद्भावेऽपि गुणविशेषनिमित्ताश्रयणात्। लोभसंज्वलनाख्यः साम्परायः सूक्ष्मो भवतीत्ययं विशेष आश्रितः।

**निरवशेषशान्तक्षीणमोहत्वादथाख्यातचारित्रम् ॥११॥** चारित्रमोहस्य निरवशेषस्यो-पशमात् क्षयाच्चात्मस्वभावावस्थापेक्षलक्षणमथाख्यातचारित्रमित्याख्यायते। पूर्वचारित्रा-नुष्ठायिभिराख्यातं न तु परिप्राप्तं प्राङ्मोहक्षयोपशमाभ्यामित्यथाख्यातम्। अथशब्दस्या-नन्तर्यार्थवृत्तित्वान्निरवशेषमोहक्षयोपशमानन्तरमाविर्भवतीत्यर्थः।

**यथाख्यातमिति वा॥१२॥** अथवा, यथाऽऽत्मस्वभावोऽवस्थितः तथैवाख्यातत्वात् यथाख्यातमित्याख्यायते।

**इतेरुपादानं ततः कर्मसमाप्तिज्ञापनार्थत्वात् ॥१३॥** हेत्वेवंप्रकारव्यवस्थावि-पर्यासादिषु दृष्टप्रयोग इतिरिह विवक्षातः समाप्तिद्योतनो द्रष्टव्यः। ततो यथाख्यातचारित्रात् सकलकर्मक्षयसमाप्तिर्भवतीति ज्ञाप्यते।

**उत्तरोत्तरगुणप्रकर्षख्यापनार्थमानुपूर्व्यवचनम् ॥१४॥**

सामायिकादीनामानुपूर्व्यवचन-मुत्तरोत्तरगुणप्रकर्षख्यापनार्थं क्रियते। तद्यथा – सामायिकच्छेदोपस्थापनासंयमजघन्य-विशुद्धिलब्धिरल्पा। ततः परिहारविशुद्धिचारित्रस्य जघन्या लब्धिरनन्तगुणा, तस्यैवोत्कृष्टा लब्धिरनन्तगुणा। ततः सामायिकछेदोपस्थापनासंयमोत्कृष्टा विशुद्धिरनन्तगुणा। ततः सूक्ष्मसाम्परायचारित्रस्य

जघन्यविशुद्धिरनन्तगुणा। तस्यैवोत्कृष्टा विशुद्धिरनन्तगुणा। ततो यथाख्यातचारित्रस्य विशुद्धिः संपूर्णा प्रकर्षाप्रकर्षविरहिता अनन्तगुणा। एवमेते पञ्च चारित्रोपयोगाः शब्दविषयत्वेन संख्येयभेदाः, बुद्ध्यध्यवसानभेदादसंख्येयाः। अर्थतोऽ-नन्तभेदाश्च भवन्ति। तदेतचारित्रं पूर्वास्रवनिरोधकारणत्वात्परमसंवरहेतुरवसेयः।

आह – उक्तं चारित्रम्, तदनन्तरमुद्दिष्टं यत् "तपसा निर्जरा च" इति, तस्येदानीं तपसो विधानं कर्त्तव्यमिति; अत्रोच्यते – तद् द्विविधं बाह्यमभ्यन्तरं च, तत्प्रत्येकं षड्विधम्, तत्र बाह्यस्य भेदप्रतिपत्त्यर्थमाह –

## अनशनावमौदर्यवृत्तिपरिसंख्यानरसपरित्यागविविक्तशय्यासन-कायक्लेशा बाह्यं तपः॥१९॥

**दृष्टफलानपेक्षं संयमप्रसिद्धिरागोच्छेदकर्मविनाशध्यानागमावाप्त्यर्थमनशन-वचनम् ॥१॥** यत्किञ्चिद् दृष्टफलं मन्त्रसाधनाद्यनुद्दिश्य क्रियमाणमुपवसनमनशनमित्युच्यते। तत्किमर्थम्? संयमप्रसिद्धिरागोच्छेदकर्मविनाशध्यानागमावाप्त्यर्थमवसेयम्।

**तद् द्विविधमवधृतानवधृतकालभेदात् ॥२॥** तदनशनं द्वेधा व्यवतिष्ठते। कुतः? अवधृताऽनवधृतकालभेदात्। तत्रावधृतकालं सकृद्भोजनं चतुर्थभक्तादि अनवधृतकाल-मादेहोपरमात्।

**संयमप्रजागरदोषप्रशमसंतोषस्वाध्यायसुखसिद्ध्याद्यर्थमवमौदर्यम् ॥३॥** आशितं भवो य औदनः तस्य चतुर्भागेनार्द्धग्रासेन वाऽवममूनमुदरमस्यासाववमोदरः, अवमोदरस्य भावः कर्म वाऽवमौदर्यम्। तत्किमर्थम्? संयमप्रजागरदोषप्रशमसंतोषस्वाध्याय-सुखसिद्ध्यर्थम्।

**एकागारसप्तवेश्मैकरथ्यार्द्धग्रामादिविषयः संकल्पो वृत्तिपरिसंख्यानम् ॥४॥** भिक्षार्थिनो मुनेरेकागारादिविषयः संकल्पश्चिन्तावरोधः वृत्तिपरिसंख्यानमाशानिवृत्त्यर्थमवगन्तव्यम् ।

**दान्तेन्द्रियत्वतेजोऽहानिसंयमोपरोधव्यावृत्त्याद्यर्थं घृतदधिगुडतैलादिरसत्यजनं रस-परित्यागः॥५॥** दान्तेन्द्रियत्वतेजोऽहानिः संयमोपरोधनिवृत्तिरित्येवमाद्यर्थं घृतदधिगुडतैलादिरसत्यजनं रसपरित्याग इत्युच्यते।

**रसवत्परित्याग इति चेन्न; मतोर्लुप्तनिर्दिष्टत्वात् ॥६॥** स्यान्मतम् – रसशब्दोऽयं गुणवाची, तद्वतश्चात्र परित्याग इष्ट इति तस्माद्रसवत्परित्याग इति निर्देशः कर्त्तव्य इति; तन्न; किं कारणम्? मतोर्लुप्तनिर्दिष्टत्वात्। लुप्तनिर्दिष्टोऽत्र मतुः यथा शुक्लः पट इति।

**अव्यतिरेकाद्वा तद्वत्संप्रत्ययः॥७॥** अथवा, न गुणं व्यतिरिच्य गुणी वर्तते, ततः सामर्थ्यात्तद्वन्निर्देशः प्रतिपत्तव्यः। द्रव्यत्यागमुखेन रसपरित्यागो नान्यथेति।

**सर्वत्यागप्रसङ्ग इति चेन्न; प्रकर्षगतेः॥८॥** स्यादेतत् – सर्वमुपभोगार्हं पुद्गलद्रव्यं रसवत्, अतः सर्वत्यागः प्राप्नोतीति; तन्न; किं कारणम्? प्रकर्षगतेः। यथाऽभिरूपाय कन्या देयेत्यभिरूपतमे संप्रत्ययो भवति तथा सर्वस्य पुद्गलद्रव्यस्य रसवत्त्वात् प्रकृष्टरसत्यागसंप्रत्ययो भवति। कश्चिदाह –

**अनशनावमौदर्यरसपरित्यागानां वृत्तिपरिसंख्यानावरोधात् पृथगनिर्देशः॥९॥** वृत्तिपरिसंख्यानमिदं सामान्यभिक्षाचरणे नियमकारित्वात्। अतः अनशनावमोदर्यरसपरित्यागानां तेनैवावरुद्धत्वात् पृथङ् निर्देशोऽनर्थकः।

**तद्विकल्पनिर्देश इति चेन्न; अनवस्थानात् ॥१०॥** अथ मतम् – तस्य वृत्तिपरिसंख्यानस्य विकल्पा निर्देष्टव्या इति पृथगुपदेशः कर्तव्य इति तन्न; किं कारणम्? अनवस्थानात्।

**न वा, कायचेष्टाविषयगणनार्थत्वाद् वृत्तिपरिसंख्यानस्य॥११॥** न वैष दोषः; किं कारणम्? भिक्षाचरणे प्रवर्तमानः साधुरेतावत्क्षेत्रविषयां कायचेष्टां कुर्वीत कदाचिद्यथा-शक्तीति विषयगणनार्थं वृत्तिपरिसंख्यानं क्रियते। अनशनमभ्यवहर्तव्यनिवृत्तिः, एवमव-मौदर्यरसपरित्यागावभ्यवहर्तव्यैकदेशनिवृत्तिपराविति महान् भेदः।

**आबाधात्ययब्रह्मचर्यस्वाध्यायध्यानादिप्रसिद्ध्यर्थे विविक्तशय्यासनम् ॥१२॥** शून्या-गारादिषु विविक्तेषु जन्तुपीडाविरहितेषु संयतस्य शय्यासनं वेदितव्यम्। तत्किमर्थम्? आबाधात्ययब्रह्मचर्यस्वाध्यायध्यानादिप्रसिद्ध्यर्थम्।

**कायपरिक्लेशः स्थानमौनातपनादिरनेकधा॥१३॥** नानाविधप्रतिमास्थानं वाचंय-मत्वमातापनं वृक्षमूलवासः इत्येवमादिना शरीरपरिखेदः कायक्लेश इत्युच्यते। स किमर्थः?

**देहदुःखतितिक्षासुखानभिष्वङ्गप्रवचनप्रभावनार्थम् ॥१४॥** दुःखोपनिपाते सति तितिक्षार्थं विषयसुखे चानभिष्वङ्गार्थं प्रवचनप्रभावनाद्यर्थं च कायक्लेशानुष्ठानं क्रियते। इतरथा हि ध्यानप्रवेशकाले सुखोचितस्य द्वन्द्वोपनिपाते सति समाधानं न स्यात्।

**परीषहजातीयत्वात् पौनरुक्त्यमिति चेन्न; स्वकृतक्लेशापेक्षत्वात् ॥१५॥** स्यान्मतमयं कायक्लेशः स्थानमौनादिः परीषहजातीयस्ततः पुनरुपदेशः पौनरुक्त्यं जनयतीति; तन्न; किं कारणम्? स्वकृतकायक्लेशापेक्षत्वात्। बुद्धिपूर्वो हि कायक्लेश इत्युच्यते, यदृच्छयोपनिपाते परीषहः। दृष्टफलानपेक्षमित्येतत् सर्वत्रानुवर्तते। तत्तर्हि कर्तव्यम् –

**सम्यगित्यनुवृत्तेर्दृष्टफलनिवृत्तिः ॥१६॥** "सम्यग्योगनिग्रहो गुप्तिः" इत्यतः सम्यग्ग्रहणमनुवर्त्तते, तेन दृष्टफलनिवृत्तिः कृता भवति सर्वत्र। बाह्यत्वमस्य कुतः?

**बाह्यद्रव्यापेक्षत्वाद् बाह्यत्वम् ॥१७॥** बाह्यमशनादिद्रव्यमपेक्ष्य क्रियत इति बाह्यत्वमस्य ग्राह्यम् ।

**परप्रत्यक्षत्वात् ॥१८॥** परेषां खल्वप्यनशनादि प्रत्यक्षं भवति, ततश्चास्य बाह्यत्वम् ।

**तीर्थ्यगृहस्थकार्यत्वाच्च ॥१९॥** अनशनादि हि तीर्थ्यैर्गृहस्थैश्च क्रियते ततोऽप्यस्य बाह्यत्वम् । कथं तर्ह्येतदनशनादि तप इत्युच्यते?

**कर्मनिर्दहनात्तपः ॥२०॥** यथाऽग्निः सञ्चितं तृणादि दहति तथा कर्म मिथ्यादर्शनाद्यर्जितं निर्दहतीति तप इति निरुच्यते।

**देहेन्द्रियतापाद्वा ॥२१॥** अथवा देहस्येन्द्रियाणां च तापं करोतीत्यनशनादि तप इत्युच्यते। तत्तापादिन्द्रियनिग्रहः सुकरो भवति।

उक्तं बाह्यं तपः, अथाभ्यन्तरस्य के भेदा इति? अत्रोच्यते –

## प्रायश्चित्तविनयवैयावृत्त्यस्वाध्यायव्युत्सर्गध्यानान्युत्तरम् ॥२०॥

कुतः पुनरुत्तरत्वम्?

**अन्यतीर्थ्यानभ्यस्तत्वादुत्तरत्वम् ॥१॥** यतोऽन्यैस्तीर्थ्यैरनभ्यस्तमनालीढं ततोऽस्योत्तरत्वमभ्यन्तरमिति यावत् ।

**अन्तःकरणव्यापारात् ॥२॥** प्रायश्चित्तादितपोऽन्तःकरणव्यापारालम्बनं ततोऽस्याभ्य-न्तरत्वम् ।

**बाह्यद्रव्यानपेक्षत्वाच्च॥३॥** न हि बाह्यद्रव्यमपेक्ष्य वर्तते प्रायश्चित्तादि, ततश्चास्या-भ्यन्तरत्वमवसेयम्।

तद्भेदप्रतिपत्त्यर्थमाह –

## नवचतुर्दशपञ्चद्विभेदं यथाक्रमं प्राग्ध्यानात्॥२१॥

**नवादीनां भेदशब्दोपसंहितानामन्यपदार्थे वृत्तिः॥१॥** नवादीनां संख्यापदानां भेदशब्दोपसंहितानामन्यपदार्थे वृत्तिर्भवति – नव च चत्वारश्च दश च पञ्च च द्वौ च भेदा अस्य नवचतुर्दशपञ्चद्विभेदमिति।

**द्विशब्दस्य पूर्वनिपातप्रसङ्ग इति चेन्न; पूर्वसूत्रापेक्षत्वात्॥२॥** स्यादेतत् - द्विशब्दस्य पूर्वनिपातः प्राप्नोति, "द्वन्द्वे सुः", "अल्पाच्तरम्।" इति सूत्रप्रामाण्यात् "संख्यायाः अल्पीयस्याः" इत्युपसंख्यानाच्चेति; तन्न; किं कारणम्? पूर्वसूत्रापेक्षत्वात्। पूर्वसूत्रे विहितानां नवादिभिर्यथाक्रममभिसंबन्धः कथं स्यादिति? नैतद्युक्तम्, न लक्षणेन पदकारा अनुवर्त्याः, पदकारैर्नाम लक्षणमनुवर्त्यमिति। न च प्रयोजनेन लक्षण-मुल्लङ्घनीयम्; नैष दोषः, राजदन्तादिषु पाठः करिष्यते, लक्ष्यानुविधानाल्लक्षणस्य।

**प्राग्ध्यानादिति वचनं यथासंख्यप्रतिपत्त्यर्थम्॥३॥** प्राग्ध्यानादित्युच्यते यथासंख्यप्रतिपत्तिः कथं स्यादितीतरथा हि वैषम्याद्यथासंख्यं न स्यात्।

तत्राभ्यन्तरतपोभेदस्याद्यस्य निर्दिष्टविकल्पसंख्यस्य भेदाख्यविशेषप्रक्लृप्त्यर्थ-मिदमुच्यते –

## आलोचनप्रतिक्रमणतदुभयविवेकव्युत्सर्गतपश्छेदपरिहारो-पस्थापनाः॥२२॥

किमर्थमिदमुच्यते?

**प्रमाददोषव्युदासभावप्रसादनैःशल्यानवस्थाव्यावृत्तिमर्यादाऽत्यागसंयमदार्ढ्याराधनादिसिद्ध्यर्थं प्रायश्चित्तम् ॥१॥** प्रमाददोषव्युदासो भावप्रमादो नैःशल्यमनवस्थावृत्तिः मर्यादाऽत्यागः संयमदार्ढ्यमाराधनमित्येवमादीनां सिद्ध्यर्थं प्रायश्चित्तं नवविधं विधीयते। प्रायः साधुलोकः, प्रायस्य यस्मिन्कर्मणि चित्तं तत्प्रायश्चित्तम्। "प्रायाच्चिचित्तिचित्तयोः" इति सुट्। अपराधो वा प्रायः चित्तं शुद्धिः, प्रायस्य चित्तं प्रायश्चित्तम्, अपराधविशुद्धिरित्यर्थः।

**तत्र गुरवे प्रमादविनिवेदनं दशदोषवर्जितमालोचनम् ॥२॥** तेषु नवसु प्रायश्चित्तविकल्पेषु गुरवे एकान्ते निषण्णाय प्रसन्नमनसे विदितदेशकालस्य शिष्यस्य सविनयेनात्मप्रमादनिवेदनं दशभिर्दोषैर्विवर्जितमालोचनमित्याख्यायते। के पुनस्ते दश दोषा इति चेत्? उच्यते – उपकरणेषु दत्तेषु प्रायश्चित्तं मे लघु कुर्वन्तीति विचिन्त्य दानं प्रथममालोचनदोषः॥१॥ प्रकृत्या दुर्बलो ग्लानोऽहमुपवासादि न कर्तुमलं यदि लघु दीयेत ततो दोषनिवेदनं करिष्ये इति वचनं द्वितीयो दोषः॥२॥ अन्यादृष्टदोषगूहनं कृत्वा प्रकाशदोषनिवेदनं मायाचारस्तृतीयो दोषः॥३॥ आलस्यात् प्रमादाद्वाऽल्पापराधा-वबोधनिरुत्सुकस्य स्थूलदोषप्रतिपादनं चतुर्थः॥४॥ महादुश्चरप्रायश्चित्तभयान्महादोष-संवरणं कृत्वा तनुप्रमादाचारनिबोधनं पञ्चमः॥५॥ ईदृशे व्रतातिचारे सति किन्नः स्यात्प्रायश्चित्तमित्युपायेन गुरूपासना षष्ठः॥६॥ पाक्षिकचातुर्मासिकसांवत्सरिकेषु कर्मसु महति यतिसमवाये आलोचनशब्दाकुले पूर्वदोषकथनं सप्तमः॥७॥ गुरूपपादितं प्रायश्चित्तं किमिदं युक्तमागमे स्यान्नवेति शङ्कमानस्यान्यसाधुपरिप्रश्नोऽष्टमः॥८॥ यत्किञ्चित्प्र-योजनमुद्दिश्यात्मना समानायैव प्रमादाचरितमावेद्य महदपि गृहीतं प्रायश्चित्तं न फलकरमिति नवमः॥९॥ अस्यापराधेन ममातिचारः समानः तमयमेव वेत्त्यस्मै यद्दत्तं तदेव मे युक्तं लघूकर्त्तव्यमिति स्वदुश्चरितसंवरणं दशमो दोषः॥१०॥

आत्मन्यपराधं चिरमनवस्थाप्य निकृतिभावमन्तरेण बालवदृजुबुद्ध्या दोषं निवेदयतः न ते दोषा भवन्त्यन्ये च। संयतालोचनं द्विविषयमिष्टमेकान्ते, संयतिकालोचनं त्र्याश्रयं प्रकाशे। लज्जापरपरिभवादिगणनया निवेद्यातिचारं यदि न शोधयेदपरीक्षितायव्ययाधमर्णवदवसीदति। महदपि तपस्कर्म अनालोचनपूर्वकम् नाभिप्रेत फलप्रदमतिक्तकायगतौषधवत् कृतालोचनस्यापि गुरुमतप्रायश्चित्तमकुर्वतोऽपरिकर्म-सस्यवत् महाफलं न स्यात्। कृतालोचनचित्तगतं प्रायश्चित्तं परिमृष्टदर्पणतलरूपवत् परिभ्राजते।

**मिथ्यादुष्कृताभिधानाद्यभिव्यक्तप्रतिक्रिया प्रतिक्रमणम्॥३॥** कर्मवशप्रमादो-दयजनितं मिथ्या मे दुष्कृतमित्येवमाद्यभिव्यक्तः प्रतीकारः प्रतिक्रमणमित्युच्यते।

**तदुभयसंसर्गे सति शोधनात्तदुभयम्॥४॥** किञ्चित्कर्माऽऽलोचनमात्रादेव शुद्ध्यत्यपरं प्रतिक्रमणेन, इतरत्पुनस्तदुभयसंसर्गे सति शुद्धिमुपयातीति तदुभयमित्यु पदिश्यते।

इदमयुक्तं वर्तते। किमत्रायुक्तम्? 'अनालोचयतः न किञ्चिदपि प्रायश्चित्तम्' इत्युक्तम्, पुनरुपदिष्टम् – 'प्रतिक्रमणमात्रमेव शुद्धिकरम्' इति, एतदयुक्तम्। अथ तत्राप्यालोचनपूर्वकत्वमभ्युपगम्यते, तदुभयोपदेशो व्यर्थः; नैष दोषः; सर्वं प्रतिक्रमणमालोचनपूर्वकमेव, किन्तु पूर्वं गुरुणाभ्यनुज्ञातं शिष्येणैव कर्त्तव्यमिदं पुनर्गुरुणैवानुष्ठेयम्।

**संसक्तान्नपानोपकरणादिविभजनं विवेकः॥५॥** संसक्तानामन्नपानोपकरणादीनां विभजनं विवेक इत्युच्यते।

**व्युत्सर्गः कायोत्सर्गादिकरणम्॥६॥** कालनियमेन कायोत्सर्गादिकरणं व्युत्सर्ग इत्युच्यते।

**तपोऽनशनादि॥७॥** अनशनावमौदर्यवृत्तिपरिसंख्यानादि तपोऽवगन्तव्यम्।

**दिवसपक्षमासादिना प्रव्रज्याहापनं छेदः॥८॥** चिरप्रव्रजितस्य दिवसमासादि-विभागेन प्रव्रज्याहापनं छेद इति प्रत्येतव्यम्।

**पक्षमासादिविभागेन दूरतः परिवर्जनं परिहारः॥९॥** पक्षमासादिकालविभागेन संसर्गमन्तरेण दूरतः परिवर्जनं परिहार इत्यवध्रियते।

**पुनर्दीक्षाप्रापणमुपस्थापना॥१०॥** महाव्रतानां मूलच्छेदं कृत्वा पुनर्दीक्षाप्रापण-मुपस्थापनेत्याख्यायते।विद्यायोगोपकरणग्रहणादिषु प्रश्नविनयमन्तरेण प्रवृत्तिरेव दोष इति तस्य प्रायश्चित्तमालोचनमात्रम्। देशकालनियमेनावश्यं कर्त्तव्यमित्यास्थितानां योगानां धर्मकथादिव्याक्षेपहेतुसन्निधानेन विस्मरणे सति पुनरनुष्ठाने प्रतिक्रमणं तस्य प्रायश्चित्तम्। भयत्वरणविस्मरणाऽनवबोधाशक्तिव्यसनादिभिर्महाव्रतातिचारे सति प्राक्छेदात् षड्विधं प्रायश्चित्तं विधेयम्। शक्त्यनिगूहनेन प्रयत्नेन परिहरतः कुतश्चित्कारणादप्रासुक-ग्रहणग्राहणयोः प्रासुकस्यापि प्रत्याख्यातस्य विस्मरणात् प्रतिग्रहे च स्मृत्वा पुनस्तदुत्सर्जनं प्रायश्चित्तम्। बहुकृत्वः प्रमादबहुदृष्टापराधप्रत्यनीकवृत्तिविरुद्धदृष्टीनां यथाक्रमं छेदमूलभूम्यनुपस्थापनं पारञ्चिकविधानं क्रियते। अपकृष्ट्याचार्यमूले प्रायश्चित्तग्रहणमनुपस्थापनम्। आचार्यादाचार्यान्तरप्रापणमातृतीयं पारञ्चिकम्। तदेतन्नवविधं प्रायश्चित्तं देशकालशक्तिसंयमाद्यविरोधेनापराधानुरूपं दोषप्रशमनं चिकित्सितव-द्विधेयम्। जीवस्यासंख्येयलोकपरिमाणाः परिणामविकल्पाः अपराधाश्च तावन्त एव, न तेषां तावद्विकल्पं प्रायश्चित्तमस्ति। व्यवहारनयापेक्षया पिण्डीकृत्य प्रायश्चित्तविधानमुक्तम्।

आह – व्याख्यातं प्रायश्चित्तम्, इदानीं तदनन्तरमुद्दिष्टस्य विनयस्य विकल्पा वक्तव्याः?

अत्रोच्यते-

## ज्ञानदर्शनचारित्रोपचाराः॥२३॥

**विनय इत्यनुवृत्तेः प्रत्येकमभिसंबन्धः॥१॥** विनय इत्यनुवर्त्तते, तेन प्रत्येकमभिसंबन्धो भवति – ज्ञानविनयो दर्शनविनयश्चारित्रविनय उपचारविनयश्चेति।

**तत्र सबहुमानज्ञानग्रहणाभ्यासस्मरणादिर्ज्ञानविनयः॥२॥** अनलसेन शुद्धमनसा देशकालादिविशुद्धिविधानविचक्षणेन सबहुमानो यथाशक्ति निषेव्यमाणो मोक्षार्थं ज्ञानग्रहणाभ्यासस्मरणादिर्ज्ञानविनयो वेदितव्यः।

**पदार्थश्रद्धाने निशङ्कितत्वादिलक्षणोपेतता दर्शनविनयः॥३॥** सामायिकादौ लोकबिन्दुसारपर्यन्ते श्रुतसमुद्रे ये यथा भगवद्भिरुपदिष्टाः पदार्थाः तेषां तथाश्रद्धाने निःशङ्कितत्वादिलक्षणोपेतता दर्शनविनयो वेदितव्यः।

**तद्वतश्चरित्रे समाहितचित्तता चारित्रविनयः॥४॥** तद्वतो ज्ञानदर्शनवतः पञ्चविधदुश्चरचरणश्रवणानन्तरमुद्भिन्नरोमाञ्चाभिव्यज्यमानान्तर्भक्तेः परप्रसादो मस्तका-ञ्जलिकरणादिभिर्भावतश्चानुष्ठातृत्वं चारित्रविनयः प्रत्येतव्यः।

**प्रत्यक्षेष्वाचार्यादिषु पूजनीयेष्वभ्युत्थानाभिगमनाञ्जलिकरणादिरुपचारविनयः॥५॥** प्रत्यक्षेष्वाचार्यादिषु पूजनीयेष्वभ्युत्थानाभिगमनाञ्जलिकरणवन्दनानुगमनादिरात्मानुरूप उपचारविनयोऽवगन्तव्यः।

**परोक्षेष्वपि कायवाङ्मनोभिरञ्जलिक्रियागुणसंकीर्तनानुस्मरणादिः॥६॥** परोक्षेष्वा-चार्यादिष्वञ्जलिक्रियागुणसंकीर्तनानुस्मरणज्ञानानुष्ठायित्वादिः कायवाङ्मनोभिरवगन्तव्यः। किमर्थमिदं विनयभावनम्?

**ज्ञानलाभाचारविशुद्धिसम्यगाराधनाद्यर्थं विनयभावनम् ॥७॥** ज्ञानलाभः आचार-विशुद्धिः सम्यगाराधनमित्येवमादीनां सिद्धिर्भवति विनयभावनेन, ततश्च निवृत्तिसुखमिति विनयभावनं क्रियते।

आह – विनयो वर्णितः, तदनन्तरोद्देशभाजो वैयावृत्त्यस्येदानीं विवरणं कर्तव्य-मिति, अत इदमुच्यते –

## आचार्योपाध्यायतपस्विशैक्ष्यग्लानगणकुलसङ्घ-साधुमनोज्ञानाम् ॥२४॥

**वैयावृत्त्यमित्यनुवृत्तेः प्रत्येकमभिसम्बन्धः ॥१॥** वैयावृत्त्यमित्यनुवर्त्तते तेन प्रत्येकमभिसंबन्धो भवति – आचार्यवैयावृत्त्यमुपाध्यायवैयावृत्त्यमित्यादि।

**व्यावृत्तस्य भावः कर्म च वैयावृत्त्यम् ॥२॥** कायचेष्टया द्रव्यान्तरेण वा व्यावृत्तस्य भावः कर्म वा वैयावृत्त्यमित्युच्यते।

**आचरन्ति यस्माद् व्रतानीत्याचार्यः॥३॥** यस्मात् सम्यग्ज्ञानादिगुणाधारादाहृत्य व्रतानि स्वर्गापवर्गसुखामृतबीजानि भव्या हितार्थमाचरन्ति स आचार्यः।

**उपेत्य यस्मादधीयते इत्युपाध्यायः॥४॥** विनेयेनोपेत्य यस्माद् व्रतशीलभावना-धिष्ठानादागमं श्रुताख्यमधीयते स उपाध्यायः।

**महोपवासाद्यनुष्ठायी तपस्वी॥५॥** महोपवासादिलक्षणं तपोऽनुतिष्ठति यः स तपस्वीत्युच्यते। कुत एतत्? अतिशयार्थे मत्वर्थीयप्रयोगात्।

**शिक्षाशीलः शैक्ष्यः॥६॥** श्रुतज्ञानशिक्षणपरः अनुपरतव्रतभावनानिपुणः शैक्षक इति लक्ष्यते।

**रुजादिक्लिष्टशरीरो ग्लानः॥७॥** रुजादिभिः क्लिष्टशरीरो ग्लान इत्युच्यते।

**गणः स्थविरसन्ततिः॥८॥** स्थविराणां सन्ततिर्गण इत्युच्यते।

**दीक्षकाचार्यशिष्यसंस्त्यायः कुलम् ॥९॥** दीक्षकस्याचार्यस्य शिष्यसंस्त्यायः कुलव्यपदेशमर्हति।

**चतुर्वर्णश्रमणनिवहः संघः॥१०॥** चतुवर्णानां श्रमणानां निवहः सङ्घ इति समाख्यायते।

**चिरप्रव्रजितः साधुः॥११॥** चिरकालभावितप्रव्रज्यागुणः साधुरित्याम्नायते।

**मनोज्ञोऽभिरूपः॥१२॥** अभिरूपो मनोज्ञ इत्यभिधीयते।

**सम्मतो वा लोकस्य विद्बत्तावक्तृत्वमहाकुलत्वादिभिः॥१३॥** अथवा विद्वान् वाग्मी महाकुलीन इति यो लोकस्य सम्मतः स मनोज्ञः, तस्य ग्रहणं प्रवचनस्य लोके गौरवोत्पादनहेतुत्वात् ।

**असंयतसम्यग्दृष्टिर्वा॥१४॥** अथवा, असंयतसम्यग्दृष्टिर्मनोज्ञ इति गृह्यते संस्कारोपेतरूपत्वात् ।

**तेषां व्याधिपरीषहमिथ्यात्वाद्युपनिपाते तत्प्रतीकारो वैयावृत्त्यम् ॥१५॥** तेषामाचार्यादीनां व्याधिपरीषहमिथ्यात्वाद्युपनिपाते प्रासुकौषधिभक्तपानप्रतिश्रयपीठफलकसंस्तरणादिभिर्धर्मोपकरणैस्तत्प्रतीकारः सम्यक्त्वप्रत्यवस्थापनमित्येवमादि वैयावृत्त्यम् ।

**बाह्यद्रव्यासंभवे स्वकायेन तदानुकूल्यानुष्ठानं च॥१६॥** बाह्यस्यौषधभक्त-पानादेरसंभवेऽपि स्वकायेन श्लेष्मसिङ्घाणकाद्यन्तर्मलापकर्षणादि तदानुकूल्यानुष्ठानं च वैयावृत्त्यमिति कथ्यते।

तत्पुनः किमर्थमिति चेत्? उच्यते –

**समाध्याधानविचिकित्साभावप्रवचनवात्सल्याद्यभिव्यक्त्यर्थम् ॥१७॥** समाध्याधानं विचिकित्साभावः प्रवचनवात्सल्यं सनाथता चेत्येवमाद्यभिव्यक्त्यर्थं वैयावृत्त्यमिष्यते। किमर्थं बहूनामुपक्षेपः क्रियते? ननु सङ्घवैयावृत्त्यं गणवैयावृत्त्यमिति वा वक्तव्यम्?

**बहूपदेशात् क्वचिन्नियमेन प्रवृत्तिज्ञापनाय भूयसामुपन्यासः॥१८॥** बहुषु वैयावृत्त्यार्हेषूपदिष्टेषु क्वचित् कस्यचित् प्रवृत्तिर्यथा स्यादित्येवमाद्यर्थं भूयसामुपन्यासः क्रियते।

आह – व्याख्यातं वैयावृत्त्यम्, तत्समीपोद्देशभाजः स्वाध्यायस्येदानीं निर्देशः करणीय इति? अत्राभिधीयते –

## वाचनापृच्छनानुप्रेक्षाम्नायधर्मोपदेशाः॥२५॥

**निरवद्यग्रन्थार्थोभयप्रदानं वाचना॥१॥** अनपेक्षात्मना विदितवेदितव्येन निरवद्यग्रन्थ-स्यार्थस्य तदुभयस्य वा पात्रे प्रतिपादनं वाचनेत्युच्यते।

**संशयच्छेदाय निश्चितबलाधानाय वा परानुयोगः पृच्छनम्॥२॥** आत्मोन्नति-परातिसन्धानोपहाससंघर्षप्रहसनादिविवर्जितः संशयच्छेदाय निश्चितबलाधानाय वा ग्रन्थस्यार्थस्य तदुभयस्य वा परं प्रत्यनुयोगः पृच्छनमिति भाष्यते।

**अधिगतार्थस्य मनसाऽभ्यासोऽनुप्रेक्षा॥३॥** अधिगतपदार्थप्रक्रियस्य तप्तायस्पिण्ड-वदर्पितचेतसो मनसाऽभ्यासोऽनुप्रेक्षा वेदितव्याः।

**घोषविशुद्धपरिवर्तनमाम्नायः॥४॥** व्रतिनो वेदितसमाचारस्यैहलौकिकफलनिर-पेक्षस्य द्रुतविलम्बितादिघोषविशुद्धं परिवर्तनमाम्नाय इत्युपदिश्यते।

**धर्मकथाद्यनुष्ठानं धर्मोपदेशः॥५॥** दृष्टप्रयोजनपरित्यागादुन्मार्गनिवर्तनार्थं सन्देह-व्यावर्त्तनापूर्वपदार्थप्रकाशनार्थं धर्मकथाद्यनुष्ठानं धर्मोपदेश इत्याख्यायते। किमर्थोऽयं स्वाध्यायः?

**प्रज्ञातिशयप्रशस्ताध्यवसायाद्यर्थः स्वाध्यायः॥६॥** प्रज्ञातिशयः प्रशस्ताध्यवसायः प्रवचनस्थितिः संशयोच्छेदः परवादिशङ्काभावः परमसंवेगः तपोवृद्धिरतिचारविशुद्धिरित्येवमाद्यर्थः स्वाध्यायोऽनुष्ठेयः।

आह – वर्णितः पञ्चविधः स्वाध्यायः, तदनन्तरमुद्दिष्टो यो व्युत्सर्गस्तस्य भेद इदानीं वक्तव्य इति? अत्राभिधीयते –

## बाह्याभ्यन्तरोपध्योः॥२६॥

**व्युत्सर्ग इत्यनुवृत्तेर्व्यतिरेकनिर्देशः॥१॥** व्युत्सर्जनं व्युत्सर्ग इति भावसाधनः शब्दोऽनुवर्त्तते, तदपेक्षोऽयं व्यतिरेकनिर्देशः।

**उपधीयते बलाधानार्थमित्युपधिः॥२॥** योऽर्थोऽन्यस्य बलाधानार्थमुपधीयते स उपधिरित्युच्यते।

**अनुपात्तवस्तुत्यागो बाह्योपधिव्युत्सर्गः॥३॥** आत्मनाऽनुपात्तस्य एकत्वमना-पन्नस्य वस्तुनस्त्यागो बाह्योपधिव्युत्सर्गोऽवगन्तव्यः।

**क्रोधादिभावनिवृत्तिरभ्यन्तरोपधिव्युत्सर्गः॥४॥** क्रोधमानमायालोभमिथ्यात्वहास्य-रत्यरतिशोकभयादिदोषनिवृत्तिरभ्यन्तरोपधिव्युत्सर्ग इति निश्चीयते।

**कायत्यागश्च नियतकालो यावज्जीवं वा॥५॥** कायत्यागश्चाभ्यन्तरोपधिव्युत्सर्ग इत्युच्यते। स पुनर्द्विविधः – नियतकालो यावज्जीवं चेति।

**परिग्रहनिवृत्तेरवचनमिति चेन्न; तस्य धनहिरण्यवसनादिविषयत्वात् ॥६॥** स्यादेतत् – महाव्रतोपदेशकाले परिग्रहनिवृत्तिरुक्ता, ततः पुनरिदं वचनमनर्थकमिति; तन्न; किं कारणम्? तस्य धनहिरण्यवसनादिविषयत्वात् ।

**धर्माभ्यन्तरे भावादिति चेन्न; प्रासुकनिरवद्याहारादिनिवृत्तितन्त्रत्वात् ॥७॥** स्यादेतत- दशविधधर्मेऽन्तरीभूतस्त्याग इति पुनरिदं वचनमनर्थकमिति तन्न; किं कारणम्? प्रासुकनिरवद्याहारादिनिवृत्तितन्त्रत्वात् ।

**तस्यप्रायश्चित्ताभ्यन्तरत्वादिति चेन्न; तस्य प्रतिद्वन्द्विभावात् ॥८॥** अथमतमेतत् - प्रायश्चित्ताभ्यन्तरो व्युत्सर्गस्ततः पुनस्तस्य वचनमनर्थकमिति तन्न; किं कारणम्? तस्य प्रतिद्वन्द्विभावात्, तस्य हि व्युत्सर्गस्यातिचारः प्रतिद्वन्द्वी विद्यतेऽयं पुनरनपेक्षः क्रियते इत्यस्ति विशेषः।

**अनेकत्रावचनमनेनैव गतत्वादिति चेन्न; शक्त्यपेक्षत्वात् ॥९॥** अनेकत्र वचनमनर्थकम्, इदमेवास्तु पर्याप्तमिति; तन्न; किं कारणम्? शक्त्यपेक्षत्वात् । क्वचित् सावद्यं प्रत्याख्यायते क्वचित् निरवद्यम् निरवद्यमपि नियतकालं क्वचिदनियतकालं पुरुषशक्त्यपेक्षत्वान्निवृत्तिधर्मस्य। उत्तरोत्तरगुणप्रकर्षादुत्साहोत्पादनार्थत्वाच्च न पौनरुक्त्यम् । किमर्थं पुनर्व्युत्सर्ग?

**निःसङ्गनिर्भयत्वजीविताशाव्युदासाद्यर्थो व्युत्सर्गः॥१०॥** निःसङ्गत्वं निर्भयत्वं जीविताशाव्युदासः दोषोच्छेदो मोक्षमार्गभावनापरत्वमित्येवमाद्यर्थो व्युत्सर्गोऽभिधीयते द्विविधः।

आह – अभ्यन्तरतपः षोढा प्रतिज्ञाय प्राग्ध्यानादिति यत्सन्न्यस्तं तपो ध्यानाभिधानं तदनाविष्कृतार्थं प्राप्तविचारकालमिति। अत्रोच्यते –

## उत्तमसंहननस्यैकाग्रचिन्तानिरोधो ध्यानमान्तर्मुहूर्त्तात् ॥२७॥

**आद्यं संहननत्रयमुत्तमम् ॥१॥** वज्रवृषभनाराचसंहननं वज्रनारासंहननं नाराचसंहननमित्येतत्त्रितयं संहननमुत्तम। कुतः? ध्यानादिवृत्तिविशेषहेतुत्वात्। तत्र मोक्षस्य कारणमाद्यमेकमेव। ध्यानस्य त्रितयमपि। उत्तमं संहननं यस्य स उत्तमसंहननः तस्योत्तमसंहननस्य।

**एकशब्दः संख्यापदम् ॥२॥** अन्यासहायाद्यनेकार्थसंभवे एकशब्दोऽत्र संख्यावाची गृह्यते।

**अङ्ग्यते तदङ्गमिति तस्मिन्निति वाग्रं मुखम् ॥३॥** अङ्गेर्गत्यर्थस्य कर्मण्यधिकरणे वोणादौ 'रग्' निपातितः "वज्रेन्द्राग्र" इत्यत्राग्रं मुखमित्यर्थः।

**चिन्ता अन्तःकरणवृत्तिः॥४॥** अन्तःकरणस्य वृत्तिरर्थेषु चिन्तेत्युच्यते।

**अनियतक्रियार्थस्य नियतक्रियाकर्तृत्वेनावस्थानं निरोधः॥५॥** गमनभोजन-शयनाध्ययनादिषु क्रियाविशेषेष्वनियमेन वर्तमानस्यैकस्याः क्रियायाः कर्तृत्वेनावस्थानं निरोध इत्यवगम्यते। एकमग्रं मुखं यस्य सोऽयमेकाग्रः, चिन्ताया निरोधः चिन्तानिरोधः, एकाग्रे चिन्तानिरोधः एकाग्रचिन्तानिरोधः। कुतः पुनरसौ एकाग्रत्वेन चिन्तानिरोधः?

**वीर्यविशेषात् प्रदीपशिखावत् ॥६॥** यथा प्रदीपशिखा निराबाधे प्रज्वलिता न परिस्पन्दते तथा निराकुले देशे वीर्यविशेषादवरुध्यमाना चिन्ता विना व्याक्षेपेणै-काग्रेणावतिष्ठते।

**अर्थपर्यायवाची वाऽग्रशब्दः॥७॥** अथवाऽङ्ग्यते इत्यग्रोऽर्थ इत्यर्थः, एकमग्रं एकाग्रम्, एकाग्रे चिन्ताया निरोधः एकाग्रचिन्तानिरोधः। योगविभागान्मयूरव्यं-सकादित्वाद्वा वृत्तिः। एकस्मिन् द्रव्यपरमाणौ भावपरमाणौ वाऽर्थे चिन्तानियम इत्यर्थः।

**ध्यानशब्दो भावकर्तृकरणसाधनो विवक्षावशात् ॥८॥** अयं ध्यानशब्दः भावकर्तृकरणसाधनो विवक्षावशाद्वेदितव्यः। तत्र ध्येयं प्रत्यव्यापृतस्य भावमात्रेणाभिधाने ध्यातिर्ध्यानमिति भावसाधनो ध्यानशब्दः, ध्यायतीति ध्यानमिति बहुलापेक्षया कर्तृसाधनश्च युज्यते। करणप्रशंसापरायामभिधानप्रवृत्तौ समीक्षितायां यथा साध्वसि च्छिनत्तीति प्रयोक्तृनिर्वर्त्ययोः सतोरप्युद्यमननिपातनयोरविशेषतन्त्रत्वाच्छेदनस्य कर्तृधर्माध्यारोपः क्रियते तथा दिध्यासोरप्यात्मनः ज्ञानावरणवीर्यान्तरायक्षयो-पशमविशेषतन्त्रत्वात् ध्यानपरिणामस्य युज्यते कर्तृत्वम्। करणत्वमपि चास्य पर्यायपर्यायिणोर्भेदपरिकल्पनासद्भावात् युज्यते अग्नेर्दाहपाकस्वेदादिक्रियाप्रवृत्तस्यात्म भूतौष्ण्यकरणपरिकल्पनवत्।

**एकान्तकल्पनायां दोषविधानमुक्तम् ॥९॥** अर्थान्तरभावोऽनर्थान्तरभाव एवेत्ये-कान्तकल्पनायां दोषविधानमुक्तम्। क्व? आदिसूत्रे।

**प्रतीतपरिमाणो मुहूर्त्तः॥१०॥** मुहूर्त्त इति कालविशेषवाचिशब्दः; तस्य परिमाणं प्राग्विहितम्।

**उत्तमसंहननाभिधानमन्यस्येयत्कालाध्यवसायधारणाऽसामर्थ्यात् ॥१॥** अन्यत्सं-हननमेतावन्तं कालं चिन्तानिरोधधारणे साधनभावं प्रत्यसमर्थमित्युत्तमसंहननग्रहणं क्रियते।

**एकाग्रवचनं वैयग्र्यनिवृत्त्यर्थम् ॥२॥** एकाग्रवचनं क्रियते वैयग्र्यनिवृत्त्यर्थम्। व्यग्रं हि ज्ञानमेव न ध्यानमिति।

**चिन्तानिरोधग्रहणं तत्स्वाभाव्यप्रदर्शनार्थम् ॥३॥** यथा पृथिव्याः कस्मिंश्चित् परिणामविशेषे घटशब्दो वर्तते एवं चिन्तायाः ज्ञानात्मिकायाः वृत्तिविशेषे ध्यानशब्दो वर्त्तते इति प्रदर्शनार्थं चिन्तानिरोध इति विशेष्यते।

**ध्यानमित्यधिकृतस्वरूपनिर्देशार्थम् ॥४॥** यत्तदधिकृतमुत्तमं तपः, तत्स्वरूप-निर्देशार्थं ध्यानवचनं क्रियते।

**मुहूर्त्तवचनादाहरादिव्यावृत्तिः ॥५॥** आहरादिकालान्तरव्यावृत्त्यर्थं मुहूर्त्तवचनं क्रियते। अतः परं दुर्धरत्वात्।

**अभावो निरोध इति चेन्न; केनचित् पर्यायेणेष्टत्वात् ॥६॥** स्यान्मतमभावो निरोध इत्यनर्थान्तरम्, स चेत् ध्यानशब्दार्थः खरविषाणवत् ध्यानमसत्प्रसजतीति तन्न, किं कारणम्? केनचित्पर्यायेणेष्टत्वात्। अन्यचिन्ताऽभावविक्षायामसदेव ध्यानम् विवक्षितार्थविषयावगमस्वभावसामर्थ्यापेक्षया सदेवेति चोच्यते।

**अभावस्य च वस्तुत्वाद्धेत्वङ्गत्वादिति ॥१७॥** अभावोऽप्ययं वस्तुधर्मः। कुतः? हेत्वङ्गत्वादिभिस्ततश्चोपालम्भाभावः।

**एकार्थवचनं विस्पष्टत्वादिति चेन्न; अनिष्टप्रसङ्गात् ॥८॥** स्यान्मतमे-कार्थचिन्तानिरोध इत्यस्तु विस्पष्टत्वादिति; तन्न; किं कारणम्? अनिष्टप्रसङ्गात्।

किमनिष्टम्? "वीचारोऽर्थव्यञ्जनयोगसंक्रान्तिः" इति वक्ष्यते, तेनार्थसंक्रम इष्यते – द्रव्यात्पर्याये पर्यायाच्च द्रव्ये यद्येकार्थे निरोध इह गृह्येत, तद्विरोधः स्यात्।

**एकाग्रवचनेऽपि तुल्यमिति चेन्न; आभिमुख्ये सति पौनःपुन्येनापि प्रवृत्तिज्ञापनार्थत्वात्॥१९॥** अथ मतमेतदेकाग्रवचनेऽपि तस्यानिष्टस्य प्रसङ्गः तुल्य इति; तन्न; किं कारणम्? आभिमुख्ये सति पौनःपुन्येनापि प्रवृत्तिज्ञापनार्थत्वात्। अग्रं मुखमिति ह्युच्यमानेऽनेकमुखत्वं निवर्तितमेकमुखे तु संक्रमोऽभ्युपगत एवेति नानिष्टप्राप्तिः।

**प्राधान्यवाचिनो वैकशब्दस्य ग्रहणम्॥२०॥** अथवा, प्राधान्यवचने एकशब्द इह गृह्यते प्रधानस्य पुंस आभिमुख्येन चिन्तानिरोध इत्यर्थः; अस्मिन्पक्षेऽर्थो गृहीतः।

**अङ्गतीत्यग्रमात्मेति वा॥२१॥** अथवा, अङ्गतीत्यग्रमात्मेत्यर्थः। द्रव्यार्थतयैकस्मिन्नात्मन्यग्रे चिन्तानिरोधो ध्यानम्, ततः स्ववृत्तित्वात् बाह्यध्येयप्राधान्यापेक्षा निवर्त्तिता भवति।

**दिवसमासाद्यवस्थानमुपयुक्तस्येति चेन्न; इन्द्रियोपघातप्रसङ्गात्॥२२॥** स्यादेतत् – ध्यानोपयोगेन दिवसमासाद्यवस्थानं नान्तमुहूर्तादिति; तन्न; किं कारणम्? इन्द्रियोपघातप्रसङ्गात्।

**प्राणापाननिग्रहो ध्यानमिति चेन्न; शरीरपातप्रसङ्गात्॥२३॥** स्यादेतत् – प्राणापानकर्मणो निग्रहो ध्यानमिति; तन्न; किं कारणम्? शरीरपातप्रसङ्गात्। प्राणापाननिग्रहे सति तदुद्भूतवेदनाप्रकर्षादाश्वेव शरीरस्य पातः प्रसज्येत। तस्मान्मन्दप्राणापानप्रचारस्य ध्यानं युज्यते।

**मात्राकालपरिगणनमिति चेन्न; ध्यानातिक्रमात् ॥२४॥** स्यान्मतम् – मात्राकालपरिगणनं ध्यानमिति; तन्न; किं कारणम्? ध्यानातिक्रमात्। मात्राभिर्यदि कालगणनं क्रियेत ध्यानमेव न स्याद्वैयग्र्यात्।

**विध्युपायनिर्देशः कर्तव्य इति चेन्न; गुप्त्यादिप्रकरणस्य तादर्थ्यात् ॥२५॥** स्यान्मतमेकाग्रचिन्तानिरोधो ध्यानमित्येतद्युक्तं किन्तु तदुत्पत्तये विध्युपायनिर्देशः कर्तव्यः। अनेन विधिना अनेनोपायेन ध्यानं भवतीति; तन्न; किं कारणम्? गुप्त्यादिप्रकरणस्य तादर्थ्यात्। ध्यानविधानभावनार्थमेव हि गुप्त्यादिप्रकरणं प्रक्रान्तम्।

**संवरार्थे तदिति चेन्न; प्रागुपदेशस्योभयार्थत्वात् ॥२६॥** स्यान्मतम् - संवरप्रतिपत्त्यर्थं तद्गुप्त्यादि प्रकरणमुक्तं न ध्यानोपायप्रतिपत्त्यर्थम् न चान्यार्थं प्रकृतमन्यार्थं भवतीति; तन्न; किं कारणम्? प्रागुपदेशस्योभयार्थत्वात्। अन्यार्थमपि प्रकृतमन्यार्थं भवति, तद्यथा – शाल्यर्थं कुल्याः प्रणीयन्ते, ताभ्यश्च पानीयं पीयते, उपस्पृश्यते च, शालयश्च भाव्यन्ते।

**सकलध्यानधर्मासंग्रह इति चेन्न; ध्यानप्राभृते प्रणीतत्वात् ॥२७॥** स्यान्मतम्- सकलो ध्यानधर्मो नास्मिन्सूत्रे संगृहीत इत्यपरिपूर्णलक्षणमिति; तन्न; किं कारणम्? ध्यानप्राभृते प्रणीतत्वात्। तत्र हि ध्यानलक्षणं सकलं प्राधान्येनोक्तम्, इह त्वानुषङ्गिकमिति।

तस्य ध्यानस्य सामान्येनोक्तस्य विकल्पप्रतिपत्त्यर्थमिदमुच्यते –

## आर्त्तरौद्रधर्म्यशुक्लानि ॥२८॥

**ऋतमर्दनमार्त्तिर्वा तत्र भवमार्त्तम् ॥१॥** ऋतं दुःखम्, अर्दनमार्त्तिर्वा, तत्र भवमार्त्तम्।

**रुद्रः क्रूरस्तत्कर्म रौद्रम्॥२॥** रोदयतीति रुद्रः क्रूर इत्यर्थः, तस्येदं कर्म तत्र भवं वा रौद्रमित्युच्यते।

**धर्मादनपेतं धर्म्यम्॥३॥** धर्मो वर्णितः, ततोऽनपेतं ध्यानं धर्म्यमित्याख्यायते।

**शुचिगुणयोगाच्छुक्लम्॥४॥** यथा मलद्रव्यापायात् शुचिगुणयोगच्छुक्लं वस्त्रं तथा तद्गुणसाधर्म्यादात्मपरिणामस्वरूपमपि शुक्लमिति निरुच्यते।

तदेतच्चतुर्विधं ध्यानं द्वैविध्यमश्नुते। कुतः? प्रशस्ताऽप्रशस्तभेदात्। अप्रशस्तम- पुण्यास्रवकारणत्वात्। कर्मनिर्दहनसामर्थ्यात् प्रशस्तम्। किं पुनस्तदिति चेत्? उच्यते –

## परे मोक्षहेतू॥२९॥

**एकस्यैव परत्वमिति चेन्न; व्यवहितेऽपि परशब्दप्रयोगात्॥१॥** स्यान्मतम् – एकस्यैव परत्वमुपपद्यते न द्वयोरिति; तन्न; किं कारणम्? व्यवहितेऽपि परशब्दप्रयोगात्, तद्यथा परा मथुरा पाटलिपुत्रादिति।

**द्विवचननिर्देशाद्वा गौणस्यापि संप्रत्ययः॥२॥** अथवा, परमन्त्यं तत्समीपवर्त्यपि परमित्युपचर्यते, द्विवचननिर्देशात्तस्यापि ग्रहणं भवति।

**परयोर्मोक्षहेतुत्वात्, पूर्वयोः संसारहेतुत्वप्रसिद्धिः॥३॥** 'परे मोक्षहेतू' इति वचनात् परिशेषात् 'पूर्वे संसारहेतू' इति विज्ञायते, तृतीयस्य साध्यस्याभावात्।

आह – किमेषां लक्षणमिति। तत्रानेकस्य वक्तव्यसंभवे वाचः क्रमवृत्तेराद्यस्य लक्षणप्रतिपादनार्थमिदमुच्यते –

## आर्तममनोज्ञस्य सम्प्रयोगे तद्विप्रयोगाय स्मृतिसमन्वाहारः॥३०॥

**अप्रियममनोज्ञं बाधाकारणत्वात्॥१॥** यदप्रियं वस्तु विषकण्टकशत्रुशस्त्रादि तद्बाधाकारणत्वादमनोज्ञमित्युच्यते।

**भृशमर्थान्तरचिन्तनादाहरणं समन्वाहारः॥२॥** अर्थान्तरचिन्तनादाधिक्येनाहरण-मेकत्रावरोधः समन्वाहारः। स्मृतेः समन्वाहारः स्मृतिसमन्वाहारः। अमनोज्ञस्योपनिपाते स कथं नाम मे न स्यादिति संकल्पश्चिन्ताप्रबन्धः आर्तमित्याख्यायते।

आह – किमिदमनभिमतचेतनाऽचेतनद्रव्यपर्यायसम्प्रयोगहेतुकमेवार्थं निर्धियते? न ; किं तर्हि? अन्यथाप्येतत् प्रत्येतव्यमित्युच्यते–

## विपरीतं मनोज्ञस्य॥३१॥

**प्रागुक्तनिमित्तविपर्ययाद्विपरीतम्॥१॥** प्रागुक्तं यन्निमित्तं ततो विपर्यया-द्विपरीतमित्यभिधीयते। तद्यथा मनोज्ञस्य विषयस्य विप्रयोगे संप्रयुयुक्षां प्रति या परिध्यातिः स्मृतिसमन्वाहारशब्दचोदिताऽसावप्यार्तं ध्यानमिति निश्चीयते।

यथा च प्रियसमवाये तदभावादाहितकालुष्यस्यार्तं प्रतिज्ञायते तथा ज्वरादिसन्तापाभ्याहतमूर्तेः –

## वेदनायाश्च॥३२॥

**प्रकरणाद् दुःखवेदनासंप्रत्ययः॥१॥** यद्यपि वेदनाशब्दः सुखदुःखानुभवन-विषयसामान्यस्तथाप्यार्त्तस्य प्रकृतत्वाद् दुःखवेदनासंप्रत्ययो भवति। तत्प्रतिचिकीर्षा प्रत्यागूर्णस्यानवस्थितमनसो धैर्योपरमात् स्मृतिसमन्वाहार आर्त्तध्यानमवगन्तव्यम्।

**अङ्गविक्षेपशोकाक्रन्दनाश्रुपाताभिव्यक्तं तृतीयम्॥२॥** यथाऽनिष्टसंप्रयोगेष्ट-विप्रयोगाऽशुभवेदनासमवायनिबन्धनमार्त्तं तथा चेदमपि प्रीतिविशेषाभिष्वङ्गमन्थर-कामातुरमतेः पौनर्भविकविषयसुखरसगृद्धस्य तत्संस्कारपरायणस्य कायादिखेदहेतुकम्।

## निदानं च॥३३॥

**'विपरीतं मनोज्ञस्य' इत्येव सिद्धमिति चेन्न; अप्राप्तपूर्वविषयत्वान्निदानस्य॥१॥** स्यादेतत् – विपरीतं मनोज्ञस्येत्यनेनैव निदानं संगृहीतमिति; तन्न; किं कारणम्? अप्राप्तपूर्वविषयत्वान्निदानस्य। सुखमात्रया प्रलम्भितस्याप्राप्तपूर्वप्रार्थनाभिमुख्यम दनागतार्थप्राप्तिनिबन्धनं निदानमित्यस्ति विशेषः।

तदेतच्चतुर्विधमार्तं कृष्णनीलकापोतलेश्याबलाधानमज्ञानप्रभवं पौरुषेय-परिणामसमुत्थं पापप्रयोगाधिष्ठानं परिभोगप्रसङ्गं नानासंकल्पासङ्गं धर्माश्रयपरित्या-गिकषायाश्रयोपस्थानमनुपशमप्रवर्द्धनं प्रमादमूलमकुशलकर्मादानं कटुकविपाकासद्वेद्यं तिर्यग्भवगमनपर्यवसानम् ।

तदेतत् किं स्वामिकमिति चेत्? उच्यते –

## तदविरतदेशविरतप्रमत्तसंयतानाम् ॥३४॥

अविरताः असंयतसम्यग्दृष्ट्यन्ताः, देशविरताः संयतासंयताः, प्रमत्तसंयताः पञ्चदशप्रमादोपेताः क्रियानुष्ठायिनः।

**कदाचित् प्राच्यमार्त्तध्यानत्रयं प्रमत्तानाम् ॥१॥** निदानं वर्जयित्वा अन्यदार्त्तत्रयं प्रमादोदयोद्रेकात् कदाचित्प्रमत्तसंयतानां भवति।

आह – व्याख्यातमाद्यमप्रशस्तं संज्ञादिभिरथ द्वितीयं किंस्वभावसंज्ञा-प्रभवस्वामिकमिति? अत उच्यते –

## हिंसानृतस्तेयविषयसंरक्षणेभ्यो रौद्रमविरतदेशविरतयोः॥३५॥

**ध्यानोत्पत्तेर्हिंसादीनां निमित्तभावाद्धेतुनिर्देशः॥१॥** हिंसादीन्युक्तलक्षणानि, तानि रौद्रध्यानोत्पत्तेर्निमित्तीभवन्तीति हेतुनिर्देशो विज्ञायते।

**तेन स्मृतिसमन्वाहाराभिसम्बन्धः॥२॥** तेन हेतुनिर्देशेनानुवर्तमानः स्मृतिसमन्वाहारोऽभिसम्बध्यते – हिंसायाः स्मृतिसमन्वाहार इत्यादि। अविरतस्य भवतु रौद्रध्यानं देशविरतस्य कथम्?

**देशविरतस्यापि हिंसाद्यावेशाद् वित्तादिसंरक्षणतन्त्रत्वाच्च॥३॥** देशविरतस्यापि रौद्रध्यानं भवति। कुतः? हिंसाद्यावेशात् वित्तादिसंरक्षणतन्त्रत्वाच्च कदाचिद्भवितुमर्हति। तत्पुनर्नारकादीनामकारणं सम्यग्दर्शनसामर्थ्यात्। अथ कथमिदं रौद्रध्यानं संयतस्य न भवति?

**तदयुक्तम्; संयते तदावेशे संयमप्रच्युतेः॥४॥** संयते रौद्रध्यानं न युज्यते। कुतः? तदावेशे संयमप्रच्युतेः। यदा रौद्रध्यानाविशिष्टो भवत्यात्मा न तदा संयमोऽत्रावतिष्ठते। तदेतच्चतुर्विधं रौद्रध्यानमतिकृष्णनीलकापोतलेश्याबलाधानं प्रमादाधिष्ठानं नरकगतिफला-वसानम्। एवमुक्ताप्रशस्तध्यानपरिणत आत्मा तप्तायस्पिण्ड इवोदकं कर्मादत्ते।

आह – परे मोक्षहेतू इति ये उपदिष्टेऽनिर्दिष्टसंज्ञाभेदस्वभावे तयोस्तावदाद्यं किमभिधानप्रकारस्वभावविषयमिति? अत्रोच्यते – तत्खलु सम्यग्ज्ञानबीजमुपशमोत्थम-प्रमादसञ्चितं मोहव्रश्चनं धर्मानुबन्धि सुखफलं त्रिविष्टपावसानम्।

## आज्ञापायविपाकसंस्थानविचयाय धर्म्यम् ॥३६॥

**विचितिर्विवेको विचारणा विचयः॥१॥** विचितिर्विचयो विवेको विचारणेत्यनर्थान्तरम्।

**तदपेक्षयाऽऽज्ञादीनां कर्मनिर्देशः॥२॥** तं विचयभावमपेक्ष्याज्ञादीनां कर्मनिर्देशः क्रियते। आज्ञा चापायश्च विपाकश्च संस्थानं च आज्ञापायविपाकसंस्थानानि तेषां विचय आज्ञापायविपाकसंस्थानविचयस्तदर्थमाज्ञापायविपाकसंस्थानविचयाय।

**अधिकारात् स्मृतिसमन्वाहारसंबन्धः॥३॥** स्मृतिसमन्वाहार इत्यनुवर्तते, तेन प्रत्येकमभिसंबन्धो भवति – आज्ञाविचयाय स्मृतिसमन्वाहार इत्यादि।

**तत्रागमप्रामाण्यादर्थावधारणमाज्ञाविचयः॥४॥** उपदेष्टुरभावात् मन्दबुद्धित्वात् कर्मोदयात् सूक्ष्मत्वाच्च पदार्थानां हेतुदृष्टान्तोपरमे सर्वज्ञप्रणीतमागमं प्रमाणीकृत्य 'इत्थमेवेदं नान्यथा वादिनो जिनाः' इति गहनपदार्थश्रद्धानादर्थावधारणमाज्ञाविचयः।

**आज्ञाप्रकाशनार्थो वा॥५॥** अथवा, सम्यग्दर्शनविशुद्धपरिणामस्य विदितस्वपर-समयपदार्थनिर्णयस्य सर्वज्ञप्रणीतानाहितसौक्ष्म्यानस्तिकायादीनर्थानवधार्यैवमेते इत्यन्यं प्रति पिपादयिषतः कथामार्गे श्रुतज्ञानसामर्थ्यात् स्वसिद्धान्ताविरोधेन हेतुनयप्रमाण-विमर्दकर्मणा ग्रहणसहिष्णून् कृत्वा प्रभाषयतः तत्समर्थनार्थस्तर्कनयप्रमाणयोजनपरः स्मृतिसमन्वाहारः सर्वज्ञाज्ञाप्रकाशनार्थत्वादाज्ञाविचय इत्युच्यते।

**सन्मार्गापायचिन्तनमपायविचयः॥६॥** मिथ्यादर्शनपिहितचक्षुषामाचारविनया-प्रमादविधयः संसारविवृद्धये भवन्त्यविद्याबाहुल्यादन्धवत्। तद्यथा जात्यन्धा बलन्तोऽपि सत्पथात्प्रच्युताः कुशलमार्गादेशकेनाननुष्ठिताः नीचोन्नतशैलविषमोपलकठिनस्थाणु-निहितकण्टकाकुलाटवीदुर्गपतिताः परिस्पन्दवन्तोऽपि न तत्त्वमार्गमनुसर्तुमर्हन्ति देशकाभावात् तथा सर्वज्ञप्रणीतमार्गाद्विमुखा मोक्षार्थिनः सम्यङ्मार्गापरिज्ञानात्सुदूरमेवापयन्तीति सन्मार्गापायचिन्तनमपायविचयः।

**असन्मार्गापायसमाधानं वा॥७॥** अथवा, मिथ्यादर्शनाकुलितचेतोभिः प्रवादिभिः प्रणीतादुन्मार्गात् कथन्नाम इमे प्राणिनोऽपेयुरनायतनसेवापायो वा कथं स्यात् पापकरणवचनभावनाविनिवृत्तिर्वा कथमुपजायते इत्यपायार्पितचिन्तनमपायविचयः।

**कर्मफलानुभवविवेकं प्रति प्रणिधानं विपाकविचयः॥८॥** कर्मणां ज्ञानावरणादीनां द्रव्यक्षेत्रकालभवभावप्रत्ययफलानुभवनं प्रति प्रणिधानं विपाकविचयः। तद्यथा मिथ्यादर्शनैकद्वित्रिचतुरिन्द्रियजात्यातपस्थावरसूक्ष्मापर्याप्तकसाधारणाख्यानां दशानां कर्म-प्रकृतीनां प्रथमगुणस्थाने उदयो नोर्ध्वम्। अनन्तानुबन्धिक्रोधमानमायालोभानां प्रथमद्वितीयगुणस्थानयोरुदयो नोर्ध्वम्। सम्यङ्मिथ्यात्वस्य सम्यङ्मिथ्यादृष्टावुदयो नोर्ध्वं नाधः। अप्रत्याख्यानक्रोधमानमायालोभनरकदेवायुर्नरकदेवगतिवैक्रियिकशरीराङ्गोपाङ्गा-नुपूर्व्यचतुष्कदुर्भगानादेयायशस्कीर्तिसंज्ञानां सप्तदशानां कर्मप्रकृतीनामुदयोऽसंयत-सम्यग्दृष्ट्यन्तेषु नोपरि। चतुर्णामानुपूर्व्याणां सम्यङ्मिथ्यादृष्टावुदयो नास्ति शेषाणामस्ति। प्रत्याख्यानक्रोधमानमायालोभतिर्यगायुस्तिर्यग्गत्युद्योतनीचैर्गोत्रसंज्ञाना-मष्टानां कर्मप्रकृतीनां विपाकः संयतासंयतान्तेषु नोपरि। निद्रानिद्राप्रचला-प्रचलास्त्यानगृद्धिनामिकानां तिसृणां कर्मप्रकृतीनां फलानुभवनमनुत्तरशरीरप्रमत्तसंयतेषु नोपरि। आहारशरीराहारशरीराङ्गोपाङ्गनाम्नोऽप्रमत्तसंयते उदयः नोर्ध्वं नाधः। वेदकसम्यक्त्वप्रकृतेरुदयोऽसंयतसम्यग्दृष्ट्यादिष्वप्रमत्तसंयतान्तेषु नोर्ध्वं नाप्यधः। अर्धनाराचसंहननकीलिकासंहननासंप्राप्तासृपाटिकासंहननाख्यानां तिसृणां प्रकृतीनामुदयोऽप्रमत्तसंयतान्तेषु नोपरि। हास्यरत्यरतिशोकभयजुगुप्साख्यानां षण्णां कर्मप्रकृतीनाम पूर्वकरणचरमसमयान्तेषु फलानुभवनं नोर्ध्वम्। त्रयाणां वेदानां त्रयाणां संज्वलनानां चोदयोऽनिवृत्तिबादरसाम्परायेषु। तत्रानिवृत्तिबादरसाम्परायकालस्य शेषे शेषे संख्येयान् भागान् गत्वोदयच्छेदः। लोभसंज्वलनस्य विपाकः सूक्ष्मसाम्परायचरमसमयान्तेषु नोपरि। वज्रनाराचसंहननननाराचसंहननयोरुदयः उपशान्तकषायान्तेषु नोर्ध्वम्।

निद्राप्रचलयोरुदयः क्षीणकषायोपान्तसमयान्तेषु नोपरि। पञ्चानां ज्ञानावरणानां चतुर्णां दर्शनावरणानां पञ्चानामन्तरायाणां चोदयः क्षीणकषायचरमसमयान्तेषु नोपरि। अन्यतरवेदनीयौदारिकतैजसकार्मणशरीरसंस्थानषट्कौदारिकशरीराङ्गोपाङ्गवज्रवृषभनाराचसंहननवर्णगन्धरसस्पर्शागुरुलघूपघातपरघातोच्छवासप्रशस्ताप्रशस्तविहायोगतिप्रत्येकशरीरस्थिरास्थिरशुभाशुभसुस्वरदुःस्वरनिर्माणनामिकानां त्रिंशत्प्रकृतीनामुदयः सयोग केवलिनश्चरमसमये नोर्ध्वम्। अन्यतरवेदनीयमनुष्यायुर्मनुष्यगतिपञ्चेन्द्रियजातित्रस बादरपर्याप्तकसुभगादेययशस्कीर्त्युच्चैर्गोत्रसंज्ञकानामेकादशानां प्रकृतीनामुदयोऽयोगकेवलिनश्चरमसमये नोर्ध्वम्। तीर्थकरनामोदयो द्वयोः केवलिनोर्नोपरि नाप्यधः।

**अयथाकालविपाक उदीरणोदयः॥९॥** तत्र मिथ्यादर्शनस्योदीरणोदयो मिथ्यादृष्टावुपशमसम्यक्त्वाभिमुखस्य चरमावलीमुत्सृज्येतरत्र भवति। एकद्वित्रिचतुरिन्द्रियजात्यातपस्थावरसूक्ष्मापर्याप्तकसाधारणसंज्ञिकानां नवानां प्रकृतीनामुदीरणोदयः मिथ्यादृष्टौ भवति नोर्ध्वम्। अनन्तानुबन्धिक्रोधमानमायालोभानामुदीरणोदयो मिथ्यादृष्टिसासादनसम्य-ग्दृष्ट्योर्नोपरि। सम्यङ्मिथ्यात्वस्योदीरणोदयः सम्यङ्मिथ्यादृष्टौ नोपरि नाप्यधः। अप्रत्याख्यानावरणक्रोधमानमायालोभनरकगतिदेवगतिवैक्रियिकशरीरवैक्रियिकशरीराङ्गोपाङ्गदुर्भगानादेयायशस्कीर्तिसंज्ञका एकादशप्रकृतयोऽसंयतसम्य ष्ट्यन्तेषूदीर्यन्ते नोर्ध्वम्। नारकायुषो देवायुषश्च मरणकाले चरमावलिं मुक्त्वाऽसंयतसम्यग्दृष्टावुदीरणोदयो भवत्यधश्च नोर्ध्वम्। चतुर्णामानुपूर्व्याणां विग्रहगतौ मिथ्यादृष्टिसासादनसम्यग्दृष्ट्यसंयतसम्यग्दृष्टिषूदीरणोदयो नेतरत्र। प्रत्याख्यानक्रोधमानमायालोभतिर्यग्गत्युद्योतनीचैर्गोत्राणां सप्तानां प्रकृतीनामुदीरणोदयः संयतासंयतान्तेषु नोपरि। तिर्यगायुषो मरणकाले चरमावलिं मुक्त्वा संयतासंयतान्तेषूदीरणोदयो नोपरिष्टात्।उत्तरशरीरवर्तिपूर्वचरमावल्या सह उदीरणोदयो नास्ति। आहारकशरीराहारकशरीराङ्गोपाङ्गनाम्नोः प्रमत्तसंयते उदीरणोदयो नोर्ध्वं नाप्यधः। मनुष्यायुष उदीरणोदयो मरणकाले चरमावलिं मुक्त्वा

प्रमत्तसंयतान्तेषु सम्यङ्मिथ्यादृष्टिवर्जितेषूदीरणोदयो भवति नोपरि। वेदकसम्यक्त्वस्यो-दीरणोदयोऽसंयतसम्यग्दृष्ट्यादिष्वप्रमत्तसंयतान्तेषु भवति नोर्ध्वं नाप्यधः। अर्धनाराच-कीलिकासंप्राप्तासृपाटिकासंहननानामुदीरणोदयोऽप्रमत्तसंयतान्तेषु भवति नोर्ध्वम्। हास्यरत्यरतिशोकभयजुगुप्सानां षण्णां प्रकृतीनामपूर्वकरणचरमसमयान्तेषूदीरणोदयो भवति नोर्ध्वम्। त्रयाणां वेदानां त्रयाणां संज्वलनानां चोदीरणोदयोऽनिवृत्तिबादरसाम्य-परायेषूपान्तेषु भवति नोर्ध्वम्। तस्मिंश्चानिवृत्तिकाले शेषे शेषे ऊर्ध्वमूर्ध्वं संख्येयभागान् गत्वोदीरणोदयोच्छेदः। लोभसंज्वलनस्योदीरणोदयः सूक्ष्मसाम्परायचरमावलीवर्जितेषु पूर्वेषु नोपरि। वज्रनाराचसंहनननाराचसंहननयोरुपशान्तकषायान्तेषूदीरणोदयो नोपरिष्टात्। समयोत्तरचरमावलीवर्जितक्षीणकषायान्तेषु निद्राप्रचलयोरुदीरणोदयो नोपरि। पञ्चानां ज्ञानावरणानां चतुर्णां दर्शनावरणानां पञ्चानामन्तरायाणां च चरमावलीवर्जित-क्षीणकषायान्तेषूदीरणोदयो नोर्ध्वम्। मनुष्यगतिपञ्चेन्द्रियजात्यौदारिकतैजसकार्माण-शरीरषट्संस्थानौदारिकशरीराङ्गोपाङ्गवज्रवृषभनाराचसंहननवर्णगन्धरसस्पर्शागुरुलघूप-घातोच्छ्वासप्रशस्ताप्रशस्तविहायोगतित्रसबादरपर्याप्तकप्रत्येकशरीरस्थिरास्थिरशुभाशुभ-सुभगसुस्वरदुःस्वरादेययशस्कीर्तिनिर्माणोच्चैर्गोत्रसंज्ञिकानामष्टात्रिंशतः प्रकृतीनां सयोग-केवलिचरमसमयान्तेषूदीरणोदयो नोपरि। तीर्थकरनाम्न उदीरणोदयः सयोगिकेवलिन्येव नोपरि नाप्यधः।

**लोकसंस्थानस्वभावावधानं संस्थानविचयः॥१०॥** लोकसंस्थानं प्राग्वर्णितम्। तदवयवानां च द्वीपादीनां तत्स्वभावावधानं संस्थानविचयः।

**धर्मादनपेतं धर्म्यम्॥११॥** धर्म उत्तमक्षमादिदशविकल्पः, ततोऽनपेतं धर्म्यं ध्यानम्। उत्तमक्षमादिभावनावतः प्रवृत्तेः।

**अनुप्रेक्षाणां धर्म्यध्यानजातीयत्वात्पृथगनुपदेश इति चेन्न; ज्ञानप्रवृत्तिविकल्पत्वात् ॥१२॥** स्यादेतदनुप्रेक्षा अपि धर्म्यध्यानेऽन्तर्भवन्तीति पृथगासामुपदेशोऽनर्थक इति; तन्न; किं कारणम्? ज्ञानप्रवृत्तिविकल्पत्वात्। अनित्यादिविषयचिन्तनं यदा ज्ञानं तदाऽनुप्रेक्षाव्यपदेशो भवति, यदा तत्रैकाग्रचिन्तानिरोधस्तदा धर्म्यध्यानम्।

**धर्म्यमप्रमत्तस्येति चेन्न; पूर्वेषां विनिवृत्तिप्रसङ्गात् ॥१३॥** कश्चिदाह – धर्म्यमप्रमत्तसंयतस्यैवेति; तन्न; किं कारणम्? पूर्वेषां विनिवृत्तिप्रसङ्गात्। असंयतसम्यग्दृष्टिसंयतासंयतप्रमत्तसंयतानामपि धर्म्यध्यानमिष्यते सम्यक्त्वप्रभवत्वात्। यदि धर्म्यमप्रमत्तस्यैवेत्युच्येत तर्हि तेषां निवृत्तिः प्रसज्येत।

**उपशान्तक्षीणकषाययोश्चेति चेन्न; शुक्लाभावप्रसङ्गात् ॥१४॥** कश्चिदाह – उपशान्तक्षीणकषाययोश्च धर्म्यं ध्यानं भवति न पूर्वेषामेवेति; तन्न; किं कारणम्? शुक्लाभावप्रसङ्गादुपशान्तक्षीणकषाययोर्हि शुक्लध्यानमिष्यते तस्याभावः प्रसज्येत।

**तदुभयं तत्रेति चेन्न; पूर्वस्यानिष्टत्वात् ॥१५॥** स्यादेतदुभयं धर्म्यं शुक्लं चोपशान्तक्षीणकषाययोरस्तीति? तन्न; किं कारणम्? पूर्वस्यानिष्टत्वात्। पूर्वं हि धर्म्यं ध्यानं श्रेण्योर्नेष्यते आर्षे पूर्वेषु चेष्यते।

आह – यदि धर्म्यध्यानमविरतदेशविरतप्रमत्ताप्रमत्तसंयतान्तानां भवति, अथ शुक्लध्यानं कस्येति? अत्रोच्यते – तद्वक्ष्यमाणं चतुर्विकल्पम्, तत्र प्रथमयोर्विकल्पयोः स्वामिनिर्देशः क्रियते –

## शुक्ले चाद्ये पूर्वविदः ॥३७॥

**पूर्वविद्विशेषणं श्रुतकेवलिनस्तदुभयप्रणिधानसामर्थ्यात् ॥१॥** सकलश्रुतधरस्याद्यशुक्लध्यानद्वयप्रणिधानसामर्थ्यं नेतरस्येति प्रतिपत्त्यर्थं पूर्वविद्विशेषणमुपादीयते।

**चशब्दः पूर्वध्यानसमुच्चयार्थः॥२॥** चशब्दः क्रियते पूर्वस्य धर्म्यध्यानस्य समुच्चयार्थः। शुक्ले चाद्ये पूर्वविदो भवतः धर्म्यं चेति।

**विषयविवेकापरिज्ञानमिति चेन्न; व्याख्यानतो विशेषप्रतिपत्तेः॥३॥** स्यादेतत् – चशब्देन पूर्वस्य ध्यानस्य समुच्चये क्रियमाणे विषयविवेको न ज्ञायते इति; तन्न; किं कारणम्? व्याख्यानतो विशेषप्रतिपत्तेः। श्रेण्यारोहणात् प्राग् धर्म्यध्यानं श्रेण्यो शुक्लध्यानमिति व्याख्यास्यामः।

आह – यद्याद्ये शुक्ले उपशान्तनिर्दग्धमोहयोर्नियमेन प्रतिज्ञायेतेऽवशिष्टे कस्य भवत इति? अत्रोच्यते-

## परे केवलिनः॥३८॥

**केवलिशब्दसामान्यनिर्देशात्तद्वतोरुभयोर्ग्रहणम् ॥१॥** केवलीत्ययं शब्दः सामान्य-विषयः, ततोऽचिन्त्यविभूतिविशेषकेवलज्ञानसाम्राज्यमनुभवतोरुभयोः सयोग्ययोगि-केवलिनोर्ग्रहणम्। परे शुक्लध्याने तयोर्भवतो न छद्मस्थस्येति।

आह – अन्धकारमुष्ट्यभिघातसादृश्यादमुं शुक्लध्यानाधिष्ठातृप्रक्रियां प्रति न व्याप्रियामहे। कुतः? तल्लक्षणविशेषनिर्देशानुपलम्भात्। उच्यते– स्यादेतदेवं यद्यमूनि तस्य परस्परविशिष्टानि पर्यायान्तराणि न स्युः -

## पृथक्त्वैकत्ववितर्कसूक्ष्मक्रियाप्रतिपातिव्युपरतक्रियानिवर्तीनि॥३९॥

**वक्ष्यमाणलक्षणापेक्षया सर्वेषामन्वर्थत्वम् ॥१॥** वक्ष्यमाणलक्षणमपेक्ष्य सर्वेषा-मन्वर्थत्वमवसेयम्। यदिदमुपात्तचातुर्विध्यं शुक्लध्यानं तत्किमालम्बनमिति चेत् उच्यते-

## त्र्येकयोगकाययोगाऽयोगानाम् ॥४०॥

**योगशब्दो व्याख्यातार्थः॥१॥** अयं योगशब्दो व्याख्यातार्थः "कायवाङ्मनस्कर्म योगः" इत्यत्र।

**यथासंख्यं चतुर्णामभिसम्बधः॥२॥** चतुर्णां त्रियोगादीनामुक्तैश्चतुर्भिः शुक्लध्यानविकल्पैः सह यथासंख्यमभिसम्बन्धो भवति। त्रियोगस्य पृथक्त्ववितर्कम् त्रिषु योगेष्वेकयोगस्यैकत्ववितर्कम्, काययोगस्य सूक्ष्मक्रियाप्रतिपाति, अयोगस्य व्युपरतक्रियानिवर्तीति।

तत्राद्यस्य विशेषप्रतिपत्त्यर्थमिदमुच्यते -

## एकाश्रये सवितर्कवीचारे पूर्वे॥४१॥

**पूर्वविदारभ्यत्वादेकाश्रयसिद्धिः॥१॥** उभेऽपि परिप्राप्तश्रुतज्ञाननिष्ठेनारभ्येते इत्येका-श्रये इत्युच्यते।

**सवितर्कवीचार इति द्वन्द्वपूर्वोऽन्यपदार्थनिर्देशः॥२॥** वितर्कश्च वीचारश्च वितर्कवीचारौ सह वितर्कवीचाराभ्यां वर्तते सवितर्कवीचारः।

**पूर्वत्वमेकस्यैवेति चेन्न; उक्तत्वात् ॥३॥** किमुक्तम्? तत्समीपवर्तिनस्तद्व्यपदेश इति। द्विवचनसामर्थ्यादुभयोर्ग्रहणम्।

तत्र यथासंख्यप्रसङ्गनिवृत्त्यर्थमिदमुच्यते–

## अवीचारं द्वितीयम् ॥४२॥

पूर्वयोर्यद् द्वितीयं तदवीचारं प्रत्येतव्यमर्थादाद्यं सवितर्कं सवीचारं च भवति, द्वितीयं सवितर्कमवीचारमिति।

अथ वितर्कवीचारयोः क प्रतिविशेष इति? अत्रोच्यते –

## वितर्कः श्रुतम् ॥४३॥

विशेषेण तर्कणमूहनं वितर्कः श्रुतज्ञानमित्यर्थः।

यदि श्रुतज्ञाने वितर्कशब्दो वर्तते तर्हि पुनरपि प्रष्टव्यः – अथ वीचारः किंलक्षणः इति? अत्रोच्यते –

## वीचारोऽर्थव्यञ्जनयोगसंक्रान्तिः॥४४॥

अर्थो ध्येयः द्रव्यं पर्यायो वा, व्यञ्जनं वचनम्, योगः कायवाङ्मनस्कर्मलक्षणः, संक्रान्तिः परिवर्त्तनम्। द्रव्यं विहाय पर्यायमुपैति पर्यायं त्यक्त्वा द्रव्यमित्यर्थसंक्रान्तिः। एकं श्रुतवचनमुपादाय वचनान्तरमालम्बते तदपि विहायान्यदिति व्यञ्जनसंक्रान्तिः। काययोगं त्यक्त्वा योगान्तरं गृह्णाति योगान्तरं च त्यक्त्वा काययोगमिति योगसंक्रान्तिः। एवं परिवर्तनं वीचार इत्युच्यते। तदेत्सामान्यविशेषनिर्दिष्टचतुर्विधं शुक्लं धर्म्यं च पूर्वोदितगुप्त्यादिबहुप्रकारोपायं संसारविनिवृत्तये मुनिर्ध्यातुमर्हति। तदारम्भे च परिकर्म भवति। यदोत्तमशरीरसंहननतया परीषहबाधासहनशक्तिमन्तमात्मानमवगच्छति तदा ध्यानयोगपरिचयायोपक्रमते। कथमिति चेत्?

उच्यते – पर्वतगुहाकन्दरदरीद्रुमकोटरनदीपुलिनपितृवनजीर्णोद्यानशून्यागारादीना-मन्यतमेऽस्मिन्नवकाशे व्यालमृगपशुपक्षिमनुष्याणामगोचरे तत्रत्यैरागन्तुभिश्च जन्तुभिः परिवर्जिते नात्युष्णे नातिशीते नातिवाते वार्षातपवर्जिते समन्तात् बाह्यान्तःकरण विक्षेपकारणविरहिते भूमितले शुचावनुकूलस्पर्शे यथासुखमुपविष्टो बद्धपल्यङ्कासनः समृजुं प्रणिधाय शरीरयष्टिमस्तब्धां स्वाङ्के वामपाणितलस्योपरि दक्षिणपाणितलमुत्तलं समुपादाय नात्युन्मीलन्नातिनिमीलन् दन्तैर्दन्ताग्राणि संदधानः ईषदुन्नतमुखः प्रगुणमध्योऽस्तब्धमूर्त्तिः प्रणिधानगम्भीरशिरोधरः प्रसन्नवक्त्रवर्णोऽनिमिषस्थिर-सौम्यदृष्टिः विनिहितनिद्रालस्यकामरागरत्यरतिशोकहास्यभयद्वेषविचिकित्सः मन्दामन्द-प्राणापानप्रचार इत्येवमादिकृतपरिकर्मा साधुः, नाभेरूर्ध्वं हृदये मस्तकेऽन्यत्र वा मनोवृत्तिं यथापरिचयं प्रणिधाय मुमुक्षुः प्रशस्तध्यानं ध्यायेत्। तत्रैकाग्रमनोपशान्तरागद्वेषमोहो नैपुण्यान्निगृहीतशरीरक्रियो मन्दोच्छ्वासनिःश्वासः सुनिश्चिताभिनिवेषः क्षमावान् बाह्याभ्यन्तरान् द्रव्यपर्यायान् ध्यायन्नाहितवितर्कसामर्थ्योऽर्थव्यञ्जने कायवचसी च पृथक्त्वेन संक्रामता मनसाऽपर्याप्तबालोत्साहवदव्यवस्थितेनानिशितेनापि शस्त्रेण चिरात्तरुं छिन्दन्निव मोहप्रकृतीरुपशमयन् क्षपयंश्च पृथक्त्ववितर्कवीचारध्यानभाग्भवति। पुनर्वीर्यविशेषहानेर्योगाद्योगान्तरं व्यञ्जनाद्व्यञ्जनान्तरमर्थादर्थान्तरमाश्रयन् ध्यान-विधूतमोहरजाः ध्यानयोगान्निवर्तते इति। उक्तं पृथक्त्ववितर्कवीचारम्।

अनेनैव विधिना सतूलमूलं मोहनीयं निर्दिधिक्षन्ननन्तरगुणविशुद्धं योग-विशेषमाश्रित्य बहुतराणां ज्ञानावरणसहायिभूतानां प्रकृतीनां बन्धं निरुन्धन् स्थितेः ह्रासक्षयौ च कुर्वन् श्रुतज्ञानोपयोगवान्निवृत्तार्थव्यञ्जनयोगसंक्रान्तिरविचलितमना क्षीणकषायो वैडूर्यमणिरिव निरुपलेपो ध्यात्वा पुनर्न निवर्तत इति? उक्तमेकत्ववितर्कम्।

एवमेकत्ववितर्कशुक्लध्यानवैश्वानरनिर्दग्धघातिकर्मेन्धनः प्रज्वलितकेवलज्ञानगभस्तिमण्डलो मेघपञ्जरनिरोधनिर्गत इव घर्मरश्मिर्बाभास्यमानो भगवांस्तीर्थकर इतरो वा केवली लोकेश्वराणामभिगमनीयोऽर्चनीयश्चोत्कर्षेणायुःपूर्वकोटिं देशोनां विहरति। स यदाऽन्तर्मुहूर्तशेषायुष्कः तत्तुल्यस्थितिवेद्यनामगोत्रश्च भवति तदा सर्ववाङ्मनसयोगं बादरकाययोगं च परिहाप्य सूक्ष्मकाययोगालम्बनः सूक्ष्मक्रियाप्रतिपातिध्यानमास्कन्दितुमर्हति। यदा पुनरन्तर्मुहूर्तशेषायुष्कस्ततोऽधिकस्थितिविशेषकर्मत्रयो भवति योगी तदाऽऽत्मोपयोगातिशयस्य सामायिकसहायस्य विशिष्टकरणस्य महासंवरस्य लघुकर्मपरिपाचनस्य शेषकर्मरेणुपरिशातनशक्तिस्वाभाव्यात् दण्डकपाटप्रतरलोकपूरणानि स्वात्मप्रदेशविसर्पणतश्चतुर्भिः समयैः कृत्वा पुनरपि तावद्भिरेव समयैः समुपहृतप्रदेशविसरणः समीकृतस्थितिविशेषकर्मचतुष्टयः पूर्वशरीरपरिमाणो भूत्वा सूक्ष्मकाययोगेन सूक्ष्मक्रियाप्रतिपातिध्यानं ध्यायति।

ततस्तदनन्तरं समुच्छिन्नक्रियानिवर्तिध्यानमारभते। समुच्छिन्नप्राणापानप्रचारसर्वकायवाङ्मनोयोगसर्वप्रदेशपरिस्पन्दक्रियाव्यापारत्वात् समुच्छिन्नक्रियानिवर्तीत्युच्यते। तस्मिन् समुच्छिन्नक्रियानिवर्तिनि ध्याने सर्वबन्धास्रवनिरोधसर्वशेषकर्मशातनसामर्थ्योपपत्तेरयोगिनः केवलिनः संपूर्णयथाख्यातचारित्रज्ञानदर्शनं सर्वसंसारदुःखजालपरिष्वङ्गोच्छेदजननं साक्षान्मोक्षकारणमुपजायते। स पुनरयोगिकेवली भगवांस्तदा ध्यानानलनिर्दग्धसर्वमलकलङ्कबन्धो निरस्तकिट्टधातुपाषाणजात्यकनकवल्लब्धात्मा परिनिर्वाति। तदेतद् द्विविधं तपोऽभिनवकर्मास्रवनिरोधहेतुत्वात् संवरणकारणं प्राक्तनकर्मरजोमलविधूननिमित्तत्वान्निर्जराहेतुरपि।

अत्राह – उक्तं परीषहजयात्तपसश्च कर्मनिर्जरा भवतीति, तत्रेदं न ज्ञायते सर्वे सम्यग्दृष्टयः समनिर्जराः आहोस्विदस्ति कश्चित्प्रतिविशेष इति? अस्तीत्याह –

## सम्यग्दृष्टिश्रावकविरतानन्तवियोजकदर्शनमोहक्षपकोपशमकोपशा-न्तमोहक्षपकक्षीणमोहजिनाः क्रमशोऽसंख्येयगुणनिर्जराः ॥४५॥

प्रथमसम्यक्त्वादिप्रतिलम्भेऽध्यवसायविशुद्धिप्रकर्षादसंख्येयगुणनिर्जरात्वं दशानाम् । मद्यपानाविष्टस्य मदैकदेशविगमादव्यक्तावगमशक्तिवत्, प्रकृष्टनिद्रस्य वा तदेकदेशक्षयादल्पस्मृतिजन्मवत्, विषमोहितमूर्तेर्वैकदेशविषप्रच्युतेश्चेतनाप्रतिलम्भवत्, पित्तादिविकारोपजातमूर्च्छस्य वा मोहैकदेशनिवृत्तेरव्यक्तचैतन्यवदेकेन्द्रियेष्वनन्तकाया-दिष्वनन्तकालमुत्पद्योत्पद्य परिभ्रमतः विशेषलब्ध्या द्वीन्द्रियादिजन्म यावत्पञ्चेन्द्रिय इति कदाचित्पुनः प्रतिनिवर्तते। तदेवं बहुकृत्वो निवर्तनारोहणबहुशतसहस्रेषु कदाचित् पञ्चेन्द्रियत्वं नरकादिषु दीर्घकालमनुभूय घुणोत्कीर्णाक्षरसमानजातीयमानवेषु जन्मावाप्नुयात् । भ्रान्त्वा पुनरपि ततो दुर्लभानि देशकुलादीन्यवाप्य संक्लेशस्य म्रदिम्ना विशुद्धव्यवसायः प्रतिभाशक्तियुक्तो भव्यः परिणामशुद्ध्या प्रक्षालितान्तरात्माप्यु-पदेशासंभवात् सन्मार्गमलभमानः कुतीर्थप्रतिपादितमिथ्यादर्शनो भूत्वा पुनरपि संसारमहाजनपदातिथिर्भवति। अभिहितक्रमेणैव भूयो ज्ञानावरणकर्मैकदेशप्रशमोप-जातविशुद्धिरुपदेशलब्धिसम्पन्नोऽथवा मौनीन्द्रं दर्शनं कदाचिच्छृणुयात् प्रतिबन्धिनश्च कर्मणः न्यग्भावात् श्रद्दध्यात् कतकसम्पर्कोपजनितकलुषतोयप्रसादवत्सद्भूतार्थो-पदेशमलीमसः मिथ्यात्वोपशमात् परिणतप्रसादः श्रद्धानाभिमुखोऽभिलाषाभिमुख्याद-संख्येयगुणनिर्जरोऽभूतपूर्वकरणात् प्रथमसम्यक्त्वाभिमुखो रुचितजिनवचन उपशम सम्यग्दृष्टितामनुभवति। अतः सम्यक्त्वभावनामृतरसविवर्द्धितविशुद्धिः मिथ्यात्वविघाति-वीर्याविर्भावे क्षुद्यमानब्रीहितुषकणतन्दुलविवेकवत् मिथ्यादर्शनकर्म मिथ्यात्वसम्यक्त्व-सम्यङ्मिथ्यात्वविभागेन त्रिधा विभज्य सम्यक्त्वं वेदयमानः सद्भूतपदार्थश्रद्धानफलं वेदकसम्यग्दृष्टिर्भवति। ततः प्रशमसंवेगादिमान् जिनेन्द्रभक्तिप्रवर्द्धितविपुलभावनाविशेष संभारो यत्र केवलिनः सन्ति भगवन्तस्तत्र मोहं क्षपयितुमारभते; निष्ठापकः पुनश्चतसृषु

गतिषु भवति। स निराकृतमिथ्यात्वः क्षायिकसम्यग्दृष्टिरित्याख्यायते। अथवा पूर्वोदित एव शङ्कादिदोषविनिर्मुक्तः कुसमयैरक्षोभितमतिरूपलब्धसद्भावो मोहतिमिरपटलवि-प्रमुक्तदृष्टिः जैनेन्द्रपूजाप्रवचनवात्सल्यसंयमादिप्रशंसादिपरतया क्षपितोपशमितदेशघाति-कर्मा संयमासंयमप्राप्त्या श्रावकोऽपि स्यात्। पूर्वनिर्दिष्टः ततो विशुद्धिप्रकर्षात् पुनरपि सर्वगृहस्थसङ्गविप्रमुक्तो निर्ग्रन्थतामनुभवन् विरत इत्यभिलप्यते। एवमुत्तरोत्तरक्रमो वेदितव्योऽन्वर्थः। त एते दशाप्युपर्युपर्यसंख्येयगुणनिर्जरा वेदितव्याः।

**क्षपक इत्यसाधुरन्वाख्यानाभावादिति चेन्न; चशब्देन मित्संज्ञोपलब्धेः॥१॥** स्यान्मतम् – क्षपक इत्ययमसाधुः। कुतः? अन्वाख्यानाभावादिति; तन्न; किं कारणम्? चशब्देन मित्संज्ञोपलब्धेः। क्षै वै षै क्षय इत्यस्य कृतात्वस्य "णिविप्युकिजविजृष्टुसुरजोम्मन्ताश्च" इति चशब्देन मित्संज्ञाया सत्यां ह्रस्वत्वात् साधुर्भवति। प्रयुक्तानामन्वाख्यानात् प्रयोगदर्शनाच्च।

आह – सम्यग्दर्शनसन्निधानेऽपि यद्यसंख्येयगुणनिर्जरात्वात् परस्परतो न साम्यमेषां हन्त तर्हि श्रावकवदमी पूर्वसूत्रचोदिता न सर्वे विरतादयो गुणभेदात् निर्ग्रन्थतामर्हन्तीति? उच्यते – नैतदेवम्। कुत? यस्माद् गुणभेदादन्योन्यविशेषेऽपि नैगमादिनयव्यापारात् सर्वेऽपि भवन्ति –

## पुलाकवकुशकुशीलनिर्ग्रन्थस्नातका निर्ग्रन्थाः॥४६॥

**अपरिपूर्णव्रता उत्तरगुणहीनाः पुलाकाः॥१॥** उत्तरगुणभावनापेतमनसो व्रतेष्वपि क्वचित् कदचित् परिपूर्णतामपरिप्राप्नुवन्तोऽविशुद्धपलाकसादृश्यात् पुलाकव्यपदेश मर्हन्ति।

**अखण्डितव्रताः शरीरसंस्कारर्द्धिसुखयशोविभूतिप्रवणा वकुशाः॥२॥** नैर्ग्रन्थ्यं प्रस्थिताः अखण्डितव्रताः शरीरोपकरणविभूषानुवर्तिनः ऋद्धियशस्कामाः सातगौरवाश्रिताः अविविक्तपरिवाराः छेदशबलयुक्ताः वकुशाः। शबलपर्यायवाची वकुशशब्दः।

**कुशीला द्विविधाः प्रतिसेवनाकषायोदयभेदात् ॥३॥** कुशीला द्विविधा भवन्ति। कुतः? प्रतिसेवनाकषायोदयभेदात्। अविविक्तपरिग्रहाः परिपूर्णोभयाः कथञ्चिदुत्तर गुणविराधिनः प्रतिसेवनाकुशीलाः। ग्रीष्मे जङ्घाप्रक्षालनादिसेवनाद्वशीकृतान्यकषायोदयाः संज्वलनमात्रतन्त्रत्वात् कषायकुशीलाः।

**उदके दण्डराजिवत्सन्निरस्तकर्माणोऽन्तर्मुहूर्तकेवलज्ञानदर्शनप्रापिणो निर्ग्रन्थाः॥४॥** उदके दण्डराजिर्यथाऽऽश्वेव विलयमुपयाति तथाऽनभिव्यक्तोदयकर्माणः ऊर्ध्वं मुहूर्त्तादुद्भिद्यमानकेवलज्ञानदर्शनभाजो निर्ग्रन्थाः।

**प्रक्षीणघातिकर्माणः केवलिनः स्नातकाः॥५॥** ज्ञानावरणादिघातिकर्मक्षयादाविर्भूत-केवलज्ञानाद्यतिशयविभूतयः सयोगिशैलेशिनो लब्धास्पदाः केवलिनः स्नातकाः। "स्नातवेदसमाप्तौ" इति स्वार्थिके के निष्पन्नः शब्दः। त एते पञ्चनिर्ग्रन्थाः। कश्चिदाह –

**प्रकृष्टाप्रकृष्टमध्यानां निर्ग्रन्थाभावश्चारित्रभेदाद् गृहस्थवत् ॥६॥** यथा गृहस्थश्चारित्रभेदान्निर्ग्रन्थव्यपदेशभाग् न भवति तथा पुलाकादीनामपि प्रकृष्टाप्रकृष्ट मध्यमचारित्रभेदान्निर्ग्रन्थत्वं नोपपद्यते।

**न वा, दृष्टत्वात् ब्राह्मणशब्दवत् ॥७॥** न वैष दोषः। कुतः? दृष्टत्वात् ब्राह्मणशब्दवत्। यथा जात्या चारित्राध्ययनादिभेदेन भिन्नेषु ब्राह्मणशब्दोऽविशिष्टो वर्त्तते तथा निर्ग्रन्थशब्दोऽपीति। किञ्च,

**संग्रहव्यवहारापेक्षत्वात् ॥८॥** यद्यपि निश्चयनयापेक्षया गुणहीनेषु न प्रवर्त्तते तथापि संग्रहव्यवहारनयविवक्षावशात् सकलविशेषसंग्रहो भवति। किञ्च

**दृष्टिरूपसामान्यात् ॥९॥** सम्यग्दर्शनं निर्ग्रन्थरूपं च भूषावेशायुधविरहितं तत्सामान्ययोगात् सर्वेषु हि पुलाकादिषु निर्ग्रन्थशब्दो युक्तः।

**भग्नव्रते वृत्तावतिप्रसङ्ग इति चेन्न; रूपाभावात् ॥१०॥** यदि भग्नव्रतेऽपि निर्ग्रन्थशब्दो वर्त्तते श्रावकेऽपि स्यादित्यतिप्रसङ्गः; नैष दोषः; कुतः? रूपाभावात्, निर्ग्रन्थरूपाभावात्। निर्ग्रन्थरूपमत्र नः प्रमाणम् । न च श्रावके तदस्तीति नातिप्रसङ्गः।

**अन्यस्मिन् सरूपेऽतिप्रसङ्ग इति चेन्न; दृष्ट्यभावात् ॥११॥** स्यादेतत् – यदि रूपं प्रमाणमन्यस्मिन्नपि सरूपे निर्ग्रन्थव्यपदेशः प्राप्नोतीति; तन्न; किं कारणम्? दृष्ट्यभावात् । दृष्ट्या सह य रूपं तत्र निर्ग्रन्थव्यपदेशो न रूपमात्र इति। अथ किमर्थः पुलाकादिव्यपदेशः?

**गुणप्रकर्षवृत्तिविशेषख्यापनार्थः पुलाकाद्युपदेशः ॥१२॥** चारित्रगुणस्योत्तरोत्तरप्रकर्षे वृत्तिविशेषख्यापनार्थः पुलाकाद्युपदेशः क्रियते।

तेषां पुलाकादीनां भूयो विशेषप्रतिपत्त्यर्थमिदमुच्यते –

## संयमश्रुतप्रतिसेवनातीर्थलिङ्गलेश्योपपादस्थानविकल्पतः साध्याः ॥४७॥

**तसोऽलक्षणत्वादनिर्देश इति चेन्न; अन्यतोऽपीति वचनात्सिद्धेः ॥१॥** स्यादेतत् – तसो नोत्पत्तेर्लक्षणमस्ति। ततो निर्देशो न युक्त इति; तन्न; किं कारणम्? "अन्यतोऽपि" इति वचनात्सिद्धेः।

**भवदादिर्योग इति चेन्न; अन्यत्रापि दर्शनात् ॥२॥** स्यान्मतम् – भवदादियोगे "अन्यतोऽपि" इति लक्षणं व्याक्रियते, नान्यत्रेति तसो नोत्पत्तिरिति; तन्न; किं कारणम्? अन्यत्रापि दर्शनात्। अन्यत्र तसः प्रयोगो दृश्यते – नार्थतो न शब्दतो नाभिधानतः स मध्यम इति।

**प्रतिसेवनेति षत्वाभावः क्रियान्तराभिसंबन्धात् ॥३॥** यथा विगताः सेवका अस्माद् ग्रामाद्विसेवको ग्राम इति षत्वं न भवति तथा प्रतिगता सेवना प्रतिसेवनेति क्रियान्तराभिसंबन्धात् षत्वं न भवति।

**पुलाकादयः संयमादिभिः साध्याः॥४॥** एते पुलाकादयः पञ्च निर्ग्रन्थविशेषाः संयमादिभिरष्टाभिरनुयोगैः साध्या व्याख्येया इत्यर्थः। तद्यथा, कः कस्मिन् संयमे भवति? पुलाकवकुशप्रतिसेवनाकुशीलाः द्वयोः संयमयोः सामायिकच्छेदोपस्थापनयोर्भवन्ति। कषायकुशीला द्वयोः परिहारविशुद्धिसूक्ष्मसाम्पराययोः पूर्वयोश्च। निर्ग्रन्थस्नातकाः एकस्मिन्नेव यथाख्यातसंयमे।

श्रुतम् – पुलाकवकुशप्रतिसेवनाकुशीलाः उत्कर्षेणाभिन्नाक्षरदशपूर्वधराः। कषायकुशीला निर्ग्रन्थाश्चतुर्दशपूर्वधराः। जघन्येन पुलाकस्य श्रुतमाचारवस्तु। वकुशकुशीलनिर्ग्रन्थानां श्रुतमष्टौ प्रवचनमातरः। स्नातका अपगतश्रुता केवलिनः।

प्रतिसेवना – पञ्चानां मूलगुणानां रात्रिभोजनवर्जनस्य च पराभियोगात् बलादन्यतमं प्रतिसेवमानः पुलाको भवति। वकुशो द्विविधः – उपकरणवकुशः शरीरवकुशश्चेति। तत्रोपकरणाभिष्वक्तचित्तो विविधविचित्रपरिग्रहयुक्तः बहुविशेषयुक्तोपकरणकाङ्क्षी तत्संस्कारप्रतीकारसेवी भिक्षुरुपकरणवकुशो भवति। शरीरसंस्कारसेवी शरीरवकुशः। प्रतिसेवनाकुशीलो मूलगुणानविराधयन्नुत्तरगुणेषु काञ्चिद्विराधनां प्रतिसेवते। कषायकुशीलनिर्ग्रन्थस्नातकानां प्रतिसेवना नास्ति।

तीर्थमिति सर्वेषां तीर्थकराणां तीर्थेषु भवन्ति।

लिङ्गं – लिङ्गं द्विविधं द्रव्यलिङ्गं भावलिङ्गं च। भावलिङ्गं प्रतीत्य सर्वे पञ्च निर्ग्रन्थलिङ्गिनो भवन्तीति। द्रव्यलिङ्गं प्रतीत्य भाज्याः।

लेश्याः – पुलाकस्योत्तरास्तिस्रो लेश्या भवन्ति। वकुशप्रतिसेवनाकुशीलयोः षडपि। कषायकुशीलस्य परिहारविशुद्धेश्चतस्र उत्तराः। सूक्ष्मसाम्परायस्य निर्ग्रन्थस्नातक-योश्च शुक्लैव केवला भवति। अयोगशैले प्रतिपन्ना अलेश्याः।

उपपादः – पुलाकस्योत्कृष्ट उपपाद उत्कृष्टस्थितिषु देवेषु सहस्रारे वकुशप्रतिसेवनाकुशीलयोः द्वाविंशतिसागरोपमस्थितिष्वारणाच्युतकल्पयो; कषायकुशील-निर्ग्रन्थयोस्त्रायस्त्रिंशत्सागरोपमस्थितिषु सर्वार्थसिद्धौ। सर्वेषामपि जघन्यः सौधर्मकल्पे द्वे सागरोपमस्थितिषु। स्नातकस्य निर्वाणमिति।

स्थानम् – असंख्येयानि संयमस्थानानि कषायनिमित्तानि भवन्ति। तत्र सर्वजघन्यानि लब्धिस्थानानि पुलाककषायकुशीलयो; तौ युगपदसंख्येयानि स्थानानि गच्छतः, ततः पुलाको व्युच्छिद्यते। कषायकुशीलस्ततोऽसंख्येयानीष्टस्थानानि गच्छति एकाकी। ततः कषायकुशीलप्रतिसेवनाकुशीलवकुशाः युगपदसंख्येयानि स्थानानि गच्छन्ति, ततो वकुशो व्युच्छिद्यते। ततोऽप्यसंख्येयानि स्थानानि गत्वा प्रतिसेवनाकुशीलो व्युच्छिद्यते। ततोऽप्यसंख्येयानि गत्वा कषायकुशीलो व्युच्छिद्यते। अत ऊर्ध्वमकषायस्थानानि निर्ग्रन्थः प्रतिपद्यते। सोऽप्यसंख्येयानि स्थानानि गत्वा व्युच्छिद्यते। अत ऊर्ध्वमेकं स्थानं गत्वा निर्ग्रन्थस्नातको निर्वाणं प्राप्नोतीत्येतेषां संयमलब्धिरनन्तगुणा भवतीति।

इति तत्त्वार्थवार्तिके व्याख्यानालङ्कारे नवमोऽध्यायः॥९॥

## अथ दशमोऽध्यायः

आह – आस्रवदोषानवलिप्तत्वं परिस्पन्दवतोऽपि कुशलस्य कर्मागमद्वारसंवरणादित्युपपादितः संवरपदार्थः, तदनन्तरनिर्देशभाविनी निर्जराऽभिधीयतामिति? अत्र ब्रूमः – नासाविह पुनर्वक्तव्या। कुतः? तपोऽनुभवसंबन्धेन यस्मात्पुरैव व्याख्याता। यथानामोपभुक्तविचित्रफलकर्मनिवृत्तिर्निर्जरा। तत्रानुभवः सम्प्राप्तेति चेन्न; अर्थवशाच्छा-स्त्रगरीयस्त्वपरिहार्थत्वाच्च। संवरानन्तरनिर्देशार्हेति चेत्; तथैवाभिहिता "तपसा निर्जरा च" इति। अत एव गुप्त्याद्यवसानमितरथा ह्युभयहेतुत्वविपर्ययेण यत्र क्वचनाभिधानं स्यात्।

आह – प्रक्लृप्ता निर्जरा, मोक्षोऽभिधातव्यः। स चानुपसम्प्राप्तकेवलज्ञानावस्थस्य नोपपद्यते इत्यतः केवलज्ञानमेव तावद्यथा भवति तथोपदेष्टव्यमिति? उच्यते; नैतदपि भूयो निर्देशार्हं वेदितव्यम्। कुतः? यस्माद्ध्यानप्रकरणे व्याख्यातम् –

**मोहक्षयाज्ज्ञानदर्शनावरणान्तरायक्षयाच्च केवलम् ॥१॥** इति।

अथवा, "सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः" इत्युपक्षिप्य लक्षणोत्पत्तिविषयनिबन्धनादिभिर्विशेषैर्दर्शनचारित्रे समर्थिते, ज्ञानं च प्रमाणस्वभावं पञ्चविधमभ्युपेत्य तत्र चतुष्टयस्य लक्षणोत्पत्तिहेतुविषयनिबन्धाः प्रक्रान्ताः; अतः परमिदं वक्तव्यमेवमुत्पद्यते केवलमिति? अत्र ब्रूमः – न वक्तव्यं पुनः, यस्मात् पुरस्तादेव व्याख्यातं संवरनिरुपादानीकृतसन्ततिचारित्रध्यानाग्निप्रज्वलितेन्धनमोहक्षयात् ज्ञानदर्शनावरणान्तरायक्षयाच्च केवलम्। किम्? उत्पद्यत इत्युपदिष्टमिति वाक्यशेषः।

**वृत्तिप्रसङ्गो लघ्वर्थमिति चेन्न; क्रमेण क्षयज्ञापनार्थत्वात् ॥१॥** स्यान्मतम्- इह वृत्त्या निर्देशः कर्तव्यः मोहज्ञानदर्शनावरणान्तरायक्षयात्केवलमिति। किमर्थः? लध्वर्थमिति; तन्न; किं कारणम्? क्रमेण क्षयज्ञापनार्थत्वात्। प्रागेव मोहक्षयमुपनीयान्तर्मुहूर्तं क्षीणकषायव्यदेशमवाप्य ततो युगपद् ज्ञानदर्शनावरणा-न्तरायाणां क्षयं कृत्वा केवलमवाप्नोति।

**तत्क्षयहेतुः केवलोत्पत्तिरिति हेतुलक्षणविभक्तिनिर्देशः॥२॥** तत्क्षयः केवलज्ञानो-त्पत्तेर्हेतुरिति कृत्वा तदभिसंबन्धावद्योतिकया हेतुलक्षणया विभक्त्या निर्देशः क्रियते।

**तत्क्षयः प्रणिधानविशेषात् ॥३॥** तेषां मोहादीनां क्षयो भवति। कुतः? प्रणिधानविशेषात्, परिणामविशेषादिति यावत्। तद्यथा – पूर्वाहितेन विधिना परमतपोविशेषैः प्रशस्ताध्यवसायप्रकर्षात् विशुद्ध्यतः शुभाभिमताः प्रकृतयः स्फीतीभवन्त्यप्रशस्ताश्च तत्र तनूभूय विलीयन्ते। तत्र कश्चिद्वेदकसम्यग्दृष्टिरप्रमत्तगुणस्थाने सप्तप्रकृत्युपशमात् श्रेण्यारोहणाभिमुखश्चारित्रमोहमुपशमयितुमारभते। अपरोऽसंयतसम्यग्दृष्टिसंयतासंयतप्रमत्तसंयताप्रमत्तसंयतगुणस्थानेषु कस्मिंश्चित् सप्तकर्म-प्रकृतीः क्षयमुपनीय क्षायिकसम्यग्दृष्टीर्भूत्वा चारित्रमोहमुपशमयितुमुपक्रमते। ततोऽथा-प्रवृत्तकरणमपूर्वकरणमनिवृत्तिकरणं च कृत्वोपशमकश्रेणिमारुह्यापूर्वकरणोपशमकगुण-स्थानव्यपदेशमनुभूय तत्राभिनवशुभाभिसन्धितनूकृतपापकर्मप्रकृतिस्थित्यनुभागो विवर्द्धितशुभकर्मानुभवोऽनिवृत्तिबादरसाम्परायोपशमकगुणस्थानमधिरुह्य नपुंसकवेदस्त्रीवेदनोकषायषट्कपुंवेदाप्रत्याख्यानक्रोधद्वयमायाद्वयलोभद्वयक्रोधमानसंज्वलनसंज्ञिकाः प्रकृतीः क्रमेणोपशमय्य ततः सूक्ष्मसाम्परायप्रथमसमये मायासंज्वलनमुपशमं नीत्वा लोभसंज्वलनं तनूकृत्य सूक्ष्मसाम्परायोपशमकाख्यामास्कन्द्य ततः उपशान्तकषायप्रथमसमये लोभसंज्वलने चोपशमं गते सर्वमोहप्रकृत्युपशमादुपशान्त-

कषायव्यपदेशभाग्भवति। आयुषः क्षयात् म्रियते। अथवा पुनरपि कषायानुदीरयन् प्रतिनिवर्तते। स एव वाऽन्यो वा विशुद्धाध्यवसायानुपरतोत्साहः पूर्ववत् क्षायिक सम्यग्दृष्टिर्भूत्वा कर्मविशुद्ध्या महत्या विशुद्ध्यन् क्षपकक्षेणीमनुप्रपद्य तैरेव करणैस्त्रिभिः पूर्ववदपूर्वकरणक्षपकतामाश्लिष्य तत ऊर्ध्वं कषायाष्टकं क्षयं कृत्वा नपुंसकवेदं नाशमापाद्य स्त्रीवेदमुन्मूल्य नोकषायषट्कं पुंवेदे प्रक्षिप्य क्षपयित्वा पुंवेदं क्रोधसंज्वलने क्रोधसंज्वलनं मानसंज्वलनं मायासंज्वलने मायासंज्वलनं च लोभसंज्वलने क्रमेण क्रमेण बादरकृष्टिविभागेन विलयमुपनीयानिवृत्तिबादरसाम्परायक्षपकभावमवाप्य लोभसंज्वलनं तनूकृत्य सूक्ष्मसाम्परायक्षपकमनुभूय निरवशेषं मोहनीयं निर्मूलकाषं कषित्वा क्षीणकषायतामधिरुह्यावतारित-मोहनीयभारः उपान्तिमे समये निद्राप्रचले प्रलयमुपनीय पञ्चानां ज्ञानदर्शनस्वभावं केवलपर्यायमप्रतर्क्य विभूतिविशेषं निःसपत्नमवाप्य निरुपलेपः कमलमिवामलः साक्षात्त्रिकालसर्व-द्रव्यपर्यायस्वभावज्ञः सर्वत्राप्रतिहतदर्शनोऽवाप्तनिरवशेषपुरुषार्थो जलधरनिरोधकालातीत-स्वकिरणकलापसौम्यदर्शनस्तारकाधिपतिरिव ज्वलितमूर्तिः केवली भवति।

आह – व्याख्यातं प्रतिबन्धविनिर्मुक्तसम्यक्त्वदर्शनानन्तवीर्यसमन्वितं केवलम्, तदात्मलाभश्च सकलकर्मोच्छेदहेतुरभ्युपगतः। अथ किंलक्षणः कस्माच्च हेतोर्मोक्षो भवतीत्युभयमभिधीयतामिति? अत्रोच्यते – तस्य खलु भगवतः केवलपर्याय-लब्धात्मलाभस्य विग्रहवतः स्वप्रभावार्जितानन्तैश्वर्यभाजः पूर्वदग्धकर्मचतुष्टयस्याऽ–प्रच्युतवेद्यनामगोत्रायुषश्च –

## बन्धहेत्वभावनिर्जराभ्यां कृत्स्नकर्मविप्रमोक्षो मोक्षः॥२॥

**मिथ्यादर्शनादिहेत्वभावादभिनवकर्मादानाभावः॥१॥** मिथ्यादर्शनादीनां पूर्वोक्तानां कर्मास्रवहेतूनां निरोधे कारणाभावात् कार्याभाव इत्यभिनवकर्मादानाभावः।

**पूर्वोदितनिर्जराहेतुसन्निधाने चार्जितकर्मनिरासः॥२॥** पूर्वोदितानां निर्जराहेतूनां सन्निधानेऽर्जितस्य च कर्मणो निरासो भवति। ताभ्यां बन्धहेत्वभावनिर्जराभ्यामिति हेतुलक्षणविभक्तिनिर्देशस्ततो भवस्थितिहेतुसमीकृतशेषकर्मावस्थस्य युगपदात्यन्तिकः प्रत्येतव्यः कृत्स्नकर्मविप्रमोक्षो मोक्षः।

**आद्यभावादन्ताभाव इति चेन्न; दृष्टत्वादन्त्यबीजवत्॥३॥** स्यान्मतम् – कर्मबन्धसन्तानस्याद्यभावादन्तेनाप्यस्य न भवितव्यम्, दृष्टिविपरीतकल्पनायां प्रमाणाभावादिति; तन्न; किं कारणम्? दृष्टत्वादन्त्यबीजवत्। यथा बीजाङ्कुरसन्तानेऽनादौ प्रवर्त्तमानेऽन्त्यबीजमग्निनोपहताङ्कुरशक्तिकमित्यन्तोऽस्य दृष्टस्तथा मिथ्यादर्शनादिप्रत्ययसाम्परायिकसन्ततावनादौ ध्यानानलनिर्दग्धे कर्मबीजे भवाङ्कुरोत्पादाभावान्मोक्ष इति दृष्टमिदमपह्नोतुमशक्यम्। उक्तं च–

**"दग्धे बीजे यथाऽत्यन्तं प्रादुर्भवति नाङ्कुरः।**
**कर्मबीजे तथा दग्धे न रोहति भवाङ्कुरः॥" इति।**

कृत्स्नस्य कर्मत्वेन क्षयः कर्मक्षयः, सतो द्रव्यस्य द्रव्यत्वेन विनाशो नास्ति। कथं तर्हि? पर्यायेण, तस्योत्पत्तिमत्त्वाद्विनाशेन भवितव्यम्, तन्मुखेन द्रव्यमपि व्ययमुपयातीति व्यपदिश्यते। ततः पुद्गलद्रव्यस्य कारणवशात् कर्मत्वपर्यायमापन्नस्य तत्प्रत्यनीकहेतुसन्निधाने तत्पर्यायनिवृत्तौ तस्य क्षयः इत्युपदेशो भवतीति युक्तमेतत् कृत्स्नकर्मक्षय इति।

**भावसाधनो मोक्षशब्दो द्विविषयो विप्रयोगक्रियामात्रगतेः॥४॥** मोक्ष असने इत्यस्य मोक्षणं मोक्ष इति भावसाधनः शब्दो द्विविषयो: मोक्तव्यमोचकापेक्षत्वात्। कुतः? विप्रयोगक्रियामात्रगतेः। कृत्स्नशब्देन कर्माष्टविधं

सद्वन्धोदयोदीरणचतुर्विधव्यवस्थं परिगृहीतम्। तत्र बन्धोदयोदीरणानां क्षयविभागो गुणस्थानभेदेन निर्दिष्टः। सत्कर्मोच्छेदस्तु न प्रतिपादितः; स विव्रियते –

**कर्माभावो द्विविधो यत्नसाध्योऽयत्नसाध्यश्चेति॥५॥** तत्र चरमदेहस्य नरकतिर्यग्देवायुषामभावोऽयत्नसाध्योऽसत्त्वात्। यत्नसाध्य इति ऊर्ध्वमुच्यते – असंयतसम्यग्दृष्ट्यादिषु चतुर्षु गुणस्थानेषु कस्मिंश्चिदनन्तानुबन्धिक्रोधमानमायालोभ-मिथ्यात्वसम्यङ्मिथ्यात्वसम्यक्त्वाख्यप्रकृतिसप्तकविषतरूवनं शुभाध्यवसायनिशित-परशुपातेन निर्मूलं निच्छिद्यते। निद्रानिद्राप्रचलाप्रचलास्त्यानगृद्धिनरकगतितिर्यग्गत्येक द्वित्रिचतुरिन्द्रियजातिनरकगतितिर्यग्गतिप्रायोग्यानुपूर्व्यातपोद्योतस्थावरसूक्ष्मसाधारण-संज्ञकानां षोडशानां कर्मप्रकृतीनां पृतनासेनायाः युगपदनिवृत्तिबादरसाम्परायस्तेन समाधिचक्रेण विजयमवाप्नोति। ततः परं कषायाष्टकं नष्टं करोति स एव युगपत्। नपुंसकवेदः स्त्रीवेदश्च क्रमेण तत्रैव क्षयमुपयाति, नोकषायषट्कं चैकेनैव प्रहारेण निपातयति। ततः पुंवेदसंज्वलनक्रोधमानमायाः क्रमेण तत्रैवात्यन्तिकं ध्वंसन-मास्कन्दन्ति। लोभसंज्वलनः सूक्ष्मसाम्परायान्ते यात्यन्तम्। निद्राप्रचले क्षीणकषाय वीतरागछद्मस्थस्योपान्तिमे समये प्रलयमुपव्रजतः। पञ्चानां ज्ञानावरणानां चतुर्णां दर्शनावरणानां पञ्चानामन्तरायाणां च तस्यैवान्तसमये प्रक्षयो भवति। अन्यतरवेदनीय-देवगत्यौदारिकवैक्रियिकाहारकतैजसकार्मणशरीरसंस्थानषडौदारिकवैक्रियिकाहारकशरी-राङ्गोपाङ्गषट्संहननपञ्चप्रशस्तवर्णपञ्चाऽप्रशस्तवर्णगन्धद्वयपञ्चप्रशस्तरसपञ्चाऽप्र-शस्तरसस्पर्शाष्टकदेवगतिप्रायोग्यानुपूर्व्यागुरुलघूपघातपरघातोच्छ्वासप्रशस्तविहायोग-त्यपर्याप्तकप्रत्येकशरीरस्थिरशुभाशुभदुर्भगसुस्वरदुःस्वरानादेयायशस्कीर्तिनिर्माणनाम-नीचैर्गोत्राख्या द्वासप्ततिप्रकृतयोऽयोगिकेवलिन उपान्त्यसमये विनाशमुपयान्ति। अन्यतरवेदनीयमनुष्यायुर्मनुष्यगतिपञ्चेन्द्रियजातिमनुष्यगतिप्रायोग्यानुपूर्व्यत्रसबादर पर्याप्तकसुभगादेययशस्कीर्तितीर्थकरनामोच्चैर्गोत्रसंज्ञिकानां त्रयोदशानां प्रकृतीनामयोगि-केवलिनश्चरमसमये व्युच्छेदो भवति।

आह – किमासां पौद्गलिकीनामेव द्रव्यकर्मप्रकृतीनां निरासान्मोक्षोऽवसीयत उत भावकर्मणोऽपीति? अत्रोच्यते –

## औपशमिकादिभव्यत्वानां च॥३॥

किम्? मोक्ष इत्यनुवर्तते।

**भव्यत्वग्रहणमन्यपारिणामिकाऽनिवृत्त्यर्थम्॥१॥** अन्येषां जीवत्वादीनां पारिणामिकानां मोक्षावस्थायामनिवृत्तिज्ञापनार्थं भव्यत्वग्रहणं क्रियते। तेन पारिणामिकेषु भव्यत्वस्यौपशमिकादीनां च भावानामभावान्मोक्षो भवतीत्यवगम्यते। ननु च द्रव्यनिरासेऽभिहिते तन्निमित्तानां भावानां निवृत्तिरर्थादवगम्यत इति नार्थोऽनेन योगेन? नैष दोषः; नायमेकान्तः – 'निमित्तापाये नैमित्तिकानां निवृत्तिः' इति। अपि च, अर्थावगमेऽपि सिद्धे साक्षात्प्रतिपत्त्यर्थमिदमुच्यते – विस्पष्टार्थं वक्ष्यमाणसूत्रनिर्देशार्थम्।

आह – यद्यपवर्गो भावोपरतेः प्रतिज्ञायते, ननु चौपशमिकादिभावनिवृत्तिवत् सर्वक्षायिकनिवृत्ताव्यपदेशो मुक्तस्य प्राप्नोतीति; स्यादेतदेवं यदि विशेषो नोच्येत, अस्ति तु विशेष इत्यपवादविधानार्थमिदमुच्यते –

## अन्यत्र केवलसम्यक्त्वज्ञानदर्शनसिद्धत्वेभ्यः॥४॥

**अन्यत्रशब्दो वर्जनार्थः॥१॥** अन्यत्रशब्दोऽयं वर्जनार्थो द्रष्टव्यः, तन्निमित्तः सिद्धत्वेभ्य इति विभक्तिनिर्देशः, यथा – "अन्यत्र द्रोणभीष्माभ्यां सर्वे योद्धाः पराङ्मुखाः" इति।

**अन्यशब्दप्रयोगे तद्विज्ञानमिति चेत्; न; स्वार्थिकत्वात् ॥२॥** स्यान्मतम्-अन्यशब्दप्रयोगे का विभक्तिर्विज्ञायते यथाऽन्यो देवदत्तादिति, अन्यत्र शब्दोऽयं तस्मान्निर्देशो नोपपद्यते इति; तन्न; किं कारणम्? स्वार्थिकत्वात्। स्वर्थिकोऽयं त्रः, केवलसम्यक्त्वज्ञानदर्शनसिद्धत्वेभ्योऽन्यस्मिन्नयं विधिरिति।

**अनन्तवीर्यादिनिप्रवृत्तिप्रसङ्ग इति चेत्; न; अत्रैवान्तर्भावात्॥३॥** स्यादेतत्-सम्यक्त्वादीनां चतुर्णां क्षायिकाणां संग्रहादितरेषां निवृत्तिरनन्तवीर्यादीनां प्राप्नोतीति तन्न; किं कारणम्? अत्रैवान्तर्भावात्। ज्ञानदर्शनाविनाभविनो ह्यनन्तवीर्यादयोऽत्रैवान्तर्भवन्ति। अनन्तसामर्थ्यहीनस्यानन्तावबोधवृत्त्यभावात् ज्ञानमयत्वाच्च सुखस्येति।

**बन्धस्याव्यवस्थाऽश्वादिवदिति चेन्न; मिथ्यादर्शनाद्युच्छेदे कार्यकारणनिवृत्तेः॥४॥** स्यादेतत् – यथाऽश्वादीनामेकस्मिन् बन्ध उच्छिन्नेऽपि पुनर्बन्धान्तरसंभवादव्यवस्था तथा जीवस्यापि कस्मिंश्चिद् बन्धेऽपगतेऽपि बन्धान्तरप्रसङ्ग इति; तन्न; किं कारणम्? मिथ्यादर्शनाद्युच्छेदे कार्यकारणनिवृत्तेः। पुनर्बन्धहेत्वभावाद्बन्धाभावः।

**पुनर्बन्धप्रसङ्गो जानतः पश्यतश्च कारुण्यादिति चेन्न; सर्वास्रवपरिक्षयात् ॥५॥** स्यादेतत् – व्यसनार्णवे निमग्नं जगदशेषं जानतः पश्यतश्च कारुण्यमुत्पद्यते ततश्च बन्ध इति; तन्न; किं कारणम्? सर्वास्रवपरिक्षयात्। भक्तिस्नेहकृपास्पृहादीनां रागविकल्पत्वाद्वीतरागे न ते सन्तीति।

**अकस्मादिति चेत्; अनिर्मोक्षप्रसङ्गः॥६॥** यदि कारणमन्तरेणैव मुक्तस्य बन्धः कल्प्यते नन्वनिर्मोक्षः स्यात्। मुक्तिप्राप्त्यनन्तरमेव बन्धोपपत्तेः।

**स्थानवत्त्वात्पात इति चेन्न; अनास्रवत्वात्॥७॥** स्यादेतत् – स्थानवत्त्वात् मुक्तस्य पातः प्राप्नोतीति; तन्न; किं कारणम्? अनास्रवत्वात्। आस्रववतो हि यानपात्रस्याधःपतनं दृश्यते, न चास्रवो मुक्तस्यास्ति।

**गौरवाभावाच्च॥८॥** गौरववतो हि तालफलस्य तत्प्रतिबद्धवृन्तसंयोगाभावे पतनं दृष्टं नागौरवस्याकाशप्रदेशस्य, न च गौरवमस्ति मुक्तस्येति पाताभावः। यस्य हि स्थानवत्त्वं पातकारणं तस्य सर्वेषां पदार्थानां पातः स्यात् स्थानवत्त्वाविशेषात्।

**परस्परोपरोध इति चेन्न; अवगाहनशक्तियोगात्॥९॥** स्यान्मतमल्पः सिद्धावगाह्य आकाशप्रदेश आधारः, आधेयाः सिद्धा अनन्ताः, ततः परस्परोपरोध इति; तन्न; किं कारणम्? अवगाहनशक्तियोगात्। मूर्तिमत्स्वपि नामानेकमणिप्रदीपप्रकाशेष्व- ल्पेऽप्यवकाशे न विरोधः किमङ्ग पुनरमूर्तिष्ववगाहनशक्तियुक्तेषु मुक्तेषु?

**तत एव जन्ममरणद्वन्द्वोपनिपातव्याबाधाविरहात् परमसुखिनः॥१०॥** तत एवाऽ- मूर्तत्वादेवेत्यर्थः। यस्य हि मूर्तिरस्ति तस्य तत्पूर्वकः प्रीतिपरितापसम्बन्धः स्यात्, न चामूर्तानां मुक्तानां जन्ममरणद्वन्द्वोपनिपातव्याबाधाऽस्ति, अतो निर्व्याबाधत्वात् परमसुखिनस्ते।

**न तस्यास्त्युपमानमाकाशपरिमाणवत्॥११॥** यथा परमाण्ववगाहक्षेत्रमारभ्यै- कैकप्रदेशवृद्ध्या कल्प्यमानं सातिशयं क्षेत्रमाकाशपरिमाणं पुनरिदमेवेत्यु- पमार्थकल्पनाभावादनुपमानं तथा सुखशब्दार्थोऽपि प्रकर्षाप्रकर्षयोगात् संसारगतः सान्तरः मुक्तानां पुनः परमानन्तपरिमाणयोगान्निरतिशय इत्यनुपमानः।

**अनाकारत्वादभाव इति चेन्न; अतीतानन्तरशरीराकारानुविधायित्वात् ॥१२॥**
स्यादेतत् – मुक्तानां परित्यक्तमूर्त्तीनामाकाराभावादभावः प्राप्नोतीति; तन्न; किं कारणम्? अतीतानन्तरशरीराकारानुविधायित्वात्।

**शरीरानुविधायित्वे तदभावाद्विसर्पणप्रसङ्ग इति चेन्न; कारणाभावात् ॥१३॥**
स्यान्मतम् – यदि शरीरानुविधायी जीवस्तदभावात् स्वाभाविकलोकाकाशप्रदेश-परिमाणत्वात्तावद्विसर्पणं प्राप्नोतीति; तन्न; कुतः? कारणाभावात्, पुनर्विसर्पण-कारणाभावान्न विसर्पति।

**नामकर्मसंबन्धात् संहरणविसर्पणधर्मत्वं प्रदीपप्रकाशवत् ॥१४॥** यथा प्रदीपप्रकाशोऽवधृतपरिमाणः शरावमानिकापवरकादिद्रव्योपष्टम्भान्महानल्पश्च भवति तथा नामकर्मसंबन्धात् परिच्छिन्नपरिमाणोऽपि जीवः संहरति विसर्पति च, तदभावान्न संहारो विसर्पणं वा मुक्तजीवस्य।

**मूर्तिमद्वैधर्म्यादिति चेन्न; उभयलक्षणप्राप्तत्वात् ॥१५॥** स्यान्मतम् – मूर्त्तः प्रदीपप्रकाशोऽमूर्त्तस्यात्मनः संहरणविसर्पणधर्मत्वे साध्ये दृष्टान्तो नोपपद्यते इति; तन्न; किं कारणम्? उभयलक्षणप्राप्तत्वात्। उपयोगस्वलक्षणापेक्षया ह्यमूर्त्तः, बन्धपरिणामापेक्षया मूर्त्तः।

उक्तं च –

**"बंधं पडि एयत्तं लक्खणदो हवदि तस्स णाणत्तं**
**तम्हा अमुत्तिभावो णेयन्तो होदि जीवस्स॥" इति।**

तस्मात्कथञ्चिन्मूर्त्तत्वोपपत्तेः साम्यमेव दृष्टान्तेन।

**अनित्यत्वप्रसङ्ग इति चेन्न; तावन्मात्रस्य निर्दिदिक्षितत्वाच्चन्द्रमुखीवत् ॥६॥** स्यादेतत् – संहरणविसर्पणधर्मत्वादेव प्रदीपप्रकाशवदनित्यत्वं प्राप्नोत्यात्मन इति; तन्न; किं कारणम्? तावन्मात्रस्य निर्दिदिक्षितत्वात्। यथा चन्द्रमुखी कन्येति बहवश्चन्द्रे गुणाः, या चासौ प्रियदर्शनता सा गम्यते तथा प्रदीपप्रकाशेऽनित्यत्वादिषु बहुषु धर्मेषु सत्स्वपि सङ्कोचविकाससाधर्म्यमात्रं विवक्षितम्। सर्वसाधर्म्याच्च दृष्टान्ताभावप्रसङ्गः।

**सर्वथाऽभावो मोक्षः प्रदीपवदिति चेन्न; साध्यत्वात् ॥७॥** स्यादेतत् – यथा वर्तिस्नेहानलसन्निपाते प्रदीपोऽनुपरतवृत्त्या प्रवर्त्तमानस्तत्क्षये न कांश्चिद्दिशं विदिशं वा गच्छति तत्रैवात्यन्तविनाशमुपयाति तथा कारणवशात् स्कन्धप्रतिसन्तानरूपेण प्रवर्तमानः स्कन्धसमूहो जीवव्यपदेशभाक् क्लेशक्षयान्न काञ्चिद्दिशं विदिशं वा गच्छति तत्रैवात्यन्तं प्रलयमेतीति; तन्न; किं कारणम्? साध्यत्वात्। साध्यमेतत् – प्रदीपो निरन्वयनाशमुपयातीति। प्रदीपा एव हि पुद्गलाः, पुद्गलजातिमजहतः परिणामवशान्मषीभावमापन्ना इति नात्यन्तविनाशः।

**दृष्टत्वाच्च निगलादिवियोगे देवदत्ताद्यवस्थानवत् ॥८॥** यथा निगलादिद्रव्यवियोगे देवदत्तादीनामवस्थानं दृष्टं तथा बन्धविप्रमोक्षे आत्मना च स्थेयमिति दृष्टमिदमपह्नोतुमशक्यमिति नाभावः।

**यत्रैव कर्मविप्रमोक्षस्तत्रैवावस्थानमिति चेन्न; साध्यत्वात् ॥९॥** स्यादेतत्- यस्मिन्नेव देशे कर्मविप्रमोक्षस्तस्मिन्नेवावस्थानं प्राप्नोति पुनर्गतिकारणाभावादिति; तन्न; किं कारणम्? साध्यत्वात्। साध्यमेतत्तत्रैवावस्थातव्यमिति बन्धनाभावादनाश्रितत्वाच्च स्यादगमनमिति।

आह – न तावदस्य बन्धाभावेऽधोगतिर्गौरवाभावात्, नापि तिर्यग्गति-र्योगाभावात्, तस्मात्प्राप्तमेतत्तत्रैवावस्थानम्, ततो लोकस्योपरि तदवस्थानकल्पना-व्यावृत्तिरिति; उच्यते भवेदेतदेवं यद्यनभिमतदेशगतिनिमित्ताभाववत्तस्योर्ध्वगतिनिमित्तं न स्यात्। अस्ति च तत्। तस्मादेकसमयेन हि निरस्तकर्मभारः पुरुषः –

## तदनन्तरमूर्ध्वं गच्छत्यालोकान्तात् ॥५॥

**तद्वचनं प्रकृतनिर्देशार्थम् ॥१॥** तदित्यनेन प्रकृतोऽर्थो निर्दिश्यते। कश्च प्रकृतः? कृत्स्नकर्मविप्रमोक्षः। तस्यानन्तरमूर्ध्वं गच्छति।

**आङभिविध्यर्थः॥२॥** ईषदर्थादिषु दृष्टप्रयोगः आङिह विवक्षावशादभिविधौ वेदितव्यः। लोकस्यान्तो लोकान्त आलोकान्तादिति।

आह – अनुपदिष्टहेतुकमिदमूर्ध्वगमनं कथमध्यवसातुं शक्यमिति? अत्रोच्यते –

## पूर्वप्रयोगादसङ्गत्वाद् बन्धच्छेदात्तथागतिपरिणामाच्च॥६॥

आह – हेत्वर्थः पुष्कलोऽपि दृष्टान्तसमर्थनमन्तरेणाभिप्रेतार्थसाधनाय नालमिति; उच्यते –

## आविद्धकुलालचक्रवद् व्यपगतलेपालाबूवदेरण्डबीजवद-ग्निशिखावच्च॥७॥

**हेतुदृष्टान्तानां यथासंख्यमभिसंबन्धः॥१॥** पूर्वसूत्रे विहितानां हेतूनामत्रोक्तानां दृष्टान्तानां च यथासंख्यमभिसंबन्धो भवति। तद्यथा –

**अपवर्गप्राप्तये बहुशः प्रणिधानादाविद्धकुलालचक्रवत् ॥२॥** यथा कुलालप्रयोगापादितहस्तदण्डचक्रसंयोगपूर्वकं भ्रमणमुपरतेऽपि तस्मिन् पूर्वप्रयोगादासंस्कारक्षयाद्भ्रवमि एवं भवस्थेनात्मनाऽपवर्गप्राप्तये बहुशो यत् प्रणिधानं तदभावेऽपि तदावेशपूर्वकं मुक्तस्य गमनमवसीयते। किञ्च,

**असङ्गत्वान्मुक्तलेपालाबूद्रव्यवत् ॥३॥** यथा मृत्तिकालेपजनितगौरवमलाबूद्रव्यं जलेऽधः पतति तदेव क्लेदविश्लिष्टमृत्तिकाबन्धनं लघु सदूर्ध्वमेव गच्छति तथा कर्मभाराक्रान्तवशीकृत आत्मा तदावेशवशात् संसारे नियमेन गच्छति तत्सङ्गविप्रमुक्तौ तूपर्येव याति।

**अनियमप्रसङ्गो दण्डवदिति चेन्न; ऊर्ध्वगौरवात् ॥४॥** स्यादेतत् – यथा द्रव्यान्तरसंसक्तो दण्डोऽवस्थितस्तदभावेऽनियमेन पतति तथा कर्मसङ्गाभावेऽनियमेनात्मनोऽपि गमनं प्राप्नोतीति; तन्न; किं कारणम्? ऊर्ध्वगौरवात्। ऊर्ध्वगौरवपरिणामो हि जीव उत्पतत्येव। किञ्च,

**बन्धच्छेदादेरण्डबीजवत् ॥५॥** यथा बीजबन्धकोशादिच्छेदादेरण्डबीजस्य गतिर्दृष्टा तथा मनुष्यादिभवप्रापकगतिजातिनामादिसकलकर्मबन्धच्छेदात् मुक्तस्य गतिरवसीयते। किञ्च,

**तथागतिपरिणामाच्चाग्निशिखावत् ॥६॥** यथा तिर्यक्पवनस्वभावसमीरणसंबन्धनिरुत्सुका प्रदीपशिखा स्वभावादुत्पतति तथा मुक्तात्माऽपि नानागतिविकारकारणकर्मनिवारणे सत्यूर्ध्वगतिस्वभावत्वादूर्ध्वमेवारोहति।

**असङ्गत्वबन्धच्छेदयोरर्थाविशेषादनुवादप्रसङ्ग इति चेन्न; अर्थान्यत्वात् ॥७॥** स्यादेतदसङ्गत्वबन्धच्छेदयोर्नास्त्यर्थविशेष इति पौनरुक्त्यं प्राप्नोति। बध्नातिरपि व्यतिषङ्गे वर्तत इति। तन्न, किं कारणम् अर्थान्यत्वात्। अन्योऽन्यानुप्रवेशे

सत्यविभागेनावस्थानं बन्धः, परस्परप्राप्तिमात्रं सङ्ग इत्यस्त्यर्थविशेषः। तस्मात्क्रिया-कारणधर्माधर्माभावेऽपि हेत्वन्तरान्मुक्तस्य गतिरभ्यनुज्ञायते।

**नोदाहरणमलाबूर्मारुतावेशादिति चेन्न; तिर्यग्गमनप्रसङ्गात् ॥८॥** स्यादेतत्-अलाबूद्रव्यं मुक्तगमनसिद्धावुदाहरणं न भवति; कुतः? मारुतावेशादिति; तन्न; किं कारणम्? तिर्यग्गमनप्रसङ्गात्। यदि मारुतावेशात्तस्य गमनं स्यात्तिर्यक्पवन-धर्मत्वान्मरुतस्तिर्यग्गमनमेव स्यान्नोर्ध्वम्।

**ऊर्ध्वगत्यभावे तदभावप्रसङ्गोऽग्नेरौष्ण्याभावेऽभाववदिति चेत्; न; गत्यन्तरनिवृत्त्यर्थत्वात् ॥९॥** स्यान्मतम् - यथोष्णस्वभावस्याग्नेरौष्ण्याभावेऽभावस्तथा मुक्तस्योर्ध्वगतिस्वभावत्वे तदभावे तस्याप्यभावः प्राप्नोतीति; तन्न; किं कारणम्? गत्यन्तरनिवृत्त्यर्थत्वात्। मुक्तस्योर्ध्वमेव गमनं न दिगन्तरगमनमित्ययं स्वभावो नोर्ध्वगमनमेवेति।

**ऊर्ध्वज्वलनवद्वा ॥१०॥** यथा ऊर्ध्वज्वलनस्वभावत्वेऽप्यग्नेर्वेगवद्द्रव्याभि-घातात्तिर्यग्ज्वलनेऽपि नाऽग्नेर्विनाशो दृष्टस्तथा मुक्तस्योर्ध्वगतिस्वभावत्वेऽपि तदभावे नाऽभाव इति।

अत्राह – ऊर्ध्वज्वलनस्वभावस्याग्नेर्वेगवदभिघातात्तिर्यग्ज्वलने सति विरोधा-दूर्ध्वज्वलनाभावो युक्तः; मुक्तस्य तु पुनः स्वभावगतिलोपहेत्वभावादूर्ध्वगत्युपरमो ऽनुपपन्न इति; उच्यते लोकान्तान्नोर्ध्वगतिर्मुक्तस्य। कुतः?

### धर्मास्तिकायाभावात् ॥८॥

गत्युपग्रहकारणभूतो धर्मास्तिकायो नोपर्यस्तीत्यलोके गमनाभावः। तदभावे च लोकालोकविभागाभावः प्रसज्यते।

किं पुनरमी परिनिर्वृत्ताः कार्मणशरीरोपशमकादिभावनिरुपाख्याः पर्यायान्तरेण शक्याः व्यपदेष्टुमुतातीतव्यवहारा एव निर्धारयितव्या इति? उच्यते - शक्याः। कथम्? यस्मात्ते खलु -

## क्षेत्रकालगतिलिङ्गतीर्थचारित्रप्रत्येकबुद्धबोधितज्ञाना-
## वगाहनान्तरसंख्याल्पबहुत्वतः साध्याः॥१॥

**प्रत्युत्पन्नभूतानुग्रहतन्त्रनयद्वयापेक्षया क्षेत्रादिभिः साध्याः सिद्धाः॥१॥** एतैः क्षेत्रादिभिरल्पबहुत्वान्तैर्द्वादशभिरनुयोगद्वारैः प्रत्युत्पन्नभूतानुग्रहतन्त्रनयद्वयापेक्षया साध्याः चिन्त्या: विकल्प्याः। के पुनस्ते? सिद्धाः। तद्यथा क्षेत्रेण तावत् कस्मिन् क्षेत्रे सिद्ध्यन्ति?

**सिद्धिक्षेत्रे कर्मभूमिषु वा॥२॥** प्रत्युत्पन्नभूतानुग्राहिनयार्पणेन सिद्धिक्षेत्रे स्वप्रदेशे आकाशप्रदेशे वा सिद्धिर्भवति। भूतानुग्रहतन्त्रनयविवक्षायां जन्म प्रति पञ्चदशसु कर्मभूमिषु संहरणं प्रति मानुषक्षेत्रे सिद्धिः। ऋजुसूत्रनयः शब्दभेदाश्च त्रयः प्रत्युत्पन्नविषयग्राहिणः, शेषा नया उभयभावविषयाः। कालेन कस्मिन्काले सिद्धिः?

**एकसमये उत्सर्पिण्यवसर्पिण्योर्वाऽविशेषेण॥३॥** प्रत्युत्पन्ननयापेक्षया एकसमये सिद्ध्यन् सिद्धो भवति। भूतभावप्रज्ञापननयार्पणया द्वेधा– जन्मतः संहरणतश्च। तत्र जन्मतोऽविशेषेणोत्सर्पिण्यवसर्पिण्योर्जातः सिद्ध्यति। विशेषेणाऽवसर्पिण्यां सुषमदुष्षमाया अन्ते भागे दुःषमसुषमायां च जातः सिद्ध्यति। दुःषमसुषमायां जातः दुःषमायां सिद्ध्यति न तु दुःषमायां जात; ततोऽन्यदा नैव सिद्ध्यति। संहरणतः सर्वस्मिन् कालेऽवसर्पिण्यामुत्सर्पिण्यां च सिद्ध्यति। गत्यां कस्यां गतौ सिद्धिः?

**सिद्धिगतौ मनुष्यगतौ वाऽविशेषः॥४॥** प्रत्युत्पन्ननयाश्रयणेन सिद्धिगतौ सिद्ध्यति। भूतविषयनयापेक्षया द्विधा कल्पना – अनन्तरगतावेकान्तरगतौ चेति। तत्रानन्तरगतौ मनुष्यगतौ सिद्ध्यति। एकान्तरगतौ चतसृषु गतिषु जातः सिद्ध्यति। लिङ्गेन केनचित् सिद्ध? लिङ्ग: त्रिविधो वेदः।

**अवेदत्वेन त्रिभ्यो वा वेदेभ्यः सिद्धिः॥५॥** वर्तमानविषयनयविवक्षायामवेदत्वेन सिद्धिर्भवति। अतीतगोचरनयापेक्षयाऽविशेषेण त्रिभ्यो वेदेभ्यः सिद्धिर्भवति भावं प्रति, न तु द्रव्यं प्रति, द्रव्यापेक्षया तु पुल्लिङ्गेनैव सिद्धिः। अपरः प्रकारः – लिङ्गं द्विविधम् निर्ग्रन्थलिङ्गं सग्रन्थलिङ्गं चेति। तत्र प्रत्युत्पन्नविषयनयादेशेन निर्ग्रन्थलिङ्गेन सिद्ध्यति। भूतविषयनयादेशेन तु भजनीयम्। तीर्थेन–

**तीर्थसिद्धिर्द्वेधा तीर्थकरेतरविकल्पात्॥६॥** तीर्थसिद्धिर्द्वेधा भवति – तीर्थकरत्वेनेतरत्वेन च। सन्ति केचित्तीर्थकरसिद्धाः अपरेऽन्यथा सिद्धाः। ते द्वेधा सत्येव तीर्थकरे सिद्धाः, असति चेत्। चारित्रेण केन सिद्ध्यति?

**अव्यपदेशेनैकचतुःपञ्चविकल्पचारित्रेण वा सिद्धिः॥७॥** प्रत्युत्पन्नाच्च ते हि नयवशान्न चारित्रेण नाप्यचारित्रेण व्यपदेशविरहितेन भावेन सिद्धिः। भूतपूर्वगतिर्द्विधा अनन्तरव्यवहितभेदात्। आनन्तर्येण यथाख्यातचारित्रेण सिद्ध्यति, व्यवधानेन चतुर्भिः पञ्चभिर्वा। चतुर्भिस्तावत् सामायिकच्छेदोपस्थापनासूक्ष्मसाम्परायथाख्यातचारित्रैः। पञ्चभिस्तैरेव परिहारविशुद्धिचारित्राधिकैः।

**स्वशक्तिपरोपदेशनिमित्तज्ञानभेदात् प्रत्येकबुद्धबोधितविकल्पः॥८॥** केचित्प्रत्येकबुद्धसिद्धाः, परोपदेशमनपेक्ष्य स्वशक्त्यैवाविर्भूतज्ञानातिशयाः। अपरे बोधितबुद्धसिद्धाः, परोपदेशपूर्वकज्ञानप्रकर्षास्कन्दिनः। ज्ञानेन –

**एकेन द्वित्रिचतुर्भिश्च ज्ञानविशेषैः सिद्धिः॥९॥** प्रत्युत्पन्नग्राहिनयनिरूपणया केवलज्ञानेनैकेन सिद्धिर्भवति। भूतपूर्वगत्या तु द्वाभ्यां त्रिभिश्चतुर्भिश्च ज्ञानविशेषैर्भवति। द्वाभ्यां मतिश्रुतज्ञानाभ्याम्, त्रिभिर्मतिश्रुतावधिभिः मतिश्रुतमनःपर्ययैर्वा चतुर्भिर्मतिश्रुतावधिमनःपर्ययैः।

**अवगाहनं द्विविधमुत्कृष्टजघन्यभेदात् ॥१०॥** आत्मप्रदेशव्यापित्वमवगाहनं द्विविधम् । उत्कृष्टं जघन्यं चेति। तत्रोत्कृष्टं पञ्चधनुःशतानि पञ्चविंशत्युत्तराणि। जघन्यमर्द्धचतुर्थारत्नयः देशोनाः। मध्ये विकल्पाः। एतस्मिन्नवगाहे सिद्ध्यन्ति पूर्वभावप्रज्ञापननयापेक्षया। प्रत्युत्पन्नभावप्रज्ञापने त्वेतस्मिन्नेव देशोने। किमन्तरं सिद्ध्यताम्? अनन्तरं च सिद्ध्यन्ति सान्तरञ्च।

**अनन्तरं जघन्येन द्वौ समयावुत्कर्षेणाष्टौ॥११॥** आनन्तर्येण जघन्येन द्वौ समयौ सिद्ध्यन्त्युत्कर्षेणाष्टौ।

**अन्तरं जघन्येनैकः समयः उत्कर्षेण षण्मासाः॥१२॥** सिद्ध्यतां सिद्धिविरहकालोऽन्तरम् । तज्जघन्येनैकसमयः, उत्कर्षेण षण्मासाः प्रत्येतव्याः।

**जघन्येनैक उत्कर्षेणाष्टशतमिति संख्या॥१३॥** एकसमये कति सिद्ध्यन्ति? जघन्येनैकः उत्कर्षेणाष्टशतमिति संख्याऽवगन्तव्या।

**क्षेत्रादिभेदभिन्नानां परस्परतः संख्याविशेषोऽल्पबहुत्वम् ॥१४॥** क्षेत्रादिभिरेकादशभिरनुयोगद्वारैः भिन्नानां परस्परतः संख्याविशेषोऽल्पबहुत्वमित्युच्यते। तद्यथा – प्रत्युत्पन्ननयापेक्षया सिद्धिक्षेत्रे सिद्ध्यन्तीति नास्त्यल्पबहुत्वम् । भूतपूर्वनयापेक्षया तु चिन्त्यते – क्षेत्रसिद्धाः द्विधा जन्मतः संहरणतश्च। तत्राल्पे संहरणसिद्धाः। जन्मसिद्धाः संख्येयगुणाः। संहरणं द्विविधं स्वकृतं परकृतं च। देवकर्मणा चारणविद्याधरैश्च कृतं परकृतम् । स्वकृतं चारणविद्याधराणामेव। तेषां च क्षेत्राणां विभागः -

कर्मभूमिरकर्मभूमिः समुद्रो द्वीप ऊर्ध्वमधस्तिर्यगिति। सर्वस्तोका ऊर्ध्वलोकसिद्धाः। अधोलोकसिद्धाः संख्येयगुणाः। तिर्यग्लोकसिद्धाः संख्येयगुणाः। सर्वस्तोकाः समुद्रसिद्धाः। द्वीपसिद्धाः संख्येयगुणाः। एवं तावदविशेषेण विशेषेण च सर्वस्तोकाः लवणोदसिद्धाः, कालोदसिद्धाः संख्येयगुणाः। जम्बूद्वीपसिद्धाः संख्येयगुणाः। धातकीखण्डसिद्धाः संख्येयगुणाः। पुष्करद्वीपार्द्धसिद्धाः संख्येयगुणा इति।

कालविभागस्त्रिविधः – उत्सर्पिणी; अवसर्पिणी, अनुत्सर्पिण्यनवसर्पिणी चेति। सर्वस्तोका उत्सर्पिणीसिद्धाः। अवसर्पिणीसिद्धाः विशेषाधिकाः। अनुत्सर्पिण्यनवसर्पिणी-सिद्धाः संख्येयगुणाः। प्रत्युत्पन्ननयापेक्षयैकसमये सिद्ध्यन्तीति नास्त्यल्पबहुत्वम्।

अन्तरम् – सर्वस्तोकाः अष्टसमयानन्तरसिद्धाः। सप्तसमयानन्तरसिद्धाः संख्येयगुणाः। एवम् आ द्विसमयानन्तरसिद्धेभ्यः। एवं तावदनन्तरेषु। सान्तरेष्वपि सर्वस्तोकाः षण्मासान्तरसिद्धाः। एकसमयान्तरसिद्धाः संख्येयगुणाः। यवमध्यान्तरसिद्धाः संख्येयगुणाः। अधस्ताद् यवमध्यान्तरसिद्धाः संख्येयगुणाः। उपरि यवमध्यान्तरसिद्धा विशेषाधिकाः।

गतिं प्रति – प्रत्युत्पन्नभावप्रज्ञापननयस्य सिद्धिगतौ सिद्ध्यन्तीति नास्त्यल्पबहुत्वम्। भूतविषयनयापेक्षया वानन्तरगतौ मनुष्यगतौ सिद्ध्यन्तीति नास्त्यल्पबहुत्वम्। एकान्तरगतौ त्वल्पबहुत्वमस्ति। सर्वतः स्तोकास्तिर्यग्योन्यनन्तर-गतिसिद्धाः, मनुष्ययोन्यनन्तरगतिसिद्धाः इति।

वेदानुयोगे – प्रत्युत्पन्ननयाश्रयणेऽवेदाः सिद्ध्यन्तीति नास्त्यल्पबहुत्वम्। भूतविषयनयाश्रयणे तु सर्वतः स्तोकाः नपुंसकवेदसिद्धाः। स्त्रीवेदसिद्धाः संख्येयगुणाः। पुंवेदसिद्धाः संख्येयगुणाः।

तीर्थानुयोगे – तीर्थकरसिद्धाः अल्पे। इतरे सिद्धाः संख्येयगुणाः।

चारित्रानुयोगे – प्रत्युत्पन्ननयापेक्षयाऽव्यपदेशेन सिद्ध्यन्तीति नास्त्यल्पबहुत्वम्। भूतविषयनयाश्रयणे चानन्तरचारित्रपरिग्रहे यथाख्यातचारित्राः सर्वे सिद्ध्यन्तीति नास्त्यल्पबहुत्वम्। व्यवधाने च पञ्चचारित्रसिद्धाः अल्पे। चतुश्चारित्रसिद्धाः संख्येयगुणाः।

प्रत्येकबुद्धबोधितबुद्धानुयोगेऽल्पे प्रत्येकबुद्धाः। बोधितबुद्धाः संख्येयगुणाः।

ज्ञानानुयोगे – प्रत्युत्पन्नभावप्रज्ञापनस्य केवली सिद्ध्यतीति नास्त्यल्पबहुत्वम्। पूर्वभावप्रज्ञापनस्य सर्वस्तोका द्विज्ञानसिद्धाः। चतुर्ज्ञानसिद्धाः संख्येयगुणाः। त्रिज्ञानसिद्धाः संख्येयगुणाः। एवं तावदविशेषेण। विशेषेण च सर्वस्तोकाः मतिश्रुतमनःपर्ययज्ञानसिद्धाः। मतिश्रुतज्ञानसिद्धाः संख्येयगुणाः। मतिश्रुतावधिमनःपर्ययज्ञानसिद्धाः संख्येयगुणाः। मतिश्रुतावधिज्ञानसिद्धाः संख्येयगुणा इति।

अवगाहनानुयोगे – सर्वस्तोकाः जघन्यावगाहनसिद्धाः। उत्कृष्टावगाहनसिद्धाः संख्येयगुणाः। यवमध्यसिद्धाः संख्येयगुणाः। अधस्ताद्यवमध्यसिद्धाः संख्येयगुणाः। उपरि यवमध्यसिद्धा विशेषाधिकाः।

संख्यानुयोगे – सर्वस्तोकाः अष्टोत्तरशतसिद्धाः। अष्टोत्तरशतसिद्धादयः आ पञ्चाशत्सिद्धेभ्योऽनन्तगुणाः। एकान्नपञ्चाशत्सिद्धादयः आ पञ्चविंशतिसिद्धेभ्योऽसंख्येयगुणाः। चतुर्विंशतिसिद्धादयः आ एकसिद्धेभ्यः संख्येयगुणाः।

एवं निसर्गाधिगमयोरन्यतरजं तत्त्वार्थश्रद्धानात्मकं शङ्काद्यतीचारविमुक्तं प्रशम-संवेगानुकम्पास्तिक्याभिव्यक्तिलक्षणं विशुद्धं सम्यग्दर्शनं सम्यग्दर्शनोपलब्धिविशुद्धं च ज्ञानमधिगम्य निक्षेपप्रमाणनिर्देशसत्संख्यादिभिरप्युपायैर्जीवानां पारिणामिकौदयिकौपशमिकक्षायोपशमिकक्षायिकाणां भावानां स्वतत्त्वं विदित्वा चेतनाचेतनानां

भोगसाधनानामुत्पत्तिप्रलयस्वभावावगमात् विरक्तो वितृष्णस्त्रिगुप्तः पञ्चसमितो दशलक्षणधर्मानुष्ठानात्तत्फलदर्शनाच्च निर्वाणप्राप्तियतनायाभिवर्द्धितश्रद्धासंवेगभावना-विर्भावितात्माऽनुप्रेक्षाभिः स्थिरीकृतानभिष्वङ्गः संवृतात्मा निरास्रवत्वाद् व्यपगताभिनवकर्मोपचयः परिषहजयाद्बाह्याभ्यन्तरतपोऽनुष्ठानादनुभवनाच्च सम्यग्दृष्टिविरताविरता-दीनां च जिनपर्यन्तानां परिणामाध्यवसानविशुद्धिस्थानान्तराणामसंख्येयगुणोत्कर्षप्राप्त्या पूर्वोपचितं कर्म निर्जरयन् सामायिकादीनां च सूक्ष्मसाम्परायान्तानां संयमविशुद्धिस्थानानामुत्तरोत्तरोपलम्भात् पुलाकादीनां च निर्ग्रन्थानां संयमानुपालनविशुद्धिस्थानविशेषाणामुत्तरोत्तरप्रतिपत्त्या घटमानोऽत्यन्तप्रहीणार्त्तरौद्रध्यानो धर्म्यध्यानविजयादवाप्त-समाधिबलः, शुक्लध्यानविकल्पयोश्च पृथक्त्वैकत्ववितर्कयोश्चान्यतरस्मिन् वर्तमानो नानाविधपूर्वोदितर्द्धिविशेषयुक्तः तत्रानभिष्वक्तचित्तः, पूर्वोदितेन क्रमेण मोहादीन् क्षयं नीत्वा सर्वज्ञज्ञानलक्ष्मीमनुभूय ततः शेषकर्मक्षयाद्भवबन्धनिर्मुक्तो निर्दग्धपूर्वोपादानेन्धनो निरुपादान इवाग्निः पूर्वोपात्तभववियोगात् हेत्वभावाच्चोत्तरस्याप्रादुर्भावात् शान्तः संसारदुःखमतीत्याऽत्यन्तिकमैकान्तिकं निरुपमं निरतिशयं निर्वाणसुखमवाप्नोतीति तत्त्वार्थभावनाफलमेतत्। उक्तञ्च

"एवं तत्त्वपरिज्ञानाद्विरक्तस्यात्मनो भृशम्।
निरास्रवत्वाच्छिन्नायां नवायां कर्मसन्ततौ॥१॥

पूर्वार्जितं क्षपयतो यथोक्तैः क्षयहेतुभिः।
संसारबीजं कात्स्न्र्येन मोहनीयं प्रहीयते॥२॥

ततोऽन्तरायज्ञानघ्नदर्शनघ्नान्यनन्तरम्।
प्रहीयन्तेऽस्य युगपत्त्रीणि कर्माण्यशेषतः॥३॥

गर्भसूच्यां विनष्टायां यथा तालो विनश्यति।

तथा कर्मक्षयं याति मोहनीये क्षयं गते॥४॥

ततः क्षीणचतुःकर्मा प्राप्तोऽथाख्यातसंयमम् ।

बीजबन्धननिर्मुक्तः स्नातकः परमेश्वरः॥५॥

शेषकर्मफलापेक्षः शुद्धो बुद्धो निरामयः।

सर्वज्ञः सर्वदर्शी च जिनो भवति केवली॥६॥

कृत्स्नकर्मक्षयादूर्ध्वं निर्वाणमधिगच्छति।

यथा दग्धेन्धनो वह्निर्निरुपादानसन्ततिः॥७॥

दग्धे बीजे यथात्यन्तं प्रादुर्भवति नाङ्कुरः।

कर्मबीजे तथा दग्धे न रोहति भवाङ्कुरः॥८॥

तदनन्तरमेवोर्ध्वमालोकान्तात् स गच्छति।

पूर्वप्रयोगासङ्गत्वबन्धच्छेदोर्ध्वगौरवैः॥९॥

कुलालचक्रडोलायामिषौ चापि यथेष्यते।

पूर्वप्रयोगात् कर्मेह तथा सिद्धगतिः स्मृता॥१०॥

मृल्लेपसङ्गनिर्मोक्षाद्यथा दृष्टाऽप्स्वलाबुनः।

कर्मसङ्गविनिर्मोक्षात्तथा सिद्धगतिः स्मृता॥११॥

एरण्डस्फुटदेलासु बन्धच्छेदाद्यथा गतिः।

कर्मबन्धनविच्छेदाज्जीवस्यापि तथेष्यते॥१२॥

ऊर्ध्वगौरवधर्माणो जीवा इति जिनोत्तमैः।

अधोगौरवधर्माणः पुद्गला इति चोदितम् ॥१३॥

यथाधस्तिर्यगूर्ध्वं च लोष्टवाय्वग्निदीप्तयः।

स्वभावतः प्रवर्तन्ते तथोर्ध्वगतिरात्मनाम् ॥१४॥

अतस्तु गतिवैकृत्यं तेषां यदुपलभ्यते।

कर्मणः प्रतिघाताच्च प्रयोगाच्च तदिष्यते॥१५॥

स्यादधस्तिर्यगूर्ध्वं च जीवानां कर्मजा गतिः।

ऊर्ध्वमेव स्वभावेन भवति क्षीणकर्मणाम् ॥१६॥

द्रव्यस्य कर्मणो यद्वदुत्पत्त्यारम्भवीचयः।

समं तथैव सिद्धस्य गतिर्मोक्षे भवक्षयात् ॥१७॥

उत्पत्तिश्च विनाशश्च प्रकाशतमसोरिह।

युगपद्भवतो यद्वत्तथानिर्वाणकर्मणोः॥१८॥

तन्वी मनोज्ञा सुरभिः पुण्या परमभासुरा।

प्राग्भारा नाम वसुधा लोकमूर्ध्नि व्यवस्थिता॥१९॥

नृलोकतुल्यविष्कम्भा सितच्छत्रनिभा शुभा।

ऊर्ध्वं तस्याः क्षितेः सिद्धा लोकान्ते समवस्थिताः॥२०॥

तादात्म्यादुपयुक्तास्ते केवलज्ञानदर्शने।

सम्यक्त्वसिद्धतावस्थाः हेत्वभावाच्च निष्क्रियाः॥२१॥

ततोऽप्यूर्ध्वगतिस्तेषां कस्मान्नास्तीति चेन्मतिः।

धर्मास्तिकायस्याभावात्स हि हेतुर्गतेः परः॥२२॥

संसारविषयातीतं सिद्धानामव्ययं सुखम् ।
अव्याबाधमिति प्रोक्तं परमं परमर्षिभिः॥२३॥

स्यादेतदशरीरस्य जन्तोर्नष्टाष्टकर्मणः।
कथं भवति मुक्तस्य सुखमित्युत्तरं श्रृणु॥२४॥

लोके चतुर्ष्विहार्थेषु सुखशब्दः प्रयुज्यते।
विषये वेदनाभावे विपाके मोक्ष एव च॥२५॥

सुखो वह्निः सुखो वायुर्विषयेष्विह कथ्यते।
दुःखाभावे च पुरुषः सुखितोऽस्मीति भाषते॥२६॥

पुण्यकर्मविपाकाच्च सुखमिष्टेन्द्रियार्थजम् ।
कर्मक्लेशविमोक्षाच्च मोक्षे सुखमनुत्तमम् ॥२७॥

सुषुप्तावस्थया तुल्यां केचिदिच्छन्ति निर्वृतिम् ।
तदयुक्तं क्रियावत्त्वात् सुखानुशयतस्तथा॥२८॥

श्रमक्लममदव्याधिमदनेभ्यश्च संभवात् ।
मोहोत्पत्तिर्विपाकाच्च दर्शनघ्नस्य कर्मणः॥२९॥

लोके तत्सदृशो ह्यर्थः कृत्स्नेऽप्यन्यो न विद्यते।
उपमीयेत तद्येन तस्मान्निरुपमं स्मृतम् ॥३०॥

लिङ्गप्रसिद्धेः प्रामाण्यमनुमानोपमानयोः।
अलिङ्गं चाऽप्रसिद्धं च तत्तेनानुपमं स्मृतम् ॥३१॥

प्रत्यक्षं तद्भगवतामर्हतां तैश्च भाषितम् ।

गृह्यतेऽस्तीत्यतः प्राज्ञैर्न छद्मस्थपरीक्षया॥३२॥

इति तत्त्वार्थसूत्राणां भाष्यं भाषितमुत्तमैः।

यत्र सन्निहितस्तर्कन्यायागमविनिर्णयः॥३३॥

इति तत्त्वार्थवार्तिके व्याख्यानालङ्कारे दशमोऽध्यायः समाप्तः।

**(समाप्तोऽयं ग्रन्थः)**

# तत्त्वार्थसूत्रास्य मूलपाठः

## प्रथमोऽध्याय:

सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्ग: ॥1॥

तत्त्वार्थश्रद्धानं सम्यग्दर्शनम् ॥2॥

तन्निसर्गादधिगमाद्वा ॥3॥

जीवाजीवास्रवबन्धसंवरनिर्जरामोक्षास्तत्त्वम् ॥4॥

नामस्थापनाद्रव्यभावतस्तन्न्यास: ॥5॥

प्रमाणनयैरधिगम: ॥6॥

निर्देशस्वामित्वसाधनाधिकरणस्थितिविधानत: ॥7॥

सत्संख्याक्षेत्रस्पर्शनकालान्तरभावाल्पबहुत्वैश्च ॥8॥

मतिश्रुतावधिमन:पर्ययकेवलानि ज्ञानम् ॥9॥

तत्प्रमाणे ॥10॥

आद्ये परोक्षम् ॥11॥

प्रत्यक्षमन्यत् ॥12॥

मति: स्मृति: संज्ञा चिन्ताभिनिबोध इत्यनर्थान्तरम् ॥13॥

तदिन्द्रियानिन्द्रियनिमित्तम् ॥14॥

अवग्रहेहावायधारणा: ॥15॥

बहुबहुविधक्षिप्रानिसृतानुक्तध्रुवाणां सेतराणाम् ॥16॥

अर्थस्य ॥17॥

व्यञ्जनस्यावग्रह: ॥18॥

न चक्षुरनिन्द्रियाभ्याम् ॥19॥

श्रुतं मतिपूर्वं द्व्यनेकद्वादशभेदम् ॥20॥

भवप्रत्ययोऽवधिर्देवनारकाणाम् ॥21॥

क्षयोपशमनिमित्तः षड्विकल्पः शेषाणाम् ॥22॥

ऋजुविपुलमती मनःपर्ययः ॥23॥

विशुद्ध्यप्रतिपाताभ्यां तद्विशेषः ॥24॥

विशुद्धिक्षेत्रस्वामिविषयेभ्योऽवधिमनःपर्यययोः ॥25॥

मतिश्रुतयोर्निबन्धो द्रव्येष्वसर्वपर्यायेषु ॥26॥

रूपिष्ववधेः ॥27॥

तदनन्तभागे मनःपर्ययस्य ॥28॥

सर्वद्रव्यपर्यायेषु केवलस्य ॥29॥

एकादीनि भाज्यानि युगपदेकस्मिन्नाचतुर्भ्यः ॥30॥

मतिश्रुतावधयो विपर्ययश्च ॥31॥

सदसतोरविशेषाद्यदृच्छोपलब्धेरुन्मत्तवत् ॥32॥

नैगमसंगहव्यवहारर्जुसूत्रशब्दसमभिरूढैवंभूता नयाः ॥33॥

## द्वितीयोऽध्यायः

औपशमिकक्षायिकौ भावौ मिश्रश्च जीवस्य स्वतत्त्वमौदयिकपारिणामिकौ च ॥1॥

द्विनवाष्टादशैकविंशतित्रिभेदा यथाक्रमम् ॥2॥

सम्यक्त्वचारित्रे ॥3॥

ज्ञानदर्शनदालाभभोगोपभोगवीर्याणि च ॥4॥

ज्ञानाज्ञानदर्शनलब्धयश्चतुस्त्रित्रिपञ्चभेदाः सम्यक्त्वचारित्रसंयमासंयमाश्च ॥5॥

गतिकषायलिङ्गमिथ्यादर्शनाज्ञानासंयतासिद्धलेश्याश्चतुश्चतुस्त्र्येकैकैकैकषड्भेदाः ॥6॥

जीवभव्याभव्यत्वानि च ॥7॥

उपयोगो लक्षणम् ॥8॥

स द्विविधोऽष्टचतुर्भेदः ॥9॥

संसारिणो मुक्ताश्च ॥10॥

समनस्काऽमनस्काः ॥11॥

संसारिणस्त्रसस्थावराः ॥12॥

पृथिव्यप्तेजोवायुवनस्पतयः स्थावराः ॥13॥

द्वीन्द्रियादयस्त्रसाः ॥14॥

पञ्चेन्द्रियाणि ॥15॥

द्विविधानि ॥16॥

निर्वृत्त्युपकरणे द्रव्येन्द्रियम् ॥17॥

लब्ध्युपयोगौ भावेन्द्रियम् ॥18॥

स्पर्शनरसनघ्राणचक्षुःश्रोत्राणि ॥19॥

स्पर्शरसगन्धवर्णशब्दास्तदर्थाः ॥20॥

श्रुतमनिन्द्रियस्य ॥21॥

वनस्पत्यन्तानामेकम् ॥22॥

कृमिपिपीलिका भ्रमरमनुष्यादीनामेकैकवृद्धानि ॥23॥

संज्ञिनः समनस्काः ॥24॥

विग्रहगतौ कर्मयोगः ॥25॥

अनुश्रेणि गतिः ॥26॥

अविग्रहा जीवस्य ॥27॥

विग्रहवती च संसारिणः प्राक्चतुर्भ्यः ॥28॥

एकसमयाऽविग्रहा ॥29॥

एकं द्वौ त्रीन्वाऽनाहारकः ॥30॥

सम्मूर्च्छनगर्भोपपादा जन्म ॥31॥

सचित्तशीतसंवृताः सेतरा मिश्राश्चैकशस्तद्योनयः ॥32॥

जरायुजाण्डजपोतानां गर्भः ॥33॥

देवनारकाणामुपपादः ॥34॥

शेषाणां सम्मूर्च्छनम् ॥35॥

औदारिकवैक्रियिकाहारतैजसकार्मणानि शरीराणि ॥36॥

परं परं सूक्ष्मम् ॥37॥

प्रदेशतोऽसंख्येयगुणं प्राक्तैजसात् ॥38॥

अनन्तगुणे परे ॥39॥

अप्रतीघाते ॥40॥

अनादिसंबन्धे च ॥41॥

सर्वस्य ॥42॥

तदादीनि भाज्यानि युगपदेकस्मिन्नाचतुर्भ्यः ॥43॥

निरुपभोगमन्त्यम् ॥44॥

गर्भसम्मूर्च्छनजमाद्यम् ॥45॥

औपपादिकं वैक्रियिकम् ॥46॥

लब्धिप्रत्ययं च ॥47॥

तैजसमपि ॥48॥

शुभं विशुद्धमव्याघाति चाहारकं प्रमत्तसंयतस्यैव ॥49॥

नारकसम्मूर्च्छिनो नपुंसकानि ॥50॥

न देवाः ॥51॥

शेषास्त्रिवेदाः ॥52॥

औपपादिकचरमोत्तमदेहाऽसंख्येयवर्षायुषोऽनपवर्त्यायुषः ॥53॥

## तृतीयोऽध्याय:

रत्नशर्करावालुकापङ्कधूमतमोमहातमःप्रभाभूमयो घनाम्बुवाताकाशप्रतिष्ठाः सप्ताऽधोऽधः ॥1॥

तासु त्रिंशत्पञ्चविंशतिपञ्चदशदशत्रिपञ्चोनैकनरकशतसहस्राणि पञ्च चैव यथा-क्रमम् ॥2॥

नारका नित्याऽशुभतरलेश्यापरिणामदेहवेदनाविक्रियाः ॥3॥

परस्परोदीरितदुःखाः ॥4॥

संक्लिष्टाऽसुरोदीरितदुःखाश्च प्राक् चतुर्थ्याः ॥5॥

तेष्वेकत्रिसप्तदशसप्तदशद्वाविंशतित्रयस्त्रिंशत्सागरोपमा सत्त्वानां परा स्थितिः ॥6॥

जम्बूद्वीपलवणोदादयः शुभनामानो द्वीपसमुद्राः ॥7॥

द्विर्द्विर्विष्कम्भाः पूर्वपूर्वपरिक्षेपिणो वलयाकृतयः ॥8॥

तन्मध्ये मेरुनाभिर्वृत्तो योजनशतसहस्रविष्कम्भो जम्बूद्वीपः ॥9॥

भरतहैमवतहरिविदेहरम्यकहैरण्यवतैरावतवर्षाः क्षेत्राणि ॥10॥

तद्विभाजिनः पूर्वापरायता हिमवन्महाहिमवन्निषधनीलरुक्मिशिखरिणो वर्षधरपर्वताः ॥11॥

हेमार्जुनतपनीयवैडूर्यरजतहेममयाः ॥12॥

मणिविचित्रपार्श्वा उपरि मूले च तुल्यविस्ताराः ॥13॥

पद्ममहापद्मतिगिञ्छकेशरिमहापुण्डरीकपुण्डरीका ह्रदास्तेषामुपरि ॥14॥

प्रथमो योजनसहस्रायामस्तदर्द्धविष्कम्भो ह्रदः ॥15॥

दशयोजनावगाहः ॥16॥

तन्मध्ये योजनं पुष्करम् ॥17॥

तद्द्विगुणद्विगुणा ह्रदाः पुष्कराणि च ॥18॥

तन्निवासिन्यो देव्यः श्रीह्रीधृतिकीर्तिबुद्धिलक्ष्म्यः पल्योपमस्थितयः ससामानिक-परिषत्काः ॥29॥

गङ्गासिन्धुरोहिद्रोहितास्याहरिद्धरिकान्तासीतासीतोदानारीनरकान्तासुवर्णरूप्यकूलारक्ता-रक्तोदाः सरितस्तन्मध्यगाः ॥20॥

द्वयोर्द्वयोः पूर्वाः पूर्वगाः ॥21॥

शेषास्त्वपरगाः ॥22॥

चतुर्दशनदीसहस्रपरिवृता गङ्गासिन्ध्वादयो नद्यः ॥23॥

भरतः षड्विंशतिपञ्चयोजनशतविस्तारः षडचैकोनविंशतिभागा योजनस्य ॥24॥

तद्द्विगुणद्विगुणविस्तारा वर्षधरवर्षा विदेहान्ताः ॥25॥

उत्तरा दक्षिणतुल्याः ॥26॥

भरतैरावतयोर्वृद्धिह्रासौ षट्समयाभ्यामुत्सर्पिण्यवसर्पिणीभ्याम् ॥27॥

ताभ्यामपरा भूमयोऽवस्थिताः ॥28॥

एकद्वित्रिपल्योपमस्थितयो हैमवतकहारिवर्षकदैवकुरवकाः ॥29॥

तथोत्तराः ॥30॥

विदेहेषु संख्येयकालाः ॥31॥

भरतस्य विष्कम्भो जम्बूद्वीपस्य नवतिशतभागः ॥32॥

द्विर्धातकीखण्डे ॥33॥

पुष्करार्द्धे च ॥34॥

प्राङ्मानुषोत्तरान्मनुष्याः ॥35॥

आर्या म्लेच्छाश्च ॥36॥

भरतैरावतविदेहाः कर्मभूमयोऽन्यत्र देवकुरूत्तर कुरुभ्यः ॥37॥

नृस्थिती परावरे त्रिपल्योपमान्तर्मुहूर्त्ते ॥38॥

तिर्यग्योनिजानां च ॥39॥

## चतुर्थोऽध्यायः

देवाश्चतुर्णिकायाः ॥1॥

आदितस्त्रिषु पीतान्तलेश्याः ॥2॥

दशाष्टपञ्चद्वादशविकल्पाः कल्पोपपन्नपर्यन्ताः ॥3॥

इन्द्रसामानिकत्रायस्त्रिंशत्पारिषदात्मरक्षलोकपालानीकप्रकीर्णकाभियोग्यकिल्विषिकाश्चै-

कशः ॥4॥

त्रायस्त्रिंशल्लोकपालवर्ज्या व्यन्तरज्योतिष्काः ॥5॥

पूर्वयोर्द्वीन्द्राः ॥6॥

कायप्रवीचारा आ ऐशानात् ॥7॥

शेषाः स्पर्शरूपशब्दमनःप्रवीचाराः ॥8॥

परेऽप्रवीचाराः ॥9॥

भवनवासिनोऽसुरनागविद्युत्सुपर्णाग्निवातस्तनितोदधिद्वीपदिक्कुमाराः ॥10॥

व्यन्तराः किन्नरकिंपुरुषमहोरगगन्धर्वयक्षराक्षसभूतपिशाचाः ॥11॥

ज्योतिष्काः सूर्याचन्द्रमसौ ग्रहनक्षत्रप्रकीर्णकतारकाश्च॥12॥

मेरुप्रदक्षिणा नित्यगतयो नृलोके ॥13॥

तत्कृतः कालविभागः ॥14॥

बहिरवस्थिताः ॥15॥

वैमानिकाः ॥16॥

कल्पोपपन्नाः कल्पातीताश्च ॥17॥

उपर्युपरि ॥18॥

सौधर्मैशानसानत्कुमारमाहेन्द्रब्रह्मब्रह्मोत्तरलान्तवकापिष्ठशुक्रमहाशुक्रशतारसहस्रारेष्वानतप्राण

-तयोरारणाच्युतयोर्नवसु ग्रैवेयकेषु विजयवैजयन्तजयन्तापराजितेषु सर्वार्थसिद्धौ च॥19॥

स्थितिप्रभावसुखद्युतिलेश्याविशुद्धीन्द्रियावधिविषयतोऽधिकाः ॥20॥

गतिशरीरपरिग्रहाभिमानतो हीना: ॥21॥

पीतपद्मशुक्ललेश्या द्वित्रिशेषेषु ॥22॥

प्राग्ग्रैवेयकेभ्य: कल्पा: ॥23॥

ब्रह्मलोकालया लौकान्तिका: ॥24॥

सारस्वतादित्यवह्न्यरुणगर्दतोयतुषिताव्याबाधारिष्टाश्च ॥25॥

विजयादिषु द्विचरमा: ॥26॥

औपपादिकमनुष्येभ्य: शेषास्तिर्यग्योनय: ॥27॥

स्थितिरसुरनागसुपर्णद्वीपशेषाणां सागरोपमत्रिपल्योपमार्धहीनमिता: ॥28॥

सौधर्मैशानयो: सागरोपमेऽधिके ॥29॥

सानत्कुमारमाहेन्द्रयो: सप्त ॥30॥

त्रिसप्तनवैकादशत्रयोदशपञ्चदशभिरधिकानि तु ॥31॥

आरणाच्युतादूर्ध्वमेककैकेन नवसु ग्रैवेयकेषु विजयादिषु सर्वार्थसिद्धौ च ॥32॥

अपरा पल्योपममधिकम् ॥33॥

परत: परत: पूर्वा पूर्वाऽनन्तरा: ॥34॥

नारकाणां च द्वितीयादिषु ॥35॥

दशवर्षसहस्राणि प्रथमायाम् ॥36॥

भवनेषु च ॥37॥

व्यन्तराणां च ॥38॥

परा पल्योपममधिकम् ॥39॥

ज्योतिष्काणां च ॥40॥

तदष्टभागोऽपरा ॥41॥

लौकान्तिकानामष्टौ सागरोपमाणि सर्वेषाम् ॥42॥

## पञ्चमोऽध्याय:

अजीवकाया धर्माधर्माकाशपुद्‌गला: ॥1॥

द्रव्याणि ॥2॥

जीवाश्च ॥3॥

नित्यावस्थितान्यरूपाणि ॥4॥

रूपिण: पुद्‌गला: ॥5॥

आ आकाशादेकद्रव्याणि ॥6॥

निष्क्रियाणि च ॥7॥

असंख्येया प्रदेशा धर्माधर्मैकजीवानाम् ॥8॥

आकाशस्यानन्ता: ॥9॥

संख्येयासंख्येयाश्च पुद्‌गलानाम् ॥10॥

नाणो: ॥11॥

लोकाकाशेऽवगाह: ॥12॥

धर्माधर्मयो: कृत्स्ने ॥13॥

एकप्रदेशादिषु भाज्य: पुद्‌गलानाम् ॥14॥

असंख्येयभागादिषु जीवानाम् ॥15॥

प्रदेशसंहारविसर्पाभ्यां प्रदीपवत् ॥16॥

गतिस्थित्युपग्रहौ धर्माधर्मयोरुपकार: ॥17॥

आकाशस्यावगाह: ॥18॥

शरीरवाङ्मन:प्राणापाना: पुद्‌गलानाम् ॥19॥

सुखदु:खजीवितमरणोपग्रहाश्च ॥20॥

परस्परोपग्रहो जीवानाम् ॥21॥

वर्तनापरिणामक्रिया: परत्वापरत्वे च कालस्य ॥22॥

स्पर्शरसगन्धवर्णवन्तः पुद्गलाः ॥23॥

शब्दबन्धसौक्ष्म्यस्थौल्यसंस्थानभेदतमश्छायातपोद्योतवन्तश्च ॥24॥

अणवः स्कन्धाश्च ॥25॥

भेदसंघातेभ्य उत्पद्यन्ते ॥26॥

भेदादणुः ॥27॥

भेदसंघाताभ्यां चाक्षुषः ॥28॥

सद्द्रव्यलक्षणम् ॥29॥

उत्पादव्ययध्रौव्ययुक्तं सत् ॥30॥

तद्भावाव्ययं नित्यम् ॥31॥

अर्पितानर्पितसिद्धेः ॥32॥

स्निग्धरूक्षत्वाद् बन्धः ॥33॥

न जघन्यगुणानाम् ॥34॥

गुणसाम्ये सदृशानाम् ॥35॥

द्व्यधिकादिगुणानां तु ॥36॥

बन्धेऽधिकौ पारिणामिकौ च ॥37॥

गुणपर्ययवद् द्रव्यम् ॥38॥

कालश्च ॥39॥

सोऽनन्तसमयः ॥40॥

द्रव्याश्रया निर्गुणा गुणाः ॥41॥

तद्भावः परिणामः ॥42॥

## षष्ठोऽध्यायः

कायवाङ्मनःकर्म योगः ॥1॥

स आस्रवः ॥2॥

शुभः पुण्यस्याशुभः पापस्य ॥3॥

सकषायाकषाययोः साम्परायिकेर्यापथयोः ॥4॥

इन्द्रियकषायाव्रतक्रियाः पञ्चचतुःपञ्चपञ्चविंशतिसंख्याः पूर्वस्य भेदाः ॥5॥

तीव्रमन्दज्ञाताज्ञातभावाधिकरणवीर्यविशेषेभ्यस्तद्विशेषः॥6॥

अधिकरणं जीवाजीवाः ॥7॥

आद्यं संरम्भसमारम्भारम्भयोगकृतकारितानुमतकषायविशेषैस्त्रिस्त्रिश्चतुश्चैकशः ॥8॥

निवर्तननिक्षेपसंयोगनिसर्गाद्विचतुर्द्वित्रिभेदाः परम् ॥9॥

तत्प्रदोषनिह्नवमात्सर्यान्तरायासादनोपघाता ज्ञानदर्शनावरणयोः ॥10॥

दुःखशोकतापाक्रन्दनवधपरिदेवनान्यात्मपरोभयस्थानान्यसद्वेद्यस्य ॥11॥

भूतव्रत्यनुकम्पादानसरागसंयमादियोगः क्षान्तिः शौचमिति सद्वेद्यस्य ॥12॥

केवलिश्रुतसङ्घधर्मदेवावर्णवादो दर्शनमोहस्य ॥13॥

कषायोदयात्तीव्रपरिणामश्चारित्रमोहस्य ॥14॥

बह्वारम्भपरिग्रहत्वं नारकस्यायुषः ॥15॥

माया तैर्यग्योनस्य ॥16॥

अल्पारम्भपरिग्रहत्वं मानुषस्य ॥17॥

स्वभावमार्दवं च ॥18॥

निःशील व्रतित्वं च सर्वेषाम् ॥19॥

सरागसंयमसंयमासंयमाकानिर्जराबालतपांसि दैवस्य ॥20॥

सम्यक्त्वं च ॥21॥

योगवक्रता विसंवादनं चाशुभस्य नाम्नः ॥22॥

तद्विपरीतं शुभस्य ॥23॥

दर्शनविशुद्धिर्विनयसम्पन्नता शीलव्रतेष्वनतीचारोऽभीक्ष्णज्ञानोपयोगसंवेगौ शक्तितस्त्यागत-

पसी

साधुसमाधिर्वैयावृत्त्यकरणमर्हदाचार्यबहुश्रुतप्रवचनभक्तिरावश्यकापरिहाणिर्मार्गप्रभावना

प्रवचनवत्सलत्वमिति तीर्थकरत्वस्य ॥24॥

परमात्मनिन्दाप्रशंसे सदसद्गुणोच्छादनोद्भावने च नीचैर्गोत्रस्य ॥25॥

तद्विपर्ययो नीचैर्वृत्त्यनुत्सेकौ चोत्तरस्य ॥26॥

विघ्नकरणमन्तरायस्य ॥27॥

## सप्तमोऽध्याय:

हिंसानृतस्तेयाब्रह्मपरिग्रहेभ्यो विरतिर्व्रतम् ॥1॥

देशसर्वतोऽणुमहती ॥2॥

तत्स्थैर्यार्थं भावना: पञ्च पञ्च ॥3॥

वाङ्मनोगुप्तीर्यादाननिक्षेपणसमित्यालोकितपानभोजनानि पञ्च ॥4॥

क्रोधलोभभीरुत्वहास्यप्रत्याख्यानान्यनुवीचिभाषणं च पञ्च ॥5॥

शून्यागारविमोचितावासपरोपरोधाकरणभैक्ष्यशुद्धिसधर्माविसंवादा: पञ्च ॥6॥

स्त्रीरागकथाश्रवणतन्मनोहराङ्गनिरीक्षणपूर्वरतानुस्मरणवृष्येष्टरसस्वशरीरसंस्कारत्यागा:

पञ्च ॥7॥

मनोज्ञामनोज्ञेन्द्रियविषयरागद्वेषवर्जनानि पञ्च ॥8॥

हिंसादिष्विहामुत्रापायावद्यदर्शनम् ॥9॥

दु:खमेव वा ॥10॥

मैत्रीप्रमोदकारुण्यमाध्यस्थ्यानि च सत्त्वगुणाधिकक्लिश्यमानाविनेयेषु ॥11॥

जगत्कायस्वभावौ वा संवेगवैराग्यार्थम् ॥12॥

प्रमत्तयोगात्प्राणव्यपरोपणं हिंसा ॥13॥

असदभिधानमनृतम् ॥14॥

अदत्तादानं स्तेयम् ॥15॥

मैथुनमब्रह्म ॥16॥

मूर्च्छा परिग्रहः ॥17॥

निःशल्यो व्रती ॥18॥

अगार्यनगारश्च ॥19॥

अणुव्रतोऽगारी ॥20॥

दिग्देशानर्थदण्डविरतिसामायिक प्रोषधोपवासोपभोगपरिभोगपरिमाणातिथिसंविभागव्रत-सम्पन्नश्च ॥21॥

माणान्तिकीं सल्लेखनां जोषिता ॥22॥

शङ्काकाङ्क्षाविचिकित्सान्यदृष्टिप्रशंसासंस्तवाः सम्य ष्टेरतीचाराः ॥23॥

व्रतशीलेषु पञ्च पञ्च यथाक्रमम् ॥24॥

बन्धवधच्छेदातिभारारोपणान्नपाननिरोधाः ॥25॥

मिथ्योपदेशरहोभ्याख्यानकूटलेखक्रियान्यासापहारसाकारमन्त्रभेदाः ॥26॥

स्तेनप्रयोगतदाहृतादानविरुद्धराज्यातिक्रमहीनाधिकमानोन्मानप्रतिरूपकव्यवहाराः ॥27॥

परिविवाहकरणेत्वरिकापरिगृहीतापरिगृहीतागमनानङ्गक्रीडाकामतीव्राभिनिवेशा ॥28॥

क्षेत्रवास्तुहिरण्यसुवर्णधनधान्यदासीदासकुप्यप्रमाणतिक्रमाः ॥29॥

ऊर्ध्वाधस्तिर्यग्व्यतिक्रमक्षेत्रवृद्धिस्मृत्यन्तराधानानि ॥30॥

आनयनप्रेष्यप्रयोगशब्दरूपानुपातपुद्गलक्षेपाः ॥31॥

कन्दर्पकौत्कुच्यमौखर्यासमीक्ष्याधिकरणोपभोगपरिभोगानर्थक्यानि ॥32॥

योगदुःप्रणिधानानादरस्मृत्यनुपस्थानानि ॥33॥

अप्रत्यवेक्षिताप्रमार्जितोत्सर्गादानसंस्तरोपक्रमणानादरस्मृत्यनुपस्थानानि ॥34॥

सचित्तसंबन्धसम्मिश्राभिषवदुःपक्वाहाराः ॥35॥

सचित्तनिक्षेपापिधानपरव्यपदेशमात्सर्य्यकालातिक्रमा: ॥36॥

जीवितमरणाशंसामित्रानुरागसुखानुबन्धनिदानानि ॥37॥

अनुग्रहार्थं स्वस्यातिसर्गो दानम् ॥38॥

विधिद्रव्यदातृपात्रविशेषात्तद्विशेष ॥39॥

## अष्टमोऽध्याय:

मिथ्यादर्शनाविरतिप्रमादकषाययोगा बन्धहेतव: ॥1॥

सकषायत्वाज्जीव: कर्मणो योग्यान् पुद्गलानादत्ते सबन्ध ॥2॥

प्रकृतिस्थित्यनुभागप्रदेशास्तद्विधय: ॥3॥

आद्यो ज्ञानदर्शनावरणवेदनीयमोहनीयायुर्नामगोत्रान्तराया: ॥4॥

पञ्चनवद्व्यष्टाविंशतिचतुर्द्विचत्वारिंशद्द्विपञ्चभेदा यथाक्रमम् ॥5॥

मतिश्रुतवाधिमन:पर्ययकेवलानाम् ॥6॥

चक्षुरचक्षुरवधिकेवलानां निद्रानिद्रानिद्राप्रचलाप्रचलाप्रचलास्त्यानगृद्धयश्च ॥7॥

सदसद्वेद्ये ॥8॥

दर्शनचारित्रमोहनीयाकषाकषायवेदनीयाख्यास्त्रिद्विनवषोडशभेदा: सम्यक्त्वमिथ्यात्वत-
दुभयान्यकषायकषायौ हास्यरत्यरतिशोकभयजुगुप्सास्त्रीपुंनपुंसकवेदा अनन्तानुबन्ध्य-
प्रत्याख्यानप्रत्याख्यानसंज्वलनविकल्पाश्चैकश: क्रोधमानमायालोभा: ॥9॥

नारकतैर्यग्योनमानुषदैवानि ॥10॥

गतिजातिशरीराङ्गोपाङ्गनिर्माणबन्धनसंघातसंस्थानसंहननस्पर्शरसगन्धवर्णानुपूर्व्यगुरु-
लघूपघातपरघातातपोद्योतोच्छवासविहायोगतय: प्रत्येकशरीरत्रससुभगसुस्वरशुभसूक्ष्म-
पर्याप्तिस्थिरादेययश:कीर्तिसेतराणि तीर्थकरत्वं च ॥11॥

उच्चैर्नीचैश्च ॥12॥

दानलाभभोगोपभोगवीर्याणाम् ॥13॥

आदितस्तिसृणामन्तरायस्य च त्रिंशत्सागरोपमकोटीकोट्य: परा स्थिति: ॥14॥

सप्ततिर्मोहनीयस्य ॥15॥

विंशतिर्नामगोत्रयो: ॥16॥

त्रयस्त्रिंशत्सागरोपमाण्यायुष: ॥17॥

अपरा द्वादशमुहूर्ता वेदनीयस्य ॥18॥

नामगोत्रयोरष्टौ ॥19॥

शेषाणामन्तर्मुहूर्ता ॥20॥

विपाकोऽनुभव: ॥21॥

स यथानाम ॥22॥

ततश्च निर्जरा ॥23॥

नामप्रत्यया: सर्वतो योगविशेषात् सूक्ष्मैकक्षेत्रावगाहस्थिता: सर्वात्मप्रदेशेष्वनन्तानन्त-प्रदेशा: ॥24॥

सद्वेद्यशुभायुर्नामगोत्राणि पुण्यम् ॥25॥

अतोऽन्यत्पापम् ॥26॥

## नवमोऽध्याय:

आस्रवनिरोध: संवर: ॥1॥

स गुप्तिसमितिधर्मानुप्रेक्षापरीषहजयचारित्रै: ॥2॥

तपसा निर्जरा च ॥3॥

सम्यग्योगनिग्रहो गुप्ति: ॥4॥

ईर्याभाषैषणादाननिक्षेपोत्सर्गा: समितय: ॥5॥

उत्तमक्षमामार्दवार्जवशौचसत्यसंयमतपस्त्यागाकिञ्चन्यब्रह्मचर्याणि धर्मा: ॥6॥

अनित्याशरणसंसारैकत्वान्यत्वाशुच्यास्रवसंवरनिर्जरालोकबोधिदुर्लभधर्मस्वाख्याततत्वानु-चिन्तनमनुप्रेक्षाः ॥7॥

मार्गाच्यवननिर्जरार्थं परिषोढव्याः परीषहाः ॥8॥

क्षुत्पिपासाशीतोष्णदंशमशकनाग्न्यारतिस्त्रीचर्यानिषद्याशय्याक्रोशवधयाञ्चालाभरोगतृण-स्पर्शमलसत्कारपुरस्कारप्रज्ञाज्ञानदर्शनानि ॥9॥

सूक्ष्मसाम्परायछद्मस्थवीतरागयोश्चतुर्दश ॥10॥

एकादश जिने ॥11॥

बादरसाम्पराये सर्वे ॥12॥

ज्ञानावरणे प्रज्ञाज्ञाने ॥13॥

दर्शनमोहान्तराययोरदर्शनालाभौ ॥14॥

चारित्रमोहे नाग्न्यारतिस्त्रीनिषद्याक्रोशयाञ्चासत्कारपुरस्काराः ॥15॥

वेदनीये शेषाः ॥16॥

एकादयो भाज्या युगपदेकस्मिन्नैकोनविंशतेः ॥17॥

सामायिकच्छेदोपस्थापनापरिहारविशुद्धिसूक्ष्मसाम्पराययथाख्यातमिति चारित्रम् ॥18॥

अनशनावमोदर्यवृत्तिपरिसंख्यानरसपरित्यागविविक्तशय्यासनकायक्लेशा बाह्यं तपः ॥19॥

प्रायश्चित्तविनयवैयावृत्त्यस्वाध्यायव्युत्सर्गध्यानान्युत्तरम् ॥20॥

नवचतुर्दशपञ्चद्विभेदा यथाक्रमं प्राग्ध्यानात् ॥21॥

आलोचनप्रतिक्रमणतदुभयविवेकव्युत्सर्गतपश्छेदपरिहारोपस्थापनाः ॥22॥

ज्ञानदर्शनचारित्रोपचाराः ॥23॥

आचार्योपाध्यायतपस्विशैक्ष्यग्लानगणकुलसंघसाधुमनोज्ञानाम् ॥24॥

याचनापृच्छनानुप्रेक्षाम्नायधर्मोपदेशाः ॥25॥

बाह्याभ्यन्तरोपध्योः ॥26॥

उत्तमसंहननस्यैकाग्रचिन्तानिरोधो ध्यानमान्तर्मुहूर्तात् ॥27॥

आर्त्तरौद्रधर्म्यशुक्लानि ॥28॥

परे मोक्षहेतू ॥29॥

आर्त्तममनोज्ञस्य संप्रयोगे तद्विप्रयोगाय स्मृतिसमन्वाहार: ॥30॥

विपरीतं मनोज्ञस्य ॥31॥

वेदनायाश्च ॥32॥

निदानं च ॥33॥

तदविरतदेशविरतप्रमत्तसंयतानाम् ॥34॥

हिंसानृतस्तेयविषयसंरक्षणेभ्य रौद्रमविरतदेशविरतयो: ॥35॥

आज्ञापायविपाकसंस्थानविचयाय धर्म्यम् ॥36॥

शुक्ले चाद्ये पूर्वविद: ॥37॥

परे केवलिन: ॥38॥

पृथक्त्वैकत्ववितर्कसूक्ष्मक्रियाप्रतिपातिव्युपरतक्रियानिवर्तीनि ॥39॥

त्र्येकयोगकाययोगायोगानाम् ॥40॥

एकाश्रये सवितर्कवीचारे पूर्वे ॥41॥

अवीचारं द्वितीयम् ॥42॥

वितर्क: श्रुतम् ॥43॥

वीचारोऽर्थव्यञ्जनयोगसंक्रान्ति: ॥44॥

सम्य ष्टिश्रावकविरतानन्तवियोजकदर्शनमोहक्षपकोपशमकोपशान्तमोहक्षपकक्षीणमोह-

जिना: क्रमशोऽसंख्येयगुणनिर्जरा: ॥45॥

पुलाकवकुशकुशीलनिर्ग्रन्थस्नातका निर्ग्रन्था: ॥46॥

संयमश्रुतप्रतिसेवनार्थलिङ्गलेश्योपपादस्थानविकल्पत: साध्या: ॥47॥

## दशमोऽध्यायः

मोहक्षयाज्ज्ञानदर्शनावरणान्तरायक्षयाच्च केवलम् ॥1॥

बन्धहेत्वभावनिर्जराभ्यां कृत्स्नकर्मविप्रमोक्षो मोक्षः ॥2॥

औपशमिकादिभव्यत्वानां च ॥3॥

अन्यत्र केवलसम्यक्त्वज्ञानदर्शनसिद्धत्वेभ्यः ॥4॥

तदनन्तरमूर्ध्वं गच्छत्यालोकान्तात् ॥5॥

पूर्वप्रयोगादप्रसङ्गत्वाद् बन्धच्छेदात्तथागतिपरिणामाच्च ॥6॥

आविद्धकुलालचक्रवद्व्यपगतलेपालाबुवदेरण्डबीजवदग्निशिखावच्च ॥7॥

धर्मास्तिकायाभावात् ॥8॥

क्षेत्रकालगतिलिङ्गतीर्थचारित्रप्रत्येकबुद्धबोधितज्ञानावगाहनान्तरसंख्याल्पबहुत्वतः साध्याः ॥9॥

# तत्त्वार्थसूत्रस्थशब्दानामकाराद्यनुक्रमः


**अ**

| | |
|---|---|
| अकषाय | 6/4;8/1 |
| अकषाय (वेदनीय) नवभेद | 8/9 |
| अकामनिर्जरा | 6/20 |
| अगारिन् | 7/19;7/20 |
| अगुरुलघु | 8/11 |
| अग्निकुमार | 4/10 |
| अग्निशिखावत् | 10/7 |
| अङ्गोपाङ्ग | 8/11 |
| अचक्षुष् | 8/7 |
| अच्युत | 4/19;4/32 |
| अजीव | 1/4;5/1;6/7 |
| अज्ञातभाव | 6/6 |
| अज्ञान | 2/5;2/6;9/9;9/13 |
| अणु | 5/11;5/25;5/27;7/2 |
| अणुव्रत | 7/20 |
| अण्डज | 2/33 |
| अतिथिसंविभाग | 7/21 |
| अतिभारारोपण | 7/25 |
| अतीचार | 7/23 |
| अदत्तादान | 7/15 |
| अदर्शन | 9/9;9/14 |
| अधोऽधः | 3/1 |
| अधर्म | 5/1;5/8;5/13;5/17 |
| अधिक | 4/20;4/29;4/31;<br>4/33;4/39;5/37 |
| अधिकरण | 1/7;6/7 |
| अधिकरणविशेष | 6/6 |
| अधिगत | 1/3 |
| अधिगत | 1/6 |
| अधोव्यतिक्रम | 7/30 |
| अनगार | 7/19 |
| अनङ्गक्रीडा | 7/28 |
| अनन्त | 5/9 |
| अनन्तगुण | 2/39 |
| अनन्तर | 4/34 |
| अनन्तवियोजक | 9/45 |
| अनन्तसमय | 5/40 |
| अनन्तानन्तप्रदेश | 8/24 |
| अनन्तानुबन्धी | 8/9 |
| अनपवर्त्यायुष | 2/53 |
| अनर्थदण्डविरति | 7/21 |

अनर्थान्तर 1/12
अनर्पित 5/32
अनशन 1/19
अनादर 7/33;7/34
अनादिसम्बन्ध 2/41
अनाहारक 2/30
अनिःसृत 1/16
अनित्य 9/7
अनिन्द्रिय 1/19;2/21
अनीक 4/4
अनुक्त 1/16
अनुग्रहार्थ 7/38
अनुचिन्तन 9/7
अनुत्सेक 6/26
अनुप्रेक्षा 9/2;9/7;9/25
अनुभव 8/21
अनुभाग 8/3
अनुमत 6/8
अनुवीचिभाषण 7/5
अनुश्रेणि 2/26
अनृत 7/14;9/35
अनृतविरति 7/1
अन्तर 1/8;10/9
अन्तराय 6/10;3/27;8/4;
8/14;9/14
अन्तरायक्षय 10/1
अन्तर्मुहूर्त 3/38;8/20
अन्नपाननिरोध 7/25
अन्यत्व (अनुप्रेक्षा) 9/7
अन्यदृष्टिप्रशंसा 7/23
अन्यदृष्टिसंस्तव 7/23
अन्त्य 2/44
अप् 2/13
अपगतलेपालाबुवत् 10/7
अपरगा 3/22
अपरत्व 5/22
अपरा 3/28;4/33;4/41;8/18
अपराजित 4/19
अपरिगृहीतागमन 7/28
अपान 5/19
अपायदर्शन 7/9
अपायविचय 9/36
अप्रतिघात 2/40
अप्रतिपात 1/24
अप्रत्यवेक्षिताप्रमार्जितादान 7/34
अप्रत्यवेक्षिताप्रमार्जितोत्सर्ग 7/34
अप्रवीचार 4/9

अप्रत्याख्यान 8/9
अब्रह्म 7/16
अब्रह्मविरति 7/1
अभव्यत्व 2/7
अभिनिबोध 1/12
अभिमान 4/21
अभियोग्य 4/4
अभिषव 7/35
अभीक्ष्णज्ञानोपयोग 6/24
अमनस्क 2/11
अमनोज्ञ 9/30
अमनोज्ञेन्द्रियविषय 7/5
अमुत्र 7/9
अम्बु 3/1
अयोग 9/40
अरति 8/9;9/9;9/15
अरिष्ट 4/25
अरुण 4/25
अरूप 5/4
अर्जुनमय 3/12
अर्थ 1/17
अर्थङ्क्रान्ति 9/44
अर्पित 5/32
अर्हद् (भक्ति) 6/24
अलाबुवत् 10/7
अलाभ 9/9;9/14
अल्पपरिग्रह 1/8;6/17;10/9
अल्पारम्भ 6/17
अवगाह 5/12;5/18
अवगाहन 10/9
अवग्रह 1/15;1/18
अवद्यदर्शन 7/9
अवधि 1/9;1/21;1/25;
1/27;1/31;8/6;8/7
अवधिविषय 4/20
अवमौदर्य 9/19
अवर्णवाद 6/13
अवसर्पिणी 3/27
अवस्थित 3/28;4/15;5/4
अवाय 1/15
अविग्रह 2/27;2/29
अविनय 7/11
अविरत 9/34;9/35
अविरति 8/1
अवीचार 9/42
अव्यय 5/31
अव्याघाति 2/49
अव्याबाध 4/25

| | | | |
|---|---|---|---|
| अव्रत | 6/5 | आकिञ्चन्य | 9/6 |
| अशरण | 9/7 | आक्रन्दन | 6/11 |
| अशुचि | 9/7 | आक्रोश | 9/9;9/15 |
| अशुभ | 6/3;6/22 | आचार्य | 9/24 |
| अशुभतरलेश्या | 3/3 | आचार्य भक्ति | 6/24 |
| असंयत | 2/6 | आज्ञा (विचय) | 9/36 |
| असङ्ख्येय | 5/8;5/10 | आतप | 5/24;8/11 |
| असङ्ख्येय गुण | 2/38 | आत्मप्रशंसा | 6/25 |
| असङ्ख्येय गुणनिर्जरा | 9/45 | आत्मरक्ष | 4/4 |
| असङ्ख्येय भागादि | 5/15 | आत्मस्थ | 6/11 |
| असङ्ख्येय वर्षायुष् | 2/53 | आदाननिक्षेप | 9/5 |
| असङ्गत्व | 10/6 | आदाननिक्षेपणसमिति | 7/4 |
| असदभिधान | 7/14 | आदित्य | 4/25 |
| असद्गुणोद्भावन | 6/25 | आदेय | 8/11 |
| असद्वेद्य | 6/11;8/8 | आद्य | 1/11;2/45; |
| असमीक्ष्याधिकरण | 7/32 | | 6/8;8/4;9/37 |
| असर्वपर्याय | 1/26 | आनत | 4/19 |
| असिद्धत्व | 2/6 | आनयन | 7/31 |
| असुर | 4/28 | आनुपूर्वी | 8/11 |
| असुरकुमार | 4/10 | आन्तर्मुहूर्त | 9/27 |
| **आ** | | आभ्यन्तरोपाधि | 9/26 |
| आ ऐशान | 4/7 | आम्नाय | 9/25 |
| आकाश | 5/1;5/6;5/9;5/18 | आयुष् | 8/17;8/24 |
| आकाशप्रतिष्ठ | 3/1 | आरण | 4/19;4/32 |

आरम्भ 6/8
आर्जव 9/6
आर्त 9/28;9/30
आर्य 6/36
आलोकान्त 10/5
आलोकितपानभोजन 7/4
आलोचना 9/22
आवश्यकापरिहाणि 6/24
आविद्धकुलालचक्रवत् 10/7
आसादन 6/10
आस्रव 1/4;6/2;9/7
आस्रव निरोध 9/1
आहारक 2/36;2/49

**इ**

इत्वरिकागमन 7/28
इन्द्र 4/4
इन्द्रिय (पञ्च) 6/5
इन्द्रिय विषय 4/20
इन्द्रियानिन्द्रियनिमित्त 4/14

**ई**

ईर्या 9/5
ईर्यापथ 6/4
ईर्यासमिति 7/4
ईहा 1/15

**उ**

उच्चैस् 8/12
उच्छवास 8/11
उत्तमक्षमा 9/6
उत्तमसंहनन 9/27
उत्तर 3/26;6/26;9/20
उत्तरकुरु 3/37
उत्पद्यन्ते 5/26
उत्पाद 5/30
उत्सर्ग 9/5
उत्सर्पिणी 3/27
उदधिकुमार 4/10
उद्योत 5/24;8/11
उन्मत्तवत् 1/32
उपकरण 2/17
उपकार 5/17
उपग्रह 5/20
उपघात 6/10;8/11
उपचार 9/23
उपधि 9/29
उपपादस्थान 2/31;2/34;9/47
उपभोग 2/4;8/13
उपभोगपरिभोगानर्थक्य 7/32
उपभोग (परिमाण) 7/21

| | |
|---|---|
| उपयोग | 2/8;2/18 |
| उपशमक | 9/45 |
| उपशान्तमोह | 9/45 |
| उपस्थापन | 9/22 |
| उपाध्याय | 9/24 |
| उभयस्थ | 6/11 |
| उष्ण | 9/9 |
| **ऊ** | |
| ऊर्ध्व | 4/32;10/5 |
| ऊर्ध्व व्यतिक्रम | 7/30 |
| **ऋ** | |
| ऋजुमति | 1/23 |
| ऋजसूत्र | 1/33 |
| **ए** | |
| एकक्षेत्रावगाहस्थित | 8/24 |
| एकजीव | 5/8 |
| एकत्व (अनुप्रेक्षा) | 9/7 |
| एकत्ववितर्क | 9/39 |
| एकद्रव्य | 5/6 |
| एकपल्योपमस्थिति | 3/29 |
| एकप्रदेशादि | 5/14 |
| एकयोग | 9/40 |
| एकाग्रचिन्तानिरोध | 9/27 |
| एकाश्रय | 9/41 |
| एरण्डबीजवत् | 10/7 |
| एषणा | 9/5 |
| **ऐ** | |
| ऐरावत | 3/10;3/27;3/37 |
| ऐशान | 4/19;4/29 |
| **औ** | |
| औदयिक | 2/1 |
| औदारिक | 2/36 |
| औपपादिक | 2/46;2/53;4/27 |
| औपशमिक | 2/1 |
| औपशमिकादि | 10/3 |
| **क** | |
| कन्दर्प | 7/32 |
| कर्मभूमि | 3/37 |
| कर्मयोग | 2/25 |
| कर्मयोग्य | 8/2 |
| कल्प | 4/23 |
| कल्पातीत | 4/17 |
| कल्पोपपन्न | 4/3;4/17 |
| कषाय | 2/6;3/5;6/8;8/1;8/9 |
| कषाय (वेदनीय) (षोडश) | 8/9 |
| कषायोदय | 6/14 |
| काङ्क्षा | 7/23 |
| कापिष्ठ | 4/19 |

| | | | |
|---|---|---|---|
| कामतीव्राभिनिवेश | 7/28 | कृमि | 2/23 |
| काय | 5/1;6/1 | केवल | 1/19;1/29;8/6;8/7;10/1 |
| काय क्लेश | 9/19 | केवल ज्ञान | 10/4 |
| काय प्रवीचार | 4/7 | केवल दर्शन | 10/4 |
| काय योग | 9/40 | केवलिन् | 6/13;9/38 |
| काय स्वभाव | 7/12 | केशरिन् | 3/14 |
| कारित | 6/8 | कोटिकोटि | 8/14 |
| कारुण्य | 7/11 | कौत्कुच्य | 7/32 |
| कार्मण | 2/36 | क्रिया | 5/22;6/5 |
| काल | 1/8;5/22;5/29;10/9 | क्लिश्यमान | 7/11 |
| काल विभाग | 4/14 | क्रोध | 8/9 |
| कालातिक्रम | 7/36 | क्रोध प्रत्याख्यान | 7/5 |
| किम्पुरुष | 4/11 | क्षपक | 9/44 |
| किन्नर | 4/11 | क्षयोपशमनिमित्त | 1/22 |
| किल्विषिक | 4/4 | क्षान्ति | 6/12 |
| कीर्ति | 3/19 | क्षायिक | 2/1 |
| कुप्य | 7/29 | क्षिप्र | 1/16 |
| कुल | 9/24 | क्षीणमोह | 9/45 |
| कुलालचक्र | 10/7 | क्षुत् | 9/9 |
| कुशील | 9/46 | क्षेत्र | 1/8;1/25;3/10;7/29;10/9 |
| कूटलेखक्रिया | 7/26 | क्षेत्र वृद्धि | 7/30 |
| कृत | 6/8 | **ग** | |
| कृत्स्न | 5/13 | गङ्गा | 3/20 |
| कृत्स्नकर्मविप्रमोक्ष | 10/2 | गङ्गा सिन्ध्वादि | 3/23 |

गण 9/24

गति 2/6;2/26;4/21;8/11;10/9

गत्युपग्रह 5/17

गन्ध 2/20;8/11

गन्धर्व 4/11

गन्धवत् 5/23

गर्दतोय 4/25

गर्भ 2/31;2/33

गर्भसम्मूर्च्छनज 2/45

गुण 5/41

गुण साम्य 5/35

गुण वत् 5/38

गुणाधिक 7/11

गुप्ति 9/2;9/4

गोत्र 8/4;8/16;8/19;8/25

ग्रह 4/12

ग्रैवेयक 4/19;4/23;4/32

ग्लान 9/24

**घ**

घन 3/1

घ्राण 2/19

**च**

चक्षुष् 1/19;2/19;8/7

चतुर्णिकाय 4/1

चतुर्दशनदीससहस्रपरिवृता 3/23

चर्या 9/9

चाक्षुष 5/28

चारित्र 2/3;2/5;9/2;
9/18;9/23;10/9

चारित्र मोह 6/14;9/15

चारित्र मोहनीय 8/9

चिन्ता 1/12

**छ**

छद्मस्थ 9/10

छाया 5/24

छेद 7/15;9/22

छेदोपस्थापना 9/18

**ज**

जगत्स्वभाव 7/12

जघन्यगुण 5/34

जन्म 2/31

जम्बूद्वीप 3/7;3/9;3/32

जयन्त 4/19

जरायुज 2/33

जाति 8/11

जिन 9/11;9/45

जीव 1/4;2/1;2/27;
5/3;5/15;5/21;6/7;8/2

जीवत्व 2/7
जीवित 5/20
जीविताशंसा 7/37
जुगुप्सा 8/9
जोषिता 7/22
ज्ञात (भाव) 6/6
ज्ञान 1/9;2/4;2/5;9/23;10/9
ज्ञानावरण 6/10;8/4;9/13
ज्ञानावरण क्षय 10/1
ज्योतिष्क 4/5;4/12;4/40

**त**

तत्त्व 1/4
तत्त्वार्थश्रद्धान 1/2
तत्स्थैर्यार्थ 7/3
तथा /30
तथागतिपरिणाम 10/6
तदनन्तर 10/5
तदनन्तभाग 1/28
तदर्थ 2/20
तदर्द्धविष्कम्भ 3/15
तदष्टभाग 4/41
तदादि 2/43
तदाहृतादान 7/27
तदुभय 8/9;9/22
तद्भाव 5/31;5/42
तद्विप्रयोग 9/30
तद्विभाजिन् 3/11
तद्द्विगुणद्विगुण 3/18
तन्निवासिनी 3/19
तन्मध्यग 3/20
तन्मनोहराङ्गनिरीक्षणत्याग 7/7
तपनीय 3/12
तपस् 9/3;9/6;9/22
तपस्विन् 9/24
तमःप्रभा 3/1
तमस् 5/24
ताप 6/11
तिगिञ्छ 3/14
तिर्यग्योनिज 3/30
तिर्यग्व्यतिक्रम 7/30
तीर्थ 9/47;10/9
तीर्थकरत्व 6/24;8/11
तीव्रपरिणाम 6/14
तीव्र (भाव) 6/6
तुल्य 3/26
तुल्य विस्तार 3/13
तुषित 4/25
तृणस्पर्श 9/9

तेजस् 3/13
तैजस 2/36;2/38;2/48
तैर्यग्योन 6/16;8/10
त्याग 9/6
त्रयस्त्रिंशत् 3/6
त्रस 2/12;2/14;8/11
त्रायस्त्रिंश 4/4;4/5
त्रिपल्योपम 3/38;4/28
त्रिपल्योपम स्थिति 3/29
(योग) 9/40
त्रिवेद 2/52
त्रिंशत् 3/2
सागरोपम 8/14;8/17

**द**

दंशमशक 9/9
दक्षिण 3/26
दर्शन 2/4;2/5;9/23
दर्शन मोह 6/13;9/14
दर्शन मोहनीय 8/9
दर्शन मोहक्षपक 9/45
दर्शन विशुद्धि 6/24
दर्शनावरण 6/10;8/4
दर्शनावरण क्षय 10/1
दशयोजनावगाह 3/16
दशवर्षसहस्र 4/36
दशविकल्प 4/3
दातृ विशेष 7/39
दान 2/4;6/12;7/38;8/13
दास 7/29
दासी 7/29
दिक्कुमार 4/10
दिग्व्रत 7/21
दु:ख 5/20;6/11;7/10
दु:पक्वहार 7/35
देव 1/21;2/34;2/51;4/1;6/13
देवकुरवक 3/29
देवकुरु 3/37
देवी 3/19
देश 7/2
देशविरत 9/34;9/35
देशव्रत 7/21
देह 3/3
दैव 6/20;8/10
द्युति 4/20
द्रव्य 1/5;1/26;5/2;5/38
द्रव्याश्रय 5/41
द्रव्येन्द्रिय 2/17
द्रव्यलक्षण 5/29

द्रव्यविशेष 7/39
द्विचरम 4/26
द्वितीय 9/42
द्वितीयादि 4/35
द्विपल्योपमस्थिति 3/29
द्वीन्द्र 4/6
द्वीन्द्रियादि 2/14
द्वीप 4/28
-कुमार 4/10
-समुद्र 3/7
द्वेष 7/8
द्व्यधिकादिगुण 5/37

**ध**

धन 7/29
धर्म 5/1;5/8;5/13;5/17;
6/13;9/2;9/6
धर्मास्तिकायाभाव 10/8
धर्मोपदेश 9/25
धर्मस्वाख्यातत्व 9/7
धर्म्य 9/28;9/36
धातकीखण्ड 3/33
धान्य 7/29
धारण 1/15
धूम्रप्रभा 3/1
धृति 3/19
ध्यान 9/20;9/21;9/27
ध्रुव 1/16
ध्रौव्य 5/30

**न**

नक्षत्र 4/12
नदी 3/23
नपुंसक 2/50
नपुंसक वेद 8/9
नय 1/6;1/33
नरक 3/2
नरकान्ता 3/20
नव 1/19;4/31;4/32;8/5
नवभेद 2/2
नवतिशतभाग 3/32
नाग 4/28
नाग कुमार 4/10
नाग्न्य 9/9;9/15
नाम 1/5;6/22;8/4;8/16;
8/19;8/25
नाम (प्रत्यय) 8/24
नारक 1/21;2/34;2/50;
3/3;4/35;8/10
नारकायुष् 6/15

नारी 3/20
नि:शल्य 7/18
नि:शीलव्रतत्व 6/19
निक्षेप (चतुर्भेद) 6/9
नित्य 3/3;5/4;5/31
नित्यगति 4/13
निदान 7/37;9/33
निद्रा 8/7
निद्रानिद्रा 8/7
निबन्ध 1/26
निरुपभोग 2/44
निर्गुण 5/41
निर्ग्रन्थ 9/46
निर्जरा 1/4;8/23;9/3;9/7;10/2
निर्जरार्थ 9/8
निर्देश 1/7
निर्माण 8/11
निर्वृति 2/17
निवर्तना (द्विभेद) 6/9
निषद्या 9/9;9/25
निषध 3/11
निष्क्रिय 5/19
निसर्ग 1/32
निसर्ग (त्रिभेद) 9/9
निह्नव 6/10
नीचैर्गोत्र 6/25
नीचैर्वृत्ति 6/26
नीचैस् 8/12
नील 3/11
नृलोक 4/13
नृस्थिति 3/38
नैगम 1/33
न्यास 1/5
न्यासापहार 7/26

**प**

पङ्कप्रभा 3/1
पञ्चेन्द्रिया 2/15
पद्म 3/14
पद्मलेश्या 4/22
पर 2/37;2/39;4/9;6/9;9/29;9/38
परघात 8/11
परत:परत: 4/34
परत्व 5/22
परनिन्दा 6/25
परविवाहकरण 7/28
परव्यपदेश 7/36
परस्थ 6/11

परस्परोग्रह 5/21
परस्परोदीरितदु:ख 3/4
परा 2/6;4/39;8/14
परावर 3/38
परिगृहीतागमन 7/28
परिग्रह 4/21;7/17
परिग्रह विरति 7/1
परिणाम 3/3;5/22;5/42
परिवेदन 6/11
परिभोग 7/21
परिसोढव्य 9/8
परिहार 9/22
परिहार विशुद्धि 9/18
परीषह 9/8
परिहार जय 9/2
परोक्ष 1/11
परोपरोधाकरण 7/6
पर्यन्त 4/3
पर्ययवत् 5/38
पर्याप्ति 8/11
पल्योपम 4/33;4/39
पल्योपमस्थिति 3/19
पात्रविशेष 7/39
पाप 6/3;8/26
पारिणामिक 2/1;5/37
पारिषद 4/4
पिपासा 9/9
पिपीलिका 2/23
पिशाच 4/11
पीतलेश्या 4/22
पीतान्त 4/2
पुंवेद 8/9
पुण्डरीक 3/14
पुण्य 6/3;8/25
पुद्गल 5/1;5/5;5/10;5/14;
5/19;5/23;8/2
पुद्गलक्षेप 7/31
पुरस्कार 9/9
पुलाक 9/46
पुष्कर 3/17;3/18
पुष्करार्द्ध 3/34
पूर्व 4/6;6/5;9/41
पूर्वगा 3/21
पूर्वप्रयोग 10/6
पूर्वरतानुस्मरण (त्याग) 7/7
पूर्वविद् 9/37
पूर्वपूर्वपरिक्षेपिन् 3/8
पूर्वापरायत 3/11

पृच्छना 9/25
पृथक्त्व (वितर्क) 9/37
पृथिवी 2/13
पोत 2/33
प्रकीर्णक 4/4
प्रकीर्णक तारक 4/12
प्रकृति 8/3
प्रचला 8/7
प्रचलाप्रचला 8/7
प्रज्ञा 9/9;9/13
प्रतिक्रमण 2/22
प्रतिरूपकव्यवहार 7/27
प्रतिसेवना 9/47
प्रत्यक्ष 1/12
प्रत्यय 8/24
प्रत्याख्यान 8/9
प्रत्येकबुद्ध 10/9
प्रत्येकशरीर 8/11
प्रथम 3/15
प्रथमा 4/36
प्रदीपवत् 5/16
प्रदेश 2/38;5/8;8/3
प्रदेश विसर्प 5/16
प्रदेश संहार 5/16
प्रदोष 6/10
प्रभाव 4/20
प्रमत्तयोग 7/13
प्रमत्तसंयोग 2/49
प्रमत्तसंयत 2/41;9/34
प्रमाण 1/6;1/10
प्रमाणातिक्रम 7/29
प्रमाद 8/1
प्रमोद 7/11
प्रवचनभक्ति 6/24
प्रवचनवत्सलत्व 6/24
प्रवीचार 4/7
प्राक् 2/38;3/5;3/35;
4/23;9/21
प्राण 5/19
प्राणत 4/19
प्राणव्यपरोपण 7/13
प्रायश्चित्त (नव) 9/20
प्रेष्यप्रयोग 7/31
प्रोषधोपवास 7/21

**ब**

बकुश 9/46
बन्ध 1/4;5/24;5/33;
5/37;7/25;8/2

| | | | |
|---|---|---|---|
| बन्धच्छेद | 10/6 | भरत | 3/24;3/27;3/32;3/37 |
| बन्धन | 8/11 | भरतवर्ष | 3/10 |
| बन्धहेतु | 8/1 | भवन | 4/37 |
| बन्धहेत्वभाव | 10/2 | भवनवासिन् | 4/10 |
| बहिर् | 4/15 | भवप्रत्यय | 1/21 |
| बहु | 1/16 | भव्यत्व | 2/7;10/3 |
| बहु परिग्रह | 6/15 | भाव | 1/5;1/8;2/1 |
| बहु विध | 1/16 | भावना | 7/3 |
| बहु श्रुतभक्ति | 6/24 | भावेन्द्रिय | 2/18 |
| ब्रह्म | 4/19 | भाषा | 9/5 |
| ब्रह्मचर्य | 9/6 | भीरुत्वप्रत्याख्यान | 7/5 |
| ब्रह्मोत्तर | 4/19 | भूत | 4/11 |
| ब्रह्मलोकालय | 4/24 | भूतानुकम्पा | 6/12 |
| बह्वारम्भ | 6/15 | भूमि | 3/1;3/28 |
| बादरसाम्पराय | 9/12 | भेद | 5/24;5/26;5/27; |
| बालतपस् | 6/20 | | 5/28;6/5;8/5 |
| बालुकाप्रभा | 3/1 | भैक्ष्यशुद्धि | 7/6 |
| बाह्य (उपधि) | 9/26 | भोग | 2/4;8/13 |
| बाह्यतपस् | 9/19 | भ्रमर | 2/23 |
| बुद्धि | 3/19 | **म** | |
| बोधिदुर्लभ | 9/7 | मणिविचित्रपार्श्व | 3/13 |
| बोधितबुद्ध | 10/9 | मति | 1/9;1/12;1/26; |
| **भ** | | | 1/31;8/6 |
| भय | 8/9 | मतिपूर्व | 1/20 |

| | | | |
|---|---|---|---|
| मध्य | 3/9;3/17 | मान | 8/9 |
| मन:पर्यय | 1/9;1/23;1/25; | मानुष | 6/17;8/10 |
| | 1/28;8/6 | मानुषोत्तर | 3/35 |
| मन:प्रवीचार | 4/8 | माया | 6/16;8/9 |
| मनस् | 5/19 | मारणान्तिकी | 7/22 |
| मनस् (कर्म) | 6/1 | मार्गाच्वन | 9/8 |
| मनुष्य | 3/35;4/27 | मार्गप्रभावना | 6/24 |
| मनुष्यादि | 2/23 | मार्दव | 9/6 |
| मनोगुप्ति | 7/4 | माहेन्द्र | 4/19 |
| मनोज्ञ | 9/14;9/31 | मित्रानुराग | 7/37 |
| मनोज्ञेन्द्रियविषय | 7/8 | मिथ्यात्व | 8/9 |
| मन्द (भाव) | 6/6 | मिथ्यादर्शन | 2/6;8/1 |
| मरण | 5/20 | मिथ्योपदेश | 7/26 |
| मरणाशंसा | 7/37 | मिश्र | 2/1;2/32 |
| मल | 9/9 | मुक्त | 2/10 |
| महत् | 7/2 | मूर्च्छा | 7/17 |
| महातम:प्रभा | 3/1 | मूल | 3/13 |
| महापद्म | 3/14 | मेरुनाभि | 4/9 |
| महापुण्डरीक | 3/14 | मेरुप्रदक्षिणा | 4/13 |
| महाशुक्र | 4/19 | मैत्री | 7/11 |
| महाहिमवत् | 3/11 | मैथुन | 7/16 |
| महोरग | 4/11 | मोक्ष | 1/4;10/2 |
| मात्सर्य | 6/10;7/36 | मोक्ष मार्ग | 1/1 |
| माध्यस्थ्य | 7/11 | मोक्ष हेतु | 9/29 |

मोहक्षय 10/1
मोहनीय 8/4;9/15
मौखर्य 7/32
म्लेच्छ 3/36

**य**

यक्ष 4/11
यथाख्यात 9/18
यथानाम 8/22
यदृच्छोपलब्धि 1/32
यशस्कीर्ति 8/11
याचना 9/9;9/15
योग 6/1;6/8;6/12;8/1
योगदुष्प्रणिधान 7/33
योगसङ्क्रान्ति 9/44
योगवक्रता 6/22
योगविशेष 8/24
योजन 3/17;3/24
योजनशतसहस्रविष्कम्भ 3/9
योजनसहस्रायाम 3/15
योनि 3/32

**र**

रक्ता 3/20
रक्तोदा 3/20
रजतमय 3/12
रति 9/9
रत्नप्रभा 3/1
रम्यकवर्ष 3/10
रस 2/20;8/11
रसन 2/19
रसपरित्याग 9/19
रसवत् 5/23
रहोऽभ्याख्यान 7/26
राक्षस 4/11
रागवर्जन 7/8
रुक्मि 3/11
रूक्षत्व 5/33
रूपप्रवीचार 4/8
रूपानुपात 7/31
रूपिन् 1/27;5/5
रूप्यकूला 3/20
रोग 9/9
रोहित् 3/20
रोहितास्या 3/20
रौद्र 9/28;9/35

**ल**

लक्षण 2/8
लक्ष्मी 3/19
लब्धि 2/5;2/18

लब्धिप्रत्यय 2/47
लवणोदादि 3/7
लान्तव 4/19
लाभ 2/4;8/13
लिङ्ग 2/6;10/6
लेश्या 2/6;4/2;9/47
लेश्या विशुद्धि 4/20
लोक 9/7
लोकपाल 4/4;4/5
लोकाकाश 5/12
लोभ 8/9
लोभप्रत्याख्यान 7/5
लौकान्तिक 4/24;4/42


**व**


वध 6/11;7/25;9/9
वनस्पति 2/13
वनस्पत्यन्त 2/22
वर्ज्य 4/5
वर्ण 2/20;8/11
वर्णवत् 5/23
वर्तना 5/22
वर्ष 3/25
वर्षधर 3/25
वर्षधर पर्वत 3/11
वलयाकृति 3/8
वह्नि 4/25
वाक् 5/19
वाक् (कर्म) 6/1
वाग्गुप्ति 7/4
वाचना 9/25
वात 3/1
वात कुमार 4/10
वायु 3/13
वास्तु 7/29
विकल्प 8/9;9/47
विक्रिया 3/3
विघ्नकरण 6/27
विग्रहगति 2/25;2/28
विचिकित्सा 7/23
विजय 4/19
विजयादि 4/26;4/32
वितर्क 9/43
विदेह 3/31;3/37
विदेहवर्ष 3/10
विदेहान्त 3/25
विद्युत्कुमार 4/10
विधान 1/7
विधिविशेष 7/39

| | | | |
|---|---|---|---|
| विनय (चतुर्भेद) | 9/20 | वीर्य विशेष | 6/6 |
| विनयसम्पन्नता | 6/24 | वृत्त | 3/9 |
| विपरीत | 6/23;9/31 | वृत्तिपरिसङ्ख्यान | 9/19 |
| विपर्यय | 1/31;6/26 | वृद्धि | 3/27 |
| विपाक | 8/21 | वृष्येष्टरस (त्याग) | 7/7 |
| विपाक विचय | 9/36 | वेदना | 3/3;9/32 |
| विपुलमति | 1/23 | वेदनीय | 8/4;8/18;9/16 |
| विप्रमोक्ष | 10/2 | वैक्रियिक | 2/36;2/46 |
| विप्रयोग | 9/30 | वैजयन्त | 4/19 |
| विमोचितावास | 7/6 | वैडूर्यमय | 3/12 |
| विरत | 9/45 | वैमानिक | 4/16 |
| विरुद्धराज्यातिक्रम | 7/28 | वैयावृत्त्यकरण | 6/24 |
| विविक्तशय्यासन | 9/19 | वैयावृत्त्य (दश) | 9/20 |
| विवेक | 9/22 | वैराग्यार्थ | 7/12 |
| विशुद्ध | 2/49 | व्यञ्जन | 1/18 |
| विशुद्धि | 1/24;1/25 | व्यञ्जनसंक्रान्ति | 9/44 |
| विषय | 1/25 | व्यन्तर | 4/5;4/11;4/38 |
| विषय संरक्षण | 9/35 | व्यय | 5/30 |
| विष्कम्भ | 3/32 | व्यवहार | 1/33 |
| विसंवादन | 6/22 | व्युत्सर्ग | 9/22 |
| विहायोगति | 8/11 | व्युत्सर्ग (द्विभेद) | 9/20 |
| वीचार | 9/44 | व्युपरतक्रियानिवर्ति | 9/39 |
| वीतराग | 9/10 | व्रत | 7/1;7/24 |
| वीर्य | 2/4;8/13 | व्रतसम्पन्न | 7/21 |

| | | | |
|---|---|---|---|
| व्रतिन् | 7/18 | शेष | 1/22;2/35;2/52;3/32; |
| व्रत्यनुकम्पा | 6/12 | | 4/8;4/22;4/27;4/28; |
| **श** | | | 8/20;9/16 |
| शक्तितः तपस् | 6/24 | शैक्ष्य | 9/24 |
| शक्तितः त्याग | 6/24 | शोक | 6/11;8/9 |
| शङ्का | 7/23 | शौच | 6/12;9/6 |
| शतार | 4/19 | श्रावक | 9/45 |
| शब्द | 1/33;2/20;5/24 | श्री | 3/19 |
| शब्दानुपात | 7/31 | श्रुत | 1/9;1/20;1/26;1/31 |
| शब्दप्रवीचार | 4/8 | | 2/21;6/13;8/6;9/43;9/47 |
| शय्या | 9/9 | श्रोत्र | 2/19 |
| शरीर | 2/36;4/21;5/19;8/11 | **ष** | |
| शर्कराप्रभा | 3/1 | षट्समय | 3/27 |
| शिखरिन् | 3/11 | षड्विंशतिपञ्चयोजनशतविस्तार | 3/24 |
| शीत | 2/32;9/9 | **स** | |
| शील | 7/24 | संक्लिष्टासुरोदीरितदुःख | 3/5 |
| शीलव्रतानतिचार | 6/24 | संयम | 9/6;9/47 |
| शुक्र | 4/19 | संयमासंयम | 2/5;6/20 |
| शुक्ल (ध्यान) | 9/28;9/37 | संयोग (द्विभेद) | 6/9 |
| शुक्ललेश्या | 4/22 | संरम्भ | 6/8 |
| शुभ | 2/49;6/3;6/23;8/11 | संवर | 1/4;9/1;9/7 |
| शुभनामा | 3/7 | संवृत्त | 2/32 |
| शुभायुः | 8/25 | संवेग | 6/24 |
| शून्यागारवास | 7/6 | संवेगार्थ | 7/12 |

| | | | |
|---|---|---|---|
| संसार | 9/7 | सत्त्व | 3/6;7/11 |
| संसारिन् | 2/10;2/12;2/28 | सदसतोरविशेष | 1/32 |
| संस्थान | 5/24;8/11 | सदृश | 5/35 |
| संस्थानविचय | 9/36 | सद्गुणाच्छादन | 6/25 |
| संहनन | 8/11 | सद्वेद्य | 6/12;8/8;8/25 |
| सङ्ख्येय | 5/10 | सधर्माविसंवाद | 7/6 |
| सङ्ख्येय काल | 3/31 | समनस्क | 2/11;2/24 |
| संग्रह | 1/33 | समभिरूढ | 1/33 |
| सङ्घ | 6/13;9/24 | समारम्भ | 3/8 |
| सङ्घात | 5/26;5/28;8/11 | समिति | 1/2;9/5 |
| सञ्ज्वलन | 8/9 | सम्प्रयोग | 9/30 |
| सञ्ज्ञा | 1/12 | सम्मूर्च्छन | 2/31;2/35 |
| सञ्ज्ञिन् | 2/24 | सम्मूर्च्छिन् | 2/50 |
| सकषाय | 6/4 | सम्यक्त्व | 2/5;6/21;8/9;10/4 |
| सकषायत्व | 8/2 | सक्यक्चारित्र | 1/1 |
| सचित्त | 2/32 | सम्यग्ज्ञान | 1/1 |
| सचित्तनिक्षेप | 7/36 | सम्यग्दर्शन | 1/1;1/2 |
| सचित्तसम्बन्ध | 7/35 | सम्य ष्टि | 7/23;9/45 |
| सचित्तसम्मिश्र | 7/35 | सम्यग्योगनिग्रह | 9/4 |
| सचित्तापिधान | 7/36 | सरागसंयम | 6/20 |
| सत् | 1/8;5/29;5/30 | सरागसंयमादि | 6/12 |
| सत्कार | 9/9 | सरित् | 3/20 |
| सत्कारपुरस्कार | 9/15 | सर्वद्रव्यपर्याय | 1/29 |
| सत्य | 9/6 | सर्वात्मप्रदेश | 8/24 |

| | |
|---|---|
| सर्वार्थसिद्धि | 4/19;4/32 |
| सल्लेखना | 7/22 |
| सवितर्क | 9/41 |
| सवीचार | 9/41 |
| ससामानिकपरिषत्क | 3/19 |
| सहस्रार | 4/19 |
| साकारमन्त्रभेद | 7/26 |
| सागरोपम | 3/6;4/28;4/29;4/42 |
| साधन | 1/7 |
| साधु | 9/24 |
| साधुसमाधि | 6/24 |
| साध्य | 9/47;10/9 |
| सानत्कुमार | 4/19;4/30 |
| सामायिक | 4/4;7/21;9/18 |
| साम्परायिक | 6/4 |
| सारस्वत | 4/25 |
| सिद्धत्व | 10/4 |
| सिद्धि | 5/32 |
| सिन्धु | 3/20 |
| स्निग्धत्व | 5/33 |
| सीता | 3/20 |
| सीतोदा | 3/20 |
| सुख | 4/20;5/20 |
| सुखानुबन्ध | 7/37 |
| सुपर्णकुमार | 4/10;4/28 |
| सुभग | 8/11 |
| सुवर्ण | 7/29 |
| -कूला | 3/20 |
| सुस्वर | 8/11 |
| सूक्ष्म | 2/37;8/11;8/24 |
| सूक्ष्म क्रियाप्रतिपाति | 9/39 |
| सूक्ष्म साम्पराय | 9/10;9/18 |
| सूर्याचन्द्रमसौ | 4/12 |
| सेतर | 1/16;2/32;8/11 |
| सौक्ष्म्य | 5/24 |
| सौधर्म | 4/19;4/29 |
| स्कन्ध | 5/25 |
| स्तनितकुमार | 4/10 |
| स्तेनप्रयोग | 7/27 |
| स्तेय | 7/15;9/35 |
| स्तेय विरति | 7/1 |
| स्त्यानगृद्धि | 8/7 |
| स्त्री | 9/9;9/15 |
| स्तेय वेद | 8/9 |
| स्तेय रागकथाश्रवण(त्याग) | 7/7 |
| स्थापना | 1/5 |
| स्थावर | 1/13;2/12 |
| स्थिति | 1/7;3/6;4/20;4/28; |

| | | | |
|---|---|---|---|
| | 8/3;8/14 | **ह** | |
| स्थित्युपग्रह | 5/17 | हरिकान्ता | 3/20 |
| स्थिर | 8/11 | हरित | 3/20 |
| स्थौल्य | 5/24 | हरिवर्ष | 3/10 |
| स्नातक | 9/46 | हारिवर्षक | 3/29 |
| स्पर्श | 2/20;8/11 | हास्य | 8/9 |
| स्पर्शन | 1/8;2/19 | हास्य प्रत्याख्यान | 7/5 |
| स्पर्शप्रवीचार | 4/8 | हिंसा | 7/9;7/13;9/35 |
| स्मृति | 1/12 | हिंसा विरति | 7/1 |
| स्मृतिसमन्वाहार | 9/30 | हिमवत् | 3/11 |
| स्मृत्यनुपस्थान | 7/33;7/34 | हिरण्य | 7/29 |
| स्मृत्यन्तराधान | 7/30 | हीनाधिकमानोन्मान | 7/27 |
| स्वतत्त्व | 2/1 | हेममय | 3/12 |
| स्वभावमादेव | 2/1 | हैमवत | 3/29 |
| स्वशरीरसंस्कार (त्याग) | 7/7 | हैमवतवर्ष | 3/10 |
| स्वाध्याय (पञ्च) | 9/20 | हैरण्यवतवर्ष | 3/10 |
| स्वामित्व | 1/7 | ह्रद | 3/14;3/15;3/18 |
| स्वामिन् | 1/25 | ह्रास | 3/27 |
| स्वातिसर्ग | 7/38 | ह्री | 3/19 |